आचार्यविष्णुगुप्तविरचितं

कौटलीयार्थशास्त्रम्

पञ्चटीकोपेतम्

(प्रथमभागस्य प्रथमं सम्पुटम्)

सम्पादकः

आचार्यश्रीविश्वनाथशास्त्रिदातारः

सम्पूर्णानन्द संस्कृत विश्वविद्यालयः
वाराणसी

2-3

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 130]

KAUṬALĪYAMARTHAŚĀSTRAM

OF

ĀCĀRYA VIṢṆUGUPTA

[VOLUME ONE, PART ONE]

With Five Commentaries

'ŚRĪMŪLĀ'

BY

T. GAṆAPATI ŚĀSTRĪ

'Vaidīkasiddhāntasaṁrakṣiṇī' & 'Jayamaṁgalākroḍapatram'

BY

ŚRĪ PAṆḌITARĀJA RĀJEŚVARA ŚĀSTRĪ DRAVIḌA

'JAYAMAṀGALĀ'

BY

ŚRĪ ŚAṀKARĀRYA

&

'NĪTINIRṆĪTI'

BY

ŚRĪ YOGGHAMĀCĀRYA

EDITED BY

ŚRĪ VIŚVANĀTHA ŚĀSTRĪ DĀTĀRA

Ex. Head of Department,

Prācīnarājaśāstrārthaśāstra-Department

Sampurnanand Sanskrit University

Varanasi



VARANASI

1991

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

◻

[Published under the Rare Texts Publication Scheme of Sarasvati Bhavana Library with financial assistance provided by University Grants Commission.]

◻

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi–221 002.

◻

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi–221 002.

◻

First Edition, 1000 Copies
Price Rs. 140·00

◻

Printed by—
VIJAYA PRESS,
Sarasauli, Varanasi,

सरस्वतीभवन-ग्रन्थमाला

[१३०]

आचार्यविष्णुगुप्तविरचितं

कौटलीयमर्थशास्त्रम्

[प्रथमभागस्य प्रथमं सम्पुटम्]

म० म० टी० गणपतिशास्त्रिकृतया 'श्रीमूला'व्याख्यया

पण्डितराजराजेश्वरशास्त्रिद्रविडकृताभ्यां 'वैदिकसिद्धान्तसंरक्षिणी'-

'जयमङ्गलाक्रोडपत्रम्'-व्याख्याभ्यां

श्रीशङ्करार्यकृतया 'जयमङ्गला'व्याख्यया

श्रीयोग्घमाचार्यकृतया 'नीतिनिर्णीति'व्याख्यया च

विभूषितम्

सम्पादकः

'शास्त्ररत्नाकर'-श्रीविश्वनाथशास्त्रिदातारः

पूर्वविभागाध्यक्षः,

प्राचीनराजशास्त्रार्थशास्त्रविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणसी



वाराणस्याम्

२०४८ तमे वैक्रमाब्दे   १९१३ तमे शकाब्दे   १९९१ तमे ख्रैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

◻

[सरस्वतीभवनपुस्तकालयस्य प्रकाशनसम्बन्धिविशेषयोजनान्तर्गतं
विश्वविद्यालयानुदानायोगतः प्राप्तवित्तीयसाहाय्येन प्रकाशितम्]

◻

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

◻

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

◻

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्— १४०=०० रूप्यकाणि

◻

मुद्रकः—
विजय-प्रेस,
सरसोली, वाराणसी।

प्ररोचना

बह्वोःकालात् प्रतीक्ष्यमाणा दिवङ्गतैः **पण्डितराजराजेश्वरशास्त्रिद्राविडैः** सम्पादिता कौटलीयार्थशास्त्रकृतिरधुना प्रकाश्यतामानीयत इति महान्तं परितोषमनुभवामि। आजीवनं पण्डितवर्यैरस्य महतो ग्रन्थस्य वैदिकसिद्धान्तानुसारं निर्वचने प्रायाति। तैश्च जयमङ्गलाख्या प्राचीना टीकाऽपि स्वक्रोडपत्राख्येण टिप्पणेन संवलिता। श्रीयोग्घमाचार्यप्रणीता **'नीतिनिर्णीतिनाम्नी'** प्राचीना टीका, श्रीगणपतिशास्त्रिभिर्विरचिता **'श्रीमूला'** टीका चाप्यत्र सङ्गृहीते। आसां टीकानां समुच्चयेनार्थशास्त्रग्रन्थस्य गूढा अर्थाः सुखं ग्राह्याः।

खेदस्यायं विषयः पण्डितराजानां परिश्रमं तेषां जीवनकाले मुद्रणावसरं नालभत, तेषां प्रमुखैः शिष्यैः **श्रीविश्वनाथशास्त्रिदातारैः** पाण्डुलिपेष्टीकाभिः संयोजनं सादरं सपरिश्रमं च सम्पन्नम्। स्वकीया सुदीर्घतरा भूमिकाऽपि विरचिता।

अनया भूमिकया सर्वांशतः सह ऐक्यमत्यमादधानोऽपि अस्याः प्रौढिं सोपपत्तित्वञ्च प्रशंसितुमर्हामि। प्रस्तुतस्यार्थशास्त्रसंस्करणस्येदमेव वैशिष्ट्यं यत्तस्य निर्वचनस्य सर्वे पक्षाः समुद्घाटिताः। तेन विदुषां स्वकीयमतनिर्धारणे सौकर्यं भविष्यति। श्रीदातारशास्त्रिणो द्वौ सहयोगिनो **श्रीजगन्नाथशास्त्रितैलङ्ग-श्रीलक्ष्मीकान्तखनङ्गौ** आस्ताम्। तयोः श्रमोऽधुना सफलः।

कौटलीयमिति अभिधानमधुना विदुषां बहुतरेणादरास्पदम्। कौटलीयमित्येवाभिधानमाद्रियन्ते बहुशो बुधाः। कुटलगोत्रे विष्णुगुप्तस्य जातत्वात् कौटल्यस्य कौटलीयस्योपपन्नत्वात्। भवतु, कौटिलीयमर्थशास्त्रं कतिभिश्चित् पाश्चात्त्यैः छलयुक्तिप्रधानं राजशास्त्रमिति मन्यते; किन्तु शास्त्ररीत्या समग्रपरीक्षणेन चायं भ्रम एव प्रतीयते। यतो हि श्रम एवास्य शास्त्रस्य मूलम्। राज्ञा विद्याविनीतेनैव वर्तितव्यमिति प्रोक्तवता कौटल्येनैवमुक्तम्—**"श्रुताद्धि प्रज्ञोपजायते, प्रज्ञया योगः, योगादात्मवत्ता, इति विद्यासामर्थ्यम्"**।

अनेन वचनेन स्वतःसिद्धं कौटलीयार्थशास्त्रस्य आत्मविद्यामूलत्वम्। वस्तुतो दृष्टस्यादृष्टस्य च, लौकिकस्य लोकोत्तरस्य च, दैहिकस्य आत्मिकस्य च जगतः पार्थक्यं शास्त्रकारैर्न विचीयते स्म। एतादृशोरुभयोर्युग्मयोः परस्परमुपकारित्वमेवाभिमतमस्ति। पण्डितराजकृतः श्रम इममेवार्थं समुपपादयतीति नो हर्षः।

मन्ये, कौटलीयार्थशास्त्रस्य प्रस्तुतं संस्करणं प्राचीनराजशास्त्राध्ययने काञ्चन नूतनां सरणिं विवरिष्यति। साम्प्रतं चतुर्षु खण्डेषु विभक्तोऽयं ग्रन्थः प्रकाश्यतां गच्छतीति महते परितोषाय। अत्र संलग्नाः सर्वे पण्डिता अभिनन्दनार्हाः।

वाराणस्याम्,
मौनी-अमावास्यायाम्,
२०४७ वैक्रमाब्दे
(१५-१-१९९१ खैस्ताब्दे)

विद्यानिवासमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

प्राक्कथनम्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन सरस्वतीभवनस्थानां महत्त्वपूर्णानामप्रकाशितानां पाण्डुलिपीनां मुद्रणाय तथा दुर्लभानां मुद्रितग्रन्थानां पुनः प्रकाशनाय चैका योजना पञ्चमपञ्चवर्षीययोजनायां विश्वविद्यालयानुदानायोगसमक्षं प्रेषिताऽऽसीत्। आयोगेन च नियोजितस्य निरीक्षकमण्डलस्य संस्तुतिमनुसृत्य प्रकाश्यमानग्रन्थानां महत्तां चोररीकृत्य स्वीकृतिः प्रदत्ता। अस्यां प्रक्रियायां वर्षद्वयं व्यतीतम्। अवशिष्टयोजनावधेरल्पत्वात्, अत्रत्यप्रकाशनविभागे कार्यबाहुल्यात्, योजनायाश्च सरस्वतीभवनद्वारा प्रस्तुतत्वात् कार्यस्य शीघ्रमेव सम्पादनार्थं निम्नाङ्कितानां विश्वविद्यालयीयविदुषामेका समितिर्निर्मिता—

अध्यक्षः

प्रो० बदरीनाथशुक्लः (कुलपतिः)

सदस्याः

१. प्रो० जगन्नाथोपाध्यायः (पालिविभागाध्यक्षः, श्रमणविद्यासङ्कायाध्यक्षश्च)
२. श्रीव्रजवल्लभद्विवेदः (साङ्ख्ययोगतन्त्रागमविभागाध्यक्षः)
३. डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री' (निदेशकः, अनुसन्धानसंस्थानस्य)
४. श्रीबलिरामशास्त्री भारद्वाजः (उपपुस्तकाध्यक्षः, हस्तलिखितानुभागे)
५. श्रीजनार्दनपाण्डेयः (सरस्वतीभवनस्थः)
६. श्रीलक्ष्मीनारायणतिवारी (पुस्तकाध्यक्षः, समितेः संयोजकः)

संयोजकस्य श्रीलक्ष्मीनारायणतिवारिणः सततप्रयत्नेन अनया समित्या प्रकाशनार्हग्रन्थानां चयनम्, तेषां सम्पादनव्यवस्था, मुद्रणव्यवस्था च तत्परतया सम्यक् प्रारब्धा।

सम्पाद्यमानग्रन्थेषु संस्कृतपालिवाङ्मयस्य प्रायः समस्तप्रमुखविषयाणां महत्त्वपूर्णाः समुपयोगिनश्च ग्रन्थास्समावेशिताः, तत्तत्सम्पादनकार्यभारो विश्वविद्यालयस्य विद्वद्भ्यः, सम्बद्धविषयाणां कतिपयेभ्यो बहिष्ठविद्वद्भ्यश्च समार्प्यत।

अस्यामेव योजनायां प्रकाश्य प्रस्तूयत इदं कौटलीयमर्थशास्त्रं बहुभिरतिप्रसिद्धटीकाटिप्पणीसंवलितम्, **शास्त्ररत्नाकरविश्वनाथशास्त्रिदातारेण** सम्पादितम्।

अर्थशास्त्रं हि पूर्वाचार्यैर्भारतदेशस्य सुखशान्तिसमृद्धये त्रिवर्गोन्नतये च निर्माय राष्ट्रस्य पुरतः समुपस्थापितम्। तद् अतिविस्तृततया दुरूहं जातम्, तत्रत्याः कतिपयेंऽशा उत्सन्नकल्पा अभूवन्निति कामसूत्रादिनिर्दिष्टहेतुभिर्ज्ञायते। आचार्यः कौटल्यः सम्पूर्णम् अर्थशास्त्रं वेदञ्च अधीत्य वैदिकमर्यादाया लोकयात्रासाधनत्वञ्चानुभूय तत्सङ्ग्रहभूतमेकम् अर्थशास्त्रं निर्मितवान्। यदर्थमुपजीव्य रामराज्यं धर्मराजराज्यं चन्द्रगुप्तमौर्यराज्यं च स्वर्णयुगायते। तदिदमर्थशास्त्रं पञ्चदशाधिकरणं सार्धशताध्यायं साशीतिप्रकरणशतं षट्सहस्रश्लोकात्मकमुपलभ्यते। तस्येयं प्रतिज्ञा "पृथिव्या लाभे

पालने च···इदमर्थशास्त्रं कृतम" (कौ० अ० १।१) इति। तच्च सर्वेष्वपि देशेष्वद्यावधि उत्कृष्टतमं चकास्तीति सर्वैराधुनिकैर्विपश्चिदपश्चिमैरपि सत्क्रियते।

अस्यार्थशास्त्रस्य परम्परायामध्ययनाध्यापनद्वारा कतिपयाष्टीका अपि बभूवुः, याः समवलोक्य जयमङ्गलाभिधेयां टीकां **श्रीशङ्करार्यो** निर्मितवानिति तट्टीकातो ज्ञायते। इयं टीका केवलं प्रथमाधिकरणे उपलब्धा १९५८ ई० वर्षे प्रकाशिता। **श्रीगणपतिशास्त्रिभिः** १९२४ ई० वर्षे अनन्तशयने राजकीयमुद्रणालये सम्पादनपूर्वकं 'श्रीमूला'ख्या स्वरचिता टीका प्रकाशिता।

'नीतिनिर्णीति'नाम्नी टीका **श्रीयोग्घमाचार्यविरचिता** २०१६ वै० संवत्सरे मुम्बापुरीस्थभारतीयविद्याभवनतः सिन्धीजैनग्रन्थमालाद्वारा प्राकाशि। एतट्टीका-त्रितयसत्त्वेऽपि न्यायव्याकरणादिशास्त्राध्ययनपरम्परावद् अर्थशास्त्राध्ययनपरम्परा भारतदेशे समभूदिति न दृश्यते। अत उत्कृष्टतममिदमर्थशास्त्रमधिकृत्य 'प्राचीन-भारतीयशासनपद्धतिप्रभृतिष्वनेकेषु ग्रन्थेषु विद्वद्भिर्नैके आक्षेपा उद्भाविताः। यतोऽस्य अप्रामाण्यं जनेषु जागर्ति। तन्निरासाय **"विश्वविद्यालय-अनुदान-आयोगेन"** इदमनुभूतं यत् स्वसाहाय्येन पदवाक्यप्रमाणपारावारीणा विद्वांसोऽर्थशास्त्रव्याख्यानाय प्रेरणीयाः। प्रातस्स्मरणीया गुरुचरणाः पद्मभूषणादिविविधविरुदावलीसमलङ्कृताः श्रीमतः **स्व० पण्डितराजराजेश्वरशास्त्रिद्रविडमहाभागाः** संस्कृतविश्वविद्यालया-धिकारिभिः एतदर्थं सानुरोधं प्रार्थिताः। एतैर्द्वादशवर्षाधिकवर्षमर्थशास्त्रमधीत्य राजनीतिवर्गं संस्थाप्य विद्यार्थिनोऽध्यापिताः। ततः 'वैदिकसिद्धान्तसंरक्षिणो'ति नाम निधाय अर्थशास्त्रं व्याख्यातम्। प्रायः अष्टमशताब्द्यां शङ्करार्यैः(शङ्कराचार्यैः) निर्मितां 'जयमङ्गलाम्' अधिकृत्य आधुनिकविद्वदुद्भाविताः शङ्का आन्वीक्षिकीद्वारेण निरस्य क्रोडपत्रमपि व्याख्यातम्।

अधीतेषु विद्यार्थिवृन्देषु शास्त्ररत्नाकरादिभूषाभूषणैः **पण्डितश्रीविश्वनाथ-शास्त्रिदातारैरधीत्य** गुरुचरणकृतं व्याख्यानम् अन्याश्च टीका हृदयङ्गमय्य तन्निर्देशा-नुसारेण 'वैदिकसिद्धान्तसंरक्षिणी-जयमङ्गलाक्रोडपत्रयोः' सङ्कलनं सम्पादनञ्च विहितम्। एतट्टीकाद्वयोपेतं 'श्रीमूला'दिटीकात्रितयसहितमर्थशास्त्रं प्रथमाधिकरण आदितः पञ्चमाध्यायान्तं विदुषां पुरत उपायनीक्रियते। आशास्यते यद् विद्वद्वरेण्या ग्रन्थ-रत्नमिदमादितोऽन्तपर्यन्तं समवलोड्य अधीति-बोधाचरणप्रचारणैः सर्वसाधारणजनेषु रुचिमुत्पाद्य एतद्देशस्य सुखशान्तिसमृद्धये सहयोगं प्रदास्यन्ति।

विस्तृतं टीकाग्रन्थं दातारशास्त्रिभिः सङ्क्षिप्य भूमिकायां सर्वोऽपि विषयः समालोचितः, यत्र नीतिलक्षणादिकं सर्वं स्फुटीभवति, भवति च शङ्कानां समाधानमपि। विश्वस्यतेऽग्रिमं सम्पुटमप्यचिरेण प्रकाशमेष्यति।

वाराणस्याम्,
कार्तिकपूर्णिमायाम्,
वि० सं० २०३७
(२२-११-१९८० खैस्ताब्दे)

बदरीनाथशुक्लः
तदातीन्तनः कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

सम्पादकीयं वक्तव्यम्

भारतवर्षस्य अभ्युन्नतिः वेदेन 'न मे स्तेनो जनपदे' इत्यादिना प्रदर्शिता। तत्परम्परा एतद्देशे पूर्वतनराज्येषु वंशपरम्परायां समुदीयते स्म। साम्प्रतं तु अस्यां शताब्द्यां विशेषतो भारतदेशे वर्तमानामशान्तिमनुरुद्ध्य तन्निवारणोपायं चिन्तयद्भिः श्रीगुरुदेवैः श्रीमद्भिः पण्डितराजराजेश्वरशास्त्रिद्रविडचरणैः राजशास्त्रचिन्तन-प्रचारणं विना देशे शान्तिर्न भविष्यतीति ज्ञात्वा प्रथमतो जयमङ्गलासहितः कामन्दकीय-नीतिसारः अमलनेरनगरस्थपुस्तकागारात् सम्प्राप्तः। तत्र 'विद्याप्रतिबद्धत्वाल्लोक-स्थितेः' इत्युपलभ्य श्रीचरणैः राजनीतिं पर्यालोचयितुं राजनीतिवर्गो वाराणसेये रामघट्टस्थिते व० शा० साङ्गवेदविद्यालये महाराजश्रीकाशीनरेशसान्निध्ये तत्कालीन-बिहारराज्यपालश्रीअणेकरकमलद्वारा पञ्चविंशतिवर्षेभ्यः पूर्वं संस्थापितः। तत्र गुरुवर्यं पं० स्व० हरिरामशास्त्रिशुक्ल-गणपतिशास्त्रिहेब्बार-रामचन्द्रशास्त्रिहोसमने-जयरामशास्त्रिशुक्ल-स्व० नटराजऐय्यरप्रभृतिभिः सह अहमपि प्रविष्टः। तत्र गुरुचरणैः महता श्रमेण नीतिसारः कण्ठस्थीकृत्य समुपस्थितनैकविधप्रश्नजालसमाधानपुरस्सरम् अध्यापितः। तत्र तत्र देशान्तरेषु गत्वा तैरस्माभिश्च राजशास्त्रं व्याख्यानमालाभिः संश्रावितं प्रसारितं च। सर्वेषां श्रोतॄणां रुचिं ज्ञात्वा 'राजनीतिशास्त्र का दिग्दर्शन', 'शान्ति का अग्रदूत' इति पुस्तकद्वयं प्रकाशितम्।

ततो गुरुभिः जयमङ्गलादिटीकोपेतं कौटलीयमर्थशास्त्रमध्यापितम्, तत्रोपवर्णितेन विषयेण अस्माभिः सर्वैरपि निरणायि यद् भारतदेशे वर्णाश्रमप्रधाने समेषामेकरूपता-सम्पादकं सत्त्वं धृतिभावापरपर्यायम् आसीत्, अस्ति च। एतदाश्रयं विना क्वचिदपि सुखं शान्तिः समृद्धिर्भ्रातृभावेन सर्वेषां सम्प्रदायानां मानवानां वाऽस्तित्वं च न भवितु-मर्हति। एतच्छास्त्रनिर्देशानुसारेण देशे विद्याप्रचारकार्यमेव नैतिकं प्राथमिकं कार्यं विदुषाम्, इति विज्ञाय अर्थशास्त्रस्य चर्चा पुनरपि चर्चिता। तत्र अनेकविधाः शङ्का आधुनिकैः समुपस्थापिताः, आन्वीक्षिकीमीमांसामर्यादया कार्यकारणभावविवेचनपुरस्सरं समाहिताः। एतदेवानुरुद्ध्य रामायण-महाभारत-पुराणादिग्रन्था अपि यदि समा-लोच्येरन्, तर्हि समाजस्य आन्ध्यं व्यपगतं भवेदिति ज्ञात्वा राजनीतिवर्गे प्रविष्टैः स्वकार्यारम्भः समालोचितः। तदानीमेव तत्कालीनकुलपतिश्रीसुरतिनारायणमणि-त्रिपाठिभिः साहाय्यं सम्प्रदाय विशेषतया प्रोत्साहिता गुरुचरणाः। ततः श्रीगौरीनाथ-शास्त्रिभिरुपकुलपतिभी राजनीतिवर्गे स्वयमुपस्थाय अर्थशास्त्रमधिकृत्य निबन्धः प्रकाशितो भवत्विति अभिप्रायः प्रकटितः। नवीनग्रन्थनिर्माणेऽस्माकं सामर्थ्यमननुभूय गुरुशिष्यसंवाद एव ग्रन्थरूपेण प्रकाशनीय इत्यपि अभ्यधायि। ततः पुनरपि आदितः अर्थशास्त्रं गुरुचरणैरध्यापितं व्याख्यानमालारूपेण। तत्र प्रथमाधिकरणे चतुर्दशा-ध्यायान्तमेव अध्ययनाध्यापनयोर्महान् समयः समतिक्रान्तः। तस्य सम्पादनं सङ्कलनञ्च

अनेन शरीरेण कर्तव्यमस्तीति गुरुचरणानामादेशः समभूत्। तमनुरुद्ध्य परिश्रमपुरःसरम् उक्तसंवादस्य सङ्कलनम् अनेकैः वर्षैः कृतमद्य विदुषां सेवायां कथञ्चन समुपस्थापयितुं प्राभवम्।

अर्थशास्त्रकर्ता चाणक्यस्तस्मिन् समये प्रादुर्भूतः, यत्र नीतिशास्त्रस्य विलोपप्रसक्त्या सह देशे सत्त्वगुणस्योन्मूलनमेव प्रसक्तमासीत्। अनेनैवाचार्येण सर्वाणि शास्त्राणि चतुरो वेदानधीत्य सत्त्वोन्मूलनकारणमनुशील्य आन्वीक्षिक्या सह त्रय्यादिविद्यानां संस्थापनं कृतम्। राज्यञ्च धर्मप्रधानं व्यवस्थापितम्, यद्धि ऐतिहासिकानां मतानुसारेणापि स्वर्णयुगायते स्म। अनेनैव सिद्धयति यद् अनेन आचार्येण पाटलिपुत्रमवस्थाय चन्द्रगुप्तं मौर्ये राज्यपदे समभिषिच्य स्वयं शमप्रधानः सन् सत्त्वमेव संस्थापितवान्। सोऽयमाचार्य इतः पूर्वं चतुर्विंशतिवर्षशतकपूर्वमवनीतलं भूषयामासेति न्यायवार्तिकभूमिकाकर्तृभिः उद्धृतात् चतुर्विंशतितमतीर्थङ्करजैनाचार्यवाक्याद् उन्नीतम्। अर्थशास्त्रस्य पदानि गुरुपरम्पराध्ययनाभावाद् दुरवगाहानीति ज्ञात्वा गुरुचरणैः अर्थशास्त्रस्य टीकाः सङ्कलिताः। तासु समग्रस्य अर्थशास्त्रस्य टीका (स्व० म० म०) पं० त० गणपतिशास्त्रिभिः प्रणीता दृष्टा।

एते काञ्चिमण्डलपतेः श्रीमूलरामवर्ममहाराजस्य कृपापात्राणि स्वं व्याख्यानं श्रीमूलेतिनाम्ना सम्पादितवन्तः।

जयमङ्गलानाम्नी टीका मद्रप्रान्ते प्रकाशिता। इयं कामन्दकीयटीकावाक्यसादृश्यात् प्रामाणिकत्वाच्च शङ्करार्यैरेव विरचितेति मन्यते। सापि केवलं प्रथमाधिकरण एव प्रकाशनभावं प्राप्ता। नीतिनिर्णीतिरपि केषुचित्स्थलविशेषेषु तदीयाभिप्रायं द्योतयति। सा सिन्धीजैनग्रन्थमालायामाचार्यजिनवरमुनिवरसङ्गृहीता उपलब्धा। एषैव स्वकीयपाठाख्याने सामग्री अभूत्।

एतदर्थशास्त्रस्य समस्तटीकासहितस्य प्रकाशनं अशक्यप्रायमस्तीति मन्वान एवासम्; परं श्रीजगन्नाथोपाध्याय–(पालिविभागाध्यक्षः) प्रभृतिविदुषां प्रोत्साहनमुपलभ्य वर्तमानश्रीकुलपतिभिरेतत् प्रकाशनं प्रतिज्ञायाहमादिष्टस्तदर्थम्।

अस्य समग्रस्य प्रकाशनं भागत्रयेण कर्तव्यम्। एकस्मिन् भागे सम्पुटद्वयं भविष्यतीत्यपि निर्णीतं गुरुचरणैः, कृतस्य व्याख्यानस्य अतिदीर्घत्वात्। तेष्विदं प्रथमाधिकरणं पञ्चाध्यायात्मकं सम्पुटं प्रथमं प्रकाशितं विदुषां मनांसि रञ्जयेदित्याशास्यते।

एतत्कार्यसम्पादने श्री पू० महाराजैः श्रीविभूतिनारायणसिंहमहाभागैः कृतेन प्रोत्साहनेन एतावद्दूरम् अहमागत इति तेषामुपकृतिं स्मरामि।

श्रीगुरुचरणव्याख्यानस्य सङ्कलितस्य शुद्धिः स्व० गुरुचरणैर्हरिरामशास्त्रिभिः शुक्लमहाभागैः सम्पादिता। तथैवाग्रे तैर्विधास्यत इत्याशायां स्थितस्तेषां वियोगेन खिन्नमनास्तेषां चरणौ स्मरन् तदुक्तिं शरणं मन्यमान आसम्।

एतत्सामग्रीसम्पादने साहाय्यं साङ्गवेदविद्यालयाध्यक्षैः श्रीरामचन्द्रशास्त्रि-होसमनेमहाभागैः पुस्तकं प्रदाय कृतम्, तथा गुरुपुत्राभ्यां श्रीविश्वेश्वरशास्त्रि-गणेश्वरशास्त्रिभ्यां पितृचरणानां कृतिः प्रकाश्यतां प्राप्नोतीति श्रुत्वा महता हर्षेण सर्वविधमपि साहाय्यं प्रादायीति तेषां समेषां उपकृतिं सर्वान् सभाजयामि।

मूलपाठं विभज्य तत्र तत्र शीर्षकं तदेव स्थापितं यद् एन्० एस्० वेङ्कटाचार्यविद्वद्भिः संयोजितमिति तानपि स्मरामि एतत्प्रसङ्गे। श्रीटोणपेगोपालाचार्यैस्तु प्रकाशनाय पुस्तकमेवार्थशास्त्रस्य समर्पितम्। इयं तेषामुपकृतिरपि स्मरणीया वर्तते।

सम्पादन-प्रकाशनकार्ये च श्रीलक्ष्मीकान्तशास्त्रिखनङ्ग–श्रीजगन्नाथशास्त्रि-तैलङ्गाभ्यां महान् परिश्रमः कृतो वर्तते। तदधमर्णतां भजमानस्तयोरुपकृतिं स्मरामि।

अस्य प्रकाशने प्रमादाद् अज्ञानाद् मुद्रकदोषाद् असौष्ठवाद् असामर्थ्याच्च अशुद्धयो जाताः प्रकाशनानन्तरमुपलब्धा वर्तन्ते। तदर्थं क्षमस्वेत्युक्तिं विनाऽन्य उपायो नास्ति। इयं प्रथमावृत्तिः, तत्र दोषा भविष्यन्त्येवेति ज्ञात्वा विद्वांसः पाठं शोधयित्वा अधीतिबोधाचरणप्रचारणैः समन्वेष्यन्तीमां कृतिमित्याशास्य विश्वेश-गुरुचरणौ नमन् विरमामीति।

विदुषां वशंवदः

विश्वनाथशास्त्रिदातारः

॥ श्रीगुरुः शरणम् ॥

विषयप्रवेशः

श्रीमतां विदुषां पुरतः कौटिलीयमर्थशास्त्रं सटीकमुपस्थितं वर्तते। सम्प्रति यावत्यष्टीका उपलभ्यन्ते, ताः समालोच्य अपरमपि व्याख्यानमपेक्षितमस्तीत्यनुभूतं गुरुवर्यैः पण्डितराजश्रीराजेश्वरशास्त्रिचरणैः। तैरध्यापितं यत् तच्छ्रुत्वा यथामति विषयं समीक्ष्य टीकाद्वयं विलिखितं सम्पादितं प्रथमाधिकरणे चतुर्दशाध्यायान्तम्। तत्रत्योंऽशः संक्षिप्य प्रस्तूयते।

टीका-प्रयोजनम्

प्राचीनराजशास्त्रनाम्ना व्यवहृते अर्थशास्त्रे आधुनिकैः पूर्वमनुद्भाविताः शङ्का उत्थाप्यन्ते। तासां समाधानायेदं टीकान्तरं न व्यर्थतां भजते, न वा पुनरुक्तिम्, तथैवोक्तत्वात्।

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
आक्षेपस्य समाधानं शास्त्रेऽधिकरणं स्मृतम् ॥ इति।

अर्थशास्त्रम्

अस्मिन् शास्त्रे प्रतिपाद्यो विषयः अर्थः, स च मनुष्यवती भूमिः, तन्त्रयुक्तौ कौटिल्येन तथाभिहितत्वात्। "मनुष्याणां वृत्तिरर्थः मनुष्यवती भूमिरित्यर्थः" इति। (अ० १५ अ० १) तस्या अर्जनं रक्षणं वर्धनं सत्पात्रप्रतिपत्तिश्च कर्तव्या भवति। "अर्थमूलौ हि धर्मकामौ", "धर्मादर्थोऽर्थतः कामः" इत्युक्त्या केचन त्रिवर्गमपि अर्थ्यत्वेनार्थेऽन्तर्भावयन्ति। तस्यार्थस्य विधायकं शासनं यत्र तदर्थशास्त्रमिति।

मनुष्यवत्या भूमेरर्जनेन राज्ञः स्वत्वं करग्रहणोपयोग्येव मन्तव्यम्, मीमांसकैस्तथैव साधितत्वात्। स्वत्वञ्च शास्त्रसमधिगम्यमिति हेतुना शास्त्रमर्थार्जनाय अपेक्ष्यते। अत एव पृथिव्या लाभे पालने चेति आदिमे सूत्रे टीकाकृद्भिः निमित्तार्थकत्वं प्रतिपाद्यते। "करः उचितादेयः" इति करव्याख्यायामौचित्यपदार्थस्य सन्निवेशोऽपि उक्तमर्थं पुष्णाति।

किञ्च, राजनीतौ न्यायधर्मौ "मन्वाद्युपदिष्टः परिपालनोपायो न्यायः", "मन्वाद्युपदिष्टं पालनं धर्मः" इत्येवंरीत्या जयमङ्गलाकृता कामन्दकीयव्याख्यायां विवेचितौ, तावुभावपि शास्त्रस्यानुयायित्वे स्वीकृत एव सम्भवतः, मीमांसकैरपि शास्त्रस्य लोकतः पूर्वं प्रवृत्तेः स्वीकारात् सप्तम्या निमित्तार्थकत्वं सिद्धम्।

राज्यम्, राजा च

मनुष्यवत्या भूमेरर्जने करग्रहणोपयोगि स्वत्वं यस्य स राजा, तेनानुष्ठीयमानं कर्म राज्यम्, अथवा स्वतादात्म्यलाभपालनोपायभूतसत्त्वबुद्ध्युभयाश्रयस्वान्यतरसम्बन्धावच्छिन्नस्ववृत्तितासम्बन्धेन स्वविशिष्टत्वम्, तच्च राजवृत्तित्वाद् राज्यम् । उक्तान्यतरसम्बन्धेन राजवृत्तयः सप्तप्रकृतयोऽपि सम्भवन्तीति लक्षणसमन्वयः । तदाहुः—"राज्यं राजत्वं राजेत्यभिधानप्रत्यययोः प्रवृत्तिनिमित्तम्, तच्च स्वस्वामिसम्पदुपेतं प्रकृतिसप्तकमेव भवितुमर्हति" इति । क्वचिद् राज्यपदव्यवहृतिः अमात्यादिषडादिप्रकृतिष्वपि वर्तते । तदाहुः—'अमात्याः प्रकृतयो मित्रान्ता राज्यमुच्यते' इति । सा औपचारिकी विज्ञेया, उक्तव्याख्याने प्रवृत्तिनिमित्तपदोपादानात् ।

राजनीतिः, दण्डनीतिः

स्वामिसम्पदुपेतः आत्मसंस्कारसम्पन्नो राजा भवति । स च सति सम्भवे आत्मसम्पन्नः क्षत्रियः, तदभावे आत्मगुणसम्पन्नो योऽपारे पारः, अप्लवे प्लवः, स इतरोऽपि भवति । तथाविधं राजानमधिकृत्य प्रोक्तमिष्टसाधनताकं कर्म राजनीतिः । मात्स्यन्यायाद् अव्यवस्थायाश्च प्रजायाः संरक्षणाय उपायविकल्पे कृतक्षणः राजा दण्डत्वेनोपचर्यते, तद्धरत्वात् । तस्य प्रवर्तनाद्दण्डनीतिः अर्थशास्त्रपरपर्याया ।

अपि च दण्डशब्देन सामदानभेददण्डाः गृह्यन्ते, तेषां समेषामपि दमनोपायत्वात् । उपायचतुष्टयात्मकदण्डप्रवर्तनज्ञापकं शासनं दण्डनीतिः, तद्बोधकत्वात् शास्त्रमपि तन्नाम्ना व्यवह्रियते ।

दण्डनीतेरधिकारी

अर्थशास्त्रे वर्णितं कर्म क्षात्रो धर्मः, स च सत्त्वाद्यष्टगुणसम्पत्तिः । प्राधान्येन तत्र अधिकृतः सर्वोऽपि वर्ग इति सर्वोऽपि जनो दण्डनीतेरधिकारी । यावत्पर्यन्तं क्षत्रियो वा तदितरो वा शासनं कुर्वन् क्षात्रं धर्ममनुतिष्ठति, तावत्पर्यन्तं नीतिमचिन्तयन्त्यपि प्रजा वर्णाश्रमधर्मं स्वं स्वमनुतिष्ठन्ती कृतकृत्यतां भजत इति सत्यम्, तथापि यदा शासकः प्रमाद्यति, तदा तु प्रजयाऽपि नीतिरनुष्ठेया भवति, मनुना तथैव व्यवस्थापितत्वात्[१], वीरमित्रोदये तथा निर्णीतत्वाच्च ।

दण्डनीतेर्योगक्षेमसाधनत्वम्

जनपदस्य संरक्षणोद्देश्येन लोकयात्रायाः सुचारुत्वाय आन्वीक्षिकी त्रयी वार्ताः साक्षादुपयुज्यन्ते; किन्तु दण्डनीतेरभावे तासां सतीत्वमसत्प्रायमेव भवति, अस्या रक्षकत्वात्, "दण्डमूलास्तिस्रो विद्याः" इत्युक्तत्वाच्च । शासकः शासनपदेऽधिष्ठितो

१. ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ।

यदा सम्यक्तया नीतिं प्रवर्तयति लोके, तदैव विद्याविदः शेषा विद्याः समुपासते। 'योगक्षेमनिष्पत्तिर्नयः, विपत्तिरपनयः' इत्येवंरीत्यैव जयमङ्गलाकृता नयशब्द-व्याख्यानात्।

दण्डनीतेः प्राधान्यम्, अन्यासां विद्यानामङ्गत्वम्

रक्षणकर्तृत्वाद् दण्डनीतेः प्राधान्यात् तदनुष्ठाता राजाऽपि प्रधानः सेव्यो भवति, 'वर्धनाद्रक्षणं श्रेयः' इत्यभिधानात्।

राजशास्त्रस्य प्रवृत्तिः

इदं राजशास्त्रं रक्षणार्थं तदा प्रवृत्तम्, यदा वेदोदित आदर्शोऽदर्शनप्रायतां प्राप्नोत्। स चादर्शः श्रुत्या उन्नीतः—

"न मे स्तेनो जनपदे न कदर्यो न मद्यपः।
नानाहिताग्निर्नायज्वा न स्वैरी स्वैरिणी कुतः॥" इति॥

यदा जनपदे निरभिमानितादिपुरस्सरं जनस्य तद्विधत्वं सर्ववादिसम्प्रतिपन्नं भवति, तदा तन्महिम्ना कदर्यः स्वैरो मद्यपः स्तेनः पातकी अनग्निर्न भवति। तथाविधः समय इतिहासेनाप्युपदिश्यते—'नैव राज्यं न राजासीत्' इत्यादि। अस्य वचनस्य नेदं तात्पर्यं यद् नीतिरेव नासीदिति; किन्तु अपराधप्रमादाद्यभावात्तद-पसारणार्थं दण्डप्रणयनं नासीदिति। अत एव प्रकृतिसप्तकसमुदायाभावान्न राज्य-पदप्रवृत्तिः, न वा स्वस्वसम्पदभावे अपनयबहुले राज्ये वा सा प्रवृत्तिः। ततो दीर्घेण कालेन भोगसमृद्ध्या आलस्यभाव उदेति, तदानीमनभ्यासादिवशाच्छास्त्रं विषायमानं भवत् प्रज्ञाश्रुतमतिषु भ्रममुत्पादयति, मोहं चासादयति। एवं क्रमेण अविद्या वर्धमाना अनाचारे साङ्कर्यं अकर्मणि जिह्वास्वादे रुचिमुत्पादयति। कलहं भेदञ्च वर्धयति, स्वार्थोन्मूलितसौहृदमपसारयति। तत्परिणामे मात्स्यन्यायो वर्धते[1]। एवं स्थिते विद्यानां विलोपात् कामोद्भवाद् दुःखपङ्के पङ्के गौरिव भूनिमज्जति, ततो जनपदे विषाद-जडताऽप्रतिभा-पारतन्त्र्याणि दुर्निवाराणीति तदपसारणाय योगक्षेमो-द्देश्येन दण्डनीतिः तिष्ठते। अनया लोकः कुपथान्निवर्त्यते। तदा निर्बाधतया—

योगाय वार्ता लोकस्य नीतिः क्षेमाय चोदिता।
त्रयी तत्रापि मघवन् लोकपङ्क्तिप्रयोजना॥

इत्युक्तरीत्या अपराविद्याः प्रतिष्ठन्ते, अभिवर्धयन्ति च जनपदम्। इति दण्डनीतेः विद्यान्तरस्य योगक्षेमसाधनत्वम्।

---

१. 'इदं प्रकृत्या विषयैर्वशीकृतम्','कृतविद्योऽपि बलिना', 'इयं हि लोक–' इत्यादि पद्यानि नीतिसारे द्रष्टव्यानि।

दण्डनीतेः शाश्वतीत्वम्

प्रमाणपुरस्सरं परीक्ष्य देशकालौ शक्तिञ्च विविच्य जायमाना प्रवृत्तिर्विघ्नैरनुच्छेद्यैवेति युक्त्या प्रतिपादयितुं शक्यते, अन्यथा अव्यवस्थाप्रयुक्तं निमज्जनमेवापद्येत।

अर्थशास्त्र-प्रकृतिः

महान्तमत्यर्थे क्षत्रियं गृहस्थं सर्वातिशायिनं समृद्धिमन्तं राजानमनुध्याय अर्थशास्त्रं दण्डनीत्यात्मकमुपदिष्टम्, अत्र तेन निरूपितोऽर्जनवर्धनरक्षणसत्पात्रप्रतिपत्त्यात्मकचतुष्टयं प्रति सर्वाङ्गोपसंहारो वर्तते। इत एव सर्वविधैः शासनैः गृहस्थैर्वा समानधर्मं सुचिन्त्य अतिदेशेन अङ्गपूर्तिः सुविचारणीयेति सर्वविधस्यापि शासनस्य कृते महदुपकारकं प्रकृतिभूतं स्थितम्।

सङ्घादिषु सर्वाङ्गोपसंहारे परिश्रमः

ननु सङ्घादिकमधिकृत्यार्थशास्त्रेण सर्वाङ्गोपसंहारः कुतो न प्रदर्शितः ? इति चेत्, परिश्रमात् काठिन्यात् सर्वाङ्गोपसंहारासम्भवाच्च न कृत इत्युच्यते। तथा हि—

कामन्दकेन प्रकृतिव्यसनेषु गौरवं लाघवञ्च चिन्तयता स्वामिनः सर्वापेक्षया प्राधान्यं स्वीकृतं वर्तते। मित्रव्यसनापेक्षया दण्डव्यसनं गरीयः, तेन मित्रामित्राणां साधनात्। ततोऽपि कोशव्यसनं कोशेन क्षीणस्य बलस्य पूरणे शक्तत्वात्, ततोऽपि दुर्गव्यसनं तत्र कोशदण्डयोः संश्रयात्, ततोऽपि जनपदव्यसनं तन्मूलत्वाद्दुर्गकोशदण्डमित्राणाम्, तस्मादप्यमात्यव्यसनं जनपदे सर्वारम्भाणाममात्यपूर्वकत्वात्सर्वकर्मसिद्धीनां तद्व्यसनप्रतीकारस्य च, ततोऽपि स्वामिव्यसनं स्वामिना शेषप्रकृतीनामसम्पन्नानां सम्पादनात्, सम्पन्नानां चाभिवर्धनात्। यदि स्वामी राज्यस्य न स्यात्, तर्हि तत्कर्तृककर्मणामविधानेन सर्वाङ्गोपसंहारो न सम्भवेत्।

किञ्च, एकः कुलीनः क्षत्रियो राजपुत्ररक्षणप्रकरणोक्तदिशा महता परिश्रमेण गर्भाधानादारभ्य हितद्रष्ट्रा गुरुणा चतस्रो विद्याः शिक्षयित्वा राजपुत्रः बोधनीयो वर्तते। बोधे जात एव राजपुत्रः कामजक्रोधजाभ्यां व्यसनाभ्यां निर्मुक्तः, स्वकर्मणि कुशलः, आश्रितात्मोपकारिगुणसम्पन्नः संस्कृतो भूत्वा जनपदस्य मित्रं कथञ्चिद् भवति। एवंविध एव मन्त्रिणामव्यवसिनां सम्पादनं कर्तुं प्रभवेत्। सङ्घे स्थितेषु समेषु तथाविधां योग्यतामाधातुं राजपुत्रनिमित्तकश्रमापेक्षया श्रमबाहुल्यं कुलीनत्वाभावनिमित्तके संस्काराभावे च विपरीतभावं विलोपयितुं वा अक्षमत्वाच्च अर्थशास्त्रस्य दृष्ट्या सर्वाङ्गोपसंहारः सङ्घमधिकृत्य आञ्जस्येनासम्भवीति लाघवमनुसृत्य राजानमधिकृत्य अर्थशास्त्रस्य सर्वाङ्गोपसंहारः प्रदर्शितः।

दण्डनीतेः सृष्टिकालादस्तित्वम्

प्रमादादकार्यप्रवृत्तौ सत्यां ततः रक्षणाय क्रमशः दण्डनीतिः विकासभावमापन्ना सती विराजत इति नास्ति प्राच्यभारतीयसिद्धान्तः; किन्तु सर्वाणि शास्त्राणि सर्वज्ञस्य ईश्वरस्य विद्यावतः वेदप्रभोः मुखात् पूर्वत एवानुवृत्तानि प्रकाशं प्राप्तानि इत्येव सिद्धान्तो जागर्ति, सम्पूर्णाया दण्डनीतेः असर्वज्ञस्य कृते दुर्ज्ञेयत्वात्। यच्च नेति कौटिल्य इत्युक्तम्, तत्र तु पूर्वानुस्यूतसमन्वयेन उद्देश्यसाधनाय अपेक्षानुसारेण त्रयीमाश्रित्य तदीयमर्यादानुसारेण न्यायाभासविचारणेन च साधितम्। प्रपञ्चयिष्यते चैतत् पुरस्तात्।

सर्वाणि शास्त्राणि दण्डनीतिः

यदि प्रजापालनार्थं शास्त्राणि नीत्यात्मकतया प्रवृत्तानि स्युः, तर्हि सर्वाणि तानि नीतिपदभाञ्जि भवन्ति। यदा तु धर्मादिभेदेन उद्देश्यं पृथक्कृत्य शास्त्राणि धर्माधिकारिकादिभेदेन प्रवृत्तानि भवन्ति, तदा तान्येव शास्त्राणि दण्डनीतितः पृथक् परिगण्यन्ते। एवं सत्त्वे अङ्गाङ्गिभावाभावेन शास्त्राणि उत्सन्नकल्पानि भवन्ति। अतः शास्त्राणां पार्थक्येन अस्तित्त्वे कल्पितेऽपि अङ्गाङ्गिभावेन परस्परं संरक्षणपराणि भवन्ति। तथासति अवयवानामवयविभावेन प्रवृत्तानामेकात्मकतयैव सर्वाणि शास्त्राणि दण्डनीतावन्तर्भवन्ति।

अर्थशास्त्रपरिमाणम्

तदिदमर्थशास्त्रं लक्षाध्यायात्मकमादौ ससर्ज भगवान् प्रजापतिः। अत्रैव धर्मार्थकामसम्प्रतिपत्तिः उपवर्णिता वर्तते। तं ग्रन्थं भगवान् शिवावतारो विशालाक्षोऽधीतवान्। ततः संक्षिप्य स्वीयं ग्रन्थं विशालाक्षः दशसहस्राध्यायात्मकमिन्द्रमध्यापयामास। सोऽपि सञ्चिक्षेप पञ्चसहस्राध्यायम्। तं बृहस्पतिः जग्राह। सोऽपि त्रिसहस्रं ग्रन्थं निर्माय शुक्राय ददौ। काव्यः अध्यायानां सहस्रेण ग्रन्थं निर्ममे। औशनसं मतं भारते विस्तरेण वर्ण्यते। तथात्वेन महाराष्ट्रराज्यशासनपर्यन्तमौशनसं मतमाचारतया स्वीकृतं बभूवेति शुक्रनीत्यनुमोदितानां महाराष्ट्रराज्ये स्थितानां मन्त्रिणां गणनया स्फुटीभवति। उपर्युक्तपरम्परातिरिक्ताद्यर्थशास्त्रविदां परम्परा बभूवेति ग्रन्थान्तराज्ज्ञायते। अपि च आभीयविदुरोद्धवभीष्मादिमतत्वेनापि तत्र तत्र सङ्ग्रहो दृश्यते। एवंरीत्या अर्थशास्त्रस्य मूलग्रन्थस्य महान् विस्तारो भवति। तानि सर्वाण्यर्थशास्त्राणि पर्यालोच्य अमन्दमतिर्विद्यापारदृश्वा आचार्यः कौटिल्यः सूत्रं भाष्यञ्च संक्षिप्य षट्श्लोकसहस्रं साशीतिप्रकरणशतपरिमितं ग्रन्थं निर्बबन्ध अमात्यश्रियं च साधितवान्। नीतिं निरूपयन्नपि ग्रन्थकर्ता भूमेरर्जनमभिदधाविति स्वग्रन्थमर्थशास्त्रत्वेन जुघोष। एतत्प्रणीतस्य शास्त्रस्याध्ययनेन नीतिशास्त्रं विशालाक्षादारभ्य इतरैः अनेकैः सङ्क्षिप्य प्रणीतं सम्पूर्णं परिचितं भवति। तेन नीतेर्न्यूनता ग्रन्थान्तराणां विलोपेऽपि न मन्तव्या।

अर्थशास्त्रसंविधानमादिमसमाजस्य

सृष्टिकालादारभ्य आदिमो भारतीयः समाजः वर्णाश्रमप्रधानः, तमनुरुध्यैव शास्त्रस्य प्रवर्तनम्, "भुवनं चतुर्वर्णाश्रमो लोकः" इति व्याख्यानात्, "जनः चतुर्वर्णाश्रम-जातिलक्षणः, पदं तस्य स्थानम्" इति जनपदव्याख्यानाच्च। अत एव "धर्मार्थयोः कर्मणोः प्रवर्तनार्थं त्रयीवार्ते प्रवृत्तानां निष्पन्नानाञ्च रक्षणाय दण्डनीतिः" इति विद्याविभागे जयमङ्गलोक्तं सुष्ठु भवति। भारतवर्षस्य प्रकृतिः चतुर्वर्णाश्रमधर्मः, तत्र यदा अव्यवस्था समुदेति, तदा व्यवस्थां विधातुं राजा यत्र चेष्टते, तदर्थमेव तस्योपयोगात्। तदुक्तं जयमङ्गलायाम्—"तौ भागत्वेनापरिकल्पितावपि व्यवस्थार्थ-मुत्सृष्टकौ" इति। राज्ञा कर्तव्या च व्यवस्था नैच्छिकी सम्भवितुमर्हति, तस्य राग-द्वेषात्मदोषवत्वात्। अतो विनिगमनायां कर्तव्यायां न्यायान्यायमन्त्रणायां रागद्वेष-शून्यमीशितुर्मतं विनिगमकत्वेन भारतीयेनानेन समाजेन स्वीकृतम्। अतो वर्णाश्रम-व्यवस्थाया सुचारुत्वसम्पत्तये त्रयीप्रामाण्यमुररीकृत्य प्रवृत्तमर्थशास्त्रं वर्णाश्रमिणां कृत एव सम्भवति, प्रत्येकदेशवासिभिः तत्तद्देशमनुरुध्य संविधानस्य पार्थक्येन कृतस्य संविधानस्य प्रदर्शनात्। ततोऽन्यत्र अतिदेशविधया अस्य शास्त्रस्य प्रवृत्तिः। एवं कल्पने शास्त्रकर्तॄणां मनोवृत्तेः सङ्कोचो न मन्तव्यः।

अर्थशास्त्रटीकाः

अस्यार्थशास्त्रस्य नैकापि टीका श्रीमूलां विहाय पूर्णा वर्तते, तथापि वैदिका-वैदिकैः नीतिं चिन्तयद्भिः अर्थशास्त्रं समादृतं वर्णाश्रमसमाजसंस्थापने महान् आदरश्च समर्पित इत्यस्य सर्वपारिषद्यं निर्विवादमेव। यथा जयमङ्गलाकर्ता शङ्करार्यो वैदिकः, योग्घमभिक्षुप्रभमती अवैदिकौ। एतासु टीकासु जयमङ्गला आदिमाधिकरणमेव प्रकाशयति। अत्रेदमवधेयम्—

एन्० एस्० वेङ्कटाचार्य-('रिसर्च असिस्टेण्ट, मैसूर विश्वविद्यालय)विद्वद्भिः अध्यक्षप्रचारादौ स्थलविशेष उक्तत्वादियं टीका अन्यान्यप्यधिकरणानि प्रकाशयन्ती विदुषां समवधाने चकास्ति इति। नीतिनिर्णीतिर्योग्घमकृता जैनसम्प्रदायानुयायिनी प्रथमाधिकरणस्य पदानि व्याख्याति। भिक्षुप्रभमतिकृता चाणक्यटीका द्वितीयाधिकरणं विवेचयति। प्रतिपदपञ्चिकापि श्रीभट्टस्वामिनिर्मिता विशदयति द्वितीयाधिकर-णान्तम्। नयचन्द्रिका माधवयज्वकृता नवमाध्यायतः बुद्धिवैभवं स्फोरयति। श्रीमूला तु पूर्णाऽस्माभिरुपलब्धा। तत्र वार्तिकभूतं कामन्दकीयं टीकाद्वयोपेतं समास्ते। इत्येवं-रीत्या अर्थशास्त्रं महद्राशिभूतमात्मगौरवेण गुरुभावं भजते।

कौटिलीयमर्थशास्त्रं धर्मशास्त्रानतिरिक्तम्

नीतेर्वक्ष्यमाणलक्षणानुसारेण कौटिल्योक्तं सर्वविधानं शब्दप्रमाणप्रमितत्वाद् धर्मशास्त्रान्तर्गतत्वाद् धर्म्यमेव। "येषां मते संवरणमात्रा त्रयी, तन्मते अर्थशास्त्राद्

धर्मशास्त्रं बलीयः" इति व्यवहारप्रकाशोक्तिविरोधोऽत्र न मन्तव्यः। धर्मशास्त्रेण धर्मस्य प्राधान्यं मन्यते, धर्मप्रतिपादकेनार्थशास्त्रेण तु अर्थस्य प्राधान्यं स्वीक्रियते। अत इदमर्थशास्त्रं धर्मशास्त्रं सदपि प्रत्यक्षानुमानवेद्यत्वमप्यर्थसाधनेषु स्वीकरोति, तदपि दृष्टकार्यकारणभावविचारणात् शोभनमेव।

नीतिस्वरूपम्

अर्थशास्त्रेण अर्थ्यत्वाद्योऽर्थश्चिन्तितः, स नीतिस्थ इति नीतिस्वरूपं विविच्यते। प्रत्यक्षानुमानागमप्रमाणप्रमितं यद् इष्टसाधनं कर्म देशकालशक्त्यनुकूलम् तदेव नीतिपदेन व्यपदिश्यते। एतेन लक्षणेन नीतिशास्त्रं तन्निरूपिता नीतिश्च सर्वेषां कृतेऽविरुद्धा सती मित्रभावं भजत इति सर्वदा अस्यां समादरो येन केनापि शासनेन कर्तव्य एव इत्यर्थात् सिद्धम्। आगमवादिनो वैदिकास्तदेव कर्म स्पृहयन्ति, यत्र शब्दः स्वप्रभया प्रमितत्वं बोधयति, तथैव प्रत्यक्षानुमानवादिनश्चार्वाकादयोऽपि स्वस्व-मतेन परिगृहीतेन प्रमाणेन प्रमितं स्यात्। तदेतन्मतमेनं नीतिलक्षणं समलङ्करोतीति तेऽपि नीतिमनुरुन्धन्ति, कौटिलीयनीतिनिर्णीतौ अनुष्ठात एकमत्यसम्भवोऽपि आञ्जस्येन प्रकाशित इति भारतीयनीतौ भेदस्यावसरो नास्ति।

केचन नीतेर्धर्मत्वं परिचक्षते, तस्याः सर्वैरनुष्ठीयमानत्वात्, तन्न, कौटल्येन वैदिकस्येव विशेषधर्मस्यापि नीत्यन्तर्गततया सङ्गृहीतत्वात्। तथा चानुष्ठीयमानं कर्म स्वरूपतः प्रत्यक्षवेद्यमपि तन्निष्ठं साधनत्वं शब्दप्रमाणेन प्रमितं सत् प्रत्यक्षानुमाना-वेद्यत्वात्तदभावप्रयुक्तमप्रमितत्वं व्यावर्तयतीति नीतेरपि धर्मत्वेन इतरव्यावृत्ति-सम्भवात् धर्मत्वाव्यवहाराच्च धर्मलक्षणस्य समन्वये न कोऽपि दोषः पदमादधाति।

नीतिस्वरूपे आगमोपयोगः

अपि च प्रत्यक्षानुमानाभ्यां निर्णीतेऽपि इष्टसाधनत्वे कालान्तरे साधनत्वेनाभिमतं तत्तथैव कालान्तरे दुरपनेयदोषावहं न वेति सन्देहनिरासः अल्पज्ञेन कर्तुं न शक्यः। (पृ० २८) न वा प्रत्यक्षतो निर्णीतस्यार्थस्य निर्दुष्टत्वं प्रति असर्वज्ञः प्रतिभूर्भवितुमर्हति। मोहजालपरिवृत्तेषु साध्यसाधनेषु प्रमाणाभासशङ्कितत्वं न केनापि वारयितुं शक्यते। यतः प्रमाणसमीक्षायामधिकृतेन न्यायेन साधनत्वनिर्णयः अनन्यथासिद्धत्वाधीन उक्तः, अनन्यथासिद्धत्वञ्च प्रामाणिकव्यवहाराधीनमिति। इष्टसाधनत्वेनाभिमतेऽर्थसाधनत्व-निर्णयेऽसन्देहाय आगमः प्रमाणतया नीतिलक्षणे निवेशितः।

प्रत्यक्षानुमानोपयोगो नीतिलक्षणे

शब्दप्रमाणप्रमितत्वेऽपि तदाश्रये अलौकिकत्वं भावयेत्, तर्हि कृतिसाध्यत्वमिष्ट-साधने शब्दप्रमितेऽर्थे बाधितं स्यात्, तन्निरासाय लौकिकत्वं साध्यते प्रत्यक्षानुमाना-भ्याम्। दृष्टं चैतद् नटैरभिनीयमाने चरित्रे असम्भावनाविपरीतभावनाप्रयुक्तं वैरस्यं निरसितुं लौकिकत्वं व्यवस्थाप्यते साहित्यविद्भिः, तथैव नीतावभिनीयमाने चरित्रे नीतिविद्भिः साध्यते।

शक्तिः

नीतिस्वरूपविवेचनप्रसङ्गात् शक्तितत्त्वं विविच्यते—

ज्ञानप्रभा च सानन्दा तस्याः सत्त्वं प्रजायते।
क्रियाप्रभारजःशक्तिः स्यादुत्तमा प्रसूः ॥ (अधि० २)

इति भावप्रकाशनोक्तदिशा ईशसमवेतज्ञानानन्दक्रियाणां प्रभास्वरूपाणां मिश्रणं जीवसमवेतं यदा भवति, तदा तच्छक्तिपदेन व्यवह्रियते। अत्र प्रभापदोपादानाद् ज्ञानानन्दक्रियाणां तेजोरूपत्वं साहित्यमतेन सिद्धं भवति। नयचन्द्रिकाकारेण "कोशदण्डादिमत्वम्" इति मतुप्प्रत्ययघटितमुक्तत्वात्। "कोशदण्डजं तेजः" इति जयमङ्गलायामुक्तत्वाच्च शक्तेस्तेजस्त्वं सम्प्रतिपन्नम्। घटत्वपटत्वादौ त्वतल्प्रत्ययाभ्यां बोध्यमाना शक्तिः पूर्वोक्ता तेजसोऽभिन्नैव।

"मनसि सुसमाधिनि विस्फुरणमनेकधाभिधेयस्येति" काव्यप्रकाशविवरणे गोकुलनाथोपाध्यायैर्व्याख्यातत्वाद् मनसि पदार्थस्फुरणमपि संस्कारजं भवति। व्युत्पत्तिशक्तिभेदेन संस्कारो द्विविधो भवति। तत्र सामान्यधर्मभावेन (स्रग्धरावृत्तत्वावच्छेदेनादौ गुरुचतुष्कत्वं) संस्कारदाढर्यं व्युत्पत्तिः। तत्तदानुपूर्वीकपदगोचरः संस्कारो विशेषभावेनोद्बुद्धः शक्तिः। सोऽयं शक्त्याख्यस्तेजोरूपतयोपवर्णितः संस्कारविशेषः शास्त्राभ्यासानन्तरं तृतीयां व्युत्पत्तिकक्षामतीत्य विद्वद्भिः लभ्यो भवतीति वसिष्ठस्मृतिटीकायां मङ्गलाचरणेन ध्वन्यते—

आदौ शास्त्रान्धकारे पतित इव ततोऽभ्यासमार्गे चरिष्णुः
पश्चाद्व्युत्पत्तिदेहल्युपग इव ततः शक्तिवाटीप्रविष्टः।
नानाशब्दाख्यपुष्पावचयकरणतो वाग्वशीभूतविश्वः
यत्प्रेमापाङ्गदृष्ट्या भवति कविवरो भारती सा पुनातु ॥ इति।

इदं शक्तितत्त्वं जगन्मूलभूतप्रकृतिगतं स्वतन्त्रचेतननिष्ठम्। तथा च यस्य पुरुषस्य ज्ञानाधिक्यं क्रियाधिक्यमुक्तसंस्कारोद्बोधेन सदोदितं भवति, तथा साहित्यमर्यादया आनन्दप्रभा यदि अभिव्यक्ता, तर्हि सा शक्तिघटकभूता क्रियाप्रभा ईशसमवेता अर्थशक्तिः शास्त्रेण प्रकाश्यते।

अर्थशास्त्रविभागः

तदर्थशास्त्रं तन्त्रावापभेदेन द्विधा विभक्तं वर्तते। आद्ये भागे स्वमण्डले तन्त्र एकतासंरक्षणञ्च काम्यते। द्वितीये भागे आवापे परराज्यात्मसात्करणं साधनीयं भवति। तत्र तन्त्रे विनयाधिकारिकाध्यक्षप्रचार-धर्मस्थीय-कण्टकशोधन-योगवृत्तानि पञ्चाधिकरणानि निरूपितानि भवन्ति। आवापे मण्डलयोनि-षाड्गुण्य-व्यसनाधिकारिकाभियास्यत्कर्म-साङ्ग्रामिक-सङ्घवृत्ताबलीयस-लब्धप्रशमनानि अष्टौ अधिकरणानि। तत औपनिषदिकं तन्त्रयुक्तिश्च निरूपिते।

राजत्वं विजिगीषुत्वञ्च

तन्त्रे स्वमण्डलचिन्तायां कर्तव्यायां प्रकृतिरञ्जनं कर्तव्यं भवतीति 'राजा' अधिकारी उक्तः। अत्र आत्मगुणसम्पत्तौ आधातव्यायां क्रोधलोभादिवर्जनमुक्तम्। परराज्यात्मसात्करणे तु क्रोधादिभावानामभ्युदयसापेक्षत्वाद् राजैव उत्साहगुणवान् विजिगीषुर्भूत्वा अधिकारी भवति।

राज्यस्य मूलं धृतिः (सत्त्वम्)

तन्त्रे राज्यस्य संरक्षणाय वर्धनाय च ग्रन्थकृता कौटिल्येन, कामन्दकेन वार्तिककृता च सत्त्वमभिहितं वर्तते। तस्येयमुपपत्तिः मूलतया राजगुणैराकृष्टा रत्यादिरसतत्त्वेष्वन्यतमेनाद्भुतेन समृद्धा। प्रजा राजानं मनसा ध्यायति यदि, तर्हि सा साधुवादेन मनस आकर्षणेन एकाग्रतया ध्यानेन राजानमनुगच्छति, नापि च विरज्यतीति समालोच्य शासकेन प्रजासु अद्भुतरसः सञ्चारणीयो भवतीति साहित्यमर्यादामाधारीकृत्य सञ्जनितं तामेव साधयितुं नीतिरियं प्रवर्तते। तत्साफल्याय अद्भुतविभावेषु विद्वदादिसाधारण्येन अभीष्टादेरचिन्तनं सर्वायत्तम्। तदेव नीत्या सत्त्वव्यपदेशेन विहितम्। यावत्पर्यन्तं तर्कसहितं ज्ञानं नोदेति, तावद् व्याप्तिपक्षधर्मतानिश्चयाभावाद् रागत आत्मा न रक्ष्यः सम्भवति। तथा सति अभीष्टादेरचिन्तनं शासको न स्वायत्तीकुर्यादिति प्रत्यभिज्ञादर्शने तत्र तत्र दर्शनेषु ज्ञानं सत्त्वादभिन्नमित्युमुपन्यस्तम्, तत्सदर्थेषु निर्बाधत्वम्। तच्च आधुनिकाक्लृप्तान्वयव्यतिरेकप्रसूतेषु बाधितमपि भवति, याथार्थ्यार्थाय ईशसमवेततज्ज्ञानविषयतया एष्टव्यम्। यदि च विद्वत्सु विद्यामधीत्यापि सुखानुभूतिः मनःप्रसादः विशङ्कता च नोपलब्धाः, तर्हि तज्ज्ञानं ईशसमवेतं सदपि सत्त्वपदव्यपदेश्यं न भवति, कार्याक्षमत्वात्। अतो ज्ञानात्मिकायां प्रभायाम् आनन्दप्रभाया अपि साहचर्यमपेक्षितमिति भावप्रकाशनकृता निरणायि। तथा सति ज्ञानप्रभानन्दप्रभोभयसम्पत्त्या विलसितः अभीष्टादेरचिन्तनं कुर्वन् प्रजायामद्भुतं सञ्चारयति। सति च तस्मिन् धृतिभावः समुदेति, द्वयोरपि समशीलत्वात्। धृतौ सत्यामुचितकारिता अनुभावः स्वयमेव चेतसि कर्तव्यगोचर एव समुदेति। इदं हि रसस्य जीवातुः, तदानीं मानमदयोः अभावोऽपि नियत इति। अनेनानुभावमहिम्ना राजा लोके मन्त्रिप्रभृतिप्रकृतिवर्गं रञ्जयति, सङ्घटयति च इति राज्यस्य मूलं धृतिः।

धृतिसत्त्वयोरेकपर्यायत्वं स्वीक्रियते, एककार्यकरत्वात्। तत्स्वरूपं सङ्गीतरत्नाकरे विभावानुभावौ पार्थक्येन विभज्य विवेचितम्, तत्र धृतेर्विभावानुभावतया विवेकादय उक्ताः। तथा हि—

विवेकः श्रुतिसम्पत्तिर्गुरुभक्तिस्तपस्विता।
एता विषयभावेन करणत्वेन च श्रुताः॥ इति।

तथा च विवेकश्रुतिसम्पत्तिगुरुभक्तितपस्वितैतच्चतुष्टयाख्यं व्रतमुक्तम्। 'उक्तचतुष्टयोद्देश्येन करिष्ये' इति सङ्कल्पे स्थितो नीतिकुशलो धृतिमान् भवति।

प्रजानुरञ्जनकार्यक्रमः

धृतिमवलम्ब्य राज्ञा विनीतेन प्रथमतः मन्त्रिप्रकृतिः विनयभावं प्रापणीया भवति। ततः भृत्यादण्डप्रकृती विनीताः साधनीया भवन्ति, ततः पुत्रप्रकृती इमा आन्तरप्रकृतीर्यदा विनयसम्पन्ना आन्तरीभवन्ति, तदा राजानं प्रति अङ्गभावं भजन्ते। एवंस्थिते ततो बाह्याः प्रजाः विनीय अनुरज्य संरक्ष्य च राजा अधिकां श्रियं प्राप्नोति।

राजस्वामित्वेऽपि लोकसम्मतिः

अत्रेदमवधेयम्—धृतिभावमवलम्ब्य प्रवृत्तो राजा शास्त्रप्रसूतमीशसमवेतं ज्ञानं समुपलभ्य अनुरञ्जनकार्यक्रमेण यावत् प्रजाभिमतो भवति, तावदेव स शासनपदमारोढुं प्रभवति। यदि सत्त्वमुपेक्षते, तर्हि रजस्तमोभिवृद्धा अज्ञता अभिमानिता कामबाहुल्यञ्च वर्धिष्णवो दृश्यन्ते। ततोऽसफलत्वाद् अवमानननात् प्रजा अपि राज्ञो विरज्यति। लोकसम्मतिश्च पराङ्मुखी भवतीति लोकसम्मतिशून्यत्वे स्वामी सन्नपि प्रजापीडनप्रयुक्तद्रोहानलदग्धो भवन् विनश्यति।

लोकसम्मतिप्राप्तिवञ्चना

यद्यपि संवरणमात्रं हि त्रयीति जानन्तः केचिद् रसाभासमुत्पाद्य प्रजासम्मतिं प्राप्तुं वाञ्छन्ति, तथापि सा वाञ्छासिद्धिर्यविन्मदमानदम्भो वा न प्रकाशमेति तावदेव वर्तते, अज्ञानविजृम्भितस्य रागस्य भ्रान्तिमूलत्वेन भ्रमस्य बाधज्ञाननिव[illegible]-नार्थस्य बाधितत्वादविश्वासप्रकाशनाच्च।

साधूनां प्रिया नीतिः

अर्थशास्त्रेणोक्ता सर्वापि नीतिः समन्वयपुरःसरं चर्चिता सर्वेषां योगक्षेमावहा शमस्थायिका असाधून् व्यसनिनो विहाय साधूनां मनोरञ्जिका वर्तते, अत्रैव यशस उपलब्धेः, आजीवनं विश्वासपूर्वकं सुवर्णसन्धिसम्पादनक्षमत्वाच्च, सद्वृत्तेर्धर्मस्य सत्त्वस्य साधुत्वस्य चैकरूपत्वेन सद्भिः साधुभिश्चानुष्ठानकाले समानतत्त्वसमाचरणात् शाश्वतत्वात्, मित्रार्जनकौशलाच्च।

देवत्वं तस्य दृष्टोपकारकत्वञ्च

अत एव नीतिशास्त्रेण आत्मसम्पद्गुणसंस्कृतो राजा देव इत्यभिधीयते। तच्च कृतात्मभिः न कथमपि सोढुमशक्यम्, इति तत्सम्पादनाय नीतिमत्त्वमपेक्ष्यते। यदि आत्मनः कर्तृत्वमपहाय प्रयोज्यवृद्धत्वं स्मरन् तदादेशेन राजनीतिमादधाति, तर्हि स देवो भवति, देवत्वस्य भावप्रकाशने तथैव व्याख्यातत्वात्। एवञ्च विधिभागेन प्राप्ता

प्रेरणा ईशस्येति मत्वा तदीयप्रेरणया राजा यदा अनुतिष्ठति, तदा स देवो भवति। तत्रापि नीतिमर्यादायामनुष्ठितायां देवत्वेन सह माधुर्यसाफल्याभ्यां हर्षवत्त्वमपि स्वतः सिद्धमेव। इदमेव क्रियाप्रभायामानन्दप्रभामिश्रणम्।

ओजसः प्राप्तिः

सात्त्विकया नीत्या अवलम्बने देवभक्त्या च उपासकः सात्त्विको जितेन्द्रियः ओजस्वी भूत्वा आरोग्यं चिरकालिकमुपलभ्य दोषधातूनां साम्यात् कर्मणि समर्थो भवतीति नीतेर्न वैफल्यम्।

कौटिल्यमतस्य शब्दप्रमाणप्रमितत्वम्

यदि नीतेः सात्त्विकत्वं वैदिकशब्दप्रमाणप्रमितेऽर्थे ईशसमवेतज्ञानविषय एव, तर्हि "नैति कौटिल्यः" इति ग्रन्थेन स्वमतं प्रतिपादयितुः कौटिल्यस्य महर्षित्वाद्वचने वेदप्रमितत्वं कथं भवेदिति चेदुच्यते।

"यदनूचानोऽभ्यूहति आर्षं तद् भवति" इत्युक्त्या श्रुतसम्पत्तिमान् तपस्वी विवेकी गुरुभक्तः यदभ्यूहति, तदार्षं शास्त्रीयमेव मन्यते मीमांसकैः। कौटिल्येनापि अनूचानेन कृते नीतिशास्त्रविधिनिर्णये य ऊहः कृतः, स मीमांसासम्मतः भवतीत्यत्रोपपत्तिरुच्यते। शास्त्रं द्विविधम्—अदृष्टार्थकम्, दृष्टार्थकञ्च। दृष्टार्थकस्य शास्त्रस्य रागप्राप्तार्थविधायकत्वाद् व्यर्थत्वं भाति। तदभावाय दृष्टार्थकशास्त्रीयो विधिः नियमविधौ परिसङ्ख्याविधौ वा पर्यवसितो भवति। नियमः परिसंख्या वा न शास्त्रेण कण्ठत उक्ता। अथापि मीमांसया प्राप्तयोः नियमपरिसङ्ख्ययोः शास्त्रीयत्वमेव। अथापि यत्र उद्देश्यस्य विलोप उद्दिष्टस्तत्साधनस्य सङ्घटनं वा असम्भवि, तत्र निषिद्धातिक्रमणं नियमातिक्रमणं वा कर्तव्यमेव भवति, तदानीं स एव धर्म इति अग्निहोत्रे कर्तव्ये तद्विलोपप्रसक्तौ निषिद्धस्यापि माषस्य हविष्ट्वेन सङ्ग्रहणं मीमांसकैर्न्यायतः साधितम्। नीतौ तु प्रायः सर्वेऽपि विधयो दृष्टार्थका एव। तानधिकृत्य प्राचीनाचार्यैः त्रयीप्रामाण्यमुररीकुर्वद्भिः दृष्टतत्त्वमधिकृत्य यो विधिरुक्तः, कौटिल्येन तस्यातिक्रमणमुद्देश्यस्य 'न मे स्तेनो जनपदे' इति श्रुतिप्रतिपादितस्यार्थस्य विलोपप्रसक्तौ कृतं वर्तते। क्वचित्समन्वयः कृतः, एतत्सर्वं प्रत्यक्षानुमानतो अन्वयव्यतिरेकसिद्धत्वात्, मीमांसाशास्त्रानुमतत्वाच्च वैदिकमेव मन्तव्यम्।

कौटिल्यस्य धार्मिकता

कौटिल्यस्य भक्तिमत्त्वं श्रुत्वा तं कूटनीतिज्ञत्वेनाक्षिपन्ति। एतदज्ञान विजृम्भितम्, विद्याविभागप्रकरणे त्रयीस्थापनस्य प्राधान्येन विधानात्। एकैश्वर्ये योगवृत्ते तेन स्वमतं प्रतिपादितं यद् अस्वस्थे मृते वा राजनि मन्त्री राज्यकार्यं सञ्चालयन् एकामपि काकणिकां न गृह्णीयात्; किन्त्वैश्वर्यं संवर्ध्य तत् स्वामिने राजपुत्राय

समर्पयेदित्येव । अतः कौटिल्यो धर्मनिष्णातो धर्मविपरीतं विधातुं न प्रभवेत् । कूटनीतिप्रयोगास्तेनावाप उक्ताः । तत्कारणं तु लोककण्टकस्य अविनीतस्य रिपोः प्रबलस्य अभिन्नप्रकृत्तेः स्वानुकूलदेशकालस्य दमनद्वारा धर्मप्रतिष्ठापनम् ।

कौटिल्यः चाणक्यश्च

कौटिल्य इति चाणक्यस्य अभिधा कुटिलगोत्रोद्भवत्वादिति जयमङ्गलाकृता व्याख्यानात्, कुटिलाः कुम्भीधान्या इत्युपाध्यायनिरपेक्षायाञ्चाख्यानोपलम्भाच्च । तस्यैव "चाणक्य" इति संज्ञा तु चणकदेशोद्भवत्वात् समस्ति, अस्य कुलशतप्रतिग्राहकाणामिति प्रवादात् । एतेनास्य वंशोऽतीव विस्तीर्णोऽभूत् । तत्र समुद्भूतो विष्णुगुप्तनामायं चाणक्य इति जयमङ्गलाकृद्व्याख्यानात् स्फुटं भवति । कामसूत्रस्य रचयिता वात्स्यायन एतद्वंशोद्भवो विष्णुगुप्तसमकालिकः, अथवा श्रीधरस्वामिन उपाध्यायनिरपेक्षाकृतश्च व्याख्यानाद् विष्णुगुप्त एव वात्स्यायनो न्यायभाष्यकर्ता इत्युच्यते । यत्किमपि भवतु तद् भाष्यकर्ता, सूत्ररचयिता, अर्थशास्त्रनिर्माता च चाणक्यः कौटिल्य एव इति तु निश्चप्रचम् ।

विद्यास्थापना

नीतिशास्त्रं नीतिविचारावसरे प्रथमं कर्तव्यत्वेन देशे विद्याप्रचारकार्यमादिमं कर्म अनुमनुते, विद्याप्रतिबद्धत्वाल्लोकस्थितेः । यतः विद्यया मतिर्भवति, तया कार्यनिश्चयः । विक्रममात्रमवलम्ब्य सञ्जाता प्रवृत्तिस्तु विसंवादिनो भूत्वा निष्फला सती विषादं पारतन्त्र्यञ्च प्रापयेत् । किञ्च, विद्याभावे जडता उदियात् । सत्यां च तस्यामप्रतिभापारतन्त्र्यञ्च नियतम् । ततः स्वातन्त्र्यस्य हानिः नीतेर्वैफल्यं च । तदुक्तम्—

'जाड्यमप्रतिपत्तिः स्यात् सर्वकार्येषु सर्वदा ।
इष्टानिष्टान्न जानाति सुखदुःखे न वेत्ति च ॥' (अधि० ४)

अतः नीतिशास्त्रेण प्रचारो विहितः ।

विद्याप्रचारे कामन्दकीयमतसमन्वयः

कामन्दकेनादौ जितेन्द्रियतानन्तरं विद्याविभागप्रकरणं प्रारब्धम् । तन्मतेन जितेन्द्रियतापदेन स्वाभाविको विनयः, ततो विद्याविभागः, स्वाभाविकं विनयं विना गुरुसान्निध्याभावेन विद्योदयानुपपत्तेः । कौटिल्येन तु कृतकविनयार्थमादौ विद्याविभाग उक्त इति नात्र विरोधः ।

विद्यापदार्थः

मूलकृता विद्यापदव्यपदेश्याः चतस्रो विद्या निर्दिश्यन्ते । तेन धर्मार्थवेदनमेव विद्यानां भाव्यं स्वीक्रियते । तत्र इमा एव विद्या उपयुज्यन्ते । तदुक्तम्—'धर्मार्थौ यद्विद्यात्तद्विद्यानां विद्यात्वमि'ति । अपरास्तु विद्याः कामानुबन्धिन्यो भवन्ति । अतस्तासां शिक्षणं षोडशवर्षानन्तरमप्युचितं भवति । इमा विद्यास्तथाध्येतव्या याभिः अध्येता-

ग्रहणेन बुद्धेस्तृतीयगुणेन सम्पन्नः स्यात्। एवञ्च धर्मार्थवेदनभाव्यकभावनाकरणत्वं चतसृषु विद्यासु अनुगतम्। तद्भावनाकरणं विद्धात्वर्थः, स च चतुर्विधः विन्ते, विचारयति, तत्तत्त्वमान्वीक्षिक्याम्। वेत्ति जानाति, तत्तत्त्वं त्रय्याम्। विन्दति प्राप्नोति तत्तत्त्वं वार्तायाम्। विद्यते रक्ष्यते, तत्तत्त्वं दण्डनीताविति लक्षणसमन्वयः।

आन्वीक्षिक्यादीनां विद्यात्वम्

एवञ्च सर्वविधविद्यातात्पर्यविषयीभूतयथार्थज्ञानभाव्यकभावनाकरणविद्यात्वमान्वीक्षिकीत्वम्। पुरुषागोचरादृष्टज्ञानभाव्यकभावनाकरणविद्यात्वं त्रयीत्वम्। विद्याभूम्याद्यर्थज्ञानभाव्यकभावनाकरणविद्यात्वं वार्तात्वम्। अर्जनादिचतुर्विधराजवृत्तज्ञानभाव्यकभावनाकरणविद्यात्वं राजनीतिविद्यात्वम्। एवंरीत्या विद्यानां पृथगुपन्यासः कौटिल्येन राजादीनां कृते तेषां चतुर्विधविद्याध्ययनप्रवृत्यर्थं कृतः।

आचार्याणां मतभेदः

अत्र मानवा आन्वीक्षिक्या अध्ययनं 'धर्माधिकारिकम्' इति समाख्यया धर्मज्ञानार्थं विदधति। यतिभिः आन्वीक्षिक्यध्ययनमात्मज्ञानार्थं क्रियते। धर्मज्ञानार्थमान्वीक्षिक्यध्ययनविधानाद् धर्मविरोधिन्या आन्वीक्षिक्या अध्ययनं "हैतुकान् बकवृत्तींश्च"इत्यादि निषेधान्न कर्तव्यम्। इति मानवानामाशयः। एवम्भूताध्ययनगोचराऽन्वीक्षिकी मानवमतेन त्रय्या नातिरिच्यते। यतः कौटिल्यसम्मतं त्रयीलक्षणमुक्तमान्वीक्षिक्यां सङ्गतमेवातः त्रयीत्वमान्वीक्षिक्यामस्ति। इत्थं चोक्तकरणत्वं साधकतमत्वं मनुमते त्रय्यामेव। आन्वीक्षिक्यध्ययनन्तु तन्मत इतिकर्तव्यताभूतं भवति। तच्चोक्तसाधनतावच्छेदकम्। एतेन आवीक्षिक्यध्ययनस्य विधानं मनूक्तं न विरुध्यते। इतिरीत्या साधनत्वतदवच्छेदकभेदेन कारणत्वभेदेऽपि तदुभयसाधारणतया करणत्वे स्वीकृते धर्मज्ञानभाव्यकभावनाकरणत्वं त्रय्यान्वीक्षिक्योरध्ययनेऽनुमतं वर्तते। आन्वीक्षिक्या पार्थक्येन ग्रहणमिति मानवानामाशयः। एतन्मते यदा राजा धर्मार्थार्थं प्रवृत्तः, तदानेन धमार्थज्ञानार्थमनुपयुक्तत्वात् पृथक्तया इयमध्येतव्यैवेति नास्ति आग्रहः। यदा वेदार्थः सन्दिग्धो भवति, तदा तन्निरासस्तु विद्वद्भिः कारयितव्यः। त्रयीप्रामाण्यन्तु एतन्मते सिद्धत्वात्तदनुकूलतयैव सर्वोऽप्यर्थः स्वी क्रि यते।

अत्र केचिदेतन्मतं मनोरपीति व्याचक्षते। अपरे तु न मनोरिति वदन्ति। तत्रायं विवेकः--मनुः ब्रह्मनिर्मितं लक्षाध्यायं जानान आन्वीक्षिकीमधीते, तदध्ययनस्योपयुक्तत्वञ्च विजानाति। यदा स शिष्यान् वेदप्रामाण्याभ्युपगन्तॄन् अध्यापयामास, तदा ते ग्रन्थैकदेशं व्यजानन् वेदमेव प्रमाणत्वेन स्वीकृत्य "वेदोऽखिलो धर्ममूलम्" इति विश्वस्य च धर्मतो नीतिव्यवस्थां सर्वामपि धर्म्यत्वेन स्वीचक्रुः। विषयान्तरं त्वज्ञानविजृम्भितमभूत्। तन्मते वेदमतिलङ्घ्य विचारस्य प्राधान्यं नास्ति। अतः तस्योद्देश्यत्वाभावादान्वीक्षिक्यां साधकतमत्वं करणत्वं नास्ति; किन्तु वेदविचारेति-

कर्तव्यत्वात् तत्साधनतावच्छेदकत्वमेव। इदं मानवानाम्मतमनुरुध्य विद्यानां त्रित्व-मुक्तम्, अतो 'न तु मनोः' इत्युपपन्नम्।

स्वमतम्

यदा तु वेदप्रामाण्यं सन्दिग्धम्, तदा तु विचारस्य प्राधान्यात् तदुद्देश्यकभावना-करणत्वं साधकतमत्वरूपमान्वीक्षिक्यामवश्यं मन्तव्यम्, तद् यदि राज्ञा न ज्ञायेत, तर्हि सन्दिग्धो राजा वेदं प्रति अविश्वसेत्। नास्तिक्यभावश्च प्रसज्येत, ततो मात्स्यन्यायः कामबाहुल्यमशान्तिः जनपदविध्वंस इति विचारोद्देश्यकभावनाकरणत्वस्यापेक्षि-तत्वाद् आन्वीक्षिक्याः पृथग्ग्रहणम्। वस्तुतः पुरुषागोचरादृष्टभाव्यकभावनाकरणत्वं यथा त्रय्यां तथा आन्वीक्षिक्यामपि, एवमेव विद्याविचारभाव्यकभावनाकरणत्वं त्रय्यामप्यस्तीति तदुभयमपि करणत्वं स्वरूपतो विभिन्नं तेन न साङ्कर्यदोषः, उपधेय-साङ्कर्येऽपि उपाधेरसाङ्कर्यात्। नात्र चाणक्यमनुमतयोर्विरोधः। एवमग्रेऽपि बोद्धव्यम्।

बृहस्पतिमतम्

यथा विचारस्य पार्थक्येनानुपयोगाद् मनुमतेनान्वीक्षिक्यध्ययनं राज्ञा कृते नापेक्ष्यते, तथा अर्थव्यवस्थायै प्रवृत्तो राजा पार्थक्येन धर्मं मा विजानातु तावतापि नो हानिः। प्रजा धर्मेणात्मानं शोभयत्येव, अतः राज्ञा स्ववृत्तिममत्वा राज्ञा त्रयी नाधीता यदि, तर्ह्यपि स वार्तादण्डनीत्योरध्ययनं वृत्तित्वेन स्वीकरोतीति बृहस्पतिमताशयः।

एतन्मते धर्मो न निष्फलः; किन्तु अर्थज्ञानभाव्यकभावनाकरणत्वं बृहस्पतिना त्रय्यां न स्वीक्रियते; किन्तु उक्तसाधनतावच्छेदकत्वमात्रम्। अत्रायमाशयः—बृहस्पतिः यान् शिष्यानर्थशास्त्रमध्यापयामास, ते ब्रह्मज्ञाः कृतकृत्या न नाकभाज आसन्। तेषां कृते तदानीं कर्तव्याकर्तव्यपरिच्छेदज्ञानमप्यनुपयुक्तमभूत्। सत्यप्येवं प्रजानामर्थ-व्यवस्थार्थं रक्षणार्थं च प्रयतमानाः वार्तां दण्डनीतिं चोपयुक्ततयाऽमन्यन्त। अतस्त्रयी-साधनत्वेनोपेक्षितवन्तः। अत्रेदं बोध्यम्—एतन्मते त्रयी संवरणार्थमपेक्ष्यते, अन्यथा त्रय्या प्रतिपादितो धर्मः सर्वथा उपेक्षितो भवेत्, तर्हि "नायमधर्मरुचिः विश्वास्यः" इति जानन्ती प्रजा राजानं नानुरज्येदिति त्रयी संवरणमात्रमिति।

अत्र बार्हस्पत्या एवमाहुः—

पूर्ववद् राजा त्रयीं राजवृत्तित्वेन मा स्वीकरोतु; किन्तु तेन यात्रार्थं धर्मं पालयन्ती धर्मप्रचारान्न भेदनीया। तथा सत्येव करादिसमर्पणं च प्रजया करिष्यते। राज्ञा तु विद्वत्सङ्गतिं विदधता विद्वन्निर्देशानुसारेण प्रजयाऽनुष्ठेयो धर्मो ज्ञेयः। तावतैव त्रय्या अध्ययनमकुर्वन्नपि स प्रजां रक्षितुं समर्थ इत्येतन्मते प्रजायां लोकयात्राया उच्छेदो नास्ति। अत एव चार्वाकमतं लोकायतिकपदेन सङ्गृहीतमुपपद्यते। यतः स नीतिकामशास्त्रानुसारेण वर्तनं स्वीकरोति। तदेवाहुः—

योगाय वार्ता लोकस्य नीतिः क्षेमाय चोदिता।
त्रयी तत्रापि मघवन् लोकपक्तिप्रयोजना॥ इति।

चार्वाकमतप्रचारको बृहस्पतिः

राक्षसान् ब्रह्मचर्यादिपालनमुपदिश्य तेषामजरत्वकामनया शुक्रस्तपस्तेपे। तपः समाप्त्यवसाने बृहस्पतिः जयन्तीं शुक्रस्य समीपे तं १० वर्षपर्यन्तं रमयितुं प्रेषयामास। तद्वर्षेषु बृहस्पतिः शुक्रस्य रूपं धृत्वा चार्वाकमतं प्रचार्य राक्षसान् मोहयामास। दशवर्षानन्तरं प्रत्यावृत्तः शुक्रः राक्षसानुपदिदेश; किन्तु ते शुक्रमतं न स्वीचक्रुः। एवं-रीत्या बृहस्पतिश्चार्वाकमतप्रचारकोऽभूत्।

चार्वाकमतं बार्हस्पत्यत्वेनोपयुज्यते

राजनीत्युक्तात्मगुणसम्पत्तिमता कर्मकुशलेन राज्ञा लोकयात्रायै स्वीयनीत्यनु-सरणं चार्वाकमतरीत्यापि स्वीकर्तव्यमेव भवति। एतन्मतेऽर्थकामौ पुरुषार्थौ, नीति-कामशास्त्रानुसारेण वर्तनं धर्मः, लोकसिद्धो राजा ईश्वर इत्युक्तं वर्तते। अतः बार्हस्पत्य-मतोपदेशेन यथा लोकमतमुपेक्षितं न भवेत्, तथा यतनीयं ब्रह्मज्ञेनापीति हृद्यम्।

चार्वाकमतं विजानन्तो असुरा बृहस्पतिमतमनुचक्रुः; किन्तु ते तमःप्रकृति-स्वभावात् स्वीकृतं चार्वाकमतं विकृतिं प्रापयित्वा अन्वतिष्ठन् इत्यतो बृहस्पतिर्न प्रतिभूः; किन्तु तमःप्रकृतयोऽसुराः। इतीदमपि मतं न बृहस्पतेः; अपि तु बार्हस्पत्यानाम्।

ब्रह्मज्ञो राजपदाधिकारी

'ब्रह्मज्ञोऽन्तेवासी भूत्वा नीतिमधीते' इति मतं नासङ्गतम्। ब्रह्मज्ञस्यापि असर्व-ज्ञत्वादिति वेदान्तन्यायरत्नावल्यामभिहितम्। ब्रह्मज्ञः सर्वत्र समवर्ती निष्पक्षपातं प्रवर्तते, न्यायं प्रवर्तयति, शमस्य तथैव स्वभावात्। तदाहुः—

विना रागेण सर्वत्र सुखिनामनुमोदनम्।
यथाशक्ति परित्राणं दुःखिनामविशेषतः॥ इति।

'ब्रह्मज्ञनृपत्यभावे विकृतचित्तं राजानं प्राप्य प्रजापि व्यसनिनी विकृता प्रमाद्यति' इति नीतिमधीत्य ब्रह्मज्ञो कुशलश्चेत् प्राप्यते, तर्हि स एव नृपतिपदाधिकारी प्रथमो मुख्यो जनकादिवदिति प्रथमः पक्षः।

अत एव 'नृपतिपदाय शमाय च क्षमो भवति' इति कामन्दकोक्तमुपपन्नं भवति। यद्यपि ब्रह्मज्ञेन त्र्यध्ययनं कृतं व्यर्थमेव, तथापि 'लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हति' इत्युक्तत्वात् प्रत्यक्षादिप्रमाणादिना लाकयात्रोपयोगित्वस्य सिद्धत्वात् त्रयीप्रामाण्यं स्वीकृत्य वर्णाश्रमाचारवत्वं दयाऽहिंसादिसाधारणधर्मवत्वं च अनुष्ठाय ब्रह्मज्ञेन राज्ञा लोकपालनं मात्स्यन्यायापसरणञ्च कृतं चेत्, चार्वाकमतमप्यनुष्ठितं भवति।

ब्रह्मज्ञभिन्नोऽपि राजा

ब्रह्मज्ञोपलब्ध्यभावे तु यो राजपदाधिकारी गुणबाहुल्यसम्पन्नः, स एव—

अपारे यो भवेत्पारं अप्लवे यो भवेत्प्लवः।
शूद्रो वा यदि वाऽप्यन्यः सर्वथा मानमर्हति॥

इत्युक्तरीत्या राज्यपदेऽभिषिच्यते। तेन त्रयीवृत्तित्वेनाध्येयास्तत्प्रामाण्यमालोच्य तत्प्रोक्तमङ्कुशस्थानीयं धर्मानुशासनं स्वीकर्तव्यमिति बृहदारण्यकोपनिषद्वचनाज्ज्ञायते।

बृहस्पतिमतेन चाणक्यमतसमन्वयः

बृहस्पतिमतेन ब्रह्मज्ञानां कृतेऽर्थज्ञानभाव्यकभावनाकरणत्वं साधकतमत्वं वार्तायां नीत्यां च तदवच्छेदकत्वात्मकम्, करणत्वं त्वान्वीक्षिक्यां त्रय्यां च स्वीक्रियते। चाणक्यमते तु ब्रह्मज्ञस्य राज्ञोऽभावे तत्साधकतमत्वं त्रय्यामान्वीक्षिक्यामपि अपेक्ष्यते, यतः संवरणापेक्षया लोकयात्रार्थं वास्तविकतया राज्ञा त्रयी सेव्यते, तर्हि दम्भीभावाद् अविश्वास्यत्वस्य प्रसक्तिः आत्मनि न सम्भवति।

शुक्रमतम्

पृथिव्या लाभाद्युद्देश्यभावनाकरणत्वं दण्डनीतौ तिसृषु परासु विद्यासु तत्साधनतावच्छेदकत्व इति शुक्रमत एकैव दण्डनीतिर्बोध्या। शेषं पूर्ववद्बोध्यम्।

शुक्रचाणक्यमतसमन्वयः

अनेनापि मतेन सह चाणक्यमतस्य पूर्ववत् समन्वयो बोध्यः।

विद्यानां निन्दास्तुतिबोधकवाक्यसमन्वयः

चतसृणामपि विधायकानि स्तुतिपराणि निन्दापराणि निषेधकानि च वचनान्युपलभ्यन्ते। यथा–'शुष्केनात्मानमन्विच्छेत्,' 'हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्' इति। तत्र अधिकारिभेदेनेदृशानां वचनानां समन्वयो बोध्यः, यथा बालको न्यायशास्त्राध्ययने यदा प्रेरणीयः, तदा विधिवाक्यं प्रेरकं बोध्यम्। न्याय एवास्थिरः स न विद्यान्तरमध्येतुं धर्मार्थौ वा विचारयितुं चेष्टते, तदा निन्दया न्यायशास्त्रस्याध्ययनान्निवृत्तिः। विशेषस्तु सेतुबन्धव्याख्याने श्रीभास्कराचार्यकृते (७७ पृ०) द्रष्टव्यः।

विद्यानां नीतित्वम्

आन्वीक्षिक्यां फलसाधनत्वं योगीश्वरेण पुराणन्यायमीमांसेत्यादि वचनप्रमाणेन साधितम्। तद्वद् विद्ययोर्बलाबले तु यावन्न आन्वीक्षिक्या विविक्ते भवतः, तावद् विद्यातात्पर्यं दुरवगाहमिति फलसाधनत्वमान्विक्षिकीनिष्ठमनुमेयं भवति। तदुक्तम्–'बलाबले चैतासां हेतुभिरन्वीक्षमाणैः" इत्यादि।

किञ्च, हेतुत्वं कार्यनिरूपितं तस्य परिष्कृतं रूपमनन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्तित्वम्। अनन्यथासिद्धत्वञ्च "यत्र यत्र प्रामाणिकानां नियतपूर्ववृत्तिषु अकारणत्वव्यवहारः, तत्तद्भिन्नत्वम्" इत्युक्त्या स व्यवहारः प्रामाणिकापौरुषेयशब्दाधीन एव मन्तव्यः, तत्रैव भ्रमप्रमादादिदोषाभावात्। अतः आन्वीक्षिक्या विचार्यमाणस्य हेतुत्वस्य शब्दप्रमाणप्रमितं तदुपजीव्यभूतायामान्वीक्षिक्यां विद्यमानं फलसाधनत्वं

शब्दप्रमाणेन प्रमितम् । एवं परस्परविरुद्धानां वचनानामायुर्वेदादौ उपस्थितानां समन्वयः आन्वीक्षिक्या आयुर्वेदादिदृष्टशास्त्रार्थे प्रत्येतव्यो भवति । तथासत्येव चिकित्सा-साफल्यं दृश्यते । एवंरीत्या आन्वीक्षिक्यां स्थितं विचारसाधनत्वं प्रत्यक्षानुमानाभ्यां प्रमितं भवति । इत्यस्यां विद्यायां नीतित्वं निर्विवादम् ।

त्रय्यां फलसाधनत्वं "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमप्रामाण्यात्" इति गौतमशब्देन प्रमितम् । आयुर्वेदादिद्वारकेषु वैदिकविधिष्वदृष्टसाधनेषु दृष्टफलपर्यवसितेषु प्रत्यक्षानुमानप्रमाणप्रमितत्वं निर्णीतम् । वार्तान्तर्गतानि कृष्यादिकर्माणि नक्षत्रविशेषे योगविशेषे करणविशेषे तिथिविशेषे कृतानि सफलानि भवन्ति । तत् सीताध्यक्षप्रकरणे स्पष्टम् । अत्रापि मूलभूतं वचनं वेदवचनं मन्वते । तस्माद् वार्तायां निर्णीते फलसाधनत्वे शब्दप्रमाणप्रमितत्वं निर्विवादम् । वार्ताविद्यामधिगत्य तदनुसारेण बीजावापादिकार्ये सम्पन्ने दृष्टं फलं धान्यं समुदेति । इति प्रत्यक्षानुमानाभ्यामपि वार्तानिष्ठे फलसाधनत्वे प्रमितत्वं निर्णीयते ।

राजविद्यायां नीतित्वं तु स्पष्टम् । तथा हि--राजनीतिर्न्यायतोऽर्जनादिचतुष्टयं विदधाति । तत्र न्यायत इत्यविवक्षणे अर्जितं धनं परेषामामिषं शत्रुत्वजनायनरागयोर्वर्धकं भवति, "धर्मार्जितो धान्यषड्भागादिना स हि परेषामनामिषभूतो भवत्यक्षयश्च" इति जयमङ्गलोक्तः । न्यायश्च मन्वाद्युपदिष्टोऽर्थ एव भवति, तस्यैव वेदानुमोदितत्वात् । एवं च न्याये शब्दप्रमाणप्रमितत्वं सिद्धम् । सिद्धेऽपि तस्मिन् प्रत्यक्षानुमानविरुद्धं चेत्तर्हि नीतित्वेन नानुमनुते इदमर्थशास्त्रम् । यथा पतिमरणानन्तरं सहगमनं मन्वादिभिरुपदिश्यते । तत्प्रत्यक्षानुमानतः लोकरञ्जकत्वाभावाद् न विधिं निर्माय देशे स्त्रीणां सतीगमननीत्या न बलादापाद्यत इति अराजविद्यायां प्रत्यक्षानुमानप्रमितत्वमपि शब्दप्रमाणप्रमितत्वेन सह समास्त इति अस्यां विद्यायां नीतित्वं समन्वीयते ।

विद्याध्ययनविधिस्वरूपम्

अथ विद्याध्ययनविधिविषय उच्यते । राजा लोकपालनं कर्तुं वाञ्छन् "लोकरक्षणकामः सर्वा अपि विद्या अध्येताम्" इत्येको विधिः कल्पते, तदनुध्यायकौटिल्येन राजवृत्तौ ताः वृत्तित्वेनोक्ताः, तथैव अध्ययनक्रमोऽपि तेन निर्दिष्टो राज्ञः कृते । अतोऽमुं विधिमनुसृत्य शासकेन चतस्रो विद्या अध्येतव्या एवेति स्थितम् । "यस्य तु लोकरक्षणे न कामितम्; किन्तु पृथग् आत्मविज्ञानम्, धर्माधर्मौ, अर्थानर्थौ, नयानयौ, योगक्षेम-निष्पत्त्यनिष्पत्ती वातेन तत्तत्फलोद्देश्येन एका विद्यैव अध्येतव्या" इत्यपरो विधिः । इह विधिद्वयं संयोगपृथक्त्वन्यायेन "दध्नेन्द्रियकामस्य जुहुयात्", "दध्ना जुहोति" इति वाक्यजविधिवद् बोध्यम् ।

विद्यानामाकाङ्क्षानुसारेण उपयुक्तता

लोकरक्षणार्थमिमा विद्या उपयुज्यन्ते कथमित्यपि प्रसङ्गाच्चिन्त्यते । लोकोऽयं

३

निसर्गतो बुभुक्षुतोऽन्नं वाञ्छत्येव तत्साधनतया कृषिं पशुपालनं वाणिज्यञ्च सम्पादयितुं चेष्टते। तत्साफल्याय पशुपालनेतिकर्तव्यताबोधिका विद्यावार्तापि आकाङ्क्षितत्वादुपादेयतां गच्छति। उत्पन्नस्य स्वयमर्जितस्य धनस्य भोक्तृत्वं स्वामिनोऽर्थप्राप्तम्; किन्तु नैके जीवाः सन्ति येऽन्नादिजातं विलुण्ठेयुः, भक्षयेयुश्च। ततो रक्षणपुरःसरं फलभोगाय रक्षणापेक्षया नीतिः लोके अवतरति। नीतिशासनमपराधिनां कण्टकानां कृते दण्डप्रणयनेन कर्तव्यं भवति। दण्डप्रणयनसमये वधपरिक्लेशार्थहरणान्यतमे लोके कोपस्याभ्युदयेन भाव्यमेव। एवं सति प्रजाविरागो राजनि नियत एव। इष्टापत्तौ च पुनरपि नीतिर्दुःशका इति हेतोः, प्रथमतः जनपदे राज्ञा धर्मः प्रचारणीयः। अयमेव विनयः इन्द्रियजयात्मकः। तन्महिम्ना पापकल्पनया पापान्निवृत्तौ पापध्वंसे वा प्रवृत्तो विद्वान् प्रायश्चित्तं चिकीर्षति तस्मिन्कृते नरकभाक्त्वं न स्यात्। प्रायश्चित्तं राजदण्डस्वरूपमपि वर्तते। तच्चापराधिभिः स्वीकृतं कोपभाजनं भवति। नापि दण्ड्याः पुनरपराधं कर्तुं प्रवर्तन्ते। इदञ्चापरं शासनस्य महत्त्वं यद्राज्ञा अपराधी शासितो यदि भवति, तर्हि स यमशासनाधिकारी न भवति इति। तदुक्तं गरुडपुराणे—

गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम्।
अथ प्रच्छन्नपापानां शास्ता वैवस्वतो यमः॥ इति।

इत्येवंरीत्या राजनि प्रजायां च यावत्पर्यन्तं धर्मप्रयुक्ता नरकभाक्त्वभावना दण्डस्य प्रायश्चित्तभावना च समुदेति, तावद् एव दण्डोऽपि प्रायश्चित्तं शास्त्रानुमोदितं प्रसज्यत इति। तत्सत्त्वे तीक्ष्णमृदुदण्डयोरप्रसङ्गाद् यथार्हदण्डस्य पूज्यत्वात्। अतो नरकादिप्रपतनकल्पनाप्रसूतये प्रमाणमूर्धन्यतया शब्दराशिर्वेदः, तदनुयायिन्यो विद्याश्चाध्येतव्या भवन्ति। तत्समूह एव त्रयी विद्या। एवंरीत्याऽऽकाङ्क्षानुसारेण लोके विद्यानामुपयोगित्वं क्लृप्तम्। इदमेवानुसृत्य कामन्दकेन इन्द्रियजयविद्यावृद्धसंयोगः, विद्याविभागः, वर्णाश्रमधर्मव्यवस्था, दण्डमाहात्म्यञ्च इत्येव पञ्चप्रकरणान्युपन्यस्तानि क्रमेण। संयोगपृथक्त्वन्यायेन विद्यानां फलसिध्यर्थत्वं ज्ञात्वा कौटिल्येन स्वमतं निरूपयता राजवृत्तौ आन्वीक्षिक्यध्ययनं तिसृणां विद्यानामध्ययनेन सह व्यधायि। तदिदं कौटिल्यस्य गौरवं स्मरणार्हं वर्तते।

आन्वीक्षिक्यध्ययनस्य अपेक्षा

कौटिल्यात्पूर्वतनैः कतिपयैराचार्यैः भण्डधूर्तनिशाचरकर्तृकत्वं वेदस्य आशङ्क्य तत्रान्धविश्वास्यत्वमप्रामाणिकत्वञ्च चाटुकार्या वाण्या संसाधितम्। वेदाध्ययनप्रयुक्तजीविकाबुद्धिपौरुषहीनेत्याधोष्य च शङ्कानां माध्यमेन जनतायां वेदपराङ्मुखता सञ्चारिता। तासां समस्तानां शङ्कानामपसारणमान्वीक्षिक्या सन्दर्श्यते। कार्यकारणभावः, बलाबलविवेकः, सत्त्वे व्यसने चाभ्युदये अविकारकरो धृतिभावः, तर्कसहचितः मतिभावः, आपाद्यापादकभावप्रकाशनमन्वयव्यतिरेकौ व्याप्यव्यापकभावः, लाघवगौरव-

समीक्षोपायश्च । अनयैव त्रयीप्रामाण्यं भारतस्य जीवातुभूतं समास्थाप्यते । तेन राज्यस्य सङ्घटनं स्थिरीकृतं भवति । उपाध्यायनिरपेक्षाकारस्तु न्यायशास्त्रम् आन्वीक्षिकीपदेन व्यवहरति । अनेकाः शङ्का उत्थाप्य षष्टितन्त्रे अप्रामाण्यस्य व्यवस्थापितत्वात् तन्निरासार्थं न्यायस्यैव सामर्थ्यात् । अन्यथा परिष्कृतपरिगणितभाषां विना शङ्कासमाधानेन विना अन्तेवासिनः षष्टितन्त्रं प्रामाणिकत्वेन न मंस्यन्ते ।

साङ्ख्यस्य न्यायशास्त्रत्वम्

अथ आन्वीक्षिकीविद्यानिरूपणे साङ्ख्यस्य सङ्ग्रहः कृतः "न्यायशास्त्रं साङ्ख्यादि", "सङ्ख्यावान् पण्डितः कविः सङ्ख्या विवेकः तस्या इदं शास्त्रम्" इति टीकोक्तेश्च । सङ्ख्याया बुद्धिविचारणार्थकत्वाद् विवेकघटितं षष्टितन्त्रं साङ्ख्यशास्त्रं भवति । तद्घटकत्वेनापेक्षितत्वाद् विवेकस्य दृष्टिः कौटिल्येन न्यायभाष्यं निर्माय विकासभावं प्रापिता । तद्द्वारा षष्टितन्त्रं साधितमिति न्यायपदेन साङ्ख्यशास्त्रं गृहीतं टीकाकृता । अनयैवोक्त्या कौटिल्यस्य न्यायभाष्यकर्तृत्वमपि ध्वनितं भवति ।

सङ्ख्यापदार्थः

अथ सङ्ख्याया विचारणार्थकत्वं बोधयितुं सङ्ख्यास्वरूपं विमृश्यते । सा बुद्धिविषया भवति । यतः "इमौ द्वौ, इमे त्रयः" इत्यादि प्रतीतयः द्रव्यावलम्बिन्यो यत्र स्वीक्रियन्ते, तत्र तु तद्विधेयत्वं, यत्रासौ गुणो भवितुमर्हति । एवं स्थितिः सर्वस्यां तथाविधायां प्रतीतौ न वर्तते, गुणादीन् विषयीकृत्यापि तथाप्रतीतेः । अतोऽस्य भाष्यस्य कौटिल्येनेतरनिरपेक्षतया कृतेषु स्थल विशेषेषु निर्मितत्वेऽपि परम्परायातत्वं मन्तव्यम् । भाष्यत्वं तु गुणे गुणानङ्गीकारात् । अतो बुद्धिविषयतैव सङ्ख्या । बुद्धिश्च अयमेक इत्याद्यपेक्षाबुद्धिरत्र विवक्षिता । नैयायिकमतेन तस्याः त्रिक्षणावस्थायित्वं द्वित्वप्रत्यक्षानुरोधात् स्वीक्रियते । यथा अनुमित्यादिकार्यानुरोधेनेच्छादीनां चतुःक्षणावस्थायित्वं स्वीक्रियते, पक्षताग्रन्थोल्लेखात् । यथा वा रसप्रतीत्यनुरोधेन काव्यव्यापारप्रसूता व्यञ्जनजनिता बुद्धिः चतुर्दशक्षणपर्यन्तमनुस्यूता मन्यते, तथैव अपेक्षाबुद्धेः द्वित्वादिविषयताप्रत्यक्षं यावत् स्थायित्वं कल्पते । यतो हि अपेक्षाबुद्धेरुक्तायाः सत्त्व एव द्वौ त्रय इति प्रतीतिः सम्भवितुमर्हति । यस्य अपेक्षाबुद्धिः, तस्यैव सङ्ख्याप्रत्यक्षम् । अत एव पुरःस्थितघटस्य साधारण्येन प्रत्यक्षमिव न पुरःस्थितघटसमवेतद्वित्वस्य प्रत्यक्षं भवति । सङ्ख्येयप्रत्यक्षे सति सङ्ख्या प्रत्यक्षीक्रियते । इदमेव प्रत्यक्षं विचारणा विवेको वा उच्यते । तदाहुः-'चर्चा सङ्ख्याविचारणा' इति । नन्वेवं सङ्ख्याया गुणरूपत्वमेव व्यपगतं भवेदिति चेत्, न, सर्वसाधारण्येन सङ्ख्यापदार्थः विषयतासम्बन्धेन अपेक्षाबुद्धिमत्त्वमेव लाघवादिति वदामः । यदा द्रव्यं विशेष्यीकृत्य द्वौ इत्यादि प्रतीतिर्भवति, तदा अपेक्षाबुद्धेर्विषयतासम्बन्धः समवायात्मक एव तत्कार्यकारित्वात् । तत्कार्यञ्चास्वातन्त्र्य-

रूपम् । एवंविधं समवायत्वं नैयायिकानामप्यभिमतं समवायनिरूपणावसरे वैशेषिकभाष्ये, इहेदमिति बुद्धिर्यतो भवतीति व्याख्यायां न्यायकन्दल्याञ्च तथैवोपलम्भात् । एवञ्चापृथग्भावेन भाने सति बुद्धिसमवायसम्बन्धेनोत्पन्ना द्रव्योपादानोपादेया । अन्यत्र तु प्रतिभातः सम्बन्धो न समवायः; किन्तु विषयतारूपः । सङ्ख्येयानां पिपीलिकादीनां नाशेऽपि "पिपीलिकानां शतम्" इत्यादि प्रतीतिर्भवतीति बौद्धे पिपीलिकापदार्थोपपत्तिः न्यायकन्दल्यां स्वीकृता, औपचारिकी वा सा मन्तव्या । राजनीतौ तु जगतः मृगतृष्णातुल्यत्वं स्वीक्रियते । अत एव सर्वस्य पदार्थस्य "अहं बहु स्याम्" इत्युक्ते आत्मरूपत्वेन बुद्धिमत्त्वं समवायिकारणत्वं च सहजत एव उपपन्नं भवति । एवञ्च विचारणात्मकबुद्धिमत्त्वमुपपादयितुं चाणक्यः साङ्ख्यमान्वीक्षिक्यामन्तर्भावयामास साङ्ख्यमित्यादिना । यथा राजनीतौ साङ्ख्यं न्यायः, तथा योगेऽपि स एव । स च वानप्रस्थाश्रमिभिरनुष्ठेयोऽत्र न विवक्षितः; किन्तु तर्कात्मकः न्यायवैशेषिकैः प्रमाणीकृतः ।

योगस्तर्कः, प्रत्याहारादिस्वरूपाङ्गसहितः

अत्र प्रत्याहारः, ध्यानम्, प्राणायामः, धारणा, तर्कः, समाधिरिति षडङ्गो योगो भवति । तेषु "धारकेण प्रयत्नेन वशीकृतस्य मनसः तत्त्वबुभुत्साविशिष्टेनात्मना सह संयोगो योगो भवति । स च राज्ञा गृहस्थेन राजनीतिविदा तर्करूपतया साधनीयः" इति कौटिल्यस्य मतं भाति । तदनुबन्धितया यमः साधारणो धर्म उच्यते । नियमस्तु स्ववर्णाश्रमधर्म एव । तथा च धर्ममनुतिष्ठता राज्ञा तर्ककुशलेन भाव्यम् । तस्यैवं स्वरूपम्—व्याप्यारोपेण व्यापकारोपः, तद्धारायां यदेकत्र मनसोऽवस्थानं समाधिः । स च तत्त्वबुभुत्सायां सत्यां भवति, तस्याश्चिन्तारूपत्वात्, ध्यानविभावत्वाच्च । कामिनीज्ञानान्यज्ञानं प्रति प्रतिबन्धकत्वं तज्जिज्ञासायां क्लृप्तम् । अतस्तत्त्वबुभुत्सावत्त्वमात्मनि अपेक्ष्यते । तथा योगलक्षणे निविष्टः धारकः प्रयत्नोऽपि नीतिरूपः । यतो ह्यत्र साफल्यस्य नैयत्याद् हर्षसामग्री वर्तते । सा नीतिलक्षणे विवेचिता । किञ्च, ज्ञानप्रभा आनन्दप्रभामिश्रिता सती यदा क्रियाप्रभासंयुता भवति, तदा सा शक्तिरुच्यते, इत्यपि सविस्तरं यथास्थानं प्रतिपादितं वर्तते । एवञ्च ज्ञानप्रभायां सुखानुभवेन मनसो यद्यवस्थापनं क्रियते, तर्हि तत्र धारकप्रयत्नो भवति । नीतिशास्त्रं हि क्रियापर्यवसायि समस्ति । यद्येतच्छास्त्रानुयायित्वं प्रतिज्ञायते अनुभूयते च, तर्हि साफल्यं चेतसो रतिरपि सिद्धैव ।

क्रियासातत्ये विरोधित्वप्रतिबन्धकता

अपि च नीतेः सातत्ये क्रियाकूटस्य धारायामेतावत्सामर्थ्यं यद् विपरीतासम्भावनादितत्त्वस्य प्रतिबध्यता, क्रियायास्तथाविधप्रतिबध्य-प्रतिबन्धकभावस्य क्लृप्तत्वात् । तद्यथा धाराप्रवाहन्यायेन कस्मिंश्चिद्वस्तुनि क्रियासातत्यं यदा अनुभूयते,

तदा अन्तराले सम्भूतस्य क्रियाविच्छेदस्य वस्तुनः पार्थक्यस्य वा अनुभूतिर्न भवति; किन्तु सैवेयं गङ्गा चलचित्रे स एवाश्व एक इति प्रतीतिर्भवति। एवमेव विरोधिदृष्टितिरोधानमपि क्रियासातत्यफलं स्मर्तव्यम्। स्वगृह एव उपर्यधोदेशभेदेन बाला यान्ति आयान्ति उपद्रवन्ति च, तथापि तेषां शरीरे नाध्वश्रमोऽनुभूयते। एतेन धारकप्रयत्नेन मनसश्चाञ्चल्यं निरुध्यते, तदेव मनसो धारणम्। यद्यप्येतेनैव कार्यसम्भवे तत्त्वबुभुत्सायाः निष्प्रयोजनत्वं भाति, तथापि तर्कार्थं तस्या उपयुक्तत्वं क्लृप्तम्।

तर्के तत्त्वबुभुत्साया उपयोगः

तर्को हि व्याप्यारोपेण व्यापकारोपः। अयं हि आहार्यः, यत एतदारोपस्य सामग्र्यां आपाद्यव्यतिरेकनिश्चयः आपाद्यव्याप्यापादकनिश्चयेन सह गृहीतो वर्तते। अत एव व्यापकारोपस्य उक्तसामग्रीबलाद् आहार्यनिश्चयत्वं सिद्धम्। आहार्यश्च बाधज्ञानकालीनेच्छाजन्यो भवति। अत एव तस्य न प्रतिबध्यत्वं नापि प्रतिबन्धकत्वम्; किन्तु आपत्तिरेव मूलशैथिल्येष्टापत्त्योरभावे विपरीतग्रहप्रतिबन्धिका भवति, इति त्वन्यदेतत्। आहार्यस्य तर्कस्योत्पत्तये इच्छायाः कारणत्वस्य क्लृप्तत्वाद् बुभुत्सानिवेशो योगलक्षणे कृतः। स एव धारावाहिकश्चेत् समाधिर्भवति। तार्किको राजा समाधिबलाद् अकार्यान्निवर्तते। किञ्च, तार्किकः शास्त्रेषु कृतपरिश्रमः प्रतिभासम्पन्नः अनूचानो भवन् यदभ्यूहति, आर्षं तद्भवति। शबरस्वामिभिरपि आत्मतुष्टिप्रामाण्यविचारे अनूचानदृष्टिरेव प्रमाणत्वेन स्वीकृता। तथा च राजनीतौ आन्वीक्षिकीपदेन पूर्वपरिष्कारानुसारेण विचारज्ञानभाव्यिका साङ्ख्ययोगं वैशेषिकञ्च संगृह्णाति, ताभ्यामपि योगसम्भवात्। तदुक्तम्—

प्रत्याहारस्तथा ध्यानं प्राणायामो धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते॥ इति॥

तर्कधाराप्रवाहे यथा शमादीनामुत्पत्तिः, तथा दोषप्रकोपोऽपि जायेत, तर्हि शमनं कथं भवतीत्युच्यते।

तर्कजन्यश्रमपरिहारोपायः

शरीरान्तः सञ्चारिणमुदानवायुं वशीकर्तुं यः शक्नोति, स तद्वायुमुखेन शिरासु रसं सञ्चारयति चेत्, आरोग्यं भजत इत्यायुर्वेदेन सिद्धम्। आकर्षणं तैलस्य रोमकूपद्वारा शरीरे उदानवायुना क्रियते, यतः स ऊर्जाबलप्रदः। तदुक्तम्—

उरःस्थानमुदानस्य नासानाभिगलांश्चरेत्।
वाक्प्रवृत्तिप्रयत्नोर्जाबलवर्णस्मृतिप्रदः ॥ इति॥

बलप्रदस्याहारपरिणामस्य रसस्य सञ्चार उदानेन यथा भवति, तथा ध्यानादिभावे-

नापि हृद्य ओजस उत्पादकः पदार्थः शरीरान्तः प्रवेशयितुं शक्यः, तेनापि आरोग्यलाभ इत्यपि नाट्यदर्शनमाधारीकृत्य निर्णीयते। नाटकदर्शनमात्रेण समाजो विना इन्द्रियार्थसन्निकर्षं सञ्चारिभावानां साधारणीकरणव्यापारमहिम्ना चेतसि आस्वादसुखमनुभवति, तदानीं रजस्तमोभवान् विकारा अपि अभिभवन्ति। तदिदं भावप्रकाशने व्यक्तम्—

श्रुता दृष्टाः स्मृता ध्याता भवन्ति स्थैर्यहेतवः ॥ इति।

कुण्डलिनी जागृतिः, ईश्वररूपञ्च

एवञ्च ध्यानेनापि श्रमपरिहारार्थमपेक्षितो हृद्य ओजस उत्पादको रसः तार्किकेण आत्मशरीरे सञ्चारणीयः। एवंविधयोगेन गुरुभक्तौ रत एकाग्रभूमिकायां स्थितः क्रियाशक्तिम् आनन्दप्रभामिश्रितज्ञानप्रभासंवलितां प्राप्नोति। उपलब्धेयं शक्तिः स्वतन्त्रा ईश्वरस्वरूपा तस्याः स्थानं मस्तिष्कं समास्त इति भावप्रकाशनतो ज्ञायते। एवमेव तर्कधारायां सत्यां सिद्धायां कुण्डलिनी अपि जागृता भवतीति अस्मिन् योगे नास्ति न्यूनता।

लोकायतनिरुक्तिः

मूलकृता आन्वीक्षिक्या विभजनं कृतवता साङ्ख्ययोगाभ्यां सह लोकायतमपि संगृह्यते। तस्यैवं व्याख्यानं "लोकाय बुद्धिं तनोति" इति। केचित्तु लोकेषु आयत्तं प्रसिद्धमित्याहुः, तन्न, यतः लोकेषु प्रसिद्धं चार्वाकमतमपि शास्त्रज्ञानप्रसूतमेवेति न भवति, मिथ्याज्ञानवासनाप्रयुक्तत्वस्यापि तत्र सम्भवात्। तथासति नीतिविरुद्धाचरणस्यापि सम्भव आपद्येत। तथासति नीतिकामशास्त्रानुसारेण वर्तनं धर्म इति चार्वाकमतं विरुद्धमापद्येत। एवञ्च चार्वाकमतेन परलोकस्य सन्दिग्धत्वेऽपि तद्विरुद्धं नाचरणीयम्, अशुभस्यापादानप्रसङ्गात्। अतोऽस्य मतस्य पूर्वपक्षतया आन्वीक्षिक्यां ग्रहणमिति।

चार्वाकमतग्रहणम्

ननु मतान्तरेषु सत्स्वपि चार्वाकमतमेव कुतः गृहीतमिति चेत्, न, मतान्तरेषु नैष्कर्म्यमस्ति। अत्र तु सकलं प्रत्यक्षसिद्धमनुष्ठेयं भवति। चार्वाकेण "ऋणं कृत्वा घृतं पिबेत्" इत्युक्तम्। एतन्मते लोकसिद्धो राजा ईश्वरो वर्तते। तस्मात् चार्वाकमतं नीतिशास्त्रमपेक्षते। अत्र नैष्कर्म्यं नास्ति, अतः मतान्तरमनुल्लिख्य चार्वाकमतं संगृहीतम्।

नन्वेवं चार्वाकमतस्य पश्चादुक्तस्य पूर्वपक्षत्वं कथं सङ्गच्छत इति चेत् समाधीयते—

चार्वाकमतस्य पश्चाद्ग्रहणम्

पश्चादुक्तोऽप्यर्थः अर्थानुसन्धानौचित्येन पूर्वं योज्यः। "अग्निहोत्रं जुहोति",

"यवागू पचति" इत्यत्र 'यवागूं पचति, अग्निहोत्रं जुहोति' इत्यन्वयः स्वीक्रियते। तथा धर्मार्थयोः परीक्षणे कर्तव्ये अनेके सन्देहाः समुद्भवन्ति, तेषु सत्सु षष्ठाध्यायोक्तदिशा धर्मार्थयोरभिनिवेशो न स्यात्। यदि न विचार्यते, तर्हि नास्तिकमतेनापि वेदाप्रामाण्यं साधयितुं शक्यते। एवंविधाः सन्देहाः चार्वाकादिमतेषु निरूपिताः, तेषां निरासः विवेकपूर्वकं न्यायवैशेषिकपद्धत्या सम्पाद्यते। तथासति धर्मार्थयोरभिनिवेशः स्थिरीक्रियते, तेन सत्त्वमप्युत्पद्यते। अतो लोकायतस्य पूर्वपक्षत्वं सूपपन्नम्।

चार्वाकमतस्य पश्चाद्ग्रहणे विशेषः

ब्रह्मज्ञो राजा कृतार्थः कालं चार्वाकमतेन क्षपयतु स्वर्गस्याकाम्यत्वान्नरकभयाभावाच्च, इति बोधनार्थं पश्चादान्वीक्षिक्या ग्रहणम्।

किञ्च, शास्त्रसिद्धान्तस्याप्रामाण्यं ख्यापयन्तः शब्दस्य अप्रामाण्यं साधयितुं चेष्टन्ते। तत्प्रत्याख्यानाय चार्वाकमतमाश्रित्य "प्रत्यक्षप्रमाणेन शब्दोऽप्रमाणं चेत्, तवापि शब्दः न प्रमाणम्" इत्येव जल्पः कर्तव्यो भवति। इत्थञ्च आन्वीक्षिकीषटकतया लोकायतमतस्य वादविशेषे अभ्यर्हितत्वम्। तथा प्रत्यक्षतः सुखसाधनभूतायां नीतौ आनन्दमयत्वज्ञापनार्थमुपयुक्तत्वं भवतीति लोकमतसंग्रहार्थं चार्वाकमतमपेक्ष्यते। अतः पूर्वपक्षरूपेण उपस्थापितं सदपि चार्वाकमतं पश्चान्निरूपितं मूलकृतेति दिक्।

धर्मविद्याऽप्रत्याख्यानम्

ब्रह्मज्ञोऽपि राजा चार्वाकमतसापेक्षः लोकयात्रातत्त्वं जानन् धर्मरुचिप्रत्याख्यानं न कुर्यात्। अन्यथा अर्थमात्ररुचिरयमविश्वस्तः स्यात्। अथवा केनचित्कृते नास्तिक्यप्रचारे स्वयं सन्दिहानः आन्वीक्षिकीमजानानो लोकयात्रासाधनत्वसौष्ठवं त्रयीविद्यायां असंपश्यन् परलोकाभावं न प्रतिजानीयात्। किं बहुना, परलोकापेक्षी राजा सदाचारेषु तत्साधनत्वं जानानो लौकिकं साध्यसाधनभावं तत्र जानीयाद् यदि, तर्हि सदाचारोऽप्युपेक्षाविषयो न स्यात्। स्वयं तन्मना अनुतिष्ठेत्, न स्याच्च लोकयात्रोच्छेदोऽपि इति लौकिकसाध्यसाधनभावज्ञापनार्थं लोकेषु मैत्रीपूर्वकं परस्परसापेक्षायाः सङ्गतेः स्थापनार्थं चाप्रत्याख्यानं धर्मविद्याया अवश्यं विधेयम्। अथ आन्वीक्षिक्याः त्रीणि प्रयोजनानि। तत्र प्रथमं प्रयोजनं विद्यानां बलाबलविचारः, सोऽभिधीयते।

आन्वीक्षिकीप्रयोजनेषु विद्यानां बलाबलविचारः

तथा हि—विद्यानां प्राबल्यं दौर्बल्यञ्च ज्ञापिकाभिः क्वचिद् उत्पादिकाभिर्युक्तिभिः बोध्यम्। यथा वेदविद्या स्मृत्यादि विद्यापेक्षया प्रबलेति सर्वसम्मतम्; किन्तु "वेदं कृत्वा वेदिं करोति" इति श्रुतिबोधितं वेदकरणानन्तर्यं वेदिकरणे "क्षुते आचामेत्" इति स्मृत्या बाध्यते युक्त्या। तस्यायं भावः—वेदवेदिकरणे आनन्तर्यं धर्मः, पदार्थवृत्तिः तस्य प्रसक्तिः पदार्थसमुच्चये सति सम्भवति। पदार्थसमुच्चयान्तर्गतं क्षुते आचमनम्,

तच्च स्मृत्या पूर्वमेव बोधितम् । पदार्थसमुच्चयसापेक्षा तदुत्तरकाले प्रसक्ता श्रुतिः आनन्तर्यपदार्थधर्मरूपानन्तर्यबोधिका दुर्बला इति वेदकरणानन्तरं क्षुत्प्रसक्तौ तत्प्रयुक्तमाचमनं कृत्वा वेदिं कुर्यादिति 'वेदं कृत्वा वेदिं करोति' इति वाक्यस्य अर्थ उच्यते मीमांसकैः । अन्यथा "युक्तिहीनविचारे तु धर्महानिः प्रजायते" । यथा वा अर्थशास्त्रं धर्मशास्त्रापेक्षया दुर्बलं मन्यन्ते विद्वांसः । तथापि क्वचिद् अर्थशास्त्रं प्रबलं भवति । यथा चौर्ये कृते धर्मशास्त्रेण "स्तेनो दण्ड्यः" इति निर्णीयते; किन्तु प्राण-बाधायामुपस्थितायां बुभुक्षुणा (धनधान्ये प्रचुरमात्रायां स्थितेऽपि यः स्वामी न प्रयच्छति बुभुक्षवे, स हीनकर्मा) दिनत्रयपर्यन्तं भोजनस्यालाभे हीनकर्म चौर्यं कर्तुं शक्यत इत्यर्थशास्त्रेण विहितं चौर्यं तदानीं न दोषावहम् । एवमेव धर्मस्य प्राबल्येऽपि क्वचिद् राजशासनस्यापि प्राबल्यं भवतीत्यादि वैदिकसिद्धान्तसंरक्षिण्यां व्यक्तम् । सोऽयं विद्यानां बलाबलविवेकः आन्वीक्षिक्या भवति ।

आन्वीक्षिक्याः द्वितीयं प्रयोजनम्

व्यसने अभ्युदये च मनस एकरूपतया अवस्थापनमान्वीक्षिक्याः द्वितीयं प्रयोजनम् । प्राणिनां शत्रू हर्षशोकौ भवतः । अभिलषितेष्टसम्पत्त्या स्वामी हर्षेणोल्लसितः समुद्धतो भवति, सम्पत्तेर्मदमानकारणत्वेन प्रतिपादितत्वात् । एवमेव शोकोऽपि तथैव । यतः स हि प्रतियोगिनि प्रीत्या तन्नाशासहिष्णुत्वरूपो द्वेषः । सति च तस्मिन् नीच-मध्यमप्रकृती मूर्च्छां मृतिं वा अनुभवत इति सोऽपि जीवनस्य शत्रुः । अनयोरुभयोरपि अपसारणं विवेकेनैव कर्तव्यं भवति । तच्च आन्वीक्षिक्या सम्पादनीयमित्येवंरीत्या अस्या द्वितीयं प्रयोजनं सिद्धम् । अस्याः तृतीयं प्रयोजनं प्रज्ञावाक्यक्रियावैशारद्यम् ।

प्रज्ञावैशारद्यम्

प्रज्ञादीनां वैशारद्यं रजस्तमसोरपसारणे समृद्धे सत्त्वे च सति भवति, यतः नैर्मल्यं सत्त्ववर्धनेन भवति । तदुक्तम्—

'निर्विचारवैशारद्ये अध्यात्मप्रसादः' इति ।

प्रज्ञावैशारद्यं कथं भवतीत्यधोनिर्दिष्टेन पद्येन स्फुटं भवति--

मतयो यत्र गच्छन्ति तत्र गच्छन्ति वानराः ।
शास्त्राणि यत्र गच्छन्ति तत्र गच्छन्ति ते नराः ॥ इति ।

शास्त्रं सम्यग्ज्ञात्वा इष्टसाधनत्वविवेचनपुरस्सरं प्रवृत्तिः कस्यचिद् भवति । अपरस्य तु जन्मान्तरीयवासनावशादिष्टसाधनत्वं बुद्ध्वा सा भवति । तत्रापि कस्याश्चिन्नीत्यनुकूलत्वं तदननुकूलत्वञ्चेति भेदेन प्रवृत्तेर्भेदो भवति । एतासु प्रवृत्तिषु या लोकव्यवहारं पूर्वजन्मानुवृत्तसंस्कारं वा अनुबध्नाति, यथा पक्षिणां वृक्षकोटरे गृह-

निर्माणादि प्रवृत्तिः। तत्र मोहस्यावरणमपि दृश्यते। तेषु इष्टानिष्टसाधनाविवेचनासामर्थ्यात्। मनुष्यसमाजस्यापि प्रवृत्तिः गुरुशिक्षया तदुपदिष्टहितावहेषु साधनेषु समस्ति। अनादिपरम्पराप्राप्तं गतानुगतिकमनुसरति वा, तावत् समाजफलमुत्तममास्वदते; परन्तु स एव विपरीतं नेपथ्यं पश्यति शिक्षां शङ्कते वा विपरीतमेव नेपथ्यमुत्कृष्टं मनुते, तदा समाजोऽनुकरोति। ईदृश्येव स्थितिर्यदि सर्वत्र स्यात्, तर्हि आन्वीक्षिकीकौशलाभावेन कार्याकार्ये केनापि न ज्ञायेयाताम्। अतस्तद्विवेचनाय न्यायविद्या प्रवृत्ता। अनया प्राप्ततर्ककुशलः शङ्कापसारणे कार्यकारणतत्त्वविवेचने च सक्षमोऽकार्याद् व्यावर्तते। इदमेव प्रज्ञावैशारद्यम्।

वाक्यवैशारद्यम्

तर्कविद्यया वाक्यवैशारद्यं कथमिति निरूप्यते। वाक्येन या प्रज्ञा भवति, सा बोधसंज्ञया व्यवह्रियते। बोधश्च सखण्डोपाधिविषयकः, अखण्डोपाधिविषयकश्च। यस्य विषयकं निर्वचनं न सम्भवति, सोऽखण्डोपाधिः। सति निर्वचने सखण्डोपाधिः निर्वचनसामर्थ्यं न्यायविद्यया उपलभ्यते। पदार्थस्वरूपनिर्वचनानन्तरमखण्डार्थविबोधे जाते तद्वान् वाग्मी बुद्धिमान् उच्यते। पदार्थनिर्वचनं विना अखण्डोपाधिज्ञाता न वाग्मी न वा कुशलः। कश्चन निर्वचनं जानाति, अखण्डार्थं तु न जानाति, स निकृष्टः, एतद्वैपरीत्ये मध्यमः, सखण्डाखण्डोभयज्ञाता उत्कृष्ट इत्येवंभेदेन लक्षणज्ञो निकृष्टः, लक्ष्यज्ञो मध्यमः उभयज्ञ उत्तमो भवति। तत्रोदाहरणं प्रकृतिप्रत्ययौ। यथा राममित्यत्र 'रामः' प्रकृतिः, 'अम्' प्रत्ययो वर्तते। अनयोः प्रकृतिः रामशब्दः सर्वासु भाषासु समानानुपूर्वीक एव। प्रत्ययस्तु तत्तद्भाषायां विभिन्नो भवति। तदर्थः कर्मत्वं यदा धनुर्वेषधारि रामाभिनयेन ज्ञापयितव्यं तदा विना न्यायविज्ञसम्मतपरिष्कृतिं आभिनयेन न ज्ञापयितुं शक्यम्। प्रत्ययं श्रुत्वा तत्तद्भाषाविद्भिस्तदर्थो यः कर्मत्वादिः ज्ञायते, स विरुद्धं सदपि अखण्डोपाधिः ज्ञेयः। अत्रोदाहरणं साहित्यिकानां रसप्रतीतिर्वेदान्तिनां वा ब्रह्मप्रतीतिः निर्विकल्पात्मिका। तावतैवालमिति विवक्षायां तु रसाभासोऽपि प्रसज्येत। तथा सति प्रज्ञाकौशलाभावे नेपथ्यमुत्कृष्टं ज्ञात्वा समाजो रसाभासमेव पन्थानमन्यं स्वीकुर्वाणः मार्गाद्भ्रष्टो भवितुमर्हति। तन्निराकरणमिव प्रत्ययार्थाभासनिराकरणं यदि चिकीर्ष्यते, तर्हि तत्साधनतया वाक्यवैशारद्यमपेक्ष्यते। तच्च व्युत्पत्तिरूपम्। सा च तत्तच्छब्दार्थस्य न्यायप्रणाल्यनुगता निरुक्तिः, सा चान्यूनानतिरिक्तार्थप्रत्यायिका चेद्विदुषां सन्तोषावहा भवति। एवंविधा निरुक्तिः असन्दिग्धार्थत्वाद् न्यायालयेन काम्यते। तदुक्तम्—

सुलिप्यनयशब्दोक्तिः सम्पूर्णावयवाक्षरम्।
शासनं राजदत्तं स्यात् सन्धिविग्रहलेखकैः ॥ इति ॥

प्रकृतमनुसरामः—द्वितीयार्थमखण्डं कर्मत्वं विषयीकृत्य जायमानो बोधो वैयाकरणसम्मतः। न्यायसम्मतस्तु परसमवेतत्वे सति धात्वर्थतावच्छेदकफलाश्रयत्वविषयकः। यद्यपीदं निर्वचनं व्याकरणनिर्देशानुसारेण 'काशीं गच्छन् पथि मृतः' इति प्रयोगस्थले काश्यां निरुक्तकर्मत्वस्याभावेन अप्रमाणतां भजेत। अतोऽखण्डोपाधिकमेव कर्मत्वं ब्रुवते वैयाकरणाः। न ह्यत्रेष्टापत्तिर्वक्तुं शक्या, यतः लक्षणानुसारेण लक्ष्यत्वं न स्वीक्रियते मनीषिभिः। तथासति वैयाकरणमते काशीं गन्तुं कर्मत्वं काश्यामसदपि न तथाविधस्य प्रयोगस्याप्रामाण्यम्। तदेव प्रवृत्तस्य पथि मृतस्य व्यापारजन्यं न्यायविद्यया प्रवचनकुशलया परिष्कृतप्रणाल्या अखण्डार्थस्त्वरूपं वास्तविकं ज्ञायते। तावत्पर्यन्तमेव परिष्कारोपयुक्तत्वमिति श्रीधर्मदत्तझामहोदयैः पञ्चलक्षणीतत्त्वावलोके उक्तमस्ति। साहित्यविदोऽपि व्युत्पत्तिशक्तिभेदेन वाक्यवैशारद्यप्रज्ञावैशारद्ये अभिदधति। तदाहुः—

आदौ शास्त्रान्धकारे पतित इव ततोऽभ्यासमार्गे चरिष्णुः
पश्चाद्व्युत्पत्त्युत्पत्तिदेहल्युपग इव ततः शक्तिवाटी प्रविष्टः।
नानाशब्दाख्यपुष्पावचयकरणतो वाग्वशीभूतविश्वः
यत्प्रेमापाङ्गदृष्ट्या भवति कविवरो भारती सा पुनातु॥ इति।

प्रज्ञावाक्यवैशारद्याभ्यां क्रियावैशारद्यं व्याख्यातम्। अतः आन्वीक्षिकीविद्यानिष्ठप्रामाण्यनिरूपकत्वात्प्रदीपः, वाक्यानि, तदर्थाश्च परस्परं समन्वयार्थमाकांक्षोत्थापनपुरःसरं साध्यसाधननिर्णायकानि भवितुमर्हन्तीतीयं सर्वेषां कर्मणामुपायः। व्यसने अभ्युदये च बुद्ध्यवस्थापकत्वाद् उपायः आश्रयः। सर्वधर्माधर्मविद्याप्रतिपाद्यं प्रति प्रवर्तकत्वाद्वेयं विद्याप्रतिपाद्यानामाश्रयः।

न्यायविदस्त्वेवमाहुः—द्रव्यगुणकर्मणामभिमतानभिमतोपायतापरिज्ञापनात् प्रदीपः। विद्याव्युत्पाद्यानां विषयं विधेयतया विशेष्यता वोपकारीति इत्युपायः सर्वकर्मणाम्। विद्यया प्रवर्तनायां कर्तव्यायां सहकारित्वात् सर्वधर्माणामाश्रय इति।

अथर्ववेदस्य वैशिष्ट्यम्

ग्रन्थकर्ता सामवेदीति प्रथमं सामोक्तिः, तदाश्रयत्वात्तत ऋग्वेदस्ततो यजुर्वेद इति क्रमेण त्र्यभिधानम्। अथर्वणो वेदविशेषणेन तस्य वेदत्वस्थापनाप्रयोजनं बोध्यम्। किञ्च, वेदान्तसापेक्षया अस्येदमेव महत्त्वं यत् तत्पारायणमात्रेण फलति।

अथर्ववेदत्वम्

ऋगादिवेदानां तत्त्वेन यथा प्रसिद्धिः पुरुषकर्त्रस्मरणात् तथा अथर्वणस्यापि

अपौरुषेयत्वमेव। अयमपि वेदः शिष्टैः पूर्वपरम्परानुसारं पूज्यत इत्यस्य नास्ति वेदत्वविषये सन्दिग्धता। शेषं न्यायमञ्जर्यां द्रष्टव्यम्।

इतिहासस्य न वेदत्वम्

अथर्ववेदवदितिहासोऽपि प्रसिद्धोऽस्ति इति मूलकृता तस्य वेदत्वमुक्तम्, तथापि वेदान्तरेषु सृष्टिकालादारभ्याद्ययावत् स्वसजातीयोच्चारणसापेक्षोच्चारकत्वमेव यथा प्रसिद्धं न तथेतिहासे, इति अकर्तृकत्वस्मरणदार्ढ्याभावाद् इतिहासो न वेदः।

धर्मलक्षणम्

वेदस्य उपयुक्तता विशेषतया धर्मस्य बोधने अस्ति। यतस्तं विना अपरो ग्रन्थो नादृष्टमदृश्यं बोधयितुं शक्नोति। अतो मीमांसकैः "वेदान्तर्गतेन विधिना बोधितेष्टसाधनत्वम्" तल्लक्षणं प्रोक्तम्। एवञ्च यः कोऽपि अनुष्ठेयो व्यापारो यदि त्रय्या बोधितस्तर्हि स वैदिको धर्मः। अस्येदं न तात्पर्यं यद् वैदिक इति कृत्वा सर्वः सर्वैरनुष्ठेयः; किन्तु वंशपम्पराप्राप्तत्वमपि तत्र नियामकं शास्त्रकृतामभिमतं समास्ते। यथा याजनाध्यापनादि विप्रेणैव कर्तव्यं भवति, शस्त्राजीवादि क्षत्रेणैवेत्यादि वर्णाश्रमिणां कृते यथाऽयं नियमः, तथैव म्लेच्छादीनां कृतेऽपि इयं मर्यादा अस्ति। तत्र त्वयं विशेषो यद् नहि तेषु वर्णाश्रमिणां वर्णाश्रमाचारनियम इव नियमो मर्यादितः, 'म्लेच्छकल्पिता धर्माः' इत्याद्युक्तत्वात्। न च तेषां वेदबाह्यत्वं कथं सिद्धान्तितमिति शङ्क्यम्, वेदप्रामाण्यास्वीकारे तथोक्तत्वात्। म्लेच्छैर्यदि वेदानुयायित्वं स्वीकृत्य "वयं वर्तामहे" इत्युद्घुष्यते, तर्हि तद्धर्मोऽपि वैदिक एव, "धर्मो विश्वस्य जगतः प्रतिष्ठा" इत्युक्तत्वात्। वैदिके सिद्धान्ते स्वीकृते धर्मान्तरस्वीकारार्थं न बलात्कारप्रलोभनादिप्रसक्तिः, न वा धर्मत्यागस्य। एवं स्थिते समेषां भ्रातृभावोऽपि नासुलभः।

धर्मस्य अनेकत्वाभावः

ये किल मन्वते 'धर्मा अनेके' इति, ते तु भ्रान्ता वेदं विहाय सर्वेषां मते स्वस्वसम्प्रदायप्रवर्तकाणामाचार्याणां तत्तत्सिद्धान्तानां वा सादित्वात्। यः सादिः तत्प्रतिपादयिता वा शब्दमनपेक्ष्य प्रवृत्तः, स स्वर्गसाधनत्वं कथमिव प्रत्यक्षानुमानाभ्यां विजानीयात्। यावदस्य समाधानं न, तावत् सादि निरूपितस्यार्थस्य धर्मत्वमपि सन्दिग्धमेव। सोऽयं दोषो वेदसिद्धान्ते नास्ति, अस्यानादित्वात्, गुरुपरम्पराया अपि अनादित्वाच्च। अतः सिद्धं वेदप्रोक्तत्वेन धर्मस्यानेकत्वाभावः, परम्पराप्राप्तत्वेन तु धर्माणामनेकत्वं तेषां तेषां कृते श्रेयस्साधनत्वं विवक्षितञ्चेदिष्टमेव विप्रादिधर्माणां स्वरूपतो भेदस्येष्टत्वात्।

श्रुतेर्धर्मनिर्णायकत्वम्

ननु वेदस्य धर्मनिर्णायकत्वं केन न्यायेनोच्यते, इति चेच्छृणु। प्रतिव्यक्तिभेदेन बुद्धिवैचित्र्यात् केन किं कर्तव्यमिति निर्णये विनिगमनाविरहाद् व्यक्तीनां निर्णायकत्वं न भवति। तद्दोषनिरासाय अपौरुषेया श्रुतिः मध्यस्थवृत्तिः प्रमाणत्वेन सर्वैः स्वीकृता। यथा विधानपरिषदि सममतप्रसक्तौ विनिगमनाविरहेण सभापतिमतस्य नियामकत्वम् अङ्गीक्रियते, तथा वेदस्य।

किञ्च, वेदप्रामाण्यं स्वीकृत्य धर्मानुष्ठाने कृते आस्तिक्यभाववृद्धया सत्त्वगुणस्य लाभो भवति। निर्विकारित्वादनुष्ठातुः सत्त्वे समृद्धे प्रतिभाया वृद्धिः। ततो कर्तव्येषु दार्ढ्यम्। ततो विश्वासपात्रता इति वेदः प्रमाणत्वेन स्वीकृत एव। तदेवोक्तं मानसे —"वेद भव-वारिधि बोहित सरिसु" इति। एतेन आत्मतुष्टेः विकल्पातिरिक्तस्थले प्रामाण्यं प्रत्याख्यातं तोष्टृषु विनिगमनाविरहात्। दृष्टञ्चैतद् भाषान्दोलनप्रस्तावे—तत्तद्देशीय-भाषासु अन्यतमस्यां राष्ट्रभाषात्वस्वीकृतौ विनिगमनाभावः। स एव न्यायो वेद-प्रोक्तत्वप्रामाण्ये अनुमन्तव्यः।

म्लेच्छभाषायां संस्कृतत्वम्

किञ्च, त्रयीप्रोक्तत्वं म्लेच्छधर्मे भवति कथमिति उदाहरणेन उपमीयते। तथा हि संस्कृतभाषया यज्ञादिषु व्यवहर्तव्यत्वे सिद्धे संस्कृतभाषेतरभाषायामसाधुत्वात् तद्भाषया यज्ञादिषु प्रयोगो न कर्तव्यो भवतीति सिद्धेऽपि संस्कृतेतरभाषासु यदि व्याकरणमर्यादामनुसृत्य संस्कृतभाषासंस्कारो विधीयते, तर्हि संस्कृता-तिरिक्तभाषायाः साधुत्वं केन व्याहन्तुं शक्येत। यथा "यावत्तैलं तावद् व्याख्यानम्" इत्यत्र प्रयोगे 'व्याख्यानम्' इत्येकपदत्वे असाधुत्वं 'व्याख्यानम्' इति पदद्वयघटितत्वे साधुत्वम्, तथैव 'कैट्' इत्यादिषु 'कं' मूषकं तस्येव 'अट् अटनं' यस्य स 'कॉट्' इति। इत्थञ्च आङ्ग्लभाषाया अपि व्याकरणसंस्काराभिव्यङ्ग्यं साधुत्वं यथा, तथा म्लेच्छधर्मविषये बोध्यम्।

असाधारणधर्मानुष्ठानप्रयोजनम्

वेदेन विहितस्यासाधारणधर्मस्य प्रयोजनं नास्तीति केचिद् व्याचक्षते। तन्न। वेदेन वर्णाश्रमसमाजे वृत्तिनियमनं कृतं वर्तते। अन्यत्र तदभावेन वृत्तिसाङ्कर्यप्रसक्त्या एकार्थाभिनिवेशित्वप्रयुक्तस्य शत्रुभावस्य परस्परमपरिहार्यत्वात्। वृत्तिसाङ्कर्यादेव धर्मसाङ्कर्यात् कुलीनत्वमपि निर्दुष्टं वैदिकादन्यत्र नास्ति। वैदिकसमाजे तु कुलीनत्व-निर्णयो न दुरधिगमः। नापि चैकार्थाभिनिवेशप्रयुक्तं शत्रुत्वम्। न च तदलीकमिति वाच्यम्, अद्यापि वृत्तिनियमनव्यवस्थाया आश्रमधर्मव्यवस्थायाश्च त्रयीधर्ममाधारी-कृत्य धर्म्यत्वेन परिपालनदर्शनात्। यद्यपि वैदिकसमाजेऽपि साङ्कर्यं माभूदिति सत्यम्,

तथापि अद्यावधि तथाविधान्यपि कुलानि सन्ति अस्मिन् समाजे, येषु साङ्कर्य-दोषभावो निर्णेतुं शक्यते । तद् वक्ष्यते मूलकृता 'व्यवस्थितार्यमर्यादा' इति ग्रन्थेन पर्यन्ते अत्रैवाध्याये । अतोऽसाधारणधर्मानुष्ठानं सप्रयोजनमेव ।

एकस्यानुष्ठानस्य धर्मत्वमर्थत्वञ्च । साङ्कर्याभावः

वेदविहितत्वहेतुना अदृष्टेष्टसाधनत्वमनुमाय सञ्जाता प्रवृत्तिर्धर्मः । अर्थस्येष्टत्वे तु अर्थ इति भक्तिरसायने व्यवस्थितत्वाद् धर्मार्थयोः साङ्कर्येऽपि तत्त्वस्य पृथक्त्वाद् न हानिः । एवमेव कामविषयेऽपि ध्येयम् ।

धर्मस्योपकृतिः

वैदिकसमाजे स्थितान् वर्णान् स्वे स्वे धर्मे प्रेरयित्वा समाजव्यवस्थयोपयोगितया अपेक्षितानां गुणानां विकासः कुलीनेषु त्रय्या साधित इति टीकाकृता राजपुत्ररक्षणप्रकरण उक्तम्--

आहारेष्वथ योनौ च बीजे कर्मणि चापि यः।
शुचिः कृच्छ्रगतस्यापि न पापे रमतेऽस्य धीः ।। इति ।

इयं त्रय्या उपकृतिरवश्यं स्मर्तव्या । अन्यत्र तु दयादिसाधारणधर्मा उपदिश्यन्ते अभिलष्यन्ते च; परं तत्र विवाहादिनियमनाभावात् स्त्रीणां दीर्घकालं सुरक्षास्थित्यसम्भवात् साङ्कर्यं दुर्निवारमेव, साङ्कर्यात् समाजे मात्स्यन्यायोऽपि अप्रतिहत एव, तथा कुलीनत्वाभावादपेक्षितानां संस्काराणां परम्परया अनुद्बोधनचिन्ताभावात् कुलीनत्वरक्षणाभावः । अत एव प्रतिज्ञातार्थनिर्वहणे अविश्वास्यत्वं चेति दोषा अपरिहार्या वर्तन्ते । इमे दोषास्तु त्रयीनिर्गडितवैदिकसमाजे न सन्ति । त्रय्या अपौरुषेयत्वात् वर्णाश्रमसमाजे पक्षपातस्य रागादिदोषस्य अप्रसक्तिः । अतः वर्णाश्रमसमाजस्य कृते शान्तिप्रतिष्ठापकत्वादयं त्रयीप्रोक्तो धर्म औपकारिकः । अथास्यौपकारिकत्वं प्रत्यभिज्ञायमानं कथं भवेदिति चिन्त्यते । तच्च ज्ञातं तदा भवति, यदा जीवः स्वस्थस्वरूपं ज्ञात्वा आकृष्टः स्वातन्त्र्यं कामयेत, इति जीवस्वरूपं संक्षिप्य विमृश्यते । स च मलत्रयेणावृतोऽपि ईशान्नातिरिक्तः । अनावृततादशायां तु ईशः शिवशक्तिभेदेन विभिन्न इव भाति । तयोः शिवो ज्ञानस्वरूपः, ज्ञानचिकीर्षाकृतिमत्वरूपमाश्रयत्वं शक्तिरुच्यते । तयोः प्रतीतिस्तु घटमहं जानामीति प्रयोगेण समुदेति । जानामीत्यत्र धात्वर्थो ज्ञानम्, मिप्प्रत्ययार्थः आश्रयत्वम्, एतद् द्वयं शिवशक्त्यात्मकमेव । इदं तत्त्वद्वयं साहित्ये शुद्धविद्यापदेन व्यपदिश्यते । यतोऽत्र उभयत्रापि अनानन्दतापादकावरणेन सह परिमितप्रमातृताबुद्धेराणवमलस्य मम तवेत्याकारिकाया भेदधीतिरोधानमस्ति । किञ्चोभयत्रापि मायिकमलस्य पुण्यपापात्मकस्य कार्मिकमलस्य चासत्त्वादशुद्धत्वमपि सर्वथा नास्ति ।

किञ्च शिवशक्ती यदा परस्परं सङ्गच्छतः, तदा वस्तुमात्रसम्बन्धिना अभानापादकावरणेन असत्त्वापादकेनावरणेन च व्यावृतेन भवतः, इति कृत्वा तयोः सर्वं प्रत्यक्षम्। इयं शक्तिर्न जडा। अनयोस्तत्त्वयोः जीवे उच्छलनं यदा, तदा स जीवः कविः क्रान्तदर्शी च भवति। राज्ञाऽपि यदि स्वविनयमहिम्ना शिवशक्ती उपास्येते गुरुप्रसादेन, तर्ह्येवायं प्रजानुरागाद्यात्मकं कर्म कर्तुं प्रभवति। एवंस्थिते नृपस्य राजत्वमन्वर्थं भवति। तदेवं शक्तितत्त्वमनुध्याय नोतिलक्षणे प्रागुक्ते जयमङ्गलाकृता तस्या निवेशः कृतः। इमे यथा शुद्धे तथा सदाशिवेश्वरशुद्धविद्यातत्त्वान्यपि शुद्धान्युच्यन्ते। तत्र सदाशिवः अहंविशेष्यकः तादात्म्येन जगत्प्रकारको निर्णयो भवति। ईश्वरश्च जगद्विशेष्यकः तादात्म्येनाहंप्रकारको भवति। शुद्धविद्या तु भेदतिरोधानमुच्यते। इमानि तत्त्वानि शिवशक्तिविलक्षणानि, तेषु अनानन्दतापादकावरणस्य सत्त्वात्। उक्तपञ्चविधतत्त्वसाधारणधर्मस्तु अभानापादकावरणासत्त्वापादकावरणयोरभावो बोध्यः। एवञ्च पञ्चस्वपि शिवादिशुद्धविद्यान्तेषु भेदधीतिरोधानमेव शुद्धत्वं बोद्धव्यम्।

अथ शुद्धाशुद्धान्युच्यन्ते। मायाकालनियतिकलाविद्यारागपुरुषाः सप्त शुद्धाशुद्धा भवन्ति। तत्र माया भेदबुद्धिः अहं-त्वमित्याकारिका। अस्यां सत्यां अहन्ता-प्रमा आत्मनि परिच्छिन्नभावमापन्ना भवति। इयमेव परिमितप्रमातृता आणवमलपदेन व्यपदिश्यमाना भवति। सा जोवस्य आवरणम्। आवृतिभावमापन्नो जीवो बाल्याद्यवस्था अनुभवन् पूर्वोक्तादानन्दाद्वञ्चितः शक्तितत्त्वं तिरोधापयति, तथा बाल्याद्यवस्थानुभवेन कालतत्त्वमपि स्फुटोकरोति। एवंरीत्या मायाकालयोरावरणे जाते जीवो कयाचन रज्वाऽऽबद्धो भवति। सा च अदृष्ट-(नियति)अनतिरिक्ता, कार्यकारणभावरूपा वा कार्यकारणभावाख्यां नियतिमालोच्य स्वशक्त्यनुसारेण जीवः कार्यसम्पादकः कर्ता भवति। तदिदं कर्तृसमवेतं कर्तृत्वं कलापदेन बोध्यते। इदमपि आत्मन आवरकमेव। एतत्सत्त्वादेव जीवः "सर्वं पश्यामि"इति रीत्या न प्रतिजानाति इति सत्यम्, तथापि शुद्धाशुद्धात्मकमायाकालनियतिकलाभिः कञ्चुकितः जीवः सर्वंपश्यन्नपि सर्वमस्तीत्यनुभवति, कार्मणमलाभावेन असत्त्वापादकावरणाभावात्। एवंविधावस्थाचतुष्टयस्थितिः विद्यापदेन व्यवह्रियते। एवञ्च विद्यावृतो जीवः कार्मणमलाविशिष्टः आत्मनः कर्तृत्वं पश्यन् तेषु तेषु विषयेषु शरीरप्राप्तिपूर्ववासनाभ्यां वशाद् रज्यति। तदा तत्तत्सुखवासनावासितान्तःकरणः अनुरक्तो भवन् रागी उच्यते। इयमेव रागावस्था जीवस्य। मायादिरागान्तैः तत्त्वैः कञ्चुकितः सन्नपि जीव एव पृथक्तया पुरुषसंज्ञो व्यवह्रियते। एतदवस्थायां मायादि पुरुषान्तेषु सप्तसु कार्मणं मलं नास्तोति शुद्धत्वमभानापादकमावरणं त्वशुद्धम्, अशुद्धत्वमपीति शास्त्रमुपेक्ष्य रागेण, कामनया शास्त्रपरतन्त्रो वा आस्ते, जीवासाधारणी शुद्धाशुद्धत्वं भवति। यदाऽयं पुरुषः रागादितत्त्वपरतन्त्रो विद्यामुपेक्षते,

तदाऽयं कार्मणमलविशिष्टो भवति। तदानीमशुद्धं तत्त्वमुच्यते। तदानीं मन्त्रत्रय-विशिष्टानां सत्त्वरजस्तमसां साम्यावस्था प्रकृतिपदेन व्यपदिश्यते। सा सर्वस्य प्रकृति-पदेन व्यवह्रियमाणाऽपि ईशसमवेता चेत्, ज्ञानक्रियामायाभेदेन व्यवह्रियते। जीवे तु सत्त्वादिगुणपदेन व्यपदिश्यते। तत्रेशसमवेतं ज्ञानं जीवे भातं सत्त्वं भवति। क्रिया रजः, माया तमः, तदुक्तं प्रत्यभिज्ञादर्शने—

स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
माया तृतीये त एव पशोः सत्त्वं रजस्तमः॥ इति॥

इमां प्रकृतिं जडामाहुः। तथा चेदानीं शिव एव जडोऽभूद् इति निर्णीतम्। साम्यावस्थायां क्षोभे सति विषमतायां गुणत्रयमुच्यते। सा च अहं बहु स्यामित्याकारिका, प्रत्यभिज्ञादर्शने उपनिषत्सु च तथैव निरूपणात्। क्षोभोऽपि ईशेच्छैव। सत्त्वादिगुणा अपि विकृतिभावमापन्ना रूपनामक्रियाभेदेन उत्पद्यन्ते। तत्र रूपत्वं सोमसूर्याग्नित्रित-यत्वम्। नामत्वञ्च अकारोकारमकारभेदेन प्रणवत्वमेव। क्रियात्वन्तु रुद्रोपेन्द्रब्रह्मादि-भेदेन तत्तद्देवतान्यतमत्वमेव। तथा चानानन्दतापादकावरणेनावृतः शुद्धाशुद्धावस्था-भावमापन्नः मायादिरागान्तैः कञ्चुकितः पुरुषः तमोरूपां शक्तिं प्रकृतिमावरकत्वेन संगृह्णाति, तदा स एव पुरुषाख्यः जाग्रत्स्वप्नसुषुप्तिभेदेन विश्वतैजसप्राज्ञभेदेन च स्वनामसंज्ञां विधत्ते। एतेषु प्राज्ञस्वरूपमेवमुच्यते यद् निद्रासुखमेव तदिति। तथा हि जडात्मिका प्रकृतिः यदा पुरुषस्य सुखरूपतया भानविषयो भवति, तदा प्रकृतिरेव प्रधानमुच्यते। अत्रैव निर्विकल्पात्मिकावृत्तिरपिबोध्यते, तस्मान्निद्रासुखं प्रधानान्ना तिरिक्तम्, तत् प्रकृतिपुरुषयोर्व्याप्तम्। तदायं जीवः प्राज्ञोऽभूत्। निद्रायां प्रमातृत्व-स्यात्मसम्बन्धित्वादपूर्णत्वं न भाति। स्वप्नजाग्रदवस्थयोस्तु उक्तसुखभानाभावाद-सम्पूर्णत्वं मन्यते।

तैजसस्तु पुरुषः बुद्धिर्गर्वः (अन्तःकरणं) पृथिव्यादि पञ्चमहाभूतानि चेति समष्ट्यात्मको भवति। एतेषु कार्यकारणविवेकः शास्त्रोक्त्यनुसारेण यथायथं चिन्त्यः। एतेषां समष्टिः ऐक्यम्, स्वप्नावस्थायां तदेव विश्व उच्यते। यदा उक्त-समुदायात्मको व्यावहारिक एव पुरुषो भाति। इत्थं चोक्तेषु सप्तसु मिलितेषु तन्मयत्वेन भासमानः पुरुषः जीवो विश्वाख्यः पिण्डभेदेन भिन्नो भवति। अत एव स व्यष्टि-रुच्यते। तद् भेदकारणं कार्मणमलं रागेण कञ्चुकितः सन् प्रकृतिमात्मसात्कृत्वा जडश्च भूत्वा निषिद्धमाचरतीत्यन्यदेतत्। समष्टौ तु जीवो विराडुच्यते। जीवस्य व्यष्टेः आश्रयभूतं शरीरम्, तदुत्पत्तिश्च लोके प्रत्यक्षतो दृश्यते। अत्रेदं वक्तव्यं यत् शरीरपिण्डे व्यष्टौ जीवभावमापन्ने पुरुषे स्थिता शक्तिः गुणभावं गता शरीरारम्भके वीजे तिष्ठन्ती क्षेत्रज्ञसंज्ञया बुध्यते। तत्र सर्वेऽपि संस्कारा वर्तन्त एव। यदि अपेक्षितं

संस्कारमनुरुध्य शरीरारम्भकबीजस्य संस्कृतत्वमापाद्यते, तर्हि शरीरमपि तथैव भवितुमर्हतीति ।

शिव-शक्ति-सदाशिव-ईश्वर-शुद्धविद्या-माया-काल-नियति-राग-पुरुष-विद्या-कला-प्रकृति-बुद्धि-मनोऽहङ्कार-चक्षुः-श्रोत्र-त्वक्-रसन-नासिका-पाणि-पाद-पायूपस्थ-वाक्-आकाश-पृथ्वी-जल-तेजो-वायु-तत्सूक्ष्म-पृथिवी-जल-तेजो-वाय्वाकाश नामानि तत्त्वानि भवन्ति । एतेनैवेदं सिद्धं यद् जीवः विद्यारागादिना अवच्छिन्नात् पुरुषान्नापरः । यद्ययं शास्त्रोदितं नीतिसम्मतं कर्म गुरुभक्तिपुरःसरं मानमदौ वशीकृत्य तिष्ठति, तर्हि स पुनः परमशिवः स्वतन्त्रोऽपि भवितुमर्हति । तदर्थमेव वेदविद्याया अभ्युदयः । तदर्थमेवानया विद्यया साङ्कर्यदोषात् तत्प्रयुक्तकलहादिदोषाच्च समाजः संरक्षितः ।

किञ्च, शरीरे जालन्धरादिसंज्ञिका इडाप्रभृतयो नाड्योऽनेका भवन्ति । तासु अन्यतमया सुषुम्नया यदा वायुवेगवशाद् मूलाधारस्य वह्नेः शिखा ज्ञानरूपा उच्छलति, तदा नादो भाति । तच्छ्रवणे कुण्डलिनी जागृतिरुच्यते । तत्सत्त्वे ओजः हृदि अभिवर्धते । तच्च उक्तवह्निज्वलनं ज्ञानमेव । तदुक्तं चरके—

हृद्यं तत्स्याद्यदौजस्यं स्रोतसां सम्प्रसाधनम् ।
तत्तद्यत्नेन संसेव्यं प्रशमो ज्ञानमेव च ।। इति ।।

ओजोवर्धकत्वेन चरके ज्ञानमुक्तं तथापि कार्ये कारणोपचाराद् ओज एवात्र ज्ञानमुक्तं बोद्धव्यम् । इदमेवौजः मातृपितृशरीरात् प्राप्तं शरीरान्तरवर्ति शिरोमार्गेण ध्यानद्वारापि तत्र तत्र प्रसारयितुं शक्यत इत्यपि सिद्धमेव । यदि च तज्ज्ञानं प्रमाणप्रमेययोर्बाधितत्वे अप्रामाण्यज्ञानास्कन्दितं स्यात्, तर्हि तस्यास्थिरत्वमभिनिवेशानात्मकत्वं चार्थत एव प्राप्तं स्यात्, अतः प्रत्यक्षादिप्रमाणत्रयेण प्रमितत्वे तु तस्य बाधः बृहस्पतिनापि कर्तुमशक्यः, इति प्रमाणत्रयेण प्रमितोऽर्थः अबाधितः, तद्विषयकं ज्ञानं ओजोरूपमपि तथैवेति । तस्मात् सचेतस्केन जीवेन भारतीया राजनीतिरेवावलम्बनीया । अत्र प्रमाणसम्बन्धाप्रयुक्ताविसंवादेन सन्तोषविदग्धव्यवहारौ च नियतौ । भारतीयनीत्युत्प्रेक्षणे ओजसः न्यूनत्वं तेन मूलाधारस्थवह्निज्वालानादः श्रोत्रागोचरोऽभूत् । तेन च रोगा अपि अभिवृद्धाः । प्रशमोऽपि व्यपगतः । अतः स्वस्वातन्त्र्यप्राप्तये जीवेन ओजसः संरक्षणाय नीतौ प्रमाणत्रयं स्वीकृतम् । तेषु अपौरुषेयत्वेनासन्दिग्धार्थकत्वादनभिशङ्क्यत्वात् लोकयात्रायाः सुचारुत्वदर्शनात् त्रयीधर्मः स्वीकृतः ।

त्रयीप्रोक्तधर्मविषये दृष्टशास्त्राणि संवादीनि

अथ दृष्टफलानि शास्त्राणि पाश्चात्त्यानां वचनानि च शास्त्रोक्तधर्मविषये संवादीनि सन्ति न वेति विमृश्यते ।

वात्स्यायनेन कामसूत्रे शास्त्रस्यानभिशङ्कयत्वादित्यादिना धर्मशास्त्रस्य प्रामाण्यं स्वीकृतम्। तत्र वर्णाश्रमाचारस्थितेः लोकयात्रोपयोगित्वमधिकृत्य प्रत्याख्यानं कुर्वन्ति केचित्, तत्तु न सम्यक्।

वर्णाश्रमस्य लोकयात्रोपयोगित्वम्

अर्थं प्रधानं मन्वाना लोका उन्नतिं प्रति धर्मस्य बाधकत्वं जानाना अर्थमेवार्जयितुं प्रयतन्ते। अर्जिते च तस्मिन् मनोरथपूर्ति वैदग्ध्यं सन्तोषञ्च प्राप्तुं समीहन्ते; किन्तु इतिहासो न कोऽपि तथाविधः, येन अर्थस्यार्जयिता मनोरथसन्तोष-वैदग्ध्यानि प्राददिति वक्तुं शक्यते। किं बहुना, अर्थोपलब्धिसमकालमेव कामाङ्कुराणां बाहुल्यात् कार्यपूर्तिनिमित्ता मनोरथपूर्तिरभूदिति बुद्धिर्नोदेति; अपि तु अर्थप्रधानाः तृष्णादासभूताः धर्ममुपेक्ष्य जीवितेच्छवः विनाशं प्राप्ता इति शास्त्रविरुद्ध-वृत्तीनां राज्ञामितिहासो वर्णितः चाणक्येनैव। क्वचित्तु अर्थार्थी न्यायसीमानमतिक्रम्य अर्थमपहरति, परान् वञ्चयति, स सर्वोऽपि जनः सर्वस्य शङ्कापात्रं भवति। शङ्कायां जागरूकायां भेदोऽपि समाजे नियतः। भेदे उदिते स्वस्य पराजयदोषोऽपि स्मर्तव्यः। अतो दुर्नयपरिहाराय धर्मप्राधान्यमुररीकर्तव्यम्। तदर्थं त्रयी उपदेशार्थमपेक्ष्यते। अपि च धर्मशौचाभावे अपस्मारकुष्ठोन्मादानां सञ्चारो दोषः, वातव्याधेः शीतलायाः प्रकोपः जनपदक्षय इत्याद्यायुर्वेदोक्तो दोषोऽप्यनुसन्धेयः। एवंरीत्या आयुर्वेदमतं धर्मसाफल्यविषये संवादि भवति। पाश्चात्त्यानां संवादविषये इदमेवालं यत् श्रीपियाट-महोदयेन सिद्धान्तस्थैर्याभावात् पाश्चात्त्यदेशस्य सत्प्रतिपक्षितया अतीव शोचनीया-वस्थोत्तरोत्तरमभिवर्धिष्णुर्दृश्यत इति सप्रपञ्चं विस्तरेण प्रमाणपुरस्सरं व्याख्यातम्। तदग्रे चिन्तितमस्ति। लोकयात्राविधायकवर्णाश्रमसमाजविघटनेन सत्त्वगुणस्य ह्रासात् चरकोक्तलक्षणलक्षिताः सत्त्वसारा अदर्शनं प्राप्ताः कथायामेव स्थिता इति क्रियातन्तुविकृतेरपसारणं कामनावशाद् रक्षणञ्च धर्मस्य त्रयीप्रोक्तस्यान्यत्फलम्। यद्यपि केचिद् धर्मपालने भारं मन्वते, तथापि शास्त्रकर्तॄणां मतेन भारतीयानां धर्मपालनं प्रकृतिः, सा विशेषतया मर्यादातिक्रमणाद्धनलोभात् कामजक्रोधजव्यसनि-त्वाद्वा विकृत्या सुप्तप्राया। अत एवास्य समाजस्य ह्रासः। अत्रोदाहरणं शरीरम्, तद्धि मिथ्याहारविहाराभ्यां जीवेन रोगभूयिष्ठं क्रियते, न तु वस्तुगत्या तद्रुग्णम्। तथैव समाजस्यास्य प्रकृतिविषये बोध्यम्। अतो भारतीयैः स्वीयां प्रकृतिमालोच्य समाजान्तर-प्रवृत्त्यनुगमनं दोषत्वेन मन्तव्यम्, "क्रिया हि द्रव्यं विनयति नाद्रव्यम्" इत्युक्तत्वात्। भारतीया एव इमां वर्णाश्रमस्थितिं ज्ञातुमनुष्ठातुं च पारयन्ति। भारतीयं शास्त्रमपि वर्णाश्रमिणां कृत एवोपस्थितं वर्तते। तच्च वर्णाश्रमिणां विकृतिमपसारयितुं प्रवृत्तम्, न तु धर्मप्रकृतिमुत्पादयितुम्, तस्यास्तत्र स्वत एव सत्त्वात्, अत एवास्य न विसंवादित्वमपि सर्वथा कामादिविकृतयः सर्वथा अपसारणीयाः जीवशरीरादिति तु अयुक्तं वचः, यतः

५

युक्त्या सेविताः कामादयः सुखाय भवन्ति। ते तथाविधा वर्णाश्रमधर्म एवान्तर्भाव्यन्त इति। सत्यप्येवं कामादिसेवने औचित्यानौचित्यसीमादि केनचिन्निर्धारणीयः। स च रसायनसधर्मालोकस्यानामिषभूतः आरोग्याधायकः सर्वज्ञमन्तरा केन निर्वक्तुं शक्य इति शास्त्रं त्र्यात्मकमेवैतद्विषये शरणम् । अस्य शरणस्य समादरे तु कामादिस्सेवाफलमैहिकं सुखमेव न; किन्तु निरतिशयस्य तस्यानावृतस्यानुभवोऽपि ।

अन्यच्च त्रयीधर्मस्य महानुपकारोऽपरोऽपि वर्तते यद् अनेकेषु सत्स्वपि तानुपजीवयन् अयं धर्म सर्वानेकसूत्रे निबध्नाति । पुनः स्वस्वसम्प्रदायरक्षणार्थं स्वीयसिद्धान्तं दृढीकुर्वन्त इमे उपासकाः स्वीयामिष्टदेवतां चिन्तयन्तो मतिभेदं प्रख्यापयन्तोऽपि नैतिके कर्तव्ये वैदिकमेव पन्थानमुररीकुर्वन्ति। तद्यथा—भारतीयनीतिशास्त्रस्य मूलरचयिता वैदिको विप्रः, तट्टीकाव्याख्यातारो वैदिका जैना बौद्धा एकामेव सरणिं विदधति, वर्णाश्रमधर्मं त्रयीप्रोक्तं स्थापयितुं चेष्टन्ते। एतेनैव एतत्समाजे अन्तःसत्प्रतिपक्षितत्वाभावः साधितः । तदुक्तम्—

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥ इति ।

अपि च वैदिकेषु कथमेकवाक्यतेति उदाह्रियते । वचनविरोधपरिहाराय केनचिद् विदुषा प्रशस्तवचननिर्णयाय एकः न्यायः सञ्चारितः, तथा हि तत्र न्यायाभासमुद्भाव्य वचनार्थनिर्णयाय एको न्याय प्रदर्शयति, तर्हि तस्यैव पारिषद्यं सर्वैः विद्वद्भिरौचित्यादनाभासादनुमन्यते। अत्र "औदुंबरीं स्पृष्ट्वोद्गायेत्" इत्यादिवाक्यमुदाहरणं स्मर्तव्यम् । तस्माद् भारते मतभेदबहुलोऽपि देशे शास्त्रस्य निर्णायकत्वात् सम्पूर्णसम्प्रदायानां मतैक्यमेव नीत्यनुष्ठाने । इति ।

भारतीयसंस्कृतेर्वैशिष्ट्यम्

ननु वर्तमानसमये अन्यस्याः संस्कृतेः तदुपासकेषु ओजसश्च उन्नतिर्दृश्यते, एवं स्थिते भारतीयसंस्कृतेः किं वैशिष्ट्यमिति विमृश्यते। जन्मान्तरगतानां संस्काराणामुद्बोधः धृतिः प्रतिभा एतेषां स्वाभाविकी स्थितिश्च एतत्संस्कृतेः फलम् । एतत्फलसत्त्वादेवेयं संस्कृतिः संस्कृत्यन्तरापेक्षयापि अतिप्राचीना इतरसंस्कृतिभिराक्रम्यमाणापि आत्मानं रक्षन्ती समाजं वर्णाश्रमीयं भूषयति। देशान्तरस्थितास्तु हिटलरबाधिकप्रभृतिसंस्कृतयः उदिता स्तमिता अभूवन् । क्वचिद् भारतीयसंस्कृत्युपासका यदा न्यूनसंख्याः, तदा इयं संस्कृतिः ह्रासं प्राप्तेव भवति। एवमेव शङ्काभिराक्रान्तत्वाच्चेयं भारतीयेन समाजेन प्राचुर्यतया नोपास्यते। तथापि 'इयं विनष्टा' इति न वक्तुं शक्यते। यदि विवेकद्वारा तर्कसाहाय्येन शङ्काया निरसनं भविता, विपद्ग्रस्तायां वा जिज्ञासा, तदा सुषुप्तिं गताया इव अस्या अभ्युदयः समृद्धो भविष्यत्येव।

अभूच्चैवमेव। एवंरीत्या दूर्वाङ्कुरबीजमिव एतत्संस्कृतिबीजं भारते क्षीणावस्थायामपि तिष्ठत्येव। तत्र विवेकजलसेचने समृद्धिः, तदभावे संस्कृतेः प्राचुर्येण अदर्शनं च वेदादारभ्य कुलीनत्वस्य सुव्यवस्थितरीत्या संरक्षणेन अभूदिति निर्णीयते। इदं च गर्भाधान एव तथाविधसंस्काराणां व्यवस्थापनासुशकम्। शुद्धमातापित्रोः यादृशं तेजः बलमुन्नतत्वं तादृशमेव विशुद्धमातापितृजन्ये बालके गर्भत एव भवति इति सिद्धान्तो मूलकृतापि राजपुत्ररक्षणप्रकरणे स्वीकृत.। इयं शुद्धिः जातिप्रधानसंस्थायामेव। दृष्टञ्चैतत् तत्तज्जातीयेषु बालकानामम्लरसादिभक्षणरुचौ। अभिनवगुप्तपादाचार्यैर्जातीनां तत्तत्संस्कारकारणत्वं तथा गीतायां "स्वभावप्रभवैर्गुणै"रित्यादौ निरुक्तम्। इदमेव जातिमर्यादया स्थितस्य भारतीयसंस्कृतिमतः कुलीनत्वप्रयुक्तं साभिनिवेशं विनयस्थापनं भारतीयसंस्कृतेः वैशिष्टयम्।

अपि च अस्या अपरं वैशिष्टयं यद् एककुलीनं प्रति अपरस्य कुलीनस्य असूयालुत्वाभावः। तत्रोदाहरणं भीष्मार्जुनादीनां चरित्रं वर्तते। भारतयुद्धे भीष्मः कृष्णसहितं अर्जुनरथं बाणप्रहारेण पश्चात्पदं प्रत्यावर्तितवान् तदा कृष्णः शशंसेति। यद्यपि याचितमण्डनन्यायेन कुलीनान्तरेष्वपि संस्कारा आधातुं शक्यन्ते। तथापि तत्र महान् परिश्रमः फलसन्देहश्च, तावदवधिरक्षणदौस्थ्यम् विपदि आपतितायां प्रतिज्ञातार्थानिर्वहणात्मको व्यभिचारश्चेति दोषाः स्मर्तव्याः। किञ्च, प्रतिभोद्बोधः भारतीयसंस्कृतेर्वैशिष्टयमप्यत्र चिन्त्यम्। अन्यथा जातिसाङ्कर्ये पूर्णतया सम्पन्ने परस्परसत्प्रतिपक्षितत्वेन राज्यसञ्चालनायापेक्षितानां संस्काराणां विलयनम्, ततः स्मृतिविलोपः, ततो मतेरभावः, ततश्च कर्तव्यविस्मरणम्, ततः स्वातन्त्र्यापगमः तत्सत्त्वे मदमानौ वर्धेते। ततो धृतेरभावः। अत एव गुरुभक्तेरभावः, ततो जनापरागः। एवंविधदोषवैपरीत्ये हेतुः प्रतिभोद्बोधो भारतीयसंस्कृतेर्वैशिष्टयम्। श्रीमद्भागवतेऽपि इदमेवोक्तम्—यः गुरुदेवतोपासको भवति, तस्माद् भयं निवर्तते, कुलीनेषु धृतिभक्त्योरुदयादिति।

"तं गुरुशिष्ये"ति सूत्रे गौतमेन अनसूयुभिरिति विशेषणनिक्षेपेण कुलीनत्वस्य सात्त्विकप्रतिभोद्बोधकारणत्वं सूचितं तदप्युपपन्नं भवति। एवं सत्येव शास्त्राध्ययनं सार्थकमुच्यते। यतः तच्छास्त्राध्ययनेनाध्येतुर्हृदि गूढाऽर्थ उक्तः स्वयं स्फुरति। तदुक्तम्—

अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च।
यत्कृपालेशमात्रेण नमोऽस्तु गुरवे सदा॥ इति।

तदेतत् कुलीनानां विद्योपासकानां कृते स्वल्पश्रमसाध्यम्। सत्यप्येवं येषु कुलीनेषु न प्रतिभा तत्र हेतुः सरस्वत्युपासनाया अपेक्षिताया अभावो ज्ञेयः। किञ्च, भारतीयसंस्कृत्युपासकेषु कुलीनेषु इदमपि वैशिष्ट्यं यद् गुरुभक्त्या कुलीनाः धर्मतत्त्वविषये यथा यथा प्रतिभां प्राप्नुवन्ति, तथा तथा विद्याशमसन्तोषसुखमनुभवन्ति।

अर्थमानुषङ्गिकं पश्यन्ति। स्वकर्तव्येष्वेव रमन्त इति। कुलीनत्वाभावे अर्थं प्रधानं पुरुषार्थं मन्यमाना रौद्ररसे स्थिताः न कथमपि शमसन्तोषमनुभवितुं पारयन्ति। नापि च स्वातन्त्र्यसुखम्। यतो रौद्रे तर्कमतिभावौ न स्तः। एवंस्थिते रौद्राः सेवावृत्तिं कुर्वन्तः स्वीयं स्वातन्त्र्यं विस्मरेयुरेव इति कुलीनत्वं स्वतन्त्ररुचये भारतीये संस्कृतावया नीत्याऽनुमोदितम्।

कुलीनेषु जाड्यकारणपरिहारः

यत्र किल वर्णाश्रमसमाजे कुलीनेषु जाड्यं दृश्यते, तत्र कारणं दुर्जनसंसर्ग इति तत्संसर्गो यथा न भवेत्, तथा प्रयत्नोऽपेक्ष्यते, संस्कारस्तु तत्र साहजिक एवात्रोदाहरणं सिंहः।

नाभिषेको न संस्कारो सिंहस्य क्रियते वने।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता॥ इति।

गजः सिंहं दृष्ट्वा बलवान् सन्नपि तस्माद् बिभेति सत्त्वशून्यत्वाद् अधृतिमत्वाज्जाड्यताया उद्बोधाच्च। सिंहोऽङ्कागतं शशं विना न मृगयां भुङ्क्ते। गजं दृष्ट्वा धृतिमान् सः करिणं हन्त्येव। एवमेव अकुलीना गृहस्थाः संसारे प्रियमप्रियञ्चानुभवन्तः जडा भूत्वा पारतन्त्र्यमेव स्वीकुर्वन्तो वर्तन्ते। स्वातन्त्र्यसंस्कारोऽपि सर्वथाऽनुद्बुद्धः तेषु, इति दोषापसारणं कुलीनेषु कर्त्तव्यं महता प्रयत्नेन। तच्च राजपुत्ररक्षणप्रकरणे व्यक्तमेव।

वर्तमानसमये कुलीनस्य योगक्षेमौ विना भृतिं कथं भवितारौ ? इति प्रश्नः अवश्यं समाधेयः। तत्रोत्तरमिदमेव—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योमक्षेमं वहाम्यहम्॥ इति।

मनुनापि जीविकाप्रकरणे सन्तोष एव ब्राह्मणानां कृत उक्तः—

न लोकवृत्तं वर्तेत वृत्तिहेतोः कथञ्चन।
अजिह्मामशठां शुद्धां जीवेद् ब्राह्मणजीविकाम्।
सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्॥ इत्यादि।

कुलीनैः शौचाशौचे उपेक्षिते ईश्वरे च अविश्वास्यत्वमनुभूतमत एव लोकदृष्ट्या कुलीना अविश्वास्या अभूवन्। तदुक्तम्—

अविश्वासो हि जन्मभूमिरलक्ष्म्याः। इति हृदयम्।

जातेरस्तित्त्वम्

अथ अवान्तरवर्णाश्रमसमाजे अवान्तरजातेरस्तित्त्वं प्रत्यक्षेण कथं प्रमाणीक्रियताम् ? इति चेदेवम्। यथा रत्नादिवृत्तिजातिः अकुशलैर्न प्रत्यभिज्ञायते तद्विशेषज्ञैर्दृश्यैव, तथैव ब्राह्मणत्वादिजातीनां प्रत्यक्षविषये बोध्यम्। अकुशलाः पश्यन्ति न जातिम्, तदर्थमायुर्वेदोक्तं जातिसाधकमुच्यते।

स्तनन्धयस्य कुमारस्य नेत्ररोगे समुद्भूते तच्चिकित्सा स्तन्येन कर्तव्या भवति। सा च सजातीयस्तन्य एव सफला भवति। अन्यथा रोगो वर्धते, मृतिर्वा भवतीति हेतुना बालस्य हिताय मातुरभावे सजातीयस्तन्यं विहितं तद् जातेरस्तित्त्वे नियामकं सुश्रुतादौ स्पष्टम्। आधुनिकपद्धतावपि मातुः स्तन्यालाभे धात्र्याः स्तन्यस्य साजात्यमनुमोद्यत एव। अतः प्रत्यक्षसिद्धां जातिमनुरुध्य वर्णाश्रमधर्मो विहितो नानुचितः। अत्रेदमप्यवधेयम्—यत् स्वापेक्षयाऽर्थदृष्ट्या वेश्यानां ऋद्धिर्वर्धत इति दृष्ट्वा पतिव्रतया पातिव्रत्यं न त्यज्यते, तथा भारतीयैर्वर्णाश्रमिभिरवर्णाश्रमाणामभिवृद्धिं दृष्ट्वा न स्वधर्म उपेक्षणीयः। तदुक्तं मनुना—

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः॥ इति।

अकुलीनानामयं स्वभाव एव यत् ते कुलीनाः प्रलोभेन स्वधर्माच्च्यावयन्ते। तत्र सावधानता अपेक्षिता।

धर्मेणैव पालनम्

धर्मं विना पालनमसम्भवि। कथम् ? इति चेत्। पालनस्वरूपे अवगते प्रश्नोऽयं समाहितो भवति। "पारस्परिकविश्वास्यतापूर्वकं बाधानिरासपूर्वकं च स्वमर्यादामनतिक्रम्य संरक्षणं पालनम्, तस्मिन् यथावत् सम्पन्ने जनो विश्वसिति। स च विश्वासः अर्थरुचिषु नास्ति" इति कौ० अ० आबलीयसाधिकरणात् स्फुटम्। अतो राजनीतिः धर्मविजयिनं द्रष्टुं कामयते। तथा सत्येव परस्परं विश्वासस्य स्थायिन उत्पत्तेः। अत एव—

न मे स्तेनो जनपदे न कदर्यो न मद्यपः।
नानाहिताग्निर्नायज्वा न स्वैरी स्वैरिणी कुतः॥

इत्युक्तं धर्मस्य अनुशासकपदे स्थितत्वे सर्वमुपपन्नं भवति। धर्मोऽपि वेदोदितं मर्यादामनुसृत्यैव पालनीयो भवति।

धर्मसंवरणं तु न कर्तव्यम्

केचिद् बृहस्पतिमतानुयायिनः धर्मसंवरणेन आत्मानं धार्मिकं ख्यापयन्ति, तथापि समाजे साङ्कर्यमवरोद्धुं ते न शक्नुवन्ति। तद्दोषः प्रागुक्त एव। यद्यपि सङ्कर-

जातिषु क्लेशसहत्वं शौर्यादिसम्पत्तिर्वा दृश्यते, तथापि सत्यवसरे 'प्रकृतिस्त्वां नियोक्ष्यति' इति निर्देशाद् विपत्तौ संव्यवहारकाले चाधर्मविजयी न तथेति अविश्वास्यत्वान्न स गृहीतः। अतः पारस्परिकविश्वास्यत्वसम्पादनाय संरक्षणहेतुं धर्मं विना उपायान्तरं नास्तीति स्मृत्वा धर्मसंवरणं न कर्तव्यम्।

धर्मः वेदसम्प्रदायगत एव

धर्मोऽपि वेदतदनुयायिस्मृत्यादिविहित एव आदरणीयोऽनुष्ठेयश्च, अदृष्टद्वारक-कार्यकारणभावस्य अपौरुषेयशब्दप्रमाणातिरिक्तैः प्रमाणैर्ज्ञातुमशक्यत्वात्। नानेन कस्यापि धर्मस्य विलोपप्रसक्तिः, तत्तदधिकारिभेदेन तत्तद्धर्मस्य विहितत्वात्। शेषं प्राग् आवेदितमेव।

आभिमानिकसुखसत्त्वे क्लेशसहिष्णुत्वादयः

किञ्च, नीतिविदा कुलीनेन क्लेशसहिष्णुता-सात्त्विकताऽनुरागादयो गुणा अभिलष्यन्ते। तत्र कारणं कुलीनानां तथाऽभिमानविशेषः, तस्य स्वरूपं न्यायपरिशुद्धौ वैशेषिकभाष्ये नीतिवाक्यामृते निरूपितं वर्तते। तदाभिमानिकं सुखं संवरणशीलेषु अकुलीनेषु वा कदापि नोत्पत्तुमर्हति, तेषु तथाविधसंस्काराभावात्। आभिमानिक-सुखादेव क्षत्रियः ऐहिकं सुखमुपेक्ष्य महतोत्साहेन असिधाराव्रतमनुतिष्ठति, सुखञ्चानु-भवति, न श्राम्यति। युद्धस्थलात् परावर्तने मानहानिं च मनुते। सेयं परम्परा कुलप्रधानायां भारतीयसंस्कृतौ वर्तते। यादृशः असिधाराव्रतादौ आभिमानिकसुखानु-भवोऽत्र सुलभः, न तथेतरसंस्कृतौ। तदाहुः—

सत्त्वात्मनाममलधर्मविशेषजन्मा जन्मान्तरानुभाववासनयाऽवतीर्णः।
स ऽत्मसम्पदुदयातिशयैकहेतुर्जागर्ति कोऽपि हृदि मानमयो विकारः॥ इति।

लाभं विना अभिमानवतां धर्मे प्रवृत्त्युपपत्तिः

ननु वैदिके कर्मणि मर्यादिते ऐहिकसुखालाभेऽपि परलोकं कल्पयित्वैव भूयमाना प्रवृत्तिः कथमुपपन्ना भवतीति चेदुच्यते। तथाविधां प्रवृत्तिं प्रति धर्मवतां शमसहकृतः अभिमानो हेतुरुक्तः। एवंविधोऽभिमानो यस्य तस्य चित्तसन्तोषशमवैराग्याणि उदियन्ति। तदाभिमानी विषयतृष्णाया अभावाद् दुःखिनां परित्राणाय सुखिनामनु-मोदनाय च प्रयतते। शौचमपि एतदर्थमेव विहितम्। इदमेव स्थायिजुगुप्सायाः कार्यम्। स्थायिजुगुप्साया अभावे तु विषयान्निवृत्तिर्दुरूहैव। किञ्च, यस्य एतादृशी जुगुप्सा नास्ति, स कथमिव आत्मानं गोपयेत्? प्रतिज्ञां नातिक्रामेत्? सुहृदो न तिरस्कुर्यात्? गुरुजनेभ्यो दीनेभ्यो वा दद्यात्? तृणाय मन्येत वा जगत्? स्त्रियं वा न गच्छेत्? किं न हिंस्यात्? इत्यादि। अतः चित्तसन्तोषाय स्थैर्यार्थञ्च शमो वैराग्या-परपर्यायः अपेक्ष्यते। तत्सत्त्व एव शुद्धप्रतिभया व्यवहारो विदग्धः, आदर्शस्वरूपश्च

भवति। अयं मतिभावस्यानुभवो येनानुभूयते, स चित्तसन्तोषेण सह आभिमानिकं सुखमपि अनुभवति, अकार्यान्निवर्तते च। इति शमोऽपेक्षितः। यद्यपि चित्तसन्तोषकारणत्वेन धृतिविभावेषु मनोरथपूर्तिरपि उक्ता, तथापि सा धर्मावलम्बनमन्तरा न सम्भवति। तदुक्तम्—

पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
न दुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते ॥ इति।

अतोऽर्थविषये जुगुप्सा आवश्यकी। सत्यां तस्यामपि पुनः वेदाज्ञया जुगुप्सितोऽप्यर्थः भोग्यत्वेन स्वीक्रियते भोगाय। एवंरीत्या अर्थसञ्चये प्रवृत्तोऽपि सः प्रजामात्मानं राज्यं वा रक्षति। यदि सन्तोष उपेक्ष्येत, तर्हि तु मदमानयोः प्रसक्त्या अविनये पर्यवसानं स्यात्। तदुक्तम्—

मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नयान् नयहीनादपरज्यते जनः ॥ इति।

अतः शुचित्वमेव साधनं तथासत्येव विदग्धव्यवहारसमानाधिकरणसन्तोषः। तदेतत् श्रद्धालक्ष्मीधृतितुष्टिपुष्टयादि त्रयोदशधर्मपत्नीनां तत्पुत्राणां कामदर्पधृतिसन्तोषविनयनियमादीनां च धर्मेण सह सम्बन्धे ज्ञाते धर्मनिवासः कुत्रेति स्पष्टं भवति। लक्ष्मीसहस्रनामसु राजनीतिप्रमाऽपि एकं नाम महालक्ष्म्या वर्तते। अतो वेदोदिते शुचिधर्मे स्थित्वा चित्तसन्तोषात्मिकायां धृतौ आत्मनः स्थितिः सम्पादनीया। तथा च सर्वत्र प्रमाणपुरस्सरं प्रमितार्थविषये तर्कमतिभावानां विनयप्रभृत्याचाराणां च प्रसरणात् सर्वं सुस्थम्। एवं सति प्रसादोऽपि गीतोक्तः सम्पद्यते। प्रसादे दुःखहानिः, इत्युक्तमपि साधु मन्तव्यम्। प्रसादश्च हर्षादनतिरिक्तः। एतदालम्बने अतिदूरं स्थिता अपि लोकस्य प्रीतिविषया भवन्ति। अनेन हेतुना चित्तसन्तोषधृतिसम्पन्नो राजा रञ्जयितुं समर्थो भवतीति मत्वा कामन्दकेन राज्यस्य मूलं सत्त्वमुक्तम्। तत्स्वरूपमुक्तं भावप्रकाशने—

आस्तिक्यं प्रविभज्य भोजनमनुत्तापश्च तथ्यं वचः
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानञ्च निर्दम्भता।
कर्मानिन्दितमस्पृहा च विनयो धर्मः सदैवादराद्
एते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः ॥ इति।

अतस्तर्कप्रचुरया विद्यया आस्तिक्यादेः प्रचारणमेव कर्तव्यम्। तेन इहलोके उक्तरीत्या कीर्तौ स्थापितायां सत्यां परलोके अमृतप्राप्तिरपि नासुलभा।

सृष्टयारम्भे आद्ये ब्राह्मणत्वम्

इत्थञ्च वेदमर्यादायां स्वीकृतायां तदनुसारेण विप्रत्वादिजातिरपि मन्तव्यैव। अथ मातापितृजन्यायां व्यक्तौ ब्राह्मणत्वसम्भवेऽपि सृष्ट्यारम्भे प्रथमव्यक्तौ ब्राह्मणत्वं

कथम् ? इति प्रश्नः जातेश्चातुर्विध्यस्वीकारेण समाहितो भवति। तद्यथा–एका वंशपरम्परा प्राप्ता, द्वितीया सृष्ट्यारम्भे आद्यब्राह्मणे, तृतीया योगतपस्यापूते शरीरे, चतुर्थी आतुलोम्येन कृता विवाहात् पञ्चमे सप्तमेऽपि वा वंशे। अत्र सृष्ट्यारम्भे भगवानीश्वर आद्यव्यक्तौ तत्तज्जातिनिर्णायकः, विश्वामित्रादिभिः तपस्याक्लेशं सोढ्वा क्षत्रियारम्भकान् अवयवान् अपसार्य ब्राह्मणशरीरारम्भकान् अवयवान् संयोज्य सम्पन्ने शरीरे ब्राह्मणत्वादिजातिः साधिता इति कौशिके ब्राह्मणत्वं नानुपपन्नम्।

नीतौ जात्या सह गुणानामप्युपयुक्तता

अत्रेदं स्मर्तव्यम्—यथा कदलोदलं जात्या तथात्ववदपि शुष्कं नीरसत्वात् त्याज्यं भवति, तथा ब्राह्मणादिः जात्या सन्नपि वृत्तादिहीनश्चेद् नीतिकार्ये अयुक्त एव! विवाहे भोजनादौ भूयस्यादिसामान्यदक्षिणादानादौ वा जातेरुपयुक्तता स्मर्तव्या। शुद्धसन्तत्यै प्रतिग्रहादि नियतार्थार्जनादौ च उपयुक्तत्वेन तस्या विहितत्वात् सा न व्यर्थेति ध्येयम्। एतेन—

जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च।
एभिर्युक्तो हि यस्तिष्ठेद् नित्यं स द्विज उच्यते॥

इत्याग्नेयोक्तं सङ्गच्छते।

वर्णं प्रति वृत्तस्याकारणत्वप्रतिषेधः

यत्र किल "न योनिः नापि संस्कारः वृत्तमेव तु कारणम्" इत्यादौ ब्राह्मणत्वादि जातिमन्तं प्रति वृत्तमेव कारणमित्युच्यते, तत्र यादृशस्थलविशेषे ईश्वरकृतमर्यादानुसारेण दग्धवेत्रबीजात् कदलीकाण्डोत्पत्तिरिव एकस्मिन् एव जन्मनि जात्यन्तरपरिणामः प्रकृत्यापूरादिति योगसूत्रानुसारेण विश्वामित्रे ब्राह्मण्यस्योत्पत्तिः, तस्याः तथात्वपरीक्षासाक्षिणो वसिष्ठसदृशस्य वचनात्कर्तव्या वर्तते। तत्रैव वृत्तस्य कारणत्वं बोध्यम्, "जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेऽपि वा" इत्यत्र।

अनुलोम एव जात्युत्कर्षः

अत्रेदं स्मर्तव्यम्—धर्मशास्त्रेण "ब्राह्मणात् शूद्रायां जातः इत्येवमनुलोमक्रमेण समुत्पन्ने वंशे चतुर्थे पञ्चमे वा विप्रत्वं भवति नान्यथा" इत्युक्त्या अश्रेयसीत्वं निमित्तमुक्तम्, न पुंसन्ततिपरम्परायाः। तदिदं कलिवर्ज्यं पशुसन्ततिसाधारणकार्यकारणभावलाघवानुरोधेन व्यवस्थापितमित्यन्यदेतत्।

ब्राह्मण एव जात्युत्कर्षः

'त्र्यहेण शूद्रो भवति ब्राह्मणः' इत्यादौ विप्रः शूद्रसदृशो भवति इत्येवार्थो विज्ञेयः, ब्राह्मणत्वादिजातेर्नित्यत्वात्, सदृशत्वार्थ एवंविधस्य प्रयोगस्य "श्येनेनाभिचरन् यजेत" इत्यादौ क्लृप्तत्वाच्च।

कौशिकादौ संस्काराभावेऽपि विप्रत्वम्

नन्वेवं कौशिको यदि विप्रोऽभूत्, तर्हि तस्योपनयनाभावे पातित्वं कथं न मन्तव्यमिति चेत्, न, उपनयनाधिकारितावच्छेदकं स्वजातीयमातापितृजे विप्रे स्वीक्रियत इति खण्डदेवाचार्यप्रभृतीनां सिद्धान्तस्मरणात्। जन्मौषधितपःसमाधिजा सिद्धिः, तथाविधेषु कौशिकादिकेषु तन्नाभ्युपगम्यते। न च उपनयनाभावे वसिष्ठे पुरोहितत्वमनुपपन्नमिति वाच्यम्, ब्राह्मणशरीरोद्भूतस्य वसिष्ठस्य पौरोहित्यकर्तृत्वस्वीकारात्। एवमेव 'अब्राह्मणाद् अध्ययनमापत्काले विधीयते' इति वचनन्यायेन विश्वामित्रादेरध्यापकत्वोपपत्तिः, अत एव "गोधमं सौरभेयात् शुश्राव" इति महाभारतवचनमुपपन्नं भवति।

वसिष्ठादीनां जीवत्वं मुक्तत्वञ्च

क्वचित् पुत्रशोकाक्रान्तत्वं वसिष्ठादीनां वर्ण्यते, तत्तु 'पश्वादिभिश्चाविशेषात्' इत्युक्त्या जीवत्वाद् बोध्यम्। शास्त्रेण निर्णीतत्वान्मुक्तत्वमपि तेषु स्वीक्रियते।

सन्दिग्धे गुणो ब्राह्मणत्वनिर्णायकः

यत्तु जाबालस्य विप्रत्वं तस्यार्जवेण साधितं तदुपपत्त्यभावादयुक्तमिति। तन्न। तत्र गोत्रत्वमेव आस्ते सन्दिग्धम्। ब्राह्मणमातापितृजन्यत्वं त्वसन्दिग्धमेव। स्वीयपुत्रे ब्राह्मणमातापितृजन्यत्वसन्देहकथनमत्यन्तमयुक्तिकम्। तथोक्तं "परिचरन्ती यौवने त्वामलभे" इति। इत्थं च पत्युः पतिचरणरतत्वात्स्वगोत्रज्ञानं न सम्भवितुमर्हति। "नैतद् ब्राह्मणो विवेक्तुमर्हति" इत्युपसंहारस्य शमदमादिसम्पत्तेः ब्राह्मण्यपरिचायिकाया मूलस्य आर्जवस्यामानित्वसहकृतस्याभावे एवं विनयो नोपपद्यत इत्येतावन्मात्र एव तात्पर्यात्। तेन सत्यवचनस्य निर्णेयत्वं भवति।

कलौ आर्जवाभावेन जातिनिर्णयाभावः

अत्रेदमवधेयम्—नातिमानित्वसमानाधिकरणमार्जवं युगान्तर एवासीदिति कलौ तदाश्रयणं जातिसाधकतया न युक्तमिति।

ब्राह्मणादिविभागस्यापरित्याज्यत्वं

यद्यपि आत्मगुणवत एव ब्रह्मसायुज्यम्, न जन्ममात्रेणेति ब्राह्मणादिविभागाभावेऽपि आत्मगुणवतां परलोकप्राप्तिर्भवेदेवेति तत्रैव प्रयास उचित इति भाति। तथाप्यष्टसु आत्मगुणेषु शौचस्यापि ग्रहणात्, तस्य च वेदैकवेद्यत्वाद् वेदेन तथा परिग्रहाद् ब्राह्मणादिधर्माः शौचे अन्तर्भूता भवन्ति। अत आत्मगुणवद्भिरपि वैदिको धर्मोऽपि परिपाल्य एव, अनेनाश्रमधर्मोऽपि व्याख्यातः।

पुराणमते ब्राह्मणत्वादिव्यवस्था

ननु 'सन्त्यक्तव्याः प्रसिद्धा ये जातिभेदविधायिनः' इत्यादिवचनैः विप्रत्वादिकं निषिद्धमिति चेत्, न, स्पष्टलिङ्गकैर्वचनैः ब्राह्मण्यं जन्मना अस्तीति सिद्धत्वाद् जातिनिषेधकवचनानां तत्खण्डने अतात्पर्यात् । यथा "अपशवो वा अन्ये गो-अश्वेभ्यः पशवो गो-अश्वा" इत्यादौ गवाश्वातिरिक्ते पशुत्वं निषिद्धं तदप्रशस्तपशुपरतया समन्वीयते, तथा गुणहीनसमवेतं ब्राह्मणत्वादि निषिद्धयते । अत्रासञ्जातविरोधो न्याय उक्तसन्देहनिरासकः स्मर्तव्यः, गुणहीनजातिप्राशस्त्याभावे प्रकरणस्य तात्पर्यात् ।

ब्राह्मणादीनां वर्णपदवाच्यता

ननु वर्णशब्दो गुणादिषु रूढः । विप्रे वर्णपदबोध्यता कथं सङ्गच्छत इति चेदुच्यते । युगान्तरे विप्रादिषु तत्तद्वर्णसत्वेऽपि वर्तमानसमये जातिब्राह्मणादिषु तथाविधरूपदर्शनाभावेऽपि च "ब्रह्मणे ब्राह्मणमालभेत' इत्यादिश्रुतौ पुरुषमेधे उपयुक्तेषु अनेकेषु विप्रादयश्चत्वार एव विप्रक्षत्रियवैश्यशूद्राः पुरुषसूक्ते उपवर्णिता इति जातिमत्सु वर्णपदस्य रूढिः सिद्धा, 'अथैतान् ब्रह्माभिष्टौति सहस्रशीर्षेत्यनुवाकेन' इति भाष्योक्तेः । एवञ्च जातिपरतया 'वर्णनाद् वर्णः' इति योगस्योपपत्तौ कृतयुगादौ ब्राह्मणादीनां शुक्लं स्वरूपम् आसीदिति इतिहासमात्रेण कविसमयसिद्धत्वाद्वा विप्रादिपदानां शुक्लरूपादिशक्तिमत्त्वपरतया वर्णनस्य अयुक्तत्वम् ।

ब्राह्मणपदबोध्यता

अत्रायं निष्कर्षः—वृत्त्या गौण्या व्यञ्जनया वा ब्राह्मणपदबोध्यं बहुविधं भवति । तत्र शक्त्या बोध्यं विप्रत्वमुक्तं चतुर्विधान्यतममेव । ब्राह्मणकार्यकारितया गौण्या वृत्त्या विप्रपदबोध्यं ब्राह्मणगुणकर्मसकूटं भवति । व्यञ्जनया बोध्यं तु गौरत्वादिकम् । यथा नदीनां सरोजवत्ता, चन्दने पुष्पाभाव इत्यादि । यथा वा—

पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम् ।
तदादाय करैरिन्दुः लिम्पतीव दिगङ्गनाः ।। इति च ।।

तत्तु आदर्शरूपेण कविना वर्ण्यते । वेदविधौ वैयञ्जनिकबोधस्याग्रहणाद् वर्णपदवाच्यतावच्छेदिका जातिरेव ।

गुणकर्मनिबन्धना जातिः

नन्वेवमपि पूर्वयुग एक एव वर्ण आसीदिति वर्ण्यते, तत्कथमुपपद्यते ? इति चेदभिधीयते । पूर्वमीमांसामतानुसारेण 'न कदाचिदनीदृशं जगत्' इति यदा राद्धान्तोऽस्ति, तदा एकस्य वर्णस्यावसर एव बीजाङ्कुरवद् नास्ति । एतन्मते सृष्टिप्रलयोपवर्णनमेकवर्णोपवर्णनं वा स्तावकतया अर्थवादो बोध्यः । उत्तरमीमांसकमते सृष्टिप्रलयस्वीकारेण एकवर्णोऽपि सङ्कल्पादिमहिम्ना वर्णचतुष्टये परिणतो भवितुमर्हति,

यथा अहल्यायाः शिलात्वम्। एवंविधः सङ्कल्पसिद्धो योगी साम्प्रतं कोऽस्ति ? इति निर्णेतुं न शक्यते। एवञ्च एकस्मिन्नेव जन्मनि मातृपित्रनपेक्षं ब्राह्मणत्वमस्माभिर्निर्णेतुं न शक्यम्, अतो जन्मकृता जातिव्यवस्था स्वीकर्तव्या अस्माभिरज्ञजनैः।

ब्राह्मणादिषु तपस्विनां वैशिष्ट्यम्

वसिष्ठादि ब्राह्मणानां स्वाभाविको नयः शौचादि सम्पत्तिरिति वर्ण्यते; किन्तु तेऽपि क्रोधादिविकृतिभावमापन्नाः दृश्यन्ते, तथा सति ब्राह्मणान्तरापेक्षया किं वैशिष्ट्यमिति। चेत्तत्रैवमाहुः—

"स्वाध्यायस्तेषां देवत्वं क्रोधस्तेषां नृणामिव" इत्युक्तत्वाद् विप्राणां स्वाध्यायस्तपो वा देवत्वमस्ति। तपस्विषु तदिदं तप इति तपो नित्यः पौरुशिष्टिः इत्यादिवाक्यैः अतिशयिततरमस्ति। क्रोधादिमत्त्वमपि तेषु कञ्चन अपराधिनं प्रति दण्डार्थमुपयुज्यते। इत्थञ्च दण्डारम्भकत्वादयं क्रोधो नापराधः। क्वचित्तु माहप्रयुक्तः। तथापि ते क्रोधं परिहृत्य तपस्वितां स्वाध्यायशीलतां स्वायत्तीकर्तुं पुनः प्रायतन्त इत्यनेकैरितिहासैर्निर्णीयते। इत्यलं प्रसक्तानुप्रसक्तपरम्परया। इदन्तु सिद्धं यदमानित्वादिसहकृतप्रतिभादिगुणसम्पत्तेः सहजतो लाभाय धर्मशास्त्रानुमोदिताया जातेरस्तित्वं स्वीकृत्य कौटिल्येनापि धर्मस्थापनाय त्रयीविभाग उक्तः, सोऽवश्यमादर्तव्यः। अन्यथा तु लोको न प्रसीदेत्; अपि तु विषीदेदेव।

कुलीनत्वप्रयोजकम्

कुलीनत्वं मातापितृप्रयुक्तं किं वा तत्सहितजातिप्रयुक्तमिति प्रश्नेऽयं सिद्धान्तः— यद् मातृपितृशुचित्वेन सह जातीयता कुलीनत्वस्य प्रयोजिका इति। तदेतत्स्मृत्यैव भारतीयराजनीत्या विद्याप्रतिष्ठाकामनया जातिगौरवं स्थापितम्।

वृत्तिनियमनेन शूद्राणां सम्पत्तितोऽवञ्चनम्

मनुना शूद्रा याजनादिवृत्तितो बहिष्क्रियन्ते तेन तत्प्रयुक्तार्जनापहारेण ते सम्पत्तिभोगाद्वञ्चिताः स्युरिति चेत्, न, शास्त्रेण सर्वेऽपि वर्णा वृत्तिव्यवस्थायाः सुचारुत्वाय नियमिताः, धनार्जनात्तु केऽपि न वञ्चिताः। यतः शूद्रैः यद् धनं सेवावृत्त्या अर्जनीयम्। तदेव याजनादिभिर्विप्रैः। एतद्वृत्तिनियमनयोः यदि तुलनां पश्यामः, तर्हि शास्त्रस्य पक्षपातो धनार्जने कुत्रेति नीतिसारटीकाकृदुक्तेन स्फुटीभवति। एतन्मते जनानुरागप्रभवा हि सम्पदः, अनुरागो हि सेवाधीनः। शूद्रस्य सेवावृत्तिः। अतस्तस्मिन् अनुरागः सहजतः समाजस्य यथा, न तथेतरवर्णेषु विप्रादीनां वृत्तौ सेवाया अदर्शनात्। अतः अनुरागमूला सम्पद्धारा शूद्रं वाञ्छति। सत्यप्येवं तेषु व्यसनप्राधान्याद् दारिद्र्यमेवालोक्यते, अतो वृत्तिनियमनप्रयुक्तं न दारिद्र्यं किन्तु व्यसनित्वप्रयुक्तम्।

वर्णान्तरेण शूद्रवृत्तिस्वीकारे तस्य दण्ड्यता

यद्यपि शूद्रस्य वृत्तिः विप्रादिभिः स्वीक्रियते, शास्त्रञ्च तत्र न दण्डं व्यवस्थापयतीति सत्यम्, तथाऽप्यत्रेदमेव स्मर्तव्यं यद् विप्रादिर्वर्णो यदाप्रभृति शूद्रादिवृत्तिं भजन्नास्ते, तदाप्रभृति लोकदृष्ट्याऽयं क्रमशो द्वेष्य एव भवति। इदं दण्ड्यत्वं लोकसिद्धं ज्ञात्वा शास्त्रेण विप्रादिरुपेक्षितः। अत एव विपदाद्यवसरे द्वेष्यत्वादिस्थितौ विप्रादिना सेवावृत्तिः त्यक्तव्यैव। तथा सत्येव स विश्व-विश्वास्यो भविता। सेयमापत्तिर्न सेवावृत्त्यधिकृतेषु शूद्रेषु।

अपि च कामन्दकेन 'विशुद्धाच्च प्रतिग्रह' इति विदधता शूद्रेतरोऽपि भारतीयराजनीतिमाश्रित्य दण्डितः। तथा हि—लोकसङ्ग्रहेषु दानं वृत्तं विहितं वर्णाश्रम व्यवस्थापनानन्तरम्। तच्च शासकेन कर्तव्यमेव। यदि च शास्ता उन्मत्ततां गतः, तर्हि तथाविधाद्राज्ञः धनं न प्रतिगृह्यते, तर्हि राजा लोकसङ्ग्राहकाद्दानाख्यकर्मणो वञ्चितो भवति इत्येवमूह्यमन्यत्रापि।

किञ्च, शास्त्रेण विप्रादिरपि दण्डित एव। तत्रोदाहरणम्—ब्राह्मणेषु कुण्डगोलकौ याजनादिषड्विधकर्मभ्यो हापितौ। तथाविधो दण्डः शूद्रेषु नास्ति। यत्तु सम्मानितं विप्रं पश्यन्तः केचिद् असूयालवः आक्षिपन्ति, तत्तु न मनोरमम्। जनताया उपकारकं कर्म कुर्वन् विप्रः शास्त्रेण सम्मानितः। नयतः स जनेषु प्रसृताया जडताया निवारणं विद्यामभ्यस्य प्रचार्य च करोति। तथा सत्येव तस्य देवत्वं तत्प्रयुक्तमेव तस्य सम्माननम्, तस्य पारिश्रमिकं नाक्षेपार्हम्।

वृत्तिनियमनम्

अपि च भारतीयराजनीत्या वृत्तिनियमनं विधाय सर्वे जनाः साकाङ्क्षाः कारिताः। तद्बलेन सर्वे सङ्घटिताः सारल्येन भवन्ति, साकाङ्क्षयोः संयोगस्य स्वयं सिद्धत्वात्। तथात्वादेव च कलहोऽपि समाजे नास्ति।

इदं नियमनमपि कुलपरम्परामादृत्य। तेन कुलनत्वप्रयुक्तप्रतिभोद्बोधोऽपि नासुलभः। यदि कलहस्तेषु सम्भवेत्, तर्हि साकाङ्क्षत्वात् तन्निरासोऽपि सहजतः सुलभः। अत एव राज्ये अभ्यर्हिता मन्त्रशक्तिः, प्रभुशक्तिः, उत्साहशक्तिरपि विभज्य समाजे स्थापिता युक्तियुक्ता भवति। इमाः शक्तयः स्वतन्त्राः सत्योऽसमर्था भवन्ति, सापेक्षत्वे तु तासां कार्यकारित्वं नियतम्। इदं तत्त्वं समादृत्य राजसभायां सर्वेऽपि वर्णाः सदस्यत्वेन नियोजिता भवन्ति। एतेन बान्धवत्वमपि समुपार्जितं भवति। इति वृत्तिनियमनमुपयुक्तम्।

क्षत्रियोऽध्यापनवृत्त्या हापितः

शास्त्रेणैतत्समाजे क्षत्रियाणां कृते अध्यापनं न विहितं तत्रापि हेतुः क्षत्रियस्य युद्धस्वभावः। युद्धरतः क्षत्रिय ओजोगुम्फे सम्भाषणशीलः टकारादिवर्णानुच्चारयन्

परुषवाग्भवति, क्रूरश्च। क्वचित्तु स मधुरवागपि हृदा कठोर एव। अत एव युद्धे क्षत्रियप्रायत्वं सैन्यस्योक्तम्। विप्रप्रायत्वाभावे कारणं कौटिल्येनोक्तं तेषां दयालुत्वं स्मर्तव्यम्। यत्र च दारुणकर्मणि विप्रस्य प्रवृत्तिस्तत्र वेदाज्ञैव हेतुर्मन्तव्या। विप्रस्य सत्त्वप्रधानता, क्षत्रस्य तु सत्त्वोपसर्जनरजःप्रधानता इत्यादि गीताटीकायामुक्तं प्रमाणं वेदितव्यम्। अयमेव न्यायो वैश्यादिविषये बोध्यः। उपर्युक्तं कर्मभेदमालोच्य विप्रादीनामुपनयनसंस्कारोऽपि कालभेदेन व्यवस्थापितः। तद्यथा—अहिंसाशीलत्वाद् गर्भाष्टमे विप्रस्य, एकादशे क्षत्रियस्य, वैश्यस्य द्वादशे इति। अत्रापि कारणमहिंसाहिंसाऽनृताशीलत्वानि।

क्षत्रियस्यापि अध्यापने प्रवृत्तिः

सत्यप्येवं विप्रस्य अध्यापयितुरभावे आपदि क्षत्रियोऽपि अध्यापयितुं शक्नोति। तत्र प्रमाणं मनूक्तं वेदितव्यम्—

स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम्।
विविधानि च शिल्पानि समादेयानि सर्वतः॥ इति।
अब्राह्मणादध्ययनमापत्काले विधीयते ॥ इति च।

अत एव कुलीनस्यालाभे शूद्रोऽपि राज्यकर्मणि नियुक्तः शास्त्रकृता। तद्यथा—

अपारे यो भवेत्पारम् अप्लवे यो भवेत्प्लवः।
शूद्रो वा यदि वाऽप्यन्यः सर्वथा मानमर्हति॥ इति।

इत्थञ्च कुलीनस्य विप्रस्यालाभे तदितरो वर्णोऽप्यध्यापयितुं शक्नोतीति न विरोधः, नापि च वृत्तिवैषम्यप्रयुक्तोऽर्थार्जनाधिकाराभावः।

कुलीनत्वस्य उपयोगान्तरम्

किञ्च, प्रतिभोद्बोध इव धर्मश्रद्धाऽपि कुलीनत्वस्य द्वितीयं फलम्। सा यस्य नास्ति, स न अपेक्षितफलभाग् भवति। अत एवोक्तम्—

शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते॥ इति।

सुप्रजाजननं फलमाधुनिकानामभ्यर्हितं कुलीनत्वे सति भवति। तच्छास्त्रेण साध्यते। दृष्टञ्चैतद् गवादीनां धान्यादीनामुत्पत्तौ। अत्रेदं चिन्त्यम्—कुलीनत्वस्य माहात्म्यं वर्णयन्त्या राजनीत्या अत्रैव राज्यशासनसञ्चालनपर्याप्तिर्न मन्यते; अपि तु गुणसमूहसमानाधिकरणे कुलीनत्वे।

अकुलीनेषु प्रतिभोद्बोधः

अकुलीना मनुव्यासादयः कथं प्रतिभासम्पन्ना बभूवुरिति चेदुच्यते। व्यासादयः जन्मतः शुद्धाः शास्त्रप्रणेतारो बभूवुरिति तेषामुच्चकुलीनत्वाभावेऽपि न क्षतिः। कलौ

तु सा सिद्धिर्विलीना । अत्र तु दृष्टप्रयोगानुसारेण शिष्टं कुलीनत्वम्, तदपि भारतीयैः यदि उपेक्ष्यते, तर्हि अहङ्कारप्रादुर्भावात्, तर्कशक्तेरनुद्गमे साहित्यिकपद्धत्या रसमयेन अध्ययनेन मोहस्यापि प्रादुर्भावात् शक्तिह्रास एव स्यात्। अतः सत्त्वं रक्षणीयं कुलीनत्वरक्षणपुरःसरम् । पञ्चसहस्रवर्षात् पूर्वं भारते समस्ता विद्या आसन्निति कृष्णस्याध्ययनेतिहासतः स्फुटं भवति । अधुना सा स्थितिर्नास्ति । तथापि 'अर्थी समर्थो विद्वानधिक्रियते' इत्युक्त्यनुसारेण प्रयतितव्यमस्माभिः ।

धर्मस्य स्वरूपम्

केचित्तु धर्मोऽपूर्वमिति वदन्ति । धर्मः क्रियेति अपरे । ईशप्रसाद एव स इत्यन्य आहुः । एतेषु केचिन्मते 'धर्मः क्षरति कीर्तनात्' इति पद्यस्य समन्वयः । अपरमते क्रियानुष्ठानसमये अपि 'धार्मिकोऽयम्' इति व्यवहारस्य संवादित्वम्। ईशप्रसादस्य तथात्वे तु विधिनिषेधपरिपालने सति ईश्वरः प्रसन्नो भवति । तदुक्तम्--

यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः ।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम् ॥ इति ।

इदमेव मतं राजनीतिविदां सम्मतम् । अस्यागमप्रमाणैकवेद्यत्वे धर्मत्वम्, प्रमाणत्रयवेद्यत्वे नीतित्वमित्यास्तां विस्तरः ।

नीतौ सम्मानः

अत्र समाजे धर्मवृत्तिव्यवस्थापनमुखेन कुलीनत्वरक्षायै भोजनविवाहौ नियमितौ । तावता नीतिकार्येषु पदानुरूपं सम्मानने सर्वेषां न समानता भारतीयनीताविति न मन्तव्यम् ।

हिन्दुधर्मे उन्नतिः सर्वाङ्गीणा

इत्येतदनालोच्य डॉ० श्री अम्बेडकरमहोदयैः—'उन्नतिर्हिन्दुधर्मे नास्ति' इति बुद्ध्या बौद्धधर्मोऽवलम्बित इति कैश्चिदाक्षिप्यते, तदत्र प्रस्तूयते ।

उन्नतिपदार्थ एतन्मतेऽर्थकामसमृद्धिः, अत्र तु धर्मस्यापि, एतयोर्मतयोः कुत्र प्राशस्त्यम् ? इति चेदत्रैवेति ब्रूमः । तथा हि—

नवीनानां मतेन यद्यपि कामस्योन्नतिः काम्यते, तथापि कामस्य अर्थसाध्यत्वाद् अर्थोन्नतिरेवात्र साधीयसीति वक्तव्यम् । एवंविधा समुन्नतिः धर्मप्रधाने राज्ये यथा, तथा नान्यत्र । यतो भारतसमाजे राज्यशासनविभागान्यतमेषु तत्तत्कार्याध्यक्षपदेषु तत्तज्जातीया एव नियोज्यन्ते, तेषामायुक्तादिका अपि तत्तज्जातीया एव क्रियन्ते, ततः तत्तत्कर्मप्राप्तधनवितरणमपि तत्रैव (विशेषस्तु तृतीयाध्याये, शान्ति का अग्रदूते च द्रष्टव्यः) । एवंविधं नियमनं धनवितरणञ्च अन्यत्र नास्ति । प्रत्युत वृत्तिसाङ्कर्यप्रयुक्तमपनयबाहुल्यमेव पश्यामः, यथावद् धनवितरणव्यवस्थायास्तत्रादर्शनात् ।

मतनिर्वाचनम्

एतत्प्रसङ्गाद् भारतीयराजनीतौ उक्तं मतनिर्वाचनमुच्यते। अत्र जातिनिर्वाचनं विद्वन्मतनिर्वाचनं संवासिमतनिर्वाचनमिति भेदेन त्रिविधं निर्वाचनमुक्तम्। एतद्रीत्या स्वर्णकार्याध्यक्षः तज्जातीयनिर्वाचितः तत्कार्यकरणे मन्त्रित्वेनाभिलष्यते। तस्येदं फलं यत्–तदाध्यक्ष्ये सुवर्णकारैर्निर्मितादलङ्कारात् स्वर्णापहारे कार्यकर्तुर्वेतनात्क्षतिपूर्तिः कर्तव्या भवति। तदशक्यत्वे स्वर्णाध्यक्षवेतनतः क्षतिपूर्तिः कर्तव्या। तदशक्यत्वे निर्वाचकजातितः सा कर्तव्या भवति। एवं च सजातीयेषु दण्ड्येषु सत्सु तज्जातीयात्तं प्रमादिनमध्यक्षं स्वसजातीया बहिष्काराददिण्डैर्दण्डितो भवति, एतद्भिया पदाधिष्ठाने स्थितः स अकार्यान्निवृत्तः अवग्रही भूत्वा स्वकार्ये प्रवृत्तो भवति जातिमतनिर्वाचनेन। अतः सम्पद्यमानमिव दण्डप्रणयनं राजा नान्यया रीत्या कर्तुं शक्नोति, प्रजाकोपादिप्रसक्तेः। तदुक्तम्—

स्वजनेभ्यो विजानीयात् कुलं स्थानमवग्रहम्॥ इति।

विद्वन्मतेन विद्याप्रतिभाप्रागल्भ्यान्यमात्यस्य परिचीयन्ते। संवासिमतेन अस्तब्धता अचापल्यं सत्त्वं शीलं बलञ्च परीक्ष्यन्ते। पुनः विपदि अनुरागः धृतिः स्थैर्यञ्च लक्ष्यते। संव्यवहारतः विषादाभावममन्दप्रभावं क्लेशसहिष्णुतां प्रत्यक्षतः सप्रियत्वं भद्रतां च जानाति राजा इत्यलम्। तथा चास्मिन् धर्मे समृद्धिरर्थस्य नास्तीति केन कथं विज्ञेयम्।

कृषिपाशुपाल्ययोः पौर्वापर्यम्

वृत्तिं विचारयता मूलकृता कृष्यनन्तरं पशुपालनं विहितम्, एतत्क्रमं विहाय नीतिसारकृता पशुपालनानन्तरं कृषिः कथं परिगणितेति चेत्, न, कामन्दकेन वैश्येन पशुपालनं कर्तव्यम्, मनुवचनानुसारेण आदौ विहितं तन्मतेन वैश्ये तद् धर्मवत्वं पशुपालनप्रतिभूत्वं च व्यञ्जितम्। मूलकृता तु कृषिप्रधानं भारतमनुसन्धाय कृषेः प्राथम्यमुक्तम्।

वाणिज्याया असमस्योक्तिः, कृषिपाशुपाल्ये इति तु समस्य, अत्र कोऽभिप्रायः? इति चेदुच्यते। वाणिज्यायां कर्तव्यायां तत्र लाभः शास्त्रकृद्भिः मर्यादितः। कृष्यां तु अमर्यादितो लाभः, तथा पशुपालनेऽपि इति बोधनार्थं वाणिज्योक्तिः असमासेन कृता।

उपनयनाभावेऽपि वैश्यजातेः सुरक्षितत्वम्

उपनयनादिसंस्कारलोपेन वैश्येषु वैश्यत्वजातिः स्वीकर्तुमुचिता न वेति प्रश्ने इदं समाधानम्—

उपनयनं वेदाध्ययनं च धर्मोः वैश्यानाम्; परं तद्वृत्तौ तयोरङ्गत्वं नास्ति। विप्रस्य तु वृत्तौ तयोरङ्गत्वमभिधीयते। अत उपनयने असञ्जातेऽपि वार्तावृत्तिर्वैश्येषु नियता न पातित्वापादिकेति वैश्यत्वं न व्याहन्ति। न वा वर्णसाङ्कर्यं तेषु प्रवृत्तमिति

कुलशुद्ध्या वैश्यत्वजातिपरिहारकल्पने युक्तिर्नास्ति। प्रत्युत तै स्वीयं कर्म अनुष्ठीयत इति वैश्याः कलावपि वर्तन्त एव। तेषां व्रात्यत्वं सम्पन्नं संस्काराभावादिति तु अन्यदेतत्। ब्राह्मणानां कृते तु उपनयनमावश्यकमेव, अन्यथा तेषु प्रतिग्रहदानाद्यनधिकार उक्तः शास्त्रेषु। अतो ब्राह्मणपरम्परायामुपनयनमनुस्यूतं वर्तत इति यथा दाढ्र्येन वक्तुं शक्यते, न तथा वर्णान्तरेषु युक्त्यभावात्। अतो ब्राह्मणैः कृष्यादिकर्मकर्तृभिः स्वकर्महानेन स्वीयं विप्रत्वं हापितं साङ्कर्यादिति वक्तुं यथा युक्तिर्वर्तते, न तथा वैश्येषु इति। अत्रेदमवधेयम्—स्वस्ववृत्त्या जीविकाया अप्रसक्तौ कृषिः पाशुपाल्यं वार्ता च सामान्या सर्वैरपि स्वकर्मपालनपुरस्सरं कर्तुं शक्येति।

आश्रमधर्मे असगोत्रविवाहः

वेदेन धर्मे बोधयितव्ये वर्णधर्मवद् आश्रमधर्मोऽपि अवस्थाभेदेन निरूप्यते कुलीनेषु वर्णाश्रमसमाजेषु। तत्र गृहस्थस्य प्रधानत्वात् सर्वाश्रमाणां योनित्वाच्च आदौ गृहस्थस्य धर्म उक्तः। अत्र असगोत्रविवाहो धर्मत्वेन साधितः, शास्त्रेषु सगोत्रविवाहे प्रायश्चित्तदर्शनात्। तत्रेयमुपपत्तिः–समानगोत्रेषु समानप्रवरेषु वा विवाहे कृते रक्तसान्निध्यात् कुलक्रमागता दोषाः प्रादुर्भवेयुः। तन्निरासाय समानगोत्रत्वं समानप्रवरत्वञ्च वर्जितम्। विशेषस्तु समाजशास्त्रे विवेचितः (२६५ पृष्ठे ज्ञेयः)।

विवाहफलम्

किञ्च, विवाहफलमुत्तमसन्ततिः तदा, यदा तत्र आत्मगुणसम्पत्तेः प्रादुर्भावो भवेदिति निर्णीतम्। तदर्थमुपर्युक्तो निषेधोऽपि अनुगुणः। तदुपेक्षायां पितुः प्रणरक्षणं दुर्धरं पुत्रे कर्कटसाधर्म्येण सहजशत्रुत्ववर्धनात्, "कर्कटकसधर्माणः पुत्राः पितरं भक्ष्यन्ति" इति कौटिल्योक्तेश्च। साजात्यं वैजात्यं च विजातीय-सजातीयधात्रीस्तन्यपानेन बालकेषु रोगवृद्धि तन्नाशयोर्दर्शनादित्यादि प्रागुक्तमेव।

जनसङ्ख्या

ऋतुकाले भार्यागमनविधानेन जनाधिक्यप्रसक्तिः कथं शास्त्रेण अपह्रियते ? इति चेदेवम्। स्त्रीणामवस्रावणं कर्तव्यम्, तेन न पुत्राधिक्यप्रसक्तिः। न चैवमवस्रावणे कृते अदृष्टहानिः स्यादिति वाच्यम्, अपुत्रस्य कृत एव ऋतुकाले अभिगमनविधानात्। अपि च प्रवासे अस्वस्थे वा ऋतुकालानभिगमनं न दोषाय, तमोबाहुल्ये सति तु समाजे अस्वास्थ्यस्यैव सत्त्वान्नादृष्टहानिः। स्वास्थ्यञ्च सुश्रुत एवमुक्तम्——

समाग्निः समदोषश्च समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥ इति।

उक्तरीत्या स्वस्थो यदि ऋतुकालाभिगमनं न करोति, तदा स दोषभाक्। इत्थञ्च राजनीत्या सत्त्वस्य लोके स्थापनं क्रियते, तर्हि प्रजाभिवृद्धौ नियन्त्रणं स्वाभाविकं

भवति। तदन्तरा उपायान्तरेण प्रजानिरोधनमनुचितं मन्तव्यम्। तदर्थं परिवार-नियोजनं काम्यते यया युक्त्या, तया व्यभिचारप्रोत्साहनं दुर्निवारम्। समाजे सत्त्वस्य स्थापने तु परसंसर्गादौ कुलीनेषु लज्जा भवति, सा व्यभिचारसदृशादकार्यान्निवर्तयति। धर्माभावे सत्त्वस्याप्रचारणे लज्जाविनाशः समाजेऽभूत्, स त्वशोभनः। अतः प्रजाभि-वृद्धितो रक्षणयापि धर्म एव हेतुरिति दिक्।

देवताया अस्तित्त्वम्

गृहस्थधर्मे देवपूजनं विहितम्। मीमांसकैस्तु देवविग्रहो नानुमन्यते, तथापि ईशभक्तौ सत्यां कामसूत्रनिर्देशेन न सर्वेषामनुमता स्वानुरूपा उत्तमा सन्ततिर्भवतीति भारतीयराजनीतौ देवपूजा उत्तमसन्ततिलाभाय विहिता बोध्या।

नीतिसारे नीतिवाक्यामृते अर्थशास्त्रे च गृहस्थधर्माणां न्यूनाधिकसङ्ख्यया निरूपणं कृतम्, ते सर्वेऽपि सर्वेषामनुमता वेदप्रामाण्यस्य सर्वैरपि स्वीकृतत्वात्। वैशेषिक-भाष्ये तट्टीकायाञ्च धर्मस्य फलं निरूपितं तदपि २७१ पृष्ठतोऽनुसन्धेयम्।

गृहस्थधर्मस्य नीतिलक्षणाक्रान्तत्वम्

प्रातिभं ज्ञानमिव गृहस्थधर्मफलं सुप्रजाजननं सिद्धमिति प्रत्यक्षप्रमाणप्रमितत्व-मस्य प्राङ् निरूपितम्। वेदप्रमाणेन गृहस्थधर्मस्य कर्तव्यत्वेन विधानात् तद्रीत्यापि संवादित्वमेव।

किञ्च, विशुद्धाभिसन्ध्युत्पादकस्य धर्मस्य फलं चित्तशुद्धिः सुप्रजाजननं च दृष्टं यथा भवति, तथा पारलौकिकं सुखमपि ब्रह्मादिदेवशरीरेणानुभूयमानं प्रत्यक्षसिद्ध-सुखत्वजातिमदेवेत्यग्रे वक्ष्यमाणत्वाद् गृहस्थधर्मे नीतिलक्षणसङ्गतौ न विप्रतिपत्तिः।

शब्दप्रमाणस्य अनुमाने अन्तर्भाववादिनां वैशेषिकाणां सिद्धान्ते स्वीकृते अनुमान-प्रमाणप्रमितत्वमपि तत्रार्थदेवायातमिति प्रमाणत्रयप्रमितत्वाद् गृहस्थधर्मो नीतिरेव।

धर्मेण चित्तशुद्धेः सञ्जाता उपयुक्तता

ननु धर्मस्य फलं चित्तशुद्धिरित्युक्तं शास्त्रेषु, तत्रायं प्रश्नः—

चित्तशुद्धेः नीतौ का उपयोगिता ? इति चेदभिधीयते—चित्तशुद्धौ मनःप्रसादो संशयाभावश्च वर्तते, तयोः फलं विशुद्धाभिसन्धिः। स च दम्भरहितः सङ्कल्प इति व्याख्यातं न्यायकन्दल्याम्।

विशुद्धाभिसन्धिशून्यः अशुद्धचेतस्को जनस्तृष्णालुः परान् वञ्चयति, आत्मानं नयाभासदर्शनेन गोपायनि। स्थलविशेषेषु सङ्करकर्माण्यपि कर्तुमभिलषति। एवंरीत्या अनर्थं कुर्वन्नयमनर्थप्रकाशनशङ्कयाऽऽक्रान्तस्तिष्ठति। यत्र समाजे उक्तशङ्काक्रान्तिः,

स एकीभावेन न कथमपि स्थातुमर्हति । लोकापरक्तिश्च दुर्नयमहिम्ना प्रसज्यते । ततो रक्षार्थं विशुद्धाभिसन्धिरुपयुज्यते नीतो । तदुक्तम्—

'लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि' । इति ।

अपूर्वस्य प्रत्यक्षत्वम्

नन्वेवं स्वर्गसुखादीनां दृष्टत्वेऽपि यागापूर्वस्य प्रत्यक्षत्वाभावाद् नीतिलक्षणं तत्र कथं सङ्गतं स्यादिति चेत्, न, आहुतिरग्निहोत्रे पवित्रतया सुहुता सूक्ष्मा ऊर्ध्वमुत्तिष्ठति, तदाधारेण जोवोऽपि । इति जोवाधिष्ठात्रो आहुतिरूर्ध्वलोकं गच्छन्ती सूर्यमण्डले प्रविशति । तत्रेन्धनकार्यकर्त्री सा कालान्तरे ततः प्रत्यावर्तमाना चन्द्रमण्डले, ततः पर्जन्ये, ततो भूमौ निपतिता सतो पुरुषे विशति, ततः स्त्रियां प्रविशतीति "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति श्रुत्या साधितम् । इति रीत्या शरीररूपेण परिणतमपूर्वमपि प्रत्यक्षमेव । यन्मते ईश्वरप्रसादोऽपूर्वः, तन्मतेनेशस्य तत्प्रसादस्य च प्रत्यक्षत्वं साध्यते ।

ईश्वरस्य बीजत्वम्

शिवशक्त्योः सङ्गमेन जगदुदयो भवतीति "द्वाभ्यां त्रयाणामुत्पत्तिः" इति भावप्रकाशनविवेचनेन प्राक् साधितम्, तद्रीत्या समस्तं जगत् सूक्ष्मरूपेण स्वस्वबीजेषु वर्तत एव, तद् यदि बीजे न स्यात्, तर्हि जगदपि नास्तोति सिद्धेः । बीजे स्थितं जगत् सूक्ष्ममुच्यते । यथा क्रमशः देशकालादिसामग्रीमवाप्य बीजे सूक्ष्मतया स्थितं व्यष्टिकार्यं यथाकालं स्थूलतया प्रकटं भवतीति यया युक्त्या साध्यते, तया युक्त्या सम्पूर्णं जगदेकत्र बीजे स्थितं वर्तत इत्यपि मन्तव्यमेव, तदुक्तम्—

एतन्नानावताराणां निधानं बीजमव्ययम् । इति ।

एकत्र बीजे स्थितेषु पदार्थेषु बुद्धिचित्ताहङ्कारमनोरूपमन्तःकरणमपि वर्तत इत्यपि सिद्धमेव । तस्याभ्युदयोऽपि जगतोऽवतरणात् प्राक् भवति, तच्च नैकम्, अत एव सङ्कल्पवशाद् देशकालमहिम्ना विभिन्नस्वभावान्तःकरणादयो जीवा दृश्यन्ते । यथा वायोः तिर्यग्गमनमग्नेरूर्ध्वज्वलनम्, अयसोऽयस्कान्ताभिसरणमित्यादि । अत एव बुद्ध्यादिषु अन्तःकरणेषु निर्मलचित्तत्व-संशयितत्व-निर्णयकारित्वाहङ्कारित्वादयोऽपि तत्र तत्र पृथक् समुदीयन्ति । इत्येवं रीत्या समष्टिकार्याणां सर्वेषामुपादानमेकमेव बोजं लाघवान्मन्तव्यम् । तदेव बीजमीश्वरः ।

संस्काराणां कार्यकरत्वम्

एतत्प्रसङ्गात् संस्काराणां कार्यकरत्वं कथमित्युच्यते । उपासकः सङ्कल्पेन यादृशं संस्कारं उद्बोधयति, तादृशेन संस्कारेण स सर्वं साधयितुं शक्नोति । दृष्टञ्चैतद्

वृश्चिकदंशे अपामार्गस्य स्पर्शाभावेऽपि ध्यानमात्रेण अपामार्गस्पर्शभावना क्रियते, तर्हि वृश्चिकदंशज्वाला शान्ता भवति। अभिनयद्रष्टारोऽपि अप्रथमेन व्यञ्जनजनितेन व्यभिचारिभावबोधेन रजस्तमोभावापसरणाद् आनुकार्यसामाजिकयोः भेदस्य विगलनेन रसस्यास्वादयितार उद्बुद्धसंस्कारेण आत्मनि अनुकार्यभावं विजानन्ति। तथैव पूजका अपि ईशमूर्ति रससञ्चारणेन ध्यानसहितेन प्रत्यक्षीकुर्वन्ति, तदा तदीयज्ञानानन्दक्रिया-प्रभा अपि आत्मनि प्राप्नुवन्ति, एकलव्यादिवत्। येषु तत्सङ्क्रमणं नास्ति, तेषां मनसि सत्त्वगुणस्यातिशयितत्वं नास्तीति मन्तव्यम्।

ईश्वरोऽपि प्रत्यक्षविषयः

अपि च सत्त्वगुणस्यातिशयितत्वे संस्काराणामुद्बोधाद् ध्यानमात्रेण ईश-जीवयोर्भेदविगलनाद् ईशप्रत्यक्षं भवति, रसात्मकभावेन तत्तादात्म्यस्य प्रत्यक्षविषय-त्वादनुकार्यरामादिप्रत्यक्षवत्।

साहित्यसाङ्ख्यन्यायनीतिवेदान्तशास्त्राण्युपेक्ष्य आत्मनि दोषानुद्भाव्य काल-क्षपणं न कर्तव्यम्; किन्तु विद्याचिन्तनेन ईशोऽपि रसप्रतीत्या आस्वादनीयः, चिन्त-नीयश्च। आन्वीक्षिकीसाहाय्येन पदार्थानामात्मविद्याचिन्तनेन सत्त्वं धृत्यात्मकं सम्पाद्य-मन्यथा जाड्यमेवापद्येत। एवञ्च रसरूपतया प्रतीयमान ईश्वरः प्रत्यक्षः, तद्गतो हर्षोऽपि प्रसादानतिरिक्तः प्रत्यक्षसिद्ध एव।

आश्रमधर्मे वर्णधर्मस्य न गतार्थता

आश्रमधर्मो हि न जातिविशेषं मर्यादीकृत्य विहितो वर्तते, न कुलीनत्वप्रयुक्तं कार्यजातम्। अत आश्रमधर्मेण साङ्कर्यं न व्यपगतं भवेत्, न वा आश्रमधर्ममात्रस्य पालने सति विपदादिव्यसनप्रसक्तौ प्रतिज्ञातार्थनिर्वहणं भवेदेवेति वक्तुं शक्यम्, अतोऽ-विश्वास्यत्वमपरिहार्यं स्यात्। तदुक्तम्—

कुलीनमकुलीनं वा वीरं पुरुषमानिनम्।
चरित्रमेव व्याख्याति शुचिं वा यदि वाऽशुचिम्॥ इति।

किञ्च, पूर्वपरम्पराप्राप्तं यशः कुलीनैः पूर्वजैरर्जितमनुसरन् स्वापदानप्रसूतायां कीर्त्यां सम्पन्नायां विश्वास्यतायाः पात्रं भूत्वा प्रजापालनाख्ये रक्षणे राजवृत्त्यन्तर्गते अधिकृतो भूत्वा स्वकर्मणि सेवको यशोभाग्भवति। तदेतत्फलं वर्णधर्मप्रयुक्तमेव। अत एवोक्तम्—'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्', इत्यलं विवाहविचारप्रसक्तानु-प्रसक्तचिन्तया।

विवाहपदार्थः

प्रस्तुतविवाहादिविषये विवाहपदार्थः प्रस्तूयते। तथा हि—

विजातीयसंस्कारप्रयोजकं पाणिग्रहणं विवाहः, ग्रहणञ्च ममेयमिति स्वत्वास्पद-

तथा ज्ञानं स्वत्वञ्च प्रतिग्रहजन्यं विवक्षितम्। संस्कारश्च पाणिग्रहणावधिकसप्तपदी-विहितमन्त्रसमुदायकरणकक्रियाकलापजन्यादृष्टविशेषः।

विवाहकालः

अष्टवर्षमारभ्य दशवर्षपर्यन्तं मुख्यकालः विवाहयोग्य इति धर्मशास्त्रमर्यादा। अनन्तरं तु तत्तद्वर्णोपनयनमर्यादानुसारेण स्त्रीणां विवाहो भवति, उपनयनस्थानीयत्वाद्विवाहस्य। अयं गौणः कालः। स चाषोडशाच्चतुर्विंशतिवात्सरपर्यन्तं भवति। सत्यप्येवं ऋतुदर्शनानन्तरं (दशवत्सरानन्तरं) सम्पन्नः स्त्रीणां विवाह आपत्कालिक एव। वस्तुतस्तु विवाहमर्यादायां न आयुर्वेदवचननिर्देशानुसारेण ऋतुदर्शनं विवक्षितम्; किन्तु दशवत्सरानन्तर्यम् अनुगमय्य तदनन्तरभावी कालो गौणकालत्वेनोक्तः, अत्र प्रमाणं २८३ पृष्ठे ज्ञेयम्। तथा च शास्त्रमतेन अन्तर्गतरजस्कावस्थायाः पूर्वमेव विवाहः कन्यानां रक्षणदृष्ट्या जातिशुद्धिदृष्ट्या च हितावह इति। अन्तर्गतरजस्कता च गर्भाद्द्वादशवत्सरे सति बोध्या। तथा च त्रिमासाधिकदशवत्सरानन्तरम् एकेनापि दिवसेनान्तर्गतरजस्कता भवतीति संस्कारकौस्तुभादौ निर्णीतमुपपन्नं भवति। अतस्तत्पूर्वकाल एव विवाहाङ्गतयोक्तः। अत्र अव्यञ्जनोपेतामित्यादीनि धर्मशास्त्रीयवचनानि उपोद्बलकतया प्रमाणत्वेन बोध्यानि।

ऋतुमतीविवाहः

ऋतुमतीविवाहस्य निषेधकारणं साङ्कर्यात्समाजस्य रक्षणम्। त्रिमासाधिकदशवर्षानन्तरम् ऋतुर्भवति, आहारादिसुव्यवस्थायां सत्यां स्त्रीशरीरावयवोपचयः पूर्णतां गच्छतीति निर्णयात्। तदनन्तरं विवाहाभावे शरीरावयवोपचयेन कामवासनाया उद्रेकात् स्वप्ने मैथुनादि सम्भाव्यते। सति च तस्मिन् रोगोऽपि सम्भाव्यते। तदानीं कस्मिंश्चित् पुरुषे मनोवृत्तेर्यदि सम्बन्धो जातस्तर्हि ऋतुमतीविवाहानन्तरं पत्यन्तरसहवासे पूर्णायुष्मत्याः प्रजाया निर्माणं कठिनम्। सोऽयं दोष आङ्ग्लैर्न स्वीक्रियते, इति तैः ऋतुमतीविवाहोपरोधो न कृतः, अत्र तु स दोषोऽसह्य इति ऋतुमतीविवाहो गौणो मन्यते।

अत्रेदं बोध्यम्—ऋतुकालात् पूर्वं सम्पन्नेऽपि विवाहे आपस्तम्बादिभिः ऋतुदर्शनानन्तरमेव गर्भाधानसंस्कारो विहित इति विहितेऽपि बाल्यविवाहे पतिसंसर्गस्य तदानीं प्रसङ्गो नास्ति, धर्मशास्त्रेण निषिद्धत्वात्, श्वश्र्वादिभिः कन्यायाः सुरक्षितत्वाच्च। बाल्यकाले विवाहाभावे ऋतुमतीविवाहोऽपि प्रायश्चित्तादिना धर्म्य एव। स च आपत्कालिक इति। अत्रेदं स्मर्तव्यं यदि वाग्दानानन्तरं कथञ्चित् पतिरदृश्यः स्यात्तर्हि स राज्ञा दण्ड्य एव। वरस्य दुष्टत्वे तु वाग्दत्ता वरान्तराय देया भवति।

अवान्तरजातीयविवाहः

नन्वेवं विवाहविचारावसरे मुनिभिः सवर्णां लक्षणान्वितामित्येवोक्तम्, तत्रावान्तरजात्युल्लेखो नास्तीति अवान्तरजातिनिर्बन्धो विवाहे कुत उच्यते? इति चेदभिधीयते--'यथा कन्या तथा हविः' इति वचनेन यज्ञादौ येषां हविष्येषु सम्बन्धो वर्तते, तेषामेव यौनसम्बन्ध इति ज्ञायते। अतो यज्ञो यैरवान्तरजातीयैः सम्पाद्यते, तेष्वेव कन्यासम्बन्धोऽपि इति नियमः स्मर्तव्यः। किञ्च, यौनसम्बन्धे अवान्तरजातीयत्वमनियामकञ्चेत् क्षत्रियब्राह्मणयोः यौनसम्बन्धोऽपि परिहर्तुमशक्यः स्यात्। अत उक्तवचनबलाद् यज्ञसम्बन्धो यौनसम्बन्धश्च सर्वसाधारणतया कल्पयितुं न शक्यः; किन्तु अवान्तरजातीयसम्बन्धमादाय। अत एव कुलपरीक्षणं विहितं साधु सङ्गच्छते। न हि कुलपरीक्षणं ब्राह्मण्यपरीक्षणे सम्भवति, नापि च तावता साङ्कर्यदोषः परिहृतः स्यादतोऽवान्तरविभागोऽपि परीक्ष्य एव। अत एव कुमारिलपादैः समूहलेख्यं प्रवर्तितं मैथिलेष्विति प्रतिपादयन्ति। तथैवात्र भट्टपादमतमप्यनुगतं स्मर्तव्यम्।

अवान्तरजातीयविवाहफलम्

ननु वचनसामर्थ्याद् अवान्तरजातीये विवाहे निर्णीतेऽपि तस्य किं फलमिति चेत्, न, समाजस्य नियन्त्रणपुरःसरं पारस्परिकाकाङ्क्षासंवलितं सङ्घटनम् अवान्तरजातीयविवाहफलम्, शास्त्रेण सर्वस्य समाजस्य विभजनं धर्मतः मर्यादीकृत्य वृत्त्यादि व्यवस्थापितं वर्तते। तच्च समाजान्तरीयैः साकं विवाहभोजनसम्बन्धायोग्यतयैव भवितुमर्हति। एतन्नियममुल्लङ्घ्य समाजाद्बहिष्कृतः समाजान्तरेण आश्रीयते, तस्य फलमिदमेव सम्पन्नं यत् पुत्रः पितरं तृणाय मन्यते। तथैव अवान्तरविभागपरिपालनत्यागे स्वीकृत साङ्कर्यप्रवर्तकानि बहूनि द्वाराणि भवेयुः। यथा एकर्षिवंश्यत्वेन ब्राह्मणानामनन्तरं द्विजत्वेन त्रैवर्णिकानाम्, ततो वर्णत्वेन ब्राह्मणक्षत्रियविट्शूद्राणाम्, ततः सर्वजातीयानाम्, ततः स्त्रीत्वेन पुरुषत्वेन च समेषां यौनसम्बन्ध इति कल्पने सर्वे स्वतन्त्रा निरङ्कुशा भवेयुः। अत्रापीष्टापत्तौ "काष्ठमिव हि घुणजग्धमविनीतकुमारमभियोगमात्रं भज्येत"। अतो यौनस्य भोजनस्य च नियन्त्रणमभ्यर्हितम्। केचिद् एकपङ्क्तिभोजिनां मिथः कन्यासम्बन्धो भवत्विति व्याचक्षते। तत्रैवं तत्त्वम्—

एकपङ्क्तिभोजनेन कन्यासम्बन्ध उत कन्यासम्बन्धाभावे एकपङ्क्तिविच्छेद इत्यत्र विनिगमनायां कर्तव्यायां एकपङ्क्तिभोजनं विनिगमकं न सम्भवति, यत एकपङ्क्तिभोजनवत्सु पशुपक्ष्यादिषु मिथः शरीरसम्बन्ध आपद्येत। पशवोऽपि समानजाति यौनसम्बन्धार्थं वाञ्छन्ति, साङ्कर्यात् समाजं रक्षन्ति च। मानवस्तु नियमं विस्मरति इति महदाश्चर्यम्। तस्मादिदमेव न्याय्यं यद् यौनसम्बन्धाभावात् पङ्क्तिविच्छेद इति। अतो "यथा कन्या तथा हविः" इति वचनं उक्तकल्पनायां विनिगमनं करोति।

सर्वथा जातिविस्मृतौ मिथः कन्यासम्बन्धे प्रसक्ते अश्वतरादिवद् वैरूप्यप्रसक्तिः सन्तति-विच्छेदापत्तिः सङ्करजातिप्रसक्तिश्चेत्येवंविधदोषेभ्यो रक्षणमवान्तरजातीयविवाह-फलं मन्तव्यम् । अत उदितादितत्वं वंशे कामयमानेन कुलीनत्वादिगुणसम्पत्तये विशुद्ध-वंशरक्षणाय च अवान्तरजातीयमर्यादारक्षणोद्यागः श्लाघनायः । कुलीनत्वरक्षायां "ब्राह्मणोऽन्यो वा कुलपुत्रत्वान्न व्यभिचरति" इत्याद्युक्तं फलमपि स्मर्तव्यम् ।

अन्नसमृद्ध्यभावे परिवारनियोजनम्

नन्वेवमपि प्रजावृद्धिपरिमाणतः अन्नोत्पत्तिर्न्यूनपरिमाणा, तदा परिवार-नियोजनं शास्त्रसम्मतमस्ति, न वेत्याशङ्क्ते, तत्राहुः—शास्त्र ऋतुकालेऽभिगम-मात्रं न विहितम्; अपि तु पूर्वोक्तप्रजाशुद्धिप्रयाजकगुणवत्त्वविशिष्टत्वमपि । यदि तत्सर्वं वंशे समस्ति, तर्हि तथाविधवंशे प्रजाबाहुल्यस्यावसर एव नास्ति । किञ्च, प्रजाबाहुल्य-मभूदिति परिवारनियोजनचिन्तापेक्षया धनधान्यसमृद्धिः चिन्तनीया । तत्रेदमेवोच्यते यद् बालकस्य उत्पत्तेः पूर्वं प्रकृतिर्यथा तत्सङ्गोपनाय दुग्धनिर्माणं चिन्तयति, तेन सह इदमपि अस्मत् कर्तव्यं यत् शोकादिवशाद् गर्भिण्या दुग्धनाशो यथा न भवेत्तथा सा रक्षितव्या इति च । तथैव गोरूपेयं पृथ्वी अन्नावस्थातः पूर्वं वृक्षेषु क्षीरं विसृजत्येव, अस्माभिस्तु सा क्षीरनाशकात् प्रकृतिक्षोभात् रक्षणीया । यदि च सा अस्मासु मातावद् वात्सल्यभावं भजते, क्रोधशोकराहित्यञ्च, तर्हीयं बालकानामदृष्टानुरोधेनान्नं बितरि-ष्यत्येव । साम्प्रतमधर्मप्रचारात् प्रमादाद् अनुचितशासनेन दुःखमनुभवन्ती भूमि-रुद्विग्नमना वर्तते । तद्दोषात् सा रक्ष्यते, तर्हि अन्नसमृद्धिर्भविता ।

अपि च अन्नफलोत्पत्तिः पृथिव्या हर्षानुभाव इति पृथ्वीधर्मसंवादे प्रथमस्कन्धे श्रीमद्भागवत उच्यते । अधर्माभिवृद्ध्या सा न हृष्यति, तता रोमाञ्चाभावः, अतो न समृद्धिः, तदर्थं गेहे गेहे पूजायां घण्टानादः कर्तव्यः । वार्तालापोऽपि शमप्रधानः कर्तव्यो भवति । स-रि-ग-म-पस्वरैः स्वर्यमाणः स्वर आनन्दाधायको भवति वृक्षाणाम् । सति च तस्मिन् पादपाः फलमिषेण रोमाञ्चिता भवन्ति, अन्यथा क्लिश्यन्ति । भारतदेशः पुण्यैः आर्यैरधिष्ठितः पुनरपि शमप्रधानवार्तालापेन संयोजनीयः, शासनेन सञ्चारणीयो भारतीयराजनीतिसिद्धान्तः प्रतिष्ठापनीयश्च, तदैव अस्य देशस्य पूर्ववद् अकृष्टपच्य-सस्यसम्पत्तिमत्त्वं साधितं भवेत् । एवञ्च आर्यमर्यादापालनं धनवृद्धिहेतु स्मर्तव्यम् । अन्यच्च इलेक्ट्रानप्रभृतय असङ्ख्याताः परमाणवः किरणाः परिभ्रमन्तः संयुक्ता अन्नं यथेच्छमुत्पादयितुं समर्था वर्तन्ते; किन्तु तेषां संयोग एव न भवतीति महान् खेदः । अतस्तत्संयोगाय यतनीयम् । तस्य च कृते धर्ममर्यादां विहाय अन्यः पन्था नास्ति । धर्मेण भवति देवगुरुभर्तृप्रसादः, स च न्यायतः परिपालने । न्यायश्च धर्ममर्यादाया अतिक्रमणान्नश्यति ।

धर्मातिक्रमणे केन किं कर्तव्यं को वा न्याय इत्यादि सर्वमसमाहितमेव। यथा गर्भपातः कदाचिद् दुष्टोऽभूत् कदाचित्तु स एवादुष्ट उद्घुष्यते। एकत्र हिन्दूनां सङ्ख्या-ह्रासः चिन्त्यते। अन्यत्र हिन्दूनां गृह एव परिवारनियोजनमपि काम्यते। अतः सर्वं दुर्वचम्। इति सत्त्ववर्धने जनसंख्या मर्यादिता भवेदन्नसमृद्धिश्च स्यादिति।

विघसाशित्वम्

गृहस्थधर्मेषु देवतापित्रतिथिभृत्येषु त्यागो धर्म इत्युक्तम्, तत्र राज्ञा ब्राह्मणादि-भुक्तशिष्टान्नभोजनं विघसाशनात्मकत्वात् कर्तव्यम्। भृत्यैस्तु राजभोजनानन्तरमिति विवेकः। अत्र प्रमाणं २९० पृष्ठे द्रष्टव्यम्।

ननु विघसाशित्वे को लाभः ? इति चेन्मायाजय एवेति स्मर्तव्यम्। देवतायै यजने यत् समर्प्यते, तद्ब्राह्मणेभ्यो दीयते, तर्हि देवता भुञ्जत इति सिद्धान्तितत्वाद् देवतापित्रतिथिगुर्वाद्यर्थं क्रियमाणस्यान्नस्य समर्पणं तेभ्यो दत्त्वैव राज्ञो भोजनं प्रशस्तम्। भृत्यास्तु राजसेवका इति तै राजभोजनानन्तरमेव भोक्तव्यं भवति।

विघसाशित्वविधेः परिसङ्ख्यात्वम्

न च देवतापित्रतिथिभृत्येषु त्याग इत्युक्त्यैव भुक्तशिष्टभोजनलाभसम्भवे पुनः टीकायां विघसाशित्वाभिधानं व्यर्थमिति वाच्यम्, तस्य परिसंख्यापरत्वात्। तथा च देवतापित्रतिथिगुरुभुक्तावशिष्टातिरिक्तस्य अपरेण भुक्तशेषस्य भोजनं राजा न कुर्यात् "पञ्च पञ्चनखा भक्ष्या" इतिवदिति। अन्यत्र विस्तरेणाभिहिता गृहस्थधर्मा भूतरक्षायामिज्यायां च अन्तर्भावयितव्याः। 'गृहिणो भूतरक्षेज्या' इति श्रीमद्भागवत-वचनप्रामाण्यादिति सर्वं सुस्थम्।

ब्रह्मचारिधर्मफलम्

अथ ब्रह्मचर्यधर्मविषयः प्रस्तूयते। गुरौ वासो विद्योपार्जनार्थम्। अग्निकार्यं तेजोबलसम्पादनार्थम्। भैक्ष्यमात्मरक्षार्थम्। ब्रह्म वेदस्तदर्थं चरतीति ब्रह्मचारी। व्रत-चारिता स्वाध्यायाध्ययनेन ओजोभिवृद्धिसत्त्वगुणोत्कर्षप्रतिभोत्पादनार्थम्। त्रिसन्ध्यं स्नानं शान्तरसपरिचयार्थम्। स्वास्थ्यासत्त्वे तु मन्त्रस्नानम्। शौचात् स्वाङ्गजुगुप्सापि फलं बोध्यम्। इदमुपलक्षणं सन्ध्योपासनादिकार्याणाम्। वेदाध्ययनसमये सञ्जातस्य दोषप्रकोपस्य शान्तये 'समेखलो जटी' इत्यादयो नियमा वार्तिके नीतिसारे उक्ताः स्मर्तव्याः।

अग्निकार्यस्योपयोगः

"अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते" इत्युक्तत्वाद् अग्निकार्ये हुताऽऽ-हुतिस्तन्वी भूत्वा ऊर्ध्वं गच्छति, सा सूर्यमण्डले प्रविश्य कतिचित्कालं तत्रेन्धनकार्यं

सम्पाद्य चन्द्रमण्डले, ततः पर्जन्ये, ततो भूमौ तत अन्ने, ततः पुरुषे, ततः स्त्रियां गर्भ-रूपेण परिणमते। तदानीं पावित्र्यात् प्रतिभादयो गुणा अपि नासुलभाः। शेषं 'शान्ति का अग्रदूत'ग्रन्थे व्यक्तम्।

ब्रह्मचर्यव्रतनियमस्य नीतावुपयोगः

ब्रह्मचारिणां व्रतस्य त्रीणि दृष्टफलानि। तेषु ब्रह्मचारिणे तदीयशममाधुर्य-प्रतिभोद्बलेन प्रसन्नैस्संवासिभिर्भिक्षार्पणमित्येकम्। यत एवंविधब्रह्मचारिदौर्लभ्या-वस्थायां तथाविधस्य गृहस्थद्वारा भिक्षाप्रदानाय प्रतीक्षणं बभूव। यदि ब्रह्मचारी विद्यासम्पन्नः परहितकारी वर्तते, तस्य च मुद्रापि तदनुबन्धिनी चात्राधा, तर्हि तथाविधं प्रति राक्षसप्रकृतिं विहाय अन्यः सर्वोऽपि अनुरज्यत इति द्वितीयं फलम्। मित्रसम्पत्ति-मतो लक्ष्मीरपि न दुर्लभा। यद्यपि विद्यालक्ष्म्योर्विरोधो वर्तत इत्युच्यते, तथापि स विरोधो विद्वत्सु लोकसङ्ग्रहाभावे प्रजानुरागप्रयुक्तो बाध्यः। धनमदातिरेकेण धनिनः सकाशाद् विद्या विरज्यति। यदि चोभावपि नीतिमन्तौ, तदा तु न विरोधः। तथा च ब्रह्मचर्यव्रतपरिपालने धनप्राप्तिः, ईशप्रसादश्चेति तृतीयं फलम्। तदुक्तम्—

नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा।
तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा॥ इति।

नैष्ठिकब्रह्मचर्यस्य फलम्

नैष्ठिकब्रह्मचर्यफलं तु वेदो वेदौ वेदाश्वाऽध्येतव्याः। तत्रैव आनन्दानुभूतिश्चेद् नैष्ठिकं ब्रह्मचर्यं सम्पन्नं ज्ञेयम्। मेखलादिधारणे वृष्यत्वम्, बलम्, प्रतिभा, अध्ययन-श्रमप्रयुक्तदोषशान्तिश्च फलम्।

जटित्वमुण्डित्वयोर्व्यवस्थितविकल्पता

उपकुर्वाणकेण मुण्डिना भाव्यम्। नैष्ठिकेन तु जटिलेन वा सम्भवितुं शक्यते, तस्य गृहस्थधर्मे प्रवेशाभावात्। न च क्षौरममङ्गलमुच्यते, न, तस्य प्रथमालङ्कारत्वात्। केशधारणेन दौर्बल्यमुष्णता चेति दोषौ स्मर्तव्यौ, केशानां मलत्वात्। कामसूत्रे भाव-प्रकाशे च प्रमाणं द्रष्टव्यम्। एतेष्वपि गुरुभक्तिर्मुख्या विद्याप्राप्तये साधनत्वेन निर्णीयते।

गुरुभक्त्युपयोगः कलौ अभ्यर्हितः

ननु राजसु तत्स्थानीयेष्वन्येषु वा सत्सु गुरुभक्तिः कथमिवोपयुज्यते? यतो न जानीमस्तदुपयोगम् तज्जन्यकार्यस्य प्रकारान्तरेणापि साधयितुं सुशकत्वादिति चेत्सत्यम्। भक्तिर्हि फलं साधयत्यचिरेण यथा, न तथाऽन्यो योगः। स्फुटीकृतञ्चैत-द्योगसूत्रटीकायाम्। तद्यथा—तपस्स्वाध्यायादिषु क्रियायोगेषु सत्स्वपि ईशभक्तिः पुनः कण्ठरवेणोक्ता, तत्र कारणं शैघ्र्येण क्रियासाफल्यमेव। तच्चेशचिन्तनमात्रेणार्थानां

प्रकाशनमेव। स चेशो न साधारण्येन जनानां दृष्टिगोचरः, अतस्तदधिष्ठितं ज्ञानं यत्र गुरुशरीरे तस्य भक्तेर्माध्यमेन चिन्त्यते। ईशोऽपि तेन नासुलभो भवति। (तदेतत् पृ० ३०० उद्धृतात् वाक्याज्ज्ञेयम्।) वस्तुतस्तु गुरुप्रणिधानं ईशप्रणिधानापेक्षयोत्कृष्टमिति "यस्य देवे परा भक्तिः" इत्यादिना निवेदितमस्ति। अतो दृष्टफलत्वात् सारल्येन शास्त्रप्रसूतज्ञानप्रतिभाप्राप्तये गुरुभक्तिरुपयुज्यते। न चेदृशी गुरुभक्तिः गृहस्थेन प्राप्तुं न शक्येति शङ्क्यम्, गृहस्थस्य विनयशीलस्यापि तद्योग्यत्वात्। सम्पूर्णप्रजारक्षणाय बद्धप्रतिज्ञेन राज्ञा ओजःशौर्यादिगुणसम्पन्नेन गुरुभक्तिपूर्वकं यदि व्यवह्रियते, तर्हि तर्कात्मकसमाधिभाग्भवति स इत्यपि निश्चप्रचमेव।

गुरुस्वरूपम्

वरिवस्यारहस्यादौ गुरुस्वरूपं 'विवेकवृत्त्यवच्छिन्ना चिद्' इति निरूपितम्। सा यत्र शरीरे प्रकटा तच्छरीरमुक्तचितेः शरीरमिति निर्णयन्ति योगिनः। यद्येवंविधं स्वरूपमचिन्तयित्वा गुरुः सेव्यते अथवा न सेव्यते, तर्हि विवेकवृत्तिरेव दुर्लभा। तद्दौर्लभ्ये तु मायाप्रयुक्तं वास्तविकवस्तुस्वरूपादर्शनमपि दुरपनेयमेव।

शास्त्रज्ञानस्येशत्वं गुरुत्वं निर्दुष्टत्वञ्च

पुनरिदं चिन्त्यते—गुरुणापि सा विवेकवृत्तिः शास्त्रत एव प्राप्तुं सुशकाऽभूत्तस्यैव निर्दुष्टत्वादबाधितार्थप्रत्यायकत्वाच्च।

किञ्च, शास्त्रं सम्यक्तया करणीयवर्जनीययोर्विधायकत्वाद् मधुसूदनसरस्वतीप्रभृतिभिर्वेदान्तिभिः "सत्यं ज्ञानम्" इति वाक्यानि प्रमाणीकृत्य निर्दुष्टं याथार्थ्यविषयकं ज्ञानमेव ईश्वरस्य शरीरमिति साधितम्। तच्च यतो विलसितमस्ति, सोऽपि गुरुरीश्वरस्वरूपान्नातिरिच्यते। अतो गुरुः ईशरूपतया अन्तेवासिभिः संसेव्यते। शास्त्रज्ञानस्य निर्दुष्टत्वं प्रमाणत्रयप्रमितार्थबोधकत्वादबाधम्। यस्य गुरुभक्तिर्नास्ति, तस्मै प्रमाणत्रयप्रमितत्वं न रोचते, तथापि यत् सत्यं तत्सत्यमेव। अतः शास्त्रमादिमो गुरुरस्मन्मते। तत्सम्पत्तिः यच्छरीरान्तर्वर्ति कोशे, स कोशो विज्ञानमयः। तस्य श्रद्धा शिरः, ऋतं सत्यञ्च दक्षिणोत्तरपक्षौ योग आत्मा तस्योपेक्षणं स्वदौर्भाग्यमेव। केवलमालस्येन तद्द्वेषेण वा निर्दुष्टस्य शास्त्रस्य विज्ञानमयस्यादेशं स्वीकर्तुं यो न प्रवर्तते, स हस्तगतं मणिं विनाशयति, मनोमयकोशे अभिमानात्मके आत्मानमवस्थाप्य अन्धे तमसि पातयति च। अन्नमयप्राणमयमनोमयकोशानां स्वारस्यं जीवमात्रेण ज्ञायते; किन्तु तमोगुणसत्त्वेन शास्त्रतत्त्वं विवेचयितुं तस्य सामर्थ्यं न भवति। जाड्यमत्रैवोत्पद्यते। नेदं सर्वस्य सुलभं सम्मोह एव आनन्दभानेन निश्चिन्तमवस्थानात्; मोहश्च मनोमये रसमयजीवने भवति। सति च तस्मिन् तमोगुणप्रसक्तिः, अभिमानश्च। तदानीं न शास्त्रार्थं मनुते। तर्कोऽपि न समुदेति। यदि चामुं दोषं मनोमयकोशे स्थितो जीवो तत्त्वेन भयात्, तर्हि

अभिमानं पृष्ठतः कृत्वा विज्ञानार्थं गुरुं सेवेत, गुरुश्च सेव्यः। तदेतद् भारतीयनीत्या साधितं 'सुनिपुणमुपसेव्य सद्गुरुम्' इत्यादिना। गुरुश्च शनैः शनैर्दोषं प्रकाश्य शिष्यमभिमानशून्यं करोति, ततो बोधयति, तर्कस्योदयाय प्रवर्तयति च। अतो विवेकवृत्त्यवच्छिन्नचिद्विशिष्टो गुरुः शास्त्रमादिममिति सिद्धम्।

गुरोः सौलभ्यम्

अत्रेदमवधेयम्—वर्तमानसमये तथाविधो गुरुर्नास्ति दौर्लभ्यात्, तथाविधस्य गुरोरभावात्। तत्रेदं चिन्त्यते—गुरोरभावो नास्ति इत्यस्यार्थो तद्दर्शनं न भवति, अथवा शिष्येषु दोषबलात् तथादृष्टिर्गुरौ नास्ति, दोषश्च शङ्कात्मक इति वा। तत्र शास्त्रस्य गुरोः सत्त्वाद् गुरुर्नास्ति इति न; किन्तु शास्त्रनिष्णतता एव शास्त्रं शङ्कन्ते, अविश्वासमुत्पादयन्ति। ज्ञानप्रभायामानन्दप्रभामिश्रणं नास्ति तेषु। मुखे मालिन्यं वर्तते। विपरीतमुपदिशन्ति पुत्रान्, विपरीतमनुतिष्ठन्ति च। एतैर्दोषैराच्छादनात् शिष्येषु दुष्टतेति गुरुदर्शनं नास्ति। शास्त्रं च गुरुतत्त्वमधुनाप्यस्त्येव। तत्र समुदितानां शङ्कानां निरसनमान्वीक्षिक्या कर्तव्यम्। तदर्थं पण्डितसङ्गतिरपेक्ष्यते। तदभावादेव शास्त्रं कार्यकारि न भवति। अतोऽपि विद्याप्रतिष्ठया गुरुदौर्लभ्यं व्यपगतं भवेत्।

अपि च अधुनापि विद्वांसो विवेकवृत्त्यवच्छिन्नचिद्विशिष्टा न सन्तीति न; अपि तु तथाविधानां तेजः अभिभूतमिवास्ते। एतद् दोषनिरसनाय पण्डितसङ्गतिः परीक्षास्थापना चोपायत्वेन निर्दिष्टा, सा धर्मविजयनाटकोक्तदिशाऽभ्यूहनीया। यद्येतत् सम्भाव्यते, तर्हि दुर्लभतां गतं गुरुतत्वं सुलभं भविता। सति च सौलभ्ये प्रमाणत्रयमाधारीकृत्य राजनीतिमादृत्य विद्यानां स्वरूपं प्रकाशितं चेत् समाजस्य हितं भवेत्। सामाजिकहितदर्शनमुपेक्ष्य कृतं कार्यं न समेषां रुचिकरं भवति। हितप्रदर्शनमुखेन विद्यातत्त्वप्रकाशने तु न कस्यापि विरोधः। केचन बहुमतं शास्त्रमादाय फलं साधयितुं वाञ्छन्ति। सन्तु कामं तथा। यदबाधितं प्रमाणत्रयप्रमितं तत्तथैवेत्यत्र तु न वादः।

शास्त्रेषु सामाजिकमनसामाकर्षणायोपायः

वर्तमानसमये लोकमतं शास्त्रेषु नास्ति, तथापि शास्त्रविदामिदं कर्तव्यं यल्लोकस्य आकाङ्क्षामालोच्य तदनुवर्त्तनं शास्त्रेषु यथा भवेत्, तथा प्रदर्शनीयम्। साकाङ्क्षता च समाजे अधिकारिवर्गभेदेन भिन्ना वर्तते। सा चाष्टविधा कामुकविदग्धश्रेष्ठिविरागिशूर-ज्ञानवयोवृद्धरसिकबालमूर्खाविलाभेदात्। अतस्तेषां सन्तोषाय शास्त्रीयं वस्तु विद्वद्भिर्नटैः नाटकेषु तथाऽभिनेतव्यं स्यात्, यथा सामाजिकानामष्टविधानामपि मनोरथपूर्तिः स्फुटा स्यात्। अभिनयश्च शृङ्गारादिरसाद्यन्यतमप्रधानो भवति। तत्रापि विशेषतया शास्त्रीयं तत्त्वमद्भुतरसेनाभिनेतव्यं भवति। यतो हि शृङ्गारवीरशान्तरौद्रान्विहाय अवशिष्टरसेषु बहुसङ्ख्याकाः पुरुषाः समाजे विचरन्ति,

तेष्वेव गुरुशास्त्रभक्तिः सङ्क्रामणीया वर्तते। तदर्थञ्च विद्वद्भिरद्भुतरस उपाय आश्रयणीयः, यतस्तद् व्यभिचारिभावेषु तर्को मतिर्मदश्च वर्तते। तैरेव करुणभयबीभत्सरसमया वशीकर्तुं शक्यन्ते। करुणे तर्कस्य, भयानके मदस्य, बीभत्से मतेः समुल्लासात्। अद्भुते ध्यानसत्त्वात् तद्बलेन शास्त्रे भक्तिः मनसामाकर्षणं च सम्भवेत्। अतस्तर्कादिव्यभिचारिभावमुखेन विवेकवृत्त्यवच्छिन्नचिद्रूपशास्त्रप्रचारार्थं गुरुणा आत्मनि अद्भुतरसस्याविर्भावो यथा भवेत्, तथा यतनीयम्। एतत्कार्यार्थं युक्तयुञ्जानभेदेन विभिन्नैः वीराद्भुतरससम्पन्नैः गुरुभिर्भाव्यम्। नेयेषु शिष्येषु बीभत्सादिप्रकृतिर्जन्मत एव वर्तते, तदर्थं प्रयासोऽनपेक्षित इति उपर्युक्तः क्रमो नासम्भवीति दिक्।

समस्तशास्त्रचिन्तनम्

नन्वेवं शास्त्रमनन्तं तस्य चिन्तनं सर्वैर्दुरूहमिति चेत्तदपि न। अद्भुतरसो हि वीरेण सत्यशौर्यत्यागाविस्मयाविसंवादित्वगुणसंयुतेन साधनीयः। वीरो हि यदभ्यूहति, तदार्षमेव भवति, तस्य अनूचानत्वात्। अतस्तेनाभ्यूहितः प्रयोगविधिरपि शास्त्रसम्मत एव। न ह्यत्रानौचित्यं सम्भाव्यते। तदिदं सावधानतया कृतं नासुलभम्। तेनानुष्ठितं च हितं व्यपदिश्यते। तथाविधो विद्वान् धर्मविजयनाटकोक्तदिशा मान्यो भवति, तथाविधस्य मनुना मान्यस्थानत्वनिर्देशनात्। यद्यपि बहुलैर्मूर्खैः विद्यावन्तोऽवमन्यन्ते, तथापि विद्याविद्भिर्यो मान्यः, स सर्वमान्य इति निर्णीतमेव। तदेतत् परीक्षित्सभायां शुकागमनचरित्रेण स्पष्टम्। यो महाजनपरिगृहीतः, स सर्वेषां मान्या भवतीति वेदप्रामाण्यसाधनावसरे भाष्यादौ च निरूपितमस्ति।

विद्वदसौलभ्यकारणम्

न च परम्परायामेवंविधं गुरुतत्त्वमसुलभं कुतोऽभूदिति शङ्क्यम्, वृत्तिव्यवस्थाविलोपाद् विद्यावतामवमाननाच्च। सर्वाऽपि वर्षाशनव्यवस्था अर्थशास्त्रेणानुमोदिता मानसादौ उक्ता विलुप्ता। यत्र साऽऽसीत्, तत्र दण्डव्यवस्था नाभूत्। स च दण्डो विद्याभिरूप्याभावे तद्वंश्यस्य वृत्तिव्यवस्थाविलोप उक्तः। तद्भावाद् विद्यावंशे प्रमादोऽभूत्। राजसम्माननं विद्यावतामासीत्, तत्पुनः प्रवर्तनीयम्। असूयां विहाय ज्ञानिभिरपि विद्वांसो मन्तव्याः। तदभावेन विद्यावतामसौ लभ्यमभूत्। तदुक्तं समर्थैः—'ब्राह्मण बुद्धि पासूनि चेविले गुरुत्व साण्डूनि गेले'। "ब्राह्मणत्वस्य रक्षणेन रक्षितः स्याद् वैदिको धर्मः" इत्यप्युक्तं आचार्यैरिति।

तस्माद् विदुषां विद्यावदुपेक्षणं राजसञ्चालितवर्षाशनव्यवस्थाविलोपनं दण्डाप्रणयनञ्च विद्वद्विलापे कारणम्। पुत्रस्थानीयेषु शिष्येषु विद्यातत्त्वं यावन्न सङ्क्रम्यते, तावल्लोकविश्वास्यत्वं विद्वत्सु न सम्भवेदिति गुरुभिः "आवहन्ती वितन्वाना" इत्यादि·

मन्त्रा जप्तव्याः। "आमायन्तु ब्रह्मचारिणः स्वाहा" इत्यादिमन्त्रा अपि स्मर्तव्याः। अस्य निर्गलितार्थः श्रीभगवत्पूज्यपादैः प्रदर्शितः प्रश्नोत्तर्याम्—

वित्त त्यागसमेतं ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
दानं प्रियवाक्सहितं एतच्चतुर्विधं भद्रम्॥ इति।

वानप्रस्थस्योपयुक्तता

अथ वानप्रस्थविषयः प्रस्तूयते—नन्वेवं वानप्रस्थस्य नीतौ क उपयोगः ? इति चेत्, तपोऽन्वीक्षे एवेति ब्रूमः। योऽपि वानप्रस्थधर्मो विहितः, स सर्वोऽपि तपोऽन्वीक्षार्थमेव। तपः अनशनम्। अन्वीक्षा च तर्कप्रवाहः समाधिः। तपोऽन्वीक्षोद्देश्येन वानप्रस्थो वने निवसति, लोककूटे 'कार्बनडाइआक्साइड' दोषस्योत्पत्तेः। वने देवतानां सान्निध्यमपि तेषां कृते नासुलभम्, तीर्थयात्रावसरे देवैर्वने निवासकरणात्, सत्त्वगुणोद्बोधनाच्च। लोके निवासे चाञ्चल्याद् एकाग्रताया अभावेन अन्वीक्षानुदयाच्च वने वानप्रस्था वसन्ति। भगवत्पूज्यपादैरपि 'तरुतलवासः' सत्त्वोदयार्थं उक्तः। वानप्रस्थस्य ब्रह्मचर्यं पत्नीसत्त्वेऽपि धर्मशास्त्रेण पुत्रोत्पादननिषेधात्। वानप्रस्थस्य भूमिशय्या वातदोषापहारिणी भवति, अजिनस्योपयोगः पुरश्चर्यार्णवे व्यक्तः। वानप्रस्थेन अन्यानिरपेक्षेण प्रतिग्रहान्निवर्तनीयम्।

ननु कलिवर्ज्योऽपि वानप्रस्थः कौटिल्येन कथं विहितः ? इति चेत्, न, सुराग्रहस्य कलिवर्ज्यत्वेऽपि सौत्रामणियागो विहित एव। तथैव तपोऽन्वीक्षोपयुक्तं वानप्रस्थकर्म सौत्रामण्युपयुक्तसुराग्रह इव वानप्रस्थैः संसेव्यमिति भावः।

संन्यासविधौ अनारम्भः

अथ संन्यासतत्त्वमभिधीयते—गृहस्थेन चरित्रं स्थाप्यते। तस्याभिनेयौ आस्वादार्हौ शृङ्गारवीरौ। तदनुगुणं चरितमेवाभिनेतव्यं भवति गृहस्थेन। स एव चरित्रस्यारम्भ औत्सुक्यं भवति। तदेव बीजम् उक्त आरम्भो वा उच्यते नाट्ये। ततो यत्नप्राप्त्याशा नियताप्तिफलागमा भवन्ति। तथा सत्येव त्रिवर्गफलतदुपाययोर्बोधकं नाटकं पूर्णं भवति। तेषामेव छेदः मुखप्रतिमुखगर्भविमर्शोपसंहृतिरूपसन्धीन् विभिद्य नाट्ये व्यक्तः। तदेतत् सर्वं गृहस्थाश्रमकृते शोभनम्, न संन्यासे। तत्र तु आरम्भादीनां परित्यागो विधिपूर्वकं कर्तव्यो भवति, चात्वाले कण्डूयनार्थं स्वीकृतशृङ्गपरित्याग इव। तदेतदालोच्य संन्यासे अनारम्भो विहितः। तथैवात्राश्रमेऽस्मिन् शोकादिवृत्त्यभावादपि अनारम्भो भवति। अनारम्भ अनुत्साहः।

नीत्या संन्यासेऽपि शौचं विहितम्, तेनेदं ज्ञायते यत् सर्वेषां सामान्यधर्मेषु शौचस्य परैरसंसर्गस्य स्वाङ्गजुगुप्सोपधायकस्य विधानात् तस्य च वेदेनैव ज्ञायमानत्वात् सर्वापि भारतीयराजनीतिर्धर्मप्रधानैव स्मर्तव्या।

संन्यासधर्मस्य विशेषता

"भिक्षोर्धर्मः शमोऽहिंसा" इति वचनात् लौकिके इष्टसाधने सर्वत्राहितं बुद्ध्वा ततो निवृत्तौ सुखभानं चेत्, शमो भवति, स च संन्यासिषु वर्तते। सोऽयं द्रुतगामी भवति, सत्त्वबाहुल्येन शरीरलाघवात्। अयं निर्विकारी सूक्ष्मेक्षिकया प्रजायां सम्भवन्तं दोषं निरसितुं यथापराधं दण्डव्यवस्थां विदधाति, शौचादिमहाव्रतसम्पन्नस्यैव तथाविध-कार्यानुष्ठाने सामर्थ्यात्। अत एव अध्यात्मविन्न्यायनिर्णयार्थं सदस्यत्वेन व्रियते धर्मा-गनादिषु। सभासदस्यानामध्यात्मविदां तत्त्वमिदमेव यत् सर्वत्र स्वीयत्वदर्शनम्। यथा शरीराधिष्ठितो जीवो न कमपि अवयवं पक्षपातेन रञ्जयति विरज्यति वा, तथैवायं समाजे संन्यासी समस्ति। तदपेक्षयापि यदा विराट्पुरुषः सन् जगदात्मत्वेन पश्यति, तदा तस्य मध्यमत्वमुदासीनत्वमपि व्यपगतं भवति, तदुक्तम्—

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥ इति।

अन्यच्च अयमेकाग्रो योगी राजनीत्या प्राधान्येन समाद्रियते। यतो नीत्यनुष्ठाने प्रतिक्षणं प्रयोगा विभिद्यन्ते, तेषु कतमः प्रयोगः कदा अनुष्ठेय इति नीतिशास्त्रेण निर्णेतव्यं भवति। यस्मादिदं प्रयोगशास्त्रम्, तथैव प्रयोगपरिवर्तनमपि अपच्छेदन्यायेनैव कर्तव्यं भवति। इदमेव विद्वत्त्वम्। तत्तु लोकेन साधारणेन न सम्पादयितुं शक्यते। यतो हि प्रयोगपरिवर्तने निर्णेतव्ये निर्मिताद्यपि सूक्ष्मतया विवेचनीयं भवति, कुशलवैद्येनेव निमित्तभेदेन त्रिदोषप्रकोपे। अत अध्यात्मविद् नीतिप्रयोगपरामर्शे प्रयोगपरिवर्तनादि विधातुमधिकृतः।

किञ्च, राजनीतावभ्यर्हितानां सामाद्युपायानां प्रयोगस्य फलानुबन्धिनः कुशल-ताया सम्पादनमध्यात्मविदैव साध्यमिति ध्यात्वा सोऽत्र विहितः। यद्यपि शमप्रधानाना-मध्यात्मविदां सुखं लौकिकैर्नानुभूयते, तथापि विद्याशमसन्तोषनिमित्तं तैरनुभूतं सुखम-लौकिकं अलीकं वा न मन्तव्यम्।

राज्ञोऽन्योऽध्यात्मविद्

ननु न्यायप्रदानार्थं राजा स्वतन्त्रो निर्णायकोऽस्ति, भारतीयनीतिमतेन तत् कथं सङ्गच्छत इति चेत्, न, राजा विजिगीषुरपि वर्तत इति कृत्वा मन्त्रनिर्णयाय अध्यात्म-वित् शमप्रधानो विद्याशमसन्तोषनिमित्तकसुखस्यानुभविता य आत्मानं नीत्यै अर्पयेत्, स संन्यासी विवक्षितः; स राज्ञोऽन्या विहितः। किञ्च, संन्यासे सति सर्वविद्याशक्ति-सम्पादनमपि अस्य धर्मस्य विशेषस्तस्मात् स्मर्तव्यः। तत्स्मारितं मम्मटेन "नियतिकृत-नियमरहिताम्" इत्यादिना।

यद्यप्यस्मिन् पद्ये कार्योदयो नोक्तस्तथापि 'भारती जयति' इति शब्देन स एव धर्मः स्मर्तव्यः। भारती च सङ्कल्पो नादः अध्यात्मवित्सु विद्युदेव, यतः स लोह-चुम्बकवद् विद्युत्वद्वा आकर्षणादिकर्म करोति। विद्युति चुम्बके वा जडत्वं भवति, सङ्कल्पे तु चेतनत्वमिति वैधर्म्यं तयोर्ज्ञेयम्। सङ्कल्पनिष्ठमिदं तत्त्वं तेजोरूपं योगवासिष्ठे-नापि सिद्धं भवति। तद् विद्युत्कार्यसाधर्म्याद् विद्युतो नातिरिक्तम्। विद्युता जडया निर्जीवानां मण्डूकानां नेत्रेषु उन्मीलननिमीलने सम्पाद्येते, दन्तिकाकचस्पर्शेन रोमाञ्चो-त्पत्तिर्दृष्टा, तदेव सामर्थ्यमध्यात्मवित्सङ्कल्पेऽस्ति। एवमेव नटानां शरीरे रोमाञ्चादयो विद्युत्सञ्चारमहिम्नैव इत्याद्युपपत्तिः सङ्गीतरत्नाकरोक्ता स्मर्तव्या। एतत्त्रितय-साधारण्येन कार्यकारणभाव एक एव विवेचयितव्यः। सेयं सङ्कल्पशक्तिरुपासक-शरीरान्तःस्थितं वायुं प्रेरयित्वा वह्निज्वालामुत्पाद्य शरीरे उष्णतां समुत्पादयन्ती नादात्मना परिणमति। सा उपासकैः प्रणवरूपेण उपास्यते, तस्य नादस्य उपास्यस्य प्रणवस्य च बहुदूरं व्याप्तिरस्तीति शारदातिलकादावुक्त रेडियोद्वारा प्रत्यक्षीक्रियते। एवंरीत्या शमप्रधानस्य संन्यासस्य महानुपयोगः सिद्धो राज्यसंरक्षणे न्यायनिर्णये च।

वानप्रस्थसंन्यासयोरन्तरम्

वानप्रस्थेनान्वीक्षायां कर्तव्यायां शमप्रधानेन भाव्यम्। संन्यासिनाऽपि अन्वीक्षा कर्तव्यैव। तयोरिदमन्तरं यद् वानप्रस्थे ओजो वर्तते, अतस्तेन आन्वीक्षिकी प्रधानत्वेना-नुगन्तव्या भवति। तत्र चित्तद्रुतिर्नास्ति, अत एव न माधुर्यमपि। संन्यासे शमप्रधाने तु ओजो नास्ति, माधुर्यमेवास्ते। तेन निर्मितेन काव्येन चरितेन नाट्येन वा सामाजि-कानां चेतसि द्रवीभाव उत्पत्तुमर्हति। तेन महतो जनसमूहस्य शृङ्गाररसिकस्याकर्षणं सम्भवति। अत एव सर्वरसानुभवानन्तरं शमप्रधानस्य माधुर्यस्यास्वादे जीवो विश्रा-म्यतीति शान्तरसप्रकरणे भावप्रकाशने व्यक्तम्। इति हृदयम्।

संन्यासधर्माणामनुगमेनोक्तिः

अत्रेदमवधेयम्—अपरिग्रहः संन्यासिना कर्तव्यो भवति, तस्य वैराग्याधिकारि-त्वात्। जीवनं तु "तस्य चीराणि किं पथि न सन्ति" (पृ० ३१८) इति श्रीमद्भागवत-निरुक्त्या दैवं सञ्चालयति। अतः स प्रतिग्रहं त्यजति विधिवदिति अपरिग्रहस्य निष्किञ्चनतायामन्तर्भावः। अहिंसा साधारणधर्मान्तर्गतेति न तस्या उपन्यासः। समता मिथ्यात्वनिश्चयाभावः। प्रियाविकारितायां सा धृतौ संगृह्यते। सत्यां च तस्यां हर्षशोकयोरभावेन सङ्गत्यागान्नातिरिच्यते समता। व्रतचारिता ब्रह्मचर्या। जितेन्द्रियत्वमेव मौनम्। एवं समाहारधारणाध्यानान्यपि।

मनसो निग्रहे धारणाध्यानविमर्शः

अथ जितेन्द्रियता मनसो वशीकार एव सम्भवति, स च धारणैव; परन्तु मनसो अणुरूपत्वेन प्रत्यक्षायोग्यत्वेन च तद्धारणं कथं सम्भाव्यत इति चेत्, न, वायुर्मनसः

सहचरितो भवति। वायुश्च रक्तवहनाड्या प्रवहति। यतो हि आयुर्वेदज्ञा शिरावेधे कृते रक्तस्रावे बुद्बुदान् दृष्ट्वा वायुप्रवाहमनुमिन्वते। अतो वायुप्रवहनाड्यो शारीरकविज्ञानद्वारा परिचेयाः प्रत्यक्षगोचरा यदि नियम्यन्ते, तर्हि वायोर्नियमनाद् मनसोऽपि एकत्र देशेऽवस्थापनं नाशक्यम्। तदेव धारणा भवति। तदुक्तं देशबन्धश्चित्त-धारणेति। तन्नियमनप्रकारश्चेत्थम्—विषयविशेषकामुकस्तद्विषयोत्कटेच्छामवलम्ब्य विजातीयप्रतिबन्धकमपसार्य स्वस्वजातीयविषयं चिन्तयति ध्यायति च। तेन चिन्ता-विषयो मानसमूर्तिरूपतां प्राप्नोति। अतः सा प्रत्यक्षविषयो भवति। तन्नियमनाद् ध्येया मूर्तिर्यदि वायुना संसक्ता प्रत्यक्षेण विषयीक्रियते, तर्हि मूर्तिसंसर्गाद् वायुरपि प्रत्यक्षगोचरो भवितुमर्हति, धूलिकणेन वायोरपि चक्षुषा अलौकिकसन्निकर्षेण दृश्य-त्ववत्। एवञ्च मूर्तीनां ध्याने स्थैर्ये वायोरपि स्थैर्यं स्यादेव। मूर्तयश्च मधुरसाप्लुता भाव्याः। एवंरीत्या वायोर्नियमने अभ्यस्तो योगी तन्त्रोक्तदिशा उदानवायुमपि स्वेच्छया सुषुम्नया नाड्या ध्यानेन प्रतिलोमगत्या संचारयितुं प्रयतते, तर्हि तत्सिद्धौ उदर्यमग्निं स वायुः ब्रह्मरन्ध्रं ज्वालामुखेन प्रापयति इति दृष्टम्। तदानीं योगी नादं ज्वालायाः शृणोति, स एव कुण्डलीनामम्बिकेत्यादिनाम्ना व्यपदिश्यत इति प्रागुक्तम्। उक्तरीत्या मनः सहचरितं प्राणवायुं नियमयितुं तीव्रा इच्छाशक्तिः समर्थेति तां 'विल्पावर' शब्देन व्यपदिशन्ति आधुनिकाः। यदि वृद्धानां जीवनरक्षा वर्तते, तर्हि तैरिदं चिन्तनीयं तत्त्वम्। प्राणधारणाख्योऽयं व्यापारः प्रयत्नपूर्वको यावद् भवति, तावत्पर्यन्तं धारणाख्यो भवति। तत्प्रयुक्तमदृष्टमुत्पन्नं कार्यं स्वयं करोति, तदा ध्यानं भवति। तत्प्रवाहो समाधिरुच्यते। ध्येयमूर्तिभेदेन ता योगसिद्धान्तचन्द्रिकायां स्तम्भ-न्यादिनाम्ना व्यवहृताः स्मर्तव्याः। धारणाध्यानाभ्यां पृथक् सर्वेन्द्रियसमाहारोऽपि नीतिसार उक्तः, तस्य प्रयोजनमनुपेक्षैव। विषयेषु इन्द्रियप्रवृत्तौ सत्यां तत्संयोगो भवति। स अनिष्टत्वात् सर्वथा न कर्तव्य इति भावः। अयमेव असम्प्रयोगोऽन्तर्मुखपरिणामः प्रत्याहारः, तत्रापि कारणं प्रागुक्ता धारणैव स्मर्तव्या। हर्षजनकमधुररसमूर्तिमुपेक्ष्य रसाधानकर्मणि सङ्कल्पात्मिकां शक्तिं परिधुन्वन् किमपि न साधयितुं सुशक्तः। अतो वैराग्यमपेक्ष्यते। तदभावे ओजसोऽभाव एवेत्यलं विस्तरेण।

नाडीपरिचये नीतिप्रवृत्तिः

ननु सत्यप्येवं विद्यावन्तः कथमिवोदासीना नीतिमार्गादिति चेत्, विद्यावता-मप्रवृत्तिः कृतिसाध्यत्वादि निर्णयाभावादिति मन्तव्यम्। अत एव ज्ञानप्रभायां क्रिया-प्रभामिश्रणाभावेन सङ्कल्पशक्तिरपि तिरोहिता वर्तते। अत्र मूलं शरीरापरिच्छेद इति नाडीस्वरूपं तैश्चिन्तनीयं स्यात्। तथाहि मस्तिष्केण सह रसननासिकादीन्द्रियैः सह संयुक्ता अनेकाः शिराः संलग्नाः सन्ति। तासु काश्चिज्ज्ञानसंवाहिकाः, काश्चित् क्रियावाहिकाः, काश्चिद् उभयप्रापिकाः। एतासां प्रत्यक्षं छिन्न एव शरीरे वर्तते।

तत्संख्याक्रमोऽपि प्रत्यक्षशारीरके गणनाथसेनेन विस्तरेणोपवर्णितः। विद्वांसः प्रायः चेष्टाज्ञानोभयसम्पादिकाभिः शिराभिः सह परिचिताः। तत्र ज्ञानवहशिरासु क्रियाया अभावः। अपरत्र ज्ञानाभाव इति न साफल्यम्। अत उभयसम्पादकनाडीषु परिचय आवश्यको वर्तते। अपरे तु बुद्धिमत्वं कृतिमत्वं च दैवाधीनं मन्यन्ते। तन्न सम्यक्। यथा सीतायां हलप्रकर्षणप्रयुक्ता रेखाः सम्भवन्ति, तथा मस्तिष्के गर्ताः रेखाद्वारा कारयितव्यः। तदर्थं यत्नो विधीयते, तर्हि बुद्धिमत्त्वं भवति, सति च तस्मिन् बलवर्णस्मृतिवाक्प्रवृत्तयोऽपि सुशकाः। तदर्थमुदानवायोरूर्ध्वमुच्छलनमपेक्षितं तस्य क्रमो निर्दिष्ट एव। तदर्थं चान्वीक्षिकीप्रयुक्तो विवेकोऽभ्यसनीयो यथा भवेत्, तथा प्रयत्न आवश्यकः। एतन्मते सुषुम्नामार्गेणोदानवायोरुच्छलनमेव विवेकः। यदि गुरुः ज्ञानक्रियोभयसम्पादकनाडीस्पन्दनपुरःसरं शिष्यमुपदिशति, तर्हि शिष्यः स्वोद्दिष्टार्थप्राप्तये कृतिसाध्यत्वमिष्टसाधनत्वं ज्ञात्वा पूर्वनिर्दिष्टं सङ्कल्पं साधयितुं शक्नुयादित्यलमतिविस्तरेण।

अन्विताभिधानादिविवेकः

ज्ञानक्रियाप्रापकनाडीनां भेदो यथा दृष्टिगोचरः, तथा अन्विताभिधानादिभेदोऽपि बोधवैजात्यं शास्त्रेषूपवर्णितं व्यावहारिकमिति प्रसङ्गाद् विमृश्यते। ध्यानेन नियन्त्रितेन उदानवायुना सह उदर्योऽग्निः ऊर्ध्वमुत्तिष्ठन् ब्रह्मरन्ध्रं प्राप्तो नादरूपतां गतो ज्ञानपदव्यपदेश्यो योगिभिः श्रूयते। संसारिभिस्तु अव्यक्ततयाऽवगतः मध्यमास्थितः क्रमेण यदा वैखर्यावस्थां प्राप्नोति, तदा श्रूयत इत्याकरे प्रपञ्चितम्। मध्यमायां स्थिताः सर्वेऽपि पदार्थाः सूक्ष्मरूपेण बीज इव नानुव्यवसायार्हाः। अनुव्यवसायाभेदश्चेन्द्रियादिकारणकलापभेदेन नादभेदाद् अनुव्यवसायेऽपि वैजात्यमनुभूयते, यथेन्द्रियसंनिकर्षः प्रत्यक्षे हेतुर्ज्ञानेन अनुमितिः।

पश्यतः श्वेतिमादाय ह्रेषाशब्दं च शृण्वतः।
खुरविक्षेपशब्दाच्च श्वेतोऽश्वो धावतीति धीः॥

इत्यनुभवसिद्धत्वात् स्वस्वस्थाने स्थिता अपि पदार्थाः पारस्परिकाकांक्षावशात् तदीयसम्बन्धबोधकानां कारणपदं विनापि अश्वविषयकं बोधमश्वद्रष्टृसु उत्पादयन्ति। तथा पदान्यपि इति बोधवैजात्यं सिद्धम्। अत एव नञ्घटितवाक्येभ्यो निरवच्छिन्नविशेष्यताको बोधश्च तथात्वादेव विजातीयत्वं जगदीशादिभिः साधितम्। एतदनुभूयेव कालिदासेनापि विद्वत्सन्तोषोऽपि स्वतन्त्रतया स्वकृतौ प्रामाण्यसाधक उक्त इति गुरूपदेशं विना प्रत्यक्षादिनाऽवगतोऽप्यर्थोऽप्रामाण्यकबलतामुपेत्येवेति कविभिरुक्तं साधीयः। तच्च 'चित्रकूट के घाट पर' इत्यादिषु अनुभूतम्। अतः शाब्दबोधस्य विजातीयत्वमनुभवसिद्धम्। अत्रेदमवधेयं यद् बोधविषयेषु प्रतिभातः सम्बन्ध आकांक्षाभाष्यः, क्वचित्परम्परात्मको यथा घटदण्डयोः कार्यकारणभावघटकः

स्वजन्यभ्रमिजन्यभ्रमिमत्ता, क्वचित्तु समवायतादात्म्यादिः, आकांक्षाभास्यत्वात्। अतोऽन्वयबोधो विजातीय इति मन्यन्ते कोविदाः।

विशिष्टो बोधः विशिष्टवैशिष्ट्यमर्यादां नातिशेते, इत्यपि विशिष्टबोधे वैशिष्ट्यस्य प्रतियोगी तस्यावच्छेदकं किमिति जिज्ञासायां ते ते आचार्या अधिकारिभेदेन पृथक् पृथग्वर्णयन्ति। तद्यथा प्राभाकराः शब्दश्रवणानन्तरं कार्यान्वितमर्थमनुभवन्ति। भाट्टा अन्वितम्। नैयायिका अनन्वितमिति। तदनुभववैजात्ये तेषां तेषामाचार्याणामनुभव एव बीजं मन्तव्यम्। एतत्साहित्यप्रक्रियया स्फुटीक्रियते। एतत्प्रक्रियायां शाब्दबोधो मतिभावस्य अन्तर्गतेन चित्तसन्तोषेन व्यज्यते अभिनयादौ। तत्राप्येक एव वाक्यं श्रुत्वा सर्वेषां सन्तोषः समान इति न बालकानां पण्डितानां बोधवैचित्र्यदर्शनात्। तथा हि बालका वाक्यार्थमजानानाः प्रयोजकप्रयोज्यवृद्धव्यवहारं दृष्ट्वा क्रियया आवापोद्वापाभ्यां घटादिपदानां शक्तिं कार्यान्वितेऽर्थे जानन्तस्तत्रैव सन्तुष्यन्ति। तमिमं बालकानां सन्तोषं परिलक्ष्य धर्मे प्रवर्तकत्व वेदस्यास्तीत्यनुसन्धाय च प्राभाकराः कार्यान्विते शक्तिं प्राहुः।

भाट्टादयस्तु प्रयोजकप्रयोज्यवृद्धव्यवहारमन्तरापि नाट्यादौ वेषविशेषेण रामकृष्णाद्यर्थमनुभवन्ति। तन्महिम्ना विशेषेण सह पदार्थस्यानुभवः साधारणेन जात इति अन्वितानुभवं गदन्ति भाट्टाः। नैयायिकादयस्तु अत्रैवमभिदधति -सामाजिकसुखमालोच्य अभिनेतारोऽपि तदीयहर्षादिव्यापारमात्रेण सुखमभिव्यञ्जयन्ति। इत्यलं सङ्कल्पे कृतिसाध्यत्वविचारप्रसक्त्या।

भावशुद्धेरुपयुक्तता

धर्मनिरूपणप्रसङ्गाद् भावशुद्धेरुपयुक्तताया नीतौ क उपयोग इति चेत्, भावसंशुद्ध्या भुक्तस्य पाचनार्थं नियुक्तानां शारीरयन्त्राणां सुचारुत्वसम्पादनम्। संशुद्ध्यभावे कामपरतन्त्रो जीवो न्यूनतामनुभवन् न हृष्येत, ततो विषीदेत्, ततो मन्दाग्निः, ततः पाचनमनुपपन्नम्। नीत्यवलम्बने तु भावसंशुद्धौ नायं दोषः पदमादधाति। सोऽयं विशेषो धर्मनिरूपणावसरे विस्तरेण प्रपञ्चितः। अत एव रागद्वेषयोः क्लेश अन्तर्भावो योगसूत्रेणोक्त उपपन्नो भवति। इति हृदयम्। एवञ्च स्वधर्मो नीतिशास्त्रोक्तनीत्यात्मको भवति। स च समस्तविद्यास्थाननिर्णीतो ग्राह्यः। सोऽयं धर्मोऽनुष्ठातारं स्वर्गं प्रापयति। तदभिलाषाभावे मोक्षमानन्दम्। स्वर्गश्च "यन्न दुःखेन सम्भिन्नम्" इति लक्षणलक्षितो बोध्यः।

धर्मनीत्योरन्तरम्

धर्मो वेदबोधितेष्टसाधनताकः। नीतिस्तु प्रमाणत्रयनिर्णीतेष्टसाधनताका। तेन नीत्यतिरिक्ते अदृष्टमात्रसाधनभूते धर्मे चार्वाकादयः सन्दिग्धा भवन्तु कामम्।

नीतौ तु न तथा, तत्र प्रत्यक्षप्रमाणप्रमितत्वनिवेशात्। आस्तिका अपि शब्दप्रमाण-सन्निवेशाद् असन्दिग्धं तत्र प्रवर्तितुमर्हाः। अत एव वाग्भटादिभिः आयुर्वेदे प्रत्यक्षानुमान-प्रमितत्वाद् धर्म्यमपि संस्कारमुल्लिलिख्युः कर्तव्यत्वेन। तदेतद्भेदमालोच्यैव नीते-र्लक्ष्मीस्वरूपत्वं नारायणस्य धर्मत्वमुक्तं शास्त्रेषु। इत्थञ्च ब्राह्मण-ब्रह्मचारिवद्धर्म-नीत्योः व्याप्यव्यापकत्वे बोद्धव्ये। जैन बौद्धादिभिरपि इदं नीतिस्वरूपं स्वास्थ्याय कामितं तत्र टीकायाम्। आधुनिकविद्वद्भिः रामचरितमानसेऽस्य समादरः कृत एव। न चैव-मियं नीतिरपि पराक्रमणाय प्रवृत्ता येन सा जनानुरागोत्पादनेऽसमर्था भवितुमर्हतीतर-राजनीतिवत्। धर्मत्वव्याप्यत्वात् शास्त्रसम्बन्धाददृष्टोत्पादकत्वाद् विनयशीलत्वादत्र तमोबाहुल्यं नास्ति।

स्वर्गानन्त्यनयोः प्रत्यक्षप्रमाणप्रमितत्वम्

नन्वेवं नीतिसाध्यमदृष्टं तत्राद्यः स्वर्गोऽपि इत्युक्तम्, तत्रायं प्रश्नः—स्वर्गस्यातीन्द्रि-यत्वात् तत्साधनत्वमतीन्द्रियम्, तत्साधनभूतस्य नीतित्वेन प्रतिपाद्यमानस्य धर्मस्य स्वर्गानन्त्ययोः नीतौ कथमन्तर्भावः ? उच्यते—यन्न दुःखेन सम्भिन्नमिति लक्षणोक्त-दिशा धारावाही दुःखरहितोऽभिलाषोपनीतः सुखविशेष एव स्वर्गपदवाच्यः। तस्य प्रत्यक्षत्वमेव सुखस्य सत्त्वेन सर्वस्य कामनाविषयत्वात्प्रत्यक्षत्वाच्च। यद्यपि परलोके जनि-ष्यमाणस्य सुखस्य तद्व्यक्तित्वेनाप्रत्यक्षत्वमेव, तथापि तद्वृत्तिजातेः प्रत्यक्षविषयता इह-लोकेऽपि अस्त्येव। सामान्यलक्षणाप्रत्यासत्या उपनिषदा निर्दिष्टे उपदिष्टाया राज्यादि-सुखपरम्परायाः तैस्तैरनुभूयमानायास्तत्त्वं भिक्षुकेण सदा परितुष्टेन अनुभूयमाने स्वसुखे अनुभूयत इति श्रोत्रियस्य चाकामहतस्य चेत्यादिना प्रतिपाद्यते। "मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः" इत्यप्यनुभवं प्रमाणम्। अपि च एकाग्रतापुरस्सरे ध्याने यत्सुखं तदेव निद्रायां सुखानुभवं साजात्यमन्तर्भवति, उभयोरपि व्याधिनिराकरण-सामर्थ्यात्। तामेव जातिमनुसन्धाय चार्वाका अङ्गनालिङ्गनजन्यं सुखमनुभवन्ति। श्रोत्रिया अपि अकामहतं सुखं तत्सजातीयमेव। नन्वेवं सर्वं सुखमेकजातीयं चेत्, शास्त्रा-नुसारी पन्थाः कुत आश्रयणीय इति चेत्, न, अनुभूयमानसुखत्वाश्रयत्वस्य वास्तविकत्व-ज्ञापनं शास्त्रार्थप्रयोजनमिति। न च सुखत्वस्य प्रत्यक्षत्वेऽपि स्वर्गसुखत्वस्य तदाश्र-यस्य प्रत्यक्षमस्मासु नास्तीति वाच्यम्, तस्येष्टत्वात्। सर्वः सर्वेण दृश्यत इति नियमा-भावात् सामान्यलक्षणया तस्यापि प्रत्यक्षविषयत्वात्।

वस्तुतस्तु आस्तिक्यादिगुणाभिव्यक्तसत्त्वगुणानालम्ब्य नीत्यनुष्ठाता अदृष्ट-मुत्पाद्यात्रैव परलोके जनिष्यमाणस्वर्गसुखसमानजातीयमेव शमसुखमनुभवन् आत्मानं कृतार्थं मनुते। स एव सकामश्चेत्, तत्तदेव शरीरमुपलभ्य सुखमनुभवति। देवशरीरञ्च राजादिभावेनोत्पन्नेषु ललितगत्यादिविशेषेण प्रत्यक्षगोचरीभवति, तच्च नास्य

शास्त्रेण स्पष्टम्। राजतदितरयोर्गतेरन्तरं प्रचुरसत्त्वप्रयुक्तलाघवमूलकम्, एवञ्च देवादिशरीरेणानुभूयमानसुखवृत्तिसुखत्वस्य तदाश्रयस्य च नाप्रत्यक्षत्वम्।

एवं मोक्षोऽपि प्रत्यक्षगोचरत्वादुपेक्षणीयो नास्ति नीतिविदां मतेनापि। यतस्तत्र दुःखध्वंसे स्वसमानाधिकरणदुःखसमानकालीने, नित्यसुखाभिव्यक्तौ वा अभिव्यक्तम्, तस्मिन् सुखे या प्रत्यक्षविषयता सा पूर्ववदुपपन्नैव। तद्यथा दुःखध्वंसे दुःखासमानकालीनत्वं सुषुप्तौ वेद्यं भवति। वेद्यस्य तस्याश्रयत्वं जीवसुखे अस्तीत्यत्रैव वादः प्रत्यक्षत्वं त्वस्त्येव, प्रत्यक्षत्वेन स्वर्गसुखत्ववत्। एवं नित्यसुखमपि सुषुप्तौ वेद्यमेव। साक्षादपरोक्षाद् ब्रह्मेत्युक्तेः। तच्छ्रद्धालुभिः शास्त्रनिरपेक्षैर्धर्ममुपेक्ष्य विचरद्भिः अवेद्यमपि तन्नास्तीति वक्तुं न शक्यते, शुकादिभिरनुभूयमानत्वात्। इत्येवं स्वर्गमोक्षौ दृग्गोचरौ स्तः। प्रसङ्गादिदमपि स्मार्यते यद् भारतीयनीतिमर्यादायां भूदेवो नरदेवो वा भवति नीतिमान् यथा, तथा परलोके सुखाभिलाषुकश्चेत्, स कर्मदेवादिपदं प्राप्य नारायणः शिवो वाऽपि भवितुमर्हति। इति नीतिकल्पतरौ व्यक्तं वेदितव्यम् (३५० पृ०), यच्च गतानुगतिकत्वं लोके व्यवह्रियते, तत्तु आलस्यादिमत्स्वेव शोभते। तस्मान्नीतिधर्मस्य नीतित्वमुपपन्नमिति दिक्।

उच्चनीचभावः

अथ स्वर्गफलोपलब्धावपि तत्कालं स्वधर्मपालने वर्णाश्रमे उच्चनीचभावदोषोऽपरिहार्य एव। तथासति भेदोऽपि आपद्यते। तत्परिहार एवमत्र चिन्त्यः—उच्चनीचभावस्तु न धर्मप्रयुक्त एव; किन्तु गुणतारतम्येनोच्चनीचभावोऽन्यत्र सर्वत्रापि वर्तत एव। तन्न्यायेनात्रापि स्वस्वकार्ययोग्यत्वमनुसन्धाय तेषां तेषां नीतिविद्भिर्नियोजनं क्रियते। नहि केवलं जन्मैवानुसन्धाय। एवं समानो यदि न स्यात्, तर्हि सोऽपराधी नीतिमानेव भवति। सति च गुणसम्मानने कुलीनः स्वस्वकर्मणि कुशलो भवति। तदेतदननुसन्धाय उच्चनीचभावप्रयुक्तो भेदो जनापरागजनको यत्र वर्तते, तत्र कारणमुच्चत्वेनाभिमतद्वारा नीचस्याभिमत....परस्पराशङ्कनम्। अतः प्रकृतिव्यसनेऽन्तर्गतं पारुष्यादि सर्वथा परित्याज्यं चेत्, न, भेदा वा....। न च स्पृश्यास्पृश्यत्वे तु स्वधर्मे भेदप्रयोजकेस्त एवेति शङ्क्यम्। इयं व्यवस्था कुलीनत्वप्रयुक्तगुणप्रतिभोद्बोधनाय वर्तते, विवाहभोजनपूजनादिषु। राजनीतौ तु अर्थसम्बन्धिनि व्यवहारे तत्तत्कर्मकुशलस्य समादरः समान एव वरीवर्तते। जातिप्रयुक्तकुलीनत्वसाङ्कर्याभावाय राजनीत्या काम्यते। कतिपयैर्धूर्तैः आंग्लैः स्वराष्ट्रानुकूलशिक्षां विधाय अस्मद्देशे समाजे परस्परं भेदार्थस्तदनुकूलो बीजावापः कृतः। तत्र सावधानतया भाव्यम्।

स्पृश्यास्पृश्यभावे लोकसम्मतिः

सुखण्डीशीतलाप्रभृतिरोगनिवारकत्वेन क्लृप्तः स्पृश्यास्पृश्यविभाग आयुर्वेदसिद्धो धर्मशास्त्रेणाप्यनुमोद्यते। पुष्पवतीनां स्त्रीणामस्पृश्यत्वं कल्याणकरं तद्भावे तदभावो

नियतः। अत एव स्पृश्यास्पृश्यविभागाभावानुयायिषु यवनादिषु सुखण्डीप्रभृतिरोगाणां प्राचुर्यं दृश्यते। शीतलाप्रकोपस्तु स्पृश्यत्वास्पृश्यत्वविचारे परित्यक्ते वर्धत इति सिद्धम्। अतो विभिन्नकुलेषु परम्पराप्राप्तानां कीटाणूनां तत्रैव पर्याप्तये तत्संसर्गप्रयुक्त-रोगाभावरक्षणाय वर्णादिसापेक्षायां विभागो नीत्याऽपि सम्मन्यन्ते। सोऽयं विषयः चिकित्साचन्द्रोदयत उद्धृतो मस्तिष्करोगे विवृतः शङ्कामपसारयति। स च विभागो वेदात् प्राप्तो राजनीत्यानुगम्यते।

वेदपरिग्रहः

यतोऽदृष्टं तत्साधनत्वं वा प्रत्यक्षानुमानवादिनां बुद्धिर्नावगाहते। वेदमन्तरा यद्यवगाहेतापि, तर्हि तत्र नास्ति समाश्वासः, तेषु सफलत्वांशे अभ्रमस्यादाढर्यात्। किं बहुना, समस्तशिष्टपरिगृहीततत्तदाचार्यसमादृतवेदविरोधे उत्तरवर्तिष्वेव अप्रामाण्या-शङ्कनात्, येषु कार्यपूर्ववर्तिषु अकारणत्वं व्यवहृतं तद्भिन्नेष्विति निर्णयाच्च। तथा सत्येव अनन्यथासिद्धत्वावगाहनात्। तथाविधः शिष्टः पूर्वस्मादपि प्रथमो वेदः, अतोऽदृष्टांशे तत्साधनत्वे वा वेदस्योपयुक्तत्वात् स एव राजनीत्या अनुमतः। एतद्वैशद्यार्थं कारणत्वं परिष्कृतमुच्यते सङ्क्षेपात्। सोऽयं कार्यकारणभावः—

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्॥

इत्यादि पद्यादिनाभिहितः कारिकावल्यादिग्रन्थेषु। अत्र "अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता" इति कारणत्वव्याख्याने श्रीमहादेवभट्टप्रभृतिभिस्तदीयदलसार्थक्या-वसरे अनन्यथासिद्धत्वमेवं परिष्कृतम्—"यत्र यत्र प्रामाणिकानाम् अकारणत्वव्यवहार-स्तत्तद्भिन्नत्वम्" इति। अत्रेदमनुसन्धेयम्—घटं प्रति कारणत्वविचारावसरे दण्डचक्रादि-पदार्थजातं विहाय सर्वत्रैव प्रामाणिकानाम् अकारणत्वव्यवहारो यदि स्यात्तर्हि ताव-तैव दण्डत्वादिभिः सह सर्वेषामेव उदासीनपदार्थानां व्यावृत्तिर्भवितुमर्हति, तथापि 'प्रसक्तं प्रतिविध्यते' इति नियमानुसारेण कारणत्वलक्षणघटकं नियतपूर्ववर्तित्वं यत्र, तेषु दण्डत्व-दण्डरूप-शब्दजनक-कुलालजनक--तत्तद्रासभादिषु कारणत्वस्य प्रसक्ति-स्तत्रैव अकारणत्वव्यवहार इति कृत्वा प्रामाणिकानाम् अकारणत्वव्यवहारः, अजागल-स्तनायमानेष्विव दण्डत्वादिषु पञ्चसु सङ्कोच्य व्यवस्थाप्यते। तद्भिन्नत्वम् अनन्यथा-सिद्धत्वम्।

अत्रायं प्रश्नः—कारणत्वस्य जिज्ञासायां तल्लक्षणेऽनुसन्धीयमाने यद्यकारणत्वं पुनरपि निवेश्यते, तर्हि आत्माश्रयादिदोषेण कारणत्वलक्षणमनन्यथासिद्धत्वं च दुरव-गाहं भवति। तत्रेदं प्रातःस्मरणीयैः गुरुवर्यैरनुशील्य यदादिष्टं तदस्माभिः सर्वैरेवादृत्य दग्धाश्वरथन्यायेन सर्वान् विचारानेकीकृत्य अभिधीयते।

तत्रान्यथासिद्धत्वं लघुनियतपूर्ववर्तिभिन्नत्वे सति सम्बन्धकृतगुरुत्ववत्त्वे सति कारणतावच्छेदकधर्मत्वं प्रथमम्, यथा घटं प्रति दण्डत्वादेः। लघुनियतपूर्ववर्तिभिन्नत्वे सति सम्बन्धकृतगुरुत्ववत्त्वे सति कारणतावच्छेदकधर्मभिन्नत्वं द्वितीयम्[1], यथा घटं प्रति दण्डरूपादेः। प्रकृतकार्याजनकजनकत्वावच्छिन्नत्वे सति गुरुनियतपूर्ववर्तित्वज्ञानविशेष्यत्वं तृतीयम्, यथा घटं प्रति आकाशस्य। प्रकृतकार्यजनकजनकत्वावच्छिन्नत्वे सति गुरुनियतपूर्ववर्तित्वज्ञानविशेष्यत्वं चतुर्थम्, यथा घटं प्रति कुलालपितुः। स्वान्वयव्यतिरेकानुविधायि-अन्वयव्यतिरेकाप्रतियोगित्वे सति चतुर्विधान्यथासिद्धभिन्नत्वे सति उपस्थितिसहकृतत्वं पञ्चमम्, यथा घटं प्रति रासभस्य। अनया रीत्या अन्यथासिद्धत्वनिर्वचने कृतेऽपि कारणत्वलक्षणे कारणत्वघटितत्वमपरिहार्यमेवेति कृत्वा एतद्विचारे भगवद्भक्तैर्निर्दिष्टा श्रुतिप्रतिपादितेच्छैव शरणं भवति। तदनुसन्धानेन प्रामाणिका दण्डचक्रादिसमवायं सङ्घट्टयितुं तदा वाञ्छन्ति, यदा घटचिकीर्षवो भवन्ति। एतदनुसृत्य प्रामाणिकेच्छां गृहीत्वाऽत्र कारणत्वं परिष्क्रियते। तत्र रामरुद्रान्तग्रन्थपर्यालोचने कृते तैः प्रतिपादितस्य कारणत्वस्य प्रामाणिकेच्छामादाय एवं परिष्कारो भवति। कार्येच्छोत्तरेच्छाविषयभिन्नत्वविशिष्टाः कार्यनियतपूर्ववर्तिनोऽन्यथासिद्धाः। तद्भिन्नत्वे सति नियतपूर्ववर्तित्वं कारणत्वमिति।

प्रातःस्मरणीया गुरुचरणा अत्रैवमाहुः—कार्येच्छाधीनेच्छाधीनेच्छाभिन्ना या कार्येच्छाधीनेच्छा, तद्विषयत्वे सति नियतपूर्ववर्तित्वं कारणत्वमिति।

अत्रेदमनुसन्धेयम्—यथाऽव्यवहितोत्तरत्वपरिष्कारे कार्याधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वोक्त्या कार्योत्तरक्षणोत्तरक्षणानां सर्वेषामपि व्यावृत्तिर्भवति, तथैव कार्यसम्पत्तीच्छया कारणसंयोजनेच्छा यथा भवति, तथा तत्सम्पादनार्थं तत्कारणानां सम्पादनेच्छा भविष्यत्येव, तासां समस्तानामिच्छानां निरासाय कार्येच्छाधीनेच्छाभिन्नत्वं निविष्टम्, एतद्भिन्नत्वं कार्येच्छासहिततत्पूर्वतनेच्छासु वर्तते, तद्वारणाय विशेष्यदलं बोध्यम्। तदिदं निर्दुष्टं लक्षणं भवत्येव, तथापि व्यतिरेकव्यभिचारमुखेन कार्याधिकरणवृत्त्यभावप्रतियोगित्वज्ञानेन कारणत्वग्रहो न भवतीति समाप्तिसाधनमङ्गलविचारावसरे ग्रन्थकृद्भिरुच्यते। तेषां समस्तानां शिष्टानां व्यवहारेण तत्प्रतिबन्धकत्वज्ञानपुरस्सरं कारणत्वस्वरूपपरिचयार्थमान्वीक्षिकीविद्भिरुक्तलक्षणे कार्यनियतपूर्ववर्तित्वमप्यनुसन्धेयम्। एवंविधः शिष्टाचारस्तत्त्वचिन्तामणिकृतां श्रीमतां गङ्गेशोपाध्यायानां ग्रन्थे हेत्वाभासप्रकरणे 'यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्' इत्यत्र 'लिङ्ग'पदप्रवेशेन दृश्यते। चिकीर्षाप्रवृत्त्योः सामानाधिकरण्यनियमेन चिकीर्षाघटितलक्षणमिव तदधीनप्रवृत्तिघटितं लक्षणमपि सुधीभिः अनुसन्धातुं शक्यते। एकस्य निर्दुष्टान्यनेकानि लक्षणानि तत्तत्साधर्म्य-तत्तत्पदार्थनिर्वचनप्रकरणे

---

१. चतुर्थान्यथासिद्धेऽतिव्याप्तिवारणाय लक्षणे कारणवृत्तित्वं देयमिति केचित्।

दृश्यन्ते। न हि तत्र एकेनापरस्य निष्प्रयोजनकत्वं (वैयर्थ्यं वा) जिज्ञास्यते। उपर्युक्तरीतिमनुसृत्य अन्यल्लक्षणं यदि केनचित् क्रियते, तर्ह्यपि नास्माकं हानिः।

अत्राधीनत्वं चोत्तरत्वरूपमेव ग्राह्यम्, स्वरूपसम्बन्धरूपं वा, कार्याधिकरणवृत्त्यभावप्रतियोगितावच्छेदकसंसर्गतावच्छेदककारणत्वमिव। तत्तत्कार्यव्यक्तिमनुसन्धाय उपर्युक्तलक्षणे स्वत्वनिवेशे कृतेऽननुगमो भवतीत्यनुगमरसिकानां तर्ककर्कशविचारचतुराणां प्रमोदाय अनुगमोऽपि निर्दिश्यते—

इच्छा(कार्येच्छा)विशिष्टधर्मवत्त्वं कारणत्वम्। वै० स्वप्रयोज्येच्छाविषयतानवच्छेदकत्व-स्वप्रयोज्येच्छाविषयतावच्छेदकत्व-स्वविषयतावच्छेदकावच्छिन्नस्वविषयतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निरूपितस्वविषयाव्यवहितपूर्वक्षणावच्छिन्नवृत्तित्ववदभावीयकिञ्चित्सम्बन्धावच्छिन्न(स्वप्रयोज्येच्छाविषयतावच्छेदकसम्बन्धावच्छिन्न)प्रतियोगितानवच्छेदकत्वं तत्त्रितयसम्बन्धेनेति। सर्वत्र इच्छायां शिष्टसमवेतत्वं विशेषणं देयम्। अत्र समूहालम्बनेच्छादिकमादाय यद्युदासीनेऽतिव्याप्तिराशङ्क्यते, तर्हि तद्वारणाय सामान्यनिरुक्तिदिशा मुख्यविशेष्यताद्वयशून्यत्वादिनिवेशप्रकारः सुधीभिरूहनीय इति।

अत्रायं सङ्क्षेपः—यथा लक्षण्या सुपूजिता मूर्तिः प्रसादसुमुखी भवति, तथा भारतीयनीतिसम्मतमनुष्ठानं प्रमाणत्रयप्रमितफलसाधनं लघुसंस्कृतमबाधितमव्यभिचारी दृढं विघ्नैरनुच्छेद्यं राजदेवतागुरुप्रसादकरं विदग्धव्यवहारविषय उपदेशकरं क्रियाशक्तिसम्पन्नं सात्त्विकं शुक्लधर्मरुचिकरं भवतीत्यत्र न सन्देहः, तदेवाहुः—व्यवस्थितेत्यादिना।

आर्यत्वम्

प्रसङ्गाद् आर्यत्वं विमृश्यते, तच्च जातिरूपम्। आर्या परदेशाद् भारते आगत्य अत्रत्यान् पददलितान् कृत्वा राज्यं स्वायत्तीचक्रुरिति केचिद् व्याचक्षते। आर्यो न जातिः; किन्तु स्वकर्माणि य आचरति, स आर्यः। आचार्या एवमाहुः—शाब्दिकैः आचरितुं योग्य आर्यं इति व्युत्पत्तिमनुरुध्य स्वकर्माचरणशीलो आर्यपदार्थ इति निर्णीयते। तदुक्तम्—

कर्तव्यमाचरन् काममकर्तव्यमनाचरन्।
तिष्ठति प्राकृताचारं स तु आर्य इति स्मृतः॥ इति।

एवं शक्तिनिर्णये नियामकं व्यवहाराध्याय उक्तं स्मर्तव्यम्। एतन्मते पित्राज्ञां तिरस्कुर्वाणा ययातिपुत्रा इव विश्वामित्रपुत्रा अनार्येषु परिगणिताः। तथा च कुलीनत्वं युक्तकर्मानुरूपमार्यत्वं भवति। एतदेवाभिप्रेत्य नीतिसारे कुलसत्त्वदयादानधर्मसत्य-

कृतज्ञताष्टकगुणवत्वं तद्भवतीत्युक्तम् । किञ्च, भारतीयराजनीतौ तथाविधा एव आर्या अङ्कुशस्थाने राज्ञाऽनुमन्तव्याः, यतस्त एव सामाद्युपायं प्रयोक्तुं समर्था नासफलतां गच्छन्तीति निर्णीतम् । अत एव सन्दिग्धन्यायनिर्णये आर्यशासनमेव धर्मे प्रमाणत्वेन स्वीकुर्वन्ति आचार्याः । तेषां तथाविधानां निवासो भारत एव नान्यत्र, यत आर्यैरनुष्ठेयत्वेन अपेक्षिता यवमृगदर्भा गावः भारत एवोपलभ्यन्ते । वेदोऽपि भारत एवासीत्, यतो वर्णाश्रमस्थितिनिबन्धनमत्रैव विहितं चकास्ते । तं शब्दप्रमाणमाधारीकृत्य प्रवृत्तौ सत्यामेव वृत्तिनियमनं युद्धादिधारायां हर्षेण प्रवृत्तिः सहगमनं सर्वस्वत्यागो वैराग्यं मनसो निग्रहः प्रत्याहारश्च सुशक इति त्रयीमनुगच्छन्तीयं सर्वापि नीतिः सफलाऽभूत्, भविष्यति च । तथा सत्येव—

आत्मानं प्रथमं राजा विनयेनोपपादयेत् ।
ततोऽमात्यान् ततो भृत्यान् ततः पुत्रान् ततः प्रजाः ॥

इत्युक्तं सार्थं भवति । अत्र वार्तादण्डनीतिस्थापन उक्ते तत्र वेदमाधारीकृत्य प्रवृत्तानां जोवितस्य सुरक्षायै वार्ता प्रवर्तते । सा च कृषिपाशुपालवणिज्यात्मिका । सा च विन्दति प्राप्नोतीत्यर्थबोधकत्वाद्विद्या भवति । धर्माविरोधि विद्याभूम्याद्यर्थज्ञानभाव्यभावकभावनाकरणभूता जीवनहेतुः ।

वार्तापूर्णता

नन्वेवं पराशरविदेहराजप्रोक्ता वार्ता नास्ति, कथं नीतिपूर्तिः स्यात् ? इति चेत्, अध्यक्षप्रचारेण वार्ता पूर्णा भवति, कामसूत्रकर्त्रा "वार्ता अध्यक्षप्रचारेणाभ्यसनीया" इत्युक्तत्वात् । तत्सम्प्रति वार्ताशास्त्रमध्यक्षप्रचारात्मकमर्थशास्त्रस्य द्वितीयाधिकरणं बोध्यम् । कृष्यादौ कर्तव्या रोगचिकित्सा नात्र निर्दिष्टा, तथापि शार्ङ्गधरविष्णुधर्मोत्तरपुराणाग्निपुराणेभ्यः सा पूरणीया । अनया धनधान्यसाफल्यदर्शनात् प्रजाया अनुरागस्तद्वशीकृतिश्च कोशदण्डाभ्यां सहजत एव भवतीति स्मर्तव्यम् ।

दण्डनीतेर्नीत्यन्तरेण तुलना

परस्परमनुरागोत्पत्त्यशक्यत्वेऽपि वेदप्रामाण्याद्यभ्युपगमे परलोकविश्वासदार्ढ्येन नीत्यनुसरणे जनानुरञ्जनोत्पत्तिः सुशका, सत्त्वमूलाया दण्डनीतेर्दण्डप्रणयनशीलाया औचित्येनाकर्षणक्षमत्वस्वभावात् ।

किञ्च, शास्त्रलोकोभयानुगामिदण्डस्य तदननुगामिदण्डापेक्षयाऽन्तरं वक्ष्यमाणं बोध्यम् ।

१. "धनस्यापहर्ता दण्ड्यः, परं अपराधिनो धनापहर्ता राजा तु न दण्ड्यः" इत्यत्र शास्त्रनिर्णयकाभावे भारतीयेतरनीतौ विनिगमनायां विचार्यमाणायां बहुमतानु-

कूल्यमेव नियामकं वक्तव्यम्। तत्तु सदा एकस्वरूपं न, यतः स एव दण्ड्यो दण्डप्रणयनानन्तरं कृत्यपक्षीयो भूत्वा प्रजायां स्वपक्षे बहुमतानुकूल्यं सम्पाद्य राजानमेव दण्डयितुं प्रवर्तेत। सोऽयं दोषो वेदमूलकदण्डनीतौ नास्ति।

२. दण्डत्वेनापहर्तव्यं धनं कियत्परिमाणमिति प्रश्नोऽसमाहित एव वर्तते, नीत्यन्तरे न्यायान्याययोरननुगतत्वात्।

३. यथा कथञ्चित् करादिरूपेण अपहर्ता शासकोऽपराधी न वेति निर्णेतुमितरनीतौ विनिगमना नास्ति, औचित्त्यस्याव्यवस्थितत्वात्, अनिर्णीतत्वाच्च।

४. किञ्च, उत्तममध्यमाधमसाहसदण्डेषु कस्य कियान्दण्ड इत्यत्र नियामिका नीत्यन्तरे व्यक्तेरिच्छैव। अत्र तु न तथा, शास्त्रस्य नियामकत्वात्।

५. इतरराजनीतौ दण्डे प्रणीतेऽपि अपराधान्निवृत्तिरशक्या। भारतीयनीतौ तु व्यवस्थेदृशी यत्प्रमादेन कृतायामपनीतौ सर्वोऽपि सुजनतोऽपराधमनुभवन् दण्डेऽप्रणीते ग्लानिमनुभवति, यतः स नरकाद् बिभेति। प्रायश्चित्तात्मकं दण्डं विधाय प्रसन्नमना न पुनरपराधे प्रवर्तेत इति भारतीयदण्डमाहात्म्यम्। यदि दुरात्मैव कश्चिद् भवति, तर्हि विद्वत्सु उपदेशकेषु सत्स्वपि दुरात्मनः शासनायात्र शासकत्वेन राजा गुरुभक्तः वृतः, स च त्रयीप्रामाण्यं स्वीकृत्य प्रवर्तते, तेन न जनक्षोभो दण्डप्रणयनञ्च सफल इत्यग्रे व्यक्तम्। एवं सति सर्वं सुस्थमन्यथा नेति।

विद्यान्तरापेक्षया दण्डनीतेः प्राधान्यमहत्त्वे

दण्डनीतिः रक्षणार्थं प्रवृत्ता आन्वीक्षिकीप्रभृतितिसृणां विद्यानां योगक्षेमौ साधयति। ताश्चेमां पोषयन्तीति रक्षणकर्तृत्वाद् अस्याः प्राधान्यम्। अपि च राज्यस्य कण्टकेभ्यः परिरक्षणं भयनिवर्तनं धर्मार्थयोर्विवर्धनं अश्वमेधादौ गुणवति पुत्रे वा धनविनियोजनं कुर्वन्नयं दण्डः पारस्परिकविश्वासमुत्पाद्य लोकस्य निराबाधं जीवनं साधयति।

स च दण्डस्त्रेधा—तीक्ष्णः, मृदुः, युक्तश्च। तत्र तीक्ष्णेन दण्डेन भयं प्रसरति प्रजायाम्। अत एव स उद्वेगकरः। ततः कृत्यपक्षोत्पत्तिः, अपरागश्च। मृदुस्तु दण्डोऽकिञ्चित्करः, यतो मृदुना दण्डेन राजैव परिभूयते अवमन्यते च। लोकशास्त्रानुमतो दण्डस्तु युक्त उच्यते, यतो उपायप्रकरणोक्तदिशा सामादीनां साधने तदात्मको दण्डः लोकशास्त्रानुमतो भवति। तेन प्रजाराज्ञोर्मध्ये प्रेम वर्धते।

अत्रायं विशेषः—शास्त्रानुमतिमात्रेण लोकमतानुगतत्वाभावे भारतीया नीतिर्न दण्डं प्रणयति, नापि शास्त्रमतानुगतत्वाभावे। सर्वथा दुष्प्रणीतश्चेत्, स एव देशे कामं

सङ्गं क्रोधम्, अक्षमाम्, अज्ञानं मोहञ्चोत्पाद्य राजानं राज्यं च विनाशयति। तदुक्तम्—"अज्ञानाद् वानप्रस्थानपि कोपयति किमङ्ग पुनर्गृहस्थान्" इति। सर्वथा अप्रणीतश्चेद्दण्डो मात्स्यन्यायमुद्भाव्य पुनरपि राज्यविनाशमेव सम्पादयति। अतो युक्तदण्डः प्रशस्यते। एतेन धर्मशास्त्र-न्यायशास्त्रयोरध्ययनस्य सार्थक्यं भवति। अन्यथा विवेकाभावे धर्मशास्त्रापरिचये च युक्तदण्डता व्याहन्येत।

नीतौ विद्युत्साधर्म्यम्

नीतेः क्रियारूपत्वाद् आकर्षकत्वं क्षेपकत्वं विवेचकत्वञ्च विद्युद्वत् स्मर्तव्यम्। क्षेपकत्वं प्रलये परमाणुषु सिद्धम्। यतस्तदानीं परमाणुषु तथा क्रिया सम्भवति, यथा ते न संयुक्ता भवन्ति। सृष्टौ तु आकर्षकत्ववत्क्रिययैव आकृष्टाः सन्तः परमाणवः संयुज्यन्ते। ततो जगदिति क्रियायामाकर्षकत्वस्य विक्षेपकत्वस्य च भावात् तस्या विद्युत्यन्तर्भावोऽभिधीयते। केचित्तु परमाण्वादौ उत्पन्नो वेगः क्रियां विदधातीति वेग एव विद्युत्। गुरुत्वाकर्षणं प्रतिभोत्पादनमूर्जा च 'इनर्जी' इत्युच्यते आधुनिकैः। प्राचीनैस्तु अदृष्टमुच्यते। भारतीया राजनीतिराकर्षणक्षमा सफला प्रमाणत्रयप्रमिता लोकरञ्जनार्हा विद्युदेव। इतरा तु नीतिः पर्यन्ते अफला प्रमाणत्रयविरुद्धत्वात् परित्याज्या भवति।

नीतिशास्त्रं दृष्टादृष्टशास्त्रम्

इदञ्च नीतिशास्त्रं आयुर्वेदवद् दृष्टे अथर्जने प्रमाणं सद् धर्मशास्त्रसममदृष्टानुबन्धि, यतो लोकयात्राहेतुत्वाद् वर्णाश्रमान् धर्मे नीतौ च व्यवस्थापयत् लोकं स्वधर्मकर्मणि जातिव्यवस्थायां च प्रेरयति विश्वासञ्चोत्पादयति।

भारतीयनीतौ जातिव्यवस्थापनं बहिष्करणञ्च

ननु एषा नीतिर्वर्णाश्रमधर्माच्च्युतान् बहिष्करोति इत्ययं महान् दोषो राज्यविनाशाय कथं न प्रभवेत्? इति चेत्, न, यत्र वर्णाश्रमधर्मो नास्ति, तत्र समाजाद् भेदो नापगच्छति, प्रत्युत उत्तरोत्तरं वर्धिष्णुरेव सः, इति भेदकारणमन्यदेव स्वीकर्तव्यम्। तच्च शङ्काजननमभिभर्त्सनं च सम्भवतीत्युक्तम्। तत्र भारतीयराजनीतौ वेदप्रामाण्यस्य प्राधान्येन परिग्रहाद् अभिभर्त्सनं न सम्भवति। किं बहुना, स्वस्वकार्यकलापानुरूपव्यक्तिमात्रस्य स्वीयकर्मोचितजातौ सन्निवेशनमेवानुमन्यते। यथा प्रव्रज्याप्रत्यवसितस्य चरकर्मणि नियोगः। ततः पार्थक्येन स्थापितः परिव्राडपि। सोऽपि पूज्य एव। अनयोरुभयोरपि वेदप्रामाण्यपरिग्रहात् स्वधर्मे प्रवर्तनाच्च न कलहः। अत एव वेश्यापतिव्रताचरित्रे उभे अपि देशे अपेक्ष्येते। नास्ति अनयोः कलहः, पृथगवस्थानात्। एवं सर्वत्र बोध्यम्।

किञ्च, भारतीयसमाजे जातिबहिष्कारोऽपि कीदृग्विध इत्यपि उदाह्रियते। तथाहि—कश्चिद्यदा जातिसङ्घटनभावाननुरूपं यादृक्कर्म कुर्वन् मर्यादामतिक्रम्य प्रवर्तते,

सुखमनुभवति च, तदा तादृक्कर्म यज्जातौ समाजे वा प्रवर्तते नैसर्गिकम्, तत्र समाजे जातौ वा स विकृतकर्मा जनः शास्त्रेण समादिश्यते। अथवा तथाविधकर्मानुष्ठाता स्वजातितः कुष्ठिवत् पृथक् स्थाप्यते। न तु कलहमुत्पाद्याभिभर्त्स्यते। तथा पृथक्तया उत्तमसन्तानलाभार्थं शुद्धा जातिरपि संस्थाप्यते, स्वानुरूपकार्यार्थं सा प्रोत्साह्यते च। एवञ्च समाजे सङ्करजातीनामपि जीवनं सुलभमभूत्। अतोऽत्र बहिष्कारस्य प्राधान्यं नास्ति; किन्तु तन्मुखेन सम्पूर्णजातिरक्षणस्य प्राधान्यम्।

अपि च राजनीतौ मन्त्रिनिर्वाचने जातीयानां मतमपि पृथक्तया निर्वाचकत्वेन स्वीक्रियते। तस्यैव फलं यन्मन्त्री यद्यपराध्यति, तर्हि राज्ञा तन्निर्वाचिका जातिर्दण्डयते, जात्या अपराधीति रीत्या अपराधकर्तृषु मन्त्रिषु दण्डप्रणयनं सुलभमत्र यथा, तथा नान्यत्र। किञ्च, तत्तज्जातीयेषु कर्मसु तत्तज्जातीयानां सन्निवेशनाद्धनवितरणव्यवस्था-सौलभ्यमित्यपि प्राक् प्रदर्शितमेव। तदिदं "शान्ति का अग्रदूत" ग्रन्थे विस्तरेण विवेचितमस्माभिः।

एतादृशेषु स्थलविशेषेषु अपराधी न यथोचितं दण्डयते, तर्हि उच्छृङ्खलताऽपरिहार्या स्यात्, अतो भारतीया नीतिर्जातिद्वारा बहिष्कारमुखेनोपेक्षादण्डं विदधाति। ततोऽपराधिषु अकर्मकरणप्रयुक्तां ग्लानिमुत्पाद्य प्रायश्चित्ते प्रेरयति, स च दण्डो जातिद्वारा प्रणीतोऽनया राजनीत्या। अत्रायं विशेषो यदियं राजानं दण्डप्रणेतृत्वेन तथाविधस्थलेषु न मनुते, तत्र कारणं दण्डप्रणयने सारल्यमेव। यतो हि जातिर्दण्डयितुमपराधिनं प्रति यथा सुशका, न तथा शासनाधिकारिणो मन्त्र्यादीन् अकर्मणो निवर्तनार्थम्। तदुपेक्षाफलमिदमेव जातिमर्यादा-विलोपात् साङ्कर्यात् समाजे उद्धततोच्छृङ्खलता चापरिहार्ये भवतः। तत्र आहारमातृपितृकर्मान्यतमाशुचित्वमपरिहार्यम्। यच्चाशङ्क्यते जातिनियमनात् सङ्ख्याह्रासेन प्रजा दुर्बला स्यात्? इत्यपि न, यतः पृथगवस्थापनमात्रेण जातिशून्यत्वन्न भवति; किन्तु प्रायश्चित्तानधिकारित्वे धर्मानुष्ठानाधिकाराद्धीनतैव। अत्रोदाहरणं कुष्ठिनः पृथगवस्थापनम्। अत्रेदं तत्त्वम्—संस्काराधायकस्य प्रतिभोत्पादकस्य शुचित्वस्योपेक्षायां दासकर्मैव जीविकोपाय इति जानानः स्वातन्त्र्येणात्मानं रक्षितुमसमर्था भवन्ति। तथा सति जाड्यं पशुत्वसूचकमेव समाजे सम्पत्स्यते, भूतिकर्मानुपलब्धौ तु समाजस्य परलोकप्रयाणमेव हस्तगतं भवेद् भारतीयराजनीत्यभावे। तस्मादेतन्नीतौ बहिष्कारो न भेदजनकः; किन्तु रक्षकः।

दण्डनीतिप्रयोजनं सङ्क्षेपेण

उक्तदोषनिर्हरणायेयं दण्डनीतिरुपस्थिता वर्तते, तया आन्वीक्षिक्यादिविद्याः संरक्ष्यन्ते। विना तत्प्रणयनं मात्स्यन्यायेनाभिभवो भवतीत्युक्तं प्राक्। तस्यापि मूलं विनयं शास्त्रकारा व्याचक्षते। स च सत्त्वसहचारी। अन्यथा दम्भोत्पत्त्यापत्तिः स्यात्। सत्त्वमुक्तमेव। विनयः श्रोत्रादीनां स्वेषु स्वेषु विषयेषु अविप्रतिपत्तिरिति वक्ष्यते।

तस्याः पर्यवसानं शास्त्रार्थानुष्ठाने वर्तते। अतः शास्त्रार्थानुष्ठाने आर्यमर्यादा अपेक्ष्यते। सा च मदमानाभाव एवेत्यादि विस्तरेण प्रपञ्चितम्।

विद्यावृद्धसंयोगविनययोः पौर्वापर्यम्

नीतिसारे आदौ जितेन्द्रियत्वं ततो वृद्धसंयोगस्ततो विद्येति क्रमेऽभिहिते विनयः स्वाभाविको जन्मान्तरीयपुण्यसञ्चयप्राप्तः। अत्र तु विद्यावृद्धसंयोगानन्तरं विनयस्य प्राप्तिरुच्यते। सोऽयं विनयः कृतको बोध्यः।

गुरुसेवाविद्ययोः सम्बन्धो राज्येन सह

अत्रेदं चिन्त्यम्—साहित्यशास्त्र उक्तेषु षट्त्रिंशद्व्यभिचारभावेषु धृतिभाव एवाद्भुतरसनिर्माणद्वारा प्रजानुरागजनको राज्ञा स्वायत्तीकरणीय इति सिद्धान्तितम्। तल्लाभाय जितेन्द्रियत्वमौचित्याधायकत्वात्स्मर्तव्यं भवति। तथा सति सामाजिकमनसामाकर्षणं भवति।

एतदनुभावप्रभावेण पुरुषो मानोरथिकमपि सुखमनुभवति, वर्तमानवस्तुविषयकेच्छायामेवावस्थानात्, अत्रैव सन्माननसम्भवाच्च। अपि च प्रियाप्रियाविकारित्वमपि धृत्यनुभावान्तर्गतमेवेत्युभयमपि शास्त्रगुरुद्वयभक्तिमत्त्व एव। अन्यथा धृतिभावस्य अनुदय एव स्मर्तव्यः। धृतिभावं विद्याभावं च उपेक्ष्य सेवया मान्यत्वं येन अर्ज्यते, तत्र रौद्रस्य सङ्क्रमणाद् अनुरञ्जनमसम्भवि। ईश्वरगुरुभक्त्या तु अर्थप्रकाशोत्पत्तेर्विशेषदर्शनं मोहापसारकं स्वतःसिद्धम्। यत्रेयं धृतिस्तं प्रति जनतायां विश्वासस्तेनाकर्षणं तेन सङ्घटनम्, इत्येवं क्रमेण राज्यस्थापने गुरुभक्तिः, विद्या च अनुपेक्ष्यैव। ये किल विद्यावत्सु अलक्ष्मीं दृष्ट्वा धृतिं गुरुभक्तिं चोपेक्षन्ते जन्मान्तरवशात् प्रतिभामभिलषन्ति च, ते तु एवं वक्तव्या यत् केवलं कवित्वेन जन्मान्तरार्जितपुण्यसहकृतेन किं प्राप्नुमः, यदि शक्तिर्न लभ्यते। तदुत्पत्तये तु काव्यावेक्षणादीनां सहकारित्वमपेक्षितमेवेत्युक्तम्। तदुक्तं शक्तिर्निपुणतेत्यादिग्रन्थेन। अत एव पौरुषकर्मणस्त्यागो न शास्त्रसम्मतः। पौरुषेण गुरुभक्त्यादिना प्रतिभा धृतिश्च भवतः, अतो गुरुभिर्विद्यायोगो यदि सम्पादनीयः, तर्ह्यस्या अनन्यथासिद्धत्वमेव। वस्तुतस्तु जन्मान्तरेऽपि कविना शास्त्राभ्यासो गुरुकृपा च सम्पादितैवेति जन्मान्तरार्जितपुण्यस्थलेऽपि अनयोरनन्यथासिद्धत्वं मन्तव्यम्।

द्रव्याद्रव्यद्रव्याद्रव्याणि

एतत्प्रसङ्गाद् द्रव्याद्रव्यद्रव्याद्रव्याण्युच्यन्ते। स्वाभाविकेन विनयेन क्रिया सम्भवति। सा च विद्योपदेशः। तत्क्रियावान् गुणवांश्च द्रव्यं सत्त्वबुद्धिगुणसम्पन्न इत्यर्थः। विद्यया गुणेन चासम्पन्नोऽद्रव्यम्। यत्र सहजगुणाः सहजदोषाश्च, स द्रव्याद्रव्यम्। यो द्रव्यं स शुश्रूषाद्यष्टविधेन बुद्धिगुणेन सम्पन्नो भवति।

बुद्धिगुणाः

अथ बुद्धिगुणा व्याख्यायन्ते। श्रोतुमिच्छा शुश्रूषा, एतेन प्रहसनव्यावृत्तिः। श्रावणमासे वा तया भक्तिलाभः। सा च शुचित्वादिगुणसहचरिता विवक्षिता। यद्यपि श्रवणमर्थस्य न सम्भवति, तस्य श्रवणकर्मत्वाभावात्, तथापि अर्थज्ञानानुकूलव्यापारस्य श्रवणपदार्थत्वे नायं दोष इदमित्थमेवेत्याकारकः, तद्वति तत्प्रकारकनिश्चयो ग्रहणम्। अविस्मरणं धारणम्। विवेकज्ञानं विज्ञानम्। विवेकश्च शास्त्रनिर्दिष्टविधिविषयको बोध्यः। ऊहो विधिविषयस्तर्कः, अपोहो निषेधविषयकः। अथवा प्रमाणप्रमेयविषयकौ तौ क्रमेण बोध्यौ। तत्त्वाभिनिविष्टा बुद्धिरिष्टसाधनमित्याकारकं तत्त्वज्ञानम्। सा च उत्साहसत्त्वप्रचुरा चेत्, सफलैव। तत्राप्रामाण्यज्ञानानास्कन्दितत्वमपेक्ष्यते। बुद्धौ अष्टविधगुणवत्यां सत्यां विद्या पूर्णा भवति। सा च आन्वीक्षिक्यादिका चतुर्विधाऽपि ज्ञानाविद्यापदेन व्यपदिश्यते। अपराः कर्मविद्या उच्यन्ते। यद्यपि विद्यायामनेके विधय उपलभ्यन्ते, तथापि तेषु गुरुणा यदुक्तं करणीयं वर्जनीयं वा तर्कशुद्धं तत्पालने द्रव्यत्वं भवति। तत्सम्पत्तौ विनयः।

अथ साहजिककृतकविनयावुच्येते। अनधीतविद्या अपि ये अनात्मगुणसम्पन्नं न स्वामित्वेन अनुमन्वते; किन्त्वात्मगुणसम्पन्नं तेषु स्वाभाविको विनयो मन्तव्यः। ये विद्यामधीत्य स्थैर्यप्रतिपत्त्यसम्मोहान् प्राप्य आत्मनः स्वातन्त्र्यं रक्षन्ति, तेषु कृतको विनयः। ये तु विद्यामधीत्यापि परतन्त्रतां भजन्ते, ते जडा एव कथं स्वातन्त्र्यं रक्षेयुः।

किञ्च, स्वतन्त्रतारक्षणार्थं सरस्वती शिष्यैरुपास्यते। तत्कृपया गुरुद्वारा येन बोधानुकूलं श्रवणमुपलब्धं सैव श्रवणभक्तिः। "सरस्वती उपासिता चेत् परमेश्वरः प्रसीदति, स सखा प्रसन्नश्चेत् किं दुर्लभम्"। इत्येवं यस्या संस्कारो जन्मत उपलब्धः, स सहजविनीतः। विद्योपासकेषु विघ्ना दृश्यन्ते, परं तद्दर्शनं विदुषामेकाग्रताप्रकाशनायैव, न तु विनाशाय मन्तव्यम्। उपर्युक्तः सोऽयं संस्कार ईशप्रसादानुबन्धी कुलीनेषु नासुलभः, तत्र प्रतिबन्धकापसरणमेव कर्तव्यं भवति, 'क्रिया हि द्रव्यं विनयति' इत्युक्तत्वात्। कुलीनत्वाभावे साहजिकविनयसम्पादने परिश्रमो महान् तथा साफल्यसंशयश्च अभिनिवेशानुदयात्। किञ्च, यत्र न कुलीनता, तत्र परदारपरद्रव्यस्पृहा दृश्यते। एवंविधः शुश्रूषादावनधिकारो सोऽद्रव्यः। अतः कुलीनत्व हेतुतया चिन्तितम्। यस्य शरीरे कुलीनत्वप्रयुक्तोऽभिनिवेशः, स एव विपत्तिषु स्वकर्तव्यमदूयमानेन चेतसा अनुतिष्ठति। एवञ्च विद्याविनयसम्पन्नो बुद्धिमान् द्रव्यम्। यश्च विद्वान् तथापि अविनीतः, स द्रव्याद्रव्यम्। विद्ययापि हीनः सो अद्रव्यम्। अपि च द्रव्येष्वपि बुद्धेरष्टगुणेषु अभिहितेनार्थज्ञानगुणेन साध्यसाधनतावच्छेदकविषयकेन सम्पन्नो लक्ष्यलक्षणोभयज्ञ उत्तमो भवति। लक्ष्यमात्रज्ञो मध्यमः। लक्षणमात्रज्ञः शक्तिहीनोऽधमः। किञ्च, यस्य मिथ्याभिनिवेशो नास्ति, कृतिसाध्यवदनिष्टाननुबन्धि हितसाधनं

यत्कर्तव्यं तत्र सोत्साहा बुद्धिश्च वर्तते, स बुद्धिमान्। अन्यस्तु दुर्बुद्धिरेव। बुद्धिमानेवं मतिमानिति मन्यते।

शास्त्रज्ञानार्थं विनयापेक्षा

शास्त्रज्ञानाय स्वाभाविको विनयोऽपेक्ष्यत इत्युक्तं तत् किमर्थम् ? इति चेदुच्यते–विनयाभावे मदस्य मानस्य च सत्ताऽपेक्ष्यत इत्येव वक्तव्यं स्यात्। सति च मदे संस्कारो विनष्टो भवति। तथासति प्रत्यभिज्ञाप्यनुपपन्ना स्यात्। मदस्य संस्कार-नाशकत्वं वैशेषिकभाष्ये व्यक्तम्। नामदश्यः संस्कारोऽयं स्थायी बोध्यः। मुक्तावल्यां तु कालरोगयोरेव यन्नाशकत्वमभिहितं तन्नाशप्रतियोगी संस्कारो व्यभिचारी बोद्ध्यः। तदिदं संस्कारोद्बोधस्मृत्योः कार्यकारणभावविवेचनानन्तरं स्फुटीभवेदिति चिन्त्यते। तथा हि—विषयाणां तापकानां प्रतियोगिविधया चिन्तायामुत्कटायां चित्तं द्रवति। तत्र प्रविष्टं द्रव्यं संस्काररूपतां प्राप्नोति। तादृशावस्थापन्नं द्रव्यं चित्तस्य काठिन्येऽपि न ततोऽपसरति। चित्ते योऽयं द्रव्यस्य प्रवेशः, स एव दृढः संस्कारोद्बोधः। अद्रवा-वस्थायां प्रविष्टं तु द्रव्यं न दृढसंस्कारभावं भजते। नापि स्थायिनीं स्मृतिं सम्पादयति, संस्कारस्य व्यभिचारित्वात्। इत्येवंरीत्या संस्काराणां स्थायित्वं व्यभिचारित्वञ्च बोध्यम्। इत्थञ्च विनयाभावे मदस्य सिद्धौ संस्कारनाशाद् विद्योत्पत्तिर्न स्यात्। स्याच्च मूढताया वज्रलेपः। अतो विनयो मदासहचरितः शास्त्रज्ञानजसंस्काराणां स्थायित्व-सम्पत्तये अपेक्ष्यते। ननु हितोपदेशादौ विष्णुगुप्तेन राजपुत्रा विनयात्पूर्वमेव बोधिता इतीतिहासः कथं सङ्गच्छते ? इति चेत्, न, नीतिमधिकृत्य कृतो बोधः पुत्राणां नीतौ रुचेरुत्पादनार्थमेव स स्मर्तव्य इति ध्येयम्।

दण्डविद्यान्यतरयोर्विनयसाधनत्वम्

ननु दण्डस्य विनयसाधनत्वमत्रोच्यते। अग्रे तु विद्यायां तत्साधनत्वं प्रतिपाद-यिष्यत इति विरोधः ? इति चेत्, न, क्वचिद् दण्डस्य विनयसाधनत्वं बाल्यावस्थायां दण्डभयाद् विनयसम्पादनार्थम्। तदनन्तरं तु राजपुत्रो विद्यया विनेय इति नात्र विरोधः। न च दण्डेन विनीयते शिष्यस्तर्हि गुरुं स द्विष्येदिति वाच्यम्, धर्मतत्त्व-बोधानन्तरं गुरुद्वेषस्य विलयसम्भवात्।

साम्प्रतं तत्त्वाभिनिवेशपूर्वकं प्रतिभोत्पादनाय कारणभूतकुलीनत्वस्य सत्त्वेऽपि गुणवती प्रजा न दृश्यते कुलेषु। तत्र कारणं तथाविधशिक्षाक्रमाभावः। तत्रोक्तः शिक्षाक्रमः प्रचारणीयः। अनेन सह अदृष्टोत्पादनार्थं विद्याव्रतमपि अनुसन्धेयतामर्हति।

शिक्षार्थं संस्कारः

अत्रायं निष्कर्षः—राजनीतौ पुत्रश्चौलेन संस्कृतः कर्तव्यो वंशानुरूपम्। तदा लिपिः सङ्ख्यानं च तेन ज्ञातव्ये। ततो वर्णाधिकारभेदेन कामनापरतया वा वर्णक्रमेण ८-११-१२ वर्षे तस्य उपनयनम्। ततस्त्रय्यध्ययनमान्वीक्षिक्यध्ययनं च शिष्टेभ्यः।

शिष्टत्वञ्च इष्टसाधनतांशे भ्रान्तिरहितत्वे सति वेदप्रामाण्याभ्युपगन्तृत्वं मथुरानाथै-र्व्याख्यातम्। प्रकृते तु धर्मनिर्णये तत्र तत्राधिकृतत्वमपि विशेषणं बोध्यम्। वार्त्ताऽध्यक्षेभ्योऽध्येया। दण्डनीतिर्व्युत्पत्तिशक्तिमद्भ्योऽध्येया। अध्यापयितुर्विशेष-संज्ञाकरणं पृथक्संज्ञाप्रदर्शनार्थम्। तेन सर्वेषां शिष्टमव्याहतमेव।

अत्रेदमवधेयम्—ननु गणितज्ञानानन्तरं काव्यज्ञानार्थं छन्दोभाषाज्ञानमपेक्ष्यत इत्यपि प्रपञ्चितम्। तस्य क उपयोगः? इति चेदेवम्—छन्दोभाषासंस्कारो यदि बालकस्य हृदि आदितो भवेत्, तर्हि काव्यास्वादो भवेदिति। तदेतत् काव्यप्रकाश-विवरणे विवृतं तत्र द्रष्टव्यम्।

शिक्षाक्रमः

विद्या हि मातेव रक्षति। सा सर्वेषु धनेषु प्रधानं धनमिति सा नोपेक्षणीयता-मर्हति। तत्रापि अर्जनं एकदेशविद्याया उपहासाय भवतीति समस्तविद्यातात्पर्यं मनीषिभिः चिन्तनीयं वस्तु। अतः अष्टादशविद्यास्थानानि लोकरञ्जनकार्ये अधिकृतैरवश्यं ज्ञेयानि। तथा सत्येव सर्वविधोचितरञ्जककार्यशक्तेरुदयसम्भव इति तत्सम्पादनाय ज्ञानार्जने मूलभूतस्य विद्याध्ययनस्य क्रमोऽवश्यं चिन्तनीयः। तत्र हेतुत्वेन प्रथमतः शास्त्रेषु गुरुभक्तिरेव निर्दिष्टा। यतो विवेकसहितया तया प्रिया-प्रियाविकारित्वोचितकारित्वादीनां गुणानां प्रादुर्भावोऽपि आञ्जस्येन सुलभः। इत्येत-दालोच्य सेतुबन्धे विद्याध्ययनक्रमो निर्दिष्टः। तस्यायं निर्गलितोऽर्थो यत् क्रीडाऽधि-कारान्निवृत्तः सौवर्णिकः अक्षराभ्यासं छन्दोभाषाभ्यासं कुर्यात्। ततः शुङ्गेनात्मान-मन्विच्छेदिति विधानात् "शुङ्गमवयवसमुदायात्मको न्यायः" इति व्याख्यानाद् न्यायशास्त्रमधीयीत। ततः पूर्वमीमांसा तत उत्तरमीमांसेति। कौटलीयशास्त्रस्याप्ययं निष्कर्षो यदादौ अक्षराभ्यासः, काव्यज्ञानार्थं शब्दरूपावलिः, अष्टाध्यायी अक्षरोच्चारणार्था। तत उपनयनम्, काव्याध्ययनम्, ततो न्यायादिशास्त्राध्ययनम्। तदेतद् ग्रहणान्तिकमध्ययनं पुत्रस्य षोडशवर्षाधिके समये यथा भवेत्तथा कर्तव्यमिति।

अथ अवस्थाभेदेन स एव पाठ्यक्रमः चिन्त्यते। पञ्चमवर्षे यथाकुलाचारं चौलम्। पञ्चमादारभ्य अष्टमाब्दं यावद् उपनयनं विहितं यथाधिकारं कामनां वाऽनुसन्धाय। अष्टमाद् आरभ्य द्वादशवर्षपर्यन्तं विद्याधिकारिता ऊहिताऽस्ति। तदनुकूलाया बुद्धिशक्तेः आपञ्चमाद् द्वादशवर्षान्तं विकासो भवति। ततः षोडशवर्षपर्यन्तं ब्रह्मचारिणा विद्यार्थः परिचेतव्यो भवति। एवञ्च तृतीयवर्षात्मिकावस्थातः अष्टमवत्सरान्ति-कावस्था, ततो द्वादशवर्षान्तावस्था, ततः षोडशवर्षान्ता। इत्यादृत्य बालस्य तिस्रोऽवस्था विद्याध्ययनाय विहिता भवन्ति। एतास्वेवावस्थासु भारतीयशास्त्रेण पुत्रस्य षोडशवर्षाभ्यन्तरे विद्याया ग्रहणकालो निर्दिष्टः। विशेषतो विद्यावृद्धसंयोगस्तु आन्तमावश्यकः। अत्रेदं चिन्त्यम्—ग्रहणं हि श्रुतानामर्थानामवधारणं निष्कम्पप्रवृत्त्यङ्ग-

मिति प्रामाण्यवादे साधितम्, तच्च तर्कशास्त्राध्ययनेन सम्भवतीति तदध्ययनस्य प्रधानतमत्वमत्र व्यवस्थाप्यते।

किञ्च, षोडशवर्षाधिकसमयपर्यन्तमुत्तमसंस्काराणामाधानाय विद्यासञ्चये अभिभावकैर्विपरीतजनसंसर्गात् पुत्रः संरक्षणीयः, शिक्षणीयश्च। धर्मज्ञजनानाम्, वणिजाम्, अध्यक्षाणां च संसर्गेण कर्तव्याकर्तव्ये अर्जनं च पुत्रेण ज्ञातव्यानि भवेयुः। अत एव कामसूत्रनिर्देशानुसारेण अनुकरणाधीनं लिप्याद्यध्ययनमुपनीतावस्थायां शास्त्रेण नियमितम्। अतः पञ्चमवर्षावस्थायामेव लिपिसङ्ख्ये भाषा-काव्याध्ययनं सर्वमेतत् क्रीडनकाल एव चित्राभिनयाभ्यां सम्पादितञ्चेद्रुचिकरं भवति। उपनयनानन्तरं तु चतसृणां विद्यानामध्ययनं कर्तव्यं भवति। एतत्समयः सप्तमवर्षानन्तरभावी वर्तते। इत आरभ्य एकादशवर्षपर्यन्तमुत्सुकता अनुकरणञ्च स्वाभाविकं दृश्यते। एकादशवर्षानन्तरं तु काव्याध्ययनजनिता पठनरुचिः समुत्पद्यते। एतावत्पर्यन्तं पटुप्रत्ययजः संस्कारो गुरुगृहं प्रति गन्तुं प्रेरयति, ततो विनयपूर्वकमध्ययनम्। अत्र आदरप्रत्ययजः संस्कार उत्पद्यते। मोहाद्यपसारणार्थमर्थशास्त्रोक्त्या द्वितोयाध्यायसम्बन्धिन्या—

विभावितः प्रमाणेन कथाभिरनुभावितः।
तर्कः सञ्चारितश्चायं रसो लोके सुखावहः॥

इति रसमहार्णवोक्त्या च सहिष्णुता-सुहृद्भाव-सहचारितर्कस्याध्ययनमभ्यर्हितम्। तर्कमाहात्म्यं ज्ञात्वैव मानसरामायणे "वन्दौं गुरु पद पङ्कज" इति मङ्गलाचरणे तर्कदेवतैव नमस्कृता। तर्काध्ययनसमये अभिभावकैः क्रीडनादिषु बालकानां रुचिर्नोत्पादनीया। यतस्तत्र प्रियं भवति हितं तु न साध्यते। तत्तु क्लेशसहिष्णुतात्मकं वीररसे प्रवर्तने सति भवति यदि तत् सम्भवति, तर्हि सम्पन्नमिति वक्तुं शक्यते। तदर्थं तर्ककर्कशविचारचातुरी अभ्यर्हिता। तदभावे श्रद्धाया ह्रासोऽनुद्गमो वा दृष्टः। अतो विचारविकासे चिन्ता विधेया। तदनुकूलावस्था द्वादशवर्षानन्तरं वर्तते। ततः पूर्वमनुकरणप्रवृत्तिमाश्रित्यैव प्रयत्नः कर्तव्यः। अतोऽत्र अभिभावकैः पित्रादिभिः सावधानैर्भाव्यम्। अन्यथा गुरुं प्रति भयलज्जाप्रभवावहित्थायाः सम्भवात् पुत्रो गुरुं न समुपगच्छेत्। मातृपितृप्रेरणया गुरुं प्रति श्रद्धा समुदेति। गुरुसमीपे उपवेश्य षोडशवर्षपर्यन्तं पुत्रेणाध्ययनसमये ग्रहणमवधारणमिदमित्थमिति साधनीयम्। तच्च प्रमाणशास्त्रेण। तच्च गुरुणा सह संवादेन साध्यते। यतस्तत्र जल्पकथया वीरस्याद्भुतस्य च सिद्धिर्भवति। ततो गृहस्थाश्रमो दारकर्म। गोधनं ततः प्राक्। विद्यावृद्धसंयोगस्तु नित्यम्। एतदनुसारेण पाठ्यक्रमः ४२४ पृष्ठे निर्णीतोऽवधेयः।

उपनयने वर्षभेदः

नन्वेवं विप्रादीनां वर्षभेदेन उक्ताया उपनयनस्य व्यवस्थायाः किं प्रयोजनम? इति चेत्, न, तेषां जीवनव्यवस्थाभेदस्य संस्कारानुरोधेन विधानात्। यथा ब्राह्मणः

शान्तरसेन जीवति, तेन सत्यमनुष्ठेयम्। क्षत्रियो वीररसेन, तेन शस्त्रेण जीव्यते। क्षत्रियो यद्यष्टवर्षादेव कामचारान्निवर्तेत, तर्हि युद्धानुरूपं बलाधानं तत्र न भवेत्, तदर्थमेकादशवर्षपर्यन्तं तस्य कामचारत्वं स्थापितम्। वैश्यस्तु वार्तया जीवति। तेनानृतं वक्तव्यं भवति। 'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्' इत्युक्त्या अनृतभाषणस्य दार्ढ्याय षोडशवर्षपर्यन्तं तस्य कामचारत्वमुक्तम्। पुनः अनृतभाषणस्य निरङ्कुशस्य व्यावृत्त्यै उपनयनमपि विहितम्। कामनापरतया यदि क्षत्रियः षष्ठे वर्षे उपनीयते, तर्ह्यपि तेन बलाधानाविरोधेनैव उपनयनव्रतान्यनुष्ठेयानि, बलाधानस्य मुख्यत्वात्।

षोडशवर्षावधेः पूर्वमध्ययनविधिप्रयोजनम्

विद्याध्ययनं षोडशवर्षात्पूर्वमभिहितम्, तत्र कारणं कामिनीजिज्ञासाया अभावेन धर्मार्थज्ञानस्य आञ्जस्येन समुत्पादयितुं शक्यत्वम्। षोडशे वर्षे विवाहेन उक्तविषयप्रवृत्त्या अध्ययनेच्छा दुर्बला भवति। षोडशतमे वयसि विवाहविधिकरणं षोडशात् प्रागेव वेदाध्ययनस्य वृत्तत्वात्। विवाहाभावे अनाश्रमित्वप्रसक्तिर्मन्तव्या। विवाहे सम्पन्ने तु मध्वादिसेवनं भवितुमर्हति। ईप्सितफलप्राप्त्या पुत्रोऽपि पितरं मित्रभावेन व्यवहर्तुं शक्नोति। अध्येतुं च उत्साही स्यात्। षोडशे वयसि विवाहे वृत्तेऽपि तदानीं कन्याऽरजस्कैव षट्सप्तान्यतरवयस्का भवितुमर्हति। तस्या रक्षणमभिभावकैः श्वशुरादिभिराप्तैः क्रियते, तर्हि नातिप्रसङ्गः स्यात्। बालकयोर्विवाहे ब्रह्मचर्यहान्यादिभिया विवाह एव न कार्य इति मतन्त्वसाधु। शेषं विवाहविचारे प्राग्व्यक्तमेव।

आन्वीक्षिकीत्रय्योः वार्तानीत्योश्चान्तरम्

आन्वीक्षिक्यादि समस्ता विद्या ज्ञानविद्या इत्युक्तम्। अत्र हेतुर्बाल्ये विषयस्पृहा नास्ति। एवं सत्त्वेऽपि वार्ताराजनीतिविद्ययोः आन्वीक्षिकीत्रय्यपेक्षया स्थितमन्तरं जयमङ्गलाकृता "कर्तव्यप्रयोजनम्" इति वाक्येनोच्यते। तस्यायं भावः--आन्वीक्षिकी विचारं निरूपयन्ती तत्रैव विश्राम्यति। त्रयी नित्यकर्मानुष्ठानस्य विधायिका, तस्य सम्पत्तये सर्वाणि विहितानि अङ्गानि सदाऽऽवश्यकानीति न, यतः सा "आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी" इति न्यायं अनुसरति। वार्तानीतिविद्ये तु नैवम्, यतो यावत्पर्यन्तं सर्वाण्यङ्गानि न अनुष्ठीयन्ते यथावत्, तावत् तयोः साफल्यं न स्यात्। प्रत्युत प्रमादेन देशस्यैव हानिः स्यादिति बाल्यकाले कर्तव्यविधया ते ज्ञाते सत्यौ तारुण्येऽनुष्ठानपर्यवसायिन्यौ सफले भवत इति वार्तानीतिविद्ययोः आन्वीक्षिकीत्रय्यपेक्षया विशेषः स्मर्तव्यः।

नीतिवैलक्षण्यं तु तदपेक्षया नितराम्। यतः प्रतिव्यवहारं प्रतिपदं राजनीतिः ऊहनीया नवीना भवति। यतः पूर्वं निर्णीतो नीत्यर्थ उत्तरक्षणे निमित्तनाशनिमित्तोत्पत्तिभ्यां बाध्यते, अन्यश्चाभ्यूह्यते, अत्रापच्छेदन्यायो मीमांसाकैरुक्तो ध्येयः।

अत एव नीतेश्चपलत्वमभिधीयते कोविदैः। तज्ज्ञानार्थं राज्ञा एकाग्रेण सदा भाव्यमिति नीतिविदामाग्रहः। एवंविधस्य कल्पितस्य नीतिप्रयोगभेदस्य नाधर्मत्वम्, न्यायप्राप्तत्वात्।

अत्रेदं बोध्यम्—अपच्छेदन्यायः शास्त्रस्य स्वोत्तरभाविना लौकिकेन निर्णयेन बाधनार्थं न प्रवर्तते, शास्त्रबाधने लोकनिर्णयस्यासामर्थ्यात्। नीतिप्रयोगस्य क्षणे क्षणे नवीनमूहनं नीतिविदां गुरुमन्तरा नान्येन कर्तुमशक्यम्, "दण्डनीतिं वक्तृप्रयोक्तृभ्य" इति विधानात्, लोकस्य साधारणस्याशक्तत्वाच्च इति। एतत्प्रसङ्गे मल्कृतेदमपि विधीयते यद्विद्या अधीत्यापि उत्तरे वयसि नित्यं विद्यावृद्धसंयोगो नीतिविदा कार्यं इति।

इतिहासादिव्याख्या

तदानीन्तनीयं व्यवस्था हस्त्यश्वादिविद्याध्ययने दिवसपूर्वभागे, पश्चिमभागे इतिहासश्रवणे आत्मा नियोजनीयः। तथाकृते सति अन्नं जीर्णं भवति। इतिहासः पुराणेतिवृत्ताख्यायिकोदाहरणधर्मशास्त्रार्थशास्त्रेषु पर्याप्त्या सङ्केतितः। तत्र पुराणं सृष्ट्यादिज्ञानफलम्। इतिवृत्तं भूतपूर्वाणां चरित्रम्। एकसमये चक्रवर्तिनोरसम्भवाद् भूतपूर्वनिवेशः। आख्यायिकोदाहरणं पञ्चतन्त्रादि। तेन सृष्टिकालादारभ्य अद्यावधि अनुस्यूतः पशुषु विद्यमानो धर्मो नासुग्रहः। 'यथा शुनो निद्रा तथा राज्ञा निद्रा गृहीतव्या' इति। इतिहासोऽपि पुराणोल्लिखितः प्रमाणम्। अतस्तस्य पुराणे सङ्ग्रहः कृतः। पुराणस्य नीतौ तात्पर्यं नास्ति इति ज्ञात्वा इतिवृत्तस्य पृथग् ग्रहणम्। तथा कार्यकारणभावघटकव्याप्तिनिर्णयाय दृष्टान्तत्वेन इतिहासस्योपयुक्तता ज्ञेया।

पुराणसम्बन्धिहाजरामतखण्डनम्

पुराणस्य धर्मप्रतिपादकत्वं "पुराणन्याय" इति याज्ञवल्क्यवचनात्, "सृष्टिप्रवृत्ती" इति जयमङ्गलोद्धृतवचनाच्च सिद्धम्। श्रीमद्भागवतेऽपि "मन्वन्तराणि सद्धर्मम्" इति व्याख्यानाद् उक्तार्थस्य संवादित्वमेव। ईशतत्त्वस्य प्राधान्येन प्रतिपादनपरेभ्यः पुराणेभ्यो धर्मशास्त्रस्य जीवस्वरूपविशुद्धिप्रयोजनकस्य पार्थक्येऽपि पुराणस्य धर्मप्रतिपादकत्वमव्याहतमेव। अत्र केचिदाहुः—पुराणं प्राचीनसमये सर्गप्रतिसर्गादिपञ्चलक्षणबोधकमासीत्। आधुनिकेषु पुराणेषु तु क्वचिद् धार्मिकसामाजिकविषया अपि प्रक्षिप्ताः। यदा प्रभृति धर्मबोधकत्वमेतेन साधितम्, तदा प्रभृति उपपुराणानां लक्षणं सर्गाद्यभूत्। पुराणे ऐतिहासिकीं दृष्टिमुपेक्ष्य कल्पनैवाश्रिता। तेनेदं सिद्धं भवति

यत्पुराणप्रतिपाद्यविषयो धर्मो नासीदिति । अत एव पुराणानां दशकलक्षणानि परिभाषैव इति । अन्ये तु पुरातनत्वं पुराणत्वमिति तल्लक्षणम् । अतः कोऽपि विषयः पुरातनः पुराणप्रतिपाद्यो भवितुमर्हतीति ।

अत्र विमृश्यते—सृष्टिप्रवृत्त्यादि लक्षणं जयमङ्गलोद्धृतं पूर्वपरम्पराप्राप्तम । अतो धर्मादिनिरूपणस्य उक्तलक्षणघटकत्वात् तद्विरोधिनवीनमतमसूयाबहुलमिव भाति । किञ्च, पुराणोक्तानां आख्यानत्वेन वेदोक्तत्वेन वा प्रामाण्यमिति विमर्शे प्रथमपक्षे आत्माश्रयो दोषः । द्वितीयपक्षस्तु इष्यत एव । कौटल्यभाष्यकृता सृष्ट्यादिप्रतिपादकत्वं प्रामाण्यं च पुराणानां परिचायकमिति वदता जयमङ्गलायां यद् वाक्यं स्मर्यते, तत्र स्थितेर्ग्रहणं कृतम् । तच्च जगत्परिपालनविषयम् । अत एव तदन्तर्गततया धातुवादादयोऽप्यत्रोक्ताः । तस्माद् वंशानुचरितस्य भूमिसंस्थानत्वेन व्याख्यानमाधुनिकानामयुक्तमेव । श्रीमद्भागवत उक्तानि दशलक्षणानि सृष्ट्यादिपञ्चविधलक्षणेन विरुद्धानि इत्यपि न, अनेकेषां लक्षणानां सम्भवात् । एतेन जयमङ्गलोद्धृतवचनप्रामाण्यात् पुराणे धर्मनिरूपणमर्वाक्कालिकमिति कथनं परास्तम् ।

धर्मस्य लोकस्थितिहेतुत्वम्

ननु पुराणेषु धर्मनिरूपणस्य परम्पराप्राप्तत्वेऽपि तस्य लोकस्थितिहेतुत्वं कथं मन्तव्यम् । यतो वेदाध्ययननिषेधमुखेनैव शूद्रा धर्मज्ञानेभ्यो वञ्चिताः । इष्टापत्तौ ते कर्तव्यज्ञानशून्याः स्युः । तन्न, पुराणद्वारा वेदोदितं धर्मं ते ज्ञातुमर्हा एव । न च एते धर्मशास्त्रमेव कुतो न पठेयुः ? धर्मशास्त्रे तन्निषेधश्रवणात् । न चैवं शूद्राणां कृतेऽयं निषेधः किं मूल इति शङ्क्यम् ? समाजान्तर्गतानां तेषां तेषां मतितारतम्यानुसारेण लाघवसौष्ठवे बुद्ध्वा वाङ्मयश्रवणादिमर्यादा मूलतया स्थापिता, यथा मीमांसान्यायं तदितरशास्त्राणि महता श्रमेण निष्कारणं वेदं च ये अधीतवन्तस्त एव धर्मशास्त्रे अधिकृताः, तत्रत्यानां वचनस्य समन्वयस्य अधीतवद्भिरेव कर्तुं शक्यत्वात् । एतत्समन्वय एकाग्रो विदग्धो मीमांसकः समर्थः । तस्य मनोरञ्जनमपि विवादेन वचनसमन्वयपूर्वकेणैव भवति । कारवः शिल्पादिकर्त्तारः कोमलहृदया न वादं कर्तुमर्हा इति तथाविधानां मनोरञ्जनाय पुराणश्रवणं विहितम् । एवञ्च यथा विद्वानेव तत्तत्पदे नियोज्यते राजनीत्या, तथा धर्मशास्त्रश्रवणाधिकारविषयेऽपि ज्ञेयम् । नन्वेवं धर्मशास्त्रेऽधिकृता अनाचारान्न निवृत्ता इति इतिहासतो ज्ञायते ? सत्यम् । ये अनाचाराः समस्तलोकसम्मता नभूवुस्तेषां पालनं न दृष्टदोषावहम् इति राजनीतिमतम् । सत्यप्येवं लोको

यदि अनाचारान्निवर्तयितुं कश्चन प्रभवेत्, तदा तु अनाचारनिषेधो भवितुमर्हः। तत्र राजनीत्या प्रयत्नो विधेयः।

इतिवृत्ताख्यायिकोपयोगः

चक्रवर्तिपदेऽधिष्ठानम् एकदा एकस्यैव सम्भवति, तेनासम्भावनाविपरीतभावनयोर्निरासार्थं पूर्वजानां राज्ञामितिहासेनैवेतिवृत्तं ज्ञातव्यं भवतीति इतिवृत्तं पृथग्वर्णितं पूर्वोक्तं स्मर्तव्यम्। नीतिवर्णितस्य साध्यसाधनभावस्य निर्णयाय इतिहासे दृष्टान्ततया जागरूकेऽपि विधेये कर्मणि स्वकृतिसाध्यत्वमनवगतमेव भवति, अतस्तदवगमाय पृथक्तया तन्त्राख्यायिकोक्ता। तत्र पशूनां चरित्रं प्राधान्येन स्वाभाविकं वर्ण्यते, तेन कृतिसाध्यतानिर्णयो नाशक्यः। यथा शुनो निद्राभङ्गः, अश्वानां ह्रेषास्वन इत्यादि उक्तमेव। क्वचिदैतिहासिकेषु यदा उपपत्तिर्न ज्ञायते, तदानीं तेषां निर्णयाय लोकप्रसिद्धाऽऽख्यायिकाऽपि युज्यते। अत्रोदाहरणं ४४७ पृष्ठे द्रष्टव्यम्। पशूनामुदाहृतिर्मानवेन कथमनुकार्या इति तु न शङ्क्यम्, मनुष्यः पाशवं सर्वविधं कर्म कर्तुं शक्त इति वैज्ञानिकैः शारीरके निर्णीतत्वात्।

धर्मशास्त्रसार्थक्यम्

यद्यपि पुराणेनैव धर्मशास्त्रमन्तर्गतं भवति, तथापि पुराणश्रवणे तर्ककर्कशमतयो न प्रवर्तन्त इति तेषां बोधाय धर्मशास्त्रग्रहणं कृतम्। पुराणसार्थक्यमुक्तमेव इत्येव अधिकारिभेदेन धर्मशास्त्रपुराणयोः सार्थक्यान्नैकस्य वैयर्थ्यम्।

किञ्च, पुराणप्रतिपाद्यस्य ईश्वरस्य प्रसादाय पुराणे धर्मो निरूपितः। धर्मशास्त्रेणापि स एव निरूप्यते, तेनेदं स्पष्टं यत् पुराणसमवेतं ज्ञानमेव धर्मशास्त्रेणोपजीव्यते, तेन धर्मशास्त्रव्यपदिष्टो धर्मः सत्त्वभागित्युक्तं भवति। सत्त्वञ्च ज्ञानप्रभायामानन्दप्रभासंयोगः। तावतापि जीवः शक्तिमान् नोच्यते, अतः कृतिसाध्यतानिर्णयोऽप्यपेक्ष्यते। तन्निर्णयाय पुराणे आख्यायिका, इतिहासः, इतिवृत्तम्, धर्मक्रिया च निरूप्यन्त इत्यलम्।

विद्यासामर्थ्यम्

विद्यावृद्धसंयोगेन सर्वशास्त्राभिगमनम्, ततः प्रज्ञाष्टाङ्गा, ततो योग उत्साहः, अभिनिवेशपर्यवसायी तर्को वा, तत आत्मवत्ता आत्मसम्पत्, ततः परं स्वहितकर्तृत्वं सफलं भवति। यदि आत्मनि इमान् गुणान्नादधीत राजा, तदा तु राजद्वारा यथोचितनिग्रहानुग्रहसामर्थ्याभावेन राज्ञोऽस्तित्वमसत्प्रायं मन्तव्यम्।

अत्रेदं चिन्त्यम्—भारतीयविद्याध्ययने योगस्योपलब्धौ ईप्सितार्थानां प्रियमोद-प्रमोदानां सङ्गमनाद् गुरुभर्तृप्रसादाद् विश्वास्यत्वाद् अभिरूपभोगात् फलावश्यम्भावाद् बन्धुतृप्तेः सुभोजनाद् भारतीयनीतौ हर्षसामग्री पूर्णा वर्तते। विद्यान्तरे त्वयं लाभो नियतो नास्तीति चतुर्विधविद्यायामाह्लादजनकत्वसामर्थ्यं संस्मरणीयम्। एवं-रीत्या विद्याविनीतो भूत्वा आन्वीक्षिक्यादिना राजा प्रजायां विनयमुपदिशति, तर्ह्येव स उपदेशः कार्यपर्यवसायी भवति। विनयभावे प्राप्ते देवतानामधिष्ठानं राजशरीरम्। ततः प्रजाऽपि राजाऽऽज्ञां शिरसा वहति। तथाविधेन राज्ञा प्रणीतो दण्डोऽपि दण्ड्ये ग्लानिमपराधं प्रति उत्पादयति तत्सत्त्व एव स अपराधाद् निवर्तते, इत्येवंरीत्या प्रजायां विनये संवृत्ते राजा पृथ्वीं भुङ्क्ते, पालयति चेति शम्।

विश्वनाथशास्त्रिदातारः

विषयानुक्रमणिका

कौटलीयार्थशास्त्रस्थमूलस्यानुक्रमणिका

प्रथमोऽध्यायः

शास्त्रोद्देशः १–६९

प्रथमं प्रकरणम्

द्वितीयोऽध्यायः

विद्यासमुद्देशः

आन्वीक्षिकी-स्थापना (राजवृत्तिः) ७२-१६८

तृतीयोऽध्यायः

(त्रयीस्थापना) १७२-३५८

चतुर्थोऽध्यायः

(वार्तादण्डनीतिस्थापनम्) ३६६-३८६

द्वितीयं प्रकरणम्

पञ्चमोऽध्यायः (वृद्धसंयोगः) ३८७-४५२

❀

श्रीमूलाया विषयानुक्रमणिका

प्रथमोऽध्यायः

शास्त्रोद्देशः १-६९

प्रथमं प्रकरणम्

विद्यासमुद्देशः

द्वितीयोऽध्यायः (आन्वीक्षिकी-स्थापना) ७२-१६८

तृतीयोऽध्यायः (त्रयीस्थापना) १७२-३५८

चतुर्थोऽध्यायः (वार्तादण्डनीतिस्थापने) ३६६-३७१

द्वितीयं प्रकरणम्

वृद्धसंयोगः

पञ्चमोऽध्यायः ३७७-४५१



वैदिकसिद्धान्तसंरक्षिण्या विषयानुक्रमणिका

प्रथमोऽध्यायः

शास्त्रसमुद्देशः १-६८

द्वितीयोऽध्यायः (आन्वीक्षिकी-स्थापना) ७२-१७०

तृतीयोऽध्यायः (त्रयी-स्थापना) १७२-२५९

चतुर्थोऽध्यायः (वार्तादण्डनीतिस्थापने) ३६६-३८२

द्वितीयं प्रकरणम्

पञ्चमोऽध्यायः (वृद्धसंयोगः) ३८७-४५२



जयमङ्गलाया विषयानुक्रमणिका

प्रथमोऽध्यायः

शास्त्रोद्देशः १२—७०

द्वितीयोऽध्यायः

आन्वीक्षिकीस्थापना ७५--१७०

तृतीयोऽध्यायः

त्रयीस्थापना १८२-३५९

चतुर्थोऽध्यायः

वार्तादण्डनीतिस्थापने च ३६६-३८२

द्वितीयं प्रकरणम्

पञ्चमोऽध्यायः

वृद्धसंयोगः ३८८-४५१



जयमङ्गलाक्रोडपत्रस्य विषयानुक्रमणिका

प्रथमोऽध्यायः

शास्त्रोद्देशः १३-७१

द्वितीयोऽध्यायः

विद्यासमुद्देशः

आन्वीक्षिकीस्थापना ७५-१७१

तृतीयोऽध्यायः

(त्रयीस्थापना) १८१-३६५

चतुर्थोऽध्यायः

(वार्तादण्डनीतिस्थापने) ३६७–३८५

द्वितीयं प्रकरणम्
पञ्चमोऽध्यायः
(वृद्धसंयोगः) ३८९-४५१

❀

श्रीमूला-वैदिकसिद्धान्तसंरक्षिणी-जयमङ्गला-
जयमङ्गलाक्रोडपत्र-नीतिनिर्णीतिनाम्नीभिः
टीकाटिप्पणीभिः संवलितं

कौटिलीयमर्थशास्त्रम्

प्रथमो भागः

॥ श्रीविश्वेश्वरः शरणम् ॥

॥ श्रीगुरुः शरणम् ॥

श्रीमूला-वैदिकसिद्धान्तसंरक्षिणी-जयमङ्गला-जयमङ्गला-

क्रोडपत्र-नीतिनिर्णीति-नाम्नीभिः

टीकाटिप्पणीभिः संवलितं

कौटिलीयमर्थशास्त्रम्

प्रथमो भागः

विनयाधिकारिकं नाम प्रथममधिकरणम्

प्रथमोऽध्यायः

[मङ्गलम्]

ॐ नमः शुक्रबृहस्पतिभ्याम् ।

॥ ॐ मङ्गलमूर्तये नमः ॥

टी० गणपतिशास्त्रिभिः विरचिता

श्रीमूला

विघ्नेशं देवतां वाचं प्रणिपत्य गुरूनपि ।
व्याख्यानमर्थशास्त्रस्य कौटिलीयस्य कुर्महे ॥

अथ निखिलविद्याविचक्षणः स्वबुद्धिसामर्थ्यापहृतनन्दराज्यसिंहासनारोपणानुगृहीतचन्द्रगुप्तः कौटिल्यचाणक्यादिपर्यायपदवाच्यस्तत्रभवान् विष्णुगुप्ताचार्यस्त्रिवर्गसम्पत्तिहेतुभूतार्थार्जनोपायोपदेशप्रधानमर्थशास्त्रमारिप्सुः पूर्वाचार्यप्रमाणलक्षणं मङ्गलमाचरति—

'ॐ नमः शुक्रबृहस्पतिभ्याम्' इति ।

ओमिति माङ्गलिकः शब्दः । 'नम' इति प्रणामः । अस्त्वित्यध्याहारः । शुक्रबृहस्पतिभ्यां शुक्रोऽसुरगुरुः बृहस्पतिर्देवगुरुः ताभ्याम् । 'नमस्स्वस्ती'—(२, ३, १६)-त्यादिना चतुर्थी । तौ ह्यर्थशास्त्रप्रवर्तकेष्वाचार्येषु कूटस्थाविति तत्प्रणामोऽत्यन्तमुचितः । तत्र शुक्रप्रणीतमौशनसं नाम; यत्सङ्ग्रहात्मा शुक्रनीतिः, बृहस्पतिप्रणीतं तु बार्हस्पत्याख्यमिति द्रष्टव्यम् । अत एव शास्त्रकर्तृत्वादाचार्यत्वविवक्षया तयोर्देवतात्वाविवक्षणाद् "देवता द्वन्द्वे च" (६, ३, २६) इत्यानङिह द्वन्द्वो न कृतः ।

श्रीराजेश्वरशास्त्रिद्राविडव्याख्याता

वैदिकसिद्धान्तसंरक्षिणी

मङ्गलाचरणम्

श्रीगुरुचरणद्वन्द्वस्मरणं कृत्वाऽर्थशास्त्रस्य ।
वैदिकसिद्धान्तसंरक्षिणीति टीका सपत्रिका क्रियते ॥

ग्रन्थस्य प्रारिप्सितस्य निर्विघ्नपरिसमाप्तये मङ्गलमाचरितमुपनिबध्नाति ॐ नमः इत्यादिना ।

ॐकारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

इत्युक्तदिशा श्रवणमात्रेण ॐकारस्य मङ्गलरूपताऽवसेया । अथवा ओमिति शुक्रबृहस्पत्योर्विशेषणम् । ब्रह्मरूपाभ्यामिति तदर्थः । शुक्रेति । भीष्मेण इदमेवौशनस-सम्मतमर्थशास्त्रमद्य यावत् प्रचलितमस्ति इति महाभारते उक्तत्वात् तत्समयपर्यन्त-मौशानसशास्त्रस्य प्रचारनिश्चयात् सञ्जीवनीमन्त्रस्य शुक्रेणैवोपलब्धत्वाच्चादौ तन्नामग्रहणम् । शुक्रस्य अल्पाच्तरत्वात् पूर्वनिपातः इति तु जयमङ्गला ।

मङ्गलप्रयोजनम्

एतन्नमस्कारः गुरुनमस्कारवत् भगवन्नमस्काररूपः शुक्रबृहस्पत्योः भगवत्तेजोंशरूपत्वात् सिद्ध्यति । तयोस्तदंशत्वं भगवद्गीतायामुक्तम्—

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् । (अ० १० श्लो० २४)
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥
(अ० १० श्लो० ३७) इति ।

तथा च शुक्रे बृहस्पतौ च वर्तमाना भगवत्कला नमनेन प्रसन्ना सती बुद्धि-स्फीतिं प्रतिभां च विस्तारयिष्यतीति सिद्ध्यति ।

ग्रन्थकर्तरि धृतिः

अत्र च मङ्गलस्य निबन्धनेन नृपतन्त्रार्थमपेक्षणीया धृतिः मन्त्रिणि ग्रन्थकर्तरि अस्तीति स्फुटीभवति । तस्याः खलु सप्तसु राज्याङ्गेषु महती आवश्यकता वर्तते । तथाहि—लोकतन्त्रपराधीनमेव हि नृपतन्त्रम् ।

वित्तं बन्धुर्वयः कर्म विद्या भवति पंचमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥
(म० स्मृ० अ० २ श्लो० १३६)

इति मनूक्तदिशा धनिकैः, बन्धुभिः, वयोज्येष्ठैः, कर्मकुशलैः, विद्यावद्भिश्च यदा मान्यो भवति तदैव तत्र नृपत्वं सम्भाव्यते । एतत्कर्तृकमान्यतायामेव च

शुक्लपक्षे कला आददानः शशाङ्क इव महीपतिश्चिरं वर्धते नान्यथा। लोकतन्त्रं च सर्वासिमतप्राप्तिरूपमेव। लोकसम्मतत्वरूपलोकमतलाभश्च सत्वारोग्यशीलबलास्तब्धत्वाचापल्यवतामेव चिरस्थायी भवति इत्यग्रे स्फुटीभविष्यति। उक्तेषु सत्वादिगुणेषु सत्वमेव प्रधानतममभ्यर्हितमेतस्मिन् शास्त्रे तस्यैव राज्यफलहेतुत्वात्।

सत्त्वं धृतिः

तत्र सत्वस्वरूपं "व्यसने अभ्युदये च यदविकारकर"मिति कामन्दकीयव्याख्यायामुक्तं, धृतिस्वरूपविवेचने "अप्राप्तातीतनष्टानामलाभेऽनभिशोचनमिति" भावप्रकाशने, 'लोभशोकभयादिजनितोपप्लवनिवारणकारणीभूतश्चित्तवृत्तिविशेषो धृति'रिति रसगंगाधरे चोक्तम्। तत्त्रितयपर्यालोचनायां सत्वं धृतिभावरूपमिति सिद्ध्यति। धृतिः किंस्वरूपेत्यालोच्यमाने—

"विवेकः श्रुतिसंपत्तिर्गुरुभक्तिस्तपस्विता।
एते विषयभावेन करणत्वेन च स्थिताः॥
इष्टाधिकानामिष्टानां लाभस्तु विषयत्वतः।
व्रीडा करणभावेन विभावा यत्र सम्मताः॥
प्राप्तभोग्योपभोगस्य त्वप्राप्तातीतभोगयोः।
जीर्णे नष्टे चाविषादो नानुशोचनमित्यपि॥
अनुभावद्वयं यत्र धृतिं तां ब्रुवते बुधाः।"

इति सङ्गीतरत्नाकरोक्तदिशा विवेकश्रुतिसंपत्ति-गुरुभक्ति-तपस्वितैतच्चतुष्टयोद्देश्येनैतच्चतुष्टयं करिष्य इति संकल्पो धृतिरित्युक्तम्।

कौटिल्ये धृतिः

अर्थशास्त्रस्य प्रस्तुतस्यावलोकनेनैव धृत्यन्तर्गतः ग्रन्थकर्तुर्विवेकः स्फुटीभवति, तत्र तत्राक्षेपसमाधानानां बहुलतरमुपलब्धेः।

श्रुतिसम्पत्ति"र्योऽधीतवान् सुचतुरश्चतुरोप्येकवेदवत्" इति कामन्दकवचनतः स्फुटा।

"कुलशतमप्रतिग्राहकाणामिति लोकप्रवादः" इति जयमङ्गलोक्तेः अभिचाराद्यौपनिषदिकप्रकरणस्य सफलानुष्ठातृत्वात् तस्य तपस्वित्वं निर्विवादम्। मङ्गलग्रन्थेनानेन तस्य गुरुभक्तिरपि धृतिस्वरूपघटिका स्फुटीभवति।

टीका-प्रयोजनम्

यद्यप्यर्थशास्त्रे दुरूहाणां पदानामर्थनिर्णयः परम्परानुसारेण जयमङ्गलाभिक्षुप्रभमति-प्रतिपदपञ्चिका-नयचन्द्रिका-नीतिनिर्णीतिप्रभृतिटीकासु कृत एवेति नूतनस्यास्य टीकाग्रन्थस्यानावश्यकत्वं प्रतिभायात्, तथापि टीकाग्रन्थेषु अवश्यं कर्तव्येषु

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्॥

इति पद्योक्तेषु आक्षेपसमाधानमप्येकं कर्तव्यमस्ति। आक्षेपाश्च पुनः पुनर्नूतना उद्भूता भवन्ति, तेषां समाधानार्थं पुनरपि अन्यस्य टीकाग्रन्थस्य निर्माणमावश्यकं भवति। अन्यथा ग्रंथे अप्रामाण्याशङ्काकवलितत्वानुपयोगित्वादिभिः दुष्टत्वमापद्येतेति नूतनाक्षेपसमाधानाय चिकीर्ष्यमाणस्यास्य "वैदिकसिद्धान्तसंरक्षिण्या"—ख्यस्य टीकाग्रन्थस्य प्रयोजनवत्वं स्फुटं भवेत्।

अर्थशास्त्र-प्रयोजनम्

अर्थशास्त्रारम्भस्य प्रयोजनं किमिति चेदुच्यते। स्थापितेऽपि लोकतन्त्रे लोकमतं शासनसञ्चालनायापेक्षितं स्वयमेव न प्राप्यते। तत् कथञ्चित् प्राप्तमपि अचिरादेवाननुकूलं भवति सत्वस्य शीलस्य चाभावे। तथा सति स्तब्धता, मानः, परस्परविरुद्धार्थकबुद्धीनामव्यवधानेनोत्पत्तिरूपा चपलता च नैयत्येन भवति। एतेषु दोषेषु समुद्भूतेषु सत्सु भ्रान्तिप्रमादविप्रलिप्सादयो दोषाः स्वयमेवोत्पद्यन्ते। तेन लोकमतं प्रतिकूलं भवति। नियतफलप्राप्तिरपि शास्त्रमन्तरा न भवितुमर्हति, सन्दिग्धे फले प्रवृत्तिस्तु नीत्यपसिद्धान्तः। अतः फलप्रमाज्ञानार्थं शास्त्रारम्भस्य आवश्यकता। शास्त्रप्रसूतं ज्ञानं पूर्वपरम्परया सर्वज्ञेश्वरात् प्राप्तं यत् तदेव ज्ञानं यद्यस्मन्निष्ठं भवति तदा तत्र नित्यज्ञानावृत्तिविषयताशून्यत्वरूपं प्रमात्वमक्षुण्णं भवति।

सत्वपरिष्कारः

किंच शास्त्रप्रसूतमीशसमवेतज्ञानसमानाकारम् ज्ञानं अस्मन्निष्ठं चेत् सत्वाय भवति इति प्रत्यभिज्ञादर्शने उक्तम्।

स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
मायातृतीये ते एव पशोः सत्वं रजस्तमः। इति

यदा किल ईशसमवेतं ज्ञानमस्माकमानन्दरूपतया भातं भवति तदा तत् भानं सत्वपदेन बोध्यते। तथोक्तं भावप्रकाशने—

ज्ञानप्रभा च सानन्दा तस्याः सत्वं प्रजायते। इति

सत्वं राज्यमूलम्

एवं च एतस्य सत्वस्य बलेनैव—

दिव्येन्द्रजालरम्यार्थदर्शनाभीष्टसिद्धिदः।
अद्भुतः सोऽभिनेतव्यः श्लाघारोमाञ्चदानतः॥

इति नाट्यदर्शनोक्तरीत्या रम्यार्थदर्शनाभीष्टसिद्धिद्वारा जनश्लाध्यतादिकमुपलभ्य राजा सर्वेषां ध्यानं स्वस्मिन् प्रापयति, इति सत्वमेव शास्त्रप्रसूतज्ञानोपलब्धं लोकतन्त्रमूलभूतमिति सिद्ध्यति। तदेवोक्तं कामन्दकीयजयमङ्गलायाम्—

विद्याप्रतिबद्धत्वाल्लोकस्थितेः। इति। (नी० स० २-१)

सत्वं विनाऽविश्वास्यता

यद्यपि पूर्वोक्तसत्वविधुरेषु राज्यसञ्चालकत्वमिदानीं क्वचित् दृश्यते तथापि तेषु लोकमतं पूर्ववदेवानुकूलं स्यादिति वक्तुं न शक्यते। वियतनामयुद्धादिस्वरूपस्य पौण्डमुद्राया अवमूल्यनाद् युत्तरघटनाया देशे दुरवस्थाया वर्तमानायाः सत्याग्रहादिसमस्यायाः स्वरूपस्य च प्रदर्शनेन प्रजाया असात्विकेषु राज्यसञ्चालकेषु अविश्वास्यत्वस्य विवर्धमानस्योपलब्धेः।

शास्त्राभावेऽपि प्रवृत्तिः तत्र दोषश्च

अथ शास्त्राध्ययनादिकं विनापि—

अर्थशब्दवपुः काव्यं रसैः प्राणैर्विसर्पति।
अञ्जसा तेन सौहार्दं रसेषु कविमानिनाम्॥
न तथार्थशब्दोत्प्रेक्षा श्लाघ्या काव्ये यथा रसः।
विपाकक्रमध्याम्रमुद्वेजयति नीरसम्॥

इत्युक्तन्यायेन रसात्मकप्रतीतेर्लोकेषु उत्पादयितुं शक्यतया तया लोकसम्मतत्वप्राप्तिसम्भवेन शास्त्रस्यारम्भो निष्प्रयोजन एवेति चेदत्रोच्यते।

तत्र तावदादौ रसप्रतीतिः कथं भवतीति चिन्त्यते। तथाहि—
तां प्रति विभावानुभावयोर्व्याप्तिवासना, स्थायिभावववासना, काव्यार्थभावना चेति समूहः कारणम्[1]।

(का० प्र० ३-४-४ अभिनवमतम्)

तत्र विभावानुभावव्याप्तिवासना स्थायिभाववासना च प्रसिद्धैव। काव्यार्थभावना तु चित्रतुरगन्यायेन नाटकदर्शिनामात्मनि संजायमाना प्रतीतिः सा च चित्रादौ चित्रत्वतुरगत्वोभयव्यासक्तैकप्रकारताकचित्रतुरगोभयव्यासक्तैकविशेष्यताका भवति। एवं नाट्यदर्शने रामत्वनटत्वोभयपर्याप्तैकप्रकारताकरामनटोभयपर्याप्तैकविशेष्यताका सामाजिकेषु भवति। सेयं साहित्यस्य महान् व्यापारः। एतद्विषये विस्तरस्तु श्रीगोकुलनाथोपाध्यायकृतकाव्यप्रकाशव्याख्यायां द्रष्टव्यः।

इदमेव वासनात्रयं रसाभासमप्युत्पादयितुं समर्थम् भवति तदुत्पादनन्त्वनुचितम्, औचित्यानौचित्यभेदेन तयोर्विशेषात्। तथाहि—

विभावानुभावव्याप्त्यादिसंस्कारः यदि प्रमाजन्यो भवेत् तर्हि तज्जन्या प्रतीतो रस इत्यभिधीयते। यदि च उक्तव्याप्त्यादिसंस्कारो भ्रमजन्यो भवति तदा तज्जन्या प्रतीती रसाभास इति। सत्यामेवं विधायां स्थितौ यदि शास्त्रजन्यं ज्ञानं न भवेत् तदा सत्यत्वबुद्ध्या अयथार्थेषु उक्तव्याप्तिसंस्कारस्योद्बोधेन रसाभासप्रतीतेरुत्पत्यो-

---

१. तदुक्तं काव्यप्रदीपव्याख्यायां तत्सदुपाख्यवैद्यनाथविरचितायाम्—'एवं च रत्यादिनिरूपितविभावादिनिष्ठव्याप्तिग्रहजन्योद्बुद्धसंस्कारः काव्यार्थभावनाजन्यः संस्कारः रत्यादिवासना चेति त्रयं रसाभिव्यक्तिहेतुः' इति।

पहास्यत्वं स्यात् । अतः प्रमात्मकव्याप्त्यादिज्ञानार्थं शास्त्रस्यावश्यकता स्वीकर्तव्या । तथा चार्थशास्त्रमपि तन्न्यायेन प्रमितव्याप्त्यादिनिर्णयायावश्यमारम्भणीयमिति सिद्ध्यति ।

नीतिशास्त्रेण सत्वोत्पत्तिः

एवंरीत्या ईशसमवेतज्ञानप्रभा भावप्रकाशनोक्ता उपर्युद्धृता यदि शास्त्रचिन्तनेन प्राप्यते तर्हि तेन सत्वलाभ इति निर्णीतम् ।

अत्रेदं चिन्त्यम् । यत् सत्वमदृष्टद्वारा सहकारीति एतत्सहकृतं ज्ञानं धृतिसंवलितं प्रातिभं यथार्थमेव उत्पद्यते । तदुक्तं वैशेषिकप्रशस्तपादभाष्ये—

आम्नायविधातॄणामृषीणामतीतानागतवर्तमानेषु अतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगात् धर्मविशेषाच्च यत्प्रातिभं यथार्थवेदनमुत्पद्यते तदार्षमित्युच्यते इति[1] ।

योगसूत्रेऽपि "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" इति वदता पतञ्जलिना स एव विषय उक्तः ।

'शौचसन्तोषे'ति सूत्रे तपस्स्वाध्यायेश्वरप्रणिधानानां नियमेषु अन्तर्भावितानां पुनर्ग्रहणं धर्मविशेषस्याशुलाभप्रदर्शनार्थम्[2] । इति ।

आनन्दप्रभोपयोगः

अत्रेदमाकूतम् । शास्त्रप्रसूतज्ञानप्रभा उपर्युक्तसत्वपदार्थघटकस्य आनंदप्रभात्मकमनःप्रसादस्याभावे सुखाय शान्तये वा न भवति । यतो हि-शास्त्रप्रसूतज्ञानोपलब्धावपि ज्ञानिषु यदि शास्त्राज्ञामुल्लङ्घ्य विषयप्रवृत्तिः रागद्वेषमूला तर्हि सा दोषजन्यत्वात् अजितेन्द्रियत्वे पर्यवसायिनी न प्रसादजनिका भवति ? रागद्वेषयोरतिप्रचुरत्वात् । तदुक्तं—"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः" इति ।

ईशसमवेतशास्त्रानुमोदितज्ञानपारतन्त्र्येण जायमाना प्रवृत्तिस्तु न रागद्वेषमूलिका भवति । एवं स्थिते जितेन्द्रियत्वं, सत्वे स्थितिञ्च निष्पादयन्तीयं प्रवृत्तिः मनःप्रसादं प्रापयति तेन सुखं शान्तिश्च भवतः । तदुक्तं भगवद्गीतायाम्—

---

१ अत्र भाष्ये धर्मविशेषः यथार्थार्षज्ञानकारणमिति यदुक्तं-तस्य स्फुटीकरणं न्यायकन्दल्यां-तपःसमाधिजो धर्म इति कृतमस्ति । तद्यथा-तस्योत्पत्तिरनुपपन्ना कारणाभावादित्यनुयोगे इदमुक्तं धर्मविशेषादिति । विशिष्यत इति विशेषः धर्म एव विशेषो धर्मविशेषः विद्यातपःसमाधिजः यो धर्मः तस्मात् प्रतिभोदयः । इति ।

२ तदुक्तं नारायणतीर्थैः-यद्यपि योगाङ्गेषु नियमे शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि पूर्वोक्तानि तथापि प्रकृतत्रयाणां दृष्टादृष्टद्वाराऽऽशुकायेन्द्रियमनोजयादिविशिष्टफलश्रवणात् तद्दर्शनाच्च ततः पृथगुक्तिरिति मन्तव्यम् ।

(यो० पा० २ सू० १ इति) ।

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥[1] इति

नीतिशास्त्रेण सत्वोपलब्धिः

ननु नीति-शास्त्रस्य विचारे क्रियमाणे सति सत्वगुणः किमुपलब्धुं शक्यः ? इति प्रश्ने शक्य एवेति वदामः । तथा हि—

उपर्युक्तगीतोक्तदिशा मनःप्रसादः आत्मवश्येन्द्रियाणां भवति । स च हर्षादनतिरिक्त इति निर्णीयते, भावप्रकाशने "हर्षो मनःप्रसादः स्या"दित्यादिना उपलम्भात्[2]—

तथा च नीतेः वक्ष्यमाणस्वरूपे पर्यालोचिते उपर्युपवर्णिता सर्वविधाऽपि हर्षसामग्री तदनुष्ठाने वर्तते यतः प्रमाणत्रयं, देशकालानुकूल्यं शक्तिं च पर्यालोच्य नीतिमता अग्रे पदं निधातव्यं भवति तेन फललाभो नियतः । अतः अत्रानन्दप्रभारूपो मनःप्रसादोऽस्ति न वेति सन्देहस्यावसर एव नास्ति । ध्वनितं चैतन् नीतिसारे- "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती" इत्यत्र[3] ।

---

१. मधुसूदनी-टीकायामपि "रागद्वेषाभ्यां वियुक्तैर्विरहितैरिन्द्रियैः श्रोत्रादिभिर्विषयान् शब्दादीननिषिद्धांश्चरन्नुपलभमानः, प्रसादं प्रसन्नतां चित्तस्य स्वच्छतां परमात्मसाक्षात्कारयोग्यतामधिगच्छति । रागद्वेषप्रयुक्तानीन्द्रियाणि दोषहेतुतां प्रतिपद्यन्ते । मनसि स्ववशे तु न रागद्वेषौ । तयोरभावे च न तदधीनेन्द्रियप्रवृत्तिः । अवर्जनीयतया तु विषयोपलम्भो न दोषं वहतीति न शुद्धिव्याघात इति भावः । एतेन विषयाणां स्मरणमपि चेदनर्थकारणं सुतरां तर्हि भोगः तेन जीवनार्थं विषयान् भुञ्जानः कथमनर्थं न प्रतिपद्येतेति शंका निरस्ता ॥" इति ।

२. हर्षो मनःप्रसादः स्यादीप्सितार्थोपसंगमात् ।
इष्टसंगमनाद् देवगुरुभर्तृप्रसादतः ॥
अभिरूपोपभोगाच्च वन्धुतृप्तेः सुभोजनात् ।
अचिन्त्येष्टार्थसंपत्तेर्जायते सर्वदा नृणाम् ॥
रोमाञ्चालिङ्गनस्वेदैर्लालितैः करताडनैः ।
नेत्रवक्त्रप्रसादैश्च भाषितैर्मधुरैरपि ।
त्यागदानप्रबन्धैः स्युरनुभावास्तु हर्षजाः ॥ इति ।

३. तासु प्रवर्तमानासु तद्विघ्ननिवारणार्थं दण्डनीतिः ।
सा च शाश्वती नित्यस्थितिका तस्याः प्रवर्तमानाया विघ्नेनानुच्छेदात् इति ॥
(ज० नीति० स० २)

२

तस्मान्नीतिं पर्यालोच्य अनुष्ठिते ज्ञानप्रभासम्मिलितानन्दप्रभातमकहर्षरूपसत्त्वस्योपलब्धिर्नियतैव ।

साधूनां प्रिया नीतिः

अत एवात्र सत्त्वस्य नैयत्येन नीत्यनुष्ठाने लाभात् साधवः कस्मिन्नप्यवसरे नीतिं परित्यक्तुन्नाभिलषन्ति इति तत्स्वभाव उपवर्णितः 'समशीतल'' इत्यादिनाग्रन्थेन मानसरामायणे[1]—

सत्त्वगुणस्यास्पदं नीतिमत्त्व येन धार्यते तस्य निर्मलं मनः गृहत्वेन वृणुते भगवानीश्वर इति तुलसीदासकृतमानसरामायणाज्ज्ञायते[2] । एवं तस्मै यो द्रोग्धि स ईशस्य कृपापात्रमपि न भवितुमर्ह इत्यपि सिद्ध्यति ! य ईशकृपापात्रं स एव विश्वास्यः सर्वैः प्रणम्यो भवति । तदुक्तं भागवते —

यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः ।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम् ।। इति । (भा० ७)

तथा-चेश्वरे प्रसन्ने योगक्षेमौ भविष्यतः इति किन्नु वक्तव्यम् !! अत एव—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।। (गीता)

इति उपपन्नं भवति। परन्तु मिथ्याज्ञानजन्यवासनया "भीष्मः खल्वयमपवर्गः बहुभद्रकं मे लुप्येत" इति मत्वा नीतिमागमप्रमाणमनुमानं प्रत्यक्षं वा ये अवहेलयन्ति तेषां वचसि कृतौ वा निष्फलत्वात् अप्रमाणिकत्वात् असभ्यत्वात् अश्रद्धेयत्वाच्च गौरवं किं भवेत्? इति सुधिय एव जानन्तु ।

तदाह श्रुतिरपि-"यस्तित्याज सखिविदं सखायं न तस्य वाच्यपि भागो अस्ति यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम्" इति । अतः साधवः मिथ्याज्ञानजन्यां वासनां तर्कबहुलेन मनसा दूरीकृत्य स्वस्मात् नीतिमत्वरूपं सात्त्विकत्वं नापसारयन्ति ।

सत्वारोग्ययोः सम्बन्धः

आरोग्यदृष्टया विचार्यमाणेऽपि इदमेव सिद्ध्यति यत् आनन्दप्रभासहचरितज्ञानप्रभया नानाविधा मनसो रोगा दूरीभवन्ति । तदुक्तं भावप्रकाशे

---

१. सम शीतल नहि त्यागहि नीती ।
सरल सुभाउ सबहि सन प्रीती ।।
कोटि विघ्न ते सन्तकर मन जिमि नीति न त्याग । इति ।

२. नीति निपुन जिन्हके जग लीका ।
घर तुम्हार तिन्ह कर मनु नीका । इति ।
सम दम नियम नीति नहिं डोलहि ।
परुषवचन कबहूँ नहिं बोलही । इति (उ० दो० ३७)

आयुर्वेदीये आस्तिक्यमित्यादिना[1]।

अत्रेदं बोध्यम्—उपर्युक्ता हर्षसामग्री सर्वापि नीतौ वर्तते इति यथा आनन्दप्रभोच्छलनं अत्र साहजिकम् तथा ईशप्रभायाः शास्त्रद्वारा ग्रहणाज् ज्ञानप्रभापि विवेकस्वरूपा नासुलभा इति हेतोः नीत्यनुष्ठाने एकाग्रतापि सिद्धैव। तत्सिद्धत्वे सत्वगुणस्य अभिवृद्धिः भवति। सा चेयं द्विविधा भवति, निष्कामोपासनया सकामोपासनया च। तत्र यदि सत्वगुणवृद्धिः सकामस्य उपासनाविषयस्स्यात् तर्हि सा तावन्मात्रमेव फलं दत्वा विश्राम्यति। यदि च निष्कामस्य उपासनाविषयः स्यात् तर्हि तेन सञ्चीयमानमदृष्टं सर्वं सम्पादयितुं समर्थं भवति इति जयमङ्गलाव्याख्याने समाधिनिरूपणावसरे वक्ष्यते।

तस्य बाह्यं स्वरूपम् आस्तिक्यं प्रविभज्यभोजनमित्यादि टिप्पण्यां अनुपदमुक्तम् स्मर्तव्यम्।

सत्वगुणाभावे दोषः

यत्तु ज्ञानप्रभामुपेक्ष्य आनन्दप्रभामेव स्वायत्तीकर्तुं केचिद् वाञ्छन्ति। तत्तु न युक्तम्। तत्र पूर्वमपेक्षितसत्वेनोक्तायाः एकाग्रतायाः समाधौ अभ्यर्हितायाः अभावः रजस्तमसोरभिवृद्ध्या आपद्येत। तथा विवेकाभावेन च निष्फलत्वमपि सम्भाव्यते। नैतावन्मात्रेण विश्रान्तिः, किन्तु रजस्तमसी मनसः कामक्रोधाद्यनेकदुरपनेयरोगकारणभूते भवतः इति अग्रे निरूपयिष्यामः। तेभ्यो नयहीनत्वं नियतं स्यात्। ततः जनापरागोऽपि अनुषक्तः इति। अतो ज्ञानप्रभाप्यपेक्ष्यते आनन्दप्रभायाम्।

नीतिमत्ता येषु वर्तते ते यथा सन्त इति प्रोच्यन्ते तथा ऋषिशब्देनापि व्यवह्रियन्ते शास्त्रादौ। तद्यथा–

वंशे विशालवंशानामृषीणामिव भूयसाम्। इति।

(नी० सा० १-२)

नमः शास्त्राय महते त्रिवर्गस्यैकयोनये।
नमस्तस्य प्रणेत्रे च कौटिल्याय महर्षये॥ इति च।

(नी० स० ज० १-१)

शास्त्रकृत्सु ऋषिसंज्ञकत्वं नाधुनिककल्पितं, अपि तु रूढमिति शब्दकल्पद्रुमे

---

१. आस्तिक्यं प्रविभज्य भोजनम् अनुत्तापश्च तथ्यं वचो।
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानं च निर्दम्भता।
कर्मानिन्दितमस्पृहं च विनयो धर्मः सदैवादरात्।
एते सत्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः। इति।

व्यक्तम् विद्याविदग्धमतय इत्यादिना[१]।

यत्किलापस्तम्बेन धर्मसूत्रे १।२।५।३ अवरे ऋषयो न भवन्ति इत्युक्तम्। तत्तु वेदस्य प्रथमाध्येतृत्वं इति व्याख्यानाभिप्रायेण बोध्यम्। तदुक्तं किरणावल्याम्-प्रथमं वेदाध्येतारः इति[२]।

श्रीशङ्करार्यविरचिता

जयमङ्गला

पूर्वमतानि यथेदं सङ्गृह्यैकं चकार कौटल्यः।
टीकान्तराणि दृष्ट्वा सद्व्याख्यानं समुद्धृत्य॥
क्रियते तथा मयापि त्यक्त्वा च ग्रन्थविस्तरं पूर्णा।
बालहिता टीकेयं दुर्ज्ञेयं यद् विततय सर्वमिदम्॥

प्रेक्षावतां पूज्यपूजनात् सर्वारम्भा अविघ्नितप्रसरा भवन्तीति मन्यमान आह—'नमः शुक्रबृहस्पतिभ्याम्' इति। पूज्याश्च वक्तृत्वप्रयोक्तृत्वैश्वर्ययोगात् त्रिविधाः। तत्र ये शास्त्राणां वक्तारः ते तच्छास्त्रव्यवहारिभिः पूज्यन्ते, ये शास्त्रार्थानां प्रयोक्तारः ते तन्त्रानुवर्तिभिः पूज्यन्ते। ये च अणिमाद्यैश्वर्ययुक्ताः, ते दृष्टादृष्टार्थानुग्राहिणो देवा अत्यन्तं पूज्यन्ते। अनयोश्च त्रितयमपि पूजनीयत्वं निमित्तमस्ति। तत्र कृत्स्नशास्त्रप्रणयनाद् वक्तारौ, देवासुराणां च सन्धिविग्रह-प्रयोगात् प्रयोक्तारौ, ऐश्वर्ययोगाच्च देवौ इति मन्यमान इह कौटल्यस्तावेव नमस्कृतवान्। नमः शब्दयोगाच्चतुर्थी। नमः-शब्दश्च मानसीं भक्तिम् अनुमापयति। पाण्यादीनां साधनानां बाह्यां पूजां प्रदर्शयति। अत्र "आनङृतो द्वन्द्वे" (६-३-२५) "देवताद्वन्द्वे च" (६ ३-२६) इति नानङ्। पुनर्द्वन्द्वग्रहणात् पूर्वनिर्दिष्टानामेवेति स्थितेः। यथा सूर्याचन्द्रमसोरिति चन्द्रसूर्ययोरिति च व्यवहारौ। ततश्च शुक्रस्या-ल्पाच्तरत्वात् पूर्वनिपातः।

---

१. ऋषति प्राप्नोति सर्वान् मन्त्रान् ज्ञानेन पश्यति, संसारपारं वा इति ज्ञानसंसारयोः पारगन्तः शास्त्रकृदाचार्यः। विद्याविदग्धमतयो रिषयः प्रसिद्धाः इतिभरतवाक्यादृषिशब्दो रिषिरित्यपरपर्यायत्वेनापि बोध्यते। तस्य व्युत्पत्तिर्यथा मत्स्यपुराणे—

ऋषि हिंसागतौ धातुः विद्यात्सत्यवचः श्रुतिः।
एष सन्निचयो यस्माद् ब्राह्मणश्च ततस्त्वृषिः। इति। (शब्दकल्पद्रुमे)

२. ऋषीन् गौतमभरद्वाजादीन् पितॄन् कश्यपच्यवनादीन् देवगणान् कूष्माण्डादीन्। गणशब्दः प्रत्येकमभिसम्बद्ध्यते। प्रजापतयः तत्तत्प्रतिनियतप्रजास्रष्टारः। मनवो राजधर्म-प्रवर्तयितारः। देवा हविर्भागभोक्तारः। ऋषयश्च प्रथमवेदाध्येतारः किन्नराः स्वधाभागहारिणः। गणा बलिभागिनः। इति। (प्र० भा० टी० सृष्टिसंहारप्रकरणम्)

पण्डितराजराजेश्वरशास्त्रिद्राविडव्याख्यातं

जयमङ्गलाक्रोडपत्रम्

क्रियते इति। यथा उद्देशनिर्देशात्मकं ग्रन्थम् चाणक्यः सर्वस्यार्थशास्त्रस्य पारं विजानानः संक्षेपेण षट्श्लोकसहस्रेण जगाद्। तथैवायं टीकानिर्माता सर्वाण्यपि पूर्वाण्यर्थशास्त्रव्याख्यानान्याकलय्य संक्षेपतः जयमङ्गलामिमां टीकां रचितवानित्यस्यापि समस्तार्थशास्त्रटीकाभिज्ञत्वं, मूलकृतः समस्तार्थशास्त्राभिज्ञत्वमिव विशदीभवति।

यतः पूज्यत्वं विना नमनं न भवति यस्माच्च कौटल्यः शुक्रबृहस्पती नमस्करोति तस्मात् तयोः पूज्यत्वं सः मन्यते। तन्निष्ठं पूज्यत्वं किन्निमित्तमिति स्फुटीकर्तुमाह-पूज्या इति।

ननु केषुचिद्ग्रन्थेषु आरम्भे पूज्याः नमस्क्रियन्ते, स्मर्यन्ते कीर्त्यन्ते वा। केषुचित्तु ग्रन्थेषु न ते नमस्क्रियन्ते, स्मर्यन्ते कीर्त्यन्ते वेति नमस्काररूपमङ्गलस्य दृष्टसाधारणतया प्रयोजनवत्वम् कथं मन्तव्यम्? इति चेत् प्रतिभासम्पत्तिःमङ्गलस्यासाधारणं फलमिति। तथाहि–प्रतिभासंपत्तिरहितः अधीतशास्त्रोऽपि-अदृष्टकर्माकस्मिन्नपि पदे अधिष्ठातुमयोग्यो भवति[1]। अतः समस्तशास्त्रेषु अधीतेष्वपि विद्यावतां प्रतिभासम्पत्तेरपेक्षा वर्तत एव। सेयं गुर्वादीनां पूज्यानां प्रसादाधीनेति तत्र तत्रोक्तम्। तद्यथा—

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।
तस्यैतेऽकथिता ह्यर्थाः प्रकाशन्ते महात्मनां॥
अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च।
यत्कृपालेशमात्रेण नमोऽस्तु गुरवे सदा॥ इति॥

एवमेव पूज्यैः सह विनम्रीभूय कृता सङ्गतिर्वादश्च प्रतिभास्फूर्तये कारणं भवति·इति न्यायसूत्रव्याख्याने वाचस्पतिमिश्रा·[2]।

---

१. यदाहुः—"नेति बाहुदन्तीपुत्रः—
शास्त्रविद् अदृष्टकर्मा कर्मसु त्रिषादं गच्छेत्–अभिजनप्रज्ञाशौचशौर्यादियुक्तान् कुर्वीत" इति। एतद्विषये कौटिल्योऽपि 'सर्वमुपपन्नम्' इति ग्रन्थेन स्वसम्मतिं सूचयति।

२. तथाहि सहब्रह्मचारी सहाध्यायी। गुरुशिष्यसहाध्यायिभ्योऽन्ये शास्त्रेणानुशिष्टाः· शिष्टश्रेयोर्थिनः श्रेयसि मोक्षलक्षणे श्राद्धास्तेषामपवर्गे श्रद्धादर्शनादस्ति तदुपायाभ्यासः प्राग्भवीय इत्यनुमीयते। तेन तेषामपि प्राग्भवीयसंस्कारवशात् प्रतिभोपासनीयेति। अभ्युपेयादभिमुखमुपेत्य गुर्वादिभिः सहेत्यर्थः इति। न्याय० वार्ति० तात्प० टीका० ४ अ० २ आ० ५१ सू० ६६८ पृ०।

साहित्यविदोऽपि इमां प्रतिभां शक्तिपदेन व्यवहरन्ति। तत्स्वरूपं गोकुलनाथोपाध्यायैः एवमुक्तम्—

"मनसि सदा सुसमाधिनि विस्फुरणमनेकधाऽभिधेयस्य।
अक्लिष्टानि च पदानि विभान्ति यस्यामसौ शक्तिः" ॥ इति ॥

किञ्च यदि पूज्याः कञ्चनोपेक्षन्ते शपन्ति वा, तर्हि सत्यवसरे तस्मिन् प्रतिभोद्बोधकसंस्काराणामुद्बोधो न भवति इति महान् दोषः मङ्गलाभावे स्मर्तव्यः। अत्र युद्धसमये कर्णादीनां प्रसङ्गविशेषे शस्त्रास्त्रे प्रति विस्मरणमुदाहरणं पर्याप्तम्।

पूज्यानामपूजने कारणं गर्वेण मदेन वा विकृतं मनो भवति इति भावप्रकाशने द्रष्टव्यम्[1]। न च इष्टापत्तिरितिवाच्यम् राज्यहानिप्रसंगात्।

अत्रेदमाकूतम्—राज्यसञ्चालने प्रतिक्षणं विलक्षणानि विलक्षणानि कार्यण्युपस्थितानि भवन्ति। तत्र अनेकविधाः प्रयोगा अपि अभ्यूह्या भवन्ति राजनीतिविद्भिः। परन्तु इमे राजनीतिविदो यदि पूज्यान् न नमन्ति, न स्तुवन्ति, न कीर्तयन्ति वा, तर्हि तेषु गर्वमदहेतुकया रजस्तमस्सहचारिण्या मनोविकृत्या पूर्वोक्तरीत्या प्रतिभोद्बोधकसंस्काराणां अनुद्बोधो निश्चतः।

तथाच सकलजनमनोरञ्जकस्य कवित्वस्य बीजभूतं यदौचित्यं तदेव गर्वमदाभ्यामुपहन्यते ततो विवेकस्थाने जाड्यमापद्यते। तेन पारतन्त्र्यमवश्यंभावि[2]।

गुरुपरम्पराऽध्ययने विशेषः।

गुरुपरम्पराप्राप्तस्य अस्मच्छास्त्रस्य अयं विशेषः यत् पूज्यभक्तिपूर्वकं यदि शास्त्रमधीयते तर्हि शास्त्रार्थः स्वयमुपस्थितो भवतीति। यदि गुरुभक्तेः आश्रयणं न क्रियते तर्हि तन्मूलकनिर्विकारतायाः अभावेन मनः क्षिप्तं विक्षिप्तं मूढं वा भवेत्। तेन मस्तिष्कसम्बद्धेषु ज्ञानतन्तुषु कार्यकरणाक्षमत्वम् प्रतिभाया अभावो वा निश्चितः।

---

१. गर्वो विद्यावलैश्वर्य-वयोरूपधनादिभिः।
तमनुत्तरदानेन शून्यालोकैरभाषणैः।
आश्रितैरप्यवज्ञानात् दोर्द्वयांगावलोकनात्।
असूयामर्षपारुष्यापहासगुरुलंघनैः।
अकारणादधिक्षेपाद्गात्राणां विकृतैर्वदेत्।
विद्याभिजात्यसंपत्तिमदेऽनुत्तरभाषणम्।
अवज्ञागर्भितं वाक्यं सुहृदामप्यानादरः। इति।

२. जाड्यमप्रतिपत्तिःस्यात् सर्वकार्येषु सर्वदा।
प्रियाप्रियश्रुतैस्तत्तद्दर्शनैर्व्याधिभिर्भवेत् ॥
सुखदुःखाविवेकित्वमिष्टानिष्टानभिज्ञता।
तूष्णीमप्रतिभा चाक्षणोरनिमेषोऽनवेक्षणम् ॥
अभाषणं पारवश्यमेतैर्जाड्यन्निरूप्यते। इति।

तथा सति स्वातन्त्र्यमसत्प्रायमेवेति प्राक् उक्तमेव। मनसः सविकारतायां ज्ञानतन्तुषु अशक्तिः कथं भवतीति चिकित्साशास्त्रे स्पष्टम्[1]।

---

१. तथाहि चिकित्साचन्द्रोदये—

मस्तिष्क की इस बरकी या विजली की ताकत के शरीर में चक्कर खाने या चारों तरफ संचार करने से संवेदना-चेतना और इच्छानुसार गति ये ही काम नहीं होते, बल्कि वे सब भी काम होते हैं जिनसे हमारी इच्छा का कोई सम्बन्ध नहीं है। पेट का हाजमा और दिल की धड़कन ये दोनों काम भीं स्नायविक शक्ति से होते हैं। आप पेट से ताल्लुक रखने-वाली स्नायु को काट दीजिये, हाजमा या पाचनक्रिया बन्द हो जायगी, विजली की वैटरी लगा दीजिये फिर पाचन कार्य या हाजमा होने लगेगा।

दिल और रक्तवाहक नाड़ियों में होकर खून सारे शरीर में चक्कर लगाया करता है। खून का यह दौरा भी स्नायविक शक्ति के प्रवाहों को खींचने और दूर करनेवाली शक्तियों के वल से होता रहता है। निश्चय ही खून का दौरा भी स्नायविक शक्ति के प्रवाहों को खींचने और दूर करनेवाली शक्तियों के वल से होता है निश्चय ही खून का दौरा जारी रखनेवाली शक्ति है। नेचर ने रक्त संचालन या खून के दौरे करने के लिये जो कल पुरजे वनाये हैं, वे सभी स्नायविक शक्ति से चलते हैं। मसलन् लकवा या फालिस मारे हुए अंगों में पैदा हुये जखम या घाव शरीर के और भागों की अपेक्षा वहुत देर में और वड़ी मुश्किल से आराम होते हैं। स्नायविक शक्ति के विना ठीक रहें, जिन्दगी का कोई भी काम अच्छी तरह से नहीं चल सकता। इस विषय का ज्ञान होने पर प्रत्येक विचारवान् का धर्म और कर्तव्य है कि वह, अपने स्नायुमण्डल को सदा निरोग और दुरुस्त रखें। इस सिस्टम के निरोग रखने के लिए उन तमाम आदतों से किनारा कर लेना चाहिए जो शारीरिक और मानसिक शक्तियों के वल को क्षीण करती हैं। केवल शारीरिक शक्तियों की रक्षा से ही काम नहीं चल सकता, मानसिक शक्तियों की रक्षा की उससे कम जरूरत नहीं है, क्योंकि शरीर और मन का वड़ा गहरा सम्वन्ध है। शरीर और मन के दर्म्यान हमदर्दी या संवेदना का सम्वन्ध स्नायुमण्डल ने स्थापित कर रखा है। अतः मादक और उत्तेजक पदार्थों का हानिकारक असर स्नायुओं पर अवश्य होता है।

काफी चाय अफीम और शराब की आदत से स्नायुमण्डल या नरवस सिस्टम की बड़ी हानि पहुँचती है। तमाखू को लोग मामूली चीज समझते हैं पर वे भी इनसे कम हानिकारक नहीं हैं। उससे भी अनेक दुस्साध्य और चिरस्थायी रोग पैदा होते हैं। इन चीजों के चाहने-वाले इनके बुरे नतीजों को नहीं समझते। इन पदार्थों के सेवन से एक प्रकार की प्रसन्नता और जिन्दादिली पैदा होती है। वही इनके चाहनेवालों को अन्धा कर देती है। उसी की वजह से वे इन बुरे नतीजों का ख्याल तक नहीं करते। इन चीजों ने करोड़ों स्त्री पुरुषों को निकम्मा बना दिया। लाखों पुरुष पुंस्त्व खोकर क्लीव हो गये। लाखों की बुद्धि और स्मरण शक्ति नाश हो गयी। ऐसा होते-होते अन्त में वे उन्माद रोग के शिकार हो गये।

भाइयों! यदि आप स्नायुमण्डल को निरोग रखकर संसार भर के रोगों से बचना

टिप्पण्युद्धृतः मस्तिष्कविकारः अन्यशास्त्रेषु राजसतामससंज्ञया व्यवह्रियते। तदुक्तं-अर्थशास्त्रप्रतिपादितान्वीक्षिकीपदव्यवहार्यषष्टितन्त्रसंग्रहरूपायाम् साङ्ख्यकारिकायाम्[1] तत्रैव द्रष्टव्यम्।

अतः एतन्निरासहेतुभूतस्य सत्वात्मकस्य मूलटीकायामुप-(वैदिक सि०) वर्णितस्य धृतिभावस्य लाभाय शिष्याः पूज्यान् नमस्कुर्वन्ति स्तुवन्ति, कीर्तयन्ति इदं यद् दृष्टं फलं मङ्गलस्य, तन्न गुरुभक्तिरहितेषूपलभ्यते इति। दृष्टादृष्टार्थानुग्राहिणो देवा इति।

दृष्टोपकारकत्वम् देवत्वस्य

ननु देवत्वस्य दृष्टार्थानुग्राहकत्वं कथमिति चेत् उच्यते। देवत्वं हि ईशकर्तृककार्योपकरणत्वमिति व्यवस्थापयिष्यते। सर्वज्ञेन परमेश्वरेण उपदिष्टादवैदिकविधिभागाद् या प्रेरणा उपलभ्यते तया इष्टसाधनत्वमनुमाय प्रवृत्तौ सत्यां अस्मासु देवत्वं भवितुमर्हति, तथा तत्र नियतफलप्राप्त्या संतोषसुखमपि नियतम्। इदमेव सत्त्वगुणस्य स्वरूपमित्येतत्सर्वं विशदीकृतं टीकायायाम्। एवंरीत्या निश्चितायां फलप्राप्तौ ईश्वरदासभावेन प्रवृत्तो यो नीतिमान् राजा तस्मिन् अवज्ञापारुष्यानृतभाषणपरदारग्रहणगृहभंजनाग्निदाहादिक्रोधोत्पादकव्यवहाराभावेन सर्वव्यवहारेषु आलापेषु स्पर्शेषु चेष्टितेषु निमित्तेषु च माधुर्यं स्वतःसिद्धं भवति। किञ्च तत्र प्रमाणपरतन्त्रत्वात् अबाधितत्वमौचित्यमपि भवत्येव। इदमेव देवत्वस्य महत्फलं यत् तेन माधुर्यस्य आस्वादग्रहणाय पुष्पेषु षट्पदा इव लोकस्य मनांसि आकृष्टानि भवन्ति। इदमेवाकर्षणं राजनीतिशास्त्रदृष्ट्या आन्दोलनमित्युच्यते। तच्च आवेगे अन्तर्भूतम् तदाहुः—

आवेगस्तु महोत्पातवातवर्षाग्निकुञ्जरैः।
प्रियाप्रियश्रुतैः शत्रुव्यसनाभिहतैरपि। इति। (भा० प्र० १ अ०)

अत्र हि आवेगस्य अष्टविधो विभागः उक्तः। तत्र प्रियश्रुतिजन्यः आवेगः

चाहते हों तो कानून कुदरत को मानो, प्रकृति की आज्ञाओं का पालन करो, पालन ही न करो, कानून कुदरत के खिलाफ कोई काम मत करो। उसकी आज्ञा को मानना अपना प्रधान कर्त्तव्य धर्म समझो। लेकिन यह तभी हो सकता है कि लोग कानून कुदरत या स्वास्थ्यरक्षा विषयक बातों को जानें। इन बातों का ज्ञान लोगों को आयुर्वेदीय ग्रन्थ पढ़ने से ही हो सकता है। मनुष्य जन्म लेकर, मनुष्य को पहले सदा आरोग्य लाभ करने और इस जगत् में अधिक से अधिक दिनों तक रह सकने की विद्या उपार्जन करनी चाहिए। निरोग और दीर्घजीवी हुए विना मनुष्य जगत में कौन-सा अच्छा काम कर सकता है? अतः इस विद्या का अध्ययन न करना पाप है।" इति।

१. सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः। इति सा० का०

(क्रोड०) उक्तान्दोलनस्वरूपः उच्यते। तस्मिन् सति वस्त्राभरणदानालिङ्गनादीनि कार्याणि निसर्गसिद्धानि अनुभावरूपाणि संभवन्ति। तदुक्तम्—

वस्त्राभरणदानाश्रुपुलकालिङ्गनादिभिः।
अभ्युत्थानेन वर्ण्योयं प्रियश्रवणजो बुधैः ॥ (भा० प्र० १ अ०) इति ॥

एवंच देवभावे स्थितेन राज्ञा प्रियश्रवणप्रयुक्तः लोकेषु आन्दोलनात्मकः दानव्यवहाराद्यनुभावकः आवेगः दृष्टार्थः संचालयितुं शक्यः। लोकमतमपि आवेग-प्रयुक्तं राज्ञा सहजत एव प्राप्तुं सुलभमिति देवत्वस्य आवेगोत्पादनद्वारा दानमुखेन लोकमतप्राप्तिरूपलोकतन्त्रात्मकदृष्टार्थोपकारकत्वं सिद्धम्।

अत्यन्तं पूज्यन्ते इति। देवपूजने आत्यन्तिकत्वं अनैश्वर्यासमानाधिकरणै-श्वर्यादिगुणसंपत्तिहेतुकत्वम्। तच्च रससंक्रमणवत् ध्यानपूजनादिनापि संभवति। तथाहि–ध्यातव्या देवप्रतिमा यादृशी ऐश्वर्यादियुक्ता भवति तदुपासकेषु तादृशस्यै-श्वर्यादेः सङ्क्रमणं भवतीति देवपूजनं श्रद्धया कुर्वत्सु एकलव्यसदृशेषु इतिहास-प्रसिद्धमेव। ध्वनितं चैतदायुर्वेदेऽपि—

पूर्वं पश्येद् ऋतुस्नाता यादृशं नरमङ्गना।
तादृशं जनयेत्पुत्रं भर्तारं दर्शयेत् अतः[1] ॥ इति

(सु० अ० ३ श्लो० २६)

यदि च ध्येयप्रतिमायां वैगुण्यं भवेत्, तर्हि ध्यातर्यपि वैगुण्यम् ऋतुस्नातृन्या-येन संभवितुमर्हति। अणुमात्रमपि वैगुण्यम् ईशकार्ये अनुरक्तयोः शुक्रबृहस्पत्योः तद्दशायां नास्ति। अतएव अग्रे "कृत्स्नशास्त्रप्रणयनाद् वक्तारौ, देवासुराणां च संधिविग्रहप्रयोगात् प्रयोक्तारौ, ऐश्वर्ययोगाच्च देवौ" इति वक्ष्यते आचार्येण। तेन तयोः सुलक्षणैश्वर्यसम्पन्नतया तावधिकृत्य ध्यातरि चाणक्येपि वक्तृत्वादिगुणत्रयं सम्भावयितुमर्हमिति ध्वनितम्। **ऐश्वर्ययोगादिति।** एतेन शुक्रबृहस्पत्योः धर्मः ज्ञानं वैराग्यं च आसीत् इति सिद्ध्यति। तज् ज्ञेयम् सांख्यतत्त्वकौमुद्याम्[2]।

---

१. "ब्रह्माणमीश्वरं विष्णुं स्कन्दं च संप्रेक्ष्य अभिवाद्य निष्क्रम्य सूर्याचन्द्रमसाविति नतु प्रेतपिशाचरक्षांसि। शुद्धस्नातमात्रा हि सा यं वा पश्यति मनसा वा अभिध्यायति तादृशा-चारवपुषं प्रायेण जनयति। तस्माद् देवगोब्राह्मणगुरुवृद्धाचार्यान् सतः पश्येत्। कल्याणमनाः स्यात्" इति। कश्यप सं० जा० सू० शारीराध्याय।

२. "अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम्। सां० का०
तथैव न्यायसूत्रवार्तिकतात्पर्यटीकायाम् इदमेव तत्वमभिसंधाय
'नमामि धर्मविज्ञानवैराग्यैश्वर्यशालिने।
निधये वाग्विशुद्धीनाम् अक्षपादाय तायिने' ॥

इति मङ्गलं कृतम्। तद्व्याख्याने वचसः अविशुद्धयश्चतस्रो भवन्ति। तासां निरासः धर्मज्ञानादिभिः, नान्यथा इत्यादि बहुविस्तरेण प्रपञ्चितमुदयनाचार्यैः—

(क्रोड०) एवञ्च धर्मज्ञानादिसम्पन्नानां लक्षण्यायाः प्रतिमायाः ध्याने कृते सति आत्मन्यपि ऐश्वर्यं तद्विधमेव प्राप्नुं शक्यते। राज्ञां इदमेवैश्वर्यं प्रभुत्वम्, यस्य प्रभावतः शासनपत्रे लेखारूढो विषयः अविकृतरीत्या कार्यकरणसमर्थो भवति। एतस्यैश्वर्यस्य अल्पीयस्यामपि न्यूनतायां महाननर्थो भवितुमर्हति। तद्यथा रघुनाथराव पेशवामहोदयेन "नारायणरावांस धरा" इति शासनद्वारा आज्ञप्तम्। तत्र मध्ये केनचित् 'घ' स्थाने 'मा' पदं संयोज्य शासनं प्रेषितम् तस्य परिणामः "पेशवा" इतिहासे प्रसिद्धः।

ईदृङ्मेधावी सन् नरः यदि पूर्वोक्तसात्त्विकगुणधर्मज्ञानादिसम्पन्नः एकाग्रभूमिकायां स्थितो भवति। तर्हि स एकाक्यपि भवतु, नृपतिपदाय शमाय च क्षमो भवति। तदुक्तं दशकुमारचरिते उत्तरपीठिकायाम्—"एकशरीरिणमपि मर्त्यं चक्रवर्तिनं विदधीमहि यद्यस्मदुपदिष्टेन मार्गेण आचर्यते" इति। **देवाविति**—राजनीतिशास्त्रे देवत्वस्य नीतिलक्षणानुसारेण कीदृशं स्वरूपं भवितुमर्हतीति वैदिकसिद्धान्तसंरक्षिण्यां संक्षेपतः उक्तमस्ति। तत् विशदीक्रियते।

सर्वज्ञस्य परमेश्वरस्य निःश्वासेन प्रसूतः वेदभागः कस्मिन्नपि अंशे सदोषः अस्तीति अद्ययावत् केनापि प्रमाणपुरःसरं न साधितम्। तत्र यो विधिभागः तत्प्रेरितमेव यदि अस्माभिः सहर्षम् अनुष्ठेयत्वेन स्वीक्रियते तर्हि अस्मासु वेदपरम्परया प्राप्ता ज्ञानप्रभा सफलत्वात् आनन्दप्रभामिश्रिता सती सत्वरूपेण प्रकटीभवति इत्युक्तम्। वेदप्राप्ता च ज्ञानप्रभा येन साधिता यदि च तस्य मनः प्राणो वाक् च भगवतः परमेश्वरस्य उपकरणभूता भवन्ति तर्हि तस्मिन् देवत्वं भवति। अन्यथा तु केवलं मनःप्राणवाक्संज्ञयैव ते व्यवह्रियन्ते। अन्यत्राऽपि एवमेव देवत्वं बोध्यम्। अथ मनआदीनां स्वरूपं नीतिलक्षणानुसारेण प्रसङ्गाद् विमृश्यते। तथाहि—

सत्त्वपरिणामि द्रव्यं मनः, रजःपरिणामि द्रव्यं प्राणः, तमःपरिणामि द्रव्यं वागिति। तदुक्तम—भावप्रकाशने तत एव द्रष्टव्यम्[1]।

तद्यथा नमामीत्यादि। धर्मो निवर्तकः, विज्ञानं शरीरादिविविक्तात्मसाक्षात्कारः, वैराग्यं रागाभावः, ऐश्वर्यं भूतेन्द्रियजयस्तच्छालिने। अतएव निधये वाग्विशुद्धीनाम्। अधर्महेतुको ह्यविवेकः अविवेकहेतुकमवैराग्यम्। अवैराग्यमूलमनैश्वर्यम्। तन्मूलाश्च वचसामविशुद्धयः। तिस्रः खल्वेताः। तत्र प्रथमा निरभिधेयता, द्वितीया विपरीताभिधेयता, तृतीया निष्प्रयोजनता। ता एताः कथं भूतेन्द्रियजयिनो महामुनेर्भविष्यन्ति। अजितभूतस्य हि विवक्षोस्तथाभूतप्रयत्नानिष्पत्तेरनभिधेया वाग्भवति। अजितेन्द्रियस्य विपर्यासविप्रलिप्साहेतुको विपरीतार्थो वचनसंदर्भः। अजितमनसश्च प्रमादोन्मादवतो निष्प्रयोजनः। एताश्च वचसामशुद्धीः छलजातिनिग्रहस्थानेषु सूत्रकार एव प्रपञ्चयिष्यति। सोऽयं न तथेति भवति वाग्विशुद्धीनां निधिः। अतएव तायी तत्त्वाध्यवसायसंरक्षणसम्प्रदायप्रवर्तकः। इति।

१. यत्सत्त्वपरिणामि स्याद् द्रव्यं तन्मन उच्यते।
ईश्वरस्य च मुक्तानां तत्सङ्कल्पो भविष्यति। अ० १ भा० प्र०
संसारिणां मनस्त्वेन परिणम्य प्रवर्तते। पृ० ६, ७—

(क्रोड०) द्रव्यमित्यनेन जीवोत्पत्तिविचारे कृतया भावप्रकाशनोक्तदिशा शुक्रशोणितात्मकं ग्राह्यम् इत्यभ्यूह्यते[1]। भावप्रकाशने प्रतिपादितं शुक्रशोणितात्मकं द्रव्यं "बहु स्यां प्रजायेय" इति श्रुतेः संकल्परूपमेव बोध्यम्। स च सङ्कल्पः गुणत्रयभेदेन त्रिधा भवति सत्वादिभेदात्।

अत्रायं विवेकः सत्त्वपरिणामि द्रव्यं जीवनिष्ठं चेत् मनः। तद् एव सत्व-परिणामि द्रव्यं ईश्वरे मुक्ते च समवेतं सत् सङ्कल्पः इति व्यपदिश्यते। एवमेव तदेव शुक्रशोणितात्मकं द्रव्यं सङ्कल्पात्मकं रजःपरिणामवत् जीवनिष्ठं चेत् प्राणः। ईश्वरमुक्तयोस्तु समवेतं तदेव स्पन्द इति व्यपदिश्यते। तथैव उपर्युक्तं द्रव्यं सङ्कल्पात्मकं तमःपरिणमवत् जीवसमवेतं चेत् शब्दरूपतां भजते। ईशसमवेतन्तु तदेव शोभना वाक् भवति[2]।

एतेन इदं सिद्धम् यत् ईश्वरे मुक्ते जीवे च स्थिता विभिन्नविभिन्ननाम्ना व्यपदिश्यमानाः मनःप्राणवाचः सत्वरजस्तमःपरिणामिरूपाः द्रव्यात्मिकाः कार्यं कुर्वन्ति इति। ये च रविः चन्द्रः वह्निः इत्यादिनाम्ना तत्र तत्र पुराणेषु देवाः व्यपदिश्यन्ते पुनस्त एव जीवस्य तत्तत्स्थानेषु स्थित्वा कार्यं प्रचालयन्ति च इति। तदुक्तम्[3] भागवते—

यद् रजःपरिणामि स्याद् द्रव्यं स प्राण उच्यते
ईश्वरस्य च मुक्तानां क्रियाहेतुः स ईरितः।
संसारिणां पुनरसौ प्राणाकारेण तिष्ठति।
यत्तमःपरिणामि स्याद् द्रव्यं सा वागुदाहृता।

अ० १·भा० प्र० पृ० ६

१. द्वाभ्यां त्रयाणां व्यक्तिः स्यात् त्रिभ्यो भवति पञ्चकम्।
पञ्चभ्यः पञ्चकानान्तु चतुष्कं प्रतिपद्यते।
शुक्रार्तवौ द्वयं तत्र त्रितयन्तु गुणत्रयम्।
भूतानि श्रवणादीनि शब्दवागादिपञ्चकम्।
भाषणादीनि वाक्यादिचतुष्टयमुदाहृतम्।
तत्संशयप्रमातृत्वनिश्चयानुभवार्थकृत्। इति।

२. ईश्वरस्य च मुक्तानां सा वाग् भवति शोभना।
संसारिणां परिणमेच्छब्दाकारेण सा पुनः।
उक्ता क्रोधादिभिर्भावैस्तत्फलाव्यभिचारिणी।
या मुक्तेश्वरवागुक्ता सा वाणीत्युच्यते बुधैः॥ इति।

३. तदुक्तम् —रविः सोमश्च वह्निश्च तस्य तस्य यथाक्रमम्।
अधिष्ठातार इत्येषा व्यवस्था योगिभिः कृता।
तत्तद्रूपमधिष्ठाय तिष्ठन् आत्मा च तन्मयः।
एते मनःप्राणवाचो मुक्तानामीश्वरस्य च। इति।

(क्रोड०) दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः । इत्यादि । भा० ३ श्लो० २

एतेषु देवेषु उक्ता रविसोमवह्नयः शरीरे वर्तमानाः सन्तः मनःप्राणवाग्रूपा भवन्ति इति ज्ञेयम् ।

एवं च उपाधिभेदेन देवत्वं मनस्त्वादि च तेषु तेषु देवेषु सिद्धम् । स च उपाधिः "कार्योपकरणात्मत्वात् देवा इत्येव कीर्तिताः" इति भावप्रकाशनोक्तरीत्या ईशकार्योपकरणात्मकत्वम् । तच्च कार्यं जीवस्य ईश्वरस्य च भेदेन द्विधा भवति तत्र अस्मिन्नेव शरीरे यदा जीवस्य कर्तृत्वमस्ति तदा इमे मनःप्राणवाचः जीवकार्योपकरणानि भवन्ति । यदा तु ईश्वरस्य कर्तृत्वं तदा तु ते ईशकार्योपकरणानि भवन्ति तदानीं त एव देवा इति व्यपदिश्यन्ते । जीवस्य कर्तृत्वे अयं स्वतन्त्रः । ईशस्य कर्तृत्वे तु सः स्वतन्त्रः इत्यन्यदेतत् । तथाचायं निष्कर्षः, ईशकार्ये एते यदि उपकरणानि स्युः तर्हि ईशकार्योपकरणत्वं देवत्वं तेषां बोध्यम् । जीवकार्योपकरणत्वे एते यथाश्रुतनाम्नैव मनः प्राणो वाक् इति ज्ञायन्ते ।

यद्यपि आपाततः जीवेन सह सम्बद्धस्य शरीरस्य चेष्टां प्रति ईश्वरस्य कर्तृत्वं न प्रसिद्धम् । तथापि विचार्यमाणे ईश्वरोऽपि शरीरचेष्टां सञ्चालयन् जीवे वर्तत इति अवश्यं वक्तव्यं भवति । तथाहि—

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः[1] ।

इत्यादिगीतोक्तवचनप्रामाण्यानुसारेण उपभुक्ताहारपचनकर्तृत्वं भगवतः ईश्वरस्यैव अस्ति इति सिद्ध्यति । एवं शरीरान्तर्वर्तिनीनां मांसपेशीनां चेष्टायां विचार्यमाणायां सत्यां तच्चेष्टाकर्तृत्वमपि शारीरविज्ञानानुसारेण ईश्वरे सिद्ध्यति । तथाहि-शरीरे मांसपेश्यः द्विविधाः वर्तन्ते । तासु काश्चन जीवसञ्चालनाधीनाः सत्यः चेष्टन्ते यथा करप्रसारणसंकोचनादिकारिण्यः पेश्यः । अपराश्च स्वतन्त्राः ईश्वराधीनाः । तथाहि-जीवो जाग्रद्दशायां चेष्टमानः स्वशरीरे परिश्रान्तः दुःखमनुभवन् विश्रान्तिमीहते । यदि स न विश्राम्येत् तर्हि भुक्तस्याहारस्य रसादिरूपेण परिणामो न भवतीति आयुर्वेदसिद्धम्, जीवस्य विश्रामो हि निद्रात्मकः । तदानीं अस्य सर्वाश्चेष्टाः अवरुद्धा भवन्ति एतदवस्थायां समानवायुः[2] भुक्ताहारं रसरूपेण परिणतं तत्तच्छिराद्वारा सर्वत्र सञ्चारयति । एतत्सञ्चरणसमये तत्र तत्र प्राप्तरसानां ग्रहणार्थं शिराः स्वमुखमुद्घाटयन्ति । रसग्रहणानन्तरं मुखं पिदधति । अयं शिराणां व्यापारः स्वतन्त्रः परं स कस्य प्रेरणया निद्रासमये प्रचलित इति विचार्यमाणे सुप्तस्य जीवस्य कर्तृत्वबाधात् कश्चन अन्यः कर्ता वर्तते इत्यनुमीयते । स ईश्वरान्नातिरिक्तः ।

कर्तृत्वं हि स्वातन्त्र्यापरपर्यायम् । "स्वतन्त्रः कर्ता" इति पाणिनीयसूत्राभि-

---

१. प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् । गीता०
जाठरो भगवानग्निः ईश्वरोऽन्नस्य पाचकः । सुश्रुत०

२. समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः ।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति । भाव० न

(क्रोड०) धानात्। तच्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वरूपमिति तत्र तत्र नैयायिकैः प्रतिपादितं वर्तते। ईदृशं स्वातन्त्र्यं यत्र स एव चेतनः! यत्र तन्नास्ति,सः अचेतनः, जड इत्यर्थः। सम्मतं चैतत् वैज्ञानिकानामपि। एवञ्च निद्रावस्थायामबाधितरूपेण जडात्मकशिरामांसपेशीप्रभृतीनां सञ्चालनं कश्चन जाग्रत् कुर्वाणः स्वतंत्रः चेतनः अस्ति स स्वतन्त्रत्वात् ईश्वर एव। अतः शरीरे उपाधिभेदेन जीवस्य ईश्वरस्य च कर्तृत्वं सिद्धम्। मनःप्राणवाचोऽपि जीवकर्तृकक्रियायां यदा उपकरणभूताः भवन्ति तदा जीवः, देवो वा भवतु मानवो वा यः कोऽपि वा सः अल्पज्ञत्वात् अबाधिते एव अर्थे ताः प्रेरयेत् इति न नियमः। एवं स्थिते देवोऽपि जीवः तत्कालं भ्रान्त इति वक्तुं शक्यते। अतएव शुक्राचार्यः सुरया सह राक्षसैः चूर्णितं शिष्यङ्कचमपि भ्रान्त्या पपौ, इति इतिहासप्रसिद्धमेव। एतस्यामवस्थायां शुक्रबृहस्पतिप्रभृतीनां वचनमपि अननुष्ठेयत्वरूपमप्रामाण्यमावहति। यदा किल मानवोऽपि एकाग्रभूमिकायां तिष्ठन् ऐश्वर्यादिगुणचतुष्टयसम्पन्नः सन् स्वकीयं कर्तृत्वमपहाय ईश्वरस्य कर्तृत्वे अभिमुखः, तदा ईशकर्तृकक्रियायां तस्य जीवस्य मनःप्राणवाचः उपकरणभूताः चेष्टन्ते, समीहन्ते च, तदानीं तद्वचने अबाधितत्वात् अनुष्ठेयत्वरूपप्रामाण्यं निर्विवादमेव। अतः जीवदशायां शुक्रेण उक्तस्य अर्थस्य ईश्वरमुक्तभावे स्थितेन कौटिल्येन कृतः प्रतिषेधः, तथा ईश्वरभावेन स्थितस्य शुक्रस्य तेन कृतः नमनमित्युभयमपि युक्तमेव। अर्थात् सर्वत्र नीतिशास्त्रे देवत्वं ईशकर्तृकक्रियोपकरणत्वात्मकं बोध्यम्।
मानसीं भक्तिमनुमापयतीति।

भक्तेः आयुर्वेदरीत्या उपयोगः

गुरुभक्तिपूर्वकज्ञानाभिवृद्धौ सम्पादितायां शरीरान्तर्गतधातुषु अष्टमस्य सारभूतस्य ओजसः धातोः रक्षणं भवति तस्मादेव शरीरस्यापि सुरक्षा। स धातुः सर्वशरीरे शाखारूपेण स्थिताभिः हृदये च मूलरूपेणावस्थिताभिः दशशिराभिः प्रवहति। तेनैव शरीरस्य चेष्टितंतन्निबद्धं च सत् सफलं भवति, इति साहित्यायुर्वेदाभ्यामवगम्यते।[1]

अतः ओजसस्संरक्षणाय गुरुभक्तिं द्वारीकृत्य शास्त्रप्रसूतं ज्ञानमपेक्ष्यते इति सिद्धम्। यथा यथा पूज्यानां गुरूणां चरणौ भक्तिसाहचर्येण चिन्तितौ स्याताम् तथा तथा गुरुस्वरूपे वर्तमानस्य सत्त्वबहुलस्य ज्ञानतत्त्वस्य संक्रमणेन ओजः उपासकशरीरे नितरां

---

१. दशजीवनधामानि शिरो रसनबन्धनम्।
कण्ठोऽस्रहृदयं नाभिः बस्तिः शुक्लो गुदौजसी।
दशस्थूलशिरा हृत्स्थाः ताः सर्वाः सर्वतो वपुः।
रसात्मकं वहन्त्योजः तन्निबद्धं हि चेष्टितम्।
विद्यन्ते तास्ततस्सप्त शतान्यासां भवन्ति तु।
शिरा जालन्धरा नाम तिस्रश्चाभ्यन्तराश्रयाः।
इडा च पिङ्गला चेति सुषुम्ना चेति नामतः।
भा० प्र० ७ अ० पृ० ८४

(क्रोड०) उच्छलति तेन स्वशरीरेपि नैर्मल्यम्, सर्ववेत्तृत्वं, सर्वशक्तिमत्त्वं प्रभुत्वञ्च संप्राप्तुं नाशक्यम्।

ननु इदमलौकिकं वस्तु गुरुसकाशात् शिष्येण कथं प्राप्तव्यम्। इति चेत् शृणु। यथा नटेन सञ्चारितस्य साधारणीकरणव्यापारस्य महिम्ना अनुकार्ये स्थितानां तत्तद्रसानां भावानां वा सामाजिकेषु संक्रमणं भवति। तथैव ध्यानेनापि गुरुसमवेतभावानां शिष्येषु संक्रमणं भवितुमर्हति। अतएव योगिनः आहारं विनापि एकाग्रतया ध्यानमात्रेण अभीप्सितान् शरीरारोग्यकरान् रसादीन् सञ्चारयन्तः तदानन्दमहिम्ना अन्तःस्थं ज्वलनसम्भूतं विषं विनाश्य बहिःस्थितस्य प्राणस्य अन्तःप्रवेशमनपेक्ष्यैव चिरकालं प्राणायामादीन् संसाधयन्ति, सिद्धिं च प्राप्नुवन्ति। ओजश्च मूलटीकायामुपवर्णितायाः आनन्दप्रभामिश्रितायाः ज्ञानप्रभायाः परिणामभूतं वस्तु मन्तव्यम्। तदुक्तं चरके—

हृद्यन्तरस्यात् यदौजस्यं स्रोतसां सम्प्रसाधनम्।
तत्तद्यत्नेन संसेव्यं प्रशमो ज्ञानमेव च॥ इति।

औजस्यं ज्ञानं तदेव भवति यत्प्रमाणत्रयसमन्वितं भक्तिपुरःसरं गुरुप्रसादलब्धञ्च। गुरुतत्त्वसाक्षी चेतनः ईश्वर एव। स एव मस्तिष्कभागे स्थितः प्राणादिसञ्चारणद्वारा जीवनमूलभूतं चरकोक्तरीत्या ओजः ज्ञानद्वारा यदा प्रयच्छति तदा प्रमाणत्रयसमन्वितार्थस्य प्रकाशमुपलभ्य जीव आत्मानं गोपायितुं समर्थो भवति। यदि सः ईश्वरः अप्रसन्नः तर्हि विपरीतार्थप्रकाशमुपलभ्य जीवः आपत्तीरनुभवति।[1]

अतो येन एकाग्रभूमिकायां स्थित्वा सत्वं प्रधानीकृत्य पूज्याः गुरवः अभिध्याताः तस्य ओजस्सम्पादनमूलिका सिद्धिरपि न दूरतः। तथाहि—

विजेतव्या लङ्का चरणतरणीयो जलनिधिः
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः।
तथाप्येको रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्वे वसति महतां नोपकरणे॥ इति

सत्त्ववतः रामस्य सहायभूताः कपयः आसन्, इत्यत्र न आश्चर्यम्। ते तु सचेतनाः। अचेतना अपि सचेतनस्य साहाय्यं कुर्वन्ति यत्र तत्र सचेतनानां का कथा? तथोक्तम्—

ये मज्जन्ति निमज्जयन्ति च परान् ते प्रस्तरा दुस्तरे
वार्धौ वीर तरन्ति वानरभटान् सन्तारयन्तेऽपि च।
नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः

---

१. न देवा दण्डमादाय रक्षन्ति पशुपालवत्।
यन्तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्।
न कालः खड्गमादाय शिरः कृन्तति कस्य चित्।
कालस्य बलमेतावद् विपरीतार्थदर्शनम्। इति।

(क्रोड०)   श्रीमद्दशरथेः प्रतापमहिमा सोऽयं समुज्जृम्भते ॥ इति ।
तस्मात् ओजः प्राप्तिद्वारा गुरुभक्तिः ज्ञानाभिवृद्धौ सहकारिणीति सर्वं सुस्थम् ।

नमने गुरुनामकीर्तनम्

ननु मङ्गलप्रसङ्गे गुरुनामसङ्कीर्तनं मूलकृता कथं कृतम् ।

आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयाज् ज्येष्ठापत्यकलत्रयोः ।

इति स्मृतौ निषेधात् । तन्न । तथाविधाचारदर्शनात् । यत्र सदाचारः धर्ममूलः, स्मार्तःश्रौतो विधिर्वा कर्तव्यं विदधाति तत्र निषेधस्य प्रसक्तिर्न भवति इति मीमांसायाः सिद्धान्तः । प्रणतिसमये गुरूणां पूज्यानां वा यदा ऐश्वर्यं, देवत्वं वक्तृत्वं, प्रयोक्तृत्वमादि च पूज्यत्वनिमित्तं स्मर्तव्यं भवति, तदा गुरु-पितृ-प्रभृतीनामुल्लेखः आचारसिद्धः । तद्यथा—

मधुसूदनसरस्वतीभिः सिद्धान्तबिन्दौ ग्रन्थारम्भे-श्रीभगवत्पूज्यपादानां शङ्कराचार्याणां नामग्राहं नमनं कृतम् । एवमभिवादनादौ सङ्कल्पादौ च नामोच्चारणमपि एतन्न्यायेनैव न दोषावहम् ।

गुरुमतखण्डनेपि गुरुभक्तिः

ननु शुक्रबृहस्पती ऐश्वर्यसम्पन्नौ देवौ स्तः तर्हि तदीयमतस्य क्वचिन्मूलकृता 'नेति कौटिल्य' इत्युक्त्या कथं प्रतिषेधः कृतः ? इति चेत् उच्यते ।

सर्वेऽपि सचेतनाः स्वकृत्या ईशरूपतां जीवरूपतां वा प्राप्तुमर्हन्ति इति पूर्वं प्रपञ्चितमस्ति । तदनुसारेण यदा ईश्वरकर्तृकक्रियोपकरणत्वरूपदेवत्वमात्मनि जीवे उक्तरीत्या आविर्भवति तदा प्रतिपाद्यार्थविषये यथार्थदर्शनं भवति । यदा च तदनुपकरणत्वम् जीवे आविर्भवति तदा तस्य विपरीतार्थोपि दृष्टिगोचरः भवितुमर्हः । शुक्रबृहस्पती च जीवभावेन, कदाचित् देवभावेन वा स्थातुमर्हतः । एवं स्थिते यदा तौ जीवभावमवलम्ब्य ब्रूतः तदा तद्वचने प्रमाणत्रयघटितनीतिलक्षणदृष्ट्या समन्वयः कर्त्तव्य एव । तद्बाधायां तावानंशः अस्माभिः अननुष्ठेयः । एवं सत्यपि अस्माभिरननुष्ठेयत्वेन निश्चितस्यार्थस्य विधायकं जीवभावेन स्थितयोः तयोस्तद्वचनं सर्वथा अप्रमाणमिति तु न मन्तव्यम्, तस्यापि सत्यवसरे कैश्चित् अनुष्ठीयमानत्वात् तेषां कृते सफलत्वाच्च । वस्तुतः शुक्रबृहस्पत्योः इतरस्य वा मतस्य चाणक्यनिर्दिष्टमतेन सह समन्वय एव अस्तीति यथासम्भवं प्रयतिष्यते ।

ननु चाणक्यो मनुष्यः, शुक्रबृहस्पती च देवौ स्तः इति देवतानां वचनापेक्षया मानववचने दोषबाहुल्यं सम्भवितुमर्हति तथा सति मानववचने देववचनापेक्षया अनुष्ठेयत्वलक्षणं विशेषतः प्रामाण्यञ्च कथं स्वीक्रियताम् । इति चेन्न । वचनानां स्वरूपतः निर्दोषत्वेऽपि अप्रामाण्यं भ्रमप्रमादादिदोषप्रयुक्तमेव वक्तव्यं भवति । यदि

पृथिव्याः लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि, प्रायशस्तानि सङ्गृह्य एकमिदमर्थशास्त्रं कृतम् ॥

(क्रोड०) च पूर्वोक्तरीत्या मनुष्यः धर्मज्ञानविरागैश्वर्यसम्पन्नः सन् वक्ति तर्हि तद्वचने अप्रामाण्यकल्पनायाः अवसर एव नास्ति, यतः एकाग्रभूमिकायां स्थितस्य तस्य मुक्तत्वे नास्ति शङ्का। तथा च तथाविधस्य ऐश्वर्यादिसम्पन्नस्य मानवस्यापि वाङ् मुक्तानामेव वाक् भवितुमर्हति। सा च उपर्युक्तटिप्पणीस्थ भावप्रकाशनोद्धृत-(पृ० १९) वाक्यात् अव्यभिचरितफला भवतीति स्थितम्। "उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः" इत्युक्त्या मुक्तानां तत्समकक्षानां वा उपरिबुद्धित्वात् तेषां वाक् प्रमाणभूता भवत्येवेति चाणक्योऽपि तथाविधः सन् जीवभावदशायां स्थितयोः शुक्रबृहस्पत्योः मतं खण्डयति तर्हि तद्युक्तमेव।[1]

एतेन चाणक्येन मानवेन समयानुसारेण पूर्वाचार्यमतं प्रतिषिद्धम् लोकस्थितिं दृष्ट्वा, इत्यस्माभिरपि वर्तमानदेशकालपरिस्थितिमवलोक्य तन्मतस्यापि परिवर्तनं कर्तुं शक्यते इति शङ्का अपास्ता। (२८ पृ०) अपि च नीतिशास्त्रस्य वर्तमानसमयेऽपि तथाविधमेवाभ्यर्हितत्वमस्तीति वैदिकसिद्धान्तसंरक्षिण्यां प्रपञ्चितत्वात् चाणक्यप्रतिपादिता नीतिः अद्यापि अपरिवर्तनीयैवेति मन्तव्यम् तथात्वस्य अग्रे चिन्तितत्वात्। अत्र विषये जयमङ्गलाङ्कृन्मतन्तु अग्रे यथावसरं "अत्र केचिदाहु"-रित्यादिग्रन्थव्याख्याने निरूपयिष्यते।

टी० गणपतिशास्त्रिभिः विरचिता

श्रीमूला

स्वग्रन्थस्य निर्मूलत्वादिशङ्कानिराकरणपूर्वं प्रकरणाधिकरणसमुद्देशं प्रतिज्ञातुं भूमिकां रचयति—पृथिव्या इत्यादिना। पृथिव्या भूमेः, लाभे अप्राप्तायाः प्राप्तौ, पालने लब्धायाः परिरक्षणे च विषये। अर्थशास्त्राणि अर्थो नाम वृत्तिः वर्तनं स्थितिः, सैव हि मनुष्याणां मुख्योऽर्थः तया च मनुष्यसम्बन्धिन्या तदाधारभूता भूमिरुपलक्ष्यते एवं च मनुष्यवती भूमिरित्यर्थः। तस्याः लाभपालनोपायोपदेशकानि शास्त्राणि अर्थशास्त्राणि। यावन्ति, पूर्वाचार्यैः शुक्रबृहस्पतिविशालाक्षादिभिः, प्रस्थापितानि प्रवर्तितानि तानि। प्रायश इति बाहुल्योक्त्या क्वचित् क्वचिदात्मीयदर्शनानां प्रतिपादनं दर्शयति। संहृत्य संगृह्य, एकमिदमर्थशास्त्रं कृतम्। एकं नाना-

---

१. युक्तियुक्तमुपादेयं वालादपि सुभाषितम्।
त्याज्यं तद्विपरीतं तु अप्युक्तं पद्मयोनिना।
चाणक्योनापि उक्तम्—शास्त्रं विप्रतिपद्येत धर्मन्यायेन केनचित्।
न्यायस्तत्र प्रमाणं स्यात् तत्र पाठो हि नश्यति। इति। अ०

शास्त्र-त्रिप्रकीर्ण-समस्तविषयैकनिधानम्। इदं बुद्धिस्थं अर्थशास्त्रम्। कृतं मया प्रणीतम्। एतेन मदीयस्यास्यैकस्य ग्रन्थस्य परिशीलनात् कृत्स्नपूर्वाचार्य—दर्शनविज्ञानं सुखलभ्यमिति सूचयन् स्वशास्त्रस्य—समूलत्वं पूर्वाचार्यग्रन्थैरगतार्थत्वम् च द्योतयति।

श्रीराजेश्वरशास्त्रिद्राविडव्याख्याता

वैदिकसिद्धान्तसंरक्षिणी

पृथिव्या इति। चतुर्वर्णाश्रमवती हिमवत्समुद्रान्तरवर्तिनी भूमिः, तस्या इत्यर्थः। तदुक्तम् "यस्य प्रभावाद्भुवन"मिति (नीतिसारव्याख्यायाम्[1])। एतावद्भूक्षेत्रमेवैतच्छास्त्रे चक्रवर्तिक्षेत्रत्वेन व्यवह्रियते इत्यपि बोध्यम्।
लाभे पालने चेति। निमित्तसप्तमीयमिति टीकायां व्याख्यातम्।

निमित्तत्वं च स्वान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकप्रतियोग्यवश्यानुष्ठानकत्वम्। तच्च 'राहूपरागे स्नायात्' 'चर्मणि द्वीपिनं हन्ति' इत्यादौ स्फुटम्[2]। ईदृशन्निमित्तत्वमर्थशास्त्रस्य लाभपालनयोर्वर्तते। अर्थात् एतदर्थशास्त्रमनुष्ठानपर्यवसायितया चिन्तितं चेत् श्लाघामुत्पाद्य स्थायिलोकसम्मतिलाभपुरस्सरं पृथिव्या लाभपालनयोः पर्यवसायि भविष्यति। अर्थशास्त्राभावे तु व्यापकाभावात् व्याप्यभाव इति न्यायेन लाभपालने न भविष्यतः। तदुक्तम्—

आन्वीक्षिकी-त्रयी-वार्ताः सतीर्विद्याः प्रचक्षते।
सत्योऽपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे॥
दण्डनीतिर्यदा सम्यङ् नेतारमधितिष्ठति।
तदा विद्याविदः शेषा विद्याः सम्यगुपासते॥ इति

लाभः स्वस्य करादिग्रहणाद्युपयोगिस्वत्वोत्पादः। पालनं चतुर्वर्णाश्रमाणां मनस आकर्षणानुकूलो भयनिवृत्ति-पोषणादिव्यापारः। तदर्थमर्थशास्त्रमिति संबन्धः।

ननु वर्धनं सत्पात्रप्रतिपत्तिश्च अर्थशास्त्रस्याधिकं फलमिति नीतिसारे उक्तम्, तदत्र कुतो नोक्तमिति चेन्न। तयोरत्रैवान्तर्भावात्। (तद्द्रष्टव्यं जयमंगलायां[3])।

---

१. भुवनं चतुर्वर्णाश्रमलक्षणो लोकः।

२. भाट्टदी० २ अ० ४ पा० १ अधि० (यावज्जीवनिमित्तताधि०) निमित्तत्वं च स्वान्वयव्यतिरेकानुविधाय्यवश्यानुष्ठानवत्त्वम्। यथा राहूपरागान्वयव्यतिरेकानुविधाय्यवश्यानुष्ठानं यस्य स्नानस्य तद्वत्त्वं राहूपरागे इति।

३. तस्या अर्जनं त्रिविधं नवं भूतपूर्वं पित्र्यं च रक्षणमपि द्विविधं स्वेभ्यः परेभ्यश्च। ननु रक्षितविवर्धनं वृद्धस्य तीर्थप्रतिपादनमप्यस्ति। सत्यमस्य द्वयस्यैव विशेषोऽयं यतो रक्षितविवर्धनमप्यर्जनमेव। वृद्धस्य तीर्थप्रतिपादनमपि गुणवति पुत्रे निक्षेपो वा अश्वमेधादौ विनियोगो वा। तदुभयमपि सर्वथा रक्षणमेव। इति।

(वैदिक०) यावन्तोति । सर्वमपि प्राचीनमर्थशास्त्रं कौटिल्येन अदृष्टं नास्ति । अर्थशास्त्राणि ब्राह्मनारदीयवैशालाक्षौशनसबार्हस्पत्यादीनि । अर्थो वृत्तिः, तदर्थं शास्त्रम् अर्थशास्त्रम्, तानि । पूर्वाचार्यैर्ब्रह्म-नारद-शुक्र-बृहस्पति-भारद्वाज-विशालाक्ष-भीष्म-पराशर-वातव्याधीन्द्र-प्राचेतस-मनु-गौरशिरो-व्यासादिभिः प्रस्थापितानि प्रणीतानि । अत्र प्रमाणं भारते अनुसन्धेयं अग्रे प्रदर्शितम्[1] ।

ननु वैशालाक्षादिप्राचीनार्थशास्त्रं भारतादन्यत्र निबन्धेषु नोद्धृतं एवञ्च कौटिल्येन तानि दृष्टानि आसन् इत्यत्र विनिगमकं किमिति चेदुच्यते । आधुनिक-शिष्टपरिगृहीतनिबन्धेषु तद्वचनानामनुपलब्धावपि भगवत्पूज्यपादशङ्कराचार्यानन्तर-भाविसुरेश्वराचार्यापरपर्यायविश्वरूपाचार्यैः स्वकृतायां मिताक्षराटीकायां बाल-क्रीडायां (या० स्मृ० अ० २ । श्लो० ३०७-३-८) वैशालाक्षबार्हस्पत्यौशनसवचनानि उद्धृतानि उपलभ्यन्ते । बृहस्पतिरित्यादिना[2] ।

---

१. जयमङ्गलायाम् अर्थशास्त्रे—

ब्रह्माध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम् ।
तच्छङ्करेण शक्रेण गुरुणा भार्गवेण च ॥
संक्षिप्तं मनुना चैव बहुभिश्च तपोधनैः ॥
एतत्ते राजधर्माणां नवनीतं युधिष्ठिर ।
बृहस्पतिर्हि भगवान् नान्यं धर्मं प्रशंसति ।
विशालाक्षश्च भगवान् काव्यश्चैव महातपाः ॥
सहस्राक्षो महेन्द्रश्च तथा प्राचेतसो मनुः ।
भारद्वाजश्च भगवाँस्तथा गौरशिरा मुनिः ॥
राजशास्त्रप्रणेतारो ब्राह्मणा ब्रह्मवादिनः । इति । (शा० रा० पर्व पृ० १३४ अ० ५८ श्लो० ८१।८६)

२. बृहस्पतिः स्वधर्मविदनुरक्तः शुचिरनुद्धत उद्युक्तो देशकालविन्नीतिनिगमेतिहास-कुशलोऽव्यसनी मृदुरर्थशास्त्रकृतयोग्यो हस्त्यश्वपुरुषाचाराहोरात्रयामनिर्गमविनिश्चितमतिश्च स्वपरबलाबलज्ञो बलाधिकृतः सेनापतिः स्यात् । कुलाढ्य उद्युक्तो मृदुरुदात्तः समरचित्तः शूरोऽनुरक्तोऽभेद्यः पत्तिविशेषज्ञ इंगिताकारकुशलः प्रतिहारः स्यात् । वनकुलकालजातिसात्म्य-गुणवयःशीलायुरादानगमनकल्पनावान् व्यपगतभयो विजयोर्जितमना हस्त्यध्यक्षः स्यात् । क्षेत्र-जातिसात्म्यगुणलक्षणवाहनास्त्रज्ञोऽनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालज्ञो दर्शनीयो नीति-गतिज्ञः प्राज्ञो वाग्मी दूतः स्यात् । उभयत उत्तमवंशप्रभवः शुद्धो मनुबृहस्पत्युशनःशास्त्रविद् दण्डनीत्यादिकुशलोऽशठोऽजिम्हः सम्मानासम्मानाविकृतो विगतभीः कार्याकार्यविनिश्चितमतिर-हार्यः सर्वोपधाशुद्धो गूढमन्त्रो मन्त्री स्यात् । अविकार्योऽविकलेन्द्रियः प्रतापवान् सुभगः सुमुखोऽकृपणोऽप्रमादी दक्षो दाक्षिण्यचारित्ररक्षणार्थमधिकरणासन्दिग्धविवेककृदुपरिकः स्यादिति । तथा—बृहस्पतिः ब्रह्मशङ्खस्तुतिपुण्याहशब्दैर्विबुध्योत्थाय सन्ध्यामुपास्य देवपितृब्राह्मणान्

(**वैदिक०**) अतः तत्पूर्वभाविनः कौटिल्यस्य समये वैशालाक्षाद्यर्थशास्त्राण्यासन् उपलब्धानि, इत्यत्र नास्ति विप्रतिपत्तिः।

संहृत्य संक्षिप्य पूर्वग्रन्थानामतिविस्तृतत्वात्। ततः इति शेषः। तदुक्तम्–

प्रजानामायुषो ह्रासं विज्ञाय च महात्मना।
संक्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये। इति—
(जयमङ्गला अ० १।१)

विष्णुगुप्तेन कौटिल्येन।

प्राचीनार्थशास्त्रपरिमाणम्

एतत्पूर्वतनग्रन्थानां विस्तार एवं निर्दिष्टः। तद्यथा ब्राह्मं लक्षाध्यायात्मकम्, वैशालाक्षं दशसहस्राध्यायात्मकम्, ऐन्द्रं पंचसहस्राध्यायात्मकम् बार्हस्पत्यं त्रिसहस्राध्यायात्मकम्, औशनसं सहस्राध्यायात्मकमिति (३३ पृ.)। इदं तु षट्श्लोकसहस्रात्मकम्। यद्वक्ष्यति—

"शास्त्रसमुद्देशः, पञ्चदशाधिकरणानि, साशीतिप्रकरणानि, सपञ्चाशदध्यायशतं, षट्श्लोकसहस्राणि"। इति १।१

अथवा संहृत्य स्तोकं स्तोकं परित्यज्येति जयमंगलायाम्। तेन नास्य ग्रन्थस्य गतार्थत्वम्। यद्वा संगृह्येति पाठान्तरम्। एतत्पाठे कानिचन विशिष्टस्थलानि परित्यज्य "यथा नेति कौटिल्य" इत्यादौ ततः अन्यः सर्वोऽप्यंशः पूर्वाचार्य-सङ्गृहीतो बोध्य इति। प्रायशः इति। आधिक्येन अत्र प्राचीनार्थशास्त्रस्य ग्रहणम्। क्वचित्तु "शुल्बधातुशास्त्र" (२।१२ अ०) इत्यादौ स्वनिर्मितस्य धातुकौटिलीयस्य संग्रहो बोध्यते। एकमिति। एतच्छास्त्राध्ययने नास्ति इतरार्थशास्त्राध्ययनापेक्षेति दर्शयति, अनपेक्षितार्थशास्त्रान्तरसहायमिति यावत्। तदुक्तं जयमङ्गलायाम्-अनपेक्षितसहायान्तरम् इति। इदं बुद्धिस्थम्। अथवा अयमुद्देशग्रन्थः निर्देशग्रन्थानन्तरं निर्मितः स्यात् इति यदि स्वीक्रियते, तर्हि संपूर्णनिर्देशग्रन्थात्मकार्थशास्त्रपरः इदंशब्दो बोध्यः। अर्थेति। पुनरर्थग्रहणं स्वमते तस्य प्राधान्यप्रदर्शनार्थम्। तेन क्वचित् धर्मनिरूपणमर्थार्थमिति बोध्यम्। शास्त्रम् पञ्चदशाधिकरणसमुदायात्मकम्। कृतं मयेति शेषः।

इदमर्थशास्त्रं प्राचीनं वा सर्वमपि प्राधान्येन नीतिशास्त्रमित्युच्यते। तदुक्तं कामन्दकीये—

मनसा वा नमस्कृत्य धर्मार्थकामभयोपधाशुद्धावञ्चकगृहीतायुधायातयामविश्वासोत्पन्नासन्नपरिवृतेः इति।

तथा– एवं च विशालाक्षः-   (अ० ३२३ श्लो० व्याख्यानम्)

वन्यान् वनगतैर्नित्यं मण्डलस्थांस्तथाविधैः।
चारैरालोच्य सत्कुर्याज्जिगीषुरदीर्घदृक् (आ० ३२८ तमश्लोकव्या०)॥ इति।

(वैदिक०) नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ।। इति (स० १ श्लो० ६)

नीतिलक्षणम्

अस्य स्पष्टीकरणाय नीतिस्वरूपमुच्यते । तत्रोपाध्यायनिरपेक्षायाम्—

"प्रत्यक्षपरोक्षानुमानलक्षणप्रमाणत्रयनिर्णीतायां फलसिद्धौ देशकालानुकूल्ये सति यथासाध्यमुपायसाधनविनियोगलक्षणा क्रिया नीतिः" इति ।

जयमङ्गलायां तु—"प्रत्यक्षानुमानागमप्रमाणदेशकालशक्तिपुरस्सरार्थसाधन-विनियोगलक्षणा क्रिया नीतिः" । अ० १ । १ । इति -

उभयमतसाधारण्येन प्रत्यक्षादिप्रमाणत्रयनिर्णीतेष्टसाधनताककर्मानुष्ठानं नीतिरिति तदर्थः । जयमङ्गलोक्तशक्तिनिवेशतात्पर्यन्तु तद्व्याख्याने वक्ष्यते ।

आगमोपयोगः

अत्र नीतिलक्षणे प्रमाणत्रयस्य सार्थक्यं वक्तव्यमस्ति । तत्र अभ्यर्हितत्त्वात् शब्द-प्रमाणस्य नीतावुपयोगित्वं प्रस्तूयते । तथाहि-प्रत्यक्षानुमानाभ्यां निर्णीतेऽपीष्टसाधनत्वे कालान्तरे तत् साधनत्वेनाभिमतं तथैव स्यात् । ततः कश्चन दुरपनेयो दोषो वा नोत्पद्येत! अथवा तस्य अन्यथासिद्धत्वं तत्कार्यं प्रति नास्ति इति सर्वज्ञबुद्धिमन्तरा कस्य बुद्धि-र्निर्णेतुं समर्था भवेत् ? यथा आधुनिकेऽपि समये दन्तवैद्यः दन्तानां सूक्ष्मातिसूक्ष्मं भेदादिविषयं चिन्तयन् अन्यच्चिन्तयितुमवसरं न लभते । न वा स्वीकृतदन्तचिकित्सा-यामितरावयवेषु दुष्परिणामो न ततः सम्भविष्यतीति वक्तुं स प्रतिभूत्वं स्वीकर्तुं शक्नोति । तथैव अनुष्ठानात्मकनीतौ दीर्घकालानन्तरं समाजस्य कीदृशी स्थितिर्भ-विष्यति ? किं कदा भविष्यति ? कस्य कीदृशः परिणामः ? कति वा विरुद्धसंयोगा हानि-कराः ? इदं लघु, इद गुरु, इदं तत्त्वं, इदं नेति निर्णयः केन कर्तुं शक्यः ? सम्भवति च प्रत्यक्षानुमानाभ्यां कृतोपि निर्णयः ईशसमवेतेन ज्ञानेन विसंवाद्यपि । तत्र पूर्वोक्तयुक्त्या ईशज्ञानावृत्तिविषयताशून्यत्वरूपं प्रमात्वं वा न भवेत् । सत्येव ज्ञानप्रभा-सत्त्वपरिणामिनी नोपलभ्येत । पुरुषबुद्धिप्रसूतेष्वर्थेषु अप्रामाण्यदर्शनेन तत्र सन्दि-ग्धत्वं दोषवहुलत्वं, आशङ्काहत्वं, क्वचिद्यथार्थत्वं वा तत्र न भवितुमर्हं स्यात् ? परमे-श्वरस्तु यमर्थमुपदिशति, तत्र कार्यकरत्वस्य नैयत्यात् आनन्दप्रभामिश्रितत्व नियतं इति प्रागुक्तम् । अतः तस्य नैयत्ययुक्तस्य राज्यबीजभूतस्य सत्त्वस्य लाभाय शब्द-प्रमाणं नीतिलक्षणे घटकतयोक्तम् ।

प्रत्यक्षानुमानोपयोगः

अथ नीतिलक्षणे प्रत्यक्षानुमानोभयोपयोगित्वमुच्यते । विषयोऽयं रसप्रतीतौ प्रतिबन्धकानां विचारे कृते सति स्फुटः स्यात् । यतः तत्र ये प्रतिबन्धका विघ्नास्त एव

(वैदिक०) नीत्यनुष्ठाने तदधिकारिणां पुरतः सम्भवन्ति। तन्निवारणोपायाश्चोभयत्रापि समानाः, इति प्रत्यक्षानुमानयोः उपयोगित्वप्रदर्शनार्थं रसप्रतीतौ प्रतिबन्धकभूता विघ्नास्तन्निवारणेपायाश्चाभिधीयन्ते। तथाहि–असम्भावना १-विपरीतभावना २-देश-कालविशेषावेशः ३-निजसुखादिविवशीभावः ४-अप्रधानता ५-सन्दिग्धता ६-परिमित-प्रमातृता ७-चेति सप्त विघ्नाः साहित्यशास्त्रे अभिनवभारत्याम् उपवर्णिताः। अमुकं कर्म अमुकेन अमुकसमये कृतं इत्येतत्स्वरूपे ज्ञाते तेन मम किं प्रयोजनं ? इति ज्ञात्वा तच्चरित्रदर्शनात्सामाजिक औदासीन्यं भजते। तन्निरासाय नाटके विधिभागः चरित्राभिनयेन ज्ञापयितव्यो भवति। तेन वैधं कर्म अस्माभिरनुष्ठातव्य-मिति जानानः सामाजिकः नौदासोन्यं ततः स्वीकरोति इति देशकालविशेषावेशः, एवमेव सवसाधारण्येन समयनिर्देशान्निजसुखादिविवशीभावः, साधारणीकरणव्यापारात् परिमितप्रमातृता, रसस्य प्राधान्यात् अप्रधानता, अनुभावादीनां यथावदभिनयात् अभिव्यज्यमानविषये संदिग्धता चेति पञ्चदोषा अपसार्यन्ते। असम्भावनाविपरीत-भावनयोर्निराकरणाय ऐतिहासिकं लौकिकं प्रसिद्धं च नेतृचरित्रं नाटके अभिनीयते। अन्यथा अभिनीतं तच्चचरित्रं अलौकिकत्वात् असम्भावितं मन्येरन् नाटकदर्शिनः। तथैव कार्यकारणभावविपरीतं चेत् तच्चरित्रं बाधितमिति ततो विरसीभवन्ति सामा-जिकाः। अतः प्रत्यक्षानुमानाभ्यां मिहैवसिद्धत्वं प्रदर्श्य अभिनीतस्य चरित्रस्य लौ-किकत्वं संसाध्यते। अर्थात् असम्भावनाविपरीतभावनयोः निरासाय प्रत्यक्षानुमा-नाभ्यां निर्णीतं यच्चरित्रं लौकिकत्वेन प्रसिद्धं तदेव कविनाऽभिनीयते। एवम् नीति-शास्त्रेणापि यद्विधीयते परिपालनोपायानुष्ठानार्थं, तत्र यदि असम्भावितत्वं आशङ्कितं स्यात् तर्हि तन्निरासाय प्रत्यक्षानुमानाभ्यां नीतिविहिते लौकिकत्वं, तथा पूर्वराजचरितत्वादबाधितत्वं च ज्ञाप्यते इति। एतेन तर्कसचिवस्य इतिहासस्य प्रामाण्यमपि सिद्धं भवति। अतः नीतिलक्षणे प्रत्यक्षानुमानयोर्निवेशः कृतः।

यद्यपि नीतिशास्त्रात्मकमर्थशास्त्रं पृथिव्या लाभपालनार्थं अस्तीति प्राङ् निर्णीतम्। लाभपालने च राजधर्मः। तथा च निष्प्रयोजनत्वात् अर्थशास्त्रं राज्ञः इतरै-र्नाध्येयमिति आपाततो भाति, तथापि यस्मिन् समये राजा नीतिशास्त्रं पर्यालोचयन् प्रजाः पालयति तदा इतरे नीतिशास्त्रं मा चिन्तयन्तु। यदा तु तथाविधो राजा नास्ति तदा इतरैः पालनधर्मो नोपेक्ष्यः। न वा तद्विधायकं नीतिशास्त्रम् उपेक्ष्यतामर्हति, पालनधर्मस्य मुख्यत्वात्। तदुक्तम्—

क्षात्रो धर्मोह्यादिदेवात्प्रवृत्तः पश्चादन्ये शेषभूताश्च धर्माः इति (भारत)[१]।

---

१. तथा—

दण्डनीतिर्यदा सम्यङ्नेतारमधितिष्ठति।
तदा विद्याविदः शेषा विद्याः सम्यगुपासते ॥ ९ ॥
आन्वीक्षिकीत्रयीवार्ताः सर्वाविद्याः प्रचक्षते।
सत्योऽपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे ॥ ८ ॥ इति (नी० स० २)–

शङ्करार्यकृता

जयमङ्गला

शास्त्रारम्भे प्रयोजनमाह—पृथिव्या इति। अन्यथा अनुक्तप्रयोजने प्रेक्षावताम् अप्रवृत्तेः। पृथिव्या इति तत्स्वभावाया विस्तीर्णरूपाया इत्यर्थः। अनेन शास्त्रस्य महाविषयताम् आह लाभे पालने चेति। लाभनिमित्तं पालननिमित्तं च "निमित्तात् कर्मसंयोग" (वा० २. ३. ३६) इति सप्तमी। लाभो "नवो भूतपूर्वः पित्र्यश्चेति' (अधि० १३. अध्या० ५)। पालनमपि स्वेभ्यः परेभ्यश्चेति द्विविधम्। विषयसप्तमी-वा शास्त्रस्य अनन्यत्रभावात्। ननु चोभयोरपि पक्षयोर्वर्धनस्य तीर्थप्रतिपादनस्य चासंग्रहात् कथं प्रतिपत्तिः। यथा वक्ष्यति-"रक्षितवर्धिनी वृद्धस्य तीर्थप्रतिपादनी च" (अधि० १. अध्या० ४) इति। सत्यम्। किञ्चास्यैव विशेषनिर्देशोऽयम्। रक्षित-वर्धनमप्यर्जनमेव, तीर्थप्रतिपादनमपि गुणवति पुत्रादौ निक्षेपः, अश्वमेधादौ वा विनियोगः। तदपि हि रक्षणमेव। तस्मादुभयमपि पालनान्तर्भूतमेव द्रष्टव्यम्।

जयमङ्गलाक्रोडपत्रम्

निमित्तादिति। वैदिकसिद्धान्तसंरक्षिण्यां निमित्तत्वं (२५ पृ.) स्फुटीकृतम्। सप्तम्या अर्थान्तरमाह—विषय इति। शङ्कते नन्विति।

स्वत्वास्पदीभूतस्य स्वजीवनानन्तरं रक्षणोपायमाह—गुणवतीति। अगुणश्चेत् पुत्रः धनं प्राप्य प्रमादेन अर्थं विनाशयेत् अतः गुणवत्पदोपादानम्। राज्यसंरक्षण-क्षमः अपरोऽपि कश्चित् पुत्रसदृशः गुणवान् भवितुमर्हति तद्व्यावृत्तये पुत्रपदम्। तेन पुत्रे आत्मसम्पद्गुणेषु अन्यतमकुलीनत्वलाभोऽपि अधिको गुणो बोध्यः। गुणवत्पुत्राभावे अश्वमेधादौ सम्पत्तेर्विनियोगो वरः न तु दुष्टहस्ते इत्याशयेनाह-अश्वमेधादाविति।

राज्ञः सत्वसूचनम्

सर्वा दिशो विजित्य एकत्र सञ्चितायाः सम्पत्तेः विभाजनं यदि राजा न करोति तर्हि विद्याकलाप्रभृतीनां राज्यस्थित्युपायेषु मूलभूतानां संरक्षणं न भवेत्। तदर्थं सञ्चितायाः सम्पत्तेः विभज्य यज्ञे दानमवश्यं तेन कर्तव्यम्। तच्च सत्त्वसम्पत्तेः सूचकम्। यद्यपि यज्ञादन्यत्रापि सम्पत्तेर्दानं भवितुमर्हति तथापि यज्ञस्यैव इदृशी वर्तते यत्र सर्वासां विद्यानां, कलानां च संरक्षणम्, सर्वेषां सेवा, दानद्वारा समस्तानां

वीरमित्रोदये व्यवहारप्रकाशेऽपि—

न चैवं प्रजापालनविधेरभिषिक्तक्षत्रियाधिकारिकत्वादन्येषां तत्र फलाभावेनाप्रवृत्तिः। दृष्टद्रव्यादिलाभार्थं कथञ्चित् प्रवृत्तावपि तस्मात् धर्माभावप्रसङ्गः अन्यथादर्शनान्यायप्रदर्शना-वृत्यादिना प्रत्यवायाद्यभावापत्तिश्चेति वक्तव्यम्। अतो दयाऽहिंसादिसाधारणधर्मान्तर्भाविन प्रजापालनस्य तेषामपि धर्मजनकत्वात् नृपपदेन तत्संग्रहसंभवाच्च। इति (वी० व्य० पृ० १३)

जयमङ्गला

यावन्तीति। यावत्प्रमाणानि साकल्यार्थं वचनम्। अर्थशास्त्राणीति अर्थो येन लोको वर्तते तदर्थं शास्त्रमिति। यद्येवं वार्ताशास्त्रं तत्, न नीतिशास्त्रम्। यस्माद् भूमिहिरण्यधान्यपशुभाण्डोपस्करादिरर्थः अमुत इति कृत्वा, तेन नीतिशास्त्राणीति वक्तव्यम्। सत्यम्। प्राधान्यादेवमुक्तम्। यतो भूम्यादीनामर्थानां पूर्वः पूर्वः प्रधानम्

जयमङ्गलाक्रोडपत्रम्

रक्षण, समस्तदेवताप्रसादः, सुभिक्षादिसमृद्धिश्च भवितुमर्हति। तथा यागनिमित्तेन धर्मभावनाया वेदमूलिकाया जागरूकत्वात् तन्मूलः सन्धिश्च स्थिरो भवति। तन सर्वेषामनुरागपात्रता च नियता। अत एव सन्धेयेषु धार्मिकोऽपि एकः विजातीयत्वेन सङ्गृहीतः सत्यार्यावित्यादिना[1]।

सर्वेषां वर्णानामाश्रमाणां तत्तद्वृत्तिजीविकानां च अन्तर्बहिर्वा कुत्रचित् अधिकारानुसारेण यत्र उपयोगः वर्तते एवंविधासु यज्ञसंस्थातिरिक्तसंस्थासु स्थायिसन्ध्यनुकूलं सम्पत्तेर्विभज्य दानं भवितुमर्हतीति न वक्तुं शक्यते। सन्धेः स्थिरतार्थमपेक्षितस्य सत्वसूचकस्य अपौरुषेयवेदमूलकस्य यज्ञादिकर्मणः अङ्गत्वं कथं भवतीति "शान्ति का अग्रदूत"—ग्रन्थे सप्रमाणमुपन्यस्तमस्ति। अतोऽत्र पुनस्तन्न विमृश्यते। एवञ्च अश्वमेधादौ सम्पत्तेर्विनियोगे कृते सति अपेक्षितस्य राज्याधारभूतस्य सत्त्वस्य राज्ञि अभिव्यक्तिर्भवति इति सिद्धम्। अत्राश्वमेध एव न विवक्षितः। किन्तु आदिपदात् सत्त्वगुणस्य परिचायकादि यद्यत् येषु येषु धर्मेषु अभिव्यज्यते ते ते सर्वे धर्माः सन्धायका अत्र विवक्षिताः। इदं फलमुपलक्षणम्। अश्वमेधादिधर्मसम्पादनेन अदृष्टद्वारा सम्भाव्यमानानि उपर्युक्तफलापेक्षया अतिरिक्तफलान्यपि प्रशस्तपादभाष्यादौ उक्तानि वेदितव्यानि (प्र० भा०) कर्मनिरूपणे[2]।

अर्थपदं व्याहर्तुमाह—अर्थ इति। अर्थशास्त्रनीतिशास्त्रयो-र्भेदमाशङ्क्य नीति-

---

१. सत्यार्यौ धार्मिकानार्यौ भ्रातृसङ्घातवान् बली।
अनेकयुद्धविजयी सन्धेयाः सप्त कीर्तिताः। नी० सार स० ९

तथा–ज्ञानं तपो यज्ञविधिः प्रदानमेते कृतादौ सुकृतावताराः।
एतैः समाकृष्य जगन्ति धर्मः सन्तापयामास बलादधर्मम्।
(धर्मविजयनाटके घ० वि० ना० १ अ० १ श्लो०)

२. "योगिनां च बहिरुद्रेचितस्य मनसोऽभिप्रेतदेशगमनं प्रत्यागमनं च तथा सर्गकाले प्रत्यग्रेण शरीरेण सम्बन्धार्थं कर्मादृष्टकारितम्। एवमन्यदपि महाभूतेषु यत्प्रत्यक्षानुमानाभ्यामनुपलभ्यमानकारणमुपकारापकारसमर्थं च भवति तदप्यदृष्टकारितम्, यथा सर्गादावणुकर्म, अग्निवाय्वोरूर्ध्वतिर्यग्गमने, महाभूतानां प्रक्षोभणम्। अभिषिक्तानां मणीनां तस्करं प्रति गमनम्। अयसोऽयस्कान्ताभिसर्पणं चेति"।

जयमङ्गला

अर्थः[1], प्रधानञ्च मनुष्यवती भूमिः, सर्वकर्मणां योनित्वात्। वक्ष्यति च तन्त्रयुक्तौ—"मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः। तस्या मनुष्यवत्या भूमेः पृथिव्या लाभपालनोपायभूतं शास्त्रमर्थशास्त्रमिति" (अधि० १५. अध्या० १)। वृत्तिरर्थं इति वर्तनहेतुत्वात्। पूर्वाचार्यैरिति। पूर्वग्रहणं प्रकर्षार्थत्वाद् बृहस्पत्याद्युपसंग्रहार्थम्। आचार्यैरिति, न यैः कैश्चित्। प्रस्थापितानि प्रवर्तितानि। प्रायश इति प्रतिषेधार्थम्। (क्वचित् स्वीयमतप्रदर्शनार्थम्, नेति कौटिल्य इति)। अनेन सामान्येनार्थ-शास्त्रस्य प्रयोजनमुक्तम्। तेषु सत्सु पुनरारम्भोऽनर्थक इति चेदाह-तानीति। संहृत्य ततः स्तोकं स्तोकं परित्यज्य। इयांस्तु विशेषः। अत्र यत् केषाञ्चिन्मत-मनुमतं यथा "सर्वमुपपन्नमिति कौटिल्यः" केषाञ्चिन्नानुमतं यथा "नेति कौटिल्यः" इति। एकमिति अनपेक्षितसहायान्तरम्। इदमिति बुद्धिस्थमाह। पुनरर्थशास्त्रग्रहणं प्रसङ्गतो धर्माद्युपदेशेऽपि अर्थोपदेशः प्रधानमिति प्रकाशनार्थम् "अर्थमूलौ हि धर्मकामौ" (अधि० १, अध्या० ७) इति। कृतमिति शास्त्रपरि-समाप्तिमाशंसते। "वृष्टश्च देवो निष्पन्नाश्शालयः" इति। यथा प्रपञ्चित (विचित्र ?) त्रिवर्गाणि पूर्वाचार्यप्रणीतशास्त्राणि संक्षिप्य अल्पेन ग्रन्थेन यदर्थकथनं तदस्य प्रयोजनम्। ऐदंयुगीनानां पूर्वशास्त्राध्ययनासामर्थ्यात् तथा चोक्तम्—

"ब्रह्माऽध्यायसहस्राणां शतञ्चक्रे स्वबुद्धिजम्।
तच्छङ्करेण शक्रेण गुरुणा भार्गवेण च॥
सङ्क्षिप्तं मनुना[2] चैव बहुभिश्च तपोधनैः।
प्रजानामायुषो ह्रासं विज्ञाय च महात्मना॥
संक्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये।" इति।

जयमङ्गलाक्रोडपत्रम्

शास्त्रमपि लाभपालनोपायप्रतिपादनात् अर्थशास्त्रान्नान्यत् इति दर्शयितुमाह—सत्यमिति।

प्रवर्तितानीति—बहुत्वोक्त्या कदाचित् क्वचित् आत्मीयदर्शनानां प्रतिपाद-नार्थमिति गणपतिशास्त्रिभिः व्याख्यातम्।

प्रकाशनार्थमिति—तेन यत्र कौटिल्येन न निषिद्धं न वा स्वमतमिति उक्तम् तत्सर्वं पूर्वाचार्यसम्मतमेव ज्ञेयम्। विशेषविधिनिषेधयोः शेषविधिनिषेधाभ्यनुज्ञाकल्प-कत्वमितिन्यायात्। प्रजानामायुष इति।

ह्रासः यः अत्र उक्तः तस्य मूलं महाभारते ज्ञेयम्॥।

अशुद्धम्

१. प्रधानं। अर्थः। (पा०)

२. संक्षिप्तं मनसा। (पा०)

❀ तद्यथा शा० प० रा० म० भा० अ० ५९–

जयमङ्गला

सम्बन्धस्तु प्रयोजनस्य शास्त्रस्य प्रतिपाद्यप्रतिपादकलक्षणः, स च तदन्तर्गतत्वात् पृथङ्नोक्तः। सामान्यन्तु प्रयोजनमस्य अस्त्येव।

ततो ऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम् श्लो० २९ पूर्वार्धं

ततस्तां भगवान् नीतिं पूर्वं जग्राह शङ्करः।
ब्रह्मरूपो विशालाक्षः शिवःस्थाणुरुमापतिः। ८०।
प्रजानामायुषो ह्रासं विज्ञाय भगवान् शिवः।
संचिक्षेप ततः शास्त्रं महार्थं ब्रह्मणा कृतम्। ८१।
वैशालाक्षमितिप्रोक्तं तदिन्द्रः प्रत्यपद्यत।
दशाध्यायसहस्राणि सुब्रह्मण्यो महातपाः। ८२।
भगवानपि तच्छास्त्रं संचिक्षेप पुरन्दरः।
सहस्रैः पञ्चभिस्तात यदुक्तं बाहुदन्तकम्। ८३।
अध्यायानां सहस्रैस्तु त्रिभिरेव बृहस्पतिः।
सञ्चिक्षेपेश्वरो बुद्ध्या बार्हस्पत्यं तदुच्यते।
अध्यायानां सहस्रेण काव्यः संक्षेपमब्रवीत्।
तच्छास्त्रममितप्रज्ञः योगाचार्यो महायशाः। ८५।
एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः।
संक्षिप्तमायुर्विज्ञाय मर्त्यानां ह्रासमेव च। इति।

उदयनाचार्या अपि ह्रासकारणं कुसुमाञ्जलौ व्यवृण्वन्।

तद्यथा "जन्म-संस्कार-विद्यादेः शक्तेः स्वाध्याय-कर्मणोः।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम्।
न्याय कु० द्वि० स्त० श्लो० ३

सम्प्रदायस्य वेदादिसम्प्रदायस्य ह्रासोऽनुमीयतां कुतः जन्मादेर्ह्रासदर्शनात्।

प्रयोगश्च वेदादिसम्प्रदायोऽयं अत्यन्तमुच्छिद्यते ह्रसमानत्वात् प्रदीपवत्। स्वरूपासिद्ध्युद्धारायाह जन्मेति। पूर्वं मानस्यः प्रजास्ततः पुत्रमात्रार्थितप्रयुक्तमैथुनजाः, सम्प्रति सम्भोगकामिप्रवृत्यावर्जितजन्मान इति जन्मह्रासः। पूर्वं चरुप्रभृतिषु संस्कारः, ततो गर्भे, ततो जननानन्तरम् इदानीं कथञ्चिदिति संस्कारह्रासः। पूर्वं सहस्रशाखस्य चतुर्वेदस्याध्ययनं तत एकस्याः शाखाया इत्यादिक्रमेण विद्याह्रासः।

विद्यादेरित्यादिना वृत्तिधर्मादिसंग्रहः। पूर्वमुञ्छशिलवृत्तयस्ततोऽयाचितवृत्तयस्ततः कृष्यादिवृत्तयस्ततः सेवावृत्तय इति वृत्तिह्रासः। पूर्वं तपोज्ञान-यज्ञदानात्मकश्चतुष्पाद् धर्मः ततः त्रेतादौ एकैकह्रासः। कलौ च विसंष्ठुलः स्खलद्दानैकपादिति धर्मह्रासः। पूर्वं यज्ञशेषभुजस्ततोऽतिथिशेषभुजस्ततः स्वार्थसाधितभुजस्ततो भृत्यादिसहभुज इत्यादि धर्मह्रासः। स्वाध्यायस्याध्ययनस्य कर्मणो यागादेः शक्तेः सामर्थ्यस्य ह्रासात् अध्ययनशक्तेः कारणस्य ह्रासात् विद्याशक्तेः कार्यस्य ह्रास इति पृथङ् निर्देशः इति। शेषं तट्टीकायाम् द्रष्टव्यम्।

जयमङ्गलाक्रोडपत्रम्

एवंरीत्या अतिचिरन्तनकालात् ह्रासे प्रवृत्तेऽपि भगवदनुकम्पया एकाग्रभूमिकासम्पन्नेन गुरुभक्तेन चाणक्येन अर्थशास्त्रमहोदधिं निर्मथ्य अमृतवत् संक्षिप्तमिदमर्थशास्त्रं प्रदत्तं महते उपकाराय अस्मासु समभूत् । यस्य तु सात्त्विकी प्रज्ञा नास्ति न वा वेदानुगामिनी, न च वेदाध्ययनेन धारणावती, तेन तु अपारं शास्त्रं निर्मथ्य वास्तविकं सप्रमाणममृतमुद्धृत्य मार्गः प्रदर्शयितुम् न शक्यः इति तु निश्चितमेव (पृ० ३४) टिप्पण्युद्धृतमहाभाष्यप्रामाण्यात् । तस्य निष्कर्षः । सन्ति केचन शिष्टाः ये जन्मत एव यथाशास्त्रं विनाऽप्यधीतिं साधुशब्दं प्रयुञ्जते । तेषामात्मसन्तोषः व्याकरणेन असाधितेषु प्रयोगेषु साधुत्वस्य निर्णायको भवति इति । अतथाविधैस्तु यथेच्छं व्यवहृतः प्रयोगः साधुत्वपरिचायको न भवति इत्येवं न्यायः अत्राऽपि अनुसर्तव्यः[1] ।

अयमेव न्यायः तथाविधैः प्रणीतेषु अन्यसमस्तशास्त्रेष्वपि बोध्यः ।

कौटिल्यमतस्य शास्त्रसम्मतत्वम्

क्वचित् कौटिल्येन पूर्वाचार्यमतं प्रतिषिध्य उपन्यस्ते मते शास्त्रसम्मतत्वं वेदमूलकत्वञ्च नाऽस्ति इत्यतोऽस्य मतस्य शब्दप्रमाणकत्वं कथं भवितुमर्हति इत्ययमंशः अवश्यं विचारणीयतामर्हति । तत्रोच्यते ।

सर्वोऽपि विषयः शास्त्रेण कण्ठतः उक्तः इति नास्ति स्थितिः । अतएव शास्त्राधीनमहावाक्यतात्पर्यनिर्णयार्थं मीमांसापद्धत्या न्यायानामुपयोगः शास्त्रविद्भिः

---

१. महाभाष्ये पृषोदरादि० ६-३-३ पृ० २५७

"पृषोदरादीनीत्युच्यते । कानि पृषोदरादीनि । पृषोदरप्रकाराणि । कानि पुनः पृषोदरप्रकाराणि । येषु लोपागमवर्णविकाराः श्रूयन्ते न चोच्यन्ते । अथ यथेति किमिदम् । प्रकारवचने थाल् । अथ किमिदमुपदिष्टानीति उच्चारितानि । कुत एतत् । दिशिरुच्चारणक्रियः । उच्चार्य हि वर्णानाह उपदिष्टा इमे वर्णा इति । कैः पुनरुपदिष्टाः । शिष्टैः । के पुनः शिष्टाः । वैयाकरणाः । कुत एतत् । शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रम् । तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । एवं तर्हि निवासतश्चाचारतश्च । स च आचार आर्यावर्त एव । कः पुनः आर्यावर्तः । प्रागादर्शात्प्रत्यक्कालकवनात् । दक्षिणेन हिमवन्तमुत्तरेण पारियात्रमेतस्मिन्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गताः तत्र भवन्तः शिष्टाः । यदि तर्हि शिष्टाः शब्देषु प्रमाणम् । किमष्टाध्याय्या क्रियते । शिष्टपरिज्ञानार्थाऽष्टाध्यायी । कथं पुनरष्टाध्याय्या शिष्टाः शक्या विज्ञातुम् । अष्टाध्यायीमधीयानोऽन्यं पश्यत्यनधीयानं येऽत्र विहिताः शब्दाः तान् प्रयुञ्जानं स पश्यति । नूनमस्य देवानुग्रहः । स्वभावो वा योयं न चाष्टाध्यायीमधीते । ये चास्यां विहिताः शब्दाः ताँश्च प्रयुङ्क्ते । नूनमयमन्यान्यपि जानातीति एवमेषा शिष्टज्ञानार्थाऽष्टाध्यायीति" ।

जयमङ्गला

क्रियते। तद्द्वारा निर्णीतोऽर्थः शास्त्रमूलको न वेति प्रश्नमादाय न विद्वांसो विप्रतिपद्यन्ते। प्रत्युत "युक्तिहीनविचारे तु धर्महानिः प्रजायते, इत्येव तैः सिद्धान्तितम्[1]।

नीतिशास्त्रविषयोऽपि मीमांसादिसमस्तशास्त्रदृष्ट्या यदि विचार्यते तर्हि कौटिल्यवचनस्याऽपि नीतिशास्त्रमहावाक्यार्थनिर्णये उपयोगित्वात् तत्र वेदमूलकत्वं शास्त्रसम्मतत्वं च वक्तुं युज्यते। तथाहि—एतद्विषयनिरूपणात्पूर्वं शास्त्रं कतिविधं भवति इति अवश्यं ज्ञातव्यमस्ति। अतः आदौ तद्भेदो निरूप्यते। शास्त्रं द्विविधं भवति। अदृष्टार्थकं दृष्टार्थकं च। तत्र अदृष्टार्थकं शास्त्रं 'यजेत', 'उपासीत' 'अग्निहोत्रं जुहोती'त्यादिकम्। ईदृग्विधेषु विधिषु धात्वर्थः अदृष्टोत्पत्यर्थं अज्ञातत्वात् विधीयते। नास्त्यत्र न्यायापेक्षा। दृष्टार्थकं च शास्त्रं 'व्रीहीन् अवहन्ति', इत्यादिकम्। एवंविधेषु विधिषु अवघातादि धात्वर्थः। वितुषीकरणरूपेष्टसाधनत्वेन न अज्ञातः इति स न विधीयते। किन्तु "एतादृशस्थलेषु स्वाध्यायोऽध्येतव्यः" इति वचनबलेन प्रयोजनवदर्थज्ञानसाधनीभूताध्ययनभाव्यकत्वेन ज्ञातानामुक्तविधीनां निष्प्रयोजनत्वपरिहाराय नियमादिविधित्वं यथायोग्यं मीमांसान्यायाधीनगौरवलाघवमर्यादया बोध्यं भवति। नह्येतत्कल्पने वेदामूलकत्वं शास्त्रासम्मतत्वं वा कैश्चित् स्वीक्रियते। स एव न्यायः अर्थशास्त्रव्यवहारशास्त्रादिषु दृष्टार्थकेषु समन्वितो भवति। एतानि सर्वाणि शास्त्राणि यत् उद्दिश्य प्रवृत्तानि प्रायः तानि दृष्टफलान्येव। अतः दृष्टमुद्दिश्य प्रवृत्तानि इमानि शास्त्राणि प्रायः नियमविध्यादिपर्यवसायीन्येव भवन्ति। क्वचित् सति सम्भवे तेषु अपूर्वविधित्वं कल्पितमिति अन्यदेतत्। अत एव दृष्टार्थमुद्दिश्य ऋषिभिः प्रोक्तेषु अर्थव्यवहार-शास्त्रादिषु वक्तृतात्पर्यानुरोधेन वाक्यभेदादीनां दोषत्वं न स्वीक्रियते। तदेतत्सर्वं प्रपञ्चितं व्यवहारप्रकाशे द्रष्टव्यम्[1]।

इत्थञ्च नियमविधयः दृष्टार्थकविधिस्थले भवन्तीति स्वीकृतम्। नियमोबलात् इतरव्यावृत्तिरपि अर्थादेव सिद्धा। किञ्च व्रीहीन् अवहन्तीत्यादौ तण्डुलस्य निष्पत्तये वितुषीकरणोद्देश्येन प्रवृत्तोऽयं विधिः इदं कार्यमवघातेनैव कर्तव्यमिति नियमे पर्यवस्यति तथा नियमातिक्रमे प्रत्यवायोऽपि भवति इत्यपि च बोधयति। परन्तु उद्देश्यस्य हानौ नियमं परित्यज्य नखविदलनेनापि व्रीहीणां वितुषीकरणं क्रियते। क्वचित्

---

१. धर्मे प्रमीयमाणे तु वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति। श्लो० वा०

२. (पृ० १३) तस्मादयमत्र निष्कर्षः। उत्सर्गापवादादिमूलभूतान्वयव्यतिरेकादिन्यायमूलकता यत्र सम्भवति तादृशव्यवहारशास्त्रस्य सर्वस्य न वेदमूलकता कल्प्यते। यदंशे तदसम्भवस्तत्रादृष्टार्थकतया वेद एव मूलं कल्प्यते। वास्तुसामुद्रिकादिविधिषु ज्योतिःशास्त्रायुर्वेदप्रामाण्यव्यवस्थापनप्रसङ्गे आचार्यैः स्मृत्यधिकरणे व्यक्तमेव एतत्प्रपञ्चितम्।

जयमङ्गलाक्रोडपत्रम्

समस्तानां अङ्गानां अप्राप्त्या उद्देश्यस्य सर्वथा विलोपे सम्भवति निषिद्धस्यापि ग्रहणं क्रियते। तदिदमुभयमपि अधोनिर्दिष्टेन विवेचनेन स्फुटीभविष्यति। तत्र नियमातिक्रमोदाहरणं -- यथा-व्रीहीनवहन्तीति शास्त्रेण अवघाताभावाभावरूपो नियमः उक्तः। अनुष्ठितेऽपि तस्मिन् यदि एको वा द्वौ वा व्रीही सतुषौ अवशिष्टौ। तदानीम् अवशिष्टस्य तस्य अवयविभावरक्षणपुरस्सरं वितुषीकरणं अवघाते-नाशक्यं तदा नखविदलनमपि कर्तुं मीमांसकैरनुमतम्। अथ निषिद्धोदाहरणम् उच्यते। तथाहि—

"अयज्ञिया वै माषा" इत्युक्त्या हविर्द्रव्येषु माषाः निषिद्धाः। व्रीहयो यवा वा ग्राह्यत्वेनोक्ताः। तथापि यस्मिन् देशे यस्मिन् समये वा व्रीहियवानामनुपलब्धिः तत्र अनिषिद्धेन माषातिरिक्तेन धान्येन हूयते। यदि कदाचित् माषातिरिक्तं धान्यमपि सर्वथा अनुपलब्धं भवति, होमश्च अवश्यं कर्तव्यः, स तु विलोपयितुं न शक्यते। एवं स्थिते निषिद्धैरपि माषैः होमः कर्तव्यः एव भवति। अग्निहोत्रस्य विलोपस्तु न भवति[1]।

एवं चात्र उभयत्रापि स्थले मीमांसकैर्न्यायमाश्रित्य योऽयं निर्णयः कृतः स शास्त्रसम्मतः वेदमूलकश्चेति अस्ति वैदिकसमाचारः। तथैव नीतिशास्त्रविषयेऽपि बोध्यम्। अस्य हि मुख्यमुद्देश्यम् आत्मनि विश्वासं दृढतरं चिरस्थायिनमुत्पाद्य लोकानुरागपुरस्सरं पृथिव्या लाभः पालनं च निर्दिष्टम्। तत्र पूर्वाचार्यैर्निर्दिष्टाः ये विधयस्ते दृष्टार्थकत्वात् प्रायः नियमविधित्वे पर्यवसिताः। तेषां स्वीकरणे क्वचित् व्रीहीणां तण्डुलस्य अवघाते कृते तद्-विनाशवत् यदि प्रजापालनात्मकोद्देश्यस्य विनाशः प्रसक्तो भवति तर्हि स वास्तविको न वेति सूक्ष्मतया परिज्ञाय एकाग्रभूमि-कायां स्थितेन उपरिबुद्धिना ऐश्वर्यादिसम्पन्नेन पूर्वाचार्योदाहृतनियमानतिक्रम्यापि अन्यद् यदि विहितं तदपि प्रजापालनार्थं प्रवृत्तानामाचार्याणां उद्देश्यसम्मतत्वाद्वेद-मूलकमेव इति युक्तमुत्पश्यामः। तदुक्तम् "यत् किञ्चिद् अनूचानः अभ्यूहति आर्षं तद्भवति" इति।

एवंरीत्या कौटिल्येनोक्तः स्वधीसम्मतोऽप्यर्थः शब्दप्रमाणमूलभूतः सन् प्रत्यक्षा-नुमानप्रमितः कथं भवतीत्यपि नीतिलक्षणसङ्गमनाय चिन्तनीयमेव। तत्तु तत्र तत्र प्रसङ्गे स्वयं मूलकृतैवव्यवस्थापयिष्यते। इत्यलमतिविस्तरेण।

विषयप्रयोजनसम्बन्धाधिकारिणः मूलस्थेन 'पृथिव्या लाभे पालने च"ति वाक्येन निरूपिता भवन्तीति विशदीकृत्य, नीतिशास्त्रस्य अध्ययनीयत्वम् अत्यन्त-

---

१. अयज्ञिया इत्यत्राहार्थिकप्रत्ययेन साधनत्वमात्रनिषेधात् विशेषविहितातिरिक्तस्थले सर्वत्रैव माषादिप्रतिषेधप्रतीतेर्न प्रतिनिधेयाः। द्रव्यसामान्याभावे तु ग्राह्या एवेति ध्येयम्। अत्र च लक्षणया यज्ञोद्देश्येन माषनिषेधविधानात् नैकप्रसरताभङ्गः। भा० दी० अ० ६ पा० ३।

जयमङ्गला

अत्र केचिदाहुः-धर्मस्यअलौकिकत्वात्तदभिधायकं[1] शास्त्रम्, अर्थस्योपायपूर्वकत्वाद् उपायस्य च शास्त्रपूर्वकत्वाद्[2] युक्तं तदर्थं[3] वार्ताशास्त्रम्। नीतिशास्त्रं तु न युक्तम्, यतो नीतिशास्त्रमनर्थकमिति। प्रत्यक्षानुमानागमप्रमाणदेशकालशक्तिपुरस्सरार्थसाधन विनियोगलक्षणा[4] क्रिया नीतिः, सा प्रेक्षावताम्[5]। दृश्यते नीतिं विना पशूनां तत्कल्पानाञ्च बालानाम् आत्महिततृणस्तन्याहारप्राप्तिरनिमित्ता[6]। शीतोष्णवात वर्षादिपरिहारश्च फलम्। तथाऽनधीतशास्त्राणा-

जयमङ्गलाक्रोडपत्रम्

मभ्यर्हितम्। तच्चिन्तनाभावे त्रिवर्गसमृद्धिलोपः स्यात् इति दर्शयितुमाह—'अत्र केचिदाहुरिति'।

अयं दुर्बोधत्वादयं ग्रन्थो व्याख्यायते।

अत्र हि आदिमैः सप्तभिर्वाक्यैः नीतिशास्त्रस्य वैयर्थ्यमाशङ्क्य परितनैर्वाक्यैर्भक्तिश्रद्धापूर्वकं तस्यादरणीयत्वं व्यवस्थाप्यते। आशङ्काग्रन्थे सप्तवाक्यात्मके, धर्मशास्त्राणां अर्थशास्त्रान्तर्गतवार्ताशास्त्राणां चावश्यकत्वं प्रथमवाक्येनैव निर्धार्य स्वीकृतम्।

उपरितनैः षड्भिस्तत्रत्यैर्वाक्यैर्नीतिशास्त्रस्य निष्प्रयोजनत्वमुपक्षिप्यते इति स्पष्टमेव। अतो निश्चयेनैतद्वक्तुं शक्यते, यल्लौकिकेष्वेवार्थेषु शब्दात्मकस्यास्य शास्त्रस्य समाधानग्रन्थस्थैः पञ्चविंशतिवाक्यैरावश्यकत्वं स्थिरीकृतम्।

एतेषु वाक्येषु प्रथमवाक्येन धर्मशास्त्रवार्ताशास्त्रयोरावश्यकत्वे स्थिरीकृते नीतिशास्त्रस्यानर्थक्यशङ्कनं द्वितीयवाक्यस्य विषयः। उपरितनैः पञ्चभिर्वाक्यैर्निष्प्रयोजनत्वमेव स्फुटीक्रियते। नीतेः शास्त्रसम्मतं स्वरूपमनिर्धार्य तत्र निष्प्रयोजनतायाः साधयितुमशक्यत्वात् तृतीयवाक्येन प्रथमतस्तत्स्वरूपमनूदितम्। चतुर्थपञ्चमाभ्यां वाक्याभ्यामेवंलक्षणीयाया नीतेरनावश्यकता। षष्ठेन वाक्येन नीतेरावश्यकत्वेऽपि म्लेच्छदृष्टान्तेन तत्र शास्त्रस्यानावश्यकत्वम्। सप्तमेन तु शास्त्रसत्त्वेऽपि तस्य वैयर्थ्यमाशङ्कितम्। अथास्य शङ्काग्रन्थस्य यथाक्रममुत्तरम्—

१—नीतेर्विना फलं नास्ति।

अशुद्धम्

१. त्वादमिधायकं शास्त्रम् (पा०)।
२. पूर्वकत्वाद् तद् युक्तम् (पा०)।
३. तदर्थंवा (पा०)।
४. पुरःसरार्थवि (पा०)।
५. प्रेक्षावताम् दृश्यते (पा०)।
६. प्राप्तिरभिहिता (पा०)।

जयमङ्गलाक्रोडपत्रम्

२—शास्त्रेणैकान्तिको नयः ।

३—शास्त्रे सत्यपि नावश्यमिति सर्वेष्वदः समम् ।

इति त्रिखण्डात्मकेन नवमेन वाक्येन भविष्यतीति शङ्काग्रन्थस्य सर्वस्यापि शङ्कात्रय एव तात्पर्यमित्यत्र न विवादः ।

तत्र म्लेच्छराजनीतिप्रचारवत्यधुनातनसमये नीतिशक्ति विनापि जीवनं भविष्यतीति शङ्काया अनुत्थितिरेव । अतो दशमैकादशवाक्याभ्यां यदुक्तं जयमङ्गलाकृता तद्विषये वक्तव्यस्य नास्त्यावश्यकतेति प्रथमः पूर्वपक्षोऽनुत्थानपराहतः । द्वादशवाक्यमवलम्ब्य च शिष्टान्येकविंशतिवाक्यान्यालोचनीयतामर्हन्ति ।

"अनधीतशास्त्राणामपि यत्कदाचिद्धिताहितप्राप्तिवर्जनं तदपि "यादृच्छिकीं नीतिमेवासाद्य भवती"तीत्यतइदं वाक्यं यादृच्छिकपदघटितं, "कदाचिद्वासनानुगमाच्च, अनन्तरेषु व्यवहितेषु च जन्मसु सर्वपदार्थस्वभावपरिच्छेदानुभूतलोकयात्राणां यदृच्छोत्पन्नवासनाप्रबोधानां हिताहितवस्तुन्यभिलाषेतरौ भवतः" इत्येकविंशतितमेन वाक्येन स्फुटीक्रियते ।

स्वभावमीश्वरं कालं यदृच्छां नियतिं तथा ।
परिणामं च मन्यन्ते प्रकृतिं पृथुदर्शिनः ।। सु० शा० १-११

इति सुश्रुतग्रन्थोपरि व्याख्याकर्त्रा डल्हणेन—

"यदृच्छा पुनर्लक्षितः आकस्मिकपदार्थाविर्भावः स्वभावस्तावत्सत्त्वरजस्तमसां तद्विकाराणां पृथिव्यादिमहाभूतानां च परिणामस्य तादृशो विशेषः" इति व्याख्यानात् यदृच्छास्वभावशब्दार्थौ स्फुटीभवतः । एवं चालक्षिताकस्मिकपदार्थाविर्भावोद्बुद्धवासनानामित्यर्थो "यदृच्छोत्पन्नवासनाप्रबोधाना"मित्यादिवाक्यांशस्य भवति । वक्ष्यमाणगोकुलनाथोपाध्यायोक्त्यनुसारेण संस्कारविशेषरूपायाः शक्तेः पुरस्करणेन जायमाना नीतिर्यदृच्छोत्पन्नवासनाप्रबोधप्रयुक्ता षष्ठे वाक्ये यादृच्छिकीपदेनोच्यते । तथा-विधाप्युद्बुद्धा वासना पूर्वस्मिन् कस्मिन्नपि जन्मनि शास्त्राधीनसर्वपदार्थस्वभावपरिच्छेदानुभूतलोकयात्राणामेव भवतीति परम्परया शास्त्राधीनत्वमेव तस्या व्यवस्थाप्यते । युक्तश्चायमर्थः प्रतिभाति । विंशे वाक्ये हि अन्वयव्यतिरेकैकशरणौ लब्धस्य ज्ञानस्य वाध्यमानत्वमुपपाद्याधीतशास्त्राणामेव यच्च यावच्च प्राकाश्यं लभते इत्युपपादितम् । तदेतत् व्याकरणशास्त्राध्ययनेनैव सम्पूर्णसंस्कृतभाषाज्ञानं संस्कृतत्वादिजात्यभिव्यक्तिश्च भवतीति दृष्टान्तेनास्माभिरप्यनुभूयते । किञ्च नव्यप्रणाल्या तत्तज्जन्मनि जायमानवासनोद्वोधस्य एतज्जन्मीयान्वयव्यतिरेकप्रयोगमूलकत्वेऽप्युपगम्यमाने कीरदष्टं फलं मधुरमेव भवतीति सर्वसम्मतः सिद्धान्तो भज्येत । इदमेव तत्त्वं "शास्त्रेणैकान्तिको नयः इति पद्यांशेनाविष्कृतं ग्रन्थकृता । शास्त्रानभ्युपगमेतु अलक्षितनिमित्तवासनोद्बोधो वा शरणीकरणीयः, अन्वयव्यतिरे-

जयमङ्गला

मपि म्लेच्छादीनां जलारण्यान्तरिक्षवर्तिमीनमृगपक्षिवन्धनार्थसाधनविनियोगलक्षणा- नीतिः[1], तथा अशास्त्रविदां तुल्येऽपि शास्त्रे केषाञ्चिदर्थेन योगोऽन्येषामनर्थेनेति । अत्रोच्यते—

"नीतेर्विना फलं नास्ति शास्त्रेणैकान्तिको नयः ।
शास्त्रे सत्यपि नावश्यमिति सर्वेष्वदः समम् ॥" इति ।

पशवो हि मनुष्यप्रयुक्तैः पाशकूटादिभिरुपहन्यमानाः पाशादिविमोचना- कुशलाः विनाशम्, बालाश्च परिहारानभिज्ञाः सर्पाद्युपद्रावादिकमासादयन्तो नीतेर्विना दृश्यन्ते । अतो नीतेर्विना फलं नास्ति । अनधीतशास्त्राणामपि यत् कदाचित् हिता- हितप्राप्तिवर्जनं तदपि यादृच्छिकीन्नीतिमेवासाद्य भवति । सा चैवंविधा नीतिर्घुणा- क्षरकल्पत्वादनाश्वासा । अपनयबाहुल्याच्चैते शास्त्रविद्भिरुद्वासीक्रियन्ते[2] । शास्त्रेण तु सम्यक्करणीयवर्जनीयविधानादैकान्तिकत्वं नीतेः क्रियते । उपदेशादिष्वसा [3]वपरिच्छेदोऽप्येषां यदा भवति तदा प्रामाण्यमन्येभ्य एव । तथा हि—

"उपदेशादनायोगाद् वासनानुगमादपि ।
परयत्नाददृष्टाद् वा सर्वाः सर्वत्र वृत्तयः ॥"

जयमङ्गलाक्रोडपत्रम्

काव्यस्तर्क एव वा पूर्वोक्तवाधासहकृतः शरणीकरणीयः । उभयथाप्यनधीत- व्याकरणशास्त्राणां यच्च यावच्च संस्कृतं न प्राकाश्यं लभते, न्यूनाधिकसंख्याव्यवच्छेद- पुरस्सरं साधुत्वाभिव्यक्तिश्च न भवतीति वयमनुभवामः । तथैव सम्पूर्णाया राजनीते र्यच्च यावच्च प्राकाश्यं सर्ववाङ्मयं विना न सम्भवतीति किमु वक्तव्यम्? अतो नीति- लक्षणे आगमप्रमाणमावश्यकमिति सिद्धान्तितम् जयमङ्गलाकृता ।

"न तत् पदं न तद् वाक्यं न सा विद्या न सा कला ।"
जायते यन्न काव्याङ्गमहो ! भारो महान् कवेः ॥

इति साहित्यमीमांसायाम् —

"विद्याः समस्ता यस्याङ्गमहो ! भारो महान् कवेः", इत्यग्निपुराणे च स्मरणात् प्रोक्तस्य शक्तिपदार्थस्य लाभाय दर्शनश्रवणादिभिः सर्वपदार्थस्वभाव- परिच्छेदानुभूतलोकयात्रत्वमनन्तरेषु व्यवहितेषु वा जन्मसु यस्य तस्यैव तादृश- वासनोद्बोध इति, एकविंशतितमेवाक्यार्थः पर्यवसितो भवति, तस्मादर्थशास्त्रा-

अशुद्धम्

१. नीतिः । (पा०) ।
२. विद्भिरुदासी (पा०) ।
३. पि स्वभाव (पा०) ।

जयमङ्गला

इत्येषां हिताहितप्राप्तिपरिहारौ। क्वचिन्मात्रादिचरितोपदेशापेक्षया—नहीदं कुर्विदं मा कार्षीरिति वाचैव श्रोतॄणां शब्दार्थप्रतिपत्तॄणामुपदेशः, किन्तर्हि अनुकर्त्तॄणां नाट्योपदेशवदुपदेशः। कदाचिदनायोगात्—यस्यां प्रवृत्तौ बाध्यन्ते न च फलं प्राप्नुवन्ति ततो निवृत्याऽन्यत्र निराबाधं फलं च किञ्चिल्लभमानाः पौनःपुन्येन इदमतो

जयमङ्गलाक्रोडपत्रम्

ध्ययनाधीनः ऐकान्तिको निश्चयो भक्तिश्रद्धापुरस्सरं सम्पादनीय इति द्वात्रिंशवाक्यस्य तात्पर्यम्" इति।

ननु जयमङ्गलाकृन्मते नीतेः लक्षणं प्रत्यक्षानुमानागमप्रमाणदेशकालशक्तिपुरस्सरार्थसाधनविनियोगलक्षणा क्रिया नीतिः इत्युक्तम्। तत्र शक्तिस्वरूपं कीदृक्? इति चेत् उच्यते।

शक्तिस्वरूपम्

उक्तलक्षणे शक्तिपदनिवेशात्मकस्य विशेषस्यार्थदृष्टया महद् गौरवं वर्तते। यतोऽर्थशास्त्र एव नवमाधिकरणे प्रथमाध्याये प्रथमसूत्रे "शक्तिदेशकालबलाबले"त्येवं पठितम् अतो देशकालशक्तीनां विचारो नीतौ परमावश्यक इति व्यक्तम्। सोऽयमावश्यको विषयः उपाध्यायनिरपेक्षाकृता कृते प्रागुक्ते लक्षणे देशकालानुकूल्ये इति भागे अव्यक्ततया स्थितोऽपि जयमङ्गलाकारेण स्फुटं निर्दिष्टः स्वयंकृते प्रागुद्धृते लक्षणे।

शक्तौ सत्यां साधनविनियोगः स्वयमेव भवति, अतः स न प्राधान्येन नीतिशास्त्रस्य विषयः किन्तु शक्तिसाधनमेवेति जयमङ्गलाकृतोऽभिप्रायोऽत्र स्फुटः।

[१]"रुद्रहीनम्" इति वचनानुसारेण शक्तेः समुपार्जनं तस्या यथावद्विनियोगश्च नीतिशास्त्रस्य मुख्यं लक्ष्यमिति स्थिते "नरत्वं दुर्लभम्"❀ इत्यग्निपुराणवचनानुसारेण शक्तेः समुपार्जनविनियोगौ कस्यचिदेव पुण्यवतो महापुरुषस्य हस्तगतौ भवतो न सर्वेषाम्।

यद्यपि "शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः" इत्यमरकोशानुसारेणार्थशास्त्रीयनवमाधिकरणाद्याध्यायोक्तप्रकारेण च प्रभावमन्त्रोत्साहशक्तय एवात्र विवक्षितास्तथापि प्रभावादीनां स्वरूपनिर्धारणे किञ्चिद्वैलक्षण्यमवश्यमालोचनीयतामर्हति। नयचन्द्रिकाकारेण हि "उत्साहः शौर्यादिमत्वं, प्रभावः कोषादिमत्वं, मन्त्रश्च-विचारपूर्वककार्यनिश्चयश्चेति व्याख्यानं कृतम्। तथाप्यमरकोषे "प्रभावोत्-

---

१. रुद्रहीनं विष्णुहीनं न वदन्ति नराधमम्।
शक्तिहीनस्तु यो मर्त्यस्तं वदन्ति नराधमम्॥

❀ नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥

जयमङ्गलाक्रोडपत्रम्

साहमन्त्रजा" इति तज्जन्यत्वं निर्दिश्यते इत्यस्त्येव कश्चिदत्र विशेष आलोचनीयः। तथाहि—भावप्रकाशने-परस्मादात्मनो भान्ति[1]। इत्यनेन हि सर्वान्तर्यामिपरमात्मसमवेतप्रभात्रयमिश्रणस्य शक्तिरूपत्वमुच्यते। "स न्यस्तचिह्नां"इतिना कलिदासोऽपि तादृशं प्रभाविशेषं राजशरीरे सम्मनुते[2]। तदेव तेजः कोशदण्डादिमत्वमिति पदेन मतुप्प्रत्ययोत्तरत्वप्रत्ययवाच्येन नयचन्द्रिकाकारः प्रतिपादयति। अन्यथा "कोषदण्डादि" इत्येव ब्रूयात्। सा सत्ता सा महानात्मा तामाहुस्त्वतलादयः।

इति वदन्तो वैयाकरणा अपि तदेव तेजस्त्व-तलादि शब्दवाच्यमिति प्रतिपादयन्ति। मनसि सदा सुसमाधिनि[3] इत्यादिना साहित्यशास्त्रविद्भिर्वर्ण्यमानं शक्तितत्त्वमेतादृशं उक्ततेजोरूपप्रकाशविशेष एव। यम्—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।" (का० १ उ०)

इत्यादिना काव्यप्रकाशकारो व्याजहार।

अत्र "अवेक्षणादिति व्याचष्टे, विमर्शनादिति। विमर्शनमनुषङ्गः पौनःपुन्यम्। निपुणतापदार्थं व्याचष्टे व्युत्पत्तिरिति। तत्तदर्थगोचरो दृढतरः संस्कारः तत्तद्वाक्यार्थप्रतिसन्धानं वेत्यर्थः। स्रग्धरावृत्तत्वावच्छेदेनादौ गुरुचतुष्कत्वमिति संस्कारदार्ढ्यं व्युत्पत्तिः "सानन्दं नन्दिहस्ते"त्यादौ तत्तदानुपूर्वीकपदगोचरः संस्कारः शक्तिरिति विवेकः।-एवं शास्त्रान्तरविषयेष्वपि प्रणिधेयः सामान्यविशेषभावेन व्युत्पत्तिशक्तिविषययोर्भेद" इति गोकुलनाथोपाध्यायकृतकाव्यप्रकाशविवरणमवधेयतामर्हति।

"आदौ शास्त्रान्धकार" इति वसिष्ठस्मृतिटीकामङ्गलपद्ये[4] अन्धकारमयाच्छास्त्रावरणात्तृतीयां व्युत्पत्तिकक्षामतीत्य लब्धो वाटिकाविशेषरूपः संस्कारविशेष एव शक्तितत्त्वमिति वर्ण्यते। तदेतद् गोकुलनाथोपाध्यायोक्तरीत्या सामान्यविशेषगोचरोद्बुद्धसंस्कारयोर्व्युत्पत्तिशक्तिरूपत्वे घटते। विशेषतः शक्तिरूपस्योद्बुद्ध-

---

१. परस्मादात्मनो भन्ति ज्ञानानन्दक्रियाप्रभाः।
ज्ञानप्रभा च सानन्दा तस्याः सत्त्वं प्रजायते॥
क्रियाप्रभा रजः सत्त्वाच्छक्तिः स्यात्तु तमःप्रसूः।

२. स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः॥ रघु० २-७

३. मनसि सदा सुसमाधिनि विस्फुरणमनेकधाऽभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः॥

४. आदौ शास्त्रान्धकारे पतित इव ततोऽभ्यासमार्गे चरिष्णुः।
पश्चाद्व्युत्पत्तिदेहल्युपग इव ततः शक्तिवाटीप्रविष्टः॥
नानाशब्दाख्यपुष्पावचयकरणतो वाग्वशीभूतविश्वो।
यत्प्रेमापाङ्गदृष्ट्या भवति कविवरो भारती सा पुनातु॥

जयमङ्गला

दुःखम् अन्यथा अदुःखं भवतीति तमोबाहुल्येऽपि यच्च यावच्च प्राकाश्यं लभन्ते। कदाचिद् वासनानुगमाच्च—अनन्तरेषु व्यवहितेषु च जन्मसु दर्शनश्रवणादिभिः सर्वपदार्थस्वभावपरिच्छेदानुभूतलोकयात्राणां यदृच्छोत्पन्नवासनाप्रबोधानां हिताहित-वस्तुन्यभिलाषेतरौ भवतः। ततश्चाभिप्रेतलाभः परिहारश्च। कदाचिद् परप्रयत्नात्-उपकरणसम्पदायत्तमात्मोपकारं मन्यमानो गोवत्सादिवदनं मातुरूधःप्रवेशं योजयन् स्वार्थं साधयति। साऽन्येषां च परनीत्यपेक्षया प्रवृत्तिः साफल्यं लभते। कदाचिददृष्टात्-

जयमङ्गलाक्रोडपत्रम्

संस्कारस्य प्रकाशमयत्वं वाटिकारूपकेण स्फुटीभवति। संस्काराणां प्रत्यक्षज्ञानजन-कत्वस्य तद्ग्रन्थादेवावगमात्।

पूर्वोक्तपद्ये शास्त्रान्धकार इत्युपक्रमादुत्तरोत्तरं सूक्ष्मतर-सूक्ष्मस्फुट-प्रकाश-लाभस्तास्ववस्थासु लभ्यते। सामान्यविशेषप्रकाशयोर्भेदस्तु न्यायमञ्जरीकारेण माघपद्यमुदाहृत्य वर्णितश्चयस्त्विषामित्यादिना[1]।

रामायणाद्युपवर्णितैः रामरावणादिपदैः यद्रामत्वं रावणत्वादिकं वा प्रकाशते, तद्धि उदात्तनायकत्वादिरूपं सामान्यप्रकाशरूपमेव भवत्याधुनिकतमानामपि। "यदादित्यगत"मिति गीतापद्ये[2] भास्वररूपविशिष्टो यस्तेजोविशेषः उपास्यतया प्रतिपाद्यते सः "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः"।

इत्यादिगीतावाक्येनेश्वररूपतया वर्ण्यते। सोऽयं वह्निः घटपटादिपदवाच्यजाति-रूपः सन् "समानोऽग्निः" इति भावप्रकाशनोक्तरीत्या[3] विद्युत्समूहमयत्वात्तज्जातीय-व्यक्तीनामनन्तानां सृष्टिजनकः, एकः सूर्य इवासंख्येषु दर्पणादिषूपाधिषु अनन्तानां सूर्यप्रतिबिम्बानां जनक इवः चरकसंहितोक्त[4] वैद्यकसिद्धान्तसिद्धः अस्ति।

---

१. चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः। इति।

२. यदादित्यगतं तेजो जगद् भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्। भ० गी० १४-१२

३. समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति। भा० प्र० ७ अ० १९४ पृ०

४. सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्।
ह्रासहेतुर्विशेषश्च प्रवृत्तिरुभयस्य तु।
सामान्यमेकत्वकरं विशेषस्तु पृथक्त्वकृत्। चरके सूत्रस्थाने ४२–४३

जयमङ्गला

पूर्वदेहोत्पन्नौ धर्माधर्मौ प्रत्युत्पन्नपरिपाकौ देहकारणानां सन्निवेशविशेषरचनायाः कारणीभवतः। एवमिष्टानिष्टफलप्राप्तिपरिहारनिमित्ताय प्रवृत्तिविशेषाय[1] अनन्ताय पुरुषतर्कागोचराय तावेव प्रभवतः इति न किञ्चिदअनिमित्तं फलमस्ति। येषामपि शास्त्रविदाङ्केषाञ्चिदपनयात् अनर्थेन योगः स तेषामेवापराधो न शास्त्रस्य। नोलूकः पश्यतीत्यादित्येन नोदेतव्यम्। प्रतिपत्रपराधाच्च शास्त्रानर्थक्यं सर्वशात्रेषु

जयमङ्गलाक्रोडपत्रम्

स च "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैको ऽनुगच्छन्। उपाधिना क्रियते भेदरूपः" इत्यादिश्रुत्या ज्ञायते। प्राज्ञतैजसविश्वात्मकेषु जीवस्वरूपेषु स्वप्नदशायां पित्ताख्यतेजःप्रचुरत्वादात्मप्रकाशमयत्वाद्वा तैजस इति वेदान्तशात्रे व्यपदिश्यते च। विद्युत्कणैरेव सर्वजगत्सृष्टिर्जातेति वदद्भिराधुनिकैर्वैज्ञानिकैरपि निर्विवादं प्रत्यक्षीक्रियत एव।

"एकोऽहं बहु स्यां प्रजायेये"ति श्रुत्या वर्ण्यमाना जगन्मूलप्रकृतिगतेयं शक्तिः स्वतन्त्रचेतननिष्ठेति पौराणिकानां सिद्धान्तः, जडप्रकृतिनिष्ठेति निरीश्वरवादिनां नवीनवैज्ञानिकाम्। "स्वातन्त्र्यमेव चेतनत्वं, पारतन्त्र्यमेव जडत्व"मिति नवीनवैज्ञानिकाविरुद्धप्रत्यभिज्ञादर्शनोक्तजडचेतनलक्षणानुसारेणापि तस्याश्चेतननिष्ठत्वमिति पौराणिकसिद्धान्त एव हृदयावर्जको भवति। अयमेवेच्छाज्ञानक्रियाशक्त्यात्मकः समूहः आनन्दरूपतामपि गच्छति। तथा च यस्यैव पुरुषस्य ज्ञानाधिक्यं क्रियाशक्त्याधिक्यं तदुभयवशेन सफलेच्छता च स एव शक्तिमानुत्तमश्चेति गीयते। इदं शक्त्याधिक्यं जगन्मूलायां प्रकृतावीश्वरे च निरवधिकं मन्तुमुचितम्। तदीयानां नियमानामनुसरणेनैव मनुष्यजातेरप्यभ्युन्नतिर्भवितुमर्हतीत्यत्र नास्त्येव पौराणिकनवीनमतयोः कोऽपि भेदः। इयानेव परं विशेष एनयोर्मतयोः-"यदेव किञ्चानूचानोऽभ्यूहत्यार्षं तद्भवती"ति निरुक्तस्मृत्यनुसारेण पूर्वशास्त्रानुसरणमुन्नतेर्बीजमिति पौराणिका वदन्ति। पूर्वयुगमज्ञानबहुलमुत्तरोत्तरं प्रज्ञाविवृधिषु, भविष्यति कस्मिंश्चिदागामिनि काले प्रयोगोपलब्धज्ञानानां उपलब्ध्या सर्वज्ञतेति नवीनमतम्। एतादृशनवीनमतानुसारेणैव बौद्धादिभिः पृथक्प्रस्थानोपदेशाः प्रणीताः। भारतीयराजनीतिविदां तु प्रथमः पक्ष एव रोचते। तत्र कारणं तु व्याकरणशास्त्रेणैवं प्रतिपादितम्। "रक्षोहागमलघ्वसन्देहाः प्रयोजन"मिति त्रिमुनिव्याकरणेनैव तत्संस्कृताः शब्दाः

अशुद्धम्

१. निमित्त यः प्रवृत्तिविशेष (पा०)

जयमङ्गलाक्रोडपत्रम्

साधवोऽन्ये त्वसाधव इत्यसन्दिग्धं लघुनोपायेन संस्कृतभाषास्वरूपं लभ्यते। "प्रयोगानुसारिण्या भाषया भाव्यं न तु व्याकरणनियमस्तत्रोपयुक्त" इति नव्यमतानुसारेण भाषास्थैर्यं कथमप्यसम्भवि, उत्तरोत्तरभाषाकाले पूर्वपूर्वभाषाज्ञानस्य लुप्यमानत्वात्पूर्वसन्दृब्धानामर्थानामैतिहासिकानामस्तमयायैव कारणं स्यान्न तु सर्वज्ञतासम्पत्तये उद्देश्यभूतायै, इति भयेन भारतीयराजनीतिज्ञाः—

"शास्त्रदृष्टिर्गुरोर्वाक्यं तृतीयस्स्वात्मनिश्चयः"।

इत्युक्तप्रकारेण प्रत्यक्षानुमानागमशक्तिदेशकालपुरस्सरार्थसाधनविनियोगलक्षणां क्रियामुन्नतेर्बीजमाहुः। तदेवं नीतिरूपं धर्मस्य सुन्दरतमं स्वरूपम्। एतादृशशक्तिसम्पत्तिः सरस्वत्युपासकानामेव सम्भवतीति पूर्वं निर्णीतमेव। अन्येषां तु प्रयोगानुसारिणी शक्तिरुद्देश्यविपरीतत्वाद्विसंवादिनी न विस्रम्भणीयतामर्हतीति भारतीयनीतिविदां सिद्धान्तः। युक्तश्चायम्। यत् वैयक्तिकं कार्यमधिकृत्य प्रयोगे क्रियामाणे तस्यासफलत्वे तद्व्यक्तेरेव विनाशः स्यात्। अथवा कथञ्चित् नीतेः वैयक्तिककार्यप्रयोगद्वारा सिद्धान्तांन्वेषणे क्रियामाणे असफलप्रयोगैः पूर्वभाविभिर्नाशो व्यक्तिमात्रस्य स्यादिति। नीतेरितरत्र विषये तथा प्रयोगमार्गानुसरणे कदाचिदनुज्ञार्हत्वेऽपि सर्वजनमधिकृत्य प्रस्तुते राजनीतिप्रयोगेपि तथामार्गानुसरणे सिद्धान्तान्वेषणात् प्रागेव सर्वराष्ट्रनाशः प्रसज्येतेत्यनर्थायैव स्यात्। तस्मात्—

"मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम्। किरात० २-३३

इति पन्था एव भद्र इति भारतीयराजनीतिर्मन्यते। अयं च सिद्धान्तः पूर्वोत्तरपक्षमुखेन पूर्वोद्धृतैर्वाक्यैर्जयमङ्गलाकृता स्थिरीकृतः।

एतेन लेखेन आनन्दप्रभामिश्रिता ज्ञानप्रभैव शक्तितत्त्वं भवति इति पर्यवसितम्। यथा नीतिः धर्मस्य सुन्दरतमं स्वरूपम् तथेयं ज्ञानप्रभापि शक्तेः बोध्या। अत्र इदमप्यनुसन्धेयम्—यत् विना योगसम्बन्धं ईशसमवेतज्ञानप्रभा पूर्णतया अस्मासु भानविषया न भवतीत्यतः अपेक्षितः योगसम्बन्धः। स च अग्रे समाधिविचारे स्फुटीभविष्यति।

आनन्दप्रभामिश्रणं च ज्ञानप्रभायां नीतिमार्गानुसरणे कथं भवति इत्ययमंशोऽपि मूलटीकायां स्फुटीकृतः। विस्तरभयान्नोच्यते।

---

१. "जयमङ्गलाग्रन्थोऽयं अनधीतशास्त्राणां म्लेच्छानां नीतिमुपक्रम्य, अपनयबाहुल्याच्चैते शास्त्रविद्भिरुद्वासीक्रियन्ते इति पञ्चदशेन वाक्येन वर्णाश्रमहीनानां भारतीयजनपदात् तात्कालिकोद्वासनदर्शनाद्बौद्धानां भारतवर्षतो निष्कासनकालिक इति निर्णीयते।

यद्यपि मुद्रितपुस्तके इदं वाक्यं "अपनयबाहुल्याच्चैते शास्त्रविद्भिरुदासीक्रियन्ते" इति दृश्यते, तथापि—

जयमङ्गला

तुल्यं स्वर्गारोग्यापवर्गार्थिषु शास्त्रेषु। न सर्वे तद्विदो धर्माधर्मसेवापरिहारयोः पथ्यापथ्याहारसेवासेवयोः रागादिहानौ तत्वज्ञाने चाभिनिविशमाना दृश्यन्ते। ये तदर्थिनो भक्तिश्रद्धान्वितास्तेऽपि शास्त्राणां प्रयोजनहेतव इत्यन्यशास्त्रवद् इदमप्यादरणीयमिति।

जयमङ्गलाक्रोडपत्रम्

इदं नीतिशास्त्रम्।

"इम उद्वासीकारिण इमे दुर्भूतमक्रन्नित्यन्यतरः (तै० ब्रा० १-३-६) इत्यादि तैत्तिरीयब्राह्मणसंवादात्, "उद्वासं निवासशून्यम्"। इति तत्रत्यसायणभाष्यसंवादाच्चोद्वासीक्रियन्ते इत्येव पाठः सङ्गतः, लेखकप्रमादादुदासीक्रियन्ते इति पाठो मुद्रितः। जयमंगलाकारेण स्वकीयग्रन्थेषु दण्डिकृतकाव्यादर्शस्योद्धरणात् स दण्ड्युत्तरकालिक इति तात्कालिकीं परिस्थितिं वक्ष्यमाणरीत्या आवेदयन् "उद्वासीक्रियन्ते" इत्याकारकं एव पाठमस्मदुक्तरूपं प्रयुक्तवान् इति भाति। किम्बहुना—

"वानप्रस्थादन्यः प्रव्रजितभावः, सजातादन्यः सङ्घः, सामुत्थायिकादन्यः समयानुबन्धो वा नास्य जनपदमुपनिविशेत"। (कौ० २ अधि० १ अ० ४ सू०)

"ज्ञातिसामन्तधनिकाः क्रमेण भूमिपरिग्रहान् क्रेतुमभ्याभवेयुः।"

कौ० ३ अ० ९ अ० १ सू०

इत्यादिना जातिव्यवस्थावर्जितानां वास्तुभूमिलाभाभावव्यवस्थापनं कौटिल्योपज्ञमेव प्रवर्तते। नीतौ विधानरूपेणागतस्य तस्य विषयस्य वर्तमानरूपेण निर्देशो जयमङ्गलाकृता क्रियमाणस्तस्य पञ्चमषष्ठशताब्दीवर्षासन्नकालभवत्वं सूचयति। तेन प्रोक्ते पञ्चदशे वाक्ये अपनयबाहुल्यादनधीतशास्त्राणां यदुद्वासनं प्रतिपाद्यते तद्बौद्धीयदशरथजातकोक्तां तत्कालभवां परिस्थितिं यद्यनुमापयति तर्हि न कस्याप्यत्र दोषोऽनुमातुर्वक्तुर्वा वक्तुं शक्यते।

"नचान्य आगमो लोकयात्रामुद्वहन् महाजनपरिगृहीत ईश्वरप्रणीततया स्मर्यमाणो दृश्यते (न्या० सू० २-१-६८) इति न्यायवार्तिकतात्पर्यटीकाकर्तुर्वैदिकागमविषयक उल्लेखः, "कैश्चिदेव म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्रहाद्बोद्धव्यम्।" इति (सा० कौं० ५ का०) तदीय सांख्यतत्त्वकौमुद्युल्लेखश्चैतन्मूलभूतः श्लोकवार्तिकगतः—

"न चापि स्मृत्यविच्छेदात्सर्वज्ञः परिकल्प्यते।
विगानाच्छिन्नमूलत्वात्कैश्चिदेव परिग्रहात्॥"

इत्याद्युल्लेखश्च जयमंगलाकृदुक्तमुद्वासनकारणमपनयबाहुल्यमिति विशदयति।

क्रिस्तपूर्वषष्ठशताब्दे प्रवृत्ते सहस्रसंवत्सरव्यापिनि बौद्धकाले आयुर्वेदादिविषयान् विहाय लुप्तप्रायाणां भारतीयानां कतिपयानां विद्यानां पुनरुज्जीवनं पाणिनिप्रभृतिभिः सर्वतन्त्रस्वतन्त्रैराचार्यैः कृतम्। एवंविधेऽपि बौद्धसमये ऽलुप्तप्रचारमिदं नीतिशास्त्रं जयमङ्गलाकारादिभिर्बौद्धैरेव परिगृहीतं यद्वर्णयति तदविरोध्येवार्थः उत्तरत्र कुमारिलभट्टपाद-शङ्कर-

तस्यायं प्रकरणाधिकरणसमुद्देशः—

श्रीमूला

तदिदमर्थशास्त्रं साशीतिशतसङ्ख्यैः प्रकरणैः तत्परिच्छिन्नैश्च पञ्चदश-सङ्ख्यैरधिकरणैर्विभज्य प्रस्थापितम्। तेषु यथास्थानं वितत्य विशेषतो व्युत्पाद-यिष्यमाणेषु प्रथमं विषयतः समाख्यातः क्रमत इयत्तया च किमपि सामान्यज्ञानं विशेषजिज्ञासानिमित्तं शिष्याणां जनयितुं तत्समुद्देशं प्रतिजानीते—तस्यायमिति। तस्य अर्थशास्त्रस्य, अयम् आरब्धाध्यायगोचरः प्रदर्श्यमानप्रकारः। प्रकरणाधिकरण-समुद्देशः, प्रकरणानामधिकरणानां च सर्वेषां समुद्देशः संक्षेपेण निर्देशः संक्षिप्त-स्वरूपक्रमेयत्ताख्यानमित्यर्थः। क्रियत इति शेषः। प्रक्रियन्ते प्रकर्षेण व्युत्पाद्यन्ते एष्वर्था इति प्रकरणानि। अधिक्रियन्ते विषयीक्रियन्ते एषु प्रकरणानीत्यधिकरणानि।

वैदिकसिद्धान्तसंरक्षिणी

तस्य निर्देशग्रन्थस्य। अयं बुद्धिस्थः उद्देशग्रन्थ। तस्य नामामिधातुमाह प्रकरणेति। तत्वं च तत्तत्फललाभाय तत्तत्साधनसामग्रीविषयिणी या जिज्ञासा तद्विष-यतापर्याप्त्यधिकरणत्वं यावत्स्वर्थेषु तावतामर्थानामभिधायकवाक्यकूटत्वम्। तत्स-मुदायोऽधिकरणम्। इत्येतत् सर्वं जयमङ्गलाव्याख्यायां स्फुटं भविष्यति। तयोः समुद्देशः संक्षेपेण कीर्तनम्, "समुद्देशः समासेन कथन" मिति तन्त्रयुक्तौ व्याख्यानाद्बोध्यम्।

अत्र पुनः समस्तस्य संक्षेपेण सूत्रमुखेन निर्वचनं पौनरुक्त्याय भवतीति न मन्तव्यम्। यतो यं विषयं अध्येतुमिच्छति जिज्ञासुः स विषयः कुत्र वर्णितो वर्तते इति अनेनोद्देशग्रन्थेन ज्ञात्वा तावान् विषयः सारल्येन तेन ज्ञातव्यः स्यात् इति प्रयोजनसत्त्वान्न पौनरुक्त्यम्। शेषं तदीयटीकाव्याख्यायां वक्ष्यते। उद्देशं कीर्तयति मूले विद्यासमुद्देश इत्यारभ्य तन्त्रयुक्तय इत्यन्तेन। शेषं निगदव्याख्यातम्।

जयमङ्गला

शास्त्रप्रणयनं च द्विधा समुद्देशतो निर्देशतश्च। तत्र स्वरूपसङ्ख्याभ्यां पूर्वमधिकृत्याह—तस्येति। संक्षिप्तस्य शास्त्रस्य। अयमिति। प्रकरणानामधिकरणानां च समुद्देशः, समासवचनम्। वक्ष्यति—"समासवाक्यं समुद्देशः", "व्यासवाक्यं निर्देशः" (अधि० १५. अध्या० १) इति। अस्य च प्रयोजनम् अध्येतॄणां विदित-

जयमङ्गलाक्रोडपम्

समुद्देशतः संक्षेपतइति यावत्।

निर्देशतः विस्तरतः इत्यर्थः, तन्त्रयुक्तौ तथैव व्याख्यानात्। उद्देशग्रन्थे

भगवत्पाददादिभिः प्रतिपादित इत्येषां सर्वेषां प्राचीनग्रन्थसत्यत्वे तत्प्रतिपाद्यविषयपरिच्छेदे च स्वतःप्रामाण्याभ्युपगमे न कस्यापि विमतिरुचिता।

जयमङ्गला

शास्त्रार्थं प्रकरणानुपूर्वीकाणाम् प्रज्ञातप्रकरणार्थत्वात् असम्मोहेन[1] अध्ययने प्रवृत्तिः यथाभिलषितप्रकरणार्थप्रत्यवमर्शश्च[2] भविष्यतीति। एवं च कृत्वोक्तं व्यासेन—

"इष्टं हि विदुषां लोके समासव्यासती भाषणम्।"

(आदिपर्व १।४९ अधि० १, अध्या० १)

जयमङ्गलाक्रोडपत्रम्

प्रकरणानां प्रकरणसमूहात्मकानामधिकरणानां स्वरूपं संख्या च निर्दिष्टा अस्ति इत्यभिप्रेत्याह-तत्रेति।

समुद्देशनिरूपणफलमाह। 'अस्य चेति'।

आनुपूर्वीकाणामिति। एतेन पूर्वापरप्रकरणयोः सङ्गतिः सुस्पष्टा भवति। तस्य फलमध्येतॄणां प्रज्ञातप्रकरणार्थत्वात् असम्मोहो बोध्यः। ननु च प्रकरणानां सङ्गतिप्रदर्शनं यथा क्रियते तथा अधिकरणानां सङ्गतिः कुतो न प्रदर्शिता? इति चेदुच्यते।

अधिकरणं हि न प्रकरणादन्यत् अपि तु प्रकरणसमूहः। तच्च सिद्धान्तशिरोमणिटीकायां मरीच्याम् त्रिप्रश्नाधिकारे द्रष्टव्यम्[1]।

वक्ष्यति च टीकाकारः पञ्चमाध्याये "सप्रकरणान्येवे"त्यादिना ग्रन्थेन। न च प्रकरणयोः परस्परसङ्गतिप्रदर्शनवत् पूर्वोत्तरसूत्रयोरपि सङ्गतिः कुतो न प्रदर्शिता इति वाच्यम्। टीकाकृतैव पञ्चमाध्याये प्रश्नस्यास्य समाधास्यमानत्वात्। प्रकरणत्वं च एकार्थत्वम् इति अधोनिर्दिष्टटिप्पण्या सिद्धम्॥। प्रज्ञातेति।

---

१. इत्यादि धाक्यं लेखकप्रमादात् अशुद्धं भाति। अतः कामसूत्रीय जयमंगलानुसारेण संयोजनीयम्।

अशुद्धम्

नुपूर्वींकाणामसम्मोहेन (पा०)।

२. प्रकरणसार्थं (पा०)।

१. च प्रज्ञासमाना भविष्यति (पा०)।

१. तं बुद्धिस्थं–अधिकारं अधिक्रियन्ते गणितादीनि यत्रासावधिकारस्तं प्रकृतार्थजिज्ञासाऽगमप्रयोजकतापर्याप्त्यधिकरणीभूतं ग्रन्थैकदेशमिति यावत्। प्रकृतत्वं च उद्देश्यविषयतापर्याप्त्यधिकरणत्वम्। तत्वं चाधिकारप्रतिपादितसकलोर्थं इति न कापि क्षतिः इति।

॥ पूर्वप्रकरणापेक्षं हि तदुत्तरसूत्रम्। उत्तरसूत्रप्रकरणानुरूपं च तदादिमसूत्रम्। तयोः स्वप्रकरणे गुणीभूतयोः नापेक्षा। यथा वाक्यावयवानां पदानां वाक्यान्तरावयवैर्नापेक्षा। कथमधिकरणानां प्रकरणानां सम्बन्ध इति चेत् प्रकरणान्येवैकार्थानि अधिकरणं, अधिकरणत्वमेवैषां न समुदायान्तरमित्यदोषः"। (प्रक्रियन्त इति प्रकरणानि अर्थाः) ज०

जयमङ्गला

इति। विद्यासमुद्देशादयश्च यथाप्रस्तुतार्थनिमित्तनामानः। निर्वचनं च यथा निर्देशं वक्ष्यामः। प्रक्रियन्त इति। प्रकरणानि अर्थाः। ग्रन्थभागास्तु तत्साहचर्यात् तन्नामानः प्रकरणार्थाधारत्वात्। अधिकरणानि अधिक्रियन्त एष्विति तानि च यथायथं

जयमङ्गलाक्रोडपत्रम्

अयं हेतूपन्यासः असम्मोहं प्रति कारणत्वप्रदर्शनार्थः, तेन विदितशास्त्रार्थप्रकरणानुपूर्व्याणामित्यनेन न पौनरुक्त्यम्।

असम्मोहेनेति। मोहः किङ्कर्तव्यमूढता चितस्य शून्यतेति यावत्†।

यदि च प्रकरणार्थः सुसङ्गतत्वेन न ज्ञातः तर्हि मोहः सम्भवतीति भावः। इदं मोहापसारणं फलमुक्त्वा अपरं फलं प्रदर्शयन्नाह यथाऽभिलषितेति। यं विषयं अध्येतुमध्येता इच्छति सः विषयः कुत्र वर्तते इति अध्येत्रा उद्देशग्रन्थेन ज्ञातं चेत् तावानेव विषयस्तेन सारल्येन अध्येतुं शक्यते अन्यथा विषयस्थलस्यापरिचयात् सर्वस्य ग्रन्थस्य अध्येयत्वमापद्येत इति। उद्देश्यसिद्धौ च महान् श्रमः स्यात्। इत्यपि बोध्यम्।

इष्टमिति यद्यपि इष्टं हि विदुषां लोके इति इदं पद्यं कामसूत्रे उपलभ्यते तथापि जयमङ्गलाकर्ता व्यासोक्तत्वेन अनुमन्यते, तेन "तदुक्तं व्यासेने"ति अभिधानात्।

प्रकरणार्थाधारत्वात् प्रतिपादकतासम्बन्धेन इति शेषः।

यथायथमिति। निमित्तं शक्यतावच्छेदकं तद्भेदाश्च ये उपात्ताः तेषां समाख्याप्रतिपादकाः शब्दाः विनयाधिकारिकमित्यादयः येषां तानि अधिकरणानि इति यावत्।

---

† तदुक्तं भावप्रकाशने।

मोहश्चित्तस्य शून्यत्वं पूर्ववैरस्मृतेर्मदात्।
दैवोपघातान्मात्सर्यात् भयाच्चापि प्रहारतः॥
आवेगात् तत्प्रतीकारविहतेरेवमुद्भवेत्।
निश्चेष्टता प्रपतनं वैवर्ण्यं देहघूर्णता॥
सर्वेन्द्रियप्रमोहश्च निःश्वासो नष्टसंज्ञता।
मोहस्य कथिताः सद्भिरनुभावाः स्वरूपतः॥

भा० प्र० १ अधिकारः

तथा काव्यप्रकाशविवरणे—'मोहो विचित्तता' भीतिः दुःखावेगानुचिन्तनैः इति धनिकः। विचित्तता चित्तस्य चैतन्यस्यापाटवम्। यथा—'इतिकर्त्तव्यतोपायादर्शनं मोह उच्यते' इत्यग्निपुराणम्। परस्परविरोधिनानाकर्तव्योपनिपाते किंकर्तव्यमित्यनिर्धारणं मोह इति तदर्थः। इति। चतुर्थ उल्लासः। १५९ पृष्ठम्।

प्रकरणाधिकरणविभागः

[प्रथममधिकरणम्]

१. विद्यासमुद्देश । २. वृद्धसंयोगः । ३. इन्द्रियजयः । ४. अमात्योत्पत्तिः । ५. मन्त्रिपुरोहितोत्पत्तिः । ६. उपधाभिः शौचाशौचज्ञानममात्यानाम् । ७. गूढपुरुषोत्पत्तिः । ८. गूढपुरुषप्रणिधिः । ९. स्वविषये कृत्याकृत्यपक्षरक्षणम् । १० परविषये कृत्याकृत्यपक्षोपग्रहः । ११. मन्त्राधिकारः । १२. दूतप्रणिधिः । १३. राजपुत्ररक्षणम् । १४. अवरुद्धवृत्तम् । १५. अवरुद्धे च वृत्तिः । १६ राजप्रणिधिः । १७. निशान्तप्रणिधिः । १८. आत्मरक्षितकम् ॥ इति विनयाधिकारिकं प्रथममधिकरणम् ॥

जयमङ्गला

अध्यक्षाः प्रचरन्त्यनेनेति अध्यक्षप्रचारः धर्मस्थेभ्यो हितं तद्व्यापारोपदेशादिति धर्मस्थीयम्। कण्टकाः शोध्यन्तेऽनेनेति कण्टकशोधनम्। योगः प्रच्छन्नयोगः तस्य प्रवर्तनं योगवृत्तम्। मण्डलयोनिर्मण्डलज्ञानकारणम्। षडेव गुणाः षाडगुण्यम्। चातुर्वर्ण्यवत्। अभियास्यतः कर्म अभियास्यत्कर्म। सङ्ग्रामा अत्र भवन्तीति साङ्ग्रामिकम्। अबलीयसामिदम् आवलीयसम्। दुर्गलाभस्योपायो दुर्गलाभोपायः। लम्भ इत्यपप्रयोगः ' उपसर्गात् खल्घञोः'' (७-१-६७) इति नियमात्। उपनिषद् रहस्यं तदधिकृत्य कृतम् औपनिषदिकम्। तन्त्रयुक्तयः शास्त्रव्याख्यायुक्तयो बह्वयः, तासां प्रकरणभूतानामाधारत्वात् तन्त्रयुक्तिरधिकरणम् इति।

श्रीमूला

तत्र विनयाधिकारिकस्य प्रथमाधिकरणस्य प्रथमं प्रकरणं समुद्दिशति—विद्यासमुद्देश इति ! विद्यानाम् आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरित्येतासां चतसृणां समुद्देशः विद्यासमुद्देशः ! तदाख्यं प्रकरणमित्यार्थम्। विद्यासमुद्देश इत्येतच्च सूत्रमिति व्यवहर्तव्यं, विस्तारार्हबहुलार्थगर्भत्वात्। सूत्रमेव चेदं तत्प्रकरणे 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः' इत्युपक्रम्य 'स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु' इत्यन्तैस्त्रिभिरध्यायैर्महता प्रयत्नेन प्रपञ्च्यत इति सूत्रस्य तथाविधं व्याख्यानं भाष्यं भवितुमर्हति। एवं प्रकरणाधिकरणसमुद्देशः'इत्युक्तचरमुत्तराण्यपि वृद्धसंयोग' इत्यादीनि सूत्राणि भवन्ति, तत्तत्प्रकरणगतानि प्रपञ्चनवाक्यानि च भाष्याणि। एवमधिकरणेषु सर्वेषु। एवञ्च 'स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च' इति ग्रन्थान्तोक्तिरुपपन्ना भवतीति वेदितव्यम।

श्रीमूला

तत्र विनयविहीनो लोकशास्त्रव्यवहारेष्वशिक्षितो राजा राज्यरक्षणानर्हत्वाद् वैनयिकीषु विद्यास्ववश्यं विनेतव्य इत्यतो विद्यासमुद्देश इत्येतत् प्रकरणमादौ सूत्रितम् ॥ १ ॥

विद्याश्च वृद्धसंयोगाभावे लब्धुं न शक्या इति वृद्धसंयोग इति सूत्रम् ॥ २ ॥

वृद्धसंयोगश्च इन्द्रियजयमन्तरेण न लभ्य इति इन्द्रियजय इति सूत्रम् ॥ ३ ॥

वृद्धैर्विद्यासु शिक्षितो जितेन्द्रियोऽपि सहायाभावे कार्यं साधयितुं न क्षम इति तदनन्तरम् अमात्योत्पत्तिरिति सूत्रम् ॥ ४ ॥

अमात्याश्च केचिद् बुद्धिसाचिव्याय नित्यनैमित्तिककर्मसाचिव्याय चापेक्षिताः, शान्तिकपौष्टिककर्मानुष्ठानाय चान्ये । तदर्थं मन्त्रिपुरोहिताः कर्तव्या इति मन्त्रि-पुरोहितोत्पत्तिरिति सूत्रम् ॥ ५ ॥

तैश्च सर्वप्रकारविशुद्धैर्भाव्यमिति उपधाभिः शौचाशौचज्ञानममात्यानाम् इति सूत्रम् ॥ ६ ॥

उपधाशुद्धिर्गूढपुरुषानन्तरेण ज्ञातुमशक्येति ततो गूढपुरुषोत्पत्तिः इति सूत्रम ॥ ७ ॥

तेषां च स्वामिनियोगमन्तरेणाव्यापाराद् गूढपुरुषप्रणिधिः इति सूत्रम् । गूढ-पुरुषाणां प्रणिधिः प्रणिधानं तत्तत्कार्येषु स्वामिना नियोजनमिति तदर्थः ॥ ८ ॥

तैश्च नियुक्तैः स्वराज्यगतान् क्रुद्धलुब्धादीन् विज्ञाय तद्दोषप्रतिविधानं, परराष्ट्रगतान् विज्ञाय तेषां भेदनेन स्वपक्षे प्रवेशनं चावश्यकमिति स्वविषये कृत्याकृत्यपक्षरक्षणम् इति, परविषये कृत्याकृत्यपक्षोपग्रहः इति च सूत्रे । स्वदेशे कृत्याः शत्रुभेद्याः क्रुद्धादयः, अकृत्याः अभेद्याः सुहृदः, कृत्याकृत्यानां पक्षाणां सङ्घानां शत्रूपजापाद् रक्षणमिति प्रथमसूत्रस्यार्थः । परराष्ट्रे ये कृत्याकृत्याः पक्षाः तेषामुपजापादिना स्वपक्षे सङ्ग्रहणमिति द्वितीयसूत्रस्यार्थः ॥ ९, १० ॥

स्वराष्ट्ररक्षणं परराष्ट्रहरणमित्येतावद् राज्ञः कर्मसर्वस्वम् । तस्य मन्त्रा-यत्तत्वान्मन्त्राधिकारः इति सूत्रम् कर्मणामारम्भोपायादिसम्प्रधारणं मन्त्रः, तस्या-धिकारो मन्त्राधिकार इति ॥ ११ ॥

परराष्ट्रकरणीयानां स्वकर्मणां स्वयं कर्तुमशक्यतया दूतसापेक्षत्वाद् दूत-प्रणिधिः इति सूत्रम् ॥ १२ ॥

यथा राजपुत्रास्स्वपितरि न द्रोहमाचरेयुः, तथा ते प्रयत्नेन परोपजापादिभ्यो रक्षणीया इति राजपुत्ररक्षणम् इति सूत्रम् ॥ १३ ॥

पित्रा क्वचिदवरुध्य तथा रक्ष्यमाणः कुमारः पितरि कथं व्यवहरेत्, पिता च तस्मिन् कथमित्येतद् वक्तुं सूत्रे अवरुद्धवृत्तम् इति, अवरुद्धे च वृत्तिः इति च ॥ १४, १५ ॥

[द्वितीयमधिकरणम्]

१९. जनपदविनिवेशः[1] । २०. भूमिच्छिद्रविधानम्[2] । २१. दुर्गविधा-

श्रीमूला

इत्थमात्मानं रक्षतो राज्ञो नियतकालां व्यापारपरिपाटीं वक्तुं सूत्रं राजप्रणिधिः इति । राज्ञः प्रणिधिः प्रणिधानं व्यापारपरिचिन्तनमित्यर्थः ॥ १६ ॥

निशान्तप्रणिधिः इति सूत्रम् । निशान्तं राजभवनं, तस्य प्रणिधिः प्रणिधानं देशसन्निवेशादिचिन्तनम् ॥ १७ ॥

आत्मरक्षितकम् इति सूत्रम् । रक्षितमितिभावे क्तः, स्वार्थे च कः । राज्ञ आत्मरक्षणौपयिकं प्रकरणेऽस्मिन्नुपदिश्यत इत्यर्थः ॥ १८ ॥

इति विनयाधिकारिकमित्यादि । विनयः विद्यादिशिक्षणं तस्याधिकारः प्रस्तावो विनयाधिकारः, सोऽस्मिन्नस्तीति विनयाधिकारिकं नाम प्रथममधिकरणं समुद्दिष्टमित्यर्थः ॥

इत्थं प्रथमाधिकरणसूत्रिताष्टादशप्रकरणोपदिष्टवर्त्मना समासादितविनयसम्पत्को राजा तन्त्रावापयोरधिकारी भवति । तन्त्रं नाम स्वराज्यक्षेमसाधनानुकूलः पञ्चस्वाद्येष्वधिकरणेषु पञ्चनवत्या सूत्रैः प्रतिपाद्यमानोऽर्थः । आवापः शत्रुराष्ट्रहरणानुकूलः । षष्ठादिषु त्रयोदशान्तेषु अष्टस्वधिकरणेषु सूत्राणामेकाशीत्या प्रतिपाद्यमानोऽर्थः, अर्थं ह्येनं विज्ञाय प्रवर्तमानो विजिगीषुः परराष्ट्रं स्ववशे करोतीति । तत्र येऽर्थाः द्वितीयेऽधिकरणे अध्यक्षप्रचाराख्ये - अष्टात्रिंशता सूत्रैः प्रतिपाद्यन्ते, ये तृतीये धर्मस्थीये एकोनविंशत्या सूत्रैः, ये चतुर्थे दुर्गराष्ट्रसम्बन्धिकण्टकशोधनाख्ये त्रयोदशभिः सूत्रैः, ये च पञ्चमे राजराज्यकण्टकशोधनपरे योगवृत्तनाम्नि सप्तभिः सूत्रैः, तेष्वेव सर्वेष्वधीनं राज्यकुटुम्बभरणकर्मेति तमेतं चतुरधिकरण्यर्थं तन्त्रमाहुः, तन्निधातो कुटुम्बधारणार्थत्वात् । द्विसूत्रं प्रकरणद्वयात्मकं मण्डलयोनिसंज्ञमधिकरणं षष्ठम् , एकोनत्रिंशत्सूत्रयुक्तं षाड्गुण्यं सप्तमम् , अष्टसूत्रीरूपं व्यसनाधिकारिकमष्टमं, द्वादशसूत्रमभियास्यत्कर्माख्यं नवमं, त्रयोदशसूत्रं साङ्ग्रामिकं दशमं, द्विसूत्रं सङ्घवृत्तमेकादशम् , नवसूत्रमाबलीयसं द्वादशम्, षट्सूत्रं दुर्गलम्भोपायाख्यं त्रयोदशमित्येकाशीतिसूत्रामष्टाधिकरणीं शत्रुराज्यहरणोपायोपदेशिनीमावापं व्यवहरन्ति ।

त्रिसूत्रमौपनिषदं नाम चतुर्दशमधिकरणं तन्त्रावापयोरत्यन्तमनुगुणम् । एकसूत्रात्मकं तन्त्रयुक्तिसंज्ञं पञ्चदशमधिकरणं कौटिल्यशास्त्राद्वृतास्तन्त्रयुक्ती द्वात्रिंशतं व्युत्पादयतीति स्थितिः ।

तत्र स्वराज्यं रक्षतो राजधान्याद्यपेक्षणादध्यक्षप्रचाराधिकरणे जनपदविनिवेश इति प्रथमं प्रकरणं सूत्रितम् ॥ १ ॥

स्वराज्यगतानां कृषिनिवासानर्हाणां गिरिवनश्वभ्रप्रायाणां भूभागानामुपयोगप्रकारोपदेशार्थं सूत्रं भूमिच्छिद्रविधानम् इति । भूमिच्छिद्राणां कृष्याद्यनर्हभूभागानां विधानम् उपयोगप्रकार इत्यर्थः । "भूमिच्छिद्रं कृष्ययोग्ये"ति यादवः ॥ २ ॥

नम्[3] । २२. दुर्गविनिवेशः[4] । २३. सन्निधातृनिचयकर्म[5] । २४. समाहर्तृसमुदयप्रस्थापनम्[6] । २५. अक्षपटले गाणनिक्याधिकारः[7] । २६. समुदयस्य युक्तापहृतस्य प्रत्यानयनम्[8] । २७. उपयुक्तपरीक्षा[9] । २८. शासनाधिकारः[10] । २९. कोशप्रवेश्यरत्नपरीक्षा[11] । ३०. आकरकर्मान्तप्रवर्तनम्[12] । ३१. अक्षशालायां सुवर्णाध्यक्षः[13] । ३२. विशिखायां सौव-

---

श्रीमूला

देशस्य शत्रुणानाक्रमणीयत्वसम्पत्तये दुर्गापेक्षणाद् दुर्गविधानम् इति सूत्रं, दुर्गविनिवेश इति च ॥ ३, ४ ॥

सन्निधातृनिचयकर्म इति सूत्रम्। सन्निधाता नाम धनादिकं सञ्चित्य निधाता। तस्य निचयकर्म धनादिरक्षणव्यापार उच्यत इति सूत्रार्थः ॥ ५ ॥

समाहर्तृसमुदयप्रस्थापनम् इति सूत्रम्। सर्वायस्थानेभ्यो राजार्थानां सम्यक् समन्ताद् वा आहर्ता समाहर्ता विषयवल्यध्यक्षः। समुदयो धनोत्थानं तस्य प्रस्थापनं मार्गपरिकल्पनं समुदयप्रस्थापनं समाहर्तुः समुदयप्रस्थापनं समाहर्तृसमुदयप्रस्थापनम्। समाहर्ता कया कया विधया समुदयं प्रस्थापयेदित्येतदस्मिन् प्रकरणे उपदिश्यत इत्यर्थः ॥ ६ ॥

अक्षपटले गाणनिक्याधिकारः इति सूत्रम्। अक्षा गणनयोग्यानि रूप्यकादीनि तेषां पटलं स्थानम् अक्षपटलं तस्मिन्, गणनायां नियुक्तो गाणनिकः तस्य कर्म गाणनिक्यं तस्य प्रस्तावो गाणनिक्याधिकारः ॥ ७ ॥

समुदयस्य युक्तापहृतस्य प्रत्यानयनम् इति सूत्रम्। उत्पन्नस्यार्थस्य नियुक्तैः पुरुषैरपहृतस्य पुनः प्रापणमित्यर्थः ॥ ८ ॥

उपयुक्तपरीक्षा इति सूत्रम्। युक्तानाम् उपरि नियुक्ताः प्रत्यायितपुरुषा उपयुक्ताः तेषां परीक्षा दोषगवेषणेति सूत्रार्थः ॥ ९ ॥

शासनाधिकारः इति सूत्रम्। तालपत्रादिषु लिख्यमानोऽर्थः शासनं तस्याधिकारो विधिरुच्यत इत्यर्थः ॥ १० ॥

कोशप्रवेश्यरत्नपरीक्षा इति सूत्रम्। कोशो भाण्डागारं तस्मिन् प्रवेशयितुं योग्यानां मणिमुक्तादीनां परीक्षणमत्रोपदिश्यत इत्यर्थः ॥ ११ ॥

आकरकर्मान्तप्रवर्तनम् इति सूत्रम्। सुवर्णरजतरत्नाद्युत्पत्तिस्थानमाकरः, तस्य कर्मान्तः तत्क्रियानिश्चयः, तस्य प्रवर्तनं व्यापारणमित्यर्थः ॥ १२ ॥

अक्षशालायां सुवर्णाध्यक्षः इति सूत्रम्। अक्षशाला अक्षः गण्यं धनं सुवर्णरूप्यादि तस्य शाला तद्घटनशाला तस्यां सुवर्णाध्यक्षः सुवर्णादिघटनगणनाद्यधिकृतः लक्षणया तद्व्यापार इत्यर्थः ॥ १३ ॥

र्णिकप्रचारः[१४] । ३३. कोष्ठागाराध्यक्षः[१५] । ३४. पण्याध्यक्षः[१६] । ३५. कुप्याध्यक्षः[१७] । ३६. आयुधागाराध्यक्षः[१८] । ३७. तुलामानपौतवम्[१९] । ३८. देशकालमानम्[२०] । ३९. शुल्काध्यक्षः[२१] । ४०. सूत्राध्यक्षः[२२] । ४१. सीताध्यक्षः[२३] । ४२. सुराध्यक्षः[२४] । ४३. सूनाध्यक्षः[२५] ।

श्रीमूला

विशिखायां सौवर्णिकप्रचारः इति सूत्रम्। विशिखायाम् आपणवीथ्यां, सौवर्णिकप्रचारः सुवर्णनियुक्तस्य व्यापारः ॥ १४ ॥

कोष्ठागाराध्यक्ष इति सूत्रम्। कोष्ठमुदरं लक्षणया तत्पोषणार्थं व्रीहिगोधूमादिकमाहारद्रव्य तस्य अगारं सङ्ग्रहस्थानम् तस्याध्यक्षः, अर्थात् तद्व्यापारः ॥ १५ ॥

पण्याध्यक्षः इति सूत्रम्। विक्रेयद्रव्याध्यक्ष इत्यर्थः ॥ १६ ॥

कुप्याध्यक्षः इति सूत्रम्। कुप्यं सारदारुवेणुवल्लिवल्कादि तस्मिन् नियुक्तः कुप्याध्यक्षः ॥ १७ ॥

आयुधागाराध्यक्षः इति सूत्रम्। स्पष्टार्थम् ॥ १८ ॥

तुलामानपौतवम् इति सूत्रम्। तुला उन्मानसाधनं, मानं कुडुबादि, ताभ्यां पौतवं परिच्छेदनं तुलामानपौतवं, लक्षणया तत्संशोधनमित्यर्थः। तच्च वाणिजकाः कूटतुलामानव्यवहारिणो माभूवन्नित्येतदर्थम् ॥ १९ ॥

देशकालमानम् इति सूत्रम्। देशो योजनगव्यूतिक्रोशादिः, कालस्त्रुटिलवादिः तयोर्मानं परिच्छेद इति सूत्रार्थः ॥ २० ॥

शुल्काध्यक्षः इति सूत्रम्। शुल्कं पञ्चदशभागादिकं शुल्कव्यवहारे वक्ष्यमाणं राज्ञो देय, तस्याऽध्यक्षः तद्व्यापार इत्यर्थः ॥ २१ ॥

सूत्राध्यक्षः इति सूत्रम्। सूत्रं कार्पासादिजस्तन्तुः तस्य अध्यक्षः तद्वानादिकारयिता ॥ २२ ॥

सीताध्यक्षः इति सूत्रम्। सीता कृषिः तस्या अध्यक्षः कृषितन्त्र-वृक्षायुर्वेदौ विज्ञाय प्रवर्तकः ॥ २३ ॥

सुराध्यक्ष इति सूत्रम्। सुरा मधुमैरेयादि तस्या अध्यक्षः सन्धानविक्रयाद्यधिकृतः सुराध्यक्षः ॥ २४ ॥

सूनाध्यक्षः इति सूत्रम्। सूना भक्ष्यप्राणिवधस्थानम्, तस्या अध्यक्षः वध्यावध्यनियमनाद्यधिकृतः ॥ २५ ॥

४४. गणिकाध्यक्षः[२६] । ४५. नावध्यक्षः[२७] । ४६. गोऽध्यक्षः[२८] । ४७. अश्वाध्यक्षः[२९] । ४८. हस्त्यध्यक्षः[३०] । ४९. रथाध्यक्षः[३१] । ५०. पत्त्यध्यक्षः[३२] । ५१. सेनापतिप्रचारः[३३] । ५२. मुद्राध्यक्षः[३४] । ५३. विवीताध्यक्षः[३५] । ५४. समाहर्तृप्रचारः[३६] । ५५. गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः[३७] । ५६. नागरिकप्रणिधिः[३८] ॥

॥ इत्यध्यक्षप्रचारो द्वितीयमधिकरणम् ॥

श्रीमूला

गणिकाध्यक्षः इति सूत्रम्। धनमेव गणयन्तीति गणिका वेश्याः तासामध्यक्षः गणिकाध्यक्षः ॥ २६ ॥

नावध्यक्षः इति सूत्रम्। नावां यानपात्राणां अध्यक्षः आदेयराजभागग्रहणाधिकर्ता ॥ २७ ॥

गोध्यक्ष इति सूत्रम्। गवाम् उपलक्षणेन गोमहिषाजादीनां तदाजीवानां गोपालादीनां च अध्यक्षः नियामक इत्यर्थः ॥ २८ ॥

अश्वाध्यक्ष इति सूत्रम्। अश्वानां लक्षणकुलादिकं विज्ञाय तद्रक्षणादिकर्मानुष्ठाता अश्वाध्यक्षः ॥ २९ ॥

हस्त्यध्यक्षः इति सूत्रम्। अश्वाध्यक्षवद् हस्त्यध्यक्षो व्याख्येयः ॥ ३० ॥

रथाध्यक्षः इति सूत्रम्। रथानां देवरथादीनां घटनाद्यधिकर्ता रथाध्यक्षः ॥३१॥

पत्त्यध्यक्षः इति सूत्रम्। पत्तयः पदातयः ये पादचारेण युध्यन्ते, तेष्वधिकृतः पत्त्यध्यक्षः ॥ ३२ ॥

सेनापतिप्रचारः इति सूत्रम्। सेनापतिः चतुरङ्गबलनेता तस्य प्रचारः सेनाविषयो व्यापारः प्रतिपाद्यत इत्यर्थः ॥ ३३ ॥

मुद्राध्यक्षः इति सूत्रम्। मुद्रा नाम राजचिह्नं राजनामधेयं प्रतिमादिलक्षणं यच्छासनपत्रादौ दीयते, तस्या अध्यक्षः प्रवर्तयिता ॥ ३४ ॥

विवीताध्यक्षः इति सूत्रम्। विवीतं तृणजलवान् अकृष्यः प्रदेशः पश्वर्थः, तस्याध्यक्षः तद्व्यापार इत्यर्थः ॥ ३५ ॥

समाहर्तृप्रचारः इति सूत्रम्। समाहर्ता आयस्थानेभ्यो राजार्थसङ्ग्राहको जनपदाध्यक्षः तस्य प्रचारो व्यापारः जनपदचिन्तनमित्यर्थः ॥ ३६ ॥

गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः इति सूत्रम्। गृहस्थ-वणिक्-तपस्विवेषाः प्रणिधयः गूढपुरुषाः। अर्थात् तेषां जनपदेषु नियोजनम्। तच्च समाहर्तृकार्योपयोगिने जनपदवृत्तान्तज्ञानाय ॥ ३७ ॥

नागरिकप्रणिधिः इति सूत्रम्। नगरे नियुक्तो नागरिकः, तस्य प्रणिधिः प्रणिधानं व्यापारचिन्तनमित्यर्थः ॥ ३८ ॥

इतीत्यादि। अध्यक्षप्रचारोऽध्यक्षाणां व्यापारः ॥

[तृतीयमधिकरणम्]

५७. व्यवहारस्थापना[1] । ५८. विवादपदनिबन्धः[2] । ५९. विवाहसंयुक्तम्[3] । ६०. दायविभागः[4] । ६१. वास्तुकम्[5] । ६२. समयस्याऽनपाकर्म[6] । ६३. ऋणादानम्[7] । ६४. औपनिधिकम्[8] । ६५. दासकर्मकरकल्पः[9] । ६६. सम्भूय समुत्थानम्[10] । ६७. विक्रीतक्रीतानुशयः[11] ।

श्रीमूला

अथ धर्मस्थीयं तृतीयमधिकरणम्। धर्मस्था नाम धर्मशास्त्रज्ञाः धर्मशास्त्रानुसारेण व्यवहारनिर्णयकर्मण्यधिकृताः । तेषामिदं धर्मस्थीयं तन्निर्णेयव्यवहारपदप्रतिपादकमित्यर्थः । तत्र प्रथमं सूत्रम्—व्यवहारस्थापना इति । कीदृशो व्यवहारः सिद्ध्यति कीदृशो न सिद्ध्यतीति व्यवस्थापनमिति सूत्रार्थः ॥ १ ॥

विवादपदनिबन्धः इति सूत्रम् । विवादपदस्य निबन्धः पूर्वोत्तरपक्षात्मना पत्र आरोपणं, तत्पूर्वकं चिन्तनमित्यर्थः ॥ २ ॥

विवाहसंयुक्तम् इति सूत्रम् । विवाहा अष्टविधाः ब्राह्मादयः तत्सम्बद्धो व्यवहार इत्यर्थः । एतच्च प्रकरणं त्रिभिरध्यायैर्वितन्यते ॥ ३ ॥

दायविभागः इति सूत्रम् । दायः पितृपितृव्यादिधनं तस्य विभागः । अयमपि त्रिभिरध्यायैर्वितन्यते ॥ ४ ॥

वास्तुकम् इति सूत्रम् । वस्तु गृहारामक्षेत्रादि तत्सम्बद्धं वास्तुकम् । इदमध्यायत्रयेण वितन्यते । तत्र तृतीयाध्याये उत्तरमपि प्रकरणं प्रवेशितम् ॥ ५ ॥

समयस्याऽनपाकर्म इति सूत्रम् । इदमहं करिष्यामीत्यभ्युपगमात्मा सङ्केतः, इदमनेन कर्तव्यमिति बहुभिः सम्भूय कृतो वा सङ्केतः समयः । तस्य अनपाकर्म त्यागाभावः इति सूत्रार्थः । इदं प्रकरणं वास्तुकप्रकरणीयविवीतक्षेत्रपथहिंसाव्युत्पादनाध्याये व्युत्पादितम् ॥ ६ ॥

ऋणाऽऽदानम् इति सूत्रम् । ऋणग्रहणनिर्यातनसम्बद्धो व्यवहार इत्यर्थः ॥ ७ ॥

औपनिधिकम् इति सूत्रम् । उपनिधिर्निक्षेपः तत्सम्बद्धमनुष्ठानमौपनिधिकम् ॥ ८ ॥

दासकर्मकरकल्पः इति सूत्रम् । अत्यन्तपारार्थ्यमासाद्य शुश्रूषका दासाः, भृत्यर्थं शुश्रूषकाः कर्मकराः तेषां कल्पः तत्सम्बन्धी विधिः ॥ ९ ॥

सम्भूयसमुत्थानम् इति सूत्रम् । वाणिजकैरन्यैर्वा समुदेत्यारभ्यमाणं कार्यं सम्भूयसमुत्थानम् ॥ १० ॥

विक्रीतक्रीतानुशयः इति सूत्रम् । विक्रीतं मूल्यमादाय दत्तं पण्यं, क्रीतं

६८. दत्तस्याऽनपाकर्म[१२]। ६९. अस्वामिविक्रयः[१३]। ७०. स्वस्वामिसम्बन्धः[१४]। ७१. साहसम्[१५]। ७२. वाक्पारुष्यम्[१६]। ७३. दण्डपारुष्यम्[१७]। ७४. द्यूतसमाह्वयम्[१८]। ७५. प्रकीर्णकानि[१९] ॥ इति धर्मस्थीयं तृतीयमधिकरणम् ॥

[चतुर्थमधिकरणम्]

७६. कारुकरक्षणम्[१]। ७७. वैदेहकरक्षणम्[२]। ७८. उपनिपात-

श्रीमूला

मूल्यं दत्त्वा गृहीतं तयोर्विषये अनुशयः विक्रयविषयः क्रयविषयश्च पश्चात्ताप इत्यर्थः ॥ ११ ॥

दत्तस्याऽनपाकर्म इति सूत्रम्। दत्तस्य धर्माद्यर्थे वाचा दत्तस्य अनपाकर्म अप्रदानम्। एतच्च विषयविशेषे पुनर्हरणस्याप्युपलक्षणम् ॥ १२ ॥

अस्वामिविक्रयः इति सूत्रम्। अस्वामी परद्रव्यव्यवहर्ता तेन कृतो विक्रयः अस्वामिविक्रयः ॥ १३ ॥

स्वस्वामिसम्बन्धः इति सूत्रम्। स्पष्टार्थम् ॥ १४ ॥

साहसम् इति सूत्रम्। सहसा कृतं कर्म साहसं प्रसभकर्म ॥ १५॥

वाक्पारुष्यम् इति सूत्रम्। वाचा कुत्सनभर्त्सनादिकमित्यर्थः ॥ १६ ॥

दण्डपारुष्यमिति सूत्रम्। दण्डेन करणेन पारुष्यं परुषकर्म द्रोहो दण्डपारुष्यम् ॥ १७ ॥

द्यूतसमाह्वयम् इति सूत्रम्। द्यूतम् अक्षक्रीडा समाह्वयः, अजकुक्कुटादिप्राणिदेवनम् तयोः समाहारः द्यूतसमाह्वयं, तत्सम्बद्धो व्यवहारः प्रकरणेऽस्मिन्नभिधीयत इत्यर्थः ॥ १८ ॥

प्रकीर्णकानि इति सूत्रम्। उक्तविवादपदानन्तर्गतानि याचितकाद्यदानादिनिमित्तानि विवादपदानि प्रकीर्णकानि, तान्यत्राभिधीयन्ते इत्यर्थः ॥ १९ ॥

इति धर्मस्थीयमित्यादि। एवमेकोनविंशतिप्रकरणं धर्मस्थीयमधिकरणं तृतीयं समुद्दिष्टमित्यर्थः ॥

अथ कण्टकशोधनाख्यं चतुर्थमधिकरणम्। तत्रेदं प्रथमं सूत्रम्—कारुकरक्षणम् इति। कारुकाः तक्षायस्कारस्वर्णकारादयः, तेभ्यः कूटकर्मकारिभ्यो देशस्य रक्षणमिहाभिधीयत इत्यर्थः ॥ १ ॥

वैदेहकरक्षणम् इति सूत्रम्। वाणिजकेभ्यः पौतवापचारिभ्यो रक्षणमित्यर्थः ॥ २ ॥

प्रतीकारः[3] । ७९. गूढाजीविनां रक्षा[4] । ८०. सिद्धव्यञ्जनैर्माणवप्रकाशनम्[5] । ८१. शङ्कारूपकर्माभिग्रहः[6] । ८२. आशुमृतकपरीक्षा[7] । ८३. वाक्यकर्मानुयोगः[8] । ८४. सर्वाधिकरणरक्षणम्[9] । ८५. एकाङ्गवधनिष्क्रयः[10] । ८६. शुद्धश्चित्रश्च दण्डकल्पः[11] । ८७. कन्याप्रकर्म[12] ।

श्रीमूला

उपनिपातप्रतीकारः इति सूत्रम् । उपनिपाताः दैविकानि महाभयानि तेषां प्रतीकारः ॥ ३ ॥

गूढाजीविनां रक्षा इति सूत्रम् । ये गूढं लञ्चग्रहणेन स्वामिनं प्रजाश्च वञ्चयन्त आजीवन्ति ते गूढाजीविनः तेषां रक्षा तेभ्यो देशस्य रक्षणमित्यर्थः ॥ ४ ॥

सिद्धव्यञ्जनैर्माणवप्रकाशनम् इति सूत्रम् । सिद्धव्यञ्जनाः मुण्डजटिलतापसवेषा धूर्ताः तैः करणैः माणवप्रकाशनं माणवस्य प्रलोभनविद्यायाः प्रकाशनम् । तच्च चोरादिग्रहणार्थम् ॥ ५ ॥

शङ्कारूपकर्माभिग्रहः इति सत्रम् । आत्मनः परान् प्रति परेषामात्मानं प्रति च शङ्का द्विरूपा, रूपं सलोप्त्रदर्शनं कर्म सन्धिच्छेदादि, एतैः अभिग्रहः चोराणां ग्रहणमिति सूत्रार्थः ॥ ६ ॥

आशुमृतकपरीक्षा इति सूत्रम् । आशु मृतकस्य परीक्षा । किमयं स्वयं मृत उत परेण मारित इति परीक्षणम् ॥ ७ ॥

वाक्यकर्मानुयोग इति सूत्रम् । वाक्यानुयोगः कर्मानुयोगश्चेति सूत्रार्थः । तत्र वाक्यानुयोगः उपपत्तियुक्तैः सामवाक्यैश्चोरपृच्छा । कर्मानुयोगः कशाप्रहारादिना चोरविचारणा ॥ ८ ॥

सर्वाधिकरणरक्षणम् इति सूत्रम् । अधिकरणशब्देन लक्षणया अध्यक्षप्रचाराधिकरणोक्ता अध्यक्षास्तन्नियम्याः पुरुषाश्च गृह्यन्ते । तेभ्यः सर्वेभ्यः प्रजानां धनस्य च रक्षणमिति सूत्रार्थः ॥ ९ ॥

एकाङ्गवधनिष्क्रयः इति सूत्रम् । एकाङ्गं हस्तः पादः कर्ण इत्येवञ्जातीयं तस्य वधश्छेदनम् एकाङ्गवधः तद्युक्तो निष्क्रयः वधस्थानीयो धनदण्डश्चतुष्पञ्चाशत्पणादिः ॥ १० ॥

शुद्धश्चित्रश्च दण्डकल्पः इति सूत्रम् । शुद्धः चित्र इति द्विविधो दण्डविधिः । तत्र शुद्धः अक्लेशमारणं, चित्रः क्लेशमारणम् ॥ ११ ॥

कन्याप्रकर्म इति सूत्रम् । कन्याया अपुष्पितायाः स्त्रियाः प्रकर्म दूषणम् । तत्सम्बद्धो दण्डविधिरत्रोच्यत इत्यर्थः ॥ १२ ॥

८८. अतिचारदण्डः[१३] ॥ इति कण्टकशोधनं चतुर्थमधिकरणम् ॥

इति स्वराज्यसंरक्षणाधिकारः तन्त्राख्यः प्रथमो भागः

[पञ्चममधिकरणम्]

८९. दाण्डकर्मिकम्[१] । ९०. कोशाभिसंहरणम्[२] ९१. भृत्यभरणीयम्[३] । ९२. अनुजीविवृत्तम्[४] । ९३. सामयाचारिकम्[५] । ९४. राज्यप्रतिसन्धानम्[६] । ९५. एकैश्वर्यम्[७] ॥ इति योगवृत्तं पञ्चममधिकरणम् ॥

श्रीमूला

अतिचारदण्डः इति सूत्रम्। अतिचारः अभक्ष्यभक्षणम् अगम्यागमनम् इत्येवमादिः तन्निमित्तो दण्ड उच्यत इत्यर्थः ॥ १३ ॥

इति कण्टकशोधनमित्यादि । एवं त्रयोदशप्रकरणं दुर्गराष्ट्रकण्टकशोधनप्रतिपादकं चतुर्थमधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ योगवृत्तं नाम पञ्चममधिकरणम्। योगो विस्रब्धघाती तद्वृत्तं तच्चोपांशुदण्डादिकम्। राजराज्यकण्टकविषय उपांशुदण्डादिप्रयोगेऽस्मिन्नधिकरणे अभिधास्यते ! तत्रेदं प्रथमं सूत्रं - दाण्डकर्मिकम् इति । दण्ड उपांशुवधः तस्य कर्म प्रयोगः दण्डकर्म तत्सम्बद्धमिहोच्यत इत्यर्थः ॥ १ ॥

कोशाभिसंहरणम् इति सूत्रम्। कोशस्य सुवर्णादेः अभिसंहरणं पूर्वत आधिक्येन सङ्ग्रहणमर्थकृच्छ्रप्राप्तावित्यर्थः ॥ २ ॥

भृत्यभरणीयमिति सूत्रम्। भृत्याः बुद्धौ शास्त्रे कर्मणि च साहाय्यदायिनः। तेषां भरणं पोषणं तत्सम्बद्धं भृत्यभरणीयम् ॥ ३ ॥

अनुजीविवृत्तम् इति सूत्रम्। अनुजीविनो मन्त्रिप्रभृतयः तैः स्वामिनि कथं वर्तितव्यमित्येतदत्रोपदिश्यत इत्यर्थः ॥ ४ ॥

सामयाचारिकम् इति सूत्रम्! समयो व्यवस्था आचारोऽनुष्ठानं समयाचारमधिकृत्य प्रवृत्तं सामयाचारिकम् ॥ ५ ॥

राज्यप्रतिसन्धानमिति सूत्रम्। राज्यस्य प्रतिसन्धानं राजव्यसने सति तत्पुत्रानभिषिच्य यत् परिचिन्तनममात्यैः क्रियते तदिहोच्यत इत्यर्थः इदमुत्तरं च प्रकरणमेकस्मिन्नध्याये समावेशितम ॥ ६ ॥

एकैश्वर्यम् इति सूत्रम्। एकस्यैव राजपुत्रस्यैकातपत्रमैश्वर्यं कर्तव्यम् इत्येतदुच्यत इत्यर्थः। एकग्रहणं बहूनामैश्वर्यकरणे अराजकत्वप्रसङ्ग इति द्योतनार्थम् ॥ ७ ॥

इति योगवृत्तमित्यादि। एवं सप्तप्रकरणं योगवृत्ताख्यं पञ्चममधिकरणं समुद्दिष्टमित्यर्थः ॥

[षष्ठमधिकरणम्]

९६. प्रकृतिसम्पदः[1] । ९७. शमव्यायामिकम्[2] ।। इति मण्डलयोनिः षष्ठमधिकरणम् ।।

[सप्तममधिकरणम्]

९८. षाड्गुण्यसमुद्देशः[1] । ९९. क्षयस्थानवृद्धिनिश्चयः[2] । १००. संश्रयवृत्तिः[3] । १०१. समहीनज्यायसां गुणाभिनिवेशः[4] । १०२. हीनसन्धयः[5] । १०३. विगृह्याऽऽसनम्[6] । १०४. सन्धायाऽऽ-

---

श्रीमूला

अथावापो यावत् त्रयोदशमधिकरणम् । तत्र षष्ठं मण्डलयोनिर्नाम । विजिगीष्वरिमध्यमोदासीनाख्यचतुरवयवं मण्डलं योनिः उत्तराधिकरणार्थस्य षाड्गुण्यस्य विषयः । मण्डलं च तद् योनिश्च मण्डलयोनिः मण्डलात्मा षाड्गुण्यप्रकृतिरित्यर्थः । तत्र प्रथमं सूत्रं—प्रकृतिसम्पद इति । प्रकृतयः स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि तासां सम्पदः अपेक्षितगुणपुष्कलता इहोच्यन्त इत्यर्थः ।। १ ।।

शमव्यायामिकम् इति सूत्रम् । कर्मफलोपभोगानां क्षेमसाधनं शमः । व्यायामस्तु कर्मारम्भोपकरणानां कर्मयोगघटकः, तदुभयमस्मिन् प्रकरणे प्रतिपाद्यत इत्यर्थः ।। २ ।। इति मण्डलयोनिरित्यादि । एवं द्विप्रकरणं मण्डलयोन्यधिकरणं षष्ठं समुद्दिष्टमित्यर्थः ।

अथ षाड्गुण्याधिकरणे प्रथमं सूत्रं—षाड्गुण्यसमुद्देश इति । सन्ध्यादीनां षड्गुणानां संक्षिप्य प्रतिपादनमिति सूत्रार्थः ।। १ ।।

तत् किमर्थमित्यपेक्षायां क्षयस्थानवृद्धिनिश्चय इति सूत्रम् । क्षयो ह्रासः स्थानं तादवस्थ्यम्, वृद्धिः उपचयः, तेषां निश्चयः स्वरूपावधारणम् । तदिहोच्यत इत्यर्थः । प्रकरणमिदं पूर्वं चैकस्मिन्नध्याये समावेशितम् ।। २ ।।

क्षीणकार्यं वक्तुं सूत्रम्—संश्रयवृत्तिः इति । प्रबलमाश्रित्य वर्तनमिति सूत्रार्थः ।। ३ ।। समहीनज्यायसां गुणाभिनिवेशः इति सूत्रम् । समः शत्रुणा सदृशशक्तिः, हीनः निकृष्टः, ज्यायान् उत्कृष्टः । आसु तिसृष्ववस्थासु गुणस्थापनाऽत्रोच्यत इत्यर्थः ।। ४ ।।

हीनसन्धय इति सूत्रम् । हीनेन कोशदण्डभूमीः प्रदाय करणीयाः सन्धय इह वर्ण्यन्त इत्यर्थः ।। ५ ।।

विगृह्यासनम् इति सूत्रम् । शत्रुणा सह विगृह्य शत्रोर्धान्यादिप्राप्तिप्रतिघातं कृत्वा स्वविषये स्थितिरिति सूत्रार्थः ।। ६ ।।

सनम्[७] । १०५. विगृह्य यानम्[८] । १०६. सन्धाय यानम्[९] । १०७. सम्भूय प्रयाणम्[१०] । १०८. यातव्याऽमित्रयोरभिग्रहचिन्ता[११] । १०९. क्षयलोभविरागहेतवः प्रकृतीनाम्[१२] । ११०. सामवायिकविपरिमर्शः[१३] । १११. संहितप्रयाणिकम्[१४] । ११२. परिपणिताऽपरिपणिताऽपसृताश्च सन्धयः[१५] । ११३. द्वैधीभाविकाः सन्धिविक्रमाः[१६] । ११४. यातव्यवृत्तिः[१७] ।

श्रीमूला

सन्धायासनम् इति सूत्रम् । अभियानाशक्तौ परेण सन्धिं कृत्वाऽवस्थानमित्यर्थः ॥ ७ ॥

विगृह्य यानम् इति सूत्रम् । पार्ष्णिग्राहादिभिः सह विग्रहं कृत्वा परं प्रति अभियानमित्यर्थः ॥ ८ ॥

सन्धाय यानम् इति सूत्रम् । पार्ष्णिग्राहादिभिः सह सन्धिं कृत्वा शत्रुमुद्दिश्य यानमित्यर्थः ॥ ९ ॥

सम्भूय प्रयाणम् इति सूत्रम् । समहीनज्यायसां शत्रुं प्रति समुदेत्य प्रयाणमित्यर्थः ॥ १० ॥

यातव्याऽमित्रयोरभिग्रहचिन्ता इति सूत्रम् । अरिसम्पद्युक्तो व्यसनी च यातव्यः, अमित्रो नित्यापकारी शत्रुः, अभिग्रहो यानम् । यातव्याऽमित्रयोः कतरं प्रति यानमनुष्ठेयमिति सम्प्रधारणमिहोच्यत इत्यर्थः ॥ ११ ॥

क्षयलोभविरागहेतवः प्रकृतीनाम् इति सूत्रम् । क्षयः गजवाजिपुरुषधनादीनामपचयः, लोभः अतितृष्णा, विरागः प्रद्वेषः, तदुत्पत्तिहेतवोऽमात्यादीनामिहाभिधीयन्त इत्यर्थः ॥ १२ ॥

सामवायिकविपरिमर्शः इति सूत्रम् । समवायेन चरन्ति सामवायिकाः विजिगीष्वनुयायिनो राजानः तेषां विपरिमर्शः गुरुलघुभावचिन्तनमित्यर्थः ॥ १३ ॥

संहितप्रयाणिकम् इति सूत्रम् । संहितयोः अन्योन्यकृतसन्धिकयोः शत्रुविजिगीष्वोः प्रयाणं भिन्नदिक्कं यानम, तदिह प्रतिपाद्यत इत्यर्थः ॥ १४ ॥

परिपणितापरिपणितापसृताश्च सन्धयः इति सूत्रम् । देशकालकार्यव्यवस्थया कृतः सन्धिः परिपणितसन्धिः, तद्विपरीतोऽपरिपणितसन्धिः, कुतोऽपि निमित्तात् स्वपक्षादपसृतेन पुनः सन्धिः अपसृतसन्धिः, त इमे सन्धय इह व्युत्पाद्यन्त इत्यर्थः ॥ १५ ॥

द्वैधीभाविकाः सन्धिविक्रमाः इति सूत्रम् । सन्धिविग्रहोपादानं द्वैधीभावः तत्सम्बद्धाः सन्धिविक्रमाः कथ्यन्त इत्यर्थः ॥ १६ ॥

यातव्यवृत्तिः इति सूत्रम् । यातव्यो विजिगीषुः तस्य सामवायिकेषु वृत्तिः यातव्ये सामवायिकानां वृत्तिश्चोच्यत इत्यर्थः ॥ १७ ॥

११५. अनुग्राह्यमित्रविशेषाः[१८] । ११६. मित्रहिरण्यभूमिकर्मसन्धयः[१९] । ११७. पार्ष्णिग्राहचिन्ता[२०] । ११८. हीनशक्तिपूरणम्[२१] । ११९. बलवता विगृह्योपरोधहेतवः[२२] । १२०. दण्डोपनतवृत्तम्[२३] । १२१. दण्डोपनायिवृत्तम्[२४] । १२२. सन्धिकर्म[२५] । १२३. सन्धिमोक्षः[२६] । १२४. मध्यमचरितम्[२७] । १२५. उदासीनचरितम्[२८] । १२६. मण्डलचरितम्[२९] ।

॥ इति षाड्गुण्यं सप्तममधिकरणम् ॥

श्रीमूला

अनुग्राह्यव्यामित्रविशेषाः इति सूत्रम् । भूम्येकान्तरा राजानो मित्राणि । तत्र कानि मित्राणि साहाय्यदानेनाऽनुग्राह्याणि कानि नेति विचारोऽत्र क्रियत इत्यर्थः ॥१८॥

मित्रहिरण्यभूमिकर्मसन्धयः इति सूत्रम् । मित्रेण हिरण्येन भूम्या कर्मणा च ये सन्धयः पणबन्धाः त इहाभिधीयन्त इत्यर्थः । इदं प्रकरणं चतुरध्यायीरूपम् ॥ १९ ॥

पार्ष्णिग्राहचिन्ता इति सूत्रम् । पार्ष्णिग्राहावस्थापन्नस्य विजिगीषोः चिन्ता अनुष्ठानविचार इत्यर्थः ॥ २० ॥

हीनशक्तिपूरणम् इति सूत्रम् । अपचितानां प्रभुमन्त्रोत्साहशक्तीनां वर्धनमिहोच्यत इत्यर्थः ॥ २१ ॥

बलवता विगृह्योपरोधहेतव इति सूत्रम् । प्रबलेन शत्रुणा सह विगृह्य दुर्गप्रवेशस्य कारणान्यभिधीयन्त इत्यर्थः ॥ २२ ॥

दण्डोपनतवृत्तम् इति सूत्रम् । दण्डेन बलेन उपनतः अधःकृतः तदवस्थापन्नस्य विजिगीषोर्बलवन्तं प्रत्यनुष्ठानमुच्यत इत्यर्थः ॥ २३ ॥

दण्डोपनायिवृत्तम् इति सूत्रम् । दण्डेन बलेन शत्रुमात्मनः समीपमुपनयति उपनमयतीति दण्डोपनायी तदवस्थस्य विजिगीषोर्वृत्तमुच्यत इत्यर्थः ॥ २४ ॥

सन्धिकर्म इति सूत्रम् । सन्धेः शपथादिना दृढीकरणमुच्यत इत्यर्थः ॥ २५ ॥

सन्धिमोक्षः इति सूत्रम् । सन्धिनिमित्तं ग्रहीकृतः सन्धिरित्युपचर्यते तस्य मोक्षो मोचनमुच्यत इत्यर्थः ॥ २६ ॥

मध्यमचरितम् इति सूत्रम् । मध्यमेषु विजिगीषोर्वृत्तिरुच्यत इत्यर्थः । एतदादिप्रकरणत्रयमेकस्मिन्नध्याये सन्निवेशितम् ॥ २७ ॥

उदासीनचरितम् इति सूत्रम् । उदासीनं प्रति विजिगीषोरनुष्ठानमभिधीयत इति सूत्रार्थः ॥ २८ ॥

मण्डलचरितम् इति सूत्रम् । मण्डलम् अरिमित्रलक्षणम् । तत् प्रति विजिगीषोरनुष्ठानमुच्यत इति सूत्रार्थः ॥ २९ ॥

इति षाड्गुण्यं सप्तममधिकरणमिति । एवमेकोनत्रिंशत्प्रकरणं षाड्गुण्याधिकरणं सप्तमम् समुद्दिष्टमित्यर्थः ॥

[अष्टममधिकरणम्]

१२७. प्रकृतिव्यसनवर्गः[१] । १२८. राजराज्ययोर्व्यसनचिन्ता[२] । १२९. पुरुषव्यसनवर्गः[३] । १३०. पीडनवर्गः[४] । १३१. स्तम्भनवर्गः[५] । १३२. कोशसङ्गवर्गः[६] । १३३. बलव्यसनवर्गः[७] । १३४. मित्रव्यसनवर्गः[८]।
इति व्यसनाधिकारिकं अष्टममधिकरणम् ॥

श्रीमूला

अथ व्यसनाधिकारिकेऽधिकरणे प्रथमं सूत्रम्—प्रकृतिव्यसनवर्गः इति। प्रकृतयः स्वाम्यमात्यादयः, व्यसनानि गुणप्रातिलोम्यादीनि, तेषां वर्गः समूहोऽभिधीयत इत्यर्थः ॥ १ ॥

राजराज्ययोर्व्यसनचिन्ता इति सूत्रम्। राजा स्वामी, राज्यम् अमात्यादि-प्रकृतिपञ्चकं द्रव्यप्रकृतिपञ्चकं च, तयोर्व्यसनचिन्ता व्यसनगुरुलघुभावसम्प्रधारण-मुच्यत इत्यर्थः ॥ २ ॥

पुरुषव्यसनवर्गः इति सूत्रम्। पुरुषस्य व्यसनानि व्यसनप्रभवा दोषाः तेषां वर्गोऽभिधीयत इत्यर्थः ॥ ३ ॥

पीडनवर्गः इति सूत्रम्। अग्न्युदकादिनिमित्ताः शक्त्यपचयाः पीडनानि, तेषां वर्गः संख्यास्वरूपगौरवलाघवतोऽभिधीयत इत्यर्थः। एतदादिप्रकरणत्रयमेकस्मि-न्नध्याये समावेशितम् ॥ ४ ॥

स्तम्भनवर्गः इति सूत्रम्। स्तम्भनं प्रत्यूहोक्त्या राजकार्योपरोधः तद्धेतूनां वर्ग उच्यत इति सूत्रार्थः ॥ ५ ॥

कोशसङ्गवर्गः इति सूत्रम्। कोशस्य राजार्थस्य सङ्गः अप्रदानं कोशसङ्गः तद्धेतुवर्गः उच्यत इत्यर्थः ॥ ६ ॥

बलव्यसनवर्गः इति सूत्रम्। बलं चतुरङ्गं सैन्यं मौलभृतकादिभेदेन षड्विधं तस्य व्यसनवर्गः अमानितविमानितादित्रयस्त्रिंशत्प्रकारोऽभिधीयत इत्यर्थः ॥ ७ ॥

मित्रव्यसनवर्गः इति सूत्रम्। स्पष्टार्थम्। प्रकरणद्वयमिदमेकाध्यायगतम् ॥ ८ ॥

इति व्यसनाधिकारिकमित्यादि। एवमष्टप्रकरणं व्यसनाधिकारेण प्रवृत्त-मष्टममधिकरणं समुद्दिष्टमित्यर्थः ॥

[नवममधिकरणम्]

१३५. शक्तिदेशकालबलाऽबलज्ञानम्[1] । १३६. यात्राकालाः[2] । १३७. बलोपादानकालाः[3] । १३८. सन्नाहगुणाः[4] । १३९. प्रतिबलकर्म[5] । १४०. पश्चात्कोपचिन्ता[6] । १४१. बाह्याऽऽभ्यन्तरप्रकृतिकोपप्रतीकारः[7] । १४२. क्षयव्ययलाभविपरिमर्शः[8] । १४३. बाह्या आभ्यन्तराश्चापदः[9] ।

श्रीमूला

अथ अभियास्यत्कर्माख्यं नवममधिकरणम् । अभियास्यतो विजिगीषोः अभियानात् प्राक् चिन्तनीयमर्थजातमस्मिन्नधिकरणे उपदेक्ष्यते । तत्र प्रथमं सूत्रम्—शक्तिदेशकालबलाबलज्ञानम् इति । शक्तेर्देशस्य कालस्य च बलाबलज्ञानमुपदिश्यत इत्यर्थः । इदं प्रकरणमुत्तरं चैकाध्यायगते ॥ १ ॥

यात्राकालाः इति सूत्रम् । शत्रुं प्रति अभियानं यात्रा, तद्योग्याः कालाः ऋतव उच्यन्त इत्यर्थः ॥ २ ॥

बलोपादानकालाः इति सूत्रम् । बलानि मौलभृतकादीनि षट् तेषां उपादानकालाः उद्योजनसमयाः । अमुकबलममुकसमये समुद्योजयितव्यमित्ययमर्थ इह चिन्त्यत इत्यर्थः ॥ ३ ॥

सन्नाहगुणाः इति सूत्रम् । सन्नाहः शस्त्रावरणग्रहणं तस्य गुणाः श्रेष्ठत्वप्रकारः कथ्यन्त इत्यथः ॥ ४ ॥

प्रतिबलकर्म इति सूत्रम् । परबलाभिभवसमर्थं बलं प्रतिबलं, तस्य करणप्रकार उच्यत इत्यर्थः ॥ ५ ॥

पश्चात्कोपचिन्ता इति सूत्रम् । पश्चात्कोपः पार्ष्णिग्राहादिकृतः कोपो दाहविलोपादिः, स इह चिन्त्यत इत्यर्थः । इदमुत्तरं च प्रकरणमेकाध्यायगते ॥ ६ ॥

बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः इति सूत्रम् । बाह्यप्रकृतयो राष्ट्रमुख्यान्तपालादयः, आभ्यन्तरप्रकृतयो मन्त्रिपुरोहितादयः, तासां कोपो व्यलीकजनितश्चित्तविकारः, तस्य प्रतिविधानमुच्यत इति सूत्रार्थः ॥ ७ ॥

क्षयव्ययलाभविपरिमर्शः इति सूत्रम् । क्षयो युग्यपुरुषापचयः, व्ययो हिरण्यधान्यापचयः, लाभो यानफलं भूम्यादिप्राप्तिः, तेषां विपरिमर्शः गौरवलाघवसम्प्रधारणमभिधीयत इत्यर्थः ॥ ८ ॥

बाह्याभ्यन्तराश्चापदः इति सूत्रम् । बाह्यापदः बाह्यराष्ट्रमुख्यान्तपालाद्युत्पादिता विपदः, आभ्यन्तरापदः मन्त्रिपुरोहिताद्युत्थापिताः, तासां स्वरूपं प्रतिविधानं चोपदिश्यत इत्यर्थः ॥ ९ ॥

१४४. दूष्यशत्रुसंयुक्ताः[१०] । १४५. अर्थाऽनर्थसंशययुक्ताः[११] । १४६. तासामुपायविकल्पजाः सिद्धयः[१२] ॥ इति अभियास्यत्कर्म नवममधिकरणम् ॥

[दशममधिकरणम्]

१४७. स्कन्धावारनिवेशः[१] । १४८ स्कन्धावारप्रयाणम्[२] । १४९. बलव्यसनाऽवस्कन्दकालरक्षणम्[३] । १५०. कूटयुद्धविकल्पाः[४] । १५१. स्वसैन्यप्रोत्साहनम्[५] । १५२. स्वबलाऽन्यबलव्यायोगः[६] । १५३. युद्ध-

---

श्रीमूला

दूष्यशत्रुसंयुक्ताः इति सूत्रम् । दूष्याः कृत्याः पौरजानपदास्तन्मुख्याश्च, शत्रवः सहजकृत्रिमादयः, तत्संयुक्तास्तदुत्पादिताः, आपद इति विशेष्यमनुवर्तते । ता इहोच्यन्ते स्वरूपतः प्रतिविधानतश्चेत्यर्थः ॥ १० ॥

अर्थानर्थसंशययुक्ताः इति सूत्रम् । अर्थो मित्रहिरण्यभूम्यादिः । अनर्थस्तन्नाशः शरीरनाशश्च संशयोऽर्थप्राणयोः सन्देहः; तैर्युक्ता आपद उच्यन्त इत्यर्थः । इदमुत्तरञ्च प्रकरणमेकाध्यायगतम् ॥ ११ ॥

तासामुपायविकल्पजाः सिद्धयः इति सूत्रम् । तासां पूर्वोक्तानामापदाम् उपायविकल्पजाः उपायाः प्रशमार्थाः सामादयः, तेषां विकल्पः प्रयोगभेदः तज्जनिताः सिद्धयः प्रतीकारा उच्यन्त इत्यर्थः ॥ १२ ॥

इत्यभियास्यत्कर्मेत्यादि । एवं द्वादशप्रकरणमभियास्यत्कर्माख्यं नवममधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ दशमे सांग्रामिकेऽधिकरणे प्रथमं सूत्रम्—स्कन्धावारनिवेशः इति । सैन्यावासस्थानं स्कन्धावारः तस्य निवेशो निर्माणविधिरुच्यत इत्यर्थः ॥ १ ॥

स्कन्धावारप्रयाणम् इति सूत्रम् । स्कन्धावारस्य कटकस्य देशकालाद्यनुगुणसन्नाहपुरस्सरमभिषेणनमुच्यत इत्यर्थः । इदमुत्तरं च प्रकरणमेकाध्यायगतम् ॥ २ ॥

बलव्यसनावस्कन्दकालरक्षणम् इति सूत्रम् । अमानितविमानितादीनि बलव्यसनानि । अवस्कन्दकाला दीर्घकान्तारानुदकाद्यध्वगमनकालाः तेभ्यः सैन्यसंरक्षणमुच्यत इत्यर्थ ॥ ३ ॥

कूटयुद्धविकल्पाः इति सूत्रम् । कूटयुद्धं नाम कपटयुद्धं बलव्यसनावस्कन्दकालादिच्छिद्रमुपलभ्य शत्रुहिंसनं, तस्य विकल्पाः भेदाः कथ्यन्त इत्यर्थः । एतदादिप्रकरणत्रयमेकाध्यायगतम् ॥ ४ ॥

स्वसैन्योत्साहनम् इति सूत्रम् । आत्मयोधानां संग्रामगुणसंकीर्तनादिना युद्धोत्साहनजननमुच्यत इत्यर्थः ॥ ५ ॥

स्वबलान्यबलव्यायोगः इति सूत्रम् । स्वसैन्यस्य परसैन्यापेक्षया व्यायोगः विशिष्टमायोजनं व्यवस्थापनं दिक्सूर्यवाताद्यानुगुण्यं यथा स्यात् तथा व्यूहरचनामिति यावत् । तदिहोच्यत इत्यर्थः ॥ ६ ॥

भूमयः[7] । १५४. पत्त्यश्वरथहस्तिकर्माणि[8] । १५५. पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः[9] । १५६. सारफल्गुबलविभागः[10] । १५७. पत्त्यश्वरथहस्तियुद्धानि[11] । १५८. दण्डभोगमण्डलाऽसंहतव्यूहव्यूहनम्[12] । १५९. तस्य प्रतिव्यूहसंस्थापनम्[13] ॥ इति साङ्ग्रामिकं दशममधिकरणम् ॥

[एकादशमधिकरणम्]

१६०. भेदोपादानानि[1] । १६१ उपांशुदण्डः[2] ॥ इति सङ्घवृत्तं एकादशमधिकरणम् ॥

श्रीमूला

युद्धभूमयः इति सूत्रम् । युद्धानुगुणाः समस्थिराभिकाशादिलक्षणाः भूमयः कथ्यन्त इत्यर्थः ।। ७ ।।

पत्त्यश्वरथहस्तिकर्माणि इति सूत्रम् । पत्तिः पदातिः तदादीनां व्यापारा उच्यन्त इत्यर्थः ॥ ८ ॥

पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः इति सूत्रम् । पक्षौ पंचव्यूहात्मना स्थाप्यमानस्य बलस्य बहिः पुरस्तात्कोट्यौ, कक्षौ पश्चादन्तःपार्श्वे, उरस्यम् मध्यम्, एषां पंचानां व्यूहविशेषाणां बलपरिमाणानुगुण्येन व्यूहविभागोऽभिधीयत इत्यर्थः । एतदादिप्रकरणत्रयमेकाध्यायगतम् ॥ ९ ॥

सारफल्गुबलविभागः इति सूत्रम् । सारबलं पितृपैतामहत्वादि दण्डसम्पद्युक्तं, तद्विपरीतं भीरुकं वा फल्गुबलं, तयोर्विभागो विभज्याऽवस्थापनं चिन्त्यत इति सूत्रार्थः ॥ १० ॥

पत्त्यश्वरथहस्तियुद्धानि इति सूत्रम् । स्पष्टार्थम् ॥ ११ ॥

दण्डभोगमण्डलासंहतव्यूहव्यूहनम् इति सूत्रम् । दण्डव्यूहो भोगव्यूहो मण्डलव्यूहः असंहतव्यूहः इत्येतेषां प्रकृतिव्यूहानां तद्विकृतिव्यूहानां च रचनमभिधीयत इत्यर्थः । इदमुत्तरं च प्रकरणमेकाध्यायगतम् ॥ १२ ॥

तस्य प्रतिव्यूहसंस्थापनम् इति सूत्रम् । तस्य दण्डादिव्यूहनस्य अर्थाद् दण्डादिव्यूहानां प्रतिव्यूहस्थापनमुच्यत इत्यर्थः ॥ १३ ॥

इति सांग्रामिकं दशममधिकरणमिति । संग्राममधिकृत्य प्रवृत्तं सांग्रामिकं तदाख्यं दशममधिकरणम् । इत्थं त्रयोदशप्रकरणकं समुद्दिष्टमित्यर्थः ॥

अथैकादशे सङ्घवृत्तेऽधिकरणे प्रथमं सूत्रम्—भेदोपादानानि इति । भेदः संघविश्लेषोपायः तस्य उपादानानि प्रयोगा उच्यन्त इत्यर्थः ॥ १ ॥

उपांशुदण्डः इति सूत्रम् । तूष्णींदण्डः निगूढवध उच्यत इत्यर्थः ॥ २ ॥

इति संघवृत्तमेकादशमधिकरणमिति । संघः शस्त्रोपजीविनां संघीभावैकबलानां राजाभिधेयानां समूहः, तस्मिन् वृत्तं तद्विधेयीकरणानुकूले राज्ञो व्यापारः तत्प्रतिपादकम, एवं द्विप्रकरणम् एकादशमधिकरणं समुद्दिष्टमित्यर्थः । एतच्चैकाध्यायगतम् ॥

[द्वादशमधिकरणम्]

१६२. दूतकर्माणि[1] । १६३. मन्त्रयुद्धम्[2] । १६४, सेनामुख्यवधः[3] । १६५. । मण्डलप्रोत्साहनम्[4] । १६६. शस्त्राग्निरसप्रणिधयः[5] । १६७, वीवधासारप्रसारवधः[6] । १६८. योगातिसन्धानम्[7] । १६९. दण्डातिसन्धानम्[8] । १७०, एकविजयः[9] ॥ इति आबलीयसं द्वादशमधिकरणम् ॥

श्रीमूला

अथ आबलीयसं नाम द्वादशमधिकरणम्। अबलीयान् दुर्बलतरः तस्येदमाबलीयसं प्रबले सन्धिमनिच्छति सति दुर्बलतरस्य कृत्यम्। तदिह प्रतिपाद्यम्। तत्र प्रथमं सूत्रम् दूतकर्म इति। दूता नाम निसृष्टार्थाः परिमितार्थाः शासनहरा इति त्रिविधाः तेषां व्यापारोऽभिधीयत इत्यर्थः ॥ १ ॥

मन्त्रयुद्धम् इति सूत्रम्। मन्त्रः प्रज्ञोत्कर्षः तेन युद्धं मन्त्रयुद्धम्। तच्च शत्रुषड्वर्गवशगानेकभूमिपतिनाशोदाहरणादिना शत्रोर्मतिमुपजनय्य वञ्चनम्। तदिहोच्यत इति सूत्रार्थः ॥ २ ॥

सेनामुख्यवधः इति सूत्रम्। सेना चतुरंगबलं तत्र मुख्याः सेनापत्यादयः तेषां वधोपाय उच्यत इत्यर्थः। इदमुत्तरं चैकाध्यायगतम् ॥ ३ ॥

मण्डलप्रोत्साहनम् इति सूत्रम्। मण्डलं मित्रादिमण्डलं तस्य प्रोत्साहनम् आत्मरक्षार्थमुद्योजनं विजिगीषुणा कर्तव्यमुच्यत इत्यर्थः ॥ ४ ॥

शस्त्राग्निरसप्रणिधयः इति सूत्रम्। शस्त्राग्निरसानां गूढप्रयोगा उच्यन्त इत्यर्थः। इदमुत्तरं चैकाध्यायगतम् ॥ ५ ॥

वीवधासारप्रसारवधः इति सूत्रम्। विवधः पर्याहारः उपचारात् पर्याहारवाही स्वप्रजासकाशलभ्यायभारानेता, आसारः सुहृद्बलं, प्रसारो वनाद् यवसेन्धनाहर्ता, तेषां वध उच्यत इत्यर्थः ॥ ६ ॥

योगातिसन्धानम् इति सूत्रम्। योगः कपटोपायः देवतागृहप्रवेशाद्यवसरे शत्रोरुपरि शिलायन्त्रमोक्षणभित्तिपातनादिः तेनातिसन्धानमुच्यत इत्यर्थः। एतदादिप्रकरणत्रयमेकाध्यायान्तर्गतम् ॥ ७ ॥

दण्डातिसन्धानम् इति सूत्रम्। दण्डो वधपरिक्लेशार्थाहरणादिः, तेन शत्रोरभिभवनमुच्यत इत्यर्थः ॥ ८ ॥

एकविजयः इति सूत्रम्। एकेन सहायनिरपेक्षेणैव विजिगीषुणा विजयः शत्रोरभिभव उच्यत इत्यर्थः ॥ ९ ॥

इत्याबलीयसमित्यादि। एवं नवप्रकरणमाबलीयसं द्वादशमधिकरणं समुद्दिष्टमित्यर्थः ॥

[त्रयोदशमधिकरणम्]

१७१ उपजापः[१] । १७२. योगवामनम्[२] । १७३. अपसर्पप्रणिधिः[३] । १७४. पर्युपासनकर्म[४] । १७५. अवमर्दः[५] । १७६. लब्धप्रशमनम् ॥ इति दुर्गलम्भोपायः त्रयोदशमधिकरणम् ॥

इति परराष्ट्रजयाधिकारः आवापाख्यः द्वितीयो भागः ।

[चतुर्दशमधिकरणम्]

१७७. परघातप्रयोगः[१] । १७८. प्रलम्भनम्[२] । १७९. स्वबलोप-

श्रीमूला

अथ त्रयोदशं दुर्गलम्भोपायाख्यमधिकरणमारभ्यते । दुर्गस्य परकीयस्य प्राप्त्युपायोऽस्मिन्नधिकरण उपदिश्यते । तत्र प्रथमं सूत्रम् उपजाप इति । उपजापो भेदः उच्यत इत्यर्थः ॥ १ ॥

योगवामनम् इति सूत्रम् । योगो मुण्डजटिलादिवेषान्यत्वग्रहणं तेनोपायेन वामनं शत्रोर्दुर्गान्निष्क्रामणमभिधीयत इत्यर्थः ॥ २ ॥

अपसर्पप्रणिधिः इति सूत्रम् । अपसर्पा गूढपुरुषाः तेषां प्रणिधानं शत्रुविषये निवासनमुच्यत इत्यर्थः ॥ ३ ॥

पर्युपासनकर्म इति सूत्रम् । परदुर्गं परित उपासनकर्म सैन्यनिवासनव्यापार उच्यत इत्यर्थः । इदमुत्तरं चैकाध्यायगतम् ॥ ४ ॥

अवमर्दः इति सूत्रम् । अवमर्दः परदुर्गग्रहणं तत् कदा केन प्रकारेण कर्तव्यमित्ययमर्थोऽभिधीयत इत्यर्थः ॥ ५ ॥

लब्धप्रशमनम् इति सूत्रम् । विजिगीषुणा लब्धस्य शत्रुदुर्गादेः प्रशमनं लब्धप्रशमनम् । तच्च दुर्गादिवासिनाम् अपूर्वभूपतिविषयशंकाद्यपोहनेन विजिगीषौ विस्रम्भजननम् । तदभिधीयत इति सूत्रार्थः ॥ ६ ॥

इति दुर्गलम्भोपाय इत्यादि । एवं षट्प्रकरणं दुर्गलम्भोपायाख्यं त्रयोदशमधिकरणं समुद्दिष्टमित्यर्थः ॥

अथौपनिषदं चतुर्दशमधिकरणम् । उपनिषत् शत्रुजयोपायरहस्यं तदधिकृत्य प्रवृत्तमौपनिषदम् । तत्र प्रथमं सूत्रम्—परघातप्रयोग इति । शत्रुवधार्थं औषधप्रयोग उच्यत इत्यर्थः ॥ १ ॥

प्रलम्भनम् इति सूत्रम् । औषधमन्त्रप्रयोगद्वारेण क्षुत्प्रतीकारविरूपकरणादिना शत्रुवञ्चनमुच्यत इत्यर्थः । अद्भुतोत्पादनं भैषज्यमन्त्रप्रयोग इति द्विधा विभज्य प्रकरणमिदमध्यायद्वयेन वितन्यते । तत्र मार्जारोष्ट्रादिचक्षुस्साधितचूर्णादिकं भैषज्यं दृश्यादृश्यकरणादिसाधनं, 'बलिं वैरोचनामि'त्यादिर्मन्त्रः ॥ २ ॥

घातप्रतीकारः[3] ॥ इति औपनिषदिकं चतुर्दशमधिकरणम् ॥

[पञ्चदशमधिकरणम्]

१८०. तन्त्रयुक्तयः[1] ।—इति तन्त्रयुक्तिः पञ्चदशमधिकरणम् ॥

इति तन्त्रावापशेषाख्यः तृतीयो भागः ।

[शास्त्रेयत्तानिष्कर्षः]

शास्त्रसमुद्देशः—पञ्चदशाधिकरणानि (१५), सपञ्चाशदध्यायशतम् (१५०), साशीतिप्रकरणशतम् (१८०), षट्श्लोकसहस्राणि (६०००)—इति ॥

श्रीमूला

स्वबलोपघातप्रतीकारः इति सूत्रम्। स्वबलस्य स्वसैन्यस्य परप्रयुक्त विषाम्बुदूषणादिनिमित्तो य उपघातः तस्य प्रतीकारोऽभिधीयत इत्यर्थः ॥ ३ ॥

इत्यौपनिषदमित्यादि । एवं त्रिप्रकरणम् औपनिषदं चतुर्दशमधिकरणं समुद्दिष्टमित्यर्थः । औपनिषदिकमित्यपि पाठः । तदाणन्ताट्ठन् ॥

अथान्तिमं तन्त्रयुक्तिर्नाम पञ्चदशमधिकरणम् । तन्त्रं तन्त्रावापात्मकमिदमर्थशास्त्रं तस्य युक्तिः व्याख्यानोपायभूतो न्यायः स इह प्रतिपाद्यते । तत्रेदं सूत्रम्—तन्त्रयुक्तय इति । तन्त्रोपयुक्ता युक्तयः अधिकरणविधानादयो द्वात्रिंशदस्मिन् प्रकरणेऽभिधीयन्त इति सूत्रार्थः ॥ १ ॥

इति तन्त्रयुक्तिरित्यादि । एवमेकप्रकरणकमिदं तन्त्रयुक्त्यधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ सर्वप्रकारेयत्ताख्यानेन कृत्स्नस्य शास्त्रस्य समुद्देशमाह— शास्त्रसमुद्देश इत्यादि । श्लोक इह द्वात्रिंशद् अक्षराणि, येषां समुदाय एको ग्रन्थ इति गण्यते । शेषं स्पष्टम् ।

वैदिकसिद्धान्तसंरक्षिणी

अक्षराणां पदानां प्रकरणानां न्यूनातिरिक्तनिवेशपरिहारायाह-पञ्चदशेति । अस्य ग्रन्थस्य निर्माणप्रयोजनं दर्शयन् स्वकीर्तिअनुवर्तयंश्चाम-सुखग्रहणेति ।

इति वैदिकसिद्धान्तसंरक्षिण्यां कौटिलीयार्थशास्त्रव्याख्यायां प्रथमोऽध्यायः ।

[ग्रन्थगुणाः]

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥ १ ॥

इति कौटलीयेऽर्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
राजवृत्तिः प्रथमोऽध्यायः ।

जयमङ्गला

इति शास्त्रसमुद्देशः, इतिशब्दः परिसमाप्त्यर्थः । शास्त्रस्य प्रकरणाधिकरण-स्वरूपस्य संक्षेपेणोद्देश उक्तः । प्रकरणानामधिकरणानां चानुपूर्वी यथानिर्देशं वक्ष्यामः । इदानीं स्पष्टार्थं सङ्ख्यया शास्त्रसमुद्देशमाह-पञ्चदशेति । तत्र प्रकरणाधिकरणसंख्यानमन्यनिरपेक्षार्थम् । अध्यायसंख्यानं न प्रकरणवशादेषां[1] सङ्ख्येति दर्शनार्थम् । यतो विगृह्यासनादीनि बहूनि प्रकरणान्येकोऽध्यायः, विद्यासमुद्देशः प्रकरणमेकं त्रयोऽध्याया इति । श्लोकसंख्यानमहीनाधिकत्वज्ञापनार्थम् ।

जयमङ्गलाक्रोडपत्रम्

प्रकरणवशात् अध्यायानां संख्या कुतो नेति प्रश्नं समाधातुमाह-यतो इति ।

श्रीमूला

व्युत्पित्सुप्ररोचनार्थं स्वशास्त्रस्य तन्मृग्यगुणपुष्कलतां श्लोकेनाह—सुखेत्यादिना । सुखं क्लेशासहं ग्रहणं बुद्धिर्येषां ते सुखग्रहणाः सुकुमारमतयः तैरपि विज्ञेयं विज्ञातुं शक्यम् । तदन्यविज्ञेयत्वं तु कैमुत्यसिद्धम् । तत्त्वार्थपदनिश्चितं तत्त्वम् । अर्थस्य याथात्म्यम्, अर्थः शब्दाभिधेयः, पदं वाचकशब्दः, तत्त्वतोऽर्थतः पदतश्च निश्चितम् । किं यथाप्रतिपादितमेवार्थस्य याथात्म्यम् उतान्यदपि स्यादिति सन्देहानुत्थापकं तत्त्वनिश्चितम्, अर्थपदयोरन्यूनानतिरिक्ततया सन्देहाजनकम् अर्थपदनिश्चितमिति बोद्धव्यम् । तत्त्वार्थपदानि निश्चितानि यस्मिन्निति बहुव्रीहिर्वा । तदा तु निश्चितशब्दस्य परनिपात आहिताग्न्यादित्वात् साध्यः ।

इतीत्यावद्यध्यायसमाप्तिवाक्यम् । तत्र प्रान्ते राजवृत्तिरिति प्रतिपाद्यसूचनम् एतदध्यायसंक्षिप्तस्य कृत्स्नशास्त्रार्थस्य राजसम्बन्धिव्यापारात्मकत्वात् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे प्रथमोऽध्यायः राजवृत्तिः ॥

---

१ अशुद्धम्
वशादेष

जयमङ्गला

सुखग्रहणमित्यादि वचनमध्येतृप्रोत्सहनार्थम्। सन्निवेशत्वात् सुखेन ग्रहणं पठनं यस्मिन्निति सुखग्रहणम्। स्पष्टार्थत्वात् सुखेन विज्ञेयमवगतिर्यस्मिन्निति सुखविज्ञेयम्। यतस्तत्त्वार्थैः निश्चयो यस्मिन्निति। विमुक्तं चास्मिन् ग्रन्थगौरवम्। अतः कालातिपातोऽपि नास्ति। कुटलं नाम गोत्रं स्यापत्यं कौटिल्यः। "गर्गादिभ्यो यञ्" (४-१-१०५) स्वगोत्रकीर्तनं च कीर्त्यर्थम्। तथा चाहुः—

"दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः।
यावत् स्वशब्दो ध्रियते तावत् स्वर्गे महीयते॥" इति॥

शास्त्रं चेदं स्वपरमण्डलभेदाद् द्विधाऽवस्थितं तन्त्रमावापश्च (इति)। स्वकुटुम्बधारणात् तन्त्रम्। "तत्रि कुटुम्बधारणे" इति धातुपाठात्। तच्च अध्यक्ष-प्रचारादि योगवृत्तान्तम्। परस्माच्छक्तयः सिद्धयश्चात्मनि समन्तादुप्यन्ते व्यस्यन्ते येनासावावापः। स च मण्डलयोन्यादिदुर्गलाभोपायान्तः। तदुभयमपि अविनीतस्य न प्रवर्तत इति आदौ विनयोपदेशः। तन्त्रावापाभ्यामसिद्धेऽर्थे उपनिषत्प्रयोग इत्यन्ते वचनम्। तदुभयमपि तन्त्रावापान्तर्भूतमेव द्रष्टव्यम्। शास्त्रमपि व्याख्यायुक्तिं विना न शक्यते व्याख्यातुमिति तन्त्रयुक्तिः शास्त्रस्यालङ्कारभूता अन्ते समुपदिष्टा। तथा चोक्तम् —

"सूत्रवाक्यसमीक्षाभिः श्लोकैः शास्त्रस्य तद्विधिः।
अलङ्काराश्च तस्योक्ता द्वात्रिंशत् तन्त्रयुक्तयः॥
अर्थस्य सूचनात् सूत्रं वाक्यं च पदसंहतिः।
अन्तर्भाव्या समीक्षा स्याच्चतुष्पाच्छ्लोक उच्यते।" इति।

शास्त्रं चेदं समीक्षाभिः विरचितत्वात् समीक्षाशास्त्रम् इत्याहुः। शास्त्र-समुद्देशश्च प्रथमं प्रकरणं विनय एवान्तर्भूतम्। यतो वक्ष्यति—"शास्त्रार्थानुष्ठानं वेन्द्रियजयः" (अधि. १. अध्याय ६) इति। ततश्च संक्षेपेणाऽपि कृत्स्नं शास्त्रमनुष्ठेयम् इन्द्रियजय इति समुद्देशो विनये निक्षिप्तः॥

इति शास्त्रसमुद्देशः प्रथमं प्रकरणम्।
प्रथमश्चाध्यायः॥

जयमङ्गलाक्रोडपत्रम्

प्रोत्साहनार्थम् इति। उत्साहनं – बलवदनिष्टाननुबन्धित्वज्ञानम्।

कुटलमिति। अस्मिन् गोत्राभिधानं वंशतात्पर्येण बोध्यम्। तेन गोत्रप्रवर-मंजर्युक्तेषु अगस्त्याद्यन्यतमगोत्रेषु अस्य अनुल्लेखेऽपि न क्षतिः।

कौटल्य इति। यद्यपि टीकाकृता कौटल्यपदस्य व्युत्पत्तिः प्रदर्शिता, तथापि इतरटीकाकृत्प्रामाण्यात् मूलकर्तुः कौटिल्य इत्यपि नामधेयमस्तीति ज्ञायते। तद्यथा

उपाध्यायनिरपेक्षायाम्—"कुटो कुम्भी तत्परिमितं धान्यं लाति संगृह्णाति" इति कुटिलः। अर्थात् कुटिलवंशोऽयं कुम्भीधान्यः, तत्र उत्पद्यमानत्वात् अयं कौटिल्यः" इति।

श्यामशास्त्रिगोऽपि उपाध्यायनिरपेक्षोक्तं व्याख्यानं स्वीकुर्वन्ति। एतेन ग्रन्थकर्ताः कुटिलमतिरासीत् इत्ययं ग्रन्थकर्ता कौटिल्यः इति केचिद् व्याचक्षते, तदपास्तम्। योगवृत्तादिप्रकरणेषु कौटिल्यस्य सन्मतेः दृष्टत्वात्[1]।

प्रकरणाधिकरणसमुद्देशस्य ग्रन्थस्य अस्य प्रथमाधिकरणे विनयाधिकारिके अन्तर्भावं दर्शयति—शास्त्रेति।

अन्तर्भावे हेतुमाह-यतो इति।

इति जयमंगलाक्रोडपत्रे प्रथमाध्यायविवेचनं समाप्तम्।

'नैवम्' इति भारद्वाजः · प्रम्रियमाणे राजनि अमात्यः कुल्यकुमारमुख्यान् परस्परं मुख्येषु वा विक्रामयेत्। विक्रान्तं प्रकृतिकोपेन घातयेत्। कुल्यकुमारमुख्यानुपांशुदण्डेन वा साधयित्वा स्वयं राज्यं गृह्णीयात्। राज्यकारणाद्धि पिता पुत्रान् पुत्राश्च पितरमभिद्रुह्यन्ति 'किमंग! पुनरमात्यप्रकृतिर्ह्येकप्रग्रहो राज्यस्य। तत् स्वयमुपस्थितं नावमन्येत। स्वयमारूढा हि स्त्री त्यज्यमानाऽभिशपतीति लोकप्रवादः।

कालश्च सकृदभ्येति यं नरं कालकांक्षिणम्।
दुर्लभस्स पुनस्तस्य कालः कर्म चिकीर्षतः।
'प्रकृतिकोपकमधर्मिष्ठमनैकान्तिकं चैतत्' इति कौटल्यः।

प्रथमं प्रकरणम्—विद्यासमुद्देशः

द्वितीयोऽध्यायः

राजवृत्तिः[1]

म० म० श्रीगणपतिशास्त्रिविरचिता

श्रीमूला

अथ समुद्देशनिर्देशक्रमेण अधिकरणप्रकरणानि व्याख्येयानि। तत्र तावत् प्रथमाधिकरणस्यादिमं प्रकरणं द्वितीयादिभिस्त्रिभिरध्यायैः प्रारभ्यते। विद्यासमुद्देश इति हि प्रथमं सूत्रम्। कास्ता विद्या इत्याकाङ्क्षायामाह—आन्वीक्षिकीत्यादि। अर्थतत्त्वस्य हेतुभिः परीक्षणमन्वीक्षा, सा प्रयोजनमस्या इति आन्वीक्षिकी हेतुविद्या। ऋग्यजुःसामानि त्रयी, तेषाम् अभिचारकर्मज्ञानादिफलादथर्ववेदाद् भिन्नप्रस्थानतया पृथक्पंक्तिनिवेश्यानां सम्भूयैकक्रतुकार्यसाधकत्वात् तत्समुदायस्य त्रयीति संज्ञा। कृषिः पाशुपाल्यं वणिज्या च वार्त्ता। दण्डनीतिस्तु राजनीतिः। इति एवं प्रसिद्धा इति शेषः।

वैदिकसिद्धान्तसंरक्षिणी

ग्रन्थोऽयं द्विधा विभक्तः। एक उद्देशग्रन्थः अपरो निर्देशग्रन्थः। तत्र 'ॐ नमः' इत्यारभ्य 'विमुक्तग्रन्थविस्तरमि'त्यन्तं उद्देशग्रन्थः, अपरो 'राजवृत्तिरि'त्यारभ्य आन्तः। तदारम्भे मङ्गलं निर्दिशति कीर्तनमुखेन-राजवृत्तिरिति। राजा वक्ष्यमाण-स्वामिसम्पदा युक्तः। ऐश्वर्यसम्पन्नत्वात् देवः इति राजकीर्तनमेवात्र मङ्गलात्मकम्। तदाहुः—

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति॥ इति॥

एवमन्यान्यपि वचनानि राज्ञो देवत्वाभिधायकानि तत्र तत्रानुसन्धेयानि। उदयनाचार्या अपि राज्ञो देवत्वमभिदधति तद्यथा—

"प्रतिमादयस्तु तेन तेन विधिना सन्निधापितरुद्रोपेन्द्रमहेन्द्राद्यभिमानिदेवता-भेदाः तत्रतत्राराधनीयतामासादयन्ति दष्टमूर्छितं राजशरीरमिव विषापनयनविधि-नापादितचैतन्यम्" इति। (न्यायकुसुमांजलिः १–१३ श्लो०)

उपाध्यायनिरपेक्षायामपि—

"अतः सर्वस्मान्महीपतिरेव देवः विशिष्टदेवसद्भावेऽपि महीपतिरेव देवः अधिकृतानधिकृतयोः अधिकृते प्रतिपत्तिर्गरीयसी। कौटिल्येनात एववृत्तिरित्युक्तम्"। इति।

---

१. राजवृत्तिरिति अयमधिकारः। आत्मसम्पद्गुणैराभिगामिकगुणैश्च जनरञ्जनाद् राजा तस्य वृत्तिरनुष्ठानं············अधिकृतं·············राजवृत्तिरिति प्रधान·········।

वैदिकसिद्धान्तसंरक्षिणी

राज्ञो देवत्वविषये शाण्डिल्यसूत्राभिप्रायः

ननु शाण्डिल्यसूत्रे देवत्वं राज्ञि प्रतिषिद्धम्। तथा हि-शाण्डिल्यसूत्रस्यादिमश्लोक-व्याख्याने स्वप्नेश्वरकृतभाष्ये-"उच्यते जीवोपाध्य नवच्छिन्नचेतनविषयिणी अनुरक्ति-रेव सेति (भ० सू० १-२-) ननु "नराणां च नराधिपः" इत्यादिना विभूतीनामपि भगवद्रूपत्वकथनात् राजादिभक्तेरपि मुक्तिः स्यादित्यत आह प्राणित्वान्न विभूतिषु (-२।१।१९-) जीवोपाध्यनवच्छिन्नविषयैव पराभक्ति र्न तु प्राणादिजीवोपाधि-प्रयुक्तेषु राजादिषु अनुरक्तिर्मुक्तिफलेति।

द्यूतराजसेवयोः प्रतिषेधाच्च। (-२।१।२०) धर्मशास्त्रेषु द्यूतराजसेवयोः प्रतिषेधः स्मर्यते। परमेश्वरत्वे तु तन्न स्यात्" इति।

तथा भक्तिचन्द्रिकायामपि-

"राजादिविभूतिषु भक्तिर्न मुक्तिफला कुतः अज्ञानाधारतोपहितप्राणित्वात् जीवत्ववत्वाच्च इति यावत्।" नराणां च नराधिपः इत्यादिकं तु नेश्वरकोटिस्थत्वा-भिप्रायेण, किन्तु भगवदनुगृहीततदभिमानित्वाभिप्रायेण। तस्मात्तद्भक्तिर्न मुख्य-फलेति भावः। धर्मशास्त्रे हि द्यूतराजसेवयोः प्रतिषेधः स्मर्यते। परमेश्वरत्वे राज्ञः तन्न स्यात्। द्यूतरागनिषेधोऽत्र दृष्टान्तार्थमुक्तः तद्रागस्य भक्तित्वप्रसक्तेरेवाविर्भा-वात्"। इति।

रामरुद्रो दिनकरीव्याख्यायां तु ब्रह्मादीनामपि अखण्डं देवत्वं जातिरूपं न स्वीक्रियते। किमुत राज्ञामित्यभिप्रायो वर्णितः—"जलीयतैजसशरीरवृत्तितया देवत्व-स्यापि जातित्वाभावात्" इति। मधुसूदनसरस्वतीभिरपि "जन्म कर्म च मे दिव्यम्।" इति गीताव्याख्यायामीश्वरे पंचभूतानात्मकत्वं साधितम्।[1] (अ० ४ श्लो० ९)

न च रामादिशरीरस्यापि राजत्वात् ईश्वरानात्मकत्वं स्यादिति वाच्यम्। रामतापन्युपनिषत्प्रामाण्येन रामस्येश्वरत्वे स्वीकृतेपि अन्येषु राजसु पाञ्चभौतिका-नात्मकत्वे प्रमाण्याभावेन तेषु ईश्वरत्वं देवत्वं वा नास्तीतिचेदत्रोच्यते। विभूति-निरूपणाध्याये जगत्स्थितिहेतोर्भगवदात्मकस्य सत्वगुणस्योत्कर्षः अत्यर्थमाश्रितत्वं, तत्कुत्र ज्ञेयम्? इति चिन्तितम्। तत्प्रसङ्गे अनेका विभूतय उक्ताः तासु नराधिपस्यापि सङ्ग्रहो वर्तते। अस्यायं भावः—यावदनुल्लङ्घितेशशासनो नराधिपः मर्यादां नाति-क्रामति तावत् स बालोऽपि वा भवतु नावमन्तव्योऽपितु ईशत्वेनोपास्यः। यस्मिन् क्षणे सोऽनात्मवान् भवति ततः प्रभृति तु नोपास्यः सत्वोत्कर्षाभावात् जीवत्व-मात्रवत्वाच्च, इति शाण्डिल्यसूत्राशयः। अन्यथा गीताभक्तिसूत्रयोरसमन्वयापत्तेः। राजनिष्ठं देवत्वं तु ईश्वरोपकरणात्मकत्वमेव उपकरणत्वं च ईशसेवकेषु राजसु मनः

---

[1] जन्मकर्म नित्यसिद्धस्यैव मम सच्चिदानन्दघनस्य लीलया तथानुकरणम्। कर्म च धर्मसंस्थापनेन जगापरिपालनम्। मे मम नित्यसिद्धेश्वरस्य। दिव्यमप्राकृतम्। अन्यैः कर्तुम-शक्यममीश्वरस्यैवासाधारणम्। इति।

वैदिकसिद्धान्तसंरक्षिणी

प्राणवाचो द्वारीकृत्य भवति। अर्थात् एतत्त्रितयं यदि सत्वगुणात्मकस्य भगवतः कार्यकरणे अङ्गतया विनियुज्यते तर्हि तदधिष्ठानं राजापि देवो नान्यथा। तत्र प्रमाणादिकं जयमङ्गलाव्याख्यायां प्रपञ्चितम् एतेन राजनिष्ठदेवत्वस्यादृष्ट-रूपत्वे नीतिलक्षणसङ्गतिः, दृष्टरूपत्वे तु न तत्प्रसिद्धमित्यादिशङ्काः परास्ताः। ईदृशं देवत्वं राजसु कुलीनत्वात् उपरिबुद्धित्वात् गुणसंपत्तिमत्वात् ईशपारतन्त्र्याच्च साहजिकं भवति नान्येषु। तस्य च परिचायकाः सामुद्रिकशास्त्राभिप्रायेण ध्वजवज्र-सदृश्यो रेखाः[१], तथा नाट्यशास्त्राभिप्रायेण गतिमत्त्वं वाक्पाटवं च तेषां स्वाभाविकं भवतीति तत्रतत्रोक्तं वेदितव्यम्। ('नाट्यशास्त्रे[१] क्षेमेन्द्रसूरिकृते नीतिकल्पतरौ[२] च।)

ननु ईशोपकरणात्मकत्वं देवत्वं सर्वास्वेव विभूतिषु समानमेव तर्हि भक्तिसूत्रे राजसेवाप्रतिषेधस्य कोऽभिप्रायविशेषः। उच्यते। राजानः प्रायशः उच्चपदाधिष्ठित-त्वात् पूज्या भवन्ति तस्याऽवधिः भक्तिसूत्रेण निर्दिश्यते— यावत्सत्वस्याधिष्ठानं राजाऽस्ति तावत् स सेव्यः अन्यथा नेति द्योतयितुं राजसेवाप्रतिषेधः उक्तः। इति।

राजवृत्तिरिति सूत्रस्यास्तित्वं

राजवृत्तिरिति। यद्यपि इदं सूत्रं क्वचित् उपलभ्यते क्वचिन्न क्वचित्तु इत-स्ततो वर्तते तथापि तस्य स्थाननिर्धारणं द्वितीयाध्यायारम्भे एव मन्तव्यम् प्राचीन-टीकायां तथोपलंभात्। तद्यथा—

तत्रेदं शास्त्रम् किमधिकृत्येत्याह राजवृत्तिरिति" इति॥

(—ज० २।१)

---

१. देवदानवयक्षाणां नृपपन्नगरक्षसाम्।
चतुस्तालप्रमाणेन कर्तव्याथ गतिर्बुधैः॥ २३॥
दिवौकसां तु सर्वेषां मध्यमा गतिरिष्यते।
तत्रापि चोर्ध्वगा ये तु तेषां देवैः समा गतिः॥ २४॥
यदा मनुष्या राजानस्तेषां देवगतिः कथम्।
अत्रोच्यते कथं नैषां गती राज्ञां भविष्यति॥ २५॥
इह प्रकृतयो दिव्या तथा च दिव्यमानुषी।
मानुषी चेति विज्ञेया नाट्यनृत्तक्रियां प्रति॥ २६॥
देवा हि प्रकृतिर्दिव्या राजानो दिव्यमानुषी।
या त्वन्या लोकविदिता मानुषी सा प्रकीर्तिता॥ २७॥
देवान्वाजास्तु राजानो वेदाध्यात्मप्रकीर्तिताः।
एवं देवानुकरणे दोषोह्यत्र न विद्यते॥ २८॥ (नाट्य शा० १३ अध्याय)

२हंसहस्त्यश्वगत्या च पुरुषाःस्युर्नराधिपाः॥ नीतिकल्पतरु॥ (पुरुषलक्षणशाखायां)

वैदिकसिद्धान्तसंरक्षिणी

राजवृत्तिरित्ययमधिकार इति च। (—नीतिनिर्णीतिः टि० २।१)

अत एवेदमधिकारसूत्रम्। तेन अग्रिमनिर्दिष्टानि समस्तकर्माणि राजाधिकारिकाणि इति सूच्यते। यत्रामात्यादयोऽध्यक्षप्रचारादिषु कर्तारो भवन्ति ते राजप्रतिनिधित्वेन मन्तव्याः।

राजा—स्वामिसम्पदा संपन्नो रञ्जनकर्ता। तदुक्तम् नीतिनिर्णीतिटिप्पण्याम्—

"आत्मसम्पद्गुणैराभिगामिकगुणैश्च जनरञ्जनाद्राजे"ति। तस्य वृत्तिः अनुवृत्तिः अधिकृतमिति यावत्।

जयमङ्गला

इदानीं निर्देशतः शास्त्रं प्रस्तूयते। तत्रेदं शास्त्रं किमधिकृत्येत्यत्राह—राजवृत्तिरिति। अधिक्रियते। सर्वमेतच्छास्त्रं राजवृत्तिः राजाऽनेन वर्तत इति कृत्वा। यतः पुरुषकारो ज्ञानकर्मलक्षणः, ज्ञानपूर्वकं कर्म, ज्ञानं शास्त्रपूर्वकमिति। अमात्या-

जयमङ्गलाक्रोडपत्रम्

द्वितीयं मूलाध्यायं व्याख्यातुमारभते इदानीमिति। निर्देशतः–विस्तरतः इति भावः। शास्त्रम्—प्रकरणाधिकरणसमूहात्मकम्। स्पष्टीकृतं चैतन्मूलव्याख्याने।

राजवृत्तिरिति। शास्त्रेण, तदन्तर्गतेन तन्त्रेण, षाड्गुण्येन, विनयाधिकारिकेण, विद्यासमुद्देशेन च पञ्चधा सङ्गतिं प्रदर्शयन्नाह अधिक्रियते इति। इदं हि सूत्रमधिकारसूत्रम्। यतः सर्वोऽप्यत्रत्यः शास्त्रार्थः पृथिव्या लाभपालनहेतुत्वात् राज्ञः जिज्ञासाविषयः इति राजवृत्तिरिति सूत्रेण ज्ञायते। उक्तासु पञ्चसु सङ्गतिषु आद्यां शास्त्रसङ्गतिं प्रदर्शयन्नाह राजेति।

ननु अर्थशास्त्रे तत्तदधिकरणेषु उक्तानि कानि चन कर्माणि तथाविधानि वर्तन्ते यानि राजेतरैः अमात्यैः अध्यक्षैर्वा अनुष्ठीयन्ते तानि कर्माणि राजवृत्तित्वेन कथं मन्तव्यानीति चेन्न।

यागादिषु यजमानाध्वर्युहोतृप्रभृतीनां अनेकेषां ऋत्विजां विभज्य उक्तानि स्वस्वकर्माणि तैस्तैरनुष्ठीयन्ते। तथापि यजमानातिरिक्ताः ऋत्विजः यागाधिकारित्वेन न प्रोच्यन्ते अपि तु यजमान एव। ऋत्विजस्तु यजमानेन वृताः आनतिमेव फलमाकांक्षन्ते नान्यत्। अतस्ते न यागाधिकारिणो भवन्ति। अधिकारी स एव यः फलभोक्ता भवति तदुक्तं मीमांसान्यायप्रकाशे—"फलस्वाम्यबोधको विधिः अधिकारविधिः" इति[१]। तथा च उक्तरीत्या फलस्वाम्यं यजमान एव अतोऽसावधिकारी

एवं सक्रमे प्रयोज्यवर्गे निरूपिते अधुना तत्राधिकारी निरूप्यते तत्राधिकारो नाम फलभोक्तृत्वसमानाधिकरणं कर्तृत्वम्। श्राद्धादौ पित्रादेः ऋत्विजां चाधिकारव्यावृत्त्यर्थं विशेष-

जयमङ्गला

दयोऽप्यनेन वर्तन्त इति चेन्न। तेषां राज्ञैव उह्यमानत्वात्। अथवा तन्त्रमधिकृत्य अयम् अधिकारः। कृत्स्नस्य शास्त्रस्य राजवृत्तित्वेऽपि विशेषग्रहणं स्वकुटुम्बविषयख्यापनार्थम्। यतोऽनपेक्षितपरमण्डला स्वतन्त्रवृत्तिः। अथवा एतद् विजिगीषोर्वृत्तिः,

जयमङ्गलाक्रोडपत्रम्

यागस्येति निर्णीयते। तथैव राजकर्मणः फलं पृथिव्याः लाभः पालनं चेति प्रागुक्तम्। तेन सञ्जायमानं फलं स्वर्गसुखवत् यशः लक्ष्मीः जनानुरागश्च, एतत्त्सर्वमपि यजमानेनेव राज्ञा अनुभूयते। न तु ऋत्विग्भिरिव अमात्यादिभिः। प्रजाया अपालने तु उक्तफलाभावोऽपि राज्ञ एव दुःखकृद्भवति नान्यस्य। अत एव शत्रुविजये व्यापृतो राजा विना सैन्यं न युध्यति, सैन्यं च महान्तं परिश्रममनुभवति तथापि शत्रुपराजये जेतृत्वं राज्ञ एव इति लोकेषु अभिधीयते। विपरीते विपरीतं च। अतः अमात्यैः स्वस्वकर्मण्यनुष्ठितेपि तेषामुक्तराज्यफलभोक्तृत्वाभावात् राज्ञ एव तद्भोक्तृत्वाच्च स एव अधिकारी इति। अतः सर्वमप्येतदर्थशास्त्रोक्तं कर्म राजाधिकारिकमिति सिद्धम्।

पूर्वसूचितसङ्गतिषु पञ्चसु द्वितीयां तन्त्रसङ्गतिं प्रदर्शयन्नाह अथवा तन्त्रमिति। इदं शास्त्रं तन्त्रमित्युच्यते[1] स्वकुटुम्बधारणात्। तत्र प्रमाणं "तत्रि कुटुम्बधारणे" इति पाणिनीयधातुपाठो बोध्यः। इदञ्च तन्त्रमध्यक्षप्रचारादारभ्य योगवृत्तपर्यन्तम् शास्त्रकृता निरूपितम्। तदाहुः—तच्च अध्यक्षप्रचारादि योगवृत्तान्तमिति (१ अ० जयमङ्गला० टी०।)

एतत्सङ्गतिविशेषाभिधानप्रयोजनमाह स्वकुटुम्बेति। अयं भावः-नीति सारे

णद्वयम्। न चैवं जातेष्टौ पितुः फलभोगाभावादधिकारानापत्तिः, सत्यप्यकरणे प्रत्यवाये करणस्य पूतत्वादिफलकत्वेन पापक्षयफलकत्वाभावादिति वाच्यम्। प्रवृत्तिप्रयोजकफलेच्छासमानाधिकरणकर्तृत्वस्यैव विवक्षितत्वात्। जातेष्टिश्राद्धादावपि फलस्यात्मनिष्ठत्वेऽपि तदिच्छाया यजमाननिष्ठत्वादधिकाराविघातः। ऋत्विजामपि यजमानस्य फलं भूयादितीच्छायास्वनिष्ठकर्तृत्वसमानाधिकरणत्वादधिकारापत्तिरतः प्रवृत्तीत्युक्तम्। दक्षिणाप्राप्तिर्मे भूयात् इतीच्छाया एव ऋत्विक्प्रवृत्तिजनकत्वेनोक्तविधेच्छायाः प्रवृत्तिप्रयोजकत्वासम्भवात्। अथं चाधिकारो विध्याक्षिप्तस्वेष्टसाधनत्वसमानाधिकरणस्वकृतिसाध्यत्वबललभ्यत्वाद्विधिप्रमाणकः। अयमेवाधिकारविधिरित्युच्यत इति भाट्टदीपिका ६ अ०पा० १ अ० १

१ इयं या तन्त्रसंज्ञा टीकाकृता उक्ता सा न केवलं प्राचीनपरम्पराप्राप्तैव आधुनिकैरपि तन्त्रत्वं इति संज्ञया व्यवह्रियते। Home Department

जयमङ्गलाक्रोडपत्रम्

प्रकृतिकर्मप्रकरणे स्वामिकर्माणि[1] यानि अभिहितानि तेषु एकोनसप्ततिसङ्ख्याकेषु स्वामिकर्मसु कानि चित्कर्माणि कुटुम्बभरणार्थानि वर्तन्ते। कानि चित्तु परमण्डल-सम्बन्धीनि आवापार्थानि। तत्र कुटुम्बभरणोद्देश्येन अध्यक्षप्रचारादारभ्य योग-वृत्तान्तं कर्म अभिहितम्। अतः कुटुम्बभरणे प्रवृत्तः राजा यदा अधिकृतो भवति तदा तन्त्राङ्गतया अध्यक्षप्रचारादियोगवृत्तान्तानि कर्माणि राजवृत्तित्वेन व्यपदिष्टानि भवन्ति।

एतेन कुटुम्बभरणे प्रवृत्तानां गृहस्थानां कृते अर्थशास्त्रोक्तमध्यक्षप्रचारादारभ्य योगवृत्तान्तं कर्म सर्वाङ्गोपसंहारेण प्रकृतिकर्मत्वाद् अत्यन्तमुपयुक्तं भवतीति ज्ञेयम्। उक्तासु पञ्चसु सङ्गतिषु तृतीयां षाड्गुण्येन सङ्गतिमाह–अथवेति। यदा हि राजा

---

१ अन्वीक्षणञ्च विद्यानां सद्वर्णाश्रमरक्षणम्।
ग्रहणं शस्त्रशास्त्राणां युद्धमार्गोपशिक्षणं।
व्यायामः शस्त्रविज्ञानं वर्मणां लक्षणानि च।
गजाश्वरथपृष्ठेषु यथावत्सम्प्रवर्तनम्।
नियुद्धकौशलं माया परिचित्तप्रवेदनम्।
धूर्तता शाठ्ययुक्तेषु सत्सु सद्वृत्तदर्शनम्।
मन्त्रोद्योगोऽनुमन्त्रत्वं तद्रक्षा तात्स्थ्यमेव च।
उपेक्षा साम दानं च भेदो दण्डश्च साधनम्।
प्रशास्तृसूतसेनानीमन्त्र्यमात्यपुरोधसाम्।
सम्यक् प्रचारविज्ञानं दुष्टानां चावरोपणम्।
गतागतपरिज्ञानं दूतसंप्रेषणानि च।
प्रकृतिव्यसनापोहः क्रुद्धप्रशमनानि च।
गुरूणामनुवृत्तिश्च पूज्यानामनुपूजनम्।
धर्मासनप्रतिष्ठानं राज्यकण्टकशोधनम्।
भृताभृतपरिज्ञानं कृताकृतपरीक्षणम्।
तुष्टातुष्टविचारश्च सर्वेषामनुजीविनाम्।
मध्योदासीनचरितज्ञानं तत्सिद्धिपालनम्।
प्रतिग्रहश्च मित्राणाममित्राणां च निग्रहः।
पुत्रदारादिगुप्तिश्च बन्धुवर्गपरिग्रहः।
खनिद्वीपवनादीनां स्ववृत्तीनां च प्रवर्तनम्।
असतां च परिक्षेपः सतां च परिगृहनम्।
अभूतानां च हिंसानाधर्म्याणां च वर्जनम्।
अकार्यप्रतिषेधश्च कार्याणां च प्रवर्तनम्।—

जयमङ्गलाक्रोडपत्रम्

अमात्यादिद्रव्यप्रकृतिसंपन्नः सन् परराज्यं विजिगीषते तदा स विजिगीषुरिति उच्यते[1]। तस्य इमानि सर्वाणि अर्थशास्त्रोक्तानि कर्माणि विजिगीषुकर्त्तव्यतयोपदिष्टानि इति विजिगीषुवृत्तिः इति भावः। ननु नृपो हि द्विविधो भवत्यवस्थाभेदेन। यथा स्वमण्डलकार्यं चिन्तयन् यदा वर्तते तदा स राजा इत्यभिधीयते। परमण्डल-चिन्तावस्थायां तु स एव विजिगीषुरित्युच्यते।[2]

अत एव राज्ञः विजिगीषोश्च न्यूनाधिकसंख्यया गुणाः पृथक्-पृथक् उक्ताः नीतिसारे। तद्यथा—

क्रोधलोभभयद्रोहस्तम्भचापलवर्जितः॥

प्रदानं च प्रदेयानामदेयानामसङ्ग्रहः।
अदण्डनमदण्डयानां दण्ड्यानां चापि दण्डनम्।
अग्राह्याग्रहणं चैव ग्राह्याणां ग्रहणं तथा।
अर्थयुक्तस्य करणमनर्थस्य च वर्जनम्।
न्यायतश्च करादानं स्वयं च प्रतिमोक्षणम्।
समर्थनं प्रधानानां निरस्यानां निराकृतिः।
वैषम्याणां प्रशमनं भृत्यानां चाविरोधनम्।
अविज्ञातस्य विज्ञानं विज्ञातस्य च निश्चयः।
आरम्भः कर्मणां शश्वदारब्धस्यान्तदर्शनम्।
अलब्धलिप्सा न्यायेन लब्धस्य च विवर्धनम्।
परिवृद्धस्य विधिवत् पात्रे सम्प्रतिपादनम्।
अधर्मप्रतिषेधश्च न्यायमार्गेण वर्तनम्।
उपकार्योपकारित्वमिति वृत्तं महीपतेः।

१ तदुक्तं नीतिसारे सर्ग ८ प्र० १२ पृ० १७१ श्लो० ६

सम्पन्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः।
जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः॥६॥

२ तदुक्तम्। नीतिसारे तद् व्याख्यायां जयमंगलायाम् (१७० पृ० अ० ८ श्लो० २)

रोचते सर्वभूतेभ्यः शशीवाऽखण्डमण्डलः।
सम्पूर्णमण्डलस्तस्माद् विजिगीषुः सदा भवेत्।

सम्पूर्णमण्डलस्तस्माद्विजिगीषुरिति निगमनम्। अत्र राजेति वक्तव्ये विजिगीषुग्रहणं यदा प्रतिष्ठितराज्यो राजा परराज्यं विजीगीषते, तदा विजिगीषुरिति विशेषसंज्ञां लभत इति दर्शनार्थम्। तेनेतः प्रभृति-विजिगीषुरधिक्रियते॥२॥

जयमङ्गला

यतो वक्ष्यति मण्डलयोनौ—राजा आत्मद्रव्यप्रकृतिसम्पन्नो नयस्याधिष्ठानं विजिगीषुः" (अधि० ६ अध्या० २) इति। अथवा इदमेवाधिकरणं प्रत्यधिक्रियते, साक्षाद् राज्ञो व्यापाराभिधानाद् विनयाधिकारिकस्य। अथवा विद्यासमुद्देशमेव

जयमङ्गलाक्रोडपत्रम्

परोपतापपैशुन्यमात्सर्येर्ष्यानृतातिगः। इत्यादिना[1]। नी० स० ४

तथा च विद्याविभागादिकर्माणि स्वमण्डलसंबन्धित्वान् नृपेण राजावस्थायां चिन्तनीयानि। विजिगीषावस्थायां तु परमण्डलसम्बधीनि। इत्युक्तविद्याविभागादिकर्म विजिगीषुवृत्तित्वेन कथमत्रोऽच्यते। इति चेन्न।

अर्थशास्त्रानुसारेण पृथिव्याः लाभे पालने च प्रवृत्ततादशायां राजा परमण्डलं स्वायत्तीकर्तुं तदुपायत्वेन स्वमण्डले त्रिवर्गसमृद्धि सङ्घटनं च कर्तुं यदा वांछति तदा स्वमण्डलचिन्तायां स्थितोऽपि राजा परमण्डलायत्तीकरणस्य उद्देश्यत्वात् विजिगीषुपदेन अत्रापि टीकाकृता राजेति संज्ञया व्यवहृतः इति बोध्यम्।

उक्तासु पञ्चसु सङ्गतिषु चतुर्थीं विनयाधिकारिकेण सङ्गतिमाह अथवेदमिति। व्यापाराभिधानात् इति। स्वमण्डलपरमण्डलयोः वशीकाराय विनयः अपेक्ष्यते। तदुक्तं कामनन्दकीयव्याख्यायां जयमङ्गलायाम्[2] द्रष्टव्यम्।

अतः विनयो राज्ञो वृत्तिः इति कृत्वा "राजवृत्तिः" इति सूत्रेण विनयाधिकारिकेण सह सङ्गतिर्बोध्या।

पञ्चसु सङ्गतिषु उक्तासु पञ्चमीं सङ्गतिमाह—विद्यासमुद्देशमिति। समुद्देशं विद्याविभागमिति यावत्। लोके हि तास्ताः विद्यास्तैस्तैर्वर्णैः आश्रमिभिश्च अधीयन्ते। यथा गृहिभिः त्रयी, सन्यासिभिः आन्वीक्षिकी, वैश्यैःशूद्रैश्च वार्ता इति। परन्तु राजवृत्तिः इत्युक्त्या राज्ञा चतस्रोऽपि विद्याः अध्येतव्याः इति विशेषनिर्देशात् राजवृत्तिः इत्यनेन सूत्रेण विद्याविभागस्य सङ्गतिर्बोध्या।

---

१. तदुक्तं नीतिसारीयजयमंगलायाम्।

एते गुणा राज्ञो विजीगीषावस्थायां प्राधान्येन व्याप्रियन्ते। तेन प्रागुक्तायामपि स्वमिसंपदि न पुनरुक्तता दोषः। एवं सति केचित्तत्रानुक्ता अपि इहोक्ताः चित्तज्ञताप्रश्रयभक्तिज्ञत्वादयः। तत्रोक्ता अप्यन्ये कार्यसम्भववशादिह नोक्ताः क्रोधलोभद्रोहवर्जनादयः ॥११॥ इति नी० स० ८ प्र० १२ श्लो० १६

२ आत्मानं प्रथमं राजा विनयेनोपपादयेत्।
ततोमात्यांस्ततो भृत्यांस्ततः पुत्रांस्ततः प्रजाः॥

टी. इदमुक्तं भवति स्वयं विनीतोऽमात्यदण्डपुत्रप्रकृतीरान्तरीः प्रजाश्च बाह्या विनीयानुरज्य सरंक्ष्य चाधिकां श्रियमवाप्नोति १ सर्गं २६ श्लो०

आन्वीक्षिकीस्थापना

[विद्याविभागः]

जयमङ्गला

प्रकरणं प्रत्यधिक्रियते प्रसिद्धिनिरासार्थम्। यतः सन्यासिनाम् आन्विक्षिकी, धर्मप्रधानानां गृहस्थादीनां त्रयी विशां शूद्राणां च वार्ता, राज्ञां दण्डनीतिरिति। अत आह-राजवृत्तिरान्वीक्षिकीत्यादि। तेन विनयाधिकारे प्रथमम् अयं विनयो यद् विद्योपासनमिति।[1] शास्त्रसमुद्देशानन्तरं विद्यासमुद्देश उच्यत इति प्रकरणक्रमः। ये तु उद्देशापेक्षया सम्बन्धम् आहुः। यथोद्देशस्तथा निर्देश इति, ते स एवोद्देशः कथमिति प्रष्टव्याः। एताः सर्वा राजवृतिः। ताश्चेतरेतरापेक्षाः न पुनस्तदन्यापेक्षाः।

जयमङ्गलाक्रोडपत्रम्

सन्न्यासिनाम् इति। अयं भावः। इहामुत्रार्थफलभोगविरागादि यथा वेदान्तशास्त्राध्ययनाधिकारितावच्छेदकम् तथा एतदेव आन्वीक्षिक्यध्ययनाधिकारितावच्छेदकम् इति न्यायवार्तिकतात्पर्यपरिशुद्धौ श्रीउदयनाचार्यैः उक्तमस्ति। तद् तत् अभिप्रेत्य सन्यासिनाम् आन्वीक्षिकी इत्यत्र उक्तम्।

विद्योपासनम्

अत्र इदमनुसन्धेयम्। संसारे लोके ज्ञानाभावेन रागतः सर्वेऽपि कुपथ्यं कुर्वाणाः रोगिणो भवन्ति। तेषां चिकित्सा ये विद्यावन्तः तैरेव कर्तुं शक्यते। यदि चिकित्सकाः न भवेयुः तर्हि महान् अनर्थः आरोग्यविषये स्यात्। एवमेव त्रिवर्गसमृद्धिविषयेऽपि यदि तथाविधाः विद्वांसः न स्युः तर्हि महान् अनर्थः स्यात् इति किमु वक्तव्यम्। अतः विद्यानामावश्यकता अनुभवसिद्धा। किञ्च तत्तच्छास्त्रैः गुणदोषविवेचनपूर्वकं किं करणीयं, किं परित्याज्यमिति सम्यक् विधीयते। तज्ज्ञानानन्तरं दोषानवबुद्ध्य अनिष्टकार्यात् निवृत्तिः तथा गुणबुद्ध्या गुणवति प्रवृत्तिः अवश्यंभाविनी इति इदमेव विनयस्थापनम्। अतः अत्र विद्योपासनमेव विनयः इत्युक्तम्। तत्र मूलं नीतिसारवाक्यमपि विज्ञेयम्[2]। तदनेन

वैदिकसिद्धान्तसंरक्षिणी

विद्याप्रतिष्ठामन्तरा लोकस्थितिर्नैव भवेदित्यादि टीकाव्याख्याने व्यक्तम्। अत आदौ विद्याविभागं तत्प्रतिष्ठापनार्थमाह—

---

१. अशुद्धम्
पासनमिति, शा।

२. नयविक्रमसम्पन्नः सूत्थानश्चिन्तयेच्छ्रियम्।
नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः ॥ २१ ॥
विनयो हीन्द्रियजयस्तद्युक्तः शास्त्रमृच्छति।
तन्निष्ठस्य हि शास्त्रार्थाः प्रसीदन्ति ततः श्रियः ॥२२॥ १ सर्ग ॥

आन्वीक्षिकी[1] त्रयी वार्ता[2] दण्डनीति[3]श्चेति विद्याः[4]॥

वैदिकसिद्धान्तसंरक्षिणी

आन्वीक्षिकी इति। हेतुविद्येत्यर्थः। नीतिसारे आन्वीक्षिकीशब्दार्थस्य तथा व्याख्यानात्। तथाहि—

आन्वीक्षिक्यात्मविद्या स्यादीक्षणात् सुखदुःखयोः।
ईक्षमाणस्तया तत्वं हर्षशोकौ व्युदस्यति॥
आत्मविद्या भावस्वभावविद्या हेतुविद्येति यावत् इति॥ (नीति० २)

विद्यास्वरूपम्

तथाच आन्वीक्षिकी यथावद्यथार्थज्ञानभाव्यकभावनाकरणभूता सन्देहनिरसनसमर्था प्रमाणादिविचारविद्या, सा न्यायवैशेषिकलोकायतसमूहात्मिका इत्यर्थः। त्रयी पुरुषागोचरादृष्टज्ञानभाव्यकभावनाकरणभूता फलसाधनसमर्था लोकविश्वासाधायिका विद्या वेदपुराणाङ्ग-मीमांसा-धर्मशास्त्रसमष्टिरूपा। वार्ता—धर्माविरोधिविद्याभूम्याद्यर्थज्ञानभाव्यकभावनाकरणभूता जीवनहेतुः पाशुपाल्यकृषिवणिज्यासमुदायात्मिका। दण्डनीतिः—समस्तविद्याप्रवचनाचरणप्रबोधन-प्रचारणहेतुः पृथिव्या लाभपालनवर्धनसत्पात्रप्रतिपत्तिज्ञानभाव्यिका लोकानुरागाधायिका। चकारात् इमा धर्मार्थज्ञानविद्याः परस्परसापेक्षत्वात् चतस्रोऽपि राज्ञाऽध्येतव्या इति ज्ञापयति। तथाच प्रकृते 'च'शब्दो नानुक्तसमुच्चयार्थकः[5]। एतासां तत्तज्ज्ञानभाव्यकत्वं

नी०टी० १. प्रत्यक्षपरोक्षाभ्यामीक्षितस्याऽनु पश्चादीक्षणमन्वीक्षा। तच्चानुमानं तत्प्रयोजनं यस्याः सा आन्वीक्षिकी न्यायविद्या।

,, २. वृत्तिरेव वार्ता जगद्वृत्तिहेतुत्वात् कृष्यादिका।

,, ३. दण्डो वधादिकस्तस्य नीतिः प्रणयनं दण्डनीतिः।

,, ४. विद्यते चतुर्विधः पुरुषार्थो········यकाभिस्ता विद्या राजविद्याः। राजवृत्तिः। राजविद्या पाठः।

५. उक्तसमुच्चयार्थकत्वं चशब्दस्य भवतीति मञ्जूषायां व्यक्तम् (मञ्जूषायां निपातार्थ निरूपणे पृ० ५८)

यद्वा समुच्चितश्चार्थः। स्वभावतश्चाद्युपस्थाप्यस्य असत्वभूतत्वम्। तदुक्तम्।
समुच्चिताभिधाने च व्यतिरेको न विद्यते। इति।
कु० टी० व्यतिरेकः—पृथगर्थोपस्थापकता। इति।

वैदिकसिद्धान्तसंरक्षिणी

"ताभिर्धर्मार्थौ यद्विद्यात् तद्विद्यानां विद्यात्वमिति" वक्ष्यमाणमूलस्थवचनात् स्फुटीभवति। तस्य प्रयोजनं, इतरकर्मविद्याव्यावृत्तिः चतसृभ्यो विद्याभ्य इतरत्र कर्मविद्यायां ज्ञानविद्यात्वप्रतिषेधस्य जयमङ्गलायामुक्तत्वान् नीतिसारे तथा अभिधानाच्च। तद्यथा—

"विद्याभिराभिर्निपुणं चतुर्वर्गमुदारधीः।
विद्यात्तदासां विद्यात्वं विद् ज्ञाने निगद्यते[१] इति ॥१७॥

विद्यानां क्रमाभिधाने तात्पर्यम्।

ननु आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरिति क्रमेणाभिधानं इच्छामूलं किञ्चिदभिप्रायकं वेति सन्देहे किञ्चिदभिप्रायकमिति निर्णीयते। विद्याविचारहेतुत्वात् धर्मस्य प्रधानत्वात् जीवनहेतुत्वाद्विघ्ननिवारणार्थत्वाच्चेति नीतिसारव्याख्यायां टीकाकृदुक्तं अत्रानुसन्धेयम्[२]।

तथाचाभ्यर्हितं पूर्वमिति न्यायेय विचारस्य सर्वापेक्षयाऽभ्यर्हितत्वात् आदौ आन्वीक्षिकी। ततो जीवनयात्रार्थं धर्मस्याभ्यर्हितत्वात् त्रयी। ततो जीवनस्य कर्तव्यतया अभ्यर्हितत्वाद्वार्ता। विघ्नप्रादुर्भावमात्स्यन्याययोः परिहाराय दण्डस्याभ्यर्हितत्वाद्दण्डनीतिरिति भावः। विभाज्यतावच्छेदकधर्ममाह विद्या इति। एतत्पदनिर्वचनं अग्रे स्वयमेव वक्ष्यते मूलकर्त्रा। विभाजकधर्माः स्वव्याप्यत्वेसति स्वव्याप्याव्याप्या अवश्यं भवन्ति। अत्र व्याप्यत्वं सर्वत्र न्यूनवृत्तित्वं ग्राह्यम्। तेन नासम्भवः।

जयमङ्गलाक्रोडपत्रम्

चतसृसु विद्यासु नीतित्वम्।

(मूले) ननु अर्थशास्त्रेषु समादृतानां विद्यानां राजवृत्तित्ववन् नीत्यन्तर्गतत्वान् नीतित्वमपि आवश्यकम्। तत् अन्तकथम् ? इति चेत्। अभिधीयते।

नीतित्वं हि प्रत्यक्षादिप्रमाणत्रयेण फलसाधनत्वं यत्र निर्णीयते तत्र संभवतीति-नीतिलक्षणविचारे वैदिकसिद्धान्तसंरक्षिण्यामभिहितम्। तदनुसारेण तिसृषु आन्वीक्षिक्यादिविद्यासु प्रमाणत्रयसमन्वयेन फलसाधनत्वे साधिते नीतित्वं सिद्ध भवति। तथाहि—

---

१ "विदज्ञान इति लाभाद्यर्थरुधातुव्यवच्छेदात् आन्वीक्षिक्याद्या ज्ञानविद्या इति दर्शयति। एवं च ज्ञानविद्याधिकारात् सत्योऽप्यन्याः कर्मविद्या व्यापारव्यायामप्रयोजना नोक्ताः"। इति।

२. "तत्र सर्वविद्याविचारहेतुत्वात्प्रधानतमा आन्वीक्षिकी। ततो धर्मस्य प्रधानत्वात् तद्व्यवस्थापनार्थं त्रयी। व्यवस्थापितधर्मस्य लोकस्य जीवनहेतुर्वार्ता। तासु प्रवर्तमानासु तद्विघ्ननिवारणार्थं दण्डनीतिः"। इति। (नी० २-२)

जयमङ्गलाक्रोडपत्रम्

तत्रादौ आन्वीक्षिक्यां फलसाधनत्वं शब्दप्रमाणेन प्रमितम् कथम् अस्तीति विविच्यते। योगीश्वरेण हि त्रय्यन्तर्गताः विद्याः धर्महेतवः इति निर्णीतम्। तदुक्तम्—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाःस्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ इति।

सामान्यतया पुराणन्यायादित्रय्यन्तर्गतविद्यानां धर्महेतुत्वमात्रकथनेन विना आन्वीक्षिकीं तद्धेतुत्वं विवेक्तुन्न शक्यते। तदुक्तं-"बलाबले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति" इति। (अ० १ अर्थ०) तदिदं आन्वीक्षिक्या विचार्यमाणं हेतुत्वमपि शब्दप्रमाणाधीनमेव। तद्यथा—

हेतुत्वं कार्यनिरूपितकारणत्वं तस्य परिष्कृतं स्वरूपम् अनन्यथासिद्धत्वे सति नियतपूर्ववृत्तित्वम्। इदमेव लाघवान्यथानुपपत्त्यन्वयव्यतिरेकसहचारादिसाहचर्येण आन्वीक्षिक्या निर्णीयते। तत्रापि अनन्यथासिद्धत्वं शब्दप्रमाणं विना निर्णेतुं न शक्यते, "यत्र यत्र प्रामाणिकानाम् अकारणत्वव्यवहारः तत्तद्भिन्नत्वमनन्यथासिद्धत्वम्" इति अभियुक्तैः तस्य परिष्करणात्। एवं च प्रामाणिकानां अकारणत्वव्यवहारः अन्यथासिद्धत्वे नियामकः इत्यायातम्। यदि च प्रामाणिकत्वविषय एव केनचित् सन्देहः उपस्थाप्येत तर्हि कारणत्वविर्णय एव दुःशकः स्यात्। अतः यत्र सन्देहः प्रामाणिकत्वविषये नास्ति तस्य प्रामाणिकस्य निर्णयः आदौ कर्तव्यो भवति। स च यत्र पुरुषसम्बन्धो भवति तत्र भ्रमप्रमादादिदोषसंभवात् इदमित्थमिदमेवेति निर्णयः कर्तव्यः केनन्। तस्मात् पुरुषसम्बन्धरहिता अनादितः प्राप्ता फलोपधायिका या परंपरा तस्या एव प्रामाणिकत्वं स्वीकृत्य तदनुबन्धितया हेतुत्वम् आन्वीक्षिक्या निर्णीयते। तेनैव च पूर्वपरंपरायां सफलतां दृष्ट्वा भविष्यत्कालेऽपि अनेन कारणेन अमुकं फलम् इतरसामग्रीसाचिव्येन अवश्यं सेत्स्यति इति दार्ढ्येन वक्तुं शक्यते।

सोऽयम् अनादिपरम्पराप्राप्तः प्रामाणिकव्यवहारः पूर्वपुरुषमनपेक्ष्य पुरुषसम्बन्धाभाववान् कर्णोपकर्णिकया वेदतदनुयायिशब्दप्रमाणमाधारीकृत्य प्राप्तः इति तदनुगामामिन्या आन्वीक्षिक्या विचार्यमाणस्य हेतुत्वस्य शब्दप्रमाणप्रमितत्वात, तदुपजीव्यभूतायां तस्यां वर्तमानं फलसाधनत्वं शब्दप्रमाणेन प्रमितमिति सिद्धम्।

अथ प्रत्यक्षानुमानाभ्यामपि तत् साधयितव्यमस्ति। तदपि लोकसिद्धमेव। यथा—आयुर्वेदादौ परस्परविरुद्धतया उपलभ्यमानानामनेकेषां वचनानामान्वीक्षिक्या समन्वयं कृत्वा आरोग्यसाधनत्वमायुर्वेदादिशास्त्रतात्पर्यविषयीभूतेष्वर्थेषु निर्णीय वैद्यैः कृतायां चिकित्सायां फलपर्यवसायित्वम् अनेकपरम्परायां दृष्टं दृश्यते च।

एवं च अन्वयव्यतिरेकाभ्यां अपि फलपर्यवसायिसाधनत्वं सर्वशास्त्रविचारोपजीव्यभूतायां आन्वीक्षिक्यां प्रमितमस्तीति सिद्धमेव। तस्मात् अस्यां विद्यायां प्रमाणत्रयमाधारीकृत्य फलसाधनत्वस्य साधनात् नीतित्वं निर्विवादमेव।

जयमङ्गलाक्रोडपत्रम्

एवमेव त्रय्यां फलसाधनत्वं "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यम्आप्त-प्रामाण्यात्" इति गौतमेन महर्षिणा न्यायसूत्रे निर्दिष्टम्। तेन त्रयीनिष्ठं फल-साधनत्वं शब्दप्रमाणप्रमितमस्ति। अथ अन्वयव्यतिरेकाभ्यां प्रत्यक्षेण च फलसाधनत्वं त्रय्यां कथं निर्णीतमिति चेत् तदपि सिद्धमेव तथाहि-समस्तेषु आयुर्वेदादिद्वारकेषु वैदिकविधिव अदृष्टसाधनेष्वपि विधिषु दृष्टफलपर्यवसायित्वम् कथमिति "शांति का अग्रदूत" इत्यस्मिन् ग्रन्थे सूचितमस्ति। तत एव द्रष्टव्यम्[1]।

तस्मात् त्रय्यामपि फलसाधनत्वस्य प्रमाणत्रयेण सिद्धत्वात् नीतित्वं दुर्निवारम्।

वार्तायां हि कृषिकर्म, पशुपालनकर्म, वणिज्याऽऽदि अमुकनक्षत्रे, अमुकयोगे, अमुककरणे, अमुकतिथौ कृतं चेत् सफलं भवति। इत्यादि विहितमस्ति। तदुक्तम्—सीताध्यक्षप्रकरणे—"सूर्यस्य प्रकृतिवैकृताच्च बीजसिद्धिः, बृहस्पतेः स्थानगमनगर्भा-धानेभ्यः सस्यानां स्तंम्बकारिता। शुक्राद्वृष्टिरिति" इति। तैस्तैः विधिभिः तेषु तेषु राशिषु संस्थितबृहस्पतिसूर्यशुक्रगमनादिभिः सस्यफलोपधायकत्वं यदुच्यते कौटिल्येन, वेदमन्तरा तत्केन प्रमाणेन ज्ञातम्? तत्तन्मूलभूतस्य अपौरुषेयस्य वेदस्य अभावे इदंप्रथमतया कथम् वा अवगतं स्यात्? अदृष्टद्वारभूते फलसाधनत्वे इतर-प्रमाणानाम् अनधिकारात् तस्मात्। वार्ताविद्यायां वर्तमानं फलसाधनत्वं शब्दप्रमाणेन

---

१ तद्यथा—इस पर कोई ऐसा शंका सहज ही उठा सकता है कि "अदृष्ट से प्रत्यक्ष का मेल कैसे वैठ सकेगा? इसका उत्तर यह है कि ऊपर ऊपर देखने में जो अदृष्ट दृष्टगोचर नहीं हो पाते उसके बारे में 'वेदान्तसूत्रमुक्तावली' के मर्म पर ध्यान देना चाहिए। उसमें कहा है कि अदृष्ट सर्वथा अदृश्य नहीं होता, कुछ अवस्था में वह दृश्य कोटि में भी आता ही है। इसका स्पष्ट तात्पर्य यों समझ सकते हैं—अग्निहोत्र में शुद्धरूप से प्रदत्त आहुति जलरूप धारणकर सूर्यमण्डल में प्रवेश करती है। इसके ही सहारे पंचभूतों की सूक्ष्म मात्राएँ वृष्टिरूप से पृथ्वी पर और पृथ्वी से अन्न में प्रविष्ट होती हैं। इस प्रकार अन्न द्वारा पुरुष के शरीर में पहुँचकर वही मात्राएँ रस, रक्त, धातुरूप में परिणत हो जाती हैं और वहाँ से स्त्री के उदर में पहुँचकर वही आहुति पिण्ड-गर्भरूप धारण कर लेती है।

इसे यों समझें कि नवनिर्मित होनेवाले शरीर एवं मन में यदि वल, पुष्टि, स्फूर्ति, संस्कार, धारणा मेधा, तुष्टि आदि गुणों का संग्रह बढाना अभीष्ट हो तो संस्कारों द्वारा आहुति की शुद्धि संरक्षित रखनी ही होगी। इस प्रकार यह वात स्पष्ट हो गयी कि जल के रूप में भिन्नता न रखने के कारण ही अदृष्ट प्रत्यक्ष रूप में आ सका। मतलव यह कि इससे नीति के लक्षण में कोई विघात नहीं आता। यही बात भगवान् कृष्ण ने गीता में कही है—"तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्।"

जयमङ्गलाक्रोडपत्रम्

प्रमितम् इति निश्चप्रचम्। वेदप्रमाणेन उक्तसाध्यसाधनभावं वार्ताविद्यया ज्ञातवतां सस्यफलोत्पत्तिः वार्ताशास्त्रोक्तविधानानुसारेण तत्तत्समये कृते आवापे भवति अन्यथा नेति प्रत्यक्षसिद्धत्वात् शब्दप्रमाणेन प्रमितं वर्तानिष्ठं फलसाधनत्वम् अन्वय-व्यतिरेकाभ्यामपि सुग्रहमेव। तस्मात् नीतित्वं वार्तायामपि आन्वीक्षिकी-त्रयी-विद्ययोरिव निर्विवादम्।

राजनीतिशास्त्रविद्यायामपि नीतिलक्षणलक्षितत्वमस्तीति तु प्राङ्निर्दिष्टम्। पुनरत्र प्रकारान्तरेणापि नीतिलक्षणघटकेषु प्रमाणत्रयेषु उक्तशब्दप्रमाणप्रमितत्वं विमृश्यते। तथाहि—राजवृत्तिः अर्जन-वर्धन-पालन-सत्पात्रप्रतिपत्तिरूपा भारतीय-राजनीतिशास्त्रपरा तदा भवति यदा सा न्याय्या भवति। अत्रत्यो न्यायपदार्थश्च 'मन्वाद्युपदिष्टः परिपालनोपायः', इतिस्वरूपतया नीतिसारव्याख्यायां जयमङ्गलायां "न्यायेनार्जनमर्थस्ये" त्यस्य व्याख्याने व्याख्यातः। तत्र मन्वाद्युपदिष्टत्वाभावे परिपालनोपायत्वम् कस्यां राजवृत्तौ अस्तीति असर्वज्ञदुर्ज्ञेयम् संभवति। स्वबुद्धया-कदाचित् निर्णीतेपि परिपालनोपायत्वे अनौचित्यमपि स्यात् तन्मा भवतु इत्येतदर्थम् मन्वाद्युपदिष्ट एव परिपालनोपायः अर्थार्जनाय राजवृत्तित्वेन सङ्गृहीतः। अतः राजनीतिशास्त्रे वर्तमानं उक्तफलसाधनत्वं शब्दप्रमाणप्रमितम्।

शब्दप्रमाणप्रमितेऽपि अर्थे पतिमरणानन्तरं सहगमनादौ, राजनीतिशास्त्रेण प्रतिज्ञातस्य परिपालनस्य अभावे तथाविधा सहगमनादिवृत्तिः अनेन शास्त्रेण न अनुमन्यते। अतः अन्वयव्यतिरेकाभ्यां सद यत्र शब्दप्रमाणप्रमितम् परिपालनोपायवत्वं निर्णेतुं शक्यते, तत्त स परिपालनोपायः मन्वाद्युपदिष्टः, प्रत्यक्षानुमानाभ्यां निर्णीतश्च कीदृश इत्येतद् विद्यया निरूप्यते। तस्माद् अनेनापि प्रकारेण राजविद्यानिष्ठं फल-साधनत्वंन्नीतिलक्षणघटकेन प्रमाणत्रयेण समन्वितत्वात् नीतिरूपमेव। इति चतसृणां विद्यानां नीतित्वं पुष्कलमेव।

टीकायां प्रकरणक्रमः—इति। सङ्गतिरित्यर्थः। तत्त्वं च अनन्तराभिधानप्रयो-जकजिज्ञासाजनकज्ञानविषयसम्बन्धत्वम्। सा च प्रकृते शास्त्रसमुद्देशविद्यासमुद्देशयोः हेतु-हेतुमद्भावो बोध्यः।

सर्वा इति। सर्वाः चतस्रो विद्याः। एताः सर्वा अपि राज्ञा अनुष्ठेयत्वात् राजवृत्तिरिति व्यपदिष्टा भवन्ति। सा कथमनुष्ठेया अत आह ताश्चेति।

इतरेतरापेक्षाइति। आन्वीक्षिकीविद्यायाः फलम आत्मविज्ञानम् कार्यकारण-भावविज्ञानम्। कारणत्वनिर्णयोऽपि अपौरुषेयवेदादिनिर्णयम् विना स्थिरतया कर्तुं न शक्यते इत्यपि प्राग् आवेदितमेव। अतः आन्वीक्षिक्याः त्रयीसापेक्षत्वं भवति। तथैव त्रय्यन्तर्गतपदार्थानां बलाबले त्रयीतात्पर्यविषयत्वं च कुत्रास्तीति विना सद्धे-तुत्वनिर्णयं परिज्ञातुं न शक्यम्। अतः त्रयीं प्रति आन्वीक्षिक्याः अपि सापेक्षत्वमस्ति। एवमेव अपरयोः विद्ययोरपि प्रागुक्तं सापेक्षत्वं स्मर्त्तव्यम्।

जयमङ्गला

अत एव ज्ञानविद्याधिकाराद् अन्या विद्याः सत्योऽप्यस्मिन् प्रकरणे नोक्ताः। तेन चतस्र

जयमङ्गलाक्रोडपत्रम्

ज्ञानविद्याधिकारात् इति। टीकाकृता विनयो विद्योपासनं इत्युपरि निर्दिष्टमस्ति, तेन ज्ञानं तत्तद्विद्याध्ययनभावनायाः भाव्यमस्तीति स्फुटीकृतम्। तथा च चतसृणां विद्यानामवस्थाभेदेन ज्ञानभाव्यकत्वम् भवति इति सिद्धम्।

ननु चतुर्विद्यातिरिक्तविद्यानां भाव्यं किं ज्ञानं नास्ति ? यदि नास्ति इत्युच्यते तर्हि विना ज्ञानं तत्तद्विद्योक्तानि कर्माणि कथमनुष्ठेयानि भवेयुः ?

किंच यद्येतासां चतसृणां विद्यानां भाव्यं केवलं ज्ञानमेव भवेत् तर्हि अनुष्ठानं विना तदधीतं ज्ञानं वा व्यर्थमेवापद्येत। तत्रापि नीतिस्तु न अनुष्ठिता अकिंचित्करा।[1] इतिचेद् अत्र उच्यते—

एतासां विद्यानां भाव्यं ज्ञानमस्तीति प्राङ्निर्दिष्टं तस्य नेदं तात्पर्यं यत् ज्ञानमात्रेणैव विश्रामः। अपितु तत्तद्विद्याप्रतिपादितकर्मणोऽपि आवश्यकता फलत्वेन अस्त्येव तथैव व्यायामादिविद्यानामपि भाव्यं यथा कर्म तथा ज्ञानमपि अस्त्येव। तथासति एतासां ज्ञानभाव्यकत्वं कीदृशमिति स्फुटी क्रियते।

एतासां विद्यानां राजवृत्त्यन्तर्गतानामध्ययनं राज्ञा षोडशवर्षात् प्राक् कार्यमिति सिद्धान्तः अत्र कृतः। तदुक्तम् "ब्रह्मचर्यञ्चाषोडशाद् वर्षादिति" तस्मिन्नध्ययनसमये अध्ययनं तथा अपेक्ष्यते यत्र कामसम्बन्धस्य उद्बोधो न भवेत्। कर्मविद्याः या वर्तन्ते तासु कामसम्बन्धस्य उद्बोधसम्भवात् षोडषवर्षात् प्रागवस्थायां कामसंबद्धकर्मजनकं विद्याध्ययनं निषिद्धम्। अर्थात् अर्थशास्त्रं आन्वीक्षिकीत्रयी वार्तानां अध्ययनसमये ब्रह्मचारिणः पुरतः धर्मार्थज्ञानमेव भाव्यत्वेन निर्देष्टव्यं भवति[2] इति निर्दिशति।

तदेवाह कालिदासोपि—

'शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्। इति रघुवं १ सर्ग

---

१. तदुक्तम् जितेन्द्रियस्य नृपतेर्नीतिमार्गानुसारिणः।
भवन्ति ज्वलिता लक्ष्म्यः कीतर्यश्च नभःस्पृशः॥ इति श्लोक व्याख्यायां—नीतिश्चाप्रयुज्यमाना न फलदेति मार्गग्रहणम्। नीतिप्रयोगानुसारिण इत्यर्थः। (नी० स० १)

२. धर्मार्थौ यद्विद्यादिति।
'ब्रह्मचर्यमेव त्वा विद्याग्रहणात्॥६। (कामसूत्र)
तद् व्याख्यायां—यावद् विद्या न गृह्यते तावत्कामन्न सेवेत, अन्यथा ह्यधर्मः, तद्ग्रहणविघातः, विद्यार्थलाभाभावश्च।'' इत्यर्थचिन्तकाः'' (१ अ० २ अध्याये ६ सूत्र) इतिग्रन्थेन ब्रह्मचर्यावस्थायां अधीयमानस्यार्थशास्त्रस्य भाव्यं धर्मार्थज्ञानमेवास्तीति अभिप्रायः अर्थशास्त्रस्य प्रकटीकृतः।

जयमङ्गला

एव त्रिभिरध्यायैः समुद्दिश्यन्ते। तत्र सर्वविद्याप्रचारहेतुत्वात्[2] पूर्वमान्वीक्षिकी। वर्णाश्रमाणां धर्मकर्मव्यवस्थापनाद् इतराभ्यां प्राक् त्रयी। प्रजाजीवनहेतुत्वाद् दण्ड-

जयमङ्गलाक्रोडपत्रम्

विद्यानां निन्दास्तुतिबोधकवाक्यसमन्वयः

ननु आन्वीक्षिक्यादिविद्यानां क्वचिन् निन्दापि श्रूयते। तदुक्तम्—'हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्' इत्यादि। अत्र तु विद्याध्ययनं विधीयते। एवं सति कथमनयोः समन्वयः? इति चेत्, महामीमांसकैः; श्री भास्कराचार्यैः स्वलेखे नित्याषोडशिकार्णवसेतुबन्धव्याख्याने एतद्विषयकः समन्वयः निर्दिष्टः। स एवात्र चिन्त्यः। तत्रावस्थावयोभेदेन प्रवृत्तिनिवृत्त्यर्थं विद्याध्ययननिन्दास्तुती बोध्ये[1]। इत्युक्तम्।

विचारहेतुत्वादिति—अत्रेदं बोध्यम्। नीतिसारव्याख्यायां सर्वविद्याविचार-हेतुत्वात् प्रधानतमा आन्वीक्षिकी इति द्वितीयसर्गे तृतीयप्रकरणे विद्याविभागे उक्त-त्वात् सर्वविद्याविचारहेतुत्वात् इति पाठो युक्तो भाति।

---

१. एवं ततश्च जगदाप्तपरमशिवप्रणीतत्वाविशेषेण सर्वासां विद्यानामधिकारिभेदेन प्रामाण्यमेवेति स्पष्टं सूतसंहितादौ। अधिकारश्च यथा नास्तिकानामेवार्हतादिदर्शनेषु, त्रैवर्णि-कादेरेव वैदिकमार्गेषु इति पुरुषभेदेनेव व्यस्थितस्तथैकस्यापि पुरुषस्य चित्तशुद्धितारतम्यादपि कश्चिद्व्यवस्थितः। वर्णभेदेनेव आश्रमभेदेनापि धर्मव्यवस्थादर्शनात्। एवञ्च यानि तत्तद्विद्या-प्रशंसकानि वचनानि तानि तत्तदधिकारिणं प्रत्येव प्रवर्तकानि। यानि च तन्निन्दकानि तानि तत्तदनधिकारिणं प्रति निवर्तकानि न पुन "नहि निन्दा" न्यायेन विधेयस्तावकानि। अतिबाल्य-दशायां बालक्रीड़नके प्रवर्तयतामेव पित्रादीनां तस्यैवाध्ययनाधिकारे तादृशक्रीडायां ताड़नकर्तृत्व-दर्शनात्।

तदयं मथितोऽर्थः, जातमात्रस्य त्रैर्वणिकस्य क्रीडाधिकारे निवृत्ते अक्षराभ्यासः, ततश्छन्दो-भाषाज्ञानार्थं काव्याध्ययने प्रवर्तकान्यदोषं गुणवत्काव्य" मित्यादीन्यग्निपुराणवचनानि। व्युत्पन्नस्य "काव्यालापांश्च वर्जयेदि"ति निषेधः। काव्याध्ययनजन्यप्रयोजनस्य जातत्वेनोत्तर-भूमिकायामेवावतारात्तां विहाय पूर्वभूमिकायामेवायुःक्षपयतोऽनिष्टं भवतीति तदर्थः। ततो देहाद्यतिरिक्तत्वेनात्मनो ज्ञानार्थं न्यायशास्त्राध्ययने विधिः "शुङ्गेनात्मानमन्विछे" दित्यादिः। शुंगं हेतुः, अवयवसमुदायात्मकन्याय इति यावत्। देहादिभिन्नत्वेनामुष्मिकयातायातक्षमतया आत्मनि ज्ञाते तु तादृशफलककर्मस्वधिकारादा "न्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिका" मित्या-दयो निषेधाः पूर्वभूमिकां निषेधन्ति। "धर्ममेवाचरेत्प्राज्ञ" इत्यादिविधय उत्तरभूमिकायां प्रवर्तयन्ति। यदुपयोगित्वेन पूर्वमीमांसायां वेदे कर्मकाण्डस्य चाध्ययनम् तेन धर्मार्थकामेषु साधितेषु चतुर्थपुरुषार्थलिप्सया पूर्वभूमिकात्यागाय "नास्त्यकृतः कृतेनेति कर्मनिन्दा।" (सेतुबन्ध व्याख्या)।

२. विद्याविचारहेतुत्वात् पाठान्तरं वा।

[तद्विषये मतभेदाः स्वमतं च]

त्रयी वार्ता दण्डनीतिश्चेति मानवाः[1] त्रयीविशेषो[2] ह्यान्वीक्षिकीति ।

जयमङ्गला

नीतेः प्राग् वार्ता । दण्डनीतिस्तु राजवृत्तित्वे प्रसिद्धैव सती सादृश्यार्थम् इतराभिः सहानूद्यते । इतिशब्दो व्यवच्छेदार्थः ।

जयमङ्गला क्रोडपत्रम्

अथवा सत्वबुद्धिक्रियावैशारद्यञ्च करोति इत्यग्रिममूलचिन्तने यथाश्रुतः विद्याप्रचारहनुत्वादिति पाठोपि युक्त एव ।

प्रसिद्धैव सतीती—प्रकृते च आन्वीक्षिक्यादिविद्यात्रयस्य राजनीत्या सह साहचर्यं प्रदर्श्य उक्तविद्यासहिता राजनीतिः राजवृत्तिः इत्याकारको विधिः अत्र पर्यवसन्नः । अस्मिन् पर्यवसिते विधौ अपूर्वविधित्वम् राजनीत्यध्ययने न सम्भवति । राज्ञा राजनीतिः अध्येतव्या इत्यध्ययनविधेः ज्ञातत्वात् । किन्तु 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति" त्यत्र अपूर्वविधित्वम् यथा लौहित्ये पर्यवस्यति तथा आन्वीक्षिक्यादिविद्यासु तिसृषु उक्तविधेः अपूर्वत्वं भवति । तेन यथा राजनीतिः अध्येतव्या राज्ञा तथा आन्वीक्षिक्यादितिस्रो विद्याः अध्येतव्याः इति विधौ तात्पर्यम् मूलकर्तुः । इत्यस्य टीकाग्रन्थस्य भावः ।

ननु आन्वीक्षिक्यादिविद्यानां पूर्वं पूर्वं क्रमेण प्राधान्यं यदि अस्ति तर्हि बालकाः तत्क्रमेणैव कुतो नाध्याप्यन्ते ? इति चेत् सत्यम् । बालकानां प्रतिभावैभवं दृष्ट्वा अध्ययनक्रमः समयं विभज्य कल्पनीयो भवति । अतः विद्यानामध्ययने पौर्वापर्यक्रमः विपरिवर्तनीयोऽपि भवति । अत्र इदं तत्त्वम्—राजपुत्राः षोडशवर्षपर्यन्तम् बुद्धेः अष्टगुणेषु इदमित्थमिति निर्णयसमर्थेन ग्रहणात्मकगुणेन संपन्ना यथा भवेयुः तथा चूडाकरणानन्तर समयं वर्षावधिञ्च विभज्य आन्वीक्षिक्यादीनां चतसृणां विद्यानामध्ययनक्रमः कल्पनीयः इति मूलोक्तेन पञ्चमाध्यायेन स्फुटीभवति । स सर्वोऽपि क्रमः यथावत् निरूपयिष्यते ।

श्रीमूला

तत्र मनुशिष्याणां पक्षमाह त्रयीत्यादि । आन्वीक्षिकी त्रयीविशेषो हि त्रय्यनुगामितया त्रय्यर्थविचाररूपतया च त्रय्याः प्रकार एव, न विद्यान्तरमित्यर्थः । तत्र त्रय्यनुगामिनी आन्वीक्षिकी सांख्ययोगतर्कशास्त्राणि, अन्या तु पूर्वोत्तरमीमांसे । आह च कामन्दकः —

'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणञ्च त्रयीदं सर्वमुच्यते ॥ इति ॥

नी०टि० १. मनोः शिष्याः ।
२. स्वमते हेतुवचनमिदम् । आन्वीक्षिकी तर्कः, स च त्रय्यनुगतो न्यायविद्या.... ।

वैदिकसिद्धान्तसंरक्षिणी

येषां मते आन्वीक्षिकीत्वादयो न तथाविधाः तेषां मतं निर्वक्तुमाह त्रयीति। विद्या इति शेषः। अग्रेपि वचनविपरिणामेन विद्यापदं योज्यम्। "मानवा" मनोः शिष्याः न तु मनुः इति केचिदाचक्षते। टीकाकृतस्तु मानवानां यन्मतं तन्मनोरि त्याहुः। अत्रेदन्तत्वम् पुरुषागोचरादृष्टतत्साधनधर्मज्ञानभाव्यकभावनाकरणत्वं यस्यां विद्यायां सा त्रयीति प्रागवोचाम। तथाविधं करणत्वं साधकतमत्वं तत् त्रय्याम्समन्वेति। यदि तदेव साधनतावच्छेदकसाधारणं स्वीक्रियते तर्ह्येतत् करणत्वं त्रयीतिकर्तव्यतारूपायामान्वीक्षिक्यामभ्यर्हिततमायां अपि वर्तते। एवं स्थिते आन्वीक्षिकी त्रय्यामन्तर्भवति। अतोऽत्र विषये मनोरारभ्य तच्छिष्यपरम्परायां नास्ति मतभेदः इति टीकाकृदाशयोऽवगन्तव्यः। तेन मनुविहितमान्वीक्षिक्यध्ययनमुपपन्नं भवति। एवमेवाऽग्रेपि तत्तद्भाव्यकभावनाकरणत्वं करणतावच्छेदकसाधारणमादाय तसां तासां विद्यानामन्तर्भावस्तत्र तत्र वोध्यः।

अथ पूर्वोक्तम् केषाञ्चिन्मतं विमृश्यते। तथाहि—सृष्ट्यारम्भे जगत्पालनस्थितिहेतुभूतानां सर्वासां विद्यानां समावेशो यत्र तं लक्षाध्यायात्मकं ग्रन्थं

जयमङ्गला

अत्राचार्याणां विप्रत्तिपत्तिः। मनोः स्मृतिकारस्य मतम्। शुष्कतर्कस्तावद् विद्याविरोधाद् अविद्यैव। तद्यथा—

जयमङ्गलाक्रोडपत्रम्

आचार्याणां विप्रतिपत्तिः

अर्थशास्त्रकर्तुः चाणक्यस्य मतेन आन्वीक्षिक्यादिविद्यानां चतसृणामपि पृथक् पृथक् अध्ययनं तत्तत्फलसिद्ध्यर्थं आवश्यकमस्तीति निर्णीतम्। अत्र विषये आचार्याणां मतभेदं प्रस्तौति—अत्रे ति। आचार्याणां मतस्य विवेकार्थं आन्वीक्षिक्यादिविद्यानां यथावल्लक्षणं वैदिकसिद्धान्तसंरक्षिण्यामुक्तमस्ति। तच्चैवम्—यथावत्—सर्वविद्यातात्पर्यविषयीभूतयथार्थज्ञानभाव्यकभावनाकरणविद्यात्वमान्वीक्षिकीत्वम्। पुरुषागोचरादृष्टज्ञानभाव्यकभावनाकरणविद्यात्वं त्रयीत्वम्। विद्याभूम्याद्यर्थज्ञानभाव्यकभावनाकरणविद्यात्वं वार्तात्वम्। अर्जनादिचतुर्विधराजवृत्तज्ञानभाव्यकभावनाकरणविद्यात्वं राजनीतिविद्यात्वमिति। तत्र त्रय्यामान्वीक्षिक्यन्तर्भाववादिनां मानवानां तात्पर्यमुच्यते। मनुः सामान्यतया आन्वीक्षिकीं न मनुते इति न—

"त्रैविद्येभ्यस्त्रयीं विद्यां दंडनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः॥ अ० ७, ४३

इति ग्रन्थेन आन्वीक्षिक्यध्ययनविधानात्। अतः मनुः धर्मज्ञानार्थम् आन्वीक्षिक्याः उपासना कर्तव्या, इति विदधाति। यद्यप्यत्र धर्मज्ञानार्थं इति कण्ठतः नोक्तं

जयमङ्गलाक्रोडपत्रम्

तथापि मनुप्रणीतशास्त्रस्य धर्माधिकारिकत्वमस्तीति कामसूत्रेण अवगम्यते[1]— (१ अध्याये १ अधिकरणे ५, ६ सू०)

तस्मात् धर्माधिकारिकसमाख्यया आन्वीक्षिक्यध्ययनं धर्मज्ञानार्थमस्तीति मनोराशयः। सन्यासिभिः आन्वीक्षिक्यध्ययनं यत् क्रियते तत्तु न धर्मज्ञानार्थम् किन्तु आत्मज्ञानार्थमतः सन्यासिभिः अधीयमानानायाः आन्वीक्षिक्याः अध्ययनं कर्तव्यम् इति मनुना यदुक्तम् तत्सार्थकमेव। अतएव वेदाध्ययनमात्रेण यथावद् धर्मज्ञानं न भवतीति हेतुना मीमांसकैः मीमांसायाः तर्कस्य च धर्मज्ञानार्थमध्ययनम् ब्रह्मचारिणा गुरुकुले कर्तव्यमिति निर्णीतम्।

तेन यादृशी आन्वीक्षिकी धर्मज्ञानार्थं नोपयुज्यते, धर्मज्ञानविरोधिन्येव वा भवति, तादृश्याः आन्वीक्षिक्याः अध्ययनं न कर्त्तव्यम् इति निषेधः—

हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्।

इत्यादिनिन्दया अभ्यूह्यते। अतः—

'वेदशास्त्राविरोधी तु तर्कस्त्रय्येव पश्यताम्।'

इत्यादिवचनैः धर्मज्ञानार्थम् आन्वीक्षिक्यध्ययनं मनुमतेन सिद्धं भवति।

तथापि तत् त्र्यध्ययनान्नातिरिच्यते। यतः पुरुषागोचर (अदृष्ट) धर्मज्ञानभाव्यकभावनाकरणत्वं त्रय्यां कौटिल्येन स्वीक्रियते। तत् कौटिल्यसम्मतं लक्षणम् आन्वीक्षिक्यामपि सङ्गतं भवति, इत्यनेन लक्षणेन आन्वीक्षिक्यां त्रयीतरभेदानुमितेः अबाधितत्वात्तत्र त्रयीत्वकल्पनायां नास्ति हेत्वाभासः। अतः आन्वीक्षिक्या आन्तर्भावं त्रय्यामभिप्रेत्य मानवानां मते विद्यानां त्रिविधत्वमस्तीति हृदयम्।

आन्वीक्षिक्याः धर्मज्ञानार्थमुपयोगः

ननु त्रय्याः धर्मज्ञानार्थमुपयोगित्वं तु क्लृप्तम्। आन्वीक्षिक्याः उपयोगित्वं केन प्रकारेण ? इति चेदुच्यते। त्रय्या निरूपितं धर्मं ज्ञात्वा तदनुष्ठानार्थं प्रवृत्तः आन्तं निर्विघ्नतया सर्वमनुतिष्ठेदेवेति नास्ति नियमः, विघ्नैः उपहन्यमानतायाः स्वभावसिद्धत्वात्। तथाहि—महतां साधूनां यच्चरित्रं भवति तन्महिम्ना त्रिवर्गसमृद्धिसंपादनाय क्रियमाणेव्यापारे विघ्नाअपि उपस्थिताः भवन्त्येव। तेषां निवारणम् केनोपायेन कृतंमिति यावदितिहासतो नोपलभ्यते तावत् तस्य महत्त्वं प्रकाशितं न भवति। अतएव नलरामयुधिष्ठिरप्रभृतयः विघ्नैः उपहताः बभूवुः कथंच्च तेषान्निराकृतिरभूत् किं तद्वस्तु यस्य बलेन ते महात्मानः विघ्नेन उपहता अपि आरब्धं कार्यं न परित्यजन्तिस्म, इति चिन्तायां धृतिरेवेति साहित्यविदां राजनीतिविदाञ्च निर्णयः। धृतेः स्वरूपं वैदिक सिद्धान्तसंरक्षिण्यां निरुक्तमस्तीति तदत्र न विमृश्यते।

---

१. "प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य साधनमध्यायानां शतसहस्रेणाग्रे प्रोवाच ॥५॥ तस्यैकदेशिकं मनुः स्वायम्भुवो धर्माधिकारिकं पृथक् चकार इति।

वैदिकसिद्धान्तसंरक्षिणी

निर्माय ब्रह्मा मन्वादीनध्यापयामास। ततो मनुः लोकेषु धर्मे ईश्वरे वेदे च आस्तिक्य-बुद्धिं दृढां स्थितिं समालोक्य पूर्णधर्मज्ञानोद्देश्येन अधीतग्रन्थात् एकदेशं धर्माधिकारिकं ग्रन्थं स्वशिष्यानध्यापयामास। तेऽपि अधीतविषये निपुणमतयः केचन मनुशिष्याः आन्वीक्षिक्या धर्मज्ञानात् पृथक् प्रयोजनं अस्तीति स्वकाले नान्वविन्दन्। नवा धर्मज्ञानात् पृथक् प्रयोजनमस्तीति चिन्तयितुं पूर्वपक्षाभावादवसरमलभन्त। अतः तेषां मते उक्तरीत्या आन्वीक्षिक्याः पृथगस्तित्वं स्वतन्त्रप्रयोजनाभावान्नास्ति। मनुस्तु सर्वज्ञत्वात् आन्वीक्षिक्याः पृथक् प्रयोजनं जानात्येव, इतीदं त्रय्यामान्वीक्षिक्यन्तर्भावनिरूपकमतं न मनोःअपि तु मानवानामिति टीककृन्मतापेक्षया स्वतन्त्रोऽस्य मतस्याशयः इति। सम्भवति चेदं यत् ते उत्तमशिष्याः स्वयोग्यत्वानुसारेण आन्वीक्षिक्याः पृथक् उद्दिष्टं नान्वजानन्।

तदेवमेकदेशिमतमग्रे प्रसृतम्। तत्पर्यवसानं मनुप्रतिपादितविषयातिरिक्तं मतं तच्छिष्याणामज्ञानेनावृतमभूदिति। अथ आन्वीक्षिक्या उक्तमेव अन्तर्भावं हेतुप्रदर्शनेन व्याचष्टे त्रयीविशेषः इति। त्रय्या विशेषः त्रयीविशेषः। त्रयीत्वव्याप्यं आन्वीक्षिकीत्वमिति तदर्थः। तच्च द्विधा विभक्तम्। त्रय्यनुगामिनी त्रयीविरोधिशाक्यादिस्मृतिभिन्नस्मृत्यनुगामिनीभेदात्। यथा मीमांसासांङ्ख्ये। तत्र मीमांसा साक्षात् त्रय्यनुगामिनी। सङ्ख्यं तादृशस्मृतिभिन्नस्मृत्यनुगामीति। तथा चैतन्मते पृथक् प्रयोजनाभावेन आन्वीक्षिक्यध्ययनं पृथक्तया राजवृत्त्यन्तर्गतं नास्ति इति बोध्यम्।

जयमङ्गलाक्रोडपत्रम्

धृत्यान्वीक्षिक्योः संबन्धः

यदि देहात्मवादिता धर्मानुष्ठातृषु जागरूका स्यात् तर्हि वर्तमानमैहिकं सुखं परित्यज्य कस्माद्धेतोः एतावान् क्लेशः तेन सोढव्यः? तन्मतेन ऐहिकसुखापेक्षया अधिकतरसुखस्य असंभवात्। देहातिरिक्तात्मवादितायां तु ऐहिकसुखापेक्षया आत्मसुखं सन्तोषजनितं निरुपाधिकमतिशयिततरमस्ति, देहश्च तत्साधनतया उपयुज्यते इति स्वकर्तव्यपरायणाः आत्मसुखं, यशःसुखं च उपलब्धुं प्रयतमानाः अनुचितमार्गेण ऐहिकसुखं तत्त्वेन न मन्यन्ते, किन्तु न्याय्यमेव पन्थानमनुसरन्ति। ऐहिकसुखं परित्यज्य महता सन्तोषेण देहातिरिक्तवादिनां क्लेशसहनपूर्वकं स्वकर्मणि प्रवर्तने धृतिरेव कारणमस्ति। इत्येवं रीत्या महात्मनां कृते विपदि क्लेशसहिष्णुतायाः, धृतिः आलंबनं भवति। अत्रेदं बोध्यम्। त्रयीद्वारा आत्मनोऽस्तित्वे ज्ञातेऽपि देहातिरिक्तत्वं यावन्न साध्यते आन्वीक्षिक्या, तावत् ज्ञातेऽप्यात्मनोऽस्तित्वे अप्रामाणिकत्वादिशङ्कानामभ्युदयो भवितुमर्हति तन्निरासायान्वीक्षिक्यप्युज्यते। निरस्तायां च अप्रामाण्यादिशङ्कायां सत्वात्मिकाया धृतेः स्वायत्तीकरणं देहातिरिक्तात्मवादिना कर्तुं शक्यते, इत्येवं धृतेरान्वीक्षिक्या सह सम्बन्धः स्फुटः।

जयमङ्गला

"यदुदुम्बरवर्णानां[1] घटीनां मण्डलं महत्।
पीतं न गमयेत् स्वर्गं किं तत् क्रतुशगतं[2] नयेत्।" इति

तस्मात्—

"हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्"। इति।

यस्तु त्रय्यनुगामी मीमांसादिः, स्मृत्यन्तरानुगामी साङ्ख्यादिस्तर्कः स त्रय्येव। यथाहुः—

जयमङ्गलाक्रोडपत्रम्

अतः देहेष्वनात्मत्वबुद्धिः धृतेः सुधृतयये अपेक्षिता वर्तते। देहेषु अनात्मत्व-बुद्धिश्च आन्वीक्षिक्या शंकासमाधानद्वारा दृढा सम्भवति इति आन्वीक्षिकीस्थापना-वसरे सविस्तृतं वैदिकसिद्धान्तसंरक्षिण्यामपि प्रपञ्चितमस्ति। अतः मानवमतेनापि आन्वीक्षिक्याः धर्मज्ञानभाव्यिकायाः उपयोगित्वमस्ति इति सिद्धम्।

शुष्कतर्कः वेदविरोधी तर्कः इतिभावः। **यदुदुम्बरेति**। महाभाष्यकविवचनस्य प्राचीनत्वात् तदाधारेण इदं पद्यं शुद्धाशुद्धी विविच्य सन्निवेशितमस्ति। एतच्छ्लो-कार्थः तट्टीकायां व्याख्यानतो द्रष्टव्यः [3]

प्रमाणमाह हैतुकानिति। यस्तु इति। ननु टीकायां मीमांसादीनां त्रय्यनुगामित्वं साङ्ख्यादीनाञ्च स्मृत्यन्तरानुगामित्वमिति निर्णीतमस्ति। तदुक्तं—"त्रय्यनुगामी मीमांसादिः। स्मृत्यन्तरानुगामी साङ्ख्यादिः" इति। नीतिसारव्याख्यायां तु साङ्-ख्यादीनां त्रय्यनुगामित्वं, मीमांसादीनां तु त्रय्यन्तर्गतत्वमभिहितम्। तदुक्तम्-यथा-वस्थितपदार्थतत्वान्वीक्षणरूपत्वात् आन्वीक्षिकी हेतुविद्या। सा च द्विविधा, त्रय्यनुगामिनी, त्रय्यन्तर्गता च तत्र पूर्वा साङ्ख्यादिशास्त्रम्। इतरा मीमांसा-दिशास्त्रम्॥ इति। २ सर्ग ३ प्र० श्लो० ३

अशुद्धम्

१. यदुदुम्वरपर्णानां

२. क्रतुशतं

प्रदीपः—यदुदुम्वरेति। अयं श्लोकः सौत्रामणियागे सुरापानस्य दुष्टत्व-मुद्भावयति।

उद्योतः—उदुम्बरं ताम्रम्। दुष्टत्वमिति। इदमुपलक्षणम् अन्यत्राप्यदुष्टत्वस्य।

तत्त्वालोकः—यदुदुम्वरेति। उदुम्वरवर्णानां, रक्तवर्णानाम्। घटीनां। कलशीनाम्। महत् विशालम्। (मण्डलस्य स्वरूपन्ये ऽपेयत्वाल्लक्षणया) मण्डलस्थम् (मद्यं) पीतं (सत्)। यद् यदि। (पातारं) स्वर्गं न गमयेत्। तत् तर्हि। क्रतुगतं सौत्रामणौ ग्रहपात्रस्थं (स्वल्पं मद्यं) पीतं (सत्पातारं) किं (स्वर्गं) नयेत्, अर्थान्न नयेदिति शब्दार्थः।

जयमङ्गलाक्रोडपत्रम्

इत्यनयोः जयमङ्गलाकृद्वचनयोः कथं समन्वयः भवतीति चेद्। एवं, मीमांसया विचारार्थं सन्देहनिरासाय यानि वाक्यानि आदाय तात्पर्यं निर्णीयते तानि सर्वाण्यपि वाक्यानि वैदिकान्येव। अतः मीमांसायां निर्दिष्टा विषयाः साक्षात् त्रयीमवलम्ब्य पुरो वर्तन्ते, इति त्रयीमूलत्वात् प्रकृतजयमङ्गलाग्रन्थे मीमांसायाः त्रय्यनुगामित्वं उक्तम्, तदेव नीतिसारव्याख्यायां जयमङ्गलायां अपि उक्तस्थले त्रय्यन्तर्गतत्वपदेन बोध्यते।

सेयं स्थितिः सांख्यकारिकाप्रभृतिग्रन्थेषु नास्ति। अत्र ये विषयाः सिद्धान्तत्वेन उक्ताः ते कपिलस्मृत्युक्त्यनुसारेण निरूपिताः सन्ति। कपिलादीनां स्मृतिः मीमांसायां स्मृत्यधिकरणोक्तरीत्या श्रुतिमूलिका इति सिद्धान्तितम्। अर्थात् सा श्रुतिः स्मृत्यनुमेया वर्तते। परन्तु तस्याः कीदृशी आनुपूर्वी इति श्रुतीनां सहस्रशाखापेक्षयाऽपि अधिकशाखानां अस्मदाद्यप्रत्यक्षत्वात् अस्माभिः अवगन्तुं न शक्यते। नापि च उपलब्धायां श्रुतौ कः सिद्धान्तः तस्याः अभिप्रेतः इति मीमांसां विना ज्ञातुं शक्यते, इति साङ्ख्यादिनिर्दिष्टाः विषयाः साक्षात् न त्रय्यन्तर्गताः नापि त्रय्यनुगामिनः। अपि तु याभिः वेदः अनुमेयः ताः कपिलादिस्मृतीः मूलत्वेन स्वीकृत्य प्रवर्तन्ते। "अतः स्मृत्यन्तरानुगामी" इत्यस्य जयमङ्गलायां उक्तस्य पदस्य कश्चन परिष्कृतोऽर्थः करणीयः। स च "वेदविरुद्धस्मृतिभिन्नस्मृत्यनुगामी" इति। इदमेव अनुगामित्वं, नीतिसारव्याख्यायां उक्तं साङ्ख्यादिषु त्रय्यनुगामित्वं बोध्यम्। वेदविरुद्धेत्यादि विशेषणात् शाक्यादिस्मृतयः व्यावर्तन्ते। शाक्याः वेदविरोधिनः वेदं विनाशयितुं प्रवृत्ताः अतस्तेषां स्मृतिः न वेदमूलिकेति मीमांसकैः (विरोधाधिकरणे २ वर्णके) साधितम्। अतः तेषां सर्वोऽपि तर्कः न वेदविरुद्धस्मृतिभिन्नस्मृत्यनुगामी संभवति, इति तस्य शुष्कत्वव्यपदेशः कृतोऽस्ति। तदेवोक्तं टीकायाम्—"शुष्कतर्कस्तावद्-विद्याविरोधात् अविद्यैव" इति।

तस्मात् उपरिनिर्दिष्टयोः जयमङ्गलावचनयोः न विरोधः इति बोध्यम्।

साङ्ख्यादौ मतविरोधपरिहारः

ननु वेदविरुद्धस्मृतिभिन्नस्मृत्यनुगामिष्वेव शास्त्रेषु तत्त्वनिरूपणावसरे विभिन्नानि विभिन्नानि मतानि विरुद्धानीव भासन्ते। तद्यथा—पृथिव्यादीनि तत्त्वानि षट्त्रिंशत् वदन्ति। अन्ये तु पञ्च, अपरे नव इत्यादि।[1]

तद्विरोधपरिहाराभावे साङ्ख्यशास्त्रस्य अप्रामाण्यात् अत्र तद्ग्रहण—मसङ्गतं भाति इति चेन्न। शास्त्रेषु विभिन्नानां मतानां अथवा विभिन्नानां प्रक्रियाणाञ्च यन्निरूपणं भवति तत् प्रमेयस्य स्पष्टीकरणार्थं स्वकीयगुरुपरम्परानुसारेण

---

१ अस्य विस्तार एकादशस्कन्धे द्वाविंशेऽध्याये श्रीमद्भागवते द्रष्टव्यः।

जयमङ्गलाक्रोडपत्रम्

संप्राप्तया शुद्धप्रतिभया निबन्धकर्तृभिः क्रियते। तद्यथा—संस्कृतभाषायां "भवति, भवतः' भवन्ति' इति प्रयोगाः साधवः पुण्यजनकाः इत्यत्र नास्ति कस्यापि विवादः, अत्र एतादृशानां साधूनां प्रयोगाणां साधने तु पूर्वपरम्पराप्राप्ता विभिन्ना विभिन्ना प्रक्रिया भवितुमर्हति, अतएव पाणिनीय-कालाप-सारस्वतादिभेदेन व्याकरणानि अष्टौ भवन्ति। तत्र प्रक्रियांशे साधुत्वासाधुत्वविचारः न केनापि क्रियते। प्रमेयांशस्य सत्यता तु एकरूपतया सर्वैः अपेक्षिता भवति। तदुक्तं सुभाषिते—

उपायाः शिक्षमाणानां बालानामुपलालनाः
असत्ये वर्त्मनि स्थित्वा ततः सत्यं विनिर्दिशेत् इति।

ईदृश्या विभिन्नया सरण्या अनेकेषु शास्त्रेषु क्रियमाणस्य विचारस्य फलं मतिभाव इत्युच्यते[१]। शास्त्रेषु हि प्रमाणप्रमेयभेदेन विभिन्नया विभिन्नया दिशा विचारणा क्रियते। तत्र प्रमाणमधिकृत्य असंभावनाविपरीतभावनादिशङ्का उपस्थिता यदा भवन्ति तदा तासां निरासः शास्त्रेण कर्तव्यो भवति।

यं तर्कमधिकृत्य प्रमाणविषयिण्यः शङ्काः शास्त्रेण व्यपगता भवन्ति स प्रमाणविषयस्तर्कः इत्युच्यते। तथैव प्रमेयविषये असंभावितत्वाननुगतत्वादिशङ्काः उपस्थिता भवन्ति तासामपि निरासः यं तर्कमधिकृत्य शास्त्रेण क्रियते स प्रमेयविषयकस्तर्कः उच्यते। तदिदं तर्कस्य द्वैविध्यम् मीमांसायां तर्कपादे तथा अन्यपादे च निरूपितं न तिरोहितं विदुषाम्। सङ्गीतरत्नाकरपद्ये तु–

"तर्काख्यौ प्रत्ययावूहापोहौ विधिनिषेधयोः।"

इत्यनेन तर्कभेदोऽपरो निर्दिष्टः अस्ति। तत्र विधिमधिकृत्य सञ्जातः तर्कः ऊहः। निषेधमधिकृत्य सञ्जायमानस्तर्कस्तु अपोह इत्युच्यते। अमुं भेदमाधारीकृत्य न्यायेन विचारणाद्वारा मतिभावप्राप्त्यर्थं गुरुपरम्परया संप्राप्तानि अनेकानि मतानि निर्दिष्टानि सन्ति चेत् तत्र का परिदेवना। प्रमेयांशे मतभेदः कस्यापि नास्ति। यस्य यादृशः संप्रदायः तेन तं संप्रदायमधिकृत्य तत्तत्प्रक्रियापरम्परा प्रमेयप्राप्त्यर्थं तदवगमार्थं वा यदि अवलम्ब्यते तर्हि तत्र नास्ति विरोधः। अतएव एकस्मिन्नेव वेदान्तशास्त्रे सर्वेऽपि निबन्धकर्तारः प्रामाणिकाः ब्रह्मप्रमां तदुपायञ्च चिन्तयन्तः सन्ति। तेषु कस्यापि ब्रह्मविषये न विरोधः तल्लाभाय येन विदुषा यथा अनुभूतं परम्पराप्राप्तञ्च तेन तथा तथा निर्दिष्टम्। यथा– जगदुपादानत्वविषये विवरणकार-वाचस्पत्यादीनां मतभेदः अस्ति। तेषु सर्वेषां शिष्टत्वात् गुरुभक्तत्वाच्च कस्य अप्रामाण्यं वक्तव्यम्। तैः अनुभूता स्वसंप्रदायानुसारिणी या रीतिः येषु शिष्येषु अध्यापिता

---

१ तदुक्तं सङ्गीतरत्नाकरे :—'अपूर्वप्रतिभानं स्यान्मतिस्तां तु विभावयेत्।
अन्वयव्यतिरेकोत्थैः प्रत्ययैः शास्त्रचिन्तनैः।
ऊहापोहैश्च विविधैरथ तामनुभाययेत्॥

जयमङ्गलाक्रोडपत्रम्

तैः सा रीतिः पालनीया। वेदप्रामाण्यांशे ब्रह्मप्रमांशे वा सर्वेषां पुनः मतैक्यमेव। तथैव साङ्ख्यशास्त्रेऽपि प्रकृतिपुरुषविवेचनप्रङ्गेन अपेक्षितानां प्रमेयानां तत्त्वानां विभिन्न-सङ्ख्याविषये बोध्यम्। एतेन साङ्ख्यशास्त्रस्यैव समन्वय इति न ज्ञातव्यम्।

बौद्धादिमतानां समन्वयः

राजनीतिशास्त्रेणापि स्वस्वगुरुपम्पराप्राप्तोपासनादृष्ट्या बौद्धादिमतानामपि समन्वय इष्यते इत्यपि प्रसङ्गादुच्यते। यतः राजनीतिशास्त्रं वेदान्तशास्त्रमेव प्रमाणमूर्धन्यत्वेन स्वीकरोति—

जगन्मृगतृषातुल्यं विक्ष्येदं क्षणभङ्गुरम्

इत्याद्युक्तत्वात्। तथाचेदं सिद्धं, यद् भारतीयराजशास्त्रेण वेदान्तानुसारिणा नीत्यनुष्ठानोपदेशकुशलेन ब्रह्मातिरिक्तस्य सर्वस्यापि असत्प्रायत्वात् तदंशे अभिनि-वेशः वृथा इति मन्यते। एवं सति बौद्धादिभिः स्वप्रक्रियामाश्रित्य स्वस्वदेवताः उपास्यन्ते तत्रापि वैदिकमतानुयायिशास्त्रस्य न विरोधः। तस्मात् तेषामपि मतस्य रक्षणं साङ्ख्यवेदान्तादिषु निर्दिष्टानां मतानां रक्षणमिव अत्र अतिसुलभम् इति निश्चप्रचम्। यदा ते वयं वेदविरोधिनः इत्युक्त्वा विवादैः वेदान् खण्डयितुं प्रवृत्ता भवन्ति[1] तदा मतभेदो भवति। अविरोधित्वे तु न कोऽपि विरोधः, जैनमतानुयायिभिः सोमदेवसूरि—योग्घम—भिक्षुप्रभमतिभिः स्वस्वाचार्योपासकैरपि तत्तन्मतानुयायित्वं स्वीकृत्यापि भारतीयराजनीतिशास्त्रस्य वेदस्य च लोकयात्रार्थं प्रामाण्यस्वीकरात् चरविभागे तेषां नियोजनस्यात्रोक्तत्वाच्च।

उपर्युक्तस्य अस्य वेदान्तदृष्ट्या क्रियमाणस्य समन्वयस्य प्रतिष्ठापकत्वात् भगवत्पूज्यपादाः श्रीशङ्कराचार्याः सर्वमतप्रतिष्ठापका इति शास्त्रविद्भिः उच्यते[2]।

"मनुचाणक्यमतविशेषचिन्तनम्"

अत्र केचित् – मानवं मतं हि धर्मज्ञानार्थं प्रवृत्तम् तथा कौटिलीयमर्थशास्त्रमर्थ-ज्ञानार्थं प्रवृत्तम् इति सर्वमतसिद्धम्, अत एव धर्माधिकारिकं धर्मशास्त्रम् अर्थाधि-कारिकञ्च अर्थशास्त्रम् इतिरीत्या अनयोः शास्त्रयोः पृथक्तया उपन्यासः क्रियते। तत्र धर्मज्ञानं प्रति आन्वीक्षिक्याः पूर्वोक्तरीत्या उपयोगित्वे सिद्धेऽपि यस्मिन् समये पृथिव्या लाभे पालने च राजा प्रवर्तते तस्मिन् समये आन्वीक्षिक्याः अर्थज्ञानो-

---

१ द्रुह्यन्ति ये ब्राह्मणपुङ्गवेभ्यः वेदान् विवादैरपि खण्डयन्ति।
निन्दन्ति विश्वेश्वरपादपद्मं तेषां कुलं कुत्र पुनः पृथिव्याम्? धर्मविजायनाटक

२ तदुक्तं सिद्धान्तविन्दुटीकायां न्यायरत्नावल्याम्। (पृ० ६ न्या० र०)
विश्वगुरुमित्यनेन नास्तिकषड्दर्शनीकर्तॄणामास्तिकपञ्चदर्शनीकर्तॄणाञ्च शिक्षक आचार्य इति सूचनात् वेदान्तदर्शनस्य सर्वदर्शनशिरोमणित्वं सूचितम्। इति।

जयमङ्गलाक्रोडपत्रम्

पयोगित्वं न क्लृप्तम् इति, सा राज्ञा राजवृत्तिषु पृथक्तया अर्थज्ञानार्थन्नाध्येतव्येति तस्याः राजवृत्तितः मानवैः पृथक्करणं न कृतम्।

कौटिल्यस्तु अर्थलाभर्थी प्रवृत्तेन राज्ञा तदर्थी अपि अर्थज्ञानाङ्गतया आन्वीक्षिकी अध्येतव्या इति राजवृत्तिषु तस्या ग्रहणं पृथक्त्वेन मनुते। यतो हि विना प्रज्ञावैशारद्यं क्रियावैशारद्यं वा अर्थोऽपि केवलं शास्त्रमधीत्य प्राप्तुं न सुलभः। उक्तवैशारद्यत्वञ्च आन्वीक्षिक्यधीनमित्यनयोः मतयोर्विशेषः इति वदन्ति।

ननु इदमङ्गत्वम् आन्वीक्षिक्यामस्तीति मनुना कथमज्ञातमिति चेन्न। मनुना ज्ञातमेव। तथाहि मनुना हि वार्ताज्ञानं लोकतः संपादनीयम्।[1] इति विहितमस्ति। अस्यायमाशयः—यथा वार्तार्थी शास्त्रस्यापेक्षा नास्ति। केवलं लोकवृत्तं दृष्ट्वा वार्ता परिज्ञेया, धर्मविषयस्तु न तथा। स हि शास्त्रेणैव अवगन्तव्यो भवति। तथा अर्थार्थी प्रवृत्तेन राज्ञा अर्थोऽपि न आन्वीक्षिक्या ज्ञातव्यः अनुपयोगित्वात्।

स्तदर्थी महतः विचारस्य आन्वीक्षिकीप्रसूतस्य तदध्ययनस्यवावश्यकता न विद्यते। इति ज्ञायते तदेव च चाणक्येन प्रतिषिदध्य आन्वीक्षिकी अर्थज्ञानार्थमध्येतव्येति तस्याः पृथक् स्थापनं कृतम्।

ननु अर्थज्ञानाङ्गताया आन्वीक्षिक्यामुपयोगित्वास्य मनुना ज्ञातत्वेऽपि मानवाः कथमिव तस्याभिप्रायं नाविन्दन्। इति चेत् उच्यते—

'वर्तारम्भांश्च लोकतः' इति मनूक्त्या मानवाः 'वार्ता लोकतः अवगन्तव्या' इत्यवजग्मुः। एकलक्षाध्यायात्मकं ब्रह्मणा विनिर्मितं ग्रन्थमवाध्येतुं ते नापारयन्, मेधाह्रासात्। तदा मन्वादिभिः तत्तदधिकारिवर्गैं धर्माधिकारिकम्, अर्थाधिकारिकम्, कामाधिकारिकमिति भेदेन ब्रह्मनिर्मितग्रन्थादेव अपेक्षितं विषयमादाय ते ते ग्रन्थाः रचिताः अध्यापिताश्च, तदेवं मानव.बार्हस्पत्य-औसनसादिशास्त्राणि पृथक् पृथक् पृथक् प्रादुर्भूतानि।

अथ स्वीयं स्वीयं ग्रन्थमधीत्य ते ते अन्तेवासिनः लक्षाध्यायपरिमितग्रन्थे स्थितस्य विषयान्तरस्य विषये अज्ञा बभूवुः। तस्येदं फलं सम्पन्नं यत् शाखान्तरानध्ययनात् कुत्र कीदृशा विषयाः पूर्वपक्षभावेन, उत्तरपक्षभावेन, वैकल्पिकत्वेन,किमुद्देश्यकत्वेन वा सन्ति इति निर्णयः तान् प्रति दुरधिगमः अभूत। यथा दर्शपूर्णमासे "कदाचन स्तरीरसि" इत्यादि पूषानुमन्त्रणमन्त्रः पठितो वर्तते। अस्य विनियोगः इन्द्रप्रकाशने नास्ति इति सर्वैः मीमांसकैः ज्ञायते। तत्र कारणं "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इति शाखान्तरीयवाक्यमेव। परन्तु येन शाखान्तरं नाधीतं सः दर्शपूर्णमासप्रकरणमात्रमधीत्य उक्तपूषानुमन्त्रणमन्त्रो गार्हपत्योपस्थानाङ्गमिति कथं विजानीयात्? अस्याः अज्ञतायाः कारणं शाखान्तरानध्ययनमेव। तद्वत् सर्वज्ञानां मन्वा-

१. तदुक्तं "त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीं तर्कविद्यां वार्तारम्भांश्च लोकतः" इति। मनु अ० ७ श्लो० ४३।

जयमङ्गलाक्रोडपत्रम्

दीनामाशयः तावन्मात्रमधीतवद्भिः अन्तेवासिभिः अनवगतश्चेत् नात्र आश्चर्यम्। अतएव सर्वाणि शास्त्राणि उत्सन्नकल्पानि वभूवुः।[1]

एवं शास्त्रे उत्सन्ने सति शास्त्रार्थविषये अन्धकारः भवति इति मोहरागादीनामपि उत्पत्तिः भवति। तेन च विलोपः नियतः।[2]

कामसूत्रे वात्स्यायनीये सू० ५ तः १३ पर्यन्तं १ अध्याय पृष्ठ ११

(१) प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिवन्धनं त्रिवर्गस्य साधनमध्यायानां शतसहस्रेणाग्रे प्रोवाच ॥ ५ ॥

(२) तस्यैकदेशिकं मनुः स्वायसम्भुवो धर्माधिकारिकं पृथक् चकार ॥ ६ ॥

(३) वृहस्पतिरर्थाधिकारिकम् ॥ ७ ॥ महादेवानुचरश्च नन्दी सहस्रेणाध्यायानां पृथक् कामसूत्रम् प्रोवाच ॥ ८ ॥

(४) तदेव तु पञ्चभिरध्यायशतैरौद्दालकिः श्वेतकेतुः सञ्चिक्षेप ॥ ९ ॥

(५) तदेव तु पुनरध्यर्धेनाध्यायशतेन साधारण-साम्प्रयोगिक-कन्यासंप्रयुक्तक-भार्याधिकारिक-पारदारिक-वैशिक-औपनिषदिकैः सप्तभिरधिकरणैर्वाभ्रव्यः पाञ्चालः सञ्चिक्षेप ॥१०॥

(६) तस्य षष्ठं वैशिकमधिकरणं पाटलिपुत्रिकाणां गणिकानां नियोगाद् दत्तकः पृथक् चकार ॥ ११ ॥

(६) तत्प्रसङ्गात् चारायणः साधारणमधिकरणं पृथक् प्रोवाच। सुवर्णनाभः साम्प्रयोगिकम्। घोटकमुखः कन्यासम्प्रयुक्तकम्। गोनर्दीयो भर्याधिकारिकम्। गोणिकापुत्रः पारदारिकम्। कुचुमार औपनिषदिकमिति ॥ १२ ॥

(७) एवं बहुभिराचार्यैस्तच्छास्त्रं खण्डशः प्रणीतमुत्सन्नकल्पमभूत् ॥ १३ ॥ इति।

१ तदुक्तं महाभारते शान्तिपर्वणि राजधर्मानुशासनपर्वणि अ० ५९ श्लोक सं० १४ तः २७ पर्यन्तं (निर्णयसागर प्रेस)

न वै राज्यं न राजासीन्न दण्डो न च दाण्डिकः।
धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम् ॥
पाल्यमानास्तथान्योऽन्यं नरा धर्मेण भारत।
खेदं परमुपाजग्मुस्ततस्तान्मोह आविशत्।
ते मोहवशमापन्ना मनुजा मनुजर्षभ ॥
प्रतिपत्तिविमोहाच्च धर्मस्तेषामनीनशत्।
नष्टायां प्रतिपत्तौ च मोहवश्या नरास्तदा ॥
लोभस्य वशमापन्नाः सर्वे भरतसत्तम।
अप्राप्तस्याभिमर्शं तु कुर्वन्तो मनुजास्ततः ॥

जयमङ्गलाक्रोडपत्रम्

दृश्यते हि प्रमादालस्यादिभिः पौरुषक्षयाच्च अल्पज्ञानवत्वम् ।

अयमन्धकारः विद्याविलोपात् मनुपरम्परायां अन्तेवासिषु जातः इत्यस्मिन् अंशे वर्तमानकालीनमुदाहरणं प्रदर्शयितुं शक्यते । परीक्षोपयोगितया परीक्ष्यग्रन्थाः रघुवंश—किरात—नाटक—मंजूषा—शेखरादिग्रन्थैकदेशभूताः प्रकाशिता बभूवुः । ते ते ग्रन्थास्सम्पूर्णतया दुर्लभतां प्राप्ता वर्तन्ते । स्मार्तकर्मणि तत्र तत्र ये उपयुक्ताः मन्त्राः ते वेदभागात् पृथक् उपन्यस्य एकत्रीकृताः संप्रति मन्त्रसंहितेति नाम्ना व्यवह्रियन्ते । तानेव अधीत्य पूजोपजीविनः विद्वांसः यदि सम्पूर्णायाः स्वशाखायाः विषये अज्ञतां प्राप्नुवाना वर्तन्ते । तेन मूलग्रन्थाध्ययनाभावात्, अभ्यासाभावाच्च लुप्तप्रायतां गमिष्यन्ति किमिति चिन्ता प्रादुर्भूता वर्तते । एवंरीत्या सम्प्रदायविनाशो

कामो नामापरस्तत्र प्रत्यपद्यत वै प्रभो ।
तांस्तु कामवशं प्राप्तान् रागो नामाभिसंस्पृशत् ॥
रक्ताश्च नाभ्यजानन्त कार्याकार्ये युधिष्ठिर ।
अगम्यागमनं चैव वाच्यावाच्यं तथैव च ॥
भक्ष्याभक्ष्यं च राजेन्द्र दोषादोषं च नात्यजन् ।
विप्लुते नरलोके वै ब्रह्म चैव ननाश ह ॥
नाशाच्च ब्रह्मणो राजन् धर्मो नाशमथागमत् ।
नष्टे ब्रह्मणि धर्मे च देवांस्त्रासः समाविशत् ।
ते त्रस्ता नरशार्दूल ब्रह्माणं शरणं ययुः ।
प्रसाद्य भगवन्तं ते देवं लोकपितामहम् ।
ऊचुः प्राञ्जलयः सर्वे दुःखवेगसमाहताः ॥
भगवन्नरलोकस्थं ग्रस्तं ब्रह्म सनातनम् ।
लोभमोहादिभिर्भावैस्ततो नो भय माविशत् ।
ब्रह्मणश्च प्रणाशेन धर्मो व्यनशदीश्वर ।
ततः स्म समतां याता मर्त्यैस्त्रिभुवनेश्वर ।
अधो हि वर्षमस्माकं नरास्तूर्ध्वप्रवर्षिणः ।
क्रियाव्युपरमात्तेषां ततो गच्छाम संशयम् ।
अत्र निःश्रेयसं यन्नस्तद्ध्यायस्व पितामह ।
त्वत्प्रभावसमुत्थोऽसौ स्वभावो नो विनश्यति ॥

तथैव तन्त्रवार्तिके १ अ० ३ पा० १ अ० स्मृत्याचारप्रामाण्याधिकरणे

शाखानां विप्रकीर्णत्वात् पुरुषाणां प्रमादतः ।
नानाप्रकरणस्थत्वात् स्मृतेर्मूलं न दृश्यते ॥ इति ।

जयमङ्गला

"वेदशास्त्राविरोधी तु तर्क (स्त्रय्येव) पश्यताम् ।" इति ।

तस्मात् त्रयीविशेषः त्रयीभेदः । मानवा इति मनोः शिष्याः । ननु च मानवानामिदं मतं न मनोः । नैतदेवम् । तत्प्रोक्तशास्त्राध्ययनादेव ते मानवाः । न तेषां पृथग् दर्शनमस्ति ।

जयमङ्गलाक्रोडपत्रम्

अतएव स सम्प्रदायविनाशो माभूत् इत्येतदर्थं मन्वादिभिः वेदप्रतिपादित एव धर्मः स्वीयवाण्या निरूपितः ।[1]

चाणक्यमन्वोः मतममन्वयः

वस्तुतस्तु आपाततः मनुना आन्वीक्षिकीन्त्रय्यामन्तर्भाव्य यत्स्वकीयं मतं प्रतिपादितम् तस्माच्चाणक्येन स्वमतं पृथक् कृतं आन्वीक्षिक्याः त्रय्याश्च फलस्य पार्थक्येनोक्तत्वात् । तथापि सूक्ष्मतया विद्यानां स्वरूपविचारानन्तरं उभयमपि मतं अविरुद्धमेवेति निर्णीयते ।

तथाहि "धमार्थौ यद् विद्यात् तद् विद्यानां विद्यात्व" मिति विद्यानां लक्षणं चाणक्येन (मूलकृता) प्रत्यपादि । तेन पुरुषागोचरादृष्टभाव्यकभावनाकरणत्वं त्रयीत्वं तथा तत्तद्विद्यातात्पर्यविषयीभूतयथार्थज्ञानभाव्यकभावनाकरणत्वमान्वीक्षिकीत्वमित्यादिरीत्या पृथक्-पृथक् वैदिकसिद्धान्तसंरक्षिण्याम् लक्षणमुक्तमस्ति इत्यनयोर्लक्षणयोर्विवेचने सति मनुसम्मतं आन्वीक्षिकीनिष्ठं त्रयीत्वं चाणक्यस्यापि निर्विवादमेव। तथात्वेपि उक्तयथार्थज्ञानभाव्यकभावनाकरणत्वरूपम् आन्वीक्षिकीत्वन्तु स्वरूपतः त्रयीत्वस्वरूपात् विभिन्नमेव । इत्यत्र नास्ति मनोरपि वैषम्यम् । अतः उक्तस्वरूपद्वयमादाय चाणक्येन अभिहितः विद्याविभागः आन्वीक्षिक्याम् त्रय्याअन्तर्भावस्य प्रतिपादनकर्तुः मनोः मतेन विरोधं न भजते । एतत्सविस्तरं वैदिकसिद्धान्तसंरक्षिण्यां प्रपञ्चितमस्ति—

एतेन "ननु च मानवानामिदं मतं न मनोः नैतदेवम्, तत्रोक्तशास्त्राध्ययनादेव ते मानवाः न तेषां पृथक् दर्शनमस्ति" इत्यग्रिमः जयमङ्गलाग्रन्थः पूर्वोक्तस्य नन्वित्यादिनोक्तमतस्य खण्डनाय प्रस्तुतः साधु सङ्गच्छते । नन्वेवं मनुचाणक्योभयमतसाधारण्येन यदि त्रयीत्वमान्वीक्षिकीत्वम् च त्रय्यां स्वीक्रियते तर्हि विद्यायाः चतुर्धा विभागः कथमुपपद्येत इति चेन्न । उपधेयसङ्करेऽपि उपाधेरसाङ्कर्यात् ।[2]

"मनोः शिष्याः" इति । मनुशास्त्राध्ययनज्ञानजन्यफलवन्तः इत्यर्थः ।

---

१ यत्तु किमर्थं वेदवाक्यान्येव नोपसङ्गृहीतानीति संप्रदायविनाशभीतेः" । इति । अ० १ पा० ३ अ० १

२ स्पष्टीकृतञ्चैतत् हेत्वाभासगदाधर्याम् —

"हेत्वन्तरमाह—उपधेयेति । असङ्करात् ज्ञानासङ्करात् । यद्वा ननूपजीव्यत्वमेव कथं विषयाभेदादित्यत आह उपधेयेति असङ्करात्-भेदात् ।" इति । (पृ० १८११ असिद्धिप्रकरणम् ।)

वार्ता दण्डनीतिश्चेति बार्हस्पत्याः—संवरणमात्रं हि त्रयी लोकयात्राविदः[1] इति ।

श्रीमूला

बृहस्पतिशिष्याणां मतमाह—वार्त्ता दण्डेत्यादि । त्रय्या विद्यान्तरत्वाभावे हेतुमाह—संवरणमात्रं होति । त्रयीलोकयात्राविदः वार्तादण्डनीत्यनुष्ठानलक्षण-लोकतन्त्रविदुषः, संवरणमात्रं हि नास्तिकोऽयमिति लोकनिन्दाद्वारसंवृतिसाधनमेव केवलम् । लोकतन्त्रसम्यङ्निर्वहणसमर्थमपि त्रय्यपरिग्राहिणं सन्तं नास्तिक इति लोको निन्देदिति त्रयीपरिग्रहस्य यथोक्तनिन्दाद्वारगोपनमात्रफलत्वेनाऽल्पप्रयोजन-त्वान्न सा विद्यान्तरमित्यभिप्रायः । त्रयीनिरासेन तदन्तर्गताया आन्वीक्षिक्या अपि निरासः सिद्धः ।

वैदिकसिद्धान्तसंरक्षिणी

यथाऽऽन्वीक्षिकी न राजवृत्तिस्तथा त्रय्यध्ययनमपि मास्तु राजवृत्त्यन्न्तर्गतं, यतः वक्ष्यमाणरीत्या अर्थलाभाय प्रवृत्तेन राज्ञा स्वयमान्वीक्षिकीकुशलत्वाभावेन धर्मं-तत्प्रतिपादकवेदविषये सन्दिग्धमतिनापि यथा अर्थः प्राप्येत तथा प्रजायां धर्मभावना प्रचारणीया, तावतैव सर्वं सुस्थमिति मन्वानानां बार्हस्पत्यानां मतमाह वार्तेति । बार्हस्पत्याः बृहस्पतेः शिष्याः । शिष्यप्रदर्शनं मानवमतसादृश्यलाभाय । विश्वासोत्पा-दनद्वारा लोकयात्रार्थं संवरणमावश्यकमित्याह संवरणेति । परलोकविषये स्वस्य सन्देहेपि लोके विद्यमानायाः परलोकभावनायाः अप्रत्याख्यानार्थं कञ्चुकवत् अति-परिश्रमेण त्रयी उपयोक्तव्येति भावः । तदेव दर्शयन्नाह-लोकयात्राविद इति । लोकस्य चतुर्वर्णाश्रमस्य । यात्रा यथावद्विश्वासपूर्वकमनुरागमुत्पाद्य निर्बाधतया सुखमयं जीवनम् । तद्विदः कुशला इति यावत् । वेदाध्ययनं ब्राह्मणादिभिः संपाद्यत एव, राज्ञा तत एव त्रयी बोद्धव्येति राजवृत्त्यन्तर्गततया पृथक्धर्मप्रतिपादकविद्याया ग्रहणं न कृतं बार्हस्पत्यैरिति भावः ।

जयमङ्गला

बार्हस्पत्या इति । बृहस्पतेः शिष्याः । त एवमाहुः वार्तादण्डनीतिफलैव[2]

नी० टी १. लोकव्यवहारविदो राज्ञः ।

अशुद्धम्

२. दण्डनीतिफलैव, त्रयी

इदं त्रय्या विशेषणम् तेन त्रय्याः फलं वार्ता दण्डनीतिश्च इत्यवगम्यते । अर्थात् वार्तायाः दण्डनीतेश्च सम्यक् प्रचारणाय एतन्मते त्रयी उपयुज्यते वक्ष्यति च एतत् "निग्रहरुचि" रितीत्यादिना इति भावः

जयमङ्गला

त्रयी धर्मोपयोगिनी, अतः पृथिव्या लाभपालनयोर्वार्तादण्डनीती एवोपकारिण्यौ। तस्मात् राज्ञो द्वे एव विद्ये।

जयमङ्गलाक्रोडपत्रम्

अथ अर्थशास्त्राचार्यस्य बृहस्पतेः मतं विवेचयितुमाह—बृहस्पतेः शिष्या इति।

बृहस्पतिमततात्पर्यम्

अत्रेदं बोध्यम्। बृहस्पतिः विद्याविभागपर्यालोचनावसरे राजवृत्तित्वेन त्रयीं पृथक्तया न निबध्नाति तथापि त्रयीं निष्फलां न मनुते। तस्या उपयोगित्वस्य स्वयं तेन अभिहितत्वात्। किन्तु मनुना स्वातन्त्र्येण यथा धर्मज्ञानाङ्गतया त्रय्याः पृथक् उपन्यासः कृतः तथा अत्र नोपन्यस्यते। किन्तु त्रय्यां अर्थज्ञानाङ्गत्वं स्वीकृत्य अर्थार्थं यथा त्रयी उपयुज्यते तथा तस्याः उपयोगः कर्तव्यः। एवञ्च विद्याभूम्याद्यर्थज्ञान-भाव्यकभावनाकरणत्वरूपमेव वार्तात्वं त्रय्यां स्वीक्रियते। न अतः पृथक् त्रयीस्वरूपं किञ्चिदस्ति। इत्यस्य बृहस्पतिमतस्य मनुमतापेक्षया विशेषो बोध्यः। उपरिष्टाच्चैतद् स्फुटीकरिष्यते। इदमेव अभिप्रेत्याह—वार्तेति। धर्मोपयोगिनीति विश्वासार्थमिति शेषः।

बृहस्पतिमततात्पर्यस्फुटीकरणम्

भगवान् बृहस्पतिः यान् शिष्यान् पुरस्कृत्य स्वमतं जगाद ते शिष्याः अतीव तपस्विनः अमरावत्यादिनगरपर्यन्तं गमनसमर्थाः ब्रह्मज्ञाः असुरविशेषाः बभूवुः, इतीतिहासतः स्पष्टम्। तथाविधानां त्रय्याः धर्मज्ञानाङ्गतया उपयोगित्वं नास्ति, नरकादिगमनभयाभावात् 'न तस्य प्राणा उत्क्रामन्ति' इत्युक्तत्वाच्च। तथापि लोक-स्थितये तैः ब्रह्मज्ञैः वार्तां दण्डनीतिञ्च प्रचारयद्भिः लोकयात्रायाः निर्बाधतयाऽर्थ-कामसमृद्ध्यासह यथोन्नतिर्भवेत् तथा प्रयतमानैः धर्मप्रचारणाय त्रयी स्थापयितव्या। इति बृहस्पतेराशयः।

"बृहस्पतिमतेन धर्मस्योपयोगित्वम्"

ननु अर्थज्ञानाङ्गतया अपेक्षितायां वार्तायां अपृथक् भावेन स्थितया त्रय्या धर्मः लोकेषु किमर्थं प्रचारयितव्यः? इति चेत् उच्यते। यदि धर्मज्ञोऽपि राजा वार्ता-न्दण्डनीतिञ्च पुरस्कृत्य धर्ममुपेक्ष्य च प्रवर्तते तर्हि अर्थप्रधानोऽयं रौद्रप्रकृतिः क्रूर-स्वभावः इति लोकैः मन्येत। तद् वक्ष्यति। "अर्थमात्रपरोऽयं निग्रहरुचिः इति परि-वादस्य यत् संवरणं प्रच्छादन"मिति। तेन तद्राजविषये अयं किं कदा कुर्यादिति शङ्का लोकेषु समुत्पद्यते सा च परक्रौर्यात् स्वदुर्नयाद् वा भवति उत्पन्नायाञ्च शङ्कायां राज्यघटकेषु अमात्यादिवर्गेषु यत्र ऐक्यमपेक्ष्यते तत्र भेदः उत्पद्यते। तदुक्तं "शङ्काजननं निर्भर्त्सनञ्च भेदः" इति। स च राज्यस्य विनाशाय मूलभूतं तत्त्वमिति मूलकृतैव वक्ष्यते। अतः सङ्घे एकत्रावस्थितेषु परस्परं शङ्कानां अवसरः

जयमङ्गलाक्रोडपत्रम्

यथा न भवेत् तथा सर्वैः प्रयत्नः विधेयः। तत्र धर्मरुचिरेव कारणं भवितुमर्हति। इति धर्मज्ञानाङ्गतया त्रय्याः अनुपयोगित्वं ब्रह्मज्ञानां दृष्ट्या अस्तीऽति वदतापि बृहस्पतिना वार्तायां त्रयीमन्तर्भाव्य प्रचार्य च आत्मनि धर्मरुचित्वं प्रकाश्य वार्ता साधिता।

एतदेव अभिप्रेत्य कामसूत्रे धर्मस्योपयोगित्वं स्थिरीकृतमस्ति।[1]

किञ्च उपनिषदापि धर्मस्य महत्त्वं गायन्त्या उक्तं 'धर्मो विश्वस्य जगतः प्रतिष्ठा' इति। (ना० उ०)

"बृहस्पतिमते केचित्तु मतम्"

अत्र केचिद्—बृहस्पतेः तच्छिष्याणां ब्रह्मज्ञानाञ्च उपयुक्तं मतमनभिसन्धाय बार्हस्पत्याः इति वचनेन अन्यमेवाशयं वर्णयन्ति। तथाहि—अर्थलाभाय हि प्रवृत्तो राजा त्रयीं वाजवृत्तित्वेन मा स्वीकरोतु। लोकेषु तैस्तैः त्रयी आन्वीक्षिकी च अधीयते, अध्याप्यते, प्रचार्यते च। तेषां पालनमात्रं राज्ञा कर्तव्यमू। विरोधो न कर्तव्यः। तत्प्रचारेणैव सर्वत्र धर्मस्य प्रचारो भविष्यत्येव इति धर्मश्रद्धोऽयं लोकः करादीन् यथासमयं प्रदाय राजानं उपकरिष्यति। राजापि च यथा तेषु

---

१ न धर्मांश्चरेत्। एष्यत्फलत्वात्। सांशयिकत्वाच्च ॥ २१ ॥ को ह्यबालिशो हस्तगतं परगतं कुर्यात् ॥ २२ ॥ वरमद्य कपोतः श्वो मयूरात् ॥ २३ ॥ वरं सांशयिकान्निष्कादसांशयिकः कार्षापणः। इति लौकायतिकाः ॥ २४ ॥ शास्त्रस्यानभिशङ्क्यत्वादभिचारानुव्याहारयोश्च क्वचित्फलदर्शनान्नक्षत्रचन्द्रसूर्यताराग्रहचक्रस्य लोकार्थं बुद्धिपूर्वकमिव प्रवृत्तेः दर्शनाद्वर्णाश्रमाचारस्थितिलक्षणत्वाच्च लोकयात्राया हस्तगतस्य च बीजस्य भविष्यतः सस्यार्थे त्यागदर्शनाच्चरेद्धर्मानिति वात्स्यायनः। २ अ० १ अ० ५७ पृष्ठ.

तथा उपाध्यायनिरपेक्षायाम्—का० अध्याय २ श्लो० सं० ४

"बार्हस्पत्यास्तु विद्याद्वयमेव मन्यन्त इति दर्शयन्नाह— वार्तेति। वार्ता च दण्डनीतिश्चेति वक्ष्यमाणलक्षणे द्वे एव विद्ये इत्यवस्थिताः कृतनिश्चयाः। कुत इत्याह—लोकस्यार्थप्रधानत्वादिति। चातुर्वर्ण्यस्य लोकस्यार्थो भूम्यादिलक्षणः प्रधानो वृत्तिहेतुत्वात्। स चार्थो वार्तायां लभ्यते, दण्डनीत्या पाल्यत इति भूम्यादेर्लाभपालयोरिष्टत्वात्। या आन्वीक्षिकी सा त्रयीविशेषः। सा पि त्रयी संवरणमात्रप्रयोजना "धर्मरुचिरुपांशुदण्डं प्रयुञ्जीत" इति वचनात्। तेषां मते धर्माधर्मौ न स्तः, परलोकाभावात्। तत्र त्रयी निष्प्रयोजना, केवलं यदा उपांशुदण्डं प्रयोक्तुमिच्छेत् तदा त्रयीं संवरणार्थं प्रयुञ्जीत, तदा त्रय्यनुष्ठानसंवृतः परेषामशङ्कनीयो भवतीति। एतदेव प्रयोजनं नान्यदिति, न पृथग् विद्यात्वेन त्रयी गण्यत इति भावः इत्येवं सुरपुरोधसः शिष्या अन्तेवासिनो मन्यन्ते ॥

जयमङ्गलाक्रोडपत्रम्

स्वविषये अश्रद्धा न भवेत् तथा धर्मज्ञान् पुरस्कृत्य धर्मान् ज्ञात्वा प्रजां परिपालयेत्।[२] इति

केचित्तु मतेन राज्ञः समस्त विद्यालाभः।

ननु एतन्मते राज्ञा आन्वीक्षिकी त्रयी च राजवृत्तौ अन्तर्गतत्वाभावात् नाध्येतव्या इति निर्णीतम्। तर्हि तद् विषये राज्ञः अज्ञत्वप्रसङ्गः स्यात्।

न स्यात्, यदि सः सद्भिः उपासितो भवेत्। अर्थात् तत्तद्विद्याध्येतॄणां स्वकीयसभायां सदस्यत्वेन वरणं यदि राज्ञा क्रियेत तर्हि राजमण्डले अज्ञत्वस्य कारणं नास्ति। एवंविधं तत्तद्विद्यानिपुणोपासकत्वं प्रह्लादेन आत्मनि सम्पाद्य प्रजानुरागभाजनद्वारा श्रीः उपार्जिता। इति सः स्वयमेव स्वगृहे समागतमिन्द्रं बोधयामास। द्रष्टव्यं चैतन्महाभारते शान्तिपर्वणि।[२] (१२४ अ०, ३४, ३५, ३६, ३७, ३८ श्लोकाः)

---

२ तदेव उक्तम् कामसूत्रे—"तं श्रुतेर्धर्मज्ञसमवायाच्च प्रतिपद्येत" इति।

(२ अ० १ अधिकरण ८ मूत्र

शास्त्रे अनधिकृतो वा धर्मज्ञसमवायात् श्रुतिस्मृत्यर्थ तत्त्वज्ञसंसर्गादित्यर्थः। प्रतिपद्येत -अवबुद्ध्येत इति।

२ प्रह्लाद उवाच—

नासूयामि द्विजान्विप्र राजाऽस्मीति कदाचन।
काव्यानि वदतां तेषां संयच्छामि वहामि च॥ ३४॥
ते विश्रब्धाः प्रभाषन्ते संगच्छन्ति च मां सदा।
ते मां काव्यपथे युक्तं शुश्रुपुमनसूयकम्॥ ३५॥
धर्मात्मानं जितक्रोधं नियतं संयतेन्द्रियम्।
समासिञ्चन्ति शास्तारः क्षौद्रं मध्विव मक्षिकाः॥ ३६॥
सोऽहं वागग्रविद्यानां रसाना मवलेहिता।
स्वजात्यामधितिष्ठामि नक्षत्राणीव चन्द्रमाः॥ ३७॥
एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमम्।
यद्ब्राह्मणमुखे काव्यमेतच्छ्रुत्वा प्रवर्तते॥ ३८॥

अतएव नीतिसारे लोकसङ्ग्रहप्रकरणे सद्वृत्तेषु सत्सङ्गस्य परिगणना कृता इत्यवगम्यते। तदुक्तं—

वाक्सूनृता दया दानं दीनोपगतरक्षणम्।
इति सङ्गः सतां साधुहितं सत्पुरुषव्रतम्॥ तृ० सर्ग २ श्लोक
जगन्मृगतृषातुल्यं वीक्ष्येदं क्षशभङ्गुरम्।
सुजनैः सङ्गतं कुर्यात् धर्माय च सुखाय च॥
सेव्यमानस्तु सुजनैर्महानतिविराजते।—१३, १४, १५ श्लो०

जयमङ्गला

किन्तु वार्तादण्डनीत्योः प्रवर्तमानस्यार्थमात्रपरोऽयं निग्रहरुचिरिति परिवादस्य यत्संवरणं प्रच्छादनं धर्मविजयित्वख्यापनार्थम्, तन्मात्रेणोपयुज्यते। लोकयात्राविद

जयमंङ्गलाक्रोडपत्रम्

एतेन राज्ञः धर्मरुचित्वं उपपन्नं भवति। नापि च तेन राजवृत्तित्वाभावात् त्रयी अध्येतव्या भवतीति। अत एव अत्र कौटिल्येन बार्हस्पत्या इत्युक्त, न तु बृहस्पतेः इति।

अस्य मतस्य औचित्यं 'न तेषां पृथक् दर्शनमस्ती'ति पूर्वोदाहृतटीकानुरोधात् स्वयं सुधीभिः ऊहनीयम्।

निगमयति तस्मादिति—

अर्थज्ञानाङ्गतयैव राजवृत्तिः अस्तीति यदि बृहस्पतिमतं तर्हि राज्ञा धर्मरक्षणं कुतः कर्तव्यम्? इति शङ्कां समाधातुमाह—किन्त्विति।

धर्मविजयित्वख्यापनार्थम् इति

ननु धर्मविजयित्वख्यापनेन किं फलमिति चेत्? उच्यते। राजानः त्रिविधा भवन्ति। धर्मविजयी, असुरविजयी, लोभविजयी इति। तेषु धर्मविजयिनः राज्यं कीदृशं भवतीति प्रदर्शयितुं अस्य शास्त्रस्य उपक्रमः। अर्थात्। शास्त्राश्रयणमन्तरा भूम्यादयः अर्थाः प्राप्तुं न शक्यन्ते इति नास्ति अभिप्रायः शास्त्रस्यास्य, अपितु न्यायतः अर्जनं कथं भवितुमर्हतीति निरूपयितुमेव शास्त्रमिदं प्रवृत्तम्। तत्र यदि शास्त्रमन्तरा भूम्यादयोऽर्थाः अर्ज्यन्ते तर्हि अर्थस्य आकाङ्क्षायाः कदाचिदपि पूर्त्यसम्भवात् लाभानुसारेण लोभस्य नियतत्वाच्च तदनुबन्धिकामस्यापि अमर्यादितत्वात्

सुधालिप्त इव श्रीमान्प्रासादश्चन्द्ररश्मिभिः॥
हिमांशुमाली न तथा नोत्फुल्लकमलं सरः।
आनन्दयनि चेतांसि यथा सज्जतचेष्टितम्॥

सेव्यमान इत्यादि—विराजत इति। धर्मार्थोपचितः इति शेषः। सुजनैः धर्मार्थोपदेशदायिभिः सेव्यमानस्य धर्मार्थोपचयोपपत्तेः अन्यथा सत्सेवामात्रेण कथं विविधप्रकारेण दीप्यते? इति। एवंरीत्या सभायां सम्मिलितैः विद्वद्भिः सङ्गतस्य राज्ञः अतिशयिततरा शोभा कीदृशी मनोरञ्जिका वर्तते इति एकेन कविना उक्तम् यत् तदत्र प्रसङ्गात् स्मार्यते।

पयसा कमलं कमलेन पयः पयसा कमलेन विभाति सरः।
मणिना वलयं वलयेन मणिः मणिना वलयेन विभावि करः।
शशिना च निशा निशया च शशी शशिना निशया च विभाति नभः।
भवता च सभा सभया च भवान् भवता सभया च विभाति नृपः।

सु० भा०

जयमङ्गला

इति लोकव्यवहारविदः। अन्यथा तदुक्तं धर्ममनाचरन् लोक[1]व्यवहाराद् बाह्यः स्यात्। तथा चोक्तम्—

"योगाय वार्ता लोकस्य नीतिः क्षेमाय चोदिता।
त्रयी तत्रापि मघवन् लोकपक्तिप्रयोजना।" इति।

जयमङ्गलाक्रोडपत्रम्

तेषु अर्थार्थिषु असुरविजयित्वं लोभविजयित्वं च पर्यवसन्नं भवति। तेन प्रजायाः रञ्जनं यदपेक्षितं तत्स्थाने स्वार्थपरायणत्वात् अपरागः नियततया उत्पद्यते। ततश्च "अनात्मवान् नयद्वेषी वर्धयन्नरिसंपदः। प्राप्यापि महदैश्वर्यं सह तेन विनश्यति"॥ इत्युक्तरीत्या, विनाशः आपद्येत। अतः प्रजानुरागसम्पादनार्थं असुरविजयित्वं लोभविजयित्वञ्च अपसार्य राज्ञा धर्मविजयित्वमेव प्रख्यापनीयं भवति।[2]

अत एव चार्वाकोऽपि विना धर्मविजयित्वख्यापनं लोकयात्रा यथावन्न भविष्यतीति मन्यमानः नीतिस्थापनां चिकीर्षुः तदन्तर्गततया धर्ममनुमन्यते।[3] तद्द्रष्टव्यम्—सर्वदर्शनसङ्ग्रहे चार्वाकमतनिरूपणे।

एतेन अत्र अर्थशास्त्रे आन्वीक्षिक्यां लोकायतिकपदेन चार्वाकमतं सङ्गृहीतं यथा, तथा बौद्धमतमपि कुतो नसङ्गृहीतम्? इति शङ्का परास्ता। चार्वाको हि धर्मं निषेधयितुं प्रयतमानः प्रत्यक्षमेव प्रमाणत्वेन उररीकृत्य लोकयात्रास्थितिं यदा पश्यति तदा नीतिमुखेन धर्ममनुतिष्ठासति अनुतिष्ठति च। न तथा इतरे बौद्धादयः। तदिदं विशदीकर्तुमाह—लोकयात्रेति।

'लोकपक्तीति'। लोकानुराग इत्यर्थः, तत्प्रभवत्वात् अर्थस्य न्याय्यस्य।

अशुद्धम्

१ लोको व्यवहारात्

लोकव्यवहारादिति पाठे कल्पिते तदुक्तं धर्ममनाचरत् लोकव्यवहारात् राजा बाह्यः स्यात् अर्थात् लोके अविश्वास्यःस्यादि यावत इति अर्थो बोध्यः।

२. तदुक्तम्—का० नी० १ सर्गे ११ श्लोके :–

धार्मिकं पालनपरं सम्यक् परपुरञ्जयम्।
राजानमभिमन्यन्ते प्रजापतिमिव प्रजाः॥ ११॥

:'कीदृटशं पुनस्तमिच्छन्तीत्याह—धार्मिकमित्यादि। धर्मासुरलोभविजयिनस्त्रयो राजानः। तेषां धार्मिकं धर्मविजयिनं धर्माविरोधेन प्रवृत्तत्वात्। प्रजापतिमिवाभिमन्यन्ते प्रजाः लोकाः लोभासुरविजयिनौ तु सर्वलोकोद्वेगकारित्वादनभिमतौ। इति ज० मं०

३ नीतिकामशास्त्रानुसारेण अर्थकामावेव पुरुषार्थौ मन्यमानाः पारलौकिकमर्थं अपह्नुवानाः चार्वाकमतमनुवर्तमानाः एव अनुभूयन्ते। स० द० सं० अ० १ इति।

अतएव धर्मकामलिप्सुरर्थे प्रवर्तते तन्मूलत्वात्तयोः (का०नी० व्याख्या ज० मं०, २ सर्ग० ३ प्र०) इति जयमङ्गलोक्तिः सङ्गच्छते।

जयमङ्गलाक्रोडपत्रम्

राजवृत्तौ त्रयीसन्निवेशतात्पर्यम्

नन्वेवं बृहस्पतिरपि वार्तायां त्रयीमन्तर्भाव्य तां उपदिशत्येव अतः अनुष्ठाने नास्ति अन्तरम् चाणक्यमतापेक्षया बृहस्पतिमते इति स्थितम्। तर्हि चाणक्यः तां राजवृत्तौ किमभिप्रायेण पृथक् कृतवान्, इति चेत् विश्वासार्थं लोकयात्रार्थं वा धर्मो नास्तीति वदता ब्रह्मसाक्षात्कारेण कृतकृत्यत्वात् सोऽपेक्षितो नास्तीति जानता वापि राज्ञाधर्मः संरक्षिणीयश्चेत् धर्मत एव स कुतो न संरक्षणीयः। इत्याद्यनेकाभिप्रायाः स्वमतनिरूपणावसरे निरूपयिष्यन्ते।

चार्वाक मतप्रचारको बृहस्पतिः

ननु चार्वाकमतस्य उद्धरणं सर्वदर्शनसङ्ग्रहात् प्रदर्शितमस्ति। तत्र इदं मतं बृहस्पतिना उपदिष्टम् इति निरूपितमस्ति। तद्यथा—'बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्वाकेण" (स० द० संग्रह चा० दर्शनम्)। इति

तत्रायं प्रश्नः। बृहस्पतिर्देवगुरुः कथमिदं चार्वाकमतमुपदिष्टवान् ? इति। अत्र वदामः। 'साम्राज्यं भोज्यं, स्वाराज्यं वैराज्यं वा यस्य आकाङ्क्षितं तेन तत्तल्लाभार्थं अहिंसादिधर्मान् परिपाल्य स्वस्वाधिकारानुसारेण वेदे दितानुष्ठाने यदि प्रयत्येत तर्हि तेन साम्राज्यादि अवश्यं प्रतिबन्धकापसारणे प्राप्येत, इत्येवं निर्णीतमस्ति। तद्दृष्ट्वा कश्चित् दयादिधर्मान् अनुतिष्ठति क्लेशञ्च सहते फलञ्च लभते। फलोपलब्ध्यनन्तरं तु पूर्ववत् दयादिसाधारणधर्मान् स अनुतिष्ठेत् न्यायतः प्रजाः अनुपालयेद्वा इत्यत्र नास्ति आश्वासः। स्फुटञ्चैतत् प्राचीन इतिहासे। तमःप्रकृतयः असुरविजयिनः, रजःप्रकृतयः लोभविजयिनो वा राजपदाधिष्ठिताः ये राक्षसपदभाजो ऽभूवन् ते सर्वेऽपि आदौ वेदोदितपद्धतिमेव अलङ्कुर्वन्ति स्म। ततः राज्यं प्राप्य पूर्वावस्थिताम् तामसीमेव प्रकृतिं प्रदर्शयामासुः। तथापि तेषु प्रेमपरतन्त्रः शुक्राचार्यः प्राप्तस्य राज्यस्य अनुच्छेदाय ब्रह्मचर्यादिधर्मान् पालयितुं उपदिदेश। मन्त्रसाफल्याय रक्षसां राज्यस्य निष्कण्टकत्वञ्च प्रापयितुं स्वयं हिमाचलं सिषेवे। तपश्च तेपे। तत्प्रसङ्गे जन्मत एव दुष्टस्वभावाः राक्षसाः यदि निष्कण्टकं राज्यं स्थिररूपेण प्राप्स्यन्ति तर्हि जगदिदं एकत्र सम्पत्तिसङ्कोचेन अर्थकामयोः सुखात् सदा वञ्चितं भवेत् इति ज्ञात्वा शुक्रस्य अनुपस्थितौ स्वयं शुक्रस्वरूपं गृहीत्वा तान् मोहयितुं राक्षसानां गृहं गुरुः जगाम। "शुक्रश्च तपस्तप्त्वा स्वगृहे परावृत्तः त्वया १० वर्षपर्यन्तम् रतिसुखप्रदानेन वञ्चयितव्यः" इति आदिश्य, जयन्तीनाम्नीं कन्यां शुक्रसमीपे प्रेषयमास। तत्सेवया प्रसन्नः शुक्रः तया सह रेमे। एतन्मध्यवर्तिसमये कृतकशुक्रः गुरुः राक्षसप्रकृतीन् वाक्पाटवेन मोहयामास।

वैदिकसिद्धान्तसंरक्षिणी

(तदिदं वाक्पाटवं सर्वदर्शन संग्रहे उक्तम्।[१])

तमिमं मध्यवर्तिसमयं व्यतिक्रम्य महर्षिः शुक्राचार्यः स्वशिष्यान् असुरप्रकृतीन् उपदेष्टुमाजगाम। तस्मिन् समये कृतकशुक्रः गुरुः तत्रैव समासीत्। तयोरुभयोः अस्माक गुरुः कः ? इति राक्षसाः सन्दिदिहुः। परस्परञ्च उभावपि कलहञ्च चक्रतुः। तदानीम् असुरप्रकृतिभिः एवं निर्णीतं यत् उभाभ्यामपि गुरुभ्यां स्वीयं स्वीयं मतं निरूपणीयम्। यस्य मतं अस्मभ्यं रोचते स एव अस्माकं गुरुः स्यादिति। तदानीं कृतकशुक्रेण सर्वदर्शनसंग्रहस्थमुपयुक्तं मतं, तथा शुक्रेण वास्तविकेन लोकयात्रोपयुक्तं औशनससम्मतञ्च निरूपितम्। परन्तु मोहावेशेन असुरप्रकृतयः कृतकशुक्रमतमेव

---

१ न स्वर्गो नापवर्गोवा नैवात्मा पारलौकिकः।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः।
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनानां जीविका धातृनिर्मिता।
पशुश्चेत् निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति।
स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते।
मृतानामपि जन्तूनां श्राद्धं चेत् तृप्तिकारणम्।
निर्वाणस्य प्रदीपस्य स्नेहः सम्वर्धयेत् शिखाम्।
गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम्।
गेहस्थकृतश्राद्धेन पथि तृप्ति रवारिता।
स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः।
प्रासादस्योपरिस्थानां अत्र कस्मान्न दीयते।
यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिवेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः।
यदि गच्छेत् परं लोकं देहादेष विनिर्गतः।
कस्माद् भूयो नचायाति वन्धुस्नेहसमाकुलः।
ततश्च जीवनोपायः ब्राह्मणैर्विहितस्त्विव।
मृतानां प्रेतकार्याणि न त्वन्यद् विद्यते क्वचित्।
त्रयो वेदस्य कर्तारः भण्डधूर्त—निशाचराः।
जर्फरी तुर्फरीत्यादि पण्डितानां वचः स्मृतम्।
अश्वस्यात्र हि शिश्नं तु पत्नीग्राह्यं प्रकीर्तितम्।
भण्डैस्तद्वत् परञ्चैव ग्राह्यजातं प्रकीर्तितम्।
मांसानां खादनं तद्वत् निशाचरसमीरितम्। इति।

सायणमाधवीये

जयमङ्गलाक्रोडपत्रम्

रोचयामासुः। तस्याऽयं परिणामोऽभूत् यत् असुरप्रकृतयः लोकद्वेष्यतां गताः, पर्यन्ते समूलं व्यनश्यन्, इति।

एवं रीत्या धर्मसंस्थापनमुखेन अर्थकामार्जनाय प्रवृत्तान् असुरप्रकृतीन् मोहयितुं अगत्या देवगुरुः कृतकशुक्रो भूत्वा यत् लोकायतिकं मतं प्रेरयामास तदेव चार्वाकमतमिति नाम्ना चारुवाक्त्वात् अद्य लोके प्रवर्तते। तदिदं स्पष्टीकृतम्—अर्थशास्त्रिय-जयमंगलायां-'लोकायतं बार्हस्पत्यं लोकाय बुद्धिं तनो'तीति नैरुक्तम्' इति। (अ० १ अं० १)।

चार्वाकमतप्रचारस्य नीतित्वम्

किञ्च यथा चार्वाकमतं उक्तोद्देश्येन प्रवर्तितं तथा स्वयं भगवान् बुद्धो भूत्वा अर्थकामप्रधानान् असुरप्रकृतीन् मोहयितुं बौद्धमतं प्रसारयामास। यतः—यद्येवं यथावसरमेतन्मतं प्रकाश्यतां नोपगच्छेत् तर्हि स्वभावतः असुरप्रकृतयः गृहीतदण्डाः अजेया भवन्ति। तत्रापि वेदोदितकर्माणि यथावत् कृत्वा यदि पुण्यवन्तो भवन्ति तर्हि सुतरामेव अजेयाः स्युः। लोकस्थितिश्च चिराय विनष्टा स्यात् इति। एतन्मतस्यापि-नीतित्वं सिद्धम् एतदनुबन्धी कश्चन अपरोऽपि इतिहासः समुपलभ्यते।

मिश्र[१] (Egypt) देशे कश्चित् समर्थः तत्र गत्वा तत्रत्यान् नागरिकान् हीनकर्मणः पराङ्मुखीकृत्य उत्तमकार्यकरणे स्वाभिमानमुत्पादयितुम् मूलतः संशोधयामास। तथा शुचिभूतेषु तेषु नागरिकेषु शर्मादिपदसंकेतेन चातुर्वर्ण्यं कल्पितवान्। ततः तेऽपि नागरिका दयाऽहिंसादिधर्ममाश्रित्य सर्वदेशेषु साम्राज्यं कर्तुमैच्छन्। तदा तेषु मोहमुत्पादयितुं तन्निरासाय बुद्धावतारो अभूत् इति।

एवमेव तस्मिन् तस्मिन् अवसरे अन्यत्रापि नास्तिकमतप्रचारः अपेक्षितत्वात् कृतः इति दिवोदासत्रिपुरादीनां इतिहासनिरूपणावसरे पुराणादिषु काशीखण्डादिषु दृश्यते। तस्मात् समयमपेक्ष्य गुरुणा कृतः नीतिसारप्रदिष्टेषु सामदानभेददण्डमायोपेक्षेन्द्रजालेषु उपायेषु मायायां अन्तर्भूतः चार्वाकमतप्रचारो न नीत्यसम्मतो भवति। अतएव भागवतादिषु बुद्धप्रशंसायां 'यज्ञकृतोऽतदर्हान्' इति या उक्तिः उपलभ्यते सा सङ्गच्छते इति।

---

१. तदुक्तं भविष्यत् पुराणे प्रतिसर्गपर्व। अ० ६

वासं कृत्वा ददौ ज्ञानं मिश्रदेशे मुनिर्गतः।
सर्वान् म्लेच्छान् मोहयित्वा कृत्वाऽथ तान् द्विजन्मनः॥ १२॥
सङ्ख्या दशसहस्रं च नरवृन्दान् द्विजन्मनाम्।
द्विसहस्रं स्मृता वैश्याः शेषाः शूद्रसुताः स्मृता॥ १३॥
तैः सार्धमार्यदेशे स सरस्वत्याः प्रसादतः।
अवसद्वै मुनिश्रेष्ठो मुनिकार्यंरतः सदा॥ १४॥

जयमङ्गलाक्रोडपत्रम्

चार्वाकमतस्य वैदिकाना कृते उपयोगित्वम् ।

ननु उपरिनिर्दिष्टं चार्वाकमतं बृहस्पतिना प्रोक्तमिति कृत्वा तद् बार्हस्पत्यमित्युच्यते । तेन बार्हस्पत्यत्वात् वैदिकैरपि इदं मतं अनुष्ठेयं भवतीति भ्रान्तिर्भवति । तदपेक्षया स्पष्टतया चार्वाकमतत्वेन शास्त्रकृद्भिः यदि तन्मतं उद्घोषितं भवेत् तर्हि इयं भ्रान्तिः न प्रसज्येत । तथा कुतो न कृतम् ? इति चेत्, नहीदं चार्वाककतं सर्वथा परित्याज्यमित्युच्यते, अपितु पर्यन्ते राजनीत्युपदिष्टात्मगुणसंपत्तिमता सकलस्वामिकर्मकुशलेन निर्व्यसनिना राज्ञा लोकयात्रार्थं स्वीयनीत्यनुसरणं चार्वाकमतरीत्यापि कर्त्तव्यम् । अर्थात् 'नीतिकामशास्त्रानुसारेण अर्थकामावेव पुरुषार्थौ' इत्याद्युद्धृतसर्वदर्शनसङ्ग्रहोक्तरीत्या तस्य वर्तनमावश्यकम् । नहि सः राजा 'अहं ब्रह्मज्ञोऽस्मि' इति कृत्वा लोकाचारविरुद्धमन्याय्यं वा प्रत्यक्षप्रमाणविरुद्धं वा कर्म अनुतिष्ठेत् । इत्यभिप्रायेण चार्वाकमतस्यापि क्वचित् कदाचित् सङ्ग्राह्यत्वमस्ति । अतएव 'संवरणार्थं त्रयी' इति ग्रन्थेन मूलकृता चार्वाकमतम् अत्र प्रत्यपादि ।

यदि च इदं चार्वाकमितं बार्हस्पत्यमतत्वेन शास्त्रकर्तृभिः निरूपितं न भवेत् तर्हि ब्रह्मविद्भिः राजभिः इदं मतं सङ्गृहीतं न स्यात् । इत्यापत्तिभिया चार्वाकमतं बार्हस्पत्यमतत्वेन उपदिष्टं ज्ञेयम् ।

ब्रह्मज्ञस्य नृपतिपदाधिकारित्वम्

ननु ब्रह्मज्ञ एव मानवः नृपतिपदे अधिष्ठितः राजा भवितुमर्हति स च चार्वाकमतानुसारेण नीतिवर्तनाधिकारीति उच्यते । परं ब्रह्मज्ञस्यैव तदधिकारित्वमिति कुतो वक्तव्यम् ? तत्र ब्रूमः—सर्वेषां मनुष्याणां शासनाय शक्तिमतः राज्ञः आवश्यकता तदा भवति यदा मात्स्यन्यायः अपरिपालनञ्च प्रसृतं भवति इति निरूपितमस्ति वैदिकसिद्धान्तसंरक्षिण्याम् । तस्माद् राज्ञः प्रधानं कर्त्तव्यं यद् सर्वेषां यथावत् परिपालनम् । तच्च —

विना रागेण सर्वत्र सुखिनामनुमोदनम् ।
यथाशक्ति परित्राणं दुःखिनामविशेषतः ।। भावप्रकाशन पृ० १३५

इत्येवं भावप्रकाशनोक्तरीत्या पालकस्य मनःस्थितिसत्त्वे भवितुमर्हति । अन्यथा रागद्वेषपराधीनतायां अनौचित्यम् अन्याय्यता, सतामपरिपालनं दुष्टानामनिग्रहश्च इत्यादिदोषाः अपरिहार्यतया आपद्येरन् । एवंस्थिते "स यच्छीलः तच्छीलास्तस्य प्रकृतयो भवन्ति" इति जयमङ्गलानिर्देशानुसारेण सर्वासु सप्तविधासु प्रकृतिषु तेषामेव दोषाणां प्रसक्त्या पुनरपि मात्स्यन्यायः अपरिपाचनश्च यथास्थान मेव तिष्ठेत् । अतः एभ्यो दोषेभ्यः रक्षणाय समानरूपेण सर्वेषां सुखिनामनुमोदनं दुःखिनाञ्च परित्राणं यथाशक्ति स एव कर्तुमर्हति, यः स्थायिशमप्रकृतिसम्पन्नः

जयमङ्गलाक्रोडपत्रम्

स्यात्। एतत्प्रकृत्यभावे तु रागद्वेषाणां विलयनं कदापि न सम्भविष्यतीति साहित्यशास्त्रालोचनेन स्फुटतरं वक्तुं शक्यते। तदुक्तं भावप्रकाशने द्रष्टव्यम्।[1]

शमश्च स्थायिधृतिभावात् नातिरिक्तः। धृतिभावस्य च परिष्कृतं स्वरूपं ज्ञानप्रभामिश्रितानन्दप्रभात्मकमित्यादि सप्रपञ्चं प्रपञ्चितम्। पुनरुक्तिभयात् नात्र विमृश्यते। अतएव राज्यस्य मूलभूतं तत्वं सत्त्वं बुद्धिश्च वर्तते इति प्रागुक्तभारतीयराजनीतिसिद्धान्तोऽपि अत्र स्मर्तव्यः। तदेतत् क्रोडीकृत्य-कामन्दकेन ब्रह्मज्ञ एव राजा प्रथमः अधिकारी इत्यभिहितम्[2]।

यद्यपि यदा हि ब्रह्मज्ञो मानवः अभिषिच्यते राजपदे, तदा त्रय्याः आन्वीक्षिक्याश्चानुसरणं कृतमकृतमुभयमपि समानमेव, तस्य स्वर्गनरकादिपरलोकप्रसङ्गाभावात्। अतएव उपाध्यायनिरपेक्षायां—तेषां मते धर्मा-धर्मौ नस्तः' इति यत् प्रतिज्ञातमस्ति तद् ब्रह्मज्ञानं लक्ष्यीकृत्य समन्वितं भवतीति। तथापि "लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसो" ति, गीताप्रामाण्यात् प्रत्यक्षप्रमाणादिना लोकयात्रोपयोगित्वस्य सिद्धत्वाच्च

---

१. ६ अधिकारके। १३५ पृ०

शान्तो विषयहेयत्वदर्शनश्रवणादिभिः।
धर्माख्यानपुराणैश्च पुण्यतीर्थविगाहनैः॥
पुण्याश्रमनिवासैश्च योगिभिर्नित्यसङ्गमैः।
जडान्ध—बधिरादीनां तारतम्यावलोकनैः॥
व्याधिदारिद्रय—मरणैर्नारक्या यावनाश्रुतेः।
पुण्यक्षयप्रपतनकुयोनिश्रवणादिभिः ॥
क्लेशप्रयत्नवैफल्याद्दुःखत्रितयघातनैः ॥
इत्यादिभिर्विभावैः स्याच्छमात्मा कस्यचिद्रसः॥
यथाशक्ति परित्राणं दुःखिनामविशेषतः।
विना रागेण सर्वत्र सुखिनामनुमोदनम्।
शाकमूलफलैन्नैः शरीरस्थितिसाधनम्।
व्रतोपवासनियमो वल्कलाजिनधारणम्॥
अहिंसा सर्वभूतानामविरोधादनुग्रहः।
अङ्गेषु कार्श्यं कार्कश्यं स्नानं त्रिषवणोचितम्॥
ऋज्वायतासनं ध्यानं नासाग्राहितलोचनम्।
विषयेभ्यो नियमनमिन्द्रियाणां निवृत्तये॥
इत्यादयो विशेषाः स्युः प्रायः शान्तेषु योगिषु।

२. सुनिपुणमुपसेव्य सद्गुरुं शुचि रनुवृत्तिपरो विभूतये।
भवति हि विनयोपसंहितो नृपतिपदाय शमाय च क्षमः। इति।

जयमङ्गलाक्रोडपत्रम्

अग्रे वक्ष्यमाणं वर्णाश्रमाचारतत्वं दयाऽहिंसादिसाधारणधर्मतत्त्वं च त्रयीमनुसृत्य ब्रह्मज्ञेनापि राज्ञा अनुष्ठाय लोकपालनं मात्स्यन्यायस्य अपसारणं च कृतञ्चेत् चर्वाकमतमेव एवंरीत्या अनुष्ठितं भवति। अतएव ईदृशानां राज्ञां कृते तदधिकारानुसारेण एकदेशिकः बृहस्पत्युपदेशोऽपि सफलतां भजते। अतएव सः बृहस्पतिः देवगुरुः इति व्यपदिश्यते पुराणादिषु। तस्यायमर्थः—देवानां परलोकानपेक्षाणां ब्रह्मज्ञानां गुरुरिति। तस्मात् बृहस्पतिना ब्रह्मप्रोक्तात् लक्षाध्यायात्मकमूलग्रन्थात् अर्थाधिकारिकं शास्त्रं पृथक् कृतमस्तीत्यभिप्रायकं पूर्वनिर्दिष्टं कामसूत्रवचनं सुसङ्गतं भवति। अतः पर्यन्ते ब्रह्मज्ञानां कृते अनुष्ठेयत्वेन पर्यवसितं लोकयात्रोपयोगि बृहस्पत्युपदिष्टं चार्वाकमतमपि न असाधु इति स्थितम्।

चार्वाकमतस्य अन्यथानयनम्

नन्वेवं उपर्युक्तरीत्या बृहस्पत्युपदिष्टमिदं चार्वाकमतमतीव उपयोगि भाति तथापि तस्य अन्यथाप्रचारणं बृहस्पतिशिष्येषु असुरप्रकृतिषु कथमभूत्? इति चेत्, नायमपराधः बृहस्पतेः ब्रह्मज्ञस्य वा। अपितु तेषां अल्पज्ञानां तमःप्रकृतिरेव तत्र कारणम्। दृश्यते हि लोके यत् एकस्यैव गुरूपदिष्टंवाक्यस्य तदन्तेवासिनः स्वस्वप्रकृत्यनुसारेण अन्यादृशं अन्यादृशमर्थं कल्पयन्ति इति। प्रसिद्धं चैतत् ब्रह्मणः इन्द्रविरोचनाभ्यां सह संजाते संवादे—

कदाचित् वास्तविकतत्त्वजिज्ञासूभूत्वा इन्द्रविरोचनौ ब्रह्माणं प्रष्टुं जग्मतुः। स उवाच 'आत्मानं पश्यत' इति। तच्छ्रुत्वा इन्द्रः शरीरातिरिक्तमात्मानमेव अचिन्तयत्। विरोचनस्तु शरीरमात्मत्वेनाचिन्तयत् इति।[1] तद्वत् बृहस्पत्युपदिष्टचार्वाकमतस्य अन्यथानयनविषयेऽपि बोध्यम्।

ब्रह्मज्ञेन शास्त्रमध्येतव्यम्

ननु बृहस्पतिः चार्वाकमतं ब्रह्मज्ञानुपदिशति ते च अधीयते इत्यसङ्गतम्, ब्रह्मज्ञस्य सर्वज्ञत्वात् इति चेन्न। ब्रह्मज्ञो हि सर्वज्ञो भवतीति न वेदान्तशास्त्रस्य आशयः। ब्रह्मज्ञानेन ब्रह्मविषयकाज्ञानस्य नाशः तद्विरोधित्वादुपपद्यते। यद्विषयकं ज्ञानं तत् तद्विषयकाज्ञाननाशकमित्येव नियमः सर्वसम्मतः इति ब्रह्मज्ञेनापि अन्यत् अध्येतव्यमेव। अतः अर्थशास्त्रविषयकं यद् अज्ञानं तद् विरोधी ब्रह्मविषयकं ज्ञानं भववीति नाश्यनाशकभावः न कल्पयितुं शक्यः। 'तस्मिन् विज्ञाते सर्वं विज्ञातं भवति' इत्यादिश्रुतिवचनेन सर्वविषयकाज्ञानस्य विरोधि ब्रह्मविषयकं ज्ञानमस्तीति केचिद् वदन्ति। तत् वेदान्तन्यायरत्नावलीकृतः नानुमन्यन्ते, अपितु एतन्मतानुसारेण

---

१. इन्द्रो हैव देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हा संविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः। इत्यादि, छां उ० ७

जयमङ्गलाक्रोडपत्रम्

सर्वं विज्ञातब्रह्मतादात्म्यवद् भवति इत्येवार्थः कल्प्यते। इति न्यायरत्नावल्याम् द्रष्टव्यम् —[१]

ब्रह्मज्ञानस्य इतरविषयकाज्ञाननाशकत्वं नास्तीत्यत्र इति हासोऽपि योगवासिष्ठे वर्तते। तेनोक्तार्थः स्फुटीभवति। तद्यथा—ब्रह्मज्ञा सत्यपि विषूचिका नाम्नी राक्षसी लोके वार्तां दण्डनीतिञ्च अनभिज्ञातवती यथेच्छं लोकान् जघास जघान च, अतो लोके महान्तमातङ्कं प्रसारितवतीति। तस्मात् योगवासिष्ठोक्तः इतिहासः उक्तन्यायरत्नावलीवचनेन सह समन्वितो भवति इति ध्येयम्।

चाणक्योपदिष्टचतसृविद्याधिकारित्वम्

नन्वेवमेतावता प्रबन्धेन ब्रह्मज्ञ एव मुख्यो राज्याधिकारीत्युक्तम्। तर्हि ब्रह्मज्ञानामभावे राजैव न भवितुमर्हतीति अभिप्रायः राजनीतेः स्वीकर्तव्यः। इति चेन्न। ब्रह्मज्ञः राजपदाधिकारी यदि प्राप्नोति तर्हि इयं राजनीतिः तमेव राजपदे प्रतिष्ठापयितुं वाञ्छतीति प्रथमः पक्षः। तदभावे तु—

अपारे यो भवेत् पारम् अप्लवे यो भवेत् प्लवः।
शूद्रो वा यदि वाऽप्यन्यः सर्वथा मानमर्हति।

इति महाभारतोक्तरीत्या यः लोकपालनसमर्थो वर्तते अथवा तथाविधं सामर्थ्यं यत्र सम्पादनीयत्वेन चिकीर्षितमस्ति सः अब्रह्मविदपि परलोकभीतिं दृढीकृत्य अङ्कुशस्थानीयं उग्रादपि उग्रतरं धर्मं अलङ्कुर्यात्। तथा स यथावत् प्रतिबोधार्थं आन्वीक्षिकीं त्रयीं च वार्तादण्डनीतिभ्यां सह ज्ञातुं प्रयतेत। तेन अब्रह्मविदपि राजा अन्यायात् निवृत्तो भूत्वा लोकशास्त्रानुगं मतमेव सर्वत्र परिचालयन् मात्स्यन्यायाभिभवात् लोकं परित्रातुं अर्हति।

एतस्य बीजभूतं तत्त्वं अङ्कुशस्थानीयत्वेन स्थितमुपर्युक्तं धर्मशासनमेव। तदुक्तं बृहदारण्यकोपनिषदि[१] द्रष्टव्यम्।

---

२. ननु अज्ञातत्वशून्यचैतन्यं द्वितीयपक्षे तत्वज्ञानोत्तरमपि अप्रसिद्धम्। तदापि घटं न जानामीति प्रत्ययेन चितः अज्ञातत्वशून्यत्वाभावात्। इति सन् १३२८ चौ० सं० सीरिज

१. स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रम् यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयाँसमाशँसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तँ सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति॥ १४॥ बृ० उ० १८४ पृ०

भाष्य—अर्थः अप्यबलीयान्दुर्बलतरो बलीयांसमात्मनो बलवत्तरमप्याशंसते जेतुं धर्मेण बलेन। यथा लोके राज्ञा सर्वबलवत्तमेनापि कुटुम्बिक एवं तस्मात् सिद्धं धर्मस्य सर्वबलवत्तरत्वात् सर्वनियन्तृत्वम्।

दण्डनीतिरेका विद्येत्यौशनसाः[1] तस्यां हि[2] सर्वविद्यारम्भाः प्रतिबद्धाः इति ॥

जयमङ्गलाक्रोडपत्रम्

तस्मात् अस्य द्वितीयपक्षस्य संरक्षणार्थं प्रचारणार्थञ्च विशेषतया आन्वीक्षिक्याः त्रय्याश्च उपयोगो बोध्यः। इत्येवं रीत्या बृहस्पतिचाणक्ययोः मतस्य परस्परविरुद्धतया भासमानस्यापि अधिकारिभेदेन व्यवस्थापनायां कृतायां समन्वयो भवितुमर्हतीति ध्येयम्।

स्वमतम्

वस्तुतस्तु—मानवमतविचारणावसरे परिष्कृतस्य त्रयीत्वस्य स्थितिः आन्वीक्षिक्यां अस्तीति न ततः पृथक् आन्वीक्षिकीसत्ता वर्तते इत्याशयमवलम्ब्य मानवमतं विचारितम्। एवमेव, परिष्कृतं वैदिकसिद्धान्तसंरक्षिण्यामुक्तम् आन्वीक्षिकीत्वं परिष्कृतत्रयीत्वस्वरूपात् व्यतिरिच्यते। अतः तस्य पृथक् उपदेशः इति चाणक्यमतं विचारितम्। एवंरीत्या उभयोः समन्वयः कृतः। तथैव वैदिकसिद्धान्तसंरक्षिण्यां परिष्कृतस्य वार्तात्वस्य स्थितिः आन्वीक्षिक्यां त्रय्याञ्च समस्तीति, ततः न आन्वीक्षिकी त्रयी च पृथग्विद्ये भवतः। स्वरूपतस्तु तद्भिन्नमेव इत्येवं सूक्ष्मं तत्त्वं संलक्ष्यते तर्हि प्रागुक्तमानवमतसमन्वयन्यायेन बृहस्पतिचाणक्य-मनुमतानां समन्वयः साधुतय समन्वितो भवितुमर्हति। एवमौशनसमतेऽपि बोध्यम्। इत्यलं अतिकल्पनया।

श्रीमूला

मतान्तरमाह—दण्डनीतिरेकेत्यादि। दण्डनीतिः, एका एकैव, विद्या प्राधान्येन विद्याव्यपदेशमर्हतीत्यर्थः इति। औशनसाः शुक्रशिष्याः, कुतः? सर्वासां विद्यानामारम्भाः योगक्षेमाः, तस्यां हि प्रतिबद्धाः दण्डनीतावेव प्रतिष्ठिताः, इति कृत्वा। यद् वक्ष्यति—'आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः' (अध्याय ४) इति।

वैदिकसिद्धान्तसंरक्षिणी

अर्थकामाभ्यां प्रयतत एव प्रजा अतः तदर्थमपि राज्ञा वार्ता कुतोऽध्येतव्या। सत्यप्येवं सा अरक्षिता चेदात्मानमपि धारयितुं न समर्था इति शासकस्यावश्यकता वर्तत एव। तथा सति वार्तामपि त्रयीमिव राजवृत्तितः पृथक् कृत्वा तदन्तर्गततया दण्डनीतिरेवोपयुज्यते इति मन्वानानां औशनसानां मतमाह-दण्डेति। शेषं पूर्वोक्त-

---

नी० टी० १. शुक्रशिष्याः
२. सर्वे आरम्भा मात्स्यन्यायाभावे प्रारम्भाणां प्रवर्तनात्।

वैदिकसिद्धान्तसंरक्षिणी

मत्रापि स्मर्तव्यम्। अत्रायं निष्कर्षः। लाभपालनज्ञानादिभाव्यकभावनाकरणत्वं इतिकर्तव्यताविधया आन्वीक्षिक्यादितिसृषु विद्यास्वपि एतन्मते अस्ति इति। तदाहै-केति। एका प्रधाना। तदधीनत्वादन्यासाम्। इति शब्दोऽयं इतरव्यावृत्यर्थकः। औशनसाः शुक्रशिष्याः। तस्यां दण्डनीतौ। हिशब्दो हेत्वर्थकः तत्प्रधानत्वे। आरंभाः व्यापाराः प्रतिष्ठिताः इति। कथमेतदिति नीतिसारे स्फुटम्—रथनाभिवत्प्रतिष्ठिताः इति (नी० १ स० २)। अत्रायंभावः नाभौ स्थिता अराः भ्रमणेनोपर्यधो भागे नेम्यां अवतिष्ठन्ते तथा राजायत्ता नीतिर्यां विद्यामुन्नमयितुं वाञ्छति आश्रयदानेन सा अभिवर्धते। अन्यास्तु उपेक्षिता भवन्ति। तदुक्तं—

नीतिसागरनिष्क्रांताः कुप्रज्ञामारुतेरिताः।
पृथक्त्वेनेव दृश्यन्ते नानाशास्त्रमहोर्मयः॥ इति।

जयमङ्गला

औशनसा इति। उशनसः शुक्रस्य शिष्याः। ते हि वार्ताव्यवहारं दण्डनीत्या-मेवान्तर्भावयन्ति। ततश्च दण्डनीतिरेव प्रधानम्। यदाह—तस्यामिति दण्डनीत्याम् यस्मात् सर्वविद्यारम्भाः सर्वविहितव्यापारा योगक्षेमरूपाः प्रतिबद्धाः। तस्या अभावे आरम्भाणामप्रवृत्तेः यथोक्तम्—

जयमङ्गलाक्रोडपत्रम्

औशनस मतं निरूपयितुमाह—औशनसा इतीति। शुक्रस्येति। अनेन उशनाः शुक्रादन्यः इति केषाञ्चिन् मतन्निरस्तम्।

प्रधानमिति। दण्डनीत्यैव इतरासां विद्यानां रक्ष्यमाणत्वात् अस्याः प्राधान्यं बोध्यम्। एवञ्च पृथिव्या लाभपालनवर्धनसत्पात्रप्रतिपत्तिज्ञानभाव्यकभावनाकरणत्व-रूपं औशनसमतेन वैदिकसिद्धान्तसंरक्षिण्यां व्याख्यातं दण्डनीतित्वं इतरासु विद्यासु दण्डनीतिविद्यायामिव समन्वितं भवति। अतः एतेषां मते एकैव दण्डनीतिः इति बोध्यम्।

दण्डनीतेः योगक्षेमरूपत्वम्।

योगक्षेमरूपा इति। अत्रेदं तत्त्वं—न्यायव्याकरणादिकेवलशास्त्राध्येतारः राजप्रसादाभावे आत्मानमपि पालयितुं न समर्था भवन्ति किमुत अन्यान्।[1]

---

१. तदुक्तं नीति सारे—

आन्वीक्षिकीत्रयीवार्ताः सतीर्विद्याः प्रचक्षते।
सत्योपिहि न सत्यस्ता दण्डनीतेस्तु विप्लवे।
दण्डनीतिर्यदा सम्यङ् नेतारमधितिष्ठति।
तदा विद्याविदः शेषा विद्याः सम्यग् उपासते॥

जयमङ्गलाक्रोडपत्रम्

तस्मात् राजनीतिः यं पुरस्कुरुते अनुमनुते वा तस्यैव प्रचारो भवति। प्रसिद्धं चैतत् भोजराजेन संस्कृतभाषायाः ईदृशः प्रचारः कृतः यस्याः शुद्ध्यशुद्धिविषयौ हालिकस्यापि परिज्ञाततत्त्वौ आस्ताम्[1] इति। एवं वर्तमानसमयेऽपि आङ्ग्लशासनेन पुरस्कृताम् आङ्ग्लभाषां संस्कृतज्ञाः महता समादरेण समालिङ्गन्ति व्यवहरन्ति च। तदेव मूलकृता सर्वविद्यारम्भं प्रति राजनीतेः योगक्षेमसाधनत्वं रथनाभिसञ्चरण-प्रयुक्तस्य अरासञ्चरणस्य दृष्टान्तं प्रदर्श्य स्फुटीकृतमस्ति। यथा रथनाभौ स्थिताः अराः उपर्यधोभावेन तिष्ठन्ति नेम्यां तथा राजविद्या समये समये अपेक्षानुसारेण इतराः समस्ताः विद्याः उपर्यधोभावेन प्रापयितुं शक्नोति। अतः सर्वासां विद्यानां कलानाञ्च योगक्षेमौ राजनीत्यायत्तौ इति सिद्धं भवति।

किञ्च अपरयाऽपि दिशा दण्डनीतौ योगक्षेमरूपत्वं कथं भवतीति विमृश्यते। तथाहि—यदि दण्डनीतिः उत्तमं नेतारं न वृणीते तर्हि वेदशास्त्रम् अधीयाना अपि दुष्प्रज्ञा भवितुमर्हन्ति इति नीतिसारवाक्यात् अवगम्यते।[2]

अतएव इतिहासेषु अधीतशास्त्रा अपि केचन राक्षसभावं भजन्तः परधनं परभार्याः अपहरन्तिस्म तथा स्वार्थं साधयितुं सद्वृन्देष्वपि अभिचारं प्रायुञ्जन् इति अनेकानि उदाहरणानि उपवर्णितानि न तिरोहितानि वर्तन्ते। अतः लोकपालकः राजा लोकयात्रासञ्चालनाय दण्डनीतेः आवश्यकतामनुभवन् तां यथावज् ज्ञात्वा यदि प्रचारयति तर्हि वेदशास्त्राध्येतारः स्वीयां मर्यादां नातिक्रमितुमर्हन्ति इति राजनीतेः योगक्षेमरूपत्वं सर्ववादिसम्प्रतिपन्नम्।

शुक्रमतातात्पर्यम्

एतच्छुक्रमतविषयेऽपि चाणक्यमतेन सह भासमानो विरोधः आपातत एव बोध्यः। तस्य वास्तविकहृदयं बार्हस्पत्यमतनिरूपणावसरे उपवर्णितसमन्वयरीत्या बोध्यम् इति।

१　केऽभूवन् नाढ्यराजस्य राज्ये प्राकृतभाषिण.।
काले श्रीसाहसाङ्कस्य के न संस्कृतभाषिणः॥
भूरिभारभराक्रान्त बाधति स्कन्ध एष ते॥
न तथा बाधते स्कन्धो यथा बाधति बाधते।

२. जगदेतन्निराकन्दं कामलोभादिभिर्बलात्।
निमज्ज्यमानं निरये राज्ञा दण्डेन धार्यते॥ इति।

चतस्र एव विद्या[1] इति कौटल्यः। ताभिर्धर्मार्थौ[2] तद्विद्यात् तद्विद्यानां विद्यात्वम्[3] ॥

श्रीमूला

स्वमतमाह—चतस्र एवेत्यादि। विद्याः चतस्र एव, एवकारेण त्रित्वादिपक्षव्यवच्छेदः। आसां विद्यात्वविद्यान्तरत्वयोर्विद्यात्वमादौ निर्वचनभङ्ग्या स्थापयति—ताभिरित्यादि। विद्यात्वं नाम धर्मार्थवेदनकरणत्वम्। तच्चान्वीक्षिक्यादिषु चतसृषु अविशिष्टमित्यर्थः। विद्यान्तरत्वं तु परस्परविसदृशस्वरूपफलनिरूपणेन यथाक्रमं स्थापयिष्यते।

वैदिकसिद्धान्तसंरक्षिणी

तत्तद्भाव्यकभावनाकरणत्वरूपविद्यात्वभेदेन फलभेदेन च प्रतिज्ञातं विभागं समर्थयितुं स्वमतमाह-चतस्र इति। चतस्रः आन्वीक्षिक्यादयः। अत्रायं भावः-यदा परलोकं वेदं धर्मं चाधिकृत्याप्रामाण्यादिशङ्कानामतिभरः अथवा यथा राजा तथा प्रजा इति न्यायेन सर्वोपि जानपदो-राजवदर्थरुचिर्भवति, विना सेवां जीवनोपायता नास्ति इति वा लोकोः मन्यते तदा दण्डनीत्या सह अन्यविद्यानां पृथक् प्रयोजनं निर्विवादं भवति। एवंविधमतप्रचुरे समये मूलकृतोऽवतरणं अतस्तदा चतसृणां विद्यानां प्रतिष्ठापनमावश्यकमासीदितिचतसृणां उपादानम्। तेन विद्यानां राजनि पूर्णता तदैव स्यात् यदा चतस्रोऽप्यधीयन्ते इति तात्पर्यम्। एवकारेण इतरासां चतुर्विद्यातिरिक्तानां कर्मविद्यानां धर्मार्थविद्यात्वव्यावृत्तिः सूचिता। ननु कथं व्यावृत्तिरिति शङ्कां समाधातुमाह ताभिरिति। चतुर्विद्याभिः। तृतीयार्थः करणत्वम्। विद्यादित्यनेन वेदनभाव्यकत्वं अभिधीयते; ज्ञानं उपासीतेतिवत्। वेदने धर्मार्थौ इति द्वितीयान्तार्थस्य धर्मार्थविषयकत्वस्यान्वयः। तेन चतुर्विद्याकरणकभावना धर्मार्थविषयकवेदनभाव्यिका इति बोधः। तेन कर्मविद्यानां धर्मार्थोभयवेदनभाव्यकभावनाकरणत्वाभावान्नान्वीक्षिक्यादावन्तर्भावः सम्भवति इति ध्येयम्। शेषंक्रोडपत्रे द्रष्टव्यम्।

नी० टी० १. एवेति एवशब्दोऽवधारणे। यस्मादभिधानस्वरूपोपकारकफला हि सर्वाभिन्नास्तस्माच्चतस्त एव।

२. ताभिरिति अभिधानतो भेदं दर्शयन्नाह। ताभिरिति।

३. विद्यादिति। विचारयेत्। जानीयात् लभेत। सत्तापादनेन विद्यमानो कुर्यादित्यासां विद्यात्वम्। अनेन भिन्नाभिधानता विद निवारणे विचारणे 'विद ज्ञाने', विद्लृ लाभे', 'विद सत्तायाभि'ति धातुचतुष्टयोत्पादनाभिधानत्वात्।

जयमङ्गला

"इयं धर्मार्थकामानां पृथिवी लाभ पालना ।[१]
वेदिनी नीतिविद्यैव पुरुषार्थस्य साधिका ॥" इति ।

स्वमतमाह—चतस्र इति । यथोपवर्णितपूर्वाचार्यमतसम्भवेऽपि परस्परं विसदृशव्यापारत्वाद् विसदृशस्वरूपत्वाद् विसदृशफलत्वाच्चतस्र एव । तत्र विसदृश-व्यापारं दर्शयन्नाह—ताभिरिति । विचारज्ञान लाभसत्तापादनार्थाभिः ।

जयमङ्गलाक्रोडपत्रम्

अथ चतसृणामपि विद्यानां वैदिकसिद्धान्तसंरक्षिण्यां निरुक्त तत्तद्विद्यालक्षण-रीत्या पार्थक्यस्य मूलदर्शयितुमाह–स्वमतमिति । यथोपवर्णितेति ।

अनेन चाणक्यस्य पूर्वाचार्यमतखण्डने तात्पर्यं नास्ति, अपितु समुच्चये इति बोध्यम् ।

विद्याध्ययनविधेर्द्वैविध्यम्

अत्रेदं तत्त्वमनुसन्धेयम्—कौटिल्येन राजवृत्तौ अनन्तर्भाव्य यद्यपि सर्वाः विद्याः लोकपालनाय राज्ञा अध्येतव्याः इत्युक्तम् । तथापि एताः समस्ताः चतस्र एव विद्याः अध्येतव्याः सर्वैः इति एकविधविधावेव कौटिल्यतात्पर्यं नावगन्तव्यम् । अपि तु संयोगपृथक्त्वन्यायेन प्रकृताध्ययनविधेः फलभेदेन द्वैविध्यमुचितं भाति । तद्यथा—'दध्नेन्द्रियकामस्य जुहुयात्" इति वाक्येन दध्नः इन्द्रियार्थत्व अवगम्यते पुनः 'दध्ना जुहोती'ति वाक्येन अपरत्र यागार्थत्वमपि तस्यैव अगगम्यते । तथैव सर्वासां विद्यानां लोकरक्षणे हेतुत्वात् एताः समस्ताः अपि विद्याः लोकरक्षणकामेन राज्ञा अध्येतव्याः इत्येको विधिः उन्नीयते । तथा—

आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ ।

इति नीतिसारोक्त्या तैस्तैः विद्याऽध्येतृभिः उपर्युक्ततत्तत्फललाभार्थं एकैका विद्या अध्येतव्या इत्ययं अपरो विद्याध्ययनविधिः तत्तदधिकारिणां कृते बोध्यः । यदि च अयं विधिः उपेक्ष्येत तर्हि यथावत् निगूढतत्वपरिचयाय समस्तस्य तत्तच्छास्त्रस्य एकाग्रतया अध्ययनविलोपप्रसङ्गेन तत्तच्छास्त्रान्तर्गताशेषविषयस्य अवगतिर्न स्यात्, इत्ययं महान् दोषः आपद्येत । एवंरीत्या उपर्युक्ते अध्ययनविधि-

---

नि० ति० १ अशुद्धम्
　　पालनात् ।
　　मे ? वेदिनी

अत्र पालनावेदिनीति पाठे पालनस्य आवेदिनी इत्यर्थः सुस्पष्टो भवति । अतः इदं नीतिविद्यापदस्य विशेषणं बोध्यम् । तेन अपरः पाठः असाधुर्मन्तव्यः ।

जयमङ्गलाक्रोडपत्रम्

द्वैविध्ये लोकपालनोद्देश्येन आद्यो यो विधिरुक्तः तस्य चारितार्थ्यनिर्वहणार्थं वयोवस्थाभेदेन षोडशतमवर्षपर्यन्तं चतसृणामपि विद्यानाम् अध्ययनक्रमः अग्रे कौटिल्योक्तो बोध्यः इति ।

नीतिसारोक्त २ सर्ग ३ प्र०६श्लोक० स्थ प्रसिद्धिविवेचनम्

ननु कौटिल्योक्तां पृथक् पृथगध्ययनविधिद्वैविध्यफलां विद्यां प्रदर्शयितुकामेन कामन्दकेन वार्तिकभूते नीतिसारे द्वितीयसर्गे षष्ठश्लोके—पृथक् पृथक् प्रसिद्ध्यर्थमित्युक्तम्। तत्र उपर्युक्तविधिद्वैविध्यस्य सिद्ध्यर्थमित्यनेनैव सति चारितार्थ्ये प्रसिद्धर्थमिति किमर्थमुक्तम्। इति चेत् तदाशयः स्फुटी क्रियते। तथाहि —

अधोनिर्दिष्टटिप्पण्यनुसारेण[१] कीर्तिः धार्मिकत्वप्रयुक्तोत्कृष्टत्वप्रकारकनानादिग्देशीयलोकसमवेतज्ञानविषयतारूपा अत्र नीतिसारे प्रसिद्धिपदेन संगृह्यते। अर्थात् सैव मुख्यं प्रयोजनमिति भावः। अन्यत्तु सर्वं फलं न सर्वथा श्रमापनोदनाय दुःखनिर्हरणाय वा क्षमं भवति। यथा सूर्यसन्तापमनुभूय क्लिश्यमानेन केनचिद् स्वहस्ते आतपत्रं धृत्वा सूर्यसन्तापदुःखं निराकृतम्, परन्तु सर्वथा तन्निवृत्तं भवतीति न हस्ते आतपत्रधारणस्यैव श्रमप्रयोजकत्वात्। (तद् द्रष्टव्यं कालिदासेन कृते अभिज्ञानशाकुन्तले।[२])

अतः विद्यया जनिष्यमाणे अन्यफले औत्सुक्यं विहाय राज्ञा कीर्तिः यथा सम्पादिता भवेत् तथा विद्याध्ययनाय प्रयतनीयम्। एवं तत्तत्फलाकाङ्क्षिभिः न्यायविद्याध्येतृभिः उत्तमोत्तमविद्यासम्पन्नसच्छिष्यादिनिर्माणेन, वैदिकैः सात्विकान्तेवासिनिर्माणेन, वार्ताविद्भिश्च तद्द्वारा उपार्जितस्य धनस्य सत्पात्रेषु विनियोगेन, कीर्तिः सम्पादनीया। इति नीतिसारकृता वर्णितस्य प्रसिद्धिपदस्य तात्पर्ये ज्ञाते कौटिल्योक्तेन नीतिसारोक्तेन च तत्तद्विद्याफलेन सह न विरोधः। इत्येवं नीतिसारकृतः आशयः स्फुटीकर्तुं शक्यते।

---

१. मधुसूदनसरस्वतीकृतायां गीतोक्त (कीर्तिः श्रीरिति १० अ० ३४ श्लो०) श्लोकव्याख्यायां—कीर्तिः धार्मिकत्वनिमित्ता प्रशस्तत्वेन नानादिग्देशीयलोकज्ञानविषयतारूपा ख्यातिः ॥

१, ५ अं० ५ श्लो०

औत्सुक्यमात्रमवसाययति प्रतिष्ठा।
क्लिश्नाति लब्धपरिपालनवृत्तिरेव।
नातिश्रमापनयनाय न च श्रमाय।
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ ५ ॥

जयमङ्गला

यत् यस्मात् कारणात्। धर्मार्थौ विचार्यज्ञेयलभ्यस्थिरतया राजा विद्यात् जानीयात्। तद् विद्यानां विद्यात्वम्। यतः आन्वीक्षिकी विचारणार्था विन्तेऽनयेति। त्रयी धर्माधर्मज्ञानार्था विद्याद् अनयेति। वार्ता लाभार्था विन्दत्यनयेति। दण्डनीति; सत्तापादनार्था विद्यतेऽनया रक्षणयोगात्, इति। सर्वस्माद् विदेः "(संज्ञायां) समज-निषद्—" (३-३-९-९) इति क्यप्। मोक्षो राज्ञां न विवक्षितः। कामोऽप्यर्थप्राप्त इति नोक्तः।

जयमङ्गलाक्रोडपत्रम्

राजा विद्यात् इति यद्यप्यत्र विचार्यज्ञेयलभ्यस्थिरत्वरूपव्यापारेण चतसृणां विद्यानाम् उपयोगित्वं व्याख्यातमस्ति तथापि लोकानामाकाङ्क्षामनुसृत्य इमाः चतस्रो विद्याः कथं लोकोपयोगिन्यः भवन्तीति नीतिसारबलेन स्फुटीक्रियते।

विद्यानामाकाँक्षानुसारेणोपयोगित्वम्

लोको हि स्वकीयं जीवनं स्वभावतः सहजप्रेरणयैव कर्तुं वाञ्छति, इति सर्वविदितम्। स्वजीवनाकाङ्क्षयाः पूरणाय अयं लोकः पशुपालनं कृषिं पण्यं वा उपायः इति मत्वा तदर्थं प्रयतते। परन्तु तत्प्रयत्नस्य निश्चयेन साफल्यं तदा वक्तुं शक्यते यदा उक्त प्रयत्नकर्ता स्वस्वव्यापारविषये निपुणमतिः स्यात्। मतौ नैपुण्यञ्च शास्त्रेण वार्तासमयविदां सङ्गत्या तदुपदेशेन च सम्भवति।[1]

यद्यप्यत्र वणिजां सङ्गतिः मतिनिपुणतायै कामसूत्रेण उक्ता। तथापि सूक्ष्मेक्षिकया विचार्यमाणे तत्रापि मूलभतः शास्त्रप्रसूतः परम्परागतः उपदेशः आचारालभ्यः, अथवा साक्षात् शास्त्रमेव मूलं भवति इति निश्चप्रचम्। अतः सर्वैरपेक्षितायाः जीविकायाः प्राप्तये वार्ताशास्त्रस्य अन्वयमुखेन उपयोगित्वं क्लृप्तम्। व्यतिरकेण पर्यालोच्यमानेऽपि इदमपि निश्चितमेव, यत्—यदि वार्ताशास्त्रं तत्प्रसूतो वा परम्परप्राप्तः उपदेशः उच्छिद्येत तर्हि धनधान्यसमृद्धिः प्रजायां न सम्भवितुमर्हति। दृश्यते च अद्य वर्तमानसमये पशुपालनविद्यायाः उच्छेदेन परेषां विश्वासमवाप्य कृषिप्रधानस्य भारतस्य जीवातुभूताः गावः तात्कालिकधनलोभेन देशस्य जीवनस्थितिमज्ञात्वा कर्णधारैः अदर्शनं कारिताः। तेन राज्याय अपेक्षितस्य प्रधानभूतस्य

---

१. तदुक्तम्—कामसूत्रे—(सूत्र १०, १ अ० २ अधि०) तमध्यक्षप्रचाराद्वार्तासमयविद्भ्यो वणिग्भ्यश्चेति ।। १० ।। अध्यक्षाः प्रचरन्त्यनेनेत्यध्यक्षप्रचारः वार्ताशास्त्रम्। तस्माच्छास्त्रे योऽधिकृतः। इतरश्च वार्तासमयविद्भ्यः कृषिपाशुपाल्यवणिज्यादितत्त्वविद्भ्यः। वाणिज्य—मित्युपलक्षणार्थम्, कर्षकेभ्यो गवादिपोषकेभ्यश्च प्रतिपद्येतेत्येवम्। इति

जयमङ्गलाक्रोडपत्रम्

सत्त्वस्य, तदभिवर्धकानां पयोघृतगोरोचनादीनां दौर्लभ्यात्, विनाशः समभूत् इति। अतः चतसृषु विद्यासु वार्तायाः असाधारणमुपयोगित्वं जोविकार्थमस्ति।[1]

एवं लोकाकाङ्क्षानुसारेण वार्तायाः उपयोगित्वं क्लृप्तमिति कृत्वा कश्चिद् वार्तया यथावत् कृषिं सफलां साधयेत्। परन्तु तस्यां कृष्यां सञ्जातं फलं निराबाधं स उपभुञ्जीत इति नास्ति नियमः। अनेकविघ्नबाधानां सम्भावितत्वात्–[2] तस्मात् रक्षणं कर्तुमसमर्थो लोकः स्वस्य पालनं कर्तुं समर्थं गुणसम्पन्नं कञ्चन आकाङ्क्षते[3]

अत्रेदं बोध्यम्। 'प्रजां रक्षिष्यामीति' कृतप्रतिज्ञः पुरुषः नानाविधान् विभिन्न-विभिन्नप्रकृतीन् एकसूत्रेषु समानीय स्वस्वकर्तव्येषु कया युक्त्या प्रेरयेत्। कया च युक्त्या सम्भावितान् प्रत्यूहान् निवारयेत्, इति यदा महती जिज्ञासा चौर्यादिबाधा-प्रयुक्तजीविकाविच्छेदमूला उदेति, तदा नीतिविद्यायां रक्षणोपायनिरूपिकायां सर्वेषां मनः प्रणिपतति। एवंप्रकारेण सर्वेषां रक्षणाय राजनीतिविद्या अपेक्ष्यते। एतस्याः विप्लवे तु कथमपि रक्षणं न भवितुमर्हति इत्यस्मिन्नंशे प्रत्यक्षतयोपलभ्यमानायाः

---

१. तदुक्तं नीतिसारे—

पाशुपाल्यं कृषिः पण्यं वार्ता वार्तानुजीवनम्। २ सर्ग
सम्पन्नो वार्तया साधु नावृत्तेर्भयमृछति। २–३–१४
आयत्तं रक्षणं राज्ञि वार्ता रक्षणमाश्रिता।
वार्ताच्छेदे हिं लोकोऽयं श्वसन्नपि न जीवति। १ सर्ग १–१–१

टी० ज०— वार्ता कृष्यादिलक्षणा रक्षणमाश्रिता, अन्यथा नीरक्षा परै रुपहन्यमाना कथं प्रवर्तेत। छेदोऽप्रवृत्तिः। श्वसन्नपि चेष्टमानोऽपि कर्मान्तरेषु न जीवति वार्ताप्रतिबद्धत्वा-च्छरीरस्थितेः॥ १२॥ इति।

२. तदुक्तं—नीतिसारे—५ सर्ग० श्लो० ८१

आयुक्तकेभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात्।
पृथ्वीपतिलोभाच्च प्रजानां पञ्चधा भयम्। इति।

३. तदुक्तं—

'प्रजां संरक्षति नृपः' सा वर्धयति पार्थिवम्।
वर्धनात् रक्षणं श्रेयः तन्नाशेऽयत् सदप्यसत्।
भी० सार० १ सर्ग १४ श्लो०
'पर्जन्य इव भूतानामाधारः पृथिवीपतिः।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ। १ सर्ग १३ श्लो० इति।

जयमङ्गलाक्रोडपत्रम्

देशस्थितेः उदाहरणेन नाधिकं व्याख्यानम् आवश्यकमस्ति।[1]

तस्मात् वार्तया सम्पादितायाः कृषेः यथावत् न्यायेन उपभोगाय दण्डनीतेः आवश्यकता सिद्धा।

अथैतज्ज्ञात्वा दण्डनीतिं प्रयोक्तुं यदा नेतृपदाधिष्ठितः राजा वा शासको वा कश्चित् प्रवर्तते तदा दण्डविधानस्य नियतत्वात् तत्र पर्यवसितः दण्डः परुषतामापन्नः लोकवैमुख्यमुत्पाद्य आत्मविनाशे कारणं भवति।[2]

एतद्दोषेण दण्डः उपेक्षणीयः इत्यपि वक्तुं न शक्यते। पूर्वं दोषस्य उक्तत्वात्। अतः दण्डप्रणयनस्य यदा दुर्लभत्वमापद्यते तदा धृतेऽपि दण्डे राजप्रजयोः कथमनुरागमूलः स्थिरसन्धिर्भवितुमर्हति इत्याकांक्षा जीविकाकाङ्क्षावत् अभ्युदेति। तदाकाङ्क्षाप्रशमनाय त्रयी विद्या अग्रे प्रसृता। तया हि राजप्रजयोः, गुरुशिष्ययोः पतिपत्न्योरिव पारस्परिकविश्वाससम्पादनद्वारा प्रेम सम्पाद्यते। परन्तु त्रयीमनुसृत्य समृद्धे प्रेम्णि यदि क्वचित् प्रियस्य चेतसि विकृतिः उत्पद्येत अन्योपायैः सा अपसारयितुं अपि न शक्येति स्थितिः यदा भवति, तदा लोकानुमतिमादाय दण्डयितुम् अनिच्छतापि राज्ञा प्रजासु यस्य कस्यचिद् दण्डभागिनः यथावदपराधमनुलक्ष्य प्रणीतो वधादि दण्डः न पारुष्यभाग् भवति, न वा जनपदं विद्वेषं प्रापयति। इति त्रयीस्थापनानन्तरमेव प्रणीतस्य दण्डस्य प्रजापालकत्वं संभवितुमर्हति। अतः परस्परं विश्वासोत्पादनद्वारा ऐक्यसम्पादनाय त्रयी विद्या अपेक्ष्यते। त्रयीद्वारा सम्भाव्यमानं ऐक्यं राजनीतौ षाड्गुण्ये अभ्यर्हितकाञ्चनसन्धिस्वरूपमवगन्तव्यम्। 'शमः समाधिः सन्धिः' इति कौटिल्यव्याख्यानावसरे ''स्थायिविश्वासोपगमः सन्धिः' इत्येवं रीत्या नयचन्द्रिकायां प्रतिपादितत्वात् ''शान्ति का अग्रदूत'' ग्रन्थे स्फुटीकृतत्वाच्च। तस्यायन्निष्कर्षः।

---

१. तदुक्तं नी० सा०

आन्वीक्षिकीत्रयीवार्ताः सतीर्विद्याः प्रचक्षते।

सत्योपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे॥ सर्ग २ ३ श्लो० ८ टी० ज० सं०—विप्लव इति। दण्डनीतेरयथावत् प्रवृत्तौ अप्रवृत्तौ वेत्यर्थः। उपा० निर०—दण्डनीतेस्तु विभ्रमे नीतिशास्त्रस्य विनाशे सति मात्स्यन्यायसंभवादिति भावः। इति।

२. तदुक्तम् अर्थशास्त्रे—

दण्डकरसाधनाधिकारेण वा जनपदविद्वेषं ग्राहयेत्।

विद्विष्टानुपांशुदण्डेन जनपदकोपेन वा साधयेदिति। कौ० अ० १ अधिकरण

जयमङ्गलाक्रोडपत्रम्

सङ्गतसन्धि विहाय अन्यत्र सन्धौ अर्थस्य सम्बन्धो वर्तते।[1] सङ्गतसन्धौ तु विश्वास्यत्वमेव। अतोऽत्र सङ्गतसन्धिरेव यावज्जीवनं यथा सुरक्षितः स्यात् तथा काम्यते।

तच्च परम्परागतस्य स्थिरसिद्धान्तस्य अभावे सदा एकरूपं स्यात्, इति केनापि वक्तुं न शक्यते, प्रतिक्षणं मनसः परिवर्तनशीलतायाः दृष्टत्वात्। स च सिद्धान्तः त्रयीनिरूपितात् नान्यः इति सङ्गतसन्धिस्थापनं त्रय्याः असाधारणं प्रयोजनम् अस्तीति विशेषतया अस्माभिः 'शान्ति का अग्रदूत'-'भारतीय राजनीति का दिग्दर्शन वेदापौरुषेयत्व' ग्रन्थयोः सप्रपञ्चं निरूपितमस्ति। नेह पुनः निरूप्यते।

केचन त्रयीमुपेक्ष्य अर्थदानादिना उपहारादिसन्धि वाञ्छन्ति तथापि यथा यथा अर्थलाभो भवति तथा तथा लोभस्यापि अभिवृद्धेः दृष्टत्वात् यत्र अधिको लाभो भवेत् तेन सह अपरत्र संपादितमप्यर्थलोभप्रयुक्तसन्धि उपेक्ष्य सन्दध्यात्। अतो यस्य चेतसि त्रयीप्रयुक्तः परलोकविश्वासः, यावल्लब्धं तत्र सन्तोषः, निराकांक्षत्वं कर्तव्य-निष्ठा च नास्ति तत्र उपहारादिना कृतोऽपि सन्धिः स्थिरतां न भजते। इति तिसृणां विद्यानामुपयोगित्वं प्रदर्शितम्।

आन्वीक्षिक्याः फलम्

अथ वार्तादण्डनीतित्रयीविद्यानां आकाङ्क्षानुसारेण लोकोपयोगितया फलं प्रदर्श्य आन्वीक्षिक्याः विद्यायाः फलं निरूप्यते। तथाहि—त्रय्या निरूपितं परलोकं विश्वस्य जायमानः सन्धिः स्थिरो भवति इति पूर्वं स्थापितम्। तत्र त्रयीप्रतिपादित-धर्मस्य परिग्रहः द्वेधा भवतीति लोके दृष्टम्। यथा कश्चन अनुरागेण तं स्वीकरोति अन्यश्च विनैवानुरागम्। अनयोः यः अनुरागेण धर्मं परिगृह्णाति स पूर्वोक्तरीत्या

---

१. तदुक्तम् का० नी०

एक एवोपहारस्तु सन्धिरेतन्मतं हि न।
उपहारस्य भेदास्तु सर्वेऽन्ये मैत्रवर्जिताः ॥ २२ ॥ सर्ग ९ पु० ३४
अभियोक्ता बली यस्मादलब्ध्वा न निवर्तते।
उपहारादृते तस्मात् सन्धिरन्यो न विद्यते ॥ २३ ॥

टी० जम० मैत्रवर्णितः सङ्गतसन्धी सम्प्रदानाभावात्। सोऽन्यकाले दुर्लभः इत्येक एवेत्यवधारयति।

उ० नि०—उपहार एवैकः सन्धिरभिमतोऽस्माकं यस्मादुपहारभेदा एवान्ये। परस्परो-पकारेऽपि वस्त्रालङ्कारादिकस्योपहरण मस्ति, सम्बन्धत्वे दारिकादेरुपहरणमस्ति। केवलं मित्रं वर्जयित्वा शेषा उपहारभेदा एव इति ॥ २२ ॥

जयमङ्गलाक्रोडपत्रम्

विश्वास्यः इति वक्तुं शक्यते। अपरो यः अनुरागेण विना तमेव धर्ममनुतिष्ठति सः एवंविधः पुरुषः विश्वास्यः स्यादिति तु न निर्णेतुं शक्यते। एवं स्थितेऽनुरागेण परिगृहीतेऽपि धर्मे त्रयीमाधारीकृत्य कृतोऽपि सन्धिः निष्फलतां यायात् तस्यास्थिरत्वात्। अतः इदमभ्यर्हितम्, यत् एतद्धर्मविषये अनुरक्तिः यथा भवेत् तथा महान् प्रयत्नोऽपि अपेक्षितः। स च आन्वीक्षिकीमुखेन सफलो भविष्यति। तथाहि—

स्वभावतः यथा बाल्यावस्थायां परकीयसंसर्गेणादूषितत्वात् अयमेव मे हितकृत् इति ज्ञात्वा पितरं प्रति विश्वास्यत्वाच्च बालकः पितुराज्ञामनुसरति महता अनुरागेण। आसीत् च तथाविधोऽपि समयः भारते तथा यद् भारतीयाः महता अनुरागेण त्रयीधर्ममनुसरन्तः आसन्। परन्तु कुसंसर्गेण पितृविषये शङ्कादिमिषेण बालकस्य चेतसि यथा यथा अनुरागन्यूनता भवति तथा तथा सः हितोपदेष्टारमपि पितरं नानुसरति। तथैव त्रयीसिद्धान्तविषयेऽपि परसंसर्गेण भण्डधूर्तनिशाचरप्रणीतत्व—पौरुषेयत्व—भ्रमप्रमादादिदोषदुष्टत्व—कल्पितत्व—त्रासदायित्व—सुखपरित्यागित्वादिदोषशङ्कानां जागरूकतायां भारतीयेषु त्रय्यनुरागस्य न्यूनता समभूत्। एतद्दशायां क्वचिद् परिगृहीतत्रयीधर्मा अपि जना त्रयीं न विश्वसन्ति। अतः उपर्युक्ताः दोषाः वस्तुगत्या त्रय्यां सन्ति न वा इत्येतदपि आलोचनीयतां गतमस्ति। तत् आलोचनं प्रत्यक्षानुमाने आधारीकृत्य कर्तव्यम्। ताभ्यामेव त्रयीप्रतिपादितस्य धर्मस्य प्रमितत्वं निर्णेतुं शक्यते, उपर्युक्तशङ्कानामपसारणं च भविष्यति। निःशङ्कत्वाच्च त्रय्यां अनुरागः विश्वासाधायकः यः प्रागासीत् स एव उद्भविष्यति। इत्यनुमानपर्यालोचनादि यस्यां विद्यायां सर्वाङ्गोपसंहारपूर्वकं निरूपितमस्ति सा आन्वीक्षिकी विद्या केन न समाद्रियेत। इत्येवं आन्वीक्षिक्याः त्रयीनिरूपितधर्मविषये अनुरागोत्पादनं असाधारणं लोकानामाकाङ्क्षानुसारि प्रयोजनमवधेयम् इति। इदमेव सर्वं तत्त्वं सङ्क्षिप्य विचारलाभसत्तापादनार्थाभिः, इति पङ्क्त्या जयमङ्गलाकृता ध्वनितम्।

इमाः चतस्रो विद्याः एवंरीत्या लोकस्थितये हेतुभूताः सम्भवन्ति, इति पर्यालोच्य अर्थशास्त्रे नीतिसारे च तन्त्रनिरूपणारम्भे विद्याविभागप्रकरणमभिहितमस्ति।[1] (नीतिसारव्याख्यायां जयमंगलायां २ सर्ग १ श्लोक०)

---

१. तत्राप्रतिष्ठितस्वराज्यस्य राज्ञः परराज्यात्मसात्करणासम्भवात् स्वराज्यप्रतिष्ठापनार्थं षड्भिः सर्गैरुपायः प्रदर्श्यते। तत्रास्मिन् सर्गे प्रकरणत्रयं विद्याविभागः वर्णाश्रमव्यवस्था दण्डमाहात्म्यं च। तत्रायं प्रथमोपायः यत् विद्यावृद्धैः सार्धं विद्याचिन्ता विद्याप्रतिबद्धत्वाल्लोकस्थितेः।

साङ्ख्यं[1] योगो[2] लोकायतं[3] चेत्यान्वीक्षिकी ।

श्रीमूला

तत्रान्वीक्षिक्याः स्वरूपमाह—साङ्ख्यमित्यादि। साङ्ख्यं प्रकृतिपुरुषविवेचकं शास्त्रं कपिलप्रोक्तं, योगः प्रत्याहारध्यानधारणादिप्रतिपादकं महेश्वरप्रोक्तम्, लोकायतं न्यायशास्त्रं ब्रह्मगार्ग्योक्तम्। एतत्त्रितयात्मिकान्वीक्षिकी।

वैदिकसिद्धान्तसंरक्षिणी

आन्वीक्षिक्याः प्रयोजनं दर्शयिष्यन् आदौ तद्विभागमाह—साङ्ख्यमिति। तच्च षष्टितन्त्रमिति जयमङ्गला। कौटिल्यप्रणीतभाष्यात्पूर्वं विस्तृततया तस्यैव विद्यमानत्वात्। वस्तुतः तर्कविद्यामात्रमभिप्रेतम्। तदुक्तमुपाध्यायनिरपेक्षायाम् 'प्रत्यक्षपरोक्षाभ्यामीक्षितस्यार्थस्यानु पश्चात् ईक्षणमन्वीक्षा। सा प्रयोजनं यस्याः सान्वीक्षिकी अनुमानविद्या न्यायवैशेषिकादिका, इति। (नी० सं० २—७।)

मूलकृतापि अध्यायान्ते ''प्रदीपः सर्वविद्यानामित्युपसंहारे वक्ष्यते।'

तथा च सांख्यं न्यायशास्त्रम्। टिप्पण्यां तु सांख्यं षष्टितन्त्रमिति व्याख्यातम्। अत्र भासमानो विरोधः क्रोडपत्रोक्तदिशाऽवसेयः। योगो वैशेषिकम् इति व्याख्यातं न्यायवार्तिकटिप्पण्याम्। तद्यथा—योगानां वैशेषिकाणाम्। (अ० १ आ० १ सू० २८) इति।

लोकायतं—लोकस्य बुद्धिं तनोति विस्तारयति इति लोकायतं चार्वाकशास्त्रम्। तच्च पूर्वपक्षमुखेन शङ्कान्तरमुपस्थाप्य तदपसारणाय न्यायवैशेषिकयोः अवकाशं ददाति इत्यस्योपकारित्वं बोध्यम्। एतेन लोके प्रसिद्धा बुद्धिस्तु लोकायत-

---

नी० टी० १. स्वरूपभेदं दर्शयन्नाह साङ्ख्यमिति। पञ्चविंशतितत्त्वानां सङ्ख्यानां सङ्ख्या। तमधिकृत्य कृतं साङ्ख्यम्।

२. योगो मोक्षेण सह संयोगकृत्। स च षडङ्गः।

प्रत्याहारस्तथा ध्यानं प्राणयामोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते॥

स च न्यायवैशिषिकशास्त्रोक्तः।

३. लोकायतं बृहस्पतिप्रणीतं नास्तिकशास्त्रम्। तच्च पूर्वपदाविभागेनावस्थितम्।

४. एतदतिरिक्तानि प्रमाणानि न्यायमधिकृत्य निर्दिश्यन्ते तद्यथा-प्रत्यक्षपरोक्षाभ्यामीक्षितस्यानु पश्चादन्वीक्षणमन्वीक्षा। तच्चानुमानं तत् प्रयोजनं यस्याः सान्वीक्षिकी न्यायविद्या (नी० निर्णितौ) यमर्थमभिप्रेप्सत् जिहासन्वा वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ताः तदाश्रयश्च न्यायः प्रवर्तते। कः पुनरयं न्यायः? प्रमाणैरर्थसमीक्षणं न्यायः। प्रत्यक्षागमाश्रितं अनुमानं सान्वीक्षा। प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणं अन्वीक्षा। तया प्रवर्तते इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्'। इति। न्यायभाष्यम्

वैदिकसिद्धान्तसंरक्षिणी

पदेन नानुमन्तव्या तस्या विद्यात्वाभावात्। तिसृणामासां अध्ययनार्थं अपेक्षितं एकविधिकल्पनं अन्यच्च प्रसङ्गप्राप्तं टीकाव्याख्यायां विशदं—द्रष्टव्यम्। विभाजक-धर्ममाहान्वीक्षिकीति। अस्याः पृथक् प्रयोजनप्रदर्शनार्थं तिसृभ्यो विद्याभ्योऽन्यत्वं प्रदर्शयति–धर्माधर्माविति।

जयमङ्गला

विद्यानां स्वरूपभेदात् स्थापनोच्यते। तत्रान्वीक्षिकीमधिकृत्याह— साङ्ख्य-मिति। सङ्ख्यानं सङ्ख्या विवेकः, तस्या इदं शास्त्रं, साङ्ख्यं षष्टितन्त्रं पञ्च-विंशतितत्वज्ञानफलम्। योगश्चित्तवृत्तिनिरोधः षडङ्गश्चर्यफलः। यथोक्तम्—

जयमङ्गलाक्रोडपत्रम्

साङ्ख्यमितीति। ननु उपाध्यायनिरपेक्षायां 'आन्वीक्षिकी अनुमानविद्या न्याय-दर्शनवैशेषिकादिका २ सर्ग ७ श्लो० नी० सा० इति ग्रन्थेन आन्वीक्षिकीपदार्थः न्यायशास्त्रमित्युच्यते। अत्र तु षष्टितन्त्रात्मकं साङ्ख्यशास्त्रमिति। वक्ष्यते। (१०-१०) तदुभयोः कथं समन्वयः ?। उच्यते—

आन्वीक्षिकीस्वरूपविषये समन्वयः

जयमङ्गलायामुपाध्यायनिरपेक्षायाञ्च विभिन्नविभिन्नपरिस्थित्यनुसारेण दृष्टिभेदात् आन्वीक्षिक्याः व्याख्यानद्वयं उपलभ्यते। तथाहि—यदा किल कौटिल्यः इदमर्थशास्त्रं निबद्धवान् तदानीं न्यायभाष्यस्य अनुदयात् पूर्वपरम्पराप्राप्तगौतमसूत्र-स्य व्याख्यायाः ग्रन्थरूपेण अनुपलब्धत्वात् च न्यायशास्त्रं व्याख्यानरूपेण प्रसृतं नासीत्। अपितु पूर्वपरम्पराप्राप्तं ग्रन्थरूपेण उपनिबद्धं षष्टितन्त्रं प्रथितमासीत्, इति आन्वीक्षिकीपदेन तस्य सङ्ग्रहः कौटिल्याभिप्रेतः स्यात्, इत्येवं विचार्य, कौटिल्य-कालिकीं परिस्थितिमालोच्य च जयमङ्गलाकृता आन्वीक्षिकीपदार्थत्वेन षष्टितन्त्रं व्यवहृतम्।

उपाध्यायनिरपेक्षाकारस्तु अन्यादृशीं परिस्थितिमालोच्य आन्वीक्षिकी-पदार्थत्वेन न्यायशात्रं सङ्गृह्णाति। तथाहि—

परिष्कृतन्यायशास्त्रपरिगणितभाषातिरिक्तभाषायां पूर्वं षष्टितन्त्रादिग्रन्थाः उपनिबद्धा बभूवुः। तत्र अनेकविधप्रश्नानामसमाधेयत्वेन भासमानानां समुदयं कारयित्वा जैनसम्प्रदायप्रवर्तकेषु अन्यतमेन चतुर्विंशतितीर्थङ्करेण वर्धमानमहावीर-स्वामिना षष्टितन्त्रस्य खण्डनं कृतमिति श्रीविन्ध्येश्वरीप्रसादमहोदयैः स्वविरचितायां

जयमङ्गलाक्रोडपत्रम्

न्यायवार्तिकभूमिकायामुल्लिखितमस्ति ।[1]

अत उक्तेषु प्राचीनपरम्पराप्रवर्तकेषु षष्टितन्त्रादिग्रन्थेषु समुदितानां प्रश्नानां परिष्कृतभाषया समाधानमपेक्षितम् अन्यथा परम्पराप्राप्ते धर्मे अविश्वास्यत्वमापद्येत इति हेतुना उपाध्यायनिरपेक्षाकृता षष्टितन्त्रादिग्रन्थस्य परिष्कारः यदीयभाषया अबाधितो भवति तन्न्यायशास्त्रमान्वीक्षिकीपदेन व्यवहृतम् ।

एतस्मादेव कारणात् बुद्धैः अवयवावयविनोर्भेदमनङ्गीकृद्भिः अवयवत्वावयवित्वयोः स्वरूपभेदमजानानाः वासिष्ठादिब्राह्मणाः स्वधर्मात् भेदिताः इति वासिष्ठाजातकादिग्रन्थात् अवगम्यते । तत्सर्वं आन्वीक्षिक्या न्यायविद्यया समाहितं भवति । इत्यनयोः जयमङ्गलोपाध्यायनिरपेक्षयोः व्याख्यानभेदः परिस्थितिभेदेन समन्वितो भवति । वस्तुतस्तु जयमङ्गलाकृता आन्वीक्षिकीपदेन अभिहितस्य कौटिल्याभिप्रेतस्य षष्टितन्त्रस्य, परमतखण्डनपूर्वकस्वमतव्यवस्थापनं उपाध्यायनिरपेक्षाकृता न्यायशास्त्रं द्वारीकृत्य च अभिधीयते । इति नानयोः टीकयोः मतभेदः । तस्मात् उभयमतसाधारण्येन षष्टितन्त्रादिद्वारा श्रुतिबोधितस्यार्थस्य शङ्कानिरासपूर्वकं दृढीकरणं यया विद्यया क्रियये सा विद्या आन्वीक्षिकीपदार्थः । इति फलितम् ।

एवञ्च स्वस्य प्रमितत्वरक्षार्थं साङ्ख्यमपि न्यायशास्त्रमपेक्षते इति षष्टितन्त्रपदेन न्यायवैशेषिकयोरपि ग्रहणम् जयमङ्गलाकृतां सम्मतमस्ति इति बोध्यम् ।[2]

---

१. श्वेताम्बरजैनास्त्वेवं वदन्ति २४ तीर्थङ्करो महावीरस्वामी स्वशिष्याय गौतमाय इन्द्रभूतये चतुर्दशपूर्वसंज्ञकान् एकादशाङ्गसञ्ज्ञकान् सिद्धान्तानुपदिदेश । ते चैकादशाङ्गसञ्ज्ञका ४५ भागेषु विभक्ताः । यथा ११ अङ्गानि, १ आचाराङ्गम्, २ सूत्रकृदङ्गम्, ३ स्थानाङ्गम्, ४ समवायाङ्गम्, ५ भगवतीसूत्रमित्यादिना । तत्र ४० नन्दिसूत्रम्, ४१ अनुयोगद्वारसूत्रम् । अस्ति तत्रानुयोगद्वारसूत्रे "जं इमं अन्नाणीहिं मिच्छादिट्ठीहिं सच्छन्दबुद्धिमइ विगप्पियं तं जहा भारहं रामामणं भीमासुरुक्कं कोडल्लयं धोऽग्रसुयं सगऽभद्दियाउकप्पासियं नागसुहुमं कणगसत्तरीवेसियं वइसेसियं बुद्धसासनं कापिलं लोगायतं सट्ठितंतं माठरपुराणं वागरणनाडगाइ अहवासावतरि कल्ठाउ चत्तारिथ वेया संगोवंगासेतं लोइयं नो आगमउ भावसुयम्" ।

२. आन्वीक्षिक्यात्मविद्या स्यात् ईक्षणात् सुखदुःखयोः ।

इतिव्याख्यानावसरे आन्वीक्षिकी हेतुविद्येत्युक्तम् ।

आत्मविद्या पदार्थस्वभावविद्या हेतुविद्येति यावत् । तथा हि इदं सुखसाधनम् इदं दुःखसाधनं । इति पदार्थतत्त्वान्वीक्षणम् ।" सर्ग ३ प्रकरण १ — ११ श्लो०

'यथावस्थितभावस्वभाववेदनमात्मविज्ञानं २'– ७ श्लो० इति च ।

जयमङ्गलाक्रोडपत्रम्

साङ्ख्यन्यायसाधारण्येन विधिकल्पनम्

नन्वेवं आन्वीक्षिकीपदेन साङ्ख्यं न्यायश्च सङ्गृह्यते तर्हि राजवृत्तौ आन्वीक्षिक्यध्ययनं विदधतः कौटिल्यस्य तात्पर्यं साङ्ख्येन न्यायेन च यथावत् विचारं भावयेत् इति विधिद्वयकल्पने भवति। तर्हि वाक्यभेददोष आपद्येत इति चेन्न। आत्मविज्ञानस्य जयमङ्गलाकृता यत्कृतं व्याख्यानं (२०३ पृ०) टिप्पण्यामुद्धृतमस्ति। तदनुसारेण यथावस्थितस्वभावावेदनेन विचारं भावयेत्। इत्येवं रूपः एकविधो विधिः उभयोः टीकयोः प्रामाण्यात् कल्प्यते। ततो न वाक्यभेदः।

आन्वीक्षिकीपदेन न्यायसङ्ग्रहे वैधत्वम्

ननु कौटिल्योदितान्वीक्षिकीपदेन पूर्वाचार्याणां षष्टितन्त्रं यदि पूर्वपरम्पराप्राप्तं विवक्षितमिति जयमङ्गलादर्शनादवगम्यते। ततः परिस्थित्यनुसारेण न्यायशास्त्रं आन्वीक्षिकीपदेन सङ्गृह्य न्यायविद्यायाः अध्ययनं विधीयते। तर्हि तत्र पूर्वपरम्पराप्राप्तत्वाभावात् शब्दप्रमाणतात्पर्यविषयत्वं कथं स्वीकर्त्तव्यम् इति चेन्न। मीमांसोक्ताधोनिर्देक्ष्यमाणन्यायेन न्यायशास्त्रस्याऽपि प्रस्तुतस्य पूर्वाचार्यप्रणीतस्य विचारं भावयेदिति विधिविषयत्वं अस्ति इति तात्पर्यं साधयितुं शक्यते। तथाहि—वेदे समागतः यजेतेति यागदिविधिः यद्यपि स्वमहिम्ना इष्टसाधनत्वमवबोध्य अधिकारिणं स्वोक्ते कर्मणि प्रवर्तयितुं समर्थः तथापि सहस्रशोऽपि विधिं श्रुत्वा यदि कश्चिद तद्वैधं कर्म कर्तुं न प्रवर्तते। तदा तत्प्रवृत्त्युत्पादनाय प्रवृत्तिप्रतिबन्धकीभूतस्यारुच्यादेर्निरासाय प्राशस्त्यज्ञानमपेक्ष्यते। तच्च विधिसन्निधिपठितेन अर्थवादवाक्येनोत्पादयितव्यं भवति। अतः इतिकर्तव्यतात्मकप्राशस्त्यज्ञानार्थं शाब्दीभावनायाः प्रवृत्तिरूपभाव्यं प्रति अर्थवादानामुपयोगित्वं क्लृप्तम् क्वचित् प्राशस्त्यज्ञानार्थं अर्थवादेन कृतस्याऽपि प्रयत्नस्य वैफल्यं पश्यामः। तत्स्थले वैधे कर्मणि विध्याकाङ्क्षानुसारेण नाटकं काव्यं पुराणादिकं वा रुच्युत्पादनद्वारा प्रवृत्युपादनाय उपयुज्यते। क्वचित् काव्यनाटकादिकं अधिकारिणि वैधकर्म प्रति रुचिमुत्पादयितुमसमर्थं चेत् तत्तद्देशीयभाषायां निबद्धानि वाङ्मयान्यपि उपयोज्यन्ते। अर्थात् विधिना बोधिते कर्मणि जनयिष्यमाणा प्रवृत्तिः येन येन कर्मणा उत्पद्येत ततत् कुर्यात्। इति विधितात्पर्ये अवगते रुच्युत्पादनार्थं विधिसन्निहितार्थवादेन सह अन्येऽपि अनुष्ठिताः उपाया काव्यनाटकेतिहासपुराणदेशीभाषादयः सर्वेऽपि वैधा एव। इति मीमांसकैः निर्णीतम्।

तथा प्रकृते आन्वीक्षिकीपदेन परम्पराप्राप्तं षष्टितन्त्रं विवक्षितमस्त्येव यदा किल तत्रैव अनेकविधशङ्काः प्रादुर्भाव्य पूर्वपक्षिभिः त्रयीप्रतिपादिते सर्वोपकारके धर्मे प्रवृत्तिः अरुच्युत्पादनद्वारा प्रतिबध्यते तदा रुच्युत्पादनद्वारा धर्मे प्रवृत्युत्पादनाय पूर्वोक्तन्यायेन शङ्कानिराशोऽपि इतिकर्तव्यताकुक्षौ कर्तव्यत्वेन अपेक्ष्यते एव, तथा तत्साधिका विद्याऽपि। अतः 'यथावस्थितभावस्वभावावेदनेनविचारं भावयेत्'।

जयमङ्गलाक्रोडपत्तम्

इति पूर्वोक्तो विधिः कल्पितः न्यायसङ्ग्राहकः उक्तमीमांसान्यायेन संगत एव। अत एव नीतिसारकृता कामन्दकेन चाणक्यशिष्येण साङ्ख्यस्य आन्वीक्षिकीत्वं विजानतापि आत्मनिरूपणावसरे न्यायसिद्धान्तसम्मतं कौटिल्यकृतन्यायभाष्यानुसारि मतं प्रतिपादितम्।[1]

सांख्यशास्त्रेण न्यायशास्त्रस्य मान्यता अभिमता

नन्वेवं साङ्ख्यन्तु न्यायशास्त्रस्य प्रामाण्यं न मन्यते, तत्र तदीयसिद्धान्तखण्डनात् इति चेन्न। यद्यपि मूलभूतपदार्थनां निरूपणावसरे अनयोः शास्त्रयोः मतवेदः काममास्ताम्। तथापि अनुमानप्रामाण्यस्य विवेचनपूर्विका साधनसरणिः या न्यायेनोच्यते, सा न्यायशास्त्रस्य असाधारणी रीतिः अस्ति। तस्याः प्रामाण्यं साङ्ख्यशास्त्रेणाऽपि स्वीक्रियते। अत एव साङ्ख्यकारिकायाम्—

'त्रिविधमनुमानमाख्यातम्' इत्यनेन न्यायमतमेव तद्विषये प्रमाणत्वेनोट्टङ्कितम्।

वाचस्पतिमिश्रैः एतद्व्याख्यायां अनुमानभेदनिरूपणं न्यायशास्त्रमाधारी—कृत्यैव कृतमस्ति।[2]

कौटिल्यप्रणीतभाष्यस्य पूर्वपरम्पराप्राप्तत्वम्

नन्वेवं कौटिल्यप्रणीतभाष्यानुसारिभिः इत्यत्रोक्तं तेन ज्ञायते यत् पूर्वं न्यायशास्त्रं नासीदिति, तथा चैतस्य पूर्वपरम्पराप्राप्तत्वं कथं मन्तव्यमिति चेदुच्यते।

न्यायसूत्रं तु गौतमप्रणीतं पूर्वमासीदेव। तद्भाष्यं पूर्वं नासीदिति अस्माभिः अत्र वर्तमानैः योग्यानुपलब्ध्य भावात् निर्णेतुं न शक्यते तदभावकारणं अनेकैः

---

१. धर्माधर्मौ सुखं दुःखमिच्छाद्वेषौ तथैव च।
प्रयत्नज्ञानसंस्कारा आत्मलिङ्गमुदाहृतम्॥ ३१॥
ज्ञानस्यायुगपद्भावो मनसो लिङ्गमुच्यते॥ २ सर्ग

तथा जयमङ्गलायामपि—सप्तविंशति (१—२७) श्लोकव्याख्यायां—षष्टितन्त्रमतमप्रस्तुत्य न्यायमतमेव प्रस्तावितम्। तथाहि—

"आत्मा मनश्च द्रव्यपदार्थौ। तथाहि "पृथिव्यस्तेजो वायुराकाशः कालो दिगात्मा मनश्चेति नव द्रव्याणि" इति। तत्रात्मसमवायिनौ ज्ञानप्रयत्नौ गुणापदार्थौ"॥ इति।

न्यायवार्तिकेऽपि सिद्धान्तनिरूपणावसरे साङ्ख्यपदेन न्यायवैशेषिके विवक्षिते इति वै० सि० सं० रक्षिण्यामुदाहृतवाक्येत स्फुटं भवति।

'प्रदीपस्सर्वविद्यानामि'त्यादि ग्रन्थेन न्यायभाष्ये न्यायमेव सूचयति न तु साङ्ख्यम् इति। श्लोकार्थश्च वैदिकसिद्धान्तसंरक्षिण्यामत्रैव द्वि० ध्याये व्याख्यातो द्रष्टव्यः।

२. सर्वं चैतदस्माभिर्न्यायवार्तिकतात्पर्यटीकायां सप्रपञ्चं प्रपञ्चितमिति नेहोच्यते विस्तरभयात्' इत्यादि।

जयमङ्गलाक्रोडपत्रम्

पूर्वपक्षवादिभिः शास्त्राणां तत्प्रतिपादकग्रन्थानाञ्च विनाशाय कृतः प्रयत्न एवेति बोध्यम्। अथवा पूर्वं कौटिल्यस्य गुरुभक्त्यादिनिरूपणावसरे यथावत्पूर्वपरम्परा प्राप्तार्थस्फूर्तिः धृतिमत्सु सम्भवतीति अभिहितमस्ति। तद्रीत्या कौटिल्यप्रणीतभाष्य-ग्रन्थोऽपि पूर्वपरम्पराप्राप्तस्यार्थस्य आदर्शकः इति दार्ढ्येन वक्तुं शक्यते। तेन व्याक-रणमहाभाष्यशाबरभाष्यशाङ्करभाष्यादीनामपि पूर्वपरम्पराप्राप्तार्थनिरूपकत्वं बोध्यम्।

अस्य भाष्यत्वन्तु सूत्रानुसारित्वात् व्याख्यानान्तरानुपजीव्यत्वात सूत्रतात्पर्य-निर्णायकलिङ्गप्रदर्शकत्वात् च बोध्यम्।[1]

कौटिल्यस्य न्यायभाष्यकर्तृत्वम्

ननु कौटिल्येन प्रणीतं भाष्यं इति उपरितनोक्तग्रन्थेन अर्थशास्त्रप्रणेता कौटिल्यः न्यायभाष्यकर्ता इति यदुच्यते तदसङ्गतम्। न्यायभाष्यस्य कर्तुः अर्थशास्त्र-स्य कर्तुश्च विभिन्नकालिकत्वात्। अर्थशास्त्रस्य हि कर्ता चाणक्यो विक्रमवर्षारंभात् पूर्वं ४००, ई० वर्षारम्भात्पूर्वं ५०० वर्षे स्थितः इति विष्णुपुराणवाक्यैः श्री विन्ध्ये-श्वरीप्रसादमहोदयैः साधितम्। आधुनिकैरितिहासज्ञैरपि खिस्ताब्दात् प्राक् चतुर्थशतके स आसीदिति साधितम् वर्तते।[2] एवं न्यायसूत्रभाष्यकर्ता खिस्ताब्दात् अनन्तरभावी इति च साधितम्। अत्र प्रमाणं टिप्पण्यामनुसन्धेयम्[3]। तस्मान् न्यायभाष्यकर्ता कौटिल्यात् अन्यः। तत्र युक्तयः उच्यन्ते कौ० म० प्राच्यविद्या संशोधन म्हैसूर, प्र० स० एच० डेविरप्पा एम. ए. डाइरेक्ट पृ० २२ महाशयैः।

---

१. सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः!
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥

२. 'नन्दान् हत्वा कौटिल्यो नन्दराज्ये चन्द्रगुप्तमभिषिषेच' इति विष्ण्वादिपुराण-वाक्येभ्यः, मौर्यचन्द्रगुप्तार्यचाणक्यः अर्थशास्त्रं विरचयामास इति। दण्डिवाक्याच्च कौटिल्यः खिस्ताब्दात् प्राक् चतुर्थशतके अजीवत् इति ज्ञायते''। कौ. म. प्राच्यविद्या संशोधन मैसूर प्र. स.

३. 'कर्तर्या कुन्तलश्शातकर्णिश्शातवाहनो महादेवीं मलयवतीं जघान'' इति कामसूत्रे (११—७) अभिदधानो वात्स्यायनस्तु क्रिस्ताब्दानां १३७ तमाद्वत्सरात् आच २०९ तमाद् वत्सरात् भरतखण्डस्य पश्चिमप्रान्तेपु कृतराज्यानुशासनानां शातवाहनानां वंश्येन शातकर्णिना समकालिको वा आहोस्वित्तदुत्तरकालिको वाऽभवदिति बाढं ज्ञायते। तदित्यर्थं पुराणादिप्रमाण-बलेन कामसूत्र-न्यायसूत्रभाष्ययोः प्रणेतुः वात्स्यायनाद्बाढं प्राचीनः कौटिल्यः कथं वा स्वोत्तरकालिकात्तस्मादभिन्नस्स्यात्।

[अनुवादैः न्यायभाष्यकर्तुः एतदनन्यत्वानिश्चयः]

अपि च स्वीये ग्रन्थेऽनूद्यमानस्य स्वीयग्रन्थान्तरस्य स्वीयताप्रदर्शनरूपं ग्रन्थकृतां—

जयमङ्गलाक्रोडपत्रम्

१—तथाहि—शातकर्णेः सातवाहनवंशभूतस्य नामसंकीर्तनम्,

२—न्यायसूत्रभाष्ये अर्थशास्त्रवाक्यानामनुवादकर्तुः अर्थशास्त्रं प्रति स्वीयत्व-प्रदर्शनाभावः,

---

सम्प्रदायमुररीकृत्य न्यायसूत्रभाष्येऽर्थशास्त्रवाक्यान्यनुवदन्नपि वात्स्ययनो न कुत्राप्यर्थशस्त्रस्य स्वीयतां प्रदर्शयामास।

तथाहि—

(१) 'प्रदीपस्सर्वविद्यानामुपायस्सर्वकर्मणाम्।
आश्रयस्सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥'

इति प्रथमाध्याये प्रथमान्हिके प्रथमसूत्रस्य भाष्ये

(२) 'परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः।'

इति प्रथमामाध्याये प्रथमाह्निके चतुर्थसूत्रभाष्ये,

(३) पदसमूहो वाक्यमर्थपरिसमाप्तौ।'

इति प्रथमाध्याये द्वितीयाह्निके ५५ तमसूत्रभाष्ये च अर्थशास्त्रवाक्यान्यनूदितानि वर्तन्ते। एषु अनुवादेषु—

'शश्वदान्वीक्षिकी मता'

इति अर्थशास्त्रस्य प्रथमाधिकरणे द्वितीयाध्याये पठ्यमानं चतुर्थपादं परिहाय,

"विद्योद्देशे प्रकीर्तिता"

इति विद्योद्देशनामकमनूदितप्रकरणं प्रदर्णयन् वात्स्यायनप्रकीर्तनकर्तारं निगूहयामास। तथैव द्वितीयानुवादे तन्त्रयुक्ति'नामकं पञ्चदशमधिकरणमनुवादस्थलमभिदधानोऽपि तत्रापि स्वीयतां परकीयतां वा सन्दिग्धां चकार। तृतीयानुवादे त्वनुवादप्रदेशमपि (अर्थ० ११-१०) न द्योतयामास। यद्यर्थशास्त्रं स्वीयमेव स्यात् तदेदृशं गूहनश्रमं परिहाय तस्य ग्रन्थस्यापि स्वीयतां स प्रकाशयेदेव।

[तथैव कामसूत्रकर्तुः एतदनन्यत्वानिश्चयः]

किञ्च—

यथा दाण्डक्यो नाम भोजः कामाद्ब्राह्मणकन्यामभिमन्यमानस्सबन्धुराष्ट्रो विननाश। रावणश्च सीतामपरे चान्ये च बहवो दृश्यन्ते कामवशगा विनष्टा इत्यर्थचिन्तकाः" इति कामसूत्रे (१.२) अर्थशास्त्रस्य प्रथमाधिकरणीयषष्ठाध्यायात् कतिपयानि वाक्यान्यनुवदन् वात्स्यायनः "अर्थचिन्तकाः" इति गौरवप्रदर्शकं बहुवचनान्तं पदं प्रयुज्य अर्थशास्त्रप्रणेतुः स्वान्यतां स्पष्टीचकारेति सुवचम्।

अपि चार्थशास्त्रे प्रयुक्तानि पारिभाषिकपदानि प्रयुज्य कामसूत्रं रचयन् वात्स्यायनः तस्य ग्रन्थस्यार्थशास्त्रोत्तरकालिकतां वाढं प्रकटयामास। तथाहि—

जयमङ्गलाक्रोडपत्रम्

३ – कामसूत्रे दाण्डक्यो नाम भोजः इति ग्रन्थे "अर्थचिन्तकाः" इति बहुवचनान्तपदप्रयोगप्रयुक्तः अर्थशास्त्रप्रणेतारं प्रति आदरः,

४- अर्थशास्त्रयुक्तीनां पारिभाषिकपदानां कामसूत्रे प्रयोगः,

५—पाणिनिप्रयुक्तव्याकरणस्थपारिभाषिकपदानां न्यायसूत्रभाष्ये प्रयोगः, तत्सूत्राणामनुवादश्च ।

१.	कामसूत्रमिदं प्रणीतम् । तस्यायं प्रकरणाधिकरणसमुद्देशः । विद्यासमुद्देशः औपनिषदिकम् । 1.1.	इदमर्थशास्त्रं कृतम् । तस्यायं प्रकरणाधिकरणसमुद्देशः । विद्यासमुद्देशः—औपनिर्षिदिकम् । 1.1.
२.	पितृपैतामहं वश्यं इति मित्रसंपत् । 1.5	पितृपैतामहं वश्यं इति मित्रसंपत् । VI. 1.
३.	कामोपधाशुद्धान् रक्षिणोऽन्तः स्थापयेदित्याचार्याः । V. 6	कामोपधाशुद्धान् वाह्याभ्यन्तरविहाररक्षासु । 1.10
४.	इतस्ततश्च स्वयमेवापसृत्योपजपति चेदुभयोगु णानपेक्षी चलबुद्धिरसन्धेयः । VI.4	स्वदोषेण गतागतो गुणमुभयोः परित्यज्याकारणाद्गतागतश्चलबुद्धिरसन्धेयः । VII.6
५.	अर्थो धर्मः कामः इत्यर्थत्रिवर्गः । अनर्थोऽधर्मो द्वेष इत्यनर्थत्रिवर्गः VI.6	अर्थो धर्मः काम इत्यर्थत्रिवर्गः । अनर्थोऽधर्मश्शोक इत्यनर्थत्रिवर्गः । IX.7
६.	अर्थोऽर्थानुवन्धः अर्थो निरनुबन्धः अर्थोऽनर्थानुवन्धः अनर्थोऽर्थानुवन्धः अनर्थो निरनुवन्धः अनर्थोऽनर्थानुवन्धः अर्थोऽनर्थ इति संशयः धर्मोऽधर्म इति संशयः कामो द्वेष इति संशयः VI.6	अर्थोऽर्थानुवन्धः अर्थो निरनुवन्धः अर्थोऽनर्थानुबन्धः अनर्थोऽर्थानुबन्धः अनर्थो निरनुवन्धः अनर्थोऽनर्थानुवन्धः अर्थोऽनर्थ इति संशयः धर्मोऽधर्म इति संशयः कामश्शोक इति संशयस्त्रिवर्गः । IX.7

गवाध्यक्ष—सूत्राध्यक्ष—पण्याध्यक्षाद्युक्ताद्यर्थशास्त्रपारिभाषिकपदानि च तत्र तत्रोपयुक्तानि दृश्यन्ते ।

[न्यायभाष्यकर्ताऽज्ञातपाणिनेः कौटिल्यादुत्तरकालिकः]

जयमङ्गलाक्रोडपत्रम्

६—कौटिल्येन अज्ञातमन्वन्तरयुगान्तरविषयाणां कामसूत्रे निर्देशः,

७—मल्लनागः, विष्णुगुप्तः, इति सांस्कारिकसंज्ञाभेदः,

पाणिनिप्रयुक्तानि व्याकरणपारिभाषिकपदानि न्यायसूत्रभाष्ये प्रयुञ्जानो वात्स्यायनो ऽज्ञातपाणिनेः कौटिल्यादुत्तरकालिक इत्यपरं कारणं चात्र दरीदृश्यते । तथाहि—

न्यायभाष्ये	अष्टाध्याय्यां
१. वृक्षस्तिष्ठतीति स्वस्थितौ स्वातन्त्र्यात् कर्ता ।	स्वतन्त्रः कर्ता १.४.५४
२. वृक्षं पश्यतीति दर्शनेनाप्तुमिष्यमाणत्वात् कर्म ।	ईप्सिततमं कर्म १.१.४९
३. वृक्षेण चन्द्रमसं ज्ञापयतीति ज्ञापकस्य साधकतमत्वात् करणम्	साधकतमं करणं १.४.४२
४. वृक्षायोदकमासिञ्चतीति आसिच्य—मानेनोदकेन वृक्षमभिप्रैतीति सम्प्रदानम् ।	कर्मणा-यमभिप्रैतीति संप्रदानम् १.४.४५
५. वृक्षे वयांसि सन्तीत्याधारोऽधिक—रणम् । १.२.१६	आधारोऽधिकरणम् १.४.४५

किञ्च अस्तेर्भूः (१.४.५२) ब्रुवो वचिः (१.४.५३) इत्यादिसूत्राणि च न्यायसूत्रभाष्ये (१.२.४१) अनूदितानि वर्त्तन्ते ।

[कामसूत्रकर्तुः एतदन्यत्वे हेत्वन्तराणि ।]

एवं कौटिल्येन अपरामृष्टाः मन्वतन्तरयुगान्तरविषयाः कामसूत्रे (११.१.६७) निर्दिष्टाः वात्स्यायनस्योत्तरकालिकतां स्पष्टयन्तीति पाश्चात्यविदुषां राद्धान्तः ।

अन्यच्चेदं कौटिल्यस्य वात्स्यायनान्यत्वनिर्धारकं कारणं दरीदृश्यते—स्वीये कामसूत्रव्याख्याने (१.२) वात्स्यायन इति स्वगोत्रनिमित्ता समाख्या । मल्लनाग इति सांस्कारिकी' इति कामसूत्रप्रणेतुर्नामभेदनिर्वचनं कुर्वन् यशोधरः, सति वात्स्यायनस्य कौटिल्यादिनामान्तरे-प्रसङ्गसङ्गत्या तत्सूचनमपि नैव जह्यात् । कामसूत्रप्रणेतुर्वात्स्यायनो मल्लनाग इति यन्नामद्वयं प्रसिद्धं निर्दिष्टं, न केवलं व्याख्यातृकृतं तन्नामभेदनिर्वचनमेका प्रसक्तिः, अपि तु अर्थशास्त्राद्-वाक्यनामनुवादः कौटिलीयादिम्लेच्छितविकल्पानां विवरणं चापरे द्वे प्रसक्ती आस्ताम् । ग्रन्थनामनिर्देशं विनैव केवलं ''तथा चोक्तम्'' इत्यर्थशास्त्रात् कामसूत्रव्याख्याने यशोधरेणानूदितानि वाक्यानि चेमानि ।

(१) ''संवरणमात्रं त्रयी लोकयात्राविदः ।

(कामसूत्रव्याख्या १.२, पत्र २१. अर्थशास्त्रम् १.२)—

जयमङ्गलाक्रोडपत्रम्

८—जयमङ्गलायां कामसूत्रव्याख्यायां कौटिल्यस्य म्लेच्छितविकल्पस्य उदाहृतिः, इति हेत्वष्टकेन न्यायभाष्यकर्ता अन्य एवेति साधितम्। तत्र विमृश्यते।

यदि कामसूत्रकर्तुः समयस्य निर्धारकं सातवाहनवंशोद्भूतशातकर्णेः कीर्तनं हेतुत्वेनोपन्यस्य वात्स्यायनः ई० १३७ तमाद् वत्सरात् उत्तरभावी इत्यनुमीयते, तर्हि पञ्चतन्त्रे वात्स्यायनप्रणीतकामसूत्रस्य उल्लेखानुपपत्तिः स्यात्। तदेतत् पञ्चतन्त्रस्य रचना ई० वर्षात् पूर्वमेव अभवदिति संस्कृतेतिहासलेखविदां नाविदतम्। यतः अस्या रचनाया अनुवादः सीरिअन् अरबी भाषायामुपलभ्यते। किं च अन्यस्यामपि भाषायां समभूत् अनुवादः पंचतन्त्रस्य, इत्यपि वा० स० विश्वविद्यालयध्यक्षचरैः

---

(२) "दैवं मानुषं हि कर्म लोकं पालयति।"
(काम १.२. प. २३. अर्थ VI. २.)

(३) "मेषशृङ्गीक्वाथाभिषुतो गुडप्रतीवापः पिप्पलीमरीचसंभारस्त्रिफलायुक्तो मद्यो मैरेयः"
(काम १.४. प. ५४ अर्थं II. २५)

(४) "तत्र पूर्वे धर्म्याश्चत्वारः।"
(काम. III. ३ प. २०८. अर्थं. III. २.

(५) "न शोधनमशुद्धस्य (न दूषणमदुष्टस्य) विषेणाम्भसश्चरेत् (विषेणेवाम्भसश्चरेत्) (कदाचिद्विप्रदुष्टस्य (कदाचिद्धि प्रदुष्टस्य) नाधिगम्येत भेषजम्॥"
(काम. V. ६. प. ३०३. अर्थं. १.१०)

(६) 'शौर्यममर्षता शीघ्रता दाक्ष्यं चोत्साहगुणाः।"
(काम. VI. प. ३०९ अर्थं. VI. १.

"तथा च कौटिल्येनार्थशास्त्रे उक्तम्" इतिवा अथवा "तथा च वात्स्यायनेनैव स्वीयेऽर्थशास्त्रे उक्तम्" इति वा विशिष्य निगमनं विहाय, "केवलं तथाचोक्तम्" इति सामान्यतः परोक्तिमिव परामृशन् यशोधरस्तान्येताति वाक्यान्यन्ववदत्। एवमेव—

'यत्साधुशब्दोपनिवद्धमप्यक्षरविपर्यासादस्पष्टार्थंन्तन्म्लेच्छितं गूढवस्तुमन्त्रार्थम्। तस्य विकल्पा वहवः पूर्वाचार्योक्ताः तद्यथा—

कौटिलीयं यदि क्षान्तैः स्वरयोर्ह्रस्वदीर्घयोः।
बिन्दूष्मणोर्विपर्यासाद्दुर्बोध मिति संज्ञितम्॥ (१.३. प. ३९)"

इति कौटिलीयस्य म्लेच्छितविकल्पस्य पूर्वाचार्योक्तत्वं वदता यशोधरेण कौटिल्यो वात्स्यायनादन्यः पूर्वाचार्य इति बाढं प्रकटितं दृश्यते।

जयमङ्गलाक्रोडपत्रम्

श्रीमद्भिः बलदेवोपाध्यायमहोदयैः लिखितग्रन्थात् अवगम्यते ।[1]

यस्मादऽयमनुवादः ईसाजन्मनः प्रागेव संवृत्तः इति सिद्धम् । तस्माद् अस्यानुवादस्य मूलभूतः पञ्चतन्त्रग्रन्थः ततोऽपि पूर्वतन इत्यत्र सन्देहस्य अवकाश एव नास्ति। तत्रोद्धृतस्य वात्स्यायनप्रणीतस्य कामसूत्रस्य ईसापूर्वमेव अस्तित्वमासीदिति अकामेनापि वक्तव्यमेव । एतेन "अस्य ग्रन्थस्य सूत्ररूपत्वात् अयं ग्रन्थ ईसवीयसंवत्सरारंभपूर्वककालिक एवेति प्रतिभाति', इति "संस्कृतसाहित्येतिहासे" श्रीविश्वनाथशास्त्रिभारद्वाजमहोदयैर्लिखितमुपपन्नं भवति ।

अथ यद्येवं, तर्हि शातकर्णः १३७ ई० संवत्सरकालिकस्य कामसूत्रे 'कर्तर्या कुन्तलश्शातकर्णिश्शातवाहनो महादेवीं मलयवतीं जघान, इति ग्रन्थेन कृतं कीर्तनम् कथं सोपपत्तिकं स्यात्न् । तत्रोच्यते । नाऽयं हेतुः असन्दिग्धः । एतन्नामाभिधेयस्य शातवाहनवंशोद्भूतस्य शातकर्णेः अन्यस्य कामसूत्रग्रन्थकर्तुः पूर्वमपि सम्भवात्। अत्र केचित् शातवाहनस्थाने शालिवाहनं संयोज्य तद्वंशोद्भवः शातकर्णिः इति वदन्ति। तदपि चिन्त्यम्। कुन्तलदेशस्य शालिवाहनस्य परस्परमसम्बन्धात्। तथाहि–शालिवाहनः तद्वंशीयाश्च प्रतिष्ठानपुरे दक्षिणस्यां दिशि राज्यमकुर्वन्। अयं शककर्तातुनर्मदादक्षिणभागे स्थितः शातकर्णिस्तु ततः अन्यः, प्रतिष्ठानदेशभिन्नस्य कुन्तलदेशस्य अधिपतित्वात्। कुन्तलदेशस्य स्थितिः कियत्सीमानमारभ्य कियत् सीमपर्यन्तमस्तीति अधोलिखितेन प्रमाणेन स्फुटीभवति ।

कुन्तलस्य कामगिरिं समारभ्य द्वारकादेशान्तं स्थितिर्वर्तते, पुनः अस्यैव देशस्य अपरसीमा सौराष्ट्रदेशे संलग्नो वर्तते । कामगिरेः दक्षिणस्यां दिशि हूणदेशः

---

१. पञ्चतन्त्र जिन कथाओं का सङ्ग्रह है । वे भारत में नितान्त प्राचीन हैं । पञ्चतन्त्र के भिन्न-भिन्न शताब्दियों में तथा भिन्न-भिन्न प्रान्तों में अनेक संस्करण हुए । कुछ तो आज भी उपलब्ध हैं । इनमें सबसे प्राचीन संस्करण 'तन्त्राख्यायिका' के नाम से विख्यात है जिसका मूल स्थान काश्मीर है । पञ्चतन्त्र के भिन्न-भिन्न ४ संस्करण उपलब्ध हैं—(१) पञ्चतन्त्र का पहलवी अनुवाद जो उपलब्ध तो नहीं है, परन्तु जिसकी कथाओं का परिचय सीरिअन तथा अरबी अनुवादों की सहायता से प्राप्य है। (२) संस्करण गुणाढ्य की बृहत्कथा में अन्तर्निविष्ट है। यह बृहत्कथा पैशाची भाषा में थी। मूल उसका नष्ट हो गया है परन्तु ११वी शताब्दी के क्षेमेन्द्ररचित बृहत्कथामञ्जरी तथा सोमदेवका कथा सारित्सागर इसी ग्रन्थ के अनुवाद हैं। (३) तृतीय संस्करण 'तन्त्राख्यायिका' तथा उसी से सम्बद्ध जैनकथासङ्ग्रह है। आजकल का प्रचलित पञ्तन्त्र इसी का आधुनिक प्रतिनिधि है। (४) संस्करण दक्षिणी पञ्चतन्त्र का मूलरूप है। नेपाली पञ्चतन्त्र तथा हितोपदेश इस संस्करण के प्रतिनिधि हैं। इस प्रकार पञ्चतन्त्र एक सामान्य ग्रन्थ न होकर एक विपुल साहित्य का प्रतिनिधि है।" पृ० ३८८ (कथा साहित्य)।

जयमङ्गलाक्रोडपत्रम्

मरुदेशावधिः ततः पूर्वस्यां दिशि सिंहलोदेशः इति शब्दकल्पद्रुमोद्धृते शक्तिसङ्गमतन्त्रे देशपदविचारे द्रष्टव्यम्।[1]

किञ्च अस्यैव देशस्य गुर्जर इति संज्ञापि प्रतिपादिता काव्येषूपलभ्यते साप्युपन्ना भवति अत एव।

कालिन्दि! ब्रूहि कुम्भोद्भव! जलधिरहं नाम गृह्णासि कस्मात्।
शत्रोर्मे नर्मदाहं त्वमपि वदसि मे नाम कस्मात्सपत्न्याः॥
मालिन्यं तर्हि कस्मादनुभवसि मिलत्कज्जलैर्मालवीनाम्।
नेत्राम्भोभिः किमासां समजनि कुपितः कुन्तलक्षोणिपालः॥

इत्यस्य व्याख्यायां गुर्जरः क्षोणिपाल इति कृतं पाठान्तरं सङ्गच्छते। ऐतेन वर्णनेनेदमपि स्पष्टं भवति यत्कुन्तलक्षोणिपालस्याक्रमणेन तत् सीमस्थितदेशाधिपतिमालवीनां नेत्राम्भोभिर्नर्मदायाः मालिन्यसम्पादनेन कुन्तलो गुर्जरो, न तु प्रतिष्ठाननगरमिति।

२ अर्थशास्त्रं प्रति स्वीयताप्रदर्शनाभावरूपः द्वितीयः हेतुरपि वस्तुतो न हेतुः, स्वकृतग्रन्थस्थविषयस्य स्वकृतग्रन्थान्तरे उद्धरणे कृतेऽपि स्वीयताप्रदर्शनस्य शिष्टाचारानियमात्। तथाहि—वाचस्पतिमिश्राः स्वकृतन्यायकणिकाया वाक्यानि ग्रन्थान्तरे उदाहरन्ति। तथा नागेशभट्टा अपि स्वकृतोद्योतग्रन्थस्य वाक्यानि ग्रन्थान्तरे उदाहरन्ति। परन्तु स्वीयतां तत्तद्ग्रन्थेषु इमे न प्रदर्शयन्ति। तथापि तत्तद्ग्रन्थेषु तत्तत्कर्तृकत्वस्य सिद्धिस्स्मरणपरम्परया लेखाद्वा सर्वैः स्वीक्रियते। तन्न्यायेन न्यायभाष्यकर्ता स्वकृतमर्थशास्त्रं स्मरन्नपि स्वीयतां न प्रदर्शयति चेत् न कापि हानिः, नापि च अयं नियमोऽस्ति यत्परकृतस्य उल्लेखः कर्तव्यः स्वग्रन्थे। स्वकृतग्रन्थान्तरं तु न स्मर्तव्यमिति।

---

१. कोङ्कणात्पश्चिमं तीर्थं समुद्रप्रान्तगोचरम्।
हिङ्गुलाजान्तको देवि। दशयोजनदेशतः।
सौराष्ट्रदेशो देवेशि। तस्मात्तु गुर्जराभिधः।
कामगिरिं समारभ्य द्वारकान्तं महेश्वरि।
श्रीकुन्तलाभिधो देशो हूणं शृणु महेश्वरि।
कामगिरेर्दक्षिणतो मरुदेशात्तथोत्तरे।
हूणदेशः समाख्यातः शूरास्तत्र वसन्ति च।
मरुदेशात्पूर्वभागे कामाद्रिर्दक्षिणो शिवे।
सिंहलाभिधो महादेशः सर्वदेशोत्तमोत्तमः।
अवन्तीतः पूर्वभागे गोदावर्यास्तथोत्तरे
मालवाख्यो महादेशो धनधान्यपरायणः॥ इति

जयमङ्गलाक्रोडपत्रम्

३ अर्थचिन्तकाः इति पदप्रयोगेण आदरात्मकः अर्थचिन्तकान् प्रति उक्तः तृतीयोपि हेतुः अकिञ्चत्करः, वक्ष्यमाणरीत्या अर्थशास्त्रभाष्ययोः एककर्तृकत्व-स्मरणस्य अभियुक्तप्रसिद्धस्य सत्वात् एकग्रन्थकर्ता ग्रन्थान्तरकतरिमात्मानं प्रत्यपि पदान्तरेण आदरप्रयोजकम् "अर्थचिन्तकाः" इति बहुवचनान्तप्रयोगमुल्लिखितुं शक्तोतीत्यस्यापि सम्भवितुं शक्यत्वाच्च। स्वयं वाचस्पतिमिश्राः न्यायशास्त्रे न्याय-मतं, साङ्ख्यशास्त्रे साङ्ख्यमतं, वेदान्तशास्त्रेषु वेदान्तमतं प्रदर्शयन्तः तत्तद्ग्रन्थेषु नैय्यायिकाः वेदान्तिनः, इत्यादिना प्रतिपादयन्तः दृश्यन्ते। न हि तन्मात्रेण तत्तद्-ग्रन्थानां विभिन्नकर्तृकत्वम् विचक्षणाः स्वीकुर्वन्ति। तन्न्यायेन कामसूत्रस्य न्याय-भाष्यस्य अर्थशास्त्रस्य च अनेककर्तृकत्वाभावसाधने न काऽपि हानिः इति प्रत्येतव्यम्।

४ चतुर्थः अर्थशास्त्रप्रयुक्तपारिभाषिकपदानां कामसूत्रे प्रयोगात्मको हेतु र्विपरीतकल्पनयापि बाधितुं शक्यः। तथाहि—पूर्वोक्तरीत्या कामसूत्रे पञ्चतन्त्र-प्राग्भावित्वस्य सिद्धत्वेन कामसूत्रे प्रयुक्तानि यानि पारिभाषिकपदानि तानि अर्थ-शास्त्रे प्रयुक्तानि स्युः इत्यपि कल्पनायाः सम्भवेन अभियुक्तप्रसिद्धैकर्तृकत्वस्मरण-रूपपूर्वोक्तहेतुप्राबल्येन भिन्नकर्तृकत्वकल्पनायां विनिगमनाविरहात्।

(५) पाणिनीयव्याकरणसूत्राणां प्रयोगः अनुवादरूपेण भाष्यकर्त्रा कृतः। इत्ययं पञ्चमः हेतुः स तु इष्ट एव, न्यायभाष्यकर्तुः पाणिन्युत्तरकालिकत्वात्। तदुक्तम्—

पाणिनिः ई० पू० ७०० वर्षे अभवत् इति। (संस्कृत सा० इ० से विश्वनाथ-शास्त्रिभारद्वाजकृते पृ० ४५)। इति।

किञ्च कौटिल्योऽज्ञातपाणिनिः आसीत् इति अज्ञातपाणिनेः कौटिल्यस्य इति ग्रन्थेन श्री H. Dovirapp महाभागै र्यदुच्यते तदपि चिन्त्यम्। तथाहि-कौटिल्यः चतुर्वेदवित् अर्थशास्त्रप्रणेता संस्कृतप्रयोगे कुशलः "मन्त्रिपुरोहितसखः" इत्यादिपाणिनीयसूत्रानुसारं प्रयोगं कुर्वाणः पाणिनिं न विजानाति स्म इति कथं मन्तव्यम्? क्वचित् पाणिनीयविरुद्धम् अर्थशास्त्रे प्रयुङ्क्ते स यदि, तर्हि सः प्रयोगः न्यायशास्त्रपरम्पराप्राप्त 'कालीन' शब्दादिप्रयोगवत् अर्थशास्त्रपरम्पराप्राप्तः बोध्यः। इति कौटिल्यस्य अज्ञातपाणिनित्वं न सिद्ध्यति।

(६) षष्ठे कौटिल्येन अज्ञातमन्वन्तरयुगान्तरविषयाणां कामसूत्रे हेतौ अज्ञातत्वांश-विशेषणम् केन प्रमाणेन ज्ञातम् इति न स्फुटीभवति। संभवति चेदं यत् ज्ञातोऽपि विषयः अनुपयुक्तत्वात् अर्थशास्त्रग्रन्थे कौटिल्येन अनुक्तः स्यादिति। तस्मात् "यदि स्यात् तर्हि उपलभ्येत" इतिप्रतियोगिसत्वप्रसञ्जनप्रसञ्जितप्रतियोगिकस्य स्वेतरस-कलसामग्रीविशिष्टस्य उपलब्ध्यभावस्य असत्वात् न अज्ञातत्वनिर्णयः कर्तुं शक्यते।

जयमङ्गलाक्रोडपत्तम्

(७) सप्तमः मल्लनागो विष्णुगुप्त इति सास्कारिकसंज्ञाभेदः हैतुः विस्णुगुप्त-वात्स्यायनयोः भिन्नत्वानुमापकः तदा भवेत् यदा एकस्य एकैव सांस्कारिकी संज्ञा भवेत्, नामकरणप्रसङ्गे व्यावहारिकनाक्षत्रादिनामभेदेन एकस्यैव चतुर्विधायाः सांस्कारिकीसंज्ञायाः शास्त्रेषु विहितत्वात्।

किञ्च एकैव व्यक्तिः तत्तच्छास्त्रेषु यदा ग्रन्थं निर्माति तदा स्वस्यैव विभिन्न-नामकत्वेन स्वकृतग्रन्थस्य प्रसिद्धिमुपस्थापयति इति शिष्टाचारोऽपि तत्र तत्र दृश्यते। यथा द्रोणेन्द्रोद्धवप्रभृतीनां अर्थशास्त्रेषु भारद्वाजबाहुदन्तीपुत्रवात-व्याधिनामकत्वेन प्रसिद्धिः वर्तते। स एव न्यायः चाणक्येनापि आदृतः स्यात् इति नायं हेतुः कौटिल्यवात्स्यायनयोः भिन्नत्वानुमापकः।

(८) "म्लेच्छितविकल्पात्मकः अष्टमः हेतुः उपर्युक्तहेतुनिरासेनैव सन्दिग्धत्वात् निरस्तो बोध्यः।

पूर्वपक्षोक्तस्य वात्स्यायनविष्णुगुप्तभेदसाधकस्य हेतोर्हेतुत्वे सन्दिग्धेऽपि यावद् तयोरैक्यसाधकः हेतुः नोपलभ्यते तावत् इदमित्थमेवेति निर्णयः कर्तुं न शक्यते। अतः वात्स्यायनविष्णुगुप्तयोः ऐक्यनिर्णयार्थम् सद्धेतवः उपन्यस्यन्ते।

कामन्दकेन आत्ममनसोः निरूपणावसरे तत्साधकाः, मनसः अणुत्वसाधकाश्च हेतवः ये उपन्यस्ताः ते न्यायभाष्यादेव सङ्गृहीताः इति नीतिसारटीकाजयमङ्गला-दर्शनात् अवगम्यते।[1]

नीतिसारपद्ये "आत्मलिङ्गमुदाहृतम्" इत्यनेन धर्माऽधर्मादयः हेतवः आत्मानुमा-पकाः इत्युक्तम्। ये किल अनुमापकत्वेन हेतवः उक्ताः ते अस्माभिः नोच्यन्ते। अपितु प्राचीनाचार्यैः उक्ताः इत्यपि, 'उदाहृत'मिति नीतिसारोक्तनिर्देशेन उन्नीयते।[1] तेन "उदाहृतमन्यत" इति शेषः इति नीतिसारमूलं पूरणीयं भवति। परं कुत्र दाहृतमिति तु स्फुटं नोक्तम्। तथापि नीतिशास्त्रे पुराणार्थसङ्ग्रहोक्तस्य[2] न्यायशास्त्रोपशास्त्रत्वस्य

---

१. जयमङ्गला—ज्ञानस्यायुगपद्भाव इति। यद्यात्म्यत्कतिरिक्तं मनो न स्यात्, तदाऽऽत्मेन्द्रिय-सन्निकर्षे ज्ञानमुत्पद्येत न चोत्पद्यते। तस्मादस्ति तदन्यत्। अयुगपद्ग्रहणमेकत्वाणुत्वसाधना-र्थम्। यद्यनेकमेकस्मिन् शरीरे मनः स्यात्, तदानेकेन्द्रियसन्निधानाद् युगपत् सर्वज्ञानानि स्युः, व्यापित्वे च सर्वेन्द्रियैर्युगपन्मनस्संयोगे सर्वाणीन्द्रियज्ञानानि भवेयुः, न च भवन्ति। तस्मात् तदेकमणु च प्रत्येतव्यम्। इति।

२. धर्माधर्मौ सुखंदुःखं इच्छाद्वेषौ तथैव च।
प्रयत्नज्ञानसंस्कारा आत्मलिङ्गमुदाहृतम्॥
ज्ञानस्यायुगपद्भावो मनसो लिङ्गमुच्यते।
न्यायशास्त्राद्विनिष्क्रान्तं नीतिशास्त्रमिति स्थितिः॥ २.३१

जयमङ्गलाक्रोडपत्रम्

सिद्धत्वात् न्यायशास्त्रे तदुदाहृतम् इति नीतिसारपद्यार्थो भवति। तत्रापि सर्वस्य ग्रन्थस्य आकरस्थाने प्रमाणत्वेन उपन्यसनीयः ग्रन्थो भाष्यं भवतीति न्यायशास्त्रीयग्रन्थानामाधारभूतं न्यायभाष्यमेव धर्मादिसंस्कारान्तानां आत्मसाधकतया, ज्ञानस्य अयुगद्भावस्य, मनसस्तदणुत्वस्य च साधकतया प्रमाणं बोध्यम्। अत एव जयमङ्गलाटीकाकर्त्राऽपि 'पृथिव्यापस्तेजो वायुराकाशः कालोदिगात्ममनांसि' इत्युक्त्वा उक्तनीतिसारपद्यव्याख्यायां "धर्मादयो गुणवत्वात् रूपादिवदाश्रिताः योऽसावाश्रयः स आत्मेत्यात्मनो लिङ्गम्। यथा शेषाणि द्रव्याणि नाश्रयः तथा शास्त्रान्तरे प्रतिपादितम्। ग्रन्थगौरवभयात् तु नोक्तमस्माभिः"। इति ग्रन्थेन न्यायभाष्यप्रामाण्यं ज्ञाप्यते। तस्मात् न्यायभाष्यम् नीतिसारात्प्राक् इति सिद्धम्। किञ्च वक्ष्यमाणप्रकारेण च नीतिसारकर्तुः कामन्दकस्य कौटिल्यसमकालिकत्वात् न्यायभाष्यकर्ता कौटिल्यसमकालिक, किं बहुना कौटिल्य एव इति गुरुप्रसिद्धिं अनुसृत्य उच्यते। तत् द्रष्टव्यमुपाध्यायनिरपेक्षायाम्।[1] तथा एतदुपोद्बलकानि इतराण्यपि प्रमाणानि टिप्पण्यां द्रष्टव्यानि।[2] अतो गुरुपरम्पराप्रसिद्ध्यनुसारेण अर्थशास्त्रकर्तुः न्यायभाष्यकर्तुश्च अभेद सिद्धः।

वस्तुतस्तु अर्थशास्त्र-कामसूत्र-न्यायभाष्य-तत्तटीकादिप्रदर्शनेन एतद्ग्रन्थकर्तारः एककालिकाः कुटिलगोत्रोद्भवाः विभिन्नाः व्यक्तयोपि सम्भवितुमर्हन्ति इति अग्रे निर्देक्ष्यते। यतः—

वात्स्यायन एव कौटिल्यः इत्यभेदसाधकानि टिप्पण्यां निर्दिष्टानि कोषवाक्यानि अन्यया रीत्याऽपि समन्वेतुमर्हन्ति। तदाहुः—विन्ध्येश्वरीप्रसादमहोदयाः न्यायवार्तिक भूमिकायाम्—"अत्र नैयायिका वदन्ति पुरुषोत्तमदेवकृते त्रिकाण्डशेषे ब्रह्मवर्गे—

विष्णुगुप्तस्तु कौण्डिन्यश्चाणक्यो द्राभिलोंऽशुलः।
वात्स्यायनो मल्लिनागः पक्षिलस्वामिनावपि॥

---

१. "श्लो. २ सर्ग १ भुवि विश्रुतः न्याये कौटिल्यः वात्स्यायनः—"गौतमीयस्मृतिभाष्यचतुष्टयेन प्रकाशितपुरुषार्थचतुष्टयोपाय इति महीतले प्रख्यातः ॥२॥" इत्युक्त्वा "शुकबृहस्पत्योस्तृतीयम् आत्मगुरुं प्रख्यापयितुं दण्डनीतिविषये प्रयोक्तृत्वमभिधाय प्रवक्तृत्वमपि प्रतिपादयितुमाह नीतीति। ६ श्लो०

२. वात्स्यायनो मल्लनागः कौटिल्यश्चणकात्मजः।
द्राभिलः पक्षिलस्वामी विष्णुगुप्तोऽङ्गुलश्च सः॥ (हेमचन्द्रः)
वात्स्यायनस्तु कौटिल्यो विष्णगुप्तो वराणकः।
द्राभिलः पक्षिलस्वामी मल्लनागोऽङ्गुलोऽपि च॥
कात्यायनो वररुचिर्मेधजिच्च पुनर्वसूः।

जयमङ्गलाक्रोडपत्रम्

अपि च त्रिकाण्डशेषकोषारम्भे एव।

'अलौकिकत्वादमरः स्वकोशे न यानि नामानि समुल्लिलेख।

विलोक्य तै रप्यधुनाऽप्रचारमयं प्रयत्नः पुरुषोत्तमस्य। इति

परिभाषादिकं सर्वमत्राप्यमरकोशवत्—इति लिखितम्। अमरकोषे तु "त्वन्ताथादि न पूर्वभाक्" इति लिखितम्। अत्र त्रिकाण्डशेषकोषटीकायां बुधमनोहरायां विष्णुगुप्तस्तु कौण्डिन्यः कौटिल्यो वा चाणक्यो द्राभिलोंऽशुल इति पञ्च नामानि चाणक्यस्य। वात्स्यायनो मल्लनागः पक्षिलस्वामी पक्षिलमुनिर्वेति त्रीणि नामानि वात्स्यायनस्येति व्याख्यातम्। कालिकातानगरमुद्रिते अमरत्रिकाण्डशेषहारावली-मेदनीति कोषचतुष्टयपुस्तके सूचिपत्रेऽपि अष्टौ नामानि न चाणक्यस्येति प्रति-पादितम्। एवं स्थिते चाणक्यो भिन्नो वात्स्यायनश्च भिन्न इति प्रतिभाति" इति। तस्मात् कोशेषूक्तिमात्रेण कालादिनिर्णयं अभियुक्तोक्तिविरुद्धत्वात् तथात्वेन न मन्यन्ते नीतिविदः[१] शेषं टिप्पण्यां द्रष्टव्यम्।

→ यदि च अष्टौं नामानि वात्स्यायनस्यैव। पञ्च चाणक्यस्य त्रीणि वात्स्यायनस्येति तु टीकाकारसूचीपत्रकारयोः प्रमादः। तदापि "मल्लनाग पक्षिलस्वामिनावपीत्यत्र" समुच्च-यार्थकेनापिशब्देन मल्लनागपक्षिलस्वमिनोः समुच्चयेन ग्रहणाद् व्यक्तिभेदः सिद्ध्यति। वात्स्यायनशब्दवाच्यौ मल्लनागपक्षिलस्वामिनावपि भवत इति यावत्। अतः विष्णुगुप्तादि-नामविशिष्टश्चाणक्य एको वात्स्यायनः, मल्लनागः पक्षिलस्वामी च भिन्नो, भिन्नो वात्स्यायनः।

१ काशिक-राजकीय-संस्कृत-महाविद्यालयी-पुस्तकालयाध्यक्षाः श्रीविन्ध्येश्वरीप्रसाद द्विवेदिनोऽत्र प्राहुः। (वात्स्यान न्या० वा० भूमिका, पृष्ठ ८१)

कोषकारेण वेदधर्मशास्त्रपुराणेषु न्यायदर्शनादिषु च ये शब्दाः येष्वर्थेषु प्रयुक्ता नानास्थानेषु वितता एकत्र सङ्कलय्य कोषे कथिताः। अत एव अमरसिंहः--

समाहृत्यान्यतन्त्राणि सङ्क्षिप्तैः प्रतिसंस्कृतैः।

संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्॥ इति प्राह

अमरानुयायी पुरुषोत्तमदेवोऽपि--

परिभाषादिकं सर्वमत्राप्यमरकोषवदित्युक्त्वात् अमरपरिशिष्टाख्योऽपि महान् कोशोऽ-तीवोपयुक्तो वर्तते। तद्दर्शनात् न तत्परिशिष्टापेक्षा भवति।

इत्थञ्च--

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्।

आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः॥

इतिउक्तत्वात् कोषानां नाज्ञासिद्धत्वं नापि ऐतिहासिकवृत्तक्रमव्यवस्थापकत्वम्। तथाचानेकार्थध्वनिमञ्जर्याख्यकोषे हरिशब्दो विष्णुसूर्यवानरादीनां वाचकत्वेनैकत्र लिखितो न तस्माद् विष्णुसूर्यवानराणामैक्यं नापि तेषामेकदेशकालावस्थायित्वमितिसिद्धम्। इति।

जयमङ्गलाक्रोडपत्रम्

यद्यपि च श्रीमद्भागवतमहापुराणटीकाकर्तृभिः चाणक्य एव वात्स्यायनः इति भागवत १२ स्कन्धटीकायां उल्लिखितमस्ति। तद्यथा—"नवनन्दान् नन्दश्च तत्पुत्रांश्चेत्येवं नव प्रपन्नान् शरणागतान्। विख्यातान् वा द्विजः कौटिल्यवत्स्यायनादिपर्यायश्चाणक्य उद्धरिष्यत्युन्मूलयिष्यति। मौर्या मौर्यसंज्ञाः।" इति (श्रीधरी)

नवनन्दानिति—नन्दशब्दः तत्सुतपरश्च 'आत्मा वै पुत्रः' इति श्रुत्यनुरोधात् अतएव नन्दानिति बहुवचनेन च इति विशेषः पञ्च तान् प्रपन्नान् कश्चिद् घातुकः कौटिल्यवात्स्यायनाख्यो द्विजः उद्धरिष्यति। नाशयिष्यति इति यावत्। ततस्तेषां सपितृकाणां सुमाल्यप्रमुखानामभावे तेष्वतिक्रान्तेषुइत्यर्थः। एवं सोमवंशे समाप्ते मौर्या भोक्ष्यन्ति। इति।

भा० १२ स्कन्ध अ० १ श्लो० १२

तथापि—चाणक्यवंशस्य अतिविस्तृतत्वात् एकैव व्यक्तिः कामसूत्रस्य कर्त्रीति न सिद्ध्यति। अस्य वंशस्य विस्तृतत्वे प्रमाणं जयमङ्गलायामुपलभ्यते—"कुलशतमप्रतिग्राहकाणामिति लोकप्रवादः (नी० सा० सर्ग १ श्लो० २)। इति। तथा च वात्स्यायनगोत्रीयः चणकदेशोद्भवः कुटिलवंशस्थः इति रीत्या वात्स्यायनः चाणक्यः कौटिल्यः इति पदवचनैः कौटिल्यवंशीयानां सर्वेषामेव तत्तन्नामनिर्देशस्य सम्भवदुक्तिकत्वात्। अतएव एककुलोद्भवयोः मल्लनागः कौटिल्यः इति इत्येवं सांस्कारिकी संज्ञा अस्तीति प्रागुक्तजयमङ्गलावाक्यमपि साधु सङ्गच्छते। तस्मात् एकवंशोद्भवाः समानकालिकाः अर्थशास्त्रस्य न्यायभाष्यस्य कामसूत्रस्य गौतमीयस्मृतिभाष्यस्य पञ्चतन्त्रग्रन्थस्य निर्मातारः विभिन्ना अपि सम्भवितुमर्हन्ति। अग्रे विद्वांसः प्रमाणम्। यत्किमपि भवतु, ई० संवत्सरारम्भात् पूर्वं पञ्चतन्त्रं न्यायभाष्यं चासीदित्यत्र नास्ति मतभेदः।

अथ कामन्दककालनिर्णयस्य उपरिप्रतिज्ञातार्थस्य अवसरप्राप्तत्वात् विमर्शनं क्रियते।

कामन्दककालनिर्णयः

ननु "नीतिसारकर्तुः कामन्दकस्य कौटिल्यसमकालिकत्वात्" इति उपरिनिर्दिष्टः हेतुः इतिहासादिभिः कामन्दकस्य ईसानन्तरभावित्वस्य सिद्धत्वात्[१] असिद्धः। इति।

तत्रोच्यते—यद्यपि ऐतिहासिकानामाधुनिकानां कामन्दककालविषये उपर्युक्ता प्रसिद्धिरस्ति। तथापि स्वयं कामन्दकस्य स्वकृतमूलग्रन्थे तट्टीकायाञ्च यादृशी उक्तिः वर्तते। तया ऐतिहासिकप्रसिद्धेः उपर्युक्ताया दौर्बल्यं स्वतःसिद्धं भवति।

१ उदाहरण के लिये कामन्दकीय नीतिसार को लीजिये संभवतः गुप्तकाल में ५०० ई० के आसपास लिखा गया।

('प्रा० भा० शासनपद्धतिः' ले० अ० स० अलतेकर)

जयमङ्गलाक्रोडपत्रम्

तथा हि—
'विद्याश्चतस्र एवैता इति नो गुरुदर्शनम्'। इति ग्रन्थेन का० नी० २-६।
कामन्दकः कौटिल्यं गुरुत्वेन वर्णयति।

अयञ्च कामन्दकस्य गुरुः इत्ययमंशः जयमङ्गलायामुपाध्यायनिरपेक्षायां च तत्रैव परमत्वेन व्याख्यातः।[1]

एतत्समस्तग्रन्थस्य पर्यालोचनेन समन्वयदृष्ट्या इदं सिद्ध्यति यत् चाणक्यः कामन्दकस्य परमगुरुः इति। यद्येवं तर्हि कामन्दकेन स्वगुरोः नमनं कीर्तनं वा कुतो न कृतम् इति चेत् परमगुरुसन्निधाने तस्यैव पूजनीयत्वेन विधानदर्शनात्।[2]

अर्थात् गुरुपरमगुर्वोः सन्निधाने परमगुरुरेव पूजनीय उभयसन्निधानाभावे तु गुरुरेव पूज्यः आदर्तव्यः स्तुत्यो वेति। तस्मात् उपाध्यायनिरपेक्षाप्रामाण्येन कामन्दकसमये गुरोः परमगुरोः कौटिल्यस्य च साहचर्यमासीत्। अतः उपर्युक्त-मन्वाज्ञामनुस्मृतवता कामन्दकेन परमगुरुः कौटिल्यः नमस्कृतः, न तच्छिष्यः स्वगुरुः। इत्येतत्सर्वं कामन्दककौटिल्ययोः समकालिकत्वं विना नोपपद्यते। इति कामन्दकस्य ईसानन्तरभावित्वप्रसिद्धेः दौर्बल्यात् उपाध्यायनिरपेक्षाप्रसिद्धेश्च प्राबल्यात् कामन्द-कस्यापि कवयितुः कौटिल्यसमकालिकत्वम् एव सिद्ध्यति।

इत्यलं कौटिल्यस्य न्यायभाष्यकर्तृत्वविचारप्रसक्तानुप्रवक्तचिन्तया। प्रकृतमनुसरामः।

चाणक्यात् पूर्वं न्यायशास्त्रस्यास्तित्वम्

ननु न्यायभाष्यं कौटिल्येन अथवा तत्समकालिकेन एकवंशोद्भवेन अपरेण कौटिल्येन वा प्रणीतम्, इति सिद्धम्। तर्हि ततः पूर्वं न्यायशास्त्रं नासीदिति अर्थादेव आयाति तथा च अस्य वेदमूलकत्वाभावेन भ्रान्त्यादिमूलकत्वं सिद्ध्येत्, इति चेन्न। गौतमप्रणीतं न्यायसूत्रं चाणक्यात् पूर्वत एव आसीदिति निर्विवादम्। गौतम

---

१. तद्यथा। 'शास्त्रकारस्य कौटिल्यो गुरुः ज० म०।

'नः अस्माकं गुरोः' कौटिल्यस्य दर्शनम् इति। तथा अधिकृतदेवतास्तुत्यनन्तरं-पञ्चश्लोककुलकेन परमगुरोरपि नमस्कारमभिधातुमाह वंशेति नी० सा० १–२

एवं शुक्रबृहस्पत्योः तृतीयमात्मगुरुं प्रख्यापयितुं दण्डनीतिविषये प्रयोक्तृत्वमभिधाय प्रवक्तृत्वमपि प्रतिपादयितुमाह। नीतीति। नी० सा० १ उपा० ७२ श्लो०

२. तदुक्तं मनुना—गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्।
नचानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्। इति।

स्मृतिमुक्ताफले आपस्तम्बः—
'आचार्यप्राचार्यसन्निपाते प्राचार्यायोपसंग्राह्योपसंजिघृक्षेदाचार्यम् प्रतिषेधेदितरः' इति।

जयमङ्गलाक्रोडपत्रम्

प्रणीतन्यायस्य शिष्टैः उद्धृता श्रुतिस्वीकृतिः अत्र प्रमाणं बोध्या। तद्यथा 'शुङ्गेन आत्मानमन्विच्छेत्' इति। एतच्छ्रुत्या भास्कराचार्योल्लिखितया न्यायशास्त्रस्य अस्तित्वं वेदकालादेव सिद्ध्यति। वसुन्धरायामनेकेषां विबुधां तत्र तत्र समये अवतारसम्भवात् चाशक्यात् पूर्वं केनचिदपि विदुषा गौतमसूत्रार्थः भाष्यरूपेण न विवृतः इति कथं निर्णेतव्यम्? बौद्धयुगे अनेकेषां शास्त्राणां विलवः अभूत्। तदैव तत्प्राचीनं न्यायभाष्यमपि नष्टं स्यात् इति कल्पनायाः अवसरात्। अथवा अनूचानैः गुरुभक्तैः तत्परम्पराप्राप्तः अर्थः निरूप्यते इत्येतत्सर्वं वैदिकसिद्धान्तसंरक्षिण्यां प्रथमाध्याये सविस्तरं प्रपञ्चितमस्ति। तन्न्यायेन कौटिल्येन न्यायभाष्यं प्रणीय शाबरभाष्यशाङ्करभाष्यादिवत् पूर्वपरम्पराप्राप्तः सूत्रार्थः जिज्ञासूनां कृते प्रकाशितः।

टीकायां साङ्ख्यमिति—अत्र साङ्ख्यपदेन षष्टितन्त्रमभिधीयते। नीतिसारव्याख्यायां तु न्यायशास्त्रमिति अनेनैव टीकाकृता २ सर्गे व्याख्यायते—'अङ्गानि वेदाश्चत्वारः' इत्यत्र। इत्यनयोः कथं समन्वयः? उच्यते। एतदालोचनार्थमादौ सङ्ख्यायाः किं स्वरूपमिति आलोचनमपि आवश्यकम् अन्यथा सङ्ख्यानं सङ्ख्या विवेकः इति टीकाग्रन्थः दुरवगाहः स्यात्, अतः तदादौ विविच्य अनन्तरं उभयोः समन्वयः प्रदर्शयिष्यते। तथाहि—

सङ्ख्या बुद्धिविषयतास्वरूपा भवति। तां बुद्धिं यत् शास्त्रमुत्पादयति तत् साङ्ख्यम् इति साङ्ख्यपदस्य अर्थः। तदुक्तम्—अत्रैव जयमङ्गलायाम्—संख्या विवेकः तस्या इदं शास्त्र'मिति। नन्वेवं सङ्ख्या बुद्धिविषयता इति उक्तेः कोऽभिप्रायः? इति चेदुच्यते—इमौ द्वौ त्रयः इत्यादिप्रतीतिः द्रव्यावलम्बिनी यदि वर्तते तर्हि तत्प्रतीतिविषयतायाः सङ्ख्यायाः गुणत्वं सोपपत्तिकम्', परन्तु इमौ द्वौ इत्यादिप्रतीतिः द्रव्यातिरिक्तावलम्बिनी यदि भवति तर्हि तद्विषयीभूता सङ्ख्या गुणे नान्तर्भवितुमर्हति गुणद्रव्ययोः समवायतादात्म्यसम्बन्धाभ्यां कार्यकारणभावमूलिकायाः 'गुणेगुणानङ्गीकारात्' इत्युक्तेः जागरूकत्वात्। अतः उक्तप्रतीतिविषयीभूतसङ्ख्यायाः बुद्धिविषयतारूपत्वमिति नैयायिकाः।

अत्र बुद्धिपदेन अयमेकः इत्याद्यपेक्षाबुद्धिर्ग्राह्या सा आत्मगुणानां योग्यानां विशेषाणां द्विक्षणावस्थायित्वेऽपि अपेक्षाबुद्धिः त्रिक्षणावस्थायिनी भवति। अन्यथा द्वित्वादिप्रत्यक्षं न सम्भवेत्। तत्काले अपेक्षाबुद्धिनाशे प्रत्यक्षविषयीभूतस्य द्वित्वस्य नाशप्रसंगात्। न केवलं अत्र द्वित्वप्रत्यक्षकार्यानुरोधेन अपेक्षाबुद्धेः त्रिक्षणावस्थायित्वं उक्तम् किन्तु अनुमित्यादिकार्यानुरोधेन इच्छादीनामपि चतुःक्षणावस्थायित्वमस्तीत्यादिकं पक्षताग्रन्थादौ नैयायिकैः कृतन्तत्तद् निरूपणे। प्रपञ्चीकृतञ्चैतत्

नैयायिकैः दीधितिकृतप्रभृतिभिः[१]। साहित्यिकास्तु नहि अपेक्षाबुद्ध्यादीनामेव त्रिक्षणावस्थायित्वं मन्वते। अपि तु रसप्रतीत्यर्थम् व्यञ्जनजनिता काव्यव्यापारप्रसूता धीः यावद्रसप्रतीतिः न स्याद् द्वादशक्षणे चतुर्दशक्षणे वा, तावत्पर्यन्तं अनुस्यूता वर्तते इत्यभिदधति।[२]

यस्यापेक्षाबुद्धिः तद्धि विषयता एव द्वित्वादिस्वरूपा सङ्ख्यायाः तदतिरिक्तत्वे वक्ष्यमाणदोषप्रसङ्गात्। तद्यथा - यस्य अपेक्षाबुद्धिः वर्तते स एव द्वौ त्रयः इत्यादि प्रतिपत्तुमर्हति। अन्यथा सर्वसाधारण्येन घटप्रतीतिवत् घटसमवेतस्य-अतिरिक्तपदार्थस्य सङ्ख्यारूपत्वे सर्वसाधारण्येन प्रत्यक्षविषयत्वमापद्येत। विषयतारूपत्वे तु यस्य बुद्धिः स एव तद्विषयतां विषयञ्च प्रत्यक्षीकरोति। तस्मात् येन सङ्ख्यायाः अनुभवः क्रियते प्रत्यक्षतया तेन सर्वेऽपि तत् सङ्ख्येयाः अपि प्रत्यक्षीक्रियन्ते इत्यवगमात् सङ्ख्याप्रत्यक्षे तावत् सङ्ख्येयानां समूहालम्वनं ज्ञानं, भवत्येवेतीदृशमेव ज्ञानं विचारणापदेन अभिधीयते। तदुक्तम्—अमरकोषे—'चर्चा सङ्ख्या विचारणा' इति।

नन्वेवं बुद्धिविषयतैव सङ्ख्या इति उच्यते। तर्हि द्रव्यादिष्वपि सङ्ख्यारूपस्य अतिरिक्तस्य गुणस्यास्तित्वं किमर्थं स्वीक्रियते? यदि इष्टापत्तिः, तर्हि नैयायिकैः सिद्धान्तितस्य सङ्ख्यारूपस्य असामञ्जस्यप्रसङ्गात्। इति चेत् उच्यते। द्रव्यगुणादिसर्वसाधारण्येन सङ्ख्यापदार्थः: विषयतासंबन्धेन अपेक्षाबुद्धिरेव इति वदामः लाघवात्। अत्र द्वौ त्रयः इत्यादिविषयिणी या प्रतीतिः तस्याः विषयतासम्बन्धः घटादिभिः सह वर्तते। सोऽयं विषयतासम्बन्धः समवाय एव अत्र अभीप्सितः। समवायस्य अस्वातन्त्र्यरूपत्वात्। अस्य समवायरूपत्वं न नैयायिकानामपि अनभिमतं तदुक्तम् समवायनिरूपणावसरे।[१]

---

१. "उत्तानास्तु द्वे द्रव्ये इत्यादिलौकिकप्रत्यक्षान्यथानुपपत्त्या अपेक्षाबुद्धीनामिव त्रिचतुःक्षणावस्थायित्वं कल्पयितुमुचितम्।" पृ० १२६

२. तदुक्तम् काव्यप्रकाशविवरणे चतुर्थोल्लासे गोकुलनाथोपाध्यायकृते—

"ततो दशम एकादशे वा क्षणे शब्दार्थचमत्कारभावास्वादगोचरानर्थानुपादाय तथाविधविभावानुभावव्यभिचारिभावसम्पन्ने परस्परतिमदालम्बिते रतिः इति चर्वणा। स एव पानकरसन्यायेनालौकिकरसास्वादः। स चास्वादकप्रकर्षबलादधिकाधिककालं यथानुभवमवतिष्ठमानो निखिलैरेवालंकारचमत्कारास्वादादिभिः सह विरमति। सङ्ख्याजनकापेक्षाबुद्धीनां प्रयोजनानुरोधेन त्रिक्षणावस्थायित्वमिव काव्यप्रयोज्यास्वादपरम्पराणामधिकाधिककालव्यापकत्वमविरुद्धमिति दिक्।" पृ० १३३

१. प्र० भाष्य :—"इहेदमिति बुद्धिर्यतो भवति।"

न्या० क०—"इहेदमिति बुद्धिर्यतः कारणाद् भवति यतश्चासर्वगतानां नियतदेशावस्थितानामधिगतान्यत्वानामधिगतस्वरूपभेदानामविष्वग्भावोऽपृथग्भावोऽस्वातन्त्र्यं स समवायः—

जयमङ्गलाक्रोडपत्तम्

एवञ्च इमौ द्वौ इति प्रतीतिकाले सङ्ख्येयतद्‌बुद्धयोः मध्यवर्ती विषयतासम्बन्धः अपृथग्भावत्वेन भासमानत्वात् समवायानतिरिक्तः इति स्वीक्रियते। इयं बुद्धिरूपा सङ्ख्या समवायात्मकतथाविधसम्बन्धेन यत्र द्रव्ये उत्पद्यते। तत् समवायिकारणं इति सिद्धम्।

यद्येवं तर्हि सङ्ख्येयानां पिपीलिकादीनां विनाशे समवायिकारणाभावात् ''शतं पिपीलिकादीनामि''ति बुद्धिः कथमुत्पद्येत ? तदानीं तावत् सङ्ख्येयानाम् सयवायिकारणानामसत्वेन सङ्ख्याया अनुत्पत्तेः। इति चेद् न्यायकन्दल्यां सङ्ख्यानिरूपणावसरे यत्समाहितमस्ति तदेव अत्रापि द्रष्टव्यम्।[1]

एतेन एतत्पक्षे बुद्धेः सङ्ख्यारूपायाः उत्पत्तिः सङ्ख्येयानां पिपीलिकानां नाशेऽपि बौद्धपदार्थेषु संभवति। इति नात्र कश्चित् विरोधः।

राजनीतौ तु वेदान्तशास्त्रसिद्धस्य जगन्मृगतृषातुल्यपक्षस्य अनुमतत्वाद्विषयाणां निपतितत्वात् सर्वस्य आत्मरूपत्वमेव स्वीक्रियते। तथा सति उक्तसङ्ख्यात्मकबुद्धिमत्वस्य सिद्धिः सहजत एव नानुपपन्ना। अत्रेदमवधेयम्—सर्वविषयिणी या कापि बुद्धिर्भवतु तस्याः आश्रयपदार्थेन सह यदा अपृथग्भावरूपतया भासते तदा स समवायो बोध्यः। अन्यत्र भासमानतादशायां तु विषयतामात्रम् इति विषयतासमवाययोर्विवेकः। एतावत्पर्यन्तं जयमङ्गलायामुपवर्णितम् विवेकात्मकं सङ्ख्यास्वरूपं पर्यालोचितं तेनैव सङ्कलनपदार्थोऽपि स्फुटीभवति। एवंभूतसङ्ख्यात्मकविवेकवान् यः स एव पण्डितः इत्यपि अमरकोषे व्याख्यातम्—

भिन्नयोः परस्परोपश्लेषस्य सम्बन्धकृतत्वोपलम्भात्''। इति। तथा भावप्रकाशनेपि समवायस्वरूपं एवमेव वर्णितमस्ति तथाहुः ६ अ० १५८ पं०

व्यक्तिषु व्याप्यवृत्तित्वं सामान्ये कल्पितो गुणः।

स्वाश्रयाभिन्नरूपत्वं धर्मः स्यात्समवायभाक्॥ इति। न्या० कं० ट० २८३

१. ''यत्र विनष्टेषु सङ्ख्येयेष्वन्ते सङ्कलनात्मकः प्रत्ययो जायते, शतं पिपीलिकानां मया निहतमिति, तत्र कथं शतसङ्ख्याया उत्पत्तिः ? आश्रयाभावात् न्नोत्पद्यत एव तत्र सा, कारणाभावात्। शतव्यवहारस्तु रूपादिष्विव गौण इत्येके समर्थयन्ति। अपरेतु प्रतीतेस्तुल्यत्वादुपचारकल्पनामनादृत्यातीतानामेव द्रव्याणां संस्कारोपनीतत्वादाश्रयतामिच्छन्ति। यदत्यन्तमसत् खपुष्पादि तदकारणम्, निःस्वभावत्वात्। अतीतानां तु वर्तमानकालसम्बन्धो नास्ति, न तु स्वरूपम् तेषां स्मृतिसन्निहितानां तर्कानुगुणसहकारिलाभात् समवायिकारणत्वमविरुद्धम्। न चैवं सति सर्वत्र तथाभावः, यथादर्शनं व्यवस्थापनात्। अतीतस्य जनकत्वेऽनुभवस्यैव स्मृतिहेतुत्वसम्भवे संस्कारकल्पनावैयर्थ्यमिति चेन्न, निरन्वयप्रध्वस्तस्यानुपस्थितस्यापि कारकत्वात्। तदुपस्थापनाकल्पनायां तु संस्कारसिद्धिः तथा चान्त्यवर्णप्रतीतिकाले पूर्ववर्णानां विनष्टानामपि स्मृत्युपनीतत्वादर्थप्रतीतौ निमित्तकारणत्वमस्त्येव यथेदं, तथा समबायिकारणत्वमपि केषाञ्चिद् भविष्यति'' इति।

जयमङ्गलाक्रोडपत्रम्

तदुक्तम्—'सङ्ख्यावान् पण्डितः कविः'। इति। एवञ्च जयमङ्गलायां साङ्ख्यशास्त्रं षष्टितन्त्रात्मकमिति निरूपणात् प्राक्सङ्ख्या विवेकः इति निरूपणात् च यथा साङ्ख्यपदेन षष्टितन्त्रं कौटिल्यस्य अभिप्रेतं तथा विवेकनिरूपकस्य न्यायशास्त्रस्यापि अभीप्सितत्वात् चाणक्यपरवर्तिभिः अपरैः टीकाकर्तृभिः साङ्ख्यपदेन विवेकपूर्णषष्टितन्त्रात्मकस्य साङ्ख्यस्य एकदेशभूतः विवेकभागः न्यायपदेन बोधितः। बुद्धेः अनुमानाभ्यासपाटववतामेव उत्पत्तिदर्शनात् अनुमानञ्च भ्रमात्मकव्याप्तिज्ञानमूलकञ्चेत् उपहासाय भविष्यतीति तन्निरासाय न्यायशास्त्रस्य ग्रहणं कृतम्। तद्यथा—'न्यायशास्त्रं सांख्यादि' इति। (काम० नीति० जय० मंग० २ सर्ग इति)।

मूलकृता चाणक्येन तु सर्वस्य विचारस्य कृतत्वात् साङ्ख्यपदेन विवेकपरिपूर्णषष्टितन्त्रात्मकस्य साङ्ख्यस्य विशेष्यांशः षष्टितन्त्रभागः चिन्तितः स एव विशेष्यांशः प्रकृते तट्टीकायां जयमङ्गलाकृता व्याख्यातः, इति नास्ति कश्चन परस्परविरोधः।

अतएव न्यायशास्त्रस्य प्रामाण्यात् साङ्ख्यतत्त्वकौमुद्यां अनुमानस्य अवान्तरभेदनिरूपणावसरे न्यायशास्त्रोक्तपद्धतिमनुसृत्य अनुमानप्रामाण्यनिरूपणम् वाचस्पतिमिश्रैः अभ्यधायि।[1]

तस्मात् साङ्ख्यमपि न्यायशास्त्रसहचारि इति निर्विवादम्। यद्यपि केचन आधुनिकाः अनुमानप्रामाण्यमुपेक्षन्ते तथापि सन्ततुलसीदासकविप्रभृतिभिः पूर्वपरम्प-

---

१. त्रिविध मनुमानमाख्यातं तदिति। तत्सामान्यतो लक्षितमनुमानं विशेषतस्त्रिविधम्। पूर्ववत्। शेषवत् सामान्यतो दृष्टञ्च। तत्र प्रथमं तावत् द्विविधं वीतमवीतञ्च। अन्वयमुखेन प्रवर्तमानं विधायकं वीतं व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम्। तत्रावीतं शेषवत् शिष्यते परिशिष्यते इति शेषः। स एव विषयतया यस्यास्त्यनुमानज्ञानस्य तच्छेषवत्। यदाहुः "प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे संप्रत्ययः परिशेष" इति। अस्य चावीतस्य व्यतिरेकिण उदाहरणमग्रेऽभिधास्यते। वीतञ्च द्वेधा पूर्ववत् सामान्यतो दृष्टञ्च। तत्रैकं दृष्टस्वलक्षणसामान्यविषयं यत् तत्पूर्ववत् पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति यावत्, तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्ववत्। यथा धूमाद्वह्नित्व सामान्यविशेषो दृष्टो रसवत्याम्। अपरञ्च वीतं सामान्यतोदृष्टम् अदृष्टस्वलक्षण सामान्यविषयं यथेन्द्रियविषय मनुमानम्। अत्र हि रूपादिज्ञानानां क्रियात्वेन करणवत्वमनुमीयते। यद्यपि च करणत्वसामान्यस्य छिदादौ वास्यादिस्वलक्षणमुपलब्धं तथापि यज्जातीयं रूपादिज्ञाने करणत्वमनुमीयते तज्जातीयस्य करणस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण, इन्द्रियजातीयं हि तत् करणं नचेन्द्रियत्वसामान्यस्य स्वलक्षणमिन्द्रियविशेषः प्रत्यक्षगोचरोऽर्वाग्दृशां, यथा वह्नित्वस्य सामान्यस्य स्वलक्षणं वह्निः। सोऽयं पूर्ववतः सामान्यतोदृष्टात् सत्यपि वीतत्वेन तुल्यत्वे विशेषः।

जयमङ्गला

"प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ॥
तर्कश्चैव समाधिश्चषडङ्गो योग उच्यते ॥" इति ।

जयमङ्गलाक्रोडपत्रम्

राप्राप्तस्य अनुमानस्य प्रामाण्यं नागरिक्या भाषया निरूपितमस्ति तत्स्मर्तव्यम् ।[१]

किञ्च अनुमानप्रामाण्यस्य मित्रद्वारा उपयोगित्वं कथं सम्पादितं भवतीत्यपि तैः विशेषतया विस्तृतं वर्तते ।[२] समुद्रशरणागति प्रसंगे सुन्दरकाण्ड० ५९ दो०)

तस्मात् अत्यन्तमभ्यर्हितेन न्यायशास्त्रेण सहचरितस्य साङ्ख्यशास्त्रस्य साङ्ख्यपदेन विवक्षितत्वात् साङ्ख्यनिरूपणविषये टीकाकृतां मतभेदो नास्तीति सिद्धम्, इत्यलमस्ति विस्तरेण ।

'षडङ्गेति' अस्य फलेन सह अन्वयः । ऐश्वर्यं फलं यस्य सः षडङ्गः योगः इति यावत् ।

'ऐश्वर्यंति' ऐश्वर्यं भूतभौतिकवशित्वं फलत्वञ्च प्रवृत्युद्देश्यत्वम् । तदुक्तं मुक्तावल्यां मङ्गलवादे द्रष्टव्यम् षडङ्गान्याह-प्रत्याहार इत्यादि—

योगसूत्रे योगः अष्टाङ्ग उक्तः । स तु वानप्रस्थाश्रमिभिः संसाध्यते । तथाविधो योगः प्रजापालनप्रतिज्ञेन राज्ञा वने वासं विधाय न कर्तुं शक्यः इत्यतः प्रकृते अन्यमेव योगमभिदधाति । तर्क इत्यादिना । तत्र तर्कार्थं अपेक्षितस्य समाधेस्स्वरूपं अभिधीयते—न्यायकन्दल्याम्—

'धारकेण प्रयत्नेन वशीकृतस्य मनसः तत्त्वबुभुत्साविशिष्टेन आत्मना सह संयोगः इति उक्तम् (४६२ पृ० प्रत्यक्षप्रकरणे)

सोऽयं आत्मसंयोगः एकदेशे तर्कधारया चिन्तनेन साधितः समाधिरित्युच्यते। एवंभूतः समाधिः क्षत्रियेण स्वीयवर्णाश्रमधर्मे स्थितेन प्रजापालकेन न असाध्यो भवति । योगशास्त्रेण वर्णितः यः समाधिः तेन हि आत्मनः लाभो भवति इति तु

---

१. कुपथ निवारि सुपन्थ चलावा । गुन प्रगटै अवगुन हि दुरावा ।
देत लेत मन संक न धरई । बल अनुमान सदा हित करई ॥

२ सुन्दरकाण्ड ५९ दो.

मैं पुनि उरधरि प्रभु प्रभुताई । करिहउँ बल अनुमान सहाई ।
एहि विधि नाथ पयोधि बंधाइअ । जेहि यह सुजसु लोक तिहुँ गायउ ।

जयमङ्गलाक्रोडपत्रम्

सत्यम्, परन्तु तत्र पूर्णं वैराग्यमपेक्ष्यते। तदनुसारेण तद्ग्रन्थे यमनियमा अपि तथैव व्याख्याताः 'यो० सू—पृ० १०२—'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥३०॥ शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥३२॥ इति योगसूत्रनिरुक्ते योगे न सर्वेऽपि समानतया अधिकारिणो भवितुमर्हन्ति इति न स गृहीतो राजशास्त्रे। न्यायकन्दल्युक्तसामाग्रौ तु अधिकृतो गृहस्थोपि प्रवृत्तिमार्गे स्थितो भवितुमर्हति अतस्तत्र तर्कः, यमपदेन साधारणो धर्मः, नियमपदेन च स्वाश्रमधर्मः इति निर्णीतमस्ति। स्वधर्मे स्थितः राजाऽपि यदि तर्ककुशलः स्यात् तर्हि सोऽपि समाधिभागेवेति मत्वा तदधिकारं चिन्तयन् अर्थशास्त्रकर्ता योगमध्ये तर्कम् सङ्गृह्णाति। तत् साधु मन्तव्यम्।

अत्र उपर्युक्ते समाधिलक्षणे धारकप्रयत्नः मनसः एकदेशे धारणजनकत्वेन उक्तः। परन्तु तस्य कीदृशं स्वरूपं भवितुमर्हति इति तु नोक्तम्। अतः तद्विशदीक्रियते।

वैदिकसिद्धान्तसंरक्षिण्याम् १ ध्याये शक्तेः स्वरूपनिरूपणासरे निरूपितम् ज्ञानप्रभा आनन्दप्रभया मिश्रिता चेत् सत्वं भवति यत्र हि मनः रमते अर्थात् सुखमनुभवति तत्र मनसः कमले भ्रमरस्येव स्थितिः नियता इति लोके दृष्टम्। तथा ज्ञानप्रभायां यथा यथा सुखानुभवः स्यात् तथा तथा शक्रपदलाभादपि अधिकं लाभं मन्वानं मनः तां त्यक्तुं न समीहते।[1] तथाविधायां ज्ञानप्रभायां यदि क्रियाप्रभाऽपि संसृष्टा स्यात् तर्हि तदानीं नियमतः फलोपलब्धेः क्रियाप्रभाविशिष्टा सत्वमयी ज्ञानप्रभा शक्तिपदेन व्यपदिश्यते। इति

एवञ्च ज्ञानप्रभायां सुखानुभवेन मनसो यदवस्थापनं तदेव धारकप्रयत्नः इति बोध्यम्। ज्ञानेऽपि आनन्दानुभवः कथं भवतीति प्रश्नस्तु नीतिनिरूपणे हर्षविभावस्य आलोचितत्वात् तेनैव समाहितत्वाच्च नात्र पुनर्व्याख्यायते।

इदमेव नीतिशास्त्रस्य महत्त्वमितरशास्त्रापेक्षया यदत्र क्रियापर्यवसानं यावन्नभवति तावन्नीतिशास्त्रं न पर्याप्तम्। इतरशास्त्रान्तु विचारणामात्रेणाऽपि कृतकृत्यतां भजते। अतः नीतिः भारतीयराजशास्त्रोक्ता अनुष्ठिता चेत् शक्तिरूपतां भजते धारक प्रयत्नरूपताञ्चेति।

क्रियासातत्ये फलम्

अथ क्रियानिरूपणप्रसङ्गात् अन्यदपि किञ्चिद् वस्तु प्रकाश्यते। सत्वप्रचुरायां क्रियायां आरभ्यमाणायां सत्यां असंभावनादयो विघ्ना ये प्रतिबन्धकत्वेन उक्ताः अभिनवभारत्यां ते अकिञ्चित्कराः भवन्ति इति। तथाहि—यदा कस्मिंश्चित् वस्तुनि नैरन्तर्येण क्रिया सातत्येन चाक्षुषविषयीभवति। अथवा धाराप्रवाहन्यायेन

---

[1] तदुक्तम् :—यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। (गीता)

जयमङ्गलाक्रोडपत्रम्

क्रमेण सन्ततं एकसजातीयं विभिन्नं विभिन्नं वस्तु उपस्थितं सत् प्रकाशते। तदा अन्तराले सम्भूतस्य क्रियाविच्छेदस्य उत्पद्यमानस्य वा विभिन्नस्य विभिन्नस्य वस्तुनः पार्थक्यम् न चक्षुषा विषयीक्रियते।

यथा चित्रपटे एकस्या एव मूर्तेः हस्तचरणादीनां उर्ध्वाधोभागयोर्गमने तत्र एक एव हस्तः ऊर्ध्वं गच्छति अध आगच्छति इति दृश्यते। तद् हस्तचित्रं चित्रपटे दृश्यमानं वस्तुतो विचार्यमाणे नह्येकमेव तथापि अविच्छेदेन क्रियाप्रभायाः उर्ध्वाधोदेशादौ गमनात्मिकायाः प्रदर्शनं अनेकविधहस्ततत्क्रियाविच्छेददर्शनम् बद्ध्नाति। अथवा—

क्रियायाः ईदृशमपि माहात्म्यमस्ति यत् प्रतिकूलसर्वविधदृष्टितिरोधानम्। तथाहि—यद्देशावच्छेदेन क्रिया, विलम्बेन गतिमति शैघ्र्येण गतिमति च वस्तुनि उत्पद्यते तयोः गतिशीलयोः पदार्थयोः आश्रयभूतस्य देशस्य वैदिकसिद्धान्तानुसारेण-पार्थक्येऽपि तत् पार्थक्यंन्न दृष्टिगोचर भवति। इदमेव विशेषतिरोधानम् तद्यथा—

उद्दिष्टस्थलमुद्दिश्य द्वे धूमशकटे एकस्थानात् एकस्मिन्नेव समये यदि प्रचलिते स्याताम्। तर्हि तयोरेकस्मिन्नेव क्षणे उद्दिष्टस्थलस्य प्राप्तिः[1], क्रियाविभागादीनां क्रमानुरोधेन क्रियामारभ्य पञ्चमक्षणे जनिष्यमाण-क्रियानाशावधिककार्यकारणभावात् आवश्यकी। परं धुमशकटयोः प्राप्तिः तथा न भवति द्रुतगतिमतः शकटस्यापेक्षया मन्दगतिमतः धूमशकटस्य विलम्बेन तत्र प्रापणात्। इयं धूमशकटयोः विलम्बशीघ्रभावेन उद्दिष्टस्थले प्राप्तिः कस्मात् कारणसामग्री-वैषम्यात् अभूदिति चिन्तायां प्रागुक्तक्रियाविभागादिसामग्रीषु न्यूनाधिकत्वयोः कारणत्वस्य विलम्बशीघ्रभावं प्रति वक्तुमशक्यत्वात् पञ्चमक्षणात् प्राक् एकक्रियायाः उत्पत्तुमशक्यत्वात्। अतस्तत्सर्वमुपर्युक्तक्रियास्वभावनिरूपणेन सुसङ्गतं भवति। तस्याः विरोधि विशेषदर्शनात्मकदृष्टितिरोधानं प्रति जनकत्वस्य स्वाभाव्यात्। अर्थात् द्रुतगतिमतः शकटस्य गमनमार्गः विलम्बगतिमतः धूमशकटस्य च गमनमार्गः वेदान्तानुसारेण सङ्कोचविकासाभ्यां विभिन्नो विभिन्नः इत्येवं देशभेदसत्वेऽपि क्रिया-स्वाभाव्यात् चक्षुर्भ्याम् तन्मार्गविशेषदर्शनं कर्तुं न पार्यते।

अत एव यद्यपि राजशरीरं सर्वसाधारणशरीरमिव भासते तथापि तच्छरीर-स्य भूमौ चरणप्रक्षेपः इतरसर्वसाधारणचरणप्रक्षेपापेक्षया वैधर्म्यं भजतीति नाट्यशास्त्रे प्रदर्शितमस्ति। तत्कथं भवतीति चेत् तस्य शरीरमेव सत्त्वगुणविशिष्ट तथाविध-मस्ति यत् सत्वगुणलाभवेन तदीयगतिरपि इतरगतिसाधर्म्यं न भजते। अत्रायं निष्कर्षः वक्ष्यमाणरीत्या नीतौ क्रियाप्रभात्मिकायां सत्त्वगुणविशिष्टायां तमः—

---

१. क्रिया, क्रियातो विभागः, विभागात् पूर्वसंयोगनाशः, ततः उत्तरदेशसंयोगोत्पत्तिः ततः क्रियाविभागयोर्नाशः।

जयमङ्गलाक्रोडपत्रम्

प्रसूत्वस्वाभाव्यात् विशेषादर्शनरूपं तम इव स्वमहिम्ना सा असंभवानादिदोषान् अपि अभिनवभारत्यां उक्तान्[1] अपसारयति । इति

किञ्च प्रारब्धायाः क्रियायाः आनन्दमिश्रितायाः ज्ञानप्रभासंयुक्तायाः अपरोऽपि अयं स्वभावः यत् परिश्रमाद्यननुभवो नाम । यथा विवाहादिमङ्गलकार्यप्रसङ्गे अपरिमितमात्रया मातरः भगिन्यश्च ऊर्ध्वाधोभागेषु शतशः गच्छन्ति आगच्छन्ति च । तथापि परिभ्रमणगणितरीत्या आलोच्यमाने अनेकयोजनपर्यन्तगमनसंभवेपि परिश्रमं ता नानुभवन्ति । कुतः · इति ? चेत क्रियायाम् यत् आनन्दप्रभामिश्रणं तत्प्रयुक्तः एतावद्दूरपर्यन्त कृताया गतेरननुभवः एव इति मन्तव्यम् । इदमेव शक्तेः तमःप्रसवितृत्वम् । तदुक्तं भावप्रकाशने—'शक्तिः स्यात् तु तमःप्रसूः इति । इत्थञ्च । यः ज्ञानप्रभासंयुक्तक्रियाप्रभासम्पन्नः सः जडो वा भवतु, तत्र तस्य सात्त्विकत्वात् उपर्युक्तक्रियाप्रभात्मकशक्तिमाहात्म्याच्च प्रतिकूलसर्वविधदृष्टितिरोधानं यथा, तथा क्रियाशक्तिमहिम्ना कार्यकरणकर्तृत्वञ्च स्वेच्छानुकूलं संस्कारवशाद् उद्बुद्धं भवति इति । सिद्धम् ।[2]

नन्वेवं उपर्युक्तं धूमशकटादिषु स्वस्वगन्तव्यप्रदेशेषु वा जडेषु सात्त्विकत्वप्रयुक्तं लाघवं, तामसत्वप्रयुक्तं गौरवं कथं भवतीति तु न शङ्क्यम् वेदान्तसिद्धान्तस्य वास्तविकसिद्धान्तत्वात् तन्मतानुसारेण सर्वत्र साक्षिभूतस्य आत्मनः तादात्म्यात् सर्वत्र सर्वस्यापि सम्भवात् । 'कूलं पिपतिषति' इत्यादौ महाभाष्ये तथोक्तत्वाच्च ।

किञ्च वैज्ञानिकैः साध्यत्वेन साधनत्वेन च अभिमतयोः प्राकृतीं स्थितिमालोच्य यःकोपि कार्यकारणभावः निर्णीयते । स सर्वोऽपि प्रत्यभिज्ञादर्शनादिसिद्धान्तानुसारेण ईश्वरेच्छातः नातिरिच्यते इति उररीक्रियते । अस्य अयं भावः । सृष्ट्यारंभे 'बहु स्यां प्रजायेय' इत्युक्त्या स्वयमेव जडस्वरूपेण आत्मानं निर्माय

---

१. एतद्दोषनिरूपणं प्राक् कृतमस्ति टीकायाँ—

२. रथस्यैकं चक्रं भुजगयमिवाः सप्त तुरगाः ।
निरालम्बो मार्गश्चरणविकलः सारथिरपि ॥
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः ।
क्रियासिद्धिः सत्वे वसति महतां नोपकरणे ॥
अस्त्रामास तृणं प्रियाद्रुहि तृणामास स्मरारे धनुः ।
दारामास मुनेः शिलाऽपि नृवरामास स्वयं पादुका ॥
कुल्यामास महार्णवोऽपि कपयो योधांबभूवुः पुरा ।
पौलस्त्यो मशकांबभूव भगवन् त्वं मानुषामासिथाः ॥
इत्येतत्सर्वं यथावद् उपपद्यते ।

जयमङ्गलाक्रोडपत्रम्

तयोः साध्यसाधनभावं साधयितुम् यथा यथा नाट्यं कृतम् भगवता, तथा तथा सर्वोऽपि जडवर्गं चेतनवर्गश्च अनुतिष्ठति स्म। तत्संस्कारमहिम्ना अद्यापि सः तथैव कार्य-कारणभावं सम्पादयन् वर्तते। सैव ईश्वरेच्छा प्रागुक्तपरिष्कृतरीत्या शक्तिरूपतायां पर्यवस्यति। धारकप्रयत्नपदेन उपरिनिर्दिष्टा सा प्रभा क्वचिद् जडात्मकवस्तुषु यदा उद्बुद्धा भवति तदा जडवर्गः सप्तसु कारकेषु कर्तृपदव्यपदेश्यो भवति। यथा भूकम्प, जलप्रसरण, महामारीप्रभृतयः। यदा तु स एव जडवर्गः ईश्वरेच्छात्मककर्तृत्व-सम्पन्नस्य चेतनस्य कर्तृपराधीनो भूत्वा कार्यं सम्पादयति तदा सः कर्तृभिन्नकारक-पदव्यपदेश्यो भवति। तस्मात् कूलं पिपतिषतीति महाभाष्यप्रमाण्यात् 'अधिगच्छति शास्त्रार्थः' इत्यादिरीत्या वै० संरक्षिण्यां समुद्धृतपद्याच्च इच्छाज्ञानकृतिसमष्ट्यात्मकं ईश्वरीयं कर्तृत्वं सर्वत्र व्याप्तम्। एवं सत्त्वेऽपि यथा चन्द्रः रात्रावेव तमसि आवरणे प्रकाशते दिवसे तु सन्नपि न प्रकाशते। तद्वत् सर्वत्र प्रायः अस्याः कर्तृत्वशक्तेः पूर्णांशस्य तिरोभावः। क्वचिदंशे तु प्रकाशनम्। सोऽयं उक्तयोः ज्ञानप्रभामिश्रित-क्रियानन्दप्रभयोः प्रभाव एवेति ध्येयम्।

सेऽयं शक्तिः आनन्दप्रभारूपा नीतिशास्त्रमर्यादितानुष्ठाने यदा प्रादुर्भवति, तदैव वैदिकसिद्धान्तसंरक्षिणोटीकोक्तप्रतिभात्मकमतिभावसम्पत्तिमत्वं भवति। अन्यथा पारतन्त्र्यं दुर्निवारं स्यात् तस्मात् योगिभिः उपास्या शक्तिः, नीति-शास्त्रानुसारेण साधारणैः शास्त्रमर्यादां अनुसरद्भिरपि अवश्यं प्राप्तुं शक्यते। नीत्याख्येन धारकप्रयत्नेन मनः धारितञ्चेत् योगोप्यापद्यते इति वर्णाश्रमधर्मे स्थितेन क्षत्रियेणापि राज्ञा नीतिशास्त्रानुष्ठानमहिम्ना धारकेण प्रयत्नेन मनः धारयितुं शक्यते इति निर्णीतत्वात् समाधिः सुखेन लभ्यः, इति स्थितम्। अत्र समाधिलक्षणे तत्त्वबुभुत्साऽपि अपेक्षिता इति उपर्युक्त न्यायकन्दलीवाक्येन निर्णीतत्वात् राज्ञः नीत्यनुष्ठानेन सह तत्त्वबुभुत्साऽपि अभ्यर्हिता इति भाति। साच चिन्तारूपा अबाधितवस्तुलाभार्था यथार्थविषयिणी चेत् सफला भविष्यतीति; तर्कधारारूपतयापन्ना सती समाधिः इति मन्तव्यम्।

नन्वेवं तर्कधारात्मकसमाधेः उत्पत्तये बुभुत्सायाः चिन्तारूपायाः साधनत्वं कुतो ऽवगन्तव्यम् इति चेदुच्यते। तर्को हि व्याप्यारोपेण व्यापकारोपः भवति। यथा पर्वते वह्निसत्त्वेपि केनचित् वह्न्यभावः आरोपितः स्यात् तर्हि तत्र दृश्यमानस्य धूमस्याऽपि अभावः आरोपितो भवति। यथा पर्वतो यदि निर्वह्निः स्यात् तर्हि निर्धूमः स्यादिति। अस्यारोपस्य सामग्र्यां आपाद्यस्य व्यतिरेकनिश्चयः आपाद्या-पादकव्याप्तिनिश्चयेन सह गृहीतो वर्तते। यथा उक्तस्थले—वह्न्यभावधूमाभावयोः व्याप्यव्यापकभावनिर्णयः (अर्थात् यत्र यत्र वह्न्यभावः तत्र तत्र धूमाभाव इति) धूमाभावाभावरूपस्य आपाद्यव्यतिरेकस्य निर्णयश्च (यदि वह्न्यभाववान् स्यात्

जयमङ्गलाक्रोडपत्रम्

तर्हि धूमाभाववान् स्यात् त्याकारकः) तर्कं प्रति सहकारी भवति। तथा सति व्यापकारोपस्य धूमाभावनिर्णयात्मकस्य तर्कस्य उक्तसामग्रीबलात् आहार्यनिश्चयत्वं सिद्धम्। आहार्यनिश्चयश्च वाधज्ञानकालीनं इच्छाजन्यज्ञानमिति निर्दिश्यते। अत्र आहार्यलक्षणे यदि इच्छापदं न निवेश्यते तर्हि प्रत्यक्षात्मिकायाः पर्वते धूमवत्ताबुद्धेः प्रतिबन्धिकायाः सत्त्वात् पर्वतो धूमभाववान् इति ज्ञानमेव नोत्पद्येत इच्छा निवेशे तु पर्वते धूमाभाववत्ताज्ञानं जायतामिति इच्छाया उत्तेजिकयाः तत्समकालीनवाधवुद्धेः प्रतिबन्धकत्वं अपनोद्यते इत्यतो हेतोः अत्र तर्करूपे समाधौ आहार्यारोपे वुभुत्सायाः निवेशः कृतः।

अर्थात् तर्क एव वारम्वारं धारावाहिकश्चेत् समाधिर्भवति इति सिद्धम्। तर्कस्य एतावन्माहात्म्यं यत् तर्ककुशलेन अभ्यूहितं यत्किमपि तत् अनूचानेन निर्णीतत्वात् आर्षं भवतीति। उक्तञ्चैतत् प्रशस्तपादभाष्ये।[1]

अतएव शबरस्वामिभिरपि आत्मतुष्टिप्रामाण्यविचारे अनूचानदृष्टिरेव सङ्गृहीता उपपद्यते। एतेन वैशेषिकोक्तनियमानां पालनेन योगसिद्धिसम्भवात् योगशास्त्रोक्तनियमानामपालनेऽपि न क्षतिः।[2] अमुं योगवैशेषिकयोः भेदमाकलय्य

---

१. प्रशस्तपादभाष्यम्—

आम्नायविधातॄणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिवद्धेष्वनुपनिवद्धेषु चात्मनसोः संयोगात् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते। तत् तु प्रस्तारेण देवर्षीणाम्, कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति 'श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयति'' इति। अत्र न्यायकन्दली—

''आर्षं व्याचष्टे—क्षाम्नायविधातॄणामिति। आम्नायोवेदस्तस्य विधातारः कर्तारो ये ऋषयस्तेषामतीतेष्वनागतेषु वर्तमानेष्वतीन्द्रियेषु धर्माधर्मदिक्कालप्रभृतिषु ग्रन्थोपनिबद्धेष्वागमप्रतिपादितेष्वनुपनिवद्धेष्वागमाप्रतिपादितेषु चात्ममनसोः संयोगाद्यत् प्रातिभं ज्ञानं यथार्थनिवेदनं यथा स्वरूपसंवेदनम् संशयविपर्ययरहितं ज्ञानमुत्पद्यते तदार्षं मित्याचक्षते विद्वांसः। इन्द्रियलिङ्गाद्यभावे यदर्थप्रतिभानं सा प्रतिभा, प्रतिभैव प्रातिभमित्युच्युते। तत्र भवद्भिः तस्योत्पत्तिरनुपपन्ना कारणाभावादित्यनुयोगे सति इदमुक्तम् धर्मविशेषादिति। विशिष्यते इति विशेषो धर्मविशेषः विद्यातपःसमाधिजःप्रकृष्टो धर्मस्तस्मात् प्रतिभोदयः तत्तु प्रस्तारेण वाहुल्येन देवर्षीणां भवति, कदाचिदेव लौकिकानामपि। यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति। न चेदं संशयः उभयकोटिसंस्पर्शाभावात्। न च विपर्ययः, संवादादतः प्रमाणमेव। इति—

२. तथामनुनाऽपि उक्तम्—

जयमङ्गलाक्रोडपत्रम्

राजवृत्तौ षडङ्गः तर्कसचिवो योगः इत्युक्तम् इति योगः वैशेषिकशास्त्रोक्त एव ग्राह्यः । अथ—

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडंङो योग उच्यते ॥

श्लोकोऽयं व्याख्यायते—

प्रत्याहारः—विप्रतिपन्नविषयेभ्यः इन्द्रियाणां निवर्तनं प्रत्याहारः, यदि च इन्द्रियाणि ततो न निवर्तन्ते । मनश्च सुखबुद्ध्या विषयग्रहणार्थं इन्द्रियाणि संयुनक्ति तर्हि समाधिः कथमपि न सम्भवितुमर्हति ।[1]

एवमेव ध्यानादयोपि न्यायभाष्योक्तसमाधिलक्षणे यथा अन्तर्भवन्ति तथा बोध्याः । तद्यथा —

ध्यानम्—तत्त्वबुत्साविशिष्टेन आत्मना सह मनसः संयोग इति समाधिलक्षणघटकीभूता तत्त्वबुभुत्सा बोध्या ।

प्राणायामः—"ततः श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" इत्येवं अस्य योगसूत्रलक्षणनिर्दिष्टस्य उपयोगः मनसः संयमनार्थं ज्ञेयः । विना प्राणायामं तस्य संयमासम्भवात् ।

धारणा—तर्कानुकूलो यत्नः प्रागुक्तः धारकप्रयत्नात्मकः ।

तर्कः—व्याप्यारोपेण व्यापकारोपः ।

समाधिः—विजातीयवृत्तिनिरोधपूर्वकः सजातीय तर्कप्रत्ययप्रवाहः ।

योगः—योगलक्षणोक्तः तथाविधः आत्ममनसोः संयोग इति ।

एषु षट्सु अङ्गेषु बुभुत्सायाः उपयोगित्वस्य प्रागुक्तत्वात् , प्रत्याहृतस्येति समाधिलक्षणे न्यायभष्योक्ते निरूपितत्वात् च बुभुत्सा प्रत्याहारश्च तर्कात्पूर्वमपेक्ष्येते। प्राणायामादीनां तु सामानाधिकरण्यमात्रं बोध्यम् ।

योगसिद्धिः

ननु बुभुत्सया प्रत्याहृतेनेन्द्रियेण जीवेन यदि तर्करूपः समाधिः सञ्चारणीयः इत्युच्यते तर्हि तत्प्रयुक्तशमादीनामुद्भवेन सह दोषाणामपि कोपात् योगसिद्धिः कथं भविता ? तत्र उच्यते—

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः
हृदयेनाभ्यनुज्ञातो यो धर्मस्तन्निबोधत । इति ।
यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः
स धर्मो यं विगर्हन्ति तमधर्मं प्रचक्षते । इति । भ९ पु०

१. न्यायकन्दल्युक्ते समाधिलक्षणे प्रत्याहारस्य अनुक्तावपि राजनीतिशास्त्रस्य न्यायशास्त्रोपशास्त्रत्वात् न्यायशास्त्रे समाधिलक्षणे प्रत्याहारस्य निर्देशात् तन्निर्देशः अत्राऽपि कृतः । तथाचोक्तम् । "सतु प्रत्याहृतस्येन्द्रियेभ्यो मनसो धारकेण प्रयत्नेन धार्यमाणस्यात्मना संयोगस्तत्वबुभुत्साविशिष्ट" इति (न्या० सू० भा०)

जयमङ्गलाक्रोडपत्तम्

प्राणापानादिवायूनां रससञ्चारणादिकार्यं तत्तच्छिरामुखेन कथं भवतीति प्राक् भावप्रकाशनवचनोपन्यासपूर्वकं साधितमस्ति। तस्यायं भावः—यथा प्राणवायुः अन्नादीन् प्रवेशयति तथा शरीरस्य बहिर्भागे तैलादिमर्दने जाते रोमकूपद्वारा मर्दितं तैलमुदानवायुराकर्षति अयमुदानो यत्र रसादीन् प्रापयति तत्र आरोग्यमपि भवति इति आधुनिकैः लिम्फाटिक-(Limphacus)-शब्देन तदेव तत्वं व्यवह्रियते। एतत् उदानवायोः रससञ्चारणकार्यमपि नालौकिकम्। शिरावेधानन्तरं सञ्जनितं रक्तस्रावलक्षणं विविच्य उदानस्योपचारे कृते दोषस्य उपशमः भवतीति आयुर्वेदे उक्तं, दृष्टं चैतन्मानुषशरीरेऽपि, यदा किल वायोः प्राधान्यं भवति तदा शिराः अरुणाः पित्तेन नीलाः उष्णाश्च कफेन, गौर्यः शीताश्चेत्यादि ज्ञात्वा वायुसञ्चारण-चिकित्सा सिद्धा भवति किञ्च विनाप्याहारं साधारणी करणव्यापारद्वारा ध्यानेनापि हृद्याः ओजस्याः पदार्थाः शरीरान्तः प्रवेशयितुं शक्यन्ते तेनारोगलाभः इत्यपि दाढर्येन निर्णेतुं शक्यते। तत्रोदाहरणम्—नाटकदर्शनं भवितुमर्हति। तथाहि—

अभिनेता अभिनयसमये अनुकार्यहृदयस्थान् स्थायिभावान् सञ्चारिभावा-नुभावादिभिः सामाजिकानां पुरतः यदा व्यञ्जनाद्वारा प्रकाशयति तदा तद्व्यञ्ज-नायाः अयं प्रभावः यत् सामाजिकस्य चेतसि रजस्तमोभवान् विकारान् अभिभाव्य स्वशरीरमात्रवृत्तिपरिमितप्रमातृताञ्चापनोद्य अपरिमितप्रमातृतां सत्वगुणञ्च उत्पाद्य अनुकार्ये वर्तमानं स्थायिभावमुल्लासयति इति। तन्न्यायेन—

श्रुता दृष्टाः स्मृता ध्याता भवन्ति स्थैर्यहेतवः।
ते स्थिरा इति विज्ञेयाः वीरस्य कविकल्पिताः॥

इति भावप्रकाशनवचनानुसारेण ध्यानेनाऽपि श्रमपरिहारार्थं अपेक्षितस्य रसस्य सञ्चारणमपि कर्तुं पार्यते। तथा सति तर्कात्मकसमाधौ सम्भावितस्य श्रमस्य परिहारे योगसिद्धिः न दुर्लभा इति।

अत्रेदं मन्तव्यम्। अस्मिन् षडङ्गयोगे एकाग्रतया स्थितस्य पुरुषस्य पुरतः भगवत्प्रसादेन स्वतन्त्रताऽनुमापिका पूर्वमुक्ता क्रियाशक्तिः आनन्दप्रभामिश्रिता सती उद्बुद्धा भवति इति गुरुभक्तिनिरूपणावसरे निरूपितमस्ति। सैव शक्तिः अत्र योगेन काम्यते। अस्याः शक्तेः उपर्युक्तायाः स्वातन्त्र्यात् स्वातन्त्र्यं तेन च स्वतन्त्रतारूपमीश्वरत्वं भवितुमर्हतीति स्पष्टं वक्तुं शक्यते। सेयं न हि कुतश्चित् अपरतः प्राप्या वर्तते अपितु शरीरस्य मस्तिष्कभागे वर्तते इति सिद्धान्तात्।

तदुक्तम्—

दहराकाश—मध्यस्थ—सहस्रदल—शोभिते।
विस्फुरत्केसराश्लिष्टकर्णिके पङ्कजोदरे॥

जयमङ्गलाक्रोडपत्रम्

निवातदीपवत्स्थायी सोमसूर्याग्निमण्डले ।
आत्मा निःसङ्ग एवैकः साक्षी सर्वस्य कर्मणः[१] ॥ इति ॥

---

१. इदं हि भावप्रकाशनपद्यं न सुबोधमिति कृत्वा प्रसङ्गात् विविच्यते ।

'दहरं पुण्डरीकमि'ति वेदप्रामाण्यात्,

'उदरमुपासते त ऋषिवर्त्मसु कूर्पदृशः
परिसरपद्धतिं हृदयमारुणयो दहरम् ॥' इति

भागवतोक्तेश्च १०।८७।१८ उक्तपद्ये दहरपदेन हृदयं विवक्षितम् । तदन्तर्वर्ती यः आकाशः सः दहराकाशः । तस्य मध्ये स्थितानि सहस्रदलानि, तत्सम्बद्धाः नाड्यो मस्तिष्कान्तर्वर्तिन्यः, तैः शोभिते मस्तके इत्यर्थः ।

अत्र एवं भवति—यत्, मस्तिष्कान्तर्वर्तिदलानां कमलदलसदृशानां मस्तक स्थिततत्तान्नाडीसम्बन्धेन हृदयसम्बन्धित्वात् मस्तिष्कस्थितानि दलानि हृदये स्थितानि सम्भवन्ति इति तेषां दहाराकाशमध्यस्थसहस्रदलशोभितत्वमुपपन्नम् । अथवा—

स्वशरीरे पद्मानि षड् सन्ति । तेषु पद्मद्विकं मिथोमुखसम्बद्धम् एकं । मुखभागात् आमस्तकम् । अपरं हृदये । तृतीयं नाभिस्थाने अस्ति । तदुक्तं योगवासिष्ठे—

'पद्मयुग्मत्रयं यन्त्रमस्थिमांसमयं मृदु ।
ऊर्ध्वाधोनालमन्योन्यमिलत्कोमलसद्दलम् ॥' इति

एतन्मतरीत्या मस्तिष्कस्य हृदयत्वात् दहरपदेन मस्तिष्कमपि वक्तुं शक्यते । तत्र केसरपदेन उपर्युक्ताः नाड्यः बोध्याः । ताः मस्तिष्कबद्धकर्णिकायां वर्तन्ते । तदुक्तम्—विस्फुरत्केसराश्लिष्टकर्णिके इति । एवं भूते मस्तिष्के पङ्कजोदरे आत्मा सर्वस्य साक्षी । अत एव स जगदुपादानभूतः अस्ति इति 'आत्मा निःसङ्ग एवैक' इत्यनेन स्फुटीकृतम् तस्य सर्वसाक्षित्वात् स्वातन्त्र्येण च ईश्वरत्वं नासङ्गतम् । तस्य प्रसादे सति जीवेन किमिति इतस्ततः भ्रमितव्यम् ? तदुक्तं रसगङ्गाधरे—

'सन्तापयामि किमहं धावं धावं धरावले नितराम् ।
अस्ति मम शिरसि नन्दकुमारः प्रभुः परमः ॥' इति ।

ईश्वरस्वरूपे आपाततः विचार्यमाणे स सर्वत्र अस्त्येव । तथापि शरीरे मस्तिष्कान्तर्वर्तितया स्थितत्वेन यः साक्षी शरीरान्तर्वर्तिनीःनाडीः प्रेरयति, सः अत्र ईश्वरत्वेन व्यवहृतः ।

एवं भावप्रकाशनपद्ये वर्णिता शक्तिरपि आत्मरूपा सती ज्ञानतन्तुद्वारा जीवस्य इन्द्रियार्थसंवेदनामनुभूय क्रियातन्तुद्वारा मनः प्रेरयति । मनसश्चेच्छारूपत्वम् । तदुक्तम्—

'तस्य स्यामितिसङ्कल्पः मन आख्यां लभेत्तु सः :' (भा० प्र०) इति । इच्छात्मकस्य मनसः सत्वपरिणामित्वंपि प्रागुक्तम् ।इच्छात्मके मनःशरीरे स्थितं सत् सर्वत्र—

जयमङ्गला

लोकायतं बार्हस्पत्यम्। लोकाय बुद्धिं तनोतीति नैरुक्तम्। तदिह लौकिक—

जयमङ्गलाक्रोडपत्रम्

अयं योगरूपः समाधिः यः उक्तः तत्सिद्धौ कुण्डलिन्यपि जागृता भवतीति नात्र पर्यन्ते अष्टाङ्गयोगापेक्षया न्यूनत्वं भाति। शेषमुपरिष्टात् षष्ठाध्याये स्फुटीकरिष्यते।

अहन्त्वेन परिणम्य प्रवर्तते अतः मनसः शरीरपरिमितत्वं नानुपपन्नम्। ये किल तस्य अणुत्वं वदन्ति तेषां मतसमन्वयं षष्ठाध्याये निरूपयिष्यामः।

तस्येदं कार्यं यत् प्राणादिवायुपञ्चकं द्वारीकृत्य तत्तन्नाडीषु रससञ्चारणेन सह पित्रोः सकाशादुपलब्धस्यौजस्तत्त्वस्य प्रापणमिति। प्राणादिद्वारेण मनसः सञ्चालनं तावत्पर्यन्तं न भवति यावत्पर्यन्तं मस्तके वर्तमानस्य ईशस्य आज्ञां तत् न प्राप्नुयात् इत्यपि लोकसिद्धमेव। यतः संवेदनस्य मध्येमार्गं यदि शरीरस्थशिरायाः वेधः संवेदनशून्यत्वं वा अनुष्ठीयते ? तर्हि मध्यवर्त्यङ्गच्छेदेऽपि तत्संवेदनं जीवस्य न भवति।

प्राणादीनां सञ्चरणं कुत्र ? को वा सञ्चरणस्य लाभः इत्यादि भावप्रकाशने उक्तमस्ति तद्यथा—भा० प्र०

"प्राणादिभेदात्पञ्चात्मा शरीरं व्याप्य तिष्ठति।
येन प्राणिति सर्वत्र स प्राणो मूर्धनि स्थितः॥
उरःकण्ठचरो बुद्धिहृदयेन्द्रियचित्तधृक्।
ष्ठीवनक्षवथूद्गारनिश्वासान्नप्रवेशकृत्॥
उरःस्थानमुदानस्य नासानाभिगलांश्चरेत्।
वाक्प्रवृत्ति प्रयत्नोर्जाबलवर्णस्मृतिप्रदः॥
व्यानो वहिःस्थितः कृत्स्नदेहचारी महाजवः।
गत्यवक्षेपणोत्क्षेपनिमेषोन्मेषणादिकृत्॥
प्रायः सर्वाः क्रियास्तस्मिन्प्रतिबद्धाः शरीरिणाम्।
समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वदा।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति।
अपानोऽपानगः श्रोणिबस्तिमेढ्रोरुगोचरः।
शुक्लार्तवशकृन्मूत्रगर्भनिष्क्रामणक्रियः।
दश जीवनधामानि शिरोरसनबन्धनम्॥ इति

तथाचेदं सिद्धं—यत्, ईश्वरस्वरूपायाः स्वतन्त्रशक्तेः साक्षिभूतायाः मस्तके वर्तमानायाः प्रसादः एकाग्रभूमिकायां स्थितेन विद्यासेवाकर्मणा षडङ्गतर्करूप समाधिना च यदा प्राप्येत तदा का सिद्धिः सुदुर्लभा ? तदुक्तम् भागवते—सा विद्या तन्मतिर्यया, इति। तथा—

प्रसन्ने पार्वतीनाथे किमसाध्यं शरीरिणाम्। इति।

जयमङ्गला

साध्यसाधनोपायफलनिश्चयेऽपि सन्दिग्धपारलौकिकाप्रत्याख्यानोपदेशाय। यथोक्तम्-

जयमङ्गलाक्रोडपत्रम्

नैरुक्तमिति। अनेन लोकाय बुद्धिं तनोति इति व्याख्यानेन सर्वदर्शनसंग्रहे चार्वाक मतनिरूपणावसरे उक्ता लोकायतपदव्युत्पत्तिः न ग्राह्या इति सूचयति। तथाहि-तत्र लोकेषु आयतं प्रसिद्धम् इत्यर्थाभिप्रायेण लोकायतशब्दव्युत्पत्तिः निरूपिता।

यदि इयं व्युत्पत्तिः अत्र स्वीक्रियते तर्हि लोकस्य प्रवृत्तिः न सर्वत्र शास्त्र-ज्ञानप्रसूतैव भवति, तस्याम् मिथ्याज्ञानवासनाप्रयुक्तत्वस्याऽपि सम्भवात्। एवं चेदृशी-प्रवृत्तिर्यदि अत्र गृह्येत, तर्हि नीतिविरुद्धत्वमापद्येत। अतः नीत्यनुकूलतया इदं व्युत्पत्त्यन्तरप्रदर्शनमिति भावः। तस्य फलमाह—लौकिकेति।

एवञ्च एतन्मतेनापि परलोकस्य सन्दिग्धत्वेऽपि तद्विरुद्धं न करणीयम्, अशुभस्य आपादनप्रसङ्गात् इति ध्येयम्। तदेव वक्ष्यति-'सन्दिग्धे'त्यादिना।

चार्वाकमतस्य ग्रहणम्

नन्वेवं पूर्वपक्षतया अन्येषु मतेषु सत्सु चार्वाकमतमेव कुतः गृहीतमिति चेन्न। पूर्वपक्षेषु चार्वाकादन्यमतेषु नैष्कर्म्यभावः उपलभ्यते स तु राजशास्त्रे अनिष्टः। अत्र तु प्रत्यक्षस्य प्रामाण्यं स्वीकृत्य यथावत् शरीरस्य निरामयत्वं चिकीर्ष्यते चार्वाकेणापि तदभिप्रेत्य 'ऋणं कृत्वा घृतं पिबेदि'ति उक्तम्। अपिच लोकस्थितिं पर्यालोचयता चार्वाकेण 'लोकसिद्धो राजा ईश्वरः', 'नीतिशास्त्रानुसारेण वर्तनं धर्मः' इत्युक्त्वा लोकानुग्रहक्षमं नीतिशास्त्रं भङ्ग्यन्तरेण इदमेव गृह्यते। तेन पूर्वं सञ्जातस्यापि ऋणस्य अपाकरणं नीतिशास्त्रमनुसरतः चार्वाकस्य नासुलभम्। अत्रायं निष्कर्षः—देहः यदि अस्वस्थः स्यात् तर्हि सः किं कुर्यात्? इति हेतुना ऋणमपि स्वीक्रियते। ततः स्वास्थ्यलाभानन्तरं नीत्यनुष्ठानेन मित्रसम्पत्तेरुपलब्ध्या धनलाभेन प्राग्जातमृणम् अपसारयितुं नाशक्यम् इति। अतः नैष्कर्म्याभावात् चार्वाकमतं पूर्वपक्षरूपेण सङ्गृहीतम्। न्यायशास्त्रेण च परलोकादिविषये सन्दिग्धतां निरस्य अभिनिवेशः उत्पाद्यते, इत्येतत् प्रागुक्तमस्ति, इति चार्वाकमतग्रहणविवेकः।

लोकायतस्य पश्चाद् ग्रहणम्

नन्वेवं पूर्वपक्षत्वेन अभिमतस्य लोकायतस्य आन्वीक्षिकीविभागप्रकरणे आदौ अभिधानं कुतो न कृतम्? इति चेदुच्यते। क्वचित् पश्चात् उक्तोऽपि अर्थः आदौ संयोजनीयो भवति। क्वचित् पूर्वमुक्तोऽर्थः पश्चात् अपि संयोजनीयो भवति। इत्येतन्मीमांसान्यायकौशलप्रदर्शनाय एवमभिहितम्। तथाहि—

जयमङ्गलाक्रोडपत्रम्

अर्थक्रमेण शब्दक्रमस्त्यक्तो भवति इति मीमांसान्यायः। तस्योदाहरणम् 'अग्निहोत्रम् जुहोति, यवागूं पचती'ति। अग्निहोत्रहोमानन्तरं यवागुपाक-विधानस्य वैयर्थ्यात् अग्निहोत्रहोमेतिकर्तव्यताकाङ्क्षायाश्च जागरूकत्वात् 'यवागूं पचति, अग्निहोत्रं जुहोति' इत्येवमर्थक्रमः मीमांसया साधितः। तथैव अत्र लोकायतस्य पश्चाद् ग्रहणेऽपि आन्वीक्षिक्या धर्मार्थयोः परीक्षण-प्रसङ्गे ये ये आक्षेपाः सम्भवन्ति ते सर्वेऽपि उपस्थापयितव्या भवन्ति, अन्यथा धमार्थविषये यादृशः अभिनिवेशः षष्ठाध्याये वक्ष्यमाणेऽपेक्ष्यते तादृशो न स्यात्। स्याच्च नास्तिकमतेनापि धर्मार्थयोः खण्डने काचन युक्तिः। इत्येवंरीतया सन्दिग्धता जागरूकैव भवेत्। एवं "वुद्धिपौरुषहीनानां जीविकेति वृहस्पतिः" इति न्यायेन धार्मिकै रपि धर्मः जीविकार्थमुपयुज्यते इति सम्मन्येत। तथा सति तेषु अर्थं-रुच्यभिवृद्ध्या सत्त्वस्थाने तमोबाहुल्यं प्रसज्येत। तस्मात् उक्तसन्दिग्धतानिरा-सार्थं पश्चादुक्तमपि लोकायतम् अर्थक्रमस्य बलीयस्त्वेन पूर्वपक्षरूपेण आन्वी-क्षिक्याः पूर्वमेव योज्यम्। तेन यथासम्भवं सर्वेषु आक्षेपेषु उपस्थितेषु तत्समाधानाय आन्वीक्षिक्याः यदा प्रवृत्तिः स्यात् तदा तद्द्वारा सन्दिग्धतानिरासानन्तरं धार्मिकाः धर्मविषये दृढम् अभिनिवेशेयुः। सत्त्वञ्च उत्पद्येत तेषु, ततः तद्द्वारा लोकानुरागमात्मनि उत्पाद्य वृत्तिरपि अनुषङ्गतः संपत्स्यत इत्यादि निर्णयः सुखेन सञ्जनिष्यते इति अब्रह्मज्ञानां पुरतः लोकायतमतं पूर्वमपेक्षितमस्ति पूर्वपक्ष-रूपेण इति बोध्यम्। अथ लोकायतस्य पश्चाद् ग्रहणे कौटिल्यस्य कश्चन अन्योऽप्यभिप्रायः अवश्यमेव स्यात् इति यदा पर्यालोच्यते तदा तु एवं वदामः, यत् ब्रह्मज्ञानां पुरतः अनुष्ठानप्रसङ्गे लोकायतमतमेव स्वीकर्तव्यत्वेनापेक्षितम्, तैः ब्रह्मज्ञानानन्तरं नरकभयाभावेन स्वर्गस्य अकाम्यत्वेन च तदर्थं त्रय्या निहितस्य आचारस्य अनपेक्षितत्वात्। इति वै० रक्षिण्यां प्राक् सविस्तरं प्रपञ्चितमस्ति। तद्बोधनाय लोकायतस्य पश्चाद् ग्रहणं बोध्यम् इति।

यद्वा शास्त्रसिद्धान्ते केचन अप्रामाण्यं व्यवस्थापयिष्यन्तः शब्दस्य अप्रामाण्यं साधयितुं चेष्टन्ते। तदा चार्वाकमतमाश्रित्यैव प्रत्यक्षप्रामाण्यपुरस्कारेण शब्दः अप्रमाणं चेत् तवापि शब्दः कुतः प्रमाणत्वेन स्वीकर्तव्यः इति जल्पस्य अवसरो भवति। इत्यपि शत्रुपक्षपातिनः सभायां महत्तरं कार्यमस्ति। अन्यथा स्वमतस्य संस्थापनं कथमपि न भवेत्। तथाविधा शक्तिः यस्य नास्ति सः शत्रुपक्षपातिनः सभां न प्रविशेत्। इति चरकेण स्वग्रन्थे विशदीकृतमस्ति[१]।

---

१. तद्यथा—"तत्र प्रतिनिविष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनशक्तिसपन्नायां मूढायां वा न कथञ्चित् केनचित् सह जल्पो विधियते। मूढायां तु सुहृत्परिषदि उदासीनायां वा ज्ञानविज्ञानमन्तरेणाप्यदीप्तयशसा महाजनद्विष्टेन सह जल्पो विधीयते। पृ. २५२, (१५) विमानस्थानम्। अध्याय ८. इति।

जयमङ्गला

"सन्दिग्धेऽपि परे लोके त्याज्यमेवाशुभं बुधैः ।" इति ।
असमासकरणं व्यस्तसमस्तख्यापनार्थम् ।

जयमङ्गलाकाण्डपत्रम्

उक्तजल्पावसरे आन्वीक्षिकीघटकतया लोकायतस्यापि अत्यन्तमभ्यर्हितत्वं सम्भवति, तया समस्तलोकव्यवहारे प्रत्यक्षतः इष्टसाधनत्वं प्रदर्श्यते, तर्हि लोकोऽयं प्रत्यक्षतः इष्टसाधनत्वमवगम्य वर्णाश्रमधर्मे अभिनिविष्टो भवितुमर्हति, इति लोकसङ्घटनार्थं चार्वाकमतमपेक्ष्यते, इति कृत्वा लोकायतम् आन्वीक्षिक्यां पूर्वपक्षरूपेण अन्तर्भाव्यापि पश्चात् निरूपितमिति ।

अप्रत्याख्यानेति । अयं भावः—ब्रह्मज्ञोऽपि राजा चार्वाकमतमपेक्षमाणोऽपि परलोकस्य प्रत्याख्यानं कदापि न कुर्यात् इति दर्शनार्थम् । अन्यथा एतदध्याये बृहस्पतिमतनिरूपणावसरे "अर्थमात्रपरोऽयं निग्रहरुचिः" इति उक्ताऽपत्तिः अस्मिन् प्रसज्येत । इष्टापत्तौ च अर्थरुचित्वेन ख्याति प्राप्तः ब्रह्मज्ञोपि राजा अविश्वस्तत्वात् लोकेन निगृहीतो भवेत् इत्येकं फलम् ।

प्रजायां केनचिद् कृतेन नास्तिक्यबहुलप्रचारेण स्वयं सन्दिहानः आन्वीक्षिक्याम् अकुशलः अब्रह्मज्ञोऽपि राजा लोकयात्राव्यवहारं पश्यन् परलोको नास्तीति न प्रतिजानीयात् इति उपदेशो द्वितीयं फलम् ।

अप्रत्याख्यानस्य अपरमपि प्रयोजनं बोध्यम् । यत् परलोकापेक्षी राजा सदाचारेषु तत्साधनत्वं विजानानः लौकिकं साध्यसाधनभावं न विजानाति, तर्हि तत्सदाचारोऽपि लोकस्य उपेक्षाविषयः स्यात्, इति तदपेक्षाऽपि अत्र ध्वनिता इति तृतीयं फलम् ।

अपि च चतुर्थमप्रत्याख्यानस्य फलं यत् लोकयोः परस्परसापेक्षा सङ्गतिः मैत्रीपूर्विका धर्मस्य प्रख्याख्याने न कदापि चिरं तिष्ठेत् ।[1] इति

---

१ तदुक्तं धर्मविजयनाटके धर्मस्वरूपनिरूपणे—
'न्यायस्मृत्योर्विरोधे क्वचिदपि बलवानर्थशास्त्राद्बलीयः
क्वाप्युक्तं धर्मशास्त्रं क्वचिदपि वचने देशभेदाद् व्यवस्था ।
बाधोऽन्यस्मिन्विपक्षे क्वचिदपि गदितो धर्मकल्पे विकल्प—
स्तेनैवं वाक्यभेदात्सुमुखि ! न नियतो धर्मशास्त्रार्थ एकः ॥'

धर्माधर्मौ[1] त्रय्याम्, अर्थानर्थौ वार्तायाम्, नयापनयौ दण्डनीत्याम्; बलाबले चैतासां हेतुभिः[2] अन्वीक्षमाणा आन्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये[3] च बुद्धिम् अवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति ॥

जयमङ्गलाक्रोडपत्रम्

समस्तेति। यदा नास्ति परलोकः इति वादिभिः सह विवादप्रसङ्गः स्यात्, तदा केवलस्य लोकायतस्य उपयोगित्वं जल्पार्थं मन्तव्यम्। यदा तु तत्त्वनिर्णयाय वादः प्रचलिष्यति, तदा वाद एव कर्तव्यः इति न्यायसूत्रे निबद्धमस्ति।[1]

एवं स्थिते साङ्ख्ययोगापरपर्याये न्यायवैशेषिके उपयुज्येते, इत्येवमेषां व्यस्तकरणम्। यत्र हि वादजल्पवितण्डाः तिस्रोऽपि कक्षाः प्रसक्ताः, तत्र लोकायतसाङ्ख्ययोगाः उपयुज्यन्ते इति समस्तकरणम्। इत्येवं समस्तव्यस्तपदतात्पर्यं बोध्यम् इति।

श्रीमूला

धर्माधर्मौ त्रय्यामित्यादिना त्रय्यादीनां फलसूचनम्, तच्चान्वीक्षिकीफलस्य तद्विसदृशत्वव्युत्पादनार्थम्। धर्माधर्माविति, प्राधान्येन प्रतिपाद्याविति शेषः। तेन त्रय्यामर्थानर्थनयापनयानामानुषङ्गिकतया क्वचित् क्वचित् प्रतिपादनेऽप्यविरोधः। एवं वार्तादण्डनीत्योरपि ज्ञेयम्। तत्र धर्मोऽध्ययनयजनादिः, अधर्मः श्वमांसभक्षणादिः। अर्थः कालबीजवापादिजन्यं फलम्। अनर्थः अकालबीजवापादिजन्यम्। नयो ज्यायसा सन्ध्यादिः येन योगक्षेमौ निष्पाद्येते, अपनयस्तु ज्यायसा विग्रहादिः येन योगक्षमौ विहन्येते। एतासां त्रय्यादीनाम्। हेतुभिरन्वीक्षमाणा न्यायैः सम्प्रधारयन्ती। व्यसन इत्यादिनोपकारस्वरूपोक्तिः। बुद्धिमवस्थापयति अविकृतां करोति, बुद्धिर्दुःखे यथा नोद्विजेत सुखे च न प्रहृष्येत तथा तां नियच्छतीत्यर्थः। यदाहुः—'न प्रहृष्येत् सुखं प्राप्य नोद्विजेतासुखादपि' इति। प्रज्ञावाक्यक्रियावैशारद्यं विचारवचनकर्मसु पाटवम्।

नी० टी० १. संवरणमात्रमेव फलं नान्यदिति। तथा च वक्ष्यति। धर्म्मरुचिरुपांशुदण्डं प्रयुञ्जोतेति।

२. युक्तिभिः।

३. उपकारान्तरं दर्शयन्नाह-व्यसने इति।

१ "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः, पक्षप्रतिपक्षपरिग्रहो वादः"—न्या० सू० भा०

वैदिकसिद्धान्तसंरक्षिणी

इज्यादिर्धर्मः। श्वमांसभक्षणादिरधर्मः इति। त्रय्यां स्थित इति शेषः। एवमग्रेऽपि। अर्थेति। काले बीजवापादिनिष्पन्नोऽर्थः। अकाले बीजवापादिनिष्पन्नोऽनर्थः। नयेति। ज्यायसा सन्धिर्नयो, विग्रहस्त्वपनयः। एतासां तिसृणां विद्यानाम्। अथासु बलाबल-विचारमुखेन आन्वीक्षिक्युपयोगं प्रकटयति—बलाबले इति। न्यायसञ्चारणात्मक उपकारः; निर्विकारतात्मकस्य सत्वस्य शङ्कापनयेन उत्पादनं बुद्धेरवस्थापनम्, प्रज्ञावाक्यक्रियाणां वैशारद्यं चेति न्यायविद्यायाः त्रिविधं फलम्। तत्र न्यायसञ्चारणं सूचयति – हेतुभिरिति। युक्तिभिरित्यर्थः। अत्र ज्ञापिका उत्पादिकाश्चोभयविधा अपि युक्तयः परिग्राह्याः। ताभिर्विद्यानां बलाबलविचारो भवति। तथाहि—

वेदविद्या स्मृत्यपेक्षया प्रबला इति सर्वसम्मतम्। किन्तु क्वचित् स्थले स्मृतेः प्राबल्यं भवति। यथा 'वेदं कृत्वा वेदिं करोति', इति श्रुत्यपेक्षया 'क्षुते आचामेत्' इति स्मृतेः प्राबल्यम् इति मीमांसात्मकयुक्त्या साधितम्। इति अनयोः प्राबल्यदौर्बल्यावसर इत्थम्। वेदिः वेदं कृत्वा कर्त्तव्या इति श्रुतिर्विधत्ते। "कृत्वा" इति क्त्वाप्रत्ययेन वेद्याः वेदकरणानन्तर्यं श्रौतं भवति। यदि वेदकरणानन्तरं क्षुत्प्रसङ्गः, तदा स्मृति-विधानेन आचमनं कर्तव्यं भवति। यदि तत् क्रियते तर्हि वेदकरणानन्तर्यबाधः। यदि आचमनं न क्रियते तर्हि स्मृतिबाधः स्यात्। प्रसक्तेऽस्मिन् विरोधे युक्त्या निर्णेतव्यम्। अन्यथा "युक्तिहीनविचारे तु धर्महानिः प्रजायते" इत्युक्तरीत्या धर्महानिः स्यात्। तत्र स्मृतिप्राबल्ये क्रमस्य श्रौतस्य पदार्थधर्मस्य बाधः, श्रुति-प्राबल्ये पदार्थस्याचमनस्य बाधः। एवं स्थिते गुणस्य क्रमस्य बाधापेक्षया आश्रयस्या-चमनस्य बाधे दोषबाहुल्यं युक्त्यैव ज्ञेयम् इति।

एवम् अर्थशास्त्रं धर्मशास्त्रं वा चौर्ये कृते स्तेनो दण्ड्य इति वक्ति। किन्तु प्राणबाधाप्रसक्तौ प्राणरक्षणाय जीवनपर्याप्तधनस्य हीनकर्मणः ग्रहणम् अनुमन्यन्ते व्यवहारविदः। तद्यथा—

'तथैव सप्तमे भक्ते भक्तानि षडनश्नता।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥१६॥
खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते।
आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति ॥१७॥'

(मनुः अ० ११) इति।

स्थलविशेषे अन्नमनुमतमिति कृत्वा जलस्य चौर्यं, हीनकर्मणो जलग्रहणं वा न कर्तव्यम्, तस्यान्यत्र सौलभ्यात्। यथावा शासनं बलीयः, क्वचित् धर्मः प्रबलः, इत्याद्यपि व्यवहारप्रकाशात् युक्त्यैव ज्ञातव्यम्[१]।

---

१. धर्मादीनां चतुर्णां पूर्वपूर्वस्योत्तरोत्तरापेक्षया दुर्बलत्वमाह नारदः—
धर्मश्च व्यवहारश्च चरितं राजशासनम्।—

चतुष्पाद् व्यवहारोऽयमुत्तरः पूर्वबाधकः । इति । (अ० १ श्लो० १०)
व्यवहारस्य धर्मबाधकतामाह बृहस्पतिः—

शास्त्रं केवलमाश्रित्य क्रियते यत्र निर्णयः ।
व्यवहारः स विज्ञेयो धर्मस्तेनावहीयते ॥

शास्त्रशब्देन शास्त्रोक्तं साक्ष्यादिप्रमाणम् तेन यो निर्णयः क्रियते स व्यवहारः । तेन धर्मः शपथादिकृतो निर्णयोऽवहीयते मानुषप्रमाणे सति दिव्यानवसरात् । अत एवाह कात्यायनः—

युक्तियुक्तं तु कार्यं स्याद्दिव्यं यत्र विवर्जितम् ।
धर्मस्तु व्यवहारेण बाध्यते तत्र नान्यथा ॥

चरित्रस्य व्यवहारबाधकतामाह बृहस्पतिः—

देशस्थित्याऽनुमानेन नैगमानुमतेन वा ।
क्रियते निर्णयस्तत्र व्यवहारस्तु बाध्यते ॥

नैगमाः पौरवणिजः । नैगमानुमतेनानुमानेनेति सम्बन्धः सामानाधिकरण्येन वाशब्दोद्देशस्थित्यपेक्षः ।
अमुमेवार्थं स्फुटयति कात्यायनः—

प्रतिलोमप्रसूतेषु तथा दुर्गनिवासिषु ।
विरुद्धं नियतं प्राहुस्तं धर्मं न विचालयेत् ॥
निर्णयं तु यदा कुर्यात्तेन धर्मेण पार्थिवः ।
व्यवहारश्चरित्रेण तदा तेनैव बाध्यते ॥ इति ॥

स्मृतिविरुद्धमपि नियतत्वान्न विचालयेद्राजा ।
राजशासनस्य चरित्रबाधकतामाह बृहस्पतिः—

विहाय चरिताचारं यत्र कुर्यात् पुनर्नृपः ।
निर्णयं सा तु राजाज्ञा चरित्रं बाध्यते तया ॥ इति ।

चरिताचारं पूर्वंपूर्वाचरितमाचारम् । यद्यपि "तं धर्मं न विचालयेत्" इत्युक्तमत्र तु "विहाय चरिताचारम्" इत्युच्यते । तेन विरोधः प्रतिभाति । तथापि यदि तद्विचालने पुरराष्ट्रादिक्षोभो न भवति, तदा स्मृत्यादिविरुद्धत्वात्तं दूरीकृत्य स्मृत्याद्यविरुद्धो राजाज्ञया निर्णयः कार्यं इति तात्पर्यम् । अत एव पुरराष्ट्रविरुद्धस्य विवादस्यानादेयत्वमुक्तं पुरराष्ट्रक्षोभापादकतया तदनापादकतया तु स्मृत्याद्यनुरोध एव कार्यो राज्ञेति । अत एवाह कात्यायनः—

विरुद्धं न्यायतो यत्तु चरित्रं कल्प्यते बुधैः ।
एवं तत्र निरस्येत चरित्रं तु नृपाज्ञया । इति ।

नृपैर्यन्न्यायविरुद्धं चरित्रं न ग्राह्यमिति कल्प्यते । तत्र नृपाज्ञया तच्चरित्रं निरस्यते बाध्यत इत्यर्थः । यथोक्तप्रकारातिरिक्तप्रकारेणैषां बाध्यबाधकताकल्पने दोषमाह कात्यायनः—

अनेन विधिना युक्तं बाधकं यद्यदुत्तरम् ।
अन्यथाबाधनं यत्र तत्र धर्मो विहन्यते ॥

(वी० मि० व्यवहार प्र० परिभाषापरिष्कारे पृष्ठम् ८८)

वैदिकसिद्धान्तसंरक्षिणी

उपकरोति हितं करोति। आन्वीक्षिकीत्यनेनान्वयः। द्वितीयं प्रयोजनमाह—व्यसने इति। व्यसने विपत्तौ। अभ्युदये संपत्तौ। अवस्थापयति बुद्धि हर्षशोकाभ्यां व्युदस्यति। धृत्युत्पत्त्येति शेषः। आन्वीक्षिकीत्यनेनान्वयः पूर्ववत्। तद्यथा—

हर्षशौकौ अविवेकहेतुत्वात्प्रबलौ शत्रू स्तः। यतः हर्षो मनःप्रसादरूपः तस्य सामग्री अचिन्त्येष्टार्थसंपत्त्यादिरूपा या वर्तते।[1]

सा सर्वापि हर्षसामग्री हर्षेण सह मानस्य मदस्याप्युत्पादिका भवति इति भावप्रकाशनावलोकनेन निर्णीयते। अत्रायं निष्कर्षः—हर्षस्य लब्धये यतमानः अविवेकी चेत्, स मानमदाभ्यां युक्तो भवति। ताभ्यां मूढता, सुहृदाम् अनादरः, पारुष्यं च नियतमेतेन जनापरागः, ततो विनाशः। तदुक्तम्—

"मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः॥
अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि॥" इति।

(किराते स० २)

प्रसिद्धं चैतत् वातापियदुवंशयोर्नाशेतिहासतः। इति।

अतो हर्षो महान् शत्रुः। शोकोऽपि तथैव। तथाहि—स च प्रतियोगिनि प्रीत्या तन्नाशासहिष्णुत्वलक्षणद्वेषवासनास्वरूपः। तस्मिन्नुदिते सति पर्यन्ते स्त्रीनीचानां यमलोकनिर्याणम्, मध्यमप्रकृतीनामपि मुमूर्षा मृतिर्वा भवति।[2]

संसारे कस्यापि कृते शोकस्यावसरो नास्तीति नास्ति स्थितिः। तर्हि शोकस्यावसरोऽपि प्रतिपदं वर्तते, तेन नाश उपर्युक्तरीत्या नियतः। ततः संरक्षणाय विवेक एव उपायः। तदुक्तम्—

'उत्तमानामतिप्रौढो विवेकेनैव शाम्यति' इति। (भाव० नं० ३)

तस्मात् हर्षशोकौ शत्रू, तन्निराकरणाय विवेक एक एवोपायः। सोऽयं विवेकः

---

१. हर्षं संपत्तिः ९ पृष्ठे द्रष्टव्या।

२. शोकात्मा करुणो योषिन्नीचादिप्रकृतिः स्वतः।
अभीष्टविरहाच्छापात् क्लेशाच्च विनिपातनात्॥
वधादिष्टस्य पुत्रादिनिधनादर्थहादितः।
राज्यदेशपरिभ्रंशादन्यान्यव्यसनोद्यात्॥
देवोपघातादु दारिद्र्याद् व्याधादिभ्यः प्रजायते।
स्त्रीनीचादिषु शोकोऽयं मरणव्यवसायतः॥
मध्यमानां भवेच्छोको मुमूर्षा मृतिरेव वा। इति। (भा० प्र० ३ अ०)

वैदिकसिद्धान्तसंरक्षिणी

यया विद्यया संपद्यते सा न्यायविद्योपयोगिनीति द्वितीयमस्याः प्रयोजनम् ।[१]

तृतीयं प्रयोजनं आह–प्रज्ञे ति । प्रज्ञावाक्यक्रियाणां वैशारद्यं रजस्तमसोरपसारणपूर्वकं सत्वस्य वर्धनेन नैर्मल्यसम्पादनम् । तदिदम्—

"निर्विचारवैशारद्ये अध्यात्मप्रसादः" (४-४७) इत्येतस्य योगसूत्रस्य व्याख्यायां स्फुटम् । तथा हि—'अशुद्धावरणमलापेतस्य प्रकाशात्मनः बुद्धिसत्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छः स्थितिप्रवाहो वैशारद्यम्' इति ।

अथ प्रज्ञादीनां वैशारद्यं विशदीक्रियते—

मतयो यत्र गच्छन्ति तत्र गच्छन्ति वानराः ।
शास्त्राणि यत्र गच्छन्ति तत्र गच्छन्ति तं नराः ॥

इत्युक्त्या प्रवृत्तिर्द्वेधा भवति—एका शास्त्रतो विवेचनपुरस्सरं इष्टसाधनताप्रमापूर्विका, अपरा तु जन्मान्तरीयवासनया इष्टसाधनतामवबुध्य इति । तत्र जन्मान्तरीयवासनाया उद्बोधः घुणाक्षरमिव कदाचित् नीतिमर्यादामनुसृत्य भवति । क्वचित्तु नीतिविरुद्धेऽपि । अत एव समाजोऽपि द्वेधा दृश्यते । एकः शास्त्रानुयायी, अपरः गतानुगतिक इति न्यायेन लोकव्यवहारं पश्यन् प्रवर्तमानः । यः किल लोकव्यवहारं पश्यन् प्रवर्तते, स विवेचक इति वक्तुं न शक्यते, यतः मोहस्यावरणं तत्र स्थिर— मस्ति । यथा पक्षिविशेषः विचित्रतरं वृक्षकोटरेषु गृहन्निर्माति, शुकः स्वादुफलमेवात्ति, तथापि तौ बुद्धिमन्तौ न भवतः इति दृष्टमेव । एतदपेक्षया मनुष्यसमाजस्य अतीव कठिनतमावस्था । यतः गतानुगतिकन्यायेन प्रवर्तमानः समाजः यावत्पर्यन्तं विपरीतं रसाभासमयं नेपथ्यं न पश्यति, न वा शङ्कते, तावत्पर्यन्तं स्वे स्वे कर्मण्यभिरतो भवति । तथापि यदा स विपरीतं नेपथ्यं पश्यति, शङ्कते वा, तदा यस्य नेपथ्यमुत्कृष्टं पारतन्त्र्यस्य द्योतकमपि यत् स्यात् तदनुकरणमपि स कर्तुं प्रयतते । तत्रैव वाऽऽनन्दमनुभवति च । इयं दशा सर्वस्य समाजस्य यदि स्यात्, तर्हि कार्याकार्ये न केनापि ज्ञायेयाताम् । अतः सूक्ष्मतरवविवेचनाय न्यायविद्या समागता । तया प्राप्तया प्रज्ञया सूक्ष्मया सत्यासत्यान्वेषणकुशलता भवति[२] । ईदृग्विधः न सहसा अन्यत्र प्रवर्तते । तदिदं प्रज्ञायाः वैशारद्यम् ।

---

१. "आन्वीक्षिक्यात्मविद्या स्यादीक्षणात् सुखदुःखयोः ।
ईक्षमाणस्तया तत्त्वं हर्षशोकौ व्युदस्यति । इति ।

टी० तथाहि इदं सुखसाधनं इदं दुःखसाधनमिति पदार्थतत्वान्वीक्षणं ततश्च तया तत्वमीक्षमाणो हर्षशोकौ व्युदस्यति । तद्यथा प्राप्तापि क्षणभङ्गुरा वृद्धिरित्यभ्युदये हर्षमपनयति दृष्टा च जीवतामात्मवतां पुनरावृत्तिर्नलादीनामिवेति व्यसने शोकम्" इति ।

२. परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम् परीक्षा । परमतं परकीयमतिविषयः अनुमानप्रामाण्याभावः, तन्निराकरणं तज्ज्ञानेऽप्रामाण्यज्ञापनम्, यद्वा परमतं परमतिः, सा च—

वैदिकसिद्धान्तसंरक्षिणी

वाक्यवैशारद्यमपि न्यायविद्यया कथं भवतीत्युच्यते। प्रज्ञाया अपरपर्यायः बोध इत्यभिधीयते। स च द्विविधो भवति—एकः सखण्डोपाधिकः, अपरः अखण्डोपाधिकः यस्य निर्वचनं, नाट्ये अभिनयनं वा कर्तुं शक्यते तद्बोधः सखण्डोपाधिविषयको भवति। यस्य तु न निर्वचनं नापि नाट्ये अभिनयनं कर्तुं शक्यते तद्बोधोऽखण्डोपाधिविषयको भवति। यदि पदार्थः निरुच्यावबोधितः, तर्हि न्यायविद्यया प्रज्ञावैशारद्यं सम्पन्नमित्युच्यते। ततोऽखण्डोपाधिर्येनावगतः स बुद्धिमान् वाग्मी उच्यते। उक्तवैशारद्यमन्तरा अखण्डोपाधिर्येन ज्ञातः स तस्य निर्वचनम्, इदमित्थमेवेति रीत्या निर्धारणं वा कुर्यादेवेति न वक्तुं शक्यते। एवं स्थिते सोऽखण्डोपाधिं जानानोऽपि निर्वचनासामर्थ्यात् वाग्मी वा कुशलो वा न भवति। यश्च केवलं निर्वचनपटुः, नाखण्डोपाधिं एकमनुभवति, स व्युत्पन्नोऽपि अकिञ्चत्कर एव। इति रीत्या प्रज्ञावन्तः त्रयो भवन्ति। तत्रोक्तेषु लक्ष्यलक्षणोभयज्ञः उत्तमः, द्वितीयो लक्ष्यज्ञः मध्यमः, तृतीयः अधमः लक्षणमात्रज्ञ इत्युच्यते शास्त्रविद्भिः। तद्यथा—

"लक्षणज्ञो निकृष्टस्तु लक्ष्यवेदी च मध्यमः।
उभयं यो विजानाति स उत्तम इति स्मृतः॥" इति।

(नी० उपा० ५ स० ७४ श्लोकं)

उक्तोऽयं विषयः प्रज्ञावैशारद्यार्थं उदाहरणमुखेन विशदीक्रियते–पदं सुबन्ततिङन्तभेदात् द्विविधम्। तत्र तत्तत्पदस्यावयवा द्विविधाः, एका प्रकृतिः, अपरः तयोः प्रत्ययः। तत्र सुबन्ते प्रकृतिः प्रातिपदिकसंज्ञा भवति। प्रत्यय एव विभक्तिर्भवति। कतिपयानि प्रातिपदिकानि एवं भवन्ति यत् सर्वासु भाषासु एकानुपूर्वीकाणि। यथा 'राम-कृष्णे'त्यादयः। परन्तु एकोऽपि प्रत्यय एव नास्ति, यः समानानुपूर्वीकः बह्वीषु भाषासु भवेत्। अस्यायं भावः—यत् तत्तद्भाषासाधारण्येन राम-कृष्णादि-स्वरूपज्ञापनार्थं रामः कृष्णः इति समानानुपूर्वीं प्रयोक्तुं शक्यते, अथवा धनुर्धारणस्य मुरलीधारणस्य च चिह्नेन अभिनयद्वारा वा रामकृष्णौ बोधयितुं शक्येते। प्रत्ययार्थस्तु न्यायविद्यया वैशारद्यप्राप्तिमन्तरा सर्वभाषासाधारण्येन कथं बोधनीयः? इति महान् प्रश्नः। तथाहि-नास्ति प्रत्ययस्य तादृश्यानुपूर्वी, यस्याः प्रयोगः सर्वसाधारणबोधनाय प्रयुज्येत। न वा न्यायविद्यापरिष्कृतपद्धतिं विना प्रत्ययार्थस्य कर्तृत्वकर्मत्वादेः स्वरूपं तथाविधं भवितुमर्हति, यस्य अभिनयनं धनुर्धारणाभिनयवत् क्रियेत। न च प्रत्ययाः केवलं भाषासौष्ठवमात्रमित्यपि वक्तुं शक्यम्, तत्तद्भाषाविद्भिः कर्तृत्वादेरवबोधनात्। सोऽयं बोधः उक्तेषु त्रिविधेषु प्रज्ञावत्सु निर्वचनेऽसमर्थानां

नानुमानं प्रमाणमित्याकारिका तन्निराकरणं तत्राप्रामाण्यज्ञापनं तत्रासिद्ध्याद्युद्भावनम्, तत्पूर्वकं तदुत्तरकालिकं स्वमतमनुमानप्रामाण्यं तद्व्यवस्थापनमप्रामाण्यज्ञानानास्कन्दिततद्गोचरज्ञानानुकूलव्यापारः। अनुमानाप्रामाण्यज्ञाने असत्यप्रमाण्यज्ञाने अनुमानप्रामाण्यग्रहोत्पत्तेर सम्भवेन व्यापारस्य न ज्ञानजनकत्वसम्भव इति भवति तस्य परमतनिराकरणपूर्वकत्वम्।

अखण्डतया ज्ञातवतां मध्ये बोधे पर्यवसितः। यथा साहित्यविदां मते विभावानुभावादिना अभिव्यज्यमाना रसप्रतीतिः वेदान्तिनां निर्विकल्पिका आत्मप्रतीतिर्वा अनिर्वचनीयतामापन्नापि सहृदयानुभवैकवेद्यत्वात् यथा प्रमाणभूता भवति। तथैव प्रत्ययार्थकर्तृत्वादिप्रतीतिरपि मन्तव्या। न च तावतैवास्तु किं निर्वचनेन? तदपि न। यद्यखण्डोपाधिप्रतीतिः उचितसन्निवेशेन जन्यते तदा न कापि हानिः। परन्तु अनुचितसन्निवेशेनापि यदि रसाभासप्रतीतिवज्जायेत, नेपथ्यं च तदनुगुणम् उत्कृष्टं भवेत्, तर्हि तदनुकरणं प्रज्ञावैशारद्याभावे समाजेन स्वायत्तीक्रियेतेति आपत्तिः प्राङ्निर्दिष्टा, सैवापत्तिः अखण्डोपाधिप्रत्ययार्थं ज्ञातवत्सु प्रसज्येत। अतः रसाभासनिराकरणाय प्रज्ञावैशारद्यमिव प्रत्ययार्थाभासनिराकरणाय वाक्यवैशारद्यमपेक्ष्यते। तच्च वैशारद्यं व्युत्पत्तिरूपम्। व्युत्पत्तिश्चात्र प्रत्ययार्थस्य निर्वचनम्। तेन विभक्त्यर्थोऽन्यूनानतिरिक्तो निर्णीतो भवति।

किं च अस्य वाक्यवैशारद्यस्य उपयोगः सामान्यतया व्यवहर्तृषु लोकेषु कतिपयेभ्यो न रोचेत, तथापि न्यायालये राजशासने वा व्यवहारदशायां निर्णयकाले वा व्यवहारविदः 'सम्भवती'त्येतावन्मात्रेण न विश्राम्यन्ति, संभवस्तु स्थलेषु मोहाद्यावरणसंभवात्। अतः ते असन्दिग्धमेवार्थं प्रयुञ्जते। यदाहुर्वीरमित्रोदये व्यवहारप्रकाशे राजशासनालेख्ये—

"इदं च साधुशब्दैरेव लेखनीयम्। न लौकिकवत्तदनियमः। तथा च सङ्ग्रहकारः—

सुलिप्यनपशब्दोक्तिसम्पूर्णावयवाक्षरम्।
शासनं राजदत्तं स्यात् सन्धिविग्रहलेखकैः ॥" (पृ० १४५) इति ॥

अतः असंन्दिग्धत्वाय संस्कृतभाषामयं निश्चितं न्यायविद्याद्योतितं परिष्कृतं रूपमेव तत्रोपायः। नेदं सौष्ठवं अन्यस्यां भाषायां न्यायविद्ययाऽसंघटिते अनिर्वचनशीले अखण्डोपाधिबोधे वा भवति।

एवं रीत्या न्यायविद्यया निरुक्तेषु प्रत्ययार्थेषु असन्दिग्धत अनुभूय व्यवहारविदः शास्त्रकुशला वा वाक्यवैशारद्यं स्तुवन्ति। अत्रायं निष्कर्षः—उक्तेषु त्रिविधेषु प्रज्ञावत्सु लक्षणतः आत्मनि अधमां प्रज्ञामुत्पाद्य उत्तमां प्रज्ञां सम्पादयितुं कुशलाः तेषु अर्थेषु वर्तमानं पूर्वोक्तम् अखण्डं कर्तृत्वाद्युपाधिं परिचिन्वन्ति। सति च तस्मिन् ते उत्तमा इति व्यपदिश्यन्ते। न च न्यायविद्यया प्राप्तेन निर्वचनकौशलेन प्रत्ययार्थः परिज्ञातः। पुनः किमिति परिज्ञातस्यासन्दिग्धार्थस्य स्वरूपम् अखण्डम् अवगन्तुं प्रयासः इति वाच्यम्। विनाऽखण्डार्थं सर्वत्र निर्वचनेन कृतार्थत्वासंभवात्। तद्यथा—द्वितीयार्थः कर्मत्वम्, तच्च धात्वर्थतावच्छेदकफलाश्रयत्वं परसमवेतत्वं च इति नैयायिका निर्वचनं कुर्वन्ति। तेन कर्मत्वस्य स्वरूपमवगतम्, परन्तु यदि निरुक्तं परिष्कृतं कर्मत्वं सर्वत्र यथावत् सङ्गमयितुं प्रयत्येत, तर्हि "काशीं गच्छन् पथि मृतः" इति प्रयोगोऽनुपपन्नः स्यात्। यतो हि "गम"धात्वर्थतावच्छेदकं फलं उत्तरदेशसंयोगः स ग्रामानुयोगिकः

वैदिकसिद्धान्तसंरक्षिणी

गन्तृप्रतियोगिकः स तु गन्तुः परलोकप्रयाणेनाप्रसिद्धः। एवं च परिष्कृतकर्मत्वस्य काश्यामसत्वेन "काशीं गच्छन् पथि मृतः" इत्यस्य प्रयोगस्यासाधुत्वकल्पनं विना नास्त्यपरा गतिः, किन्तु एवं कल्पनां प्रामाणिकाः ज्यायसीं न मन्यन्ते। तदिदं युक्तियुक्तम्। तथाहि प्रामाणिकानां लक्ष्यव्यवहारमुपजीव्य लाक्षणिकाः लक्षणं परिष्कुर्वन्ति, तेषां लक्ष्यव्यवहारे स्वलक्षणमनुसृत्याप्रामाण्यकल्पनं न युज्यते, इति कृत्वा लाक्षणिकाः कर्मत्वम् अखण्डोपाधिं स्वीकुर्वन्ति। तथा च "काशीं गच्छन् पथि मृतः" इति प्रयोक्तृदृष्ट्या उक्तरीत्या अप्रसिद्धेऽपि उत्तरदेशसंयोगे काश्याम् अखण्डं कर्मत्वमस्त्येवेति नास्य प्रयोगस्य अप्रामाण्यम्। नन्वेवम् उक्तप्रयोगानुपपत्या कर्मत्वं तथाविधं न परिष्कारशुद्धमिति चेन्न। न्यायविद्यया कस्याप्यर्थस्य परिष्कृतिः या क्रियते, तस्या फलम् अखण्डोपाधिबोधः। तथा च परिष्कारस्य मर्यादा अखण्डोपाध्यविगतिः। तदवगत्यनन्तरं न्यायविद्यया कृतः परिष्कारः कामं दोषयुक्तो भवतु, न कापि हानिः। यथा अरुन्धतीदर्शनार्थं प्रथमतः शाखायाः अरुन्धतीत्वमुच्यते तथा प्रकृते बोध्यम्। नेदं नैयायिकानामप्यसम्मतम्, श्रीबच्चाझा (धर्मदत्त) महोदयैः स्वग्रन्थे विलक्षणप्रतियोगितासंबन्धेन अभावे घटस्य पर्यन्ते अन्वयस्वीकारात्। अन्यथा घटत्वनिष्ठाऽवच्छेदकतायाः इतरवारकनिवेशेऽपि घटत्वनिष्ठावच्छेदकतायास्तदुभयाभिभिन्नत्वेनापुनरपि सामान्यभेदनिवेशस्य, विवक्षितत्वे तत्रापि सामान्यभेदस्य आवश्यकत्वात् अनवस्थापत्तिर्दुर्वारा स्यात्।[1] मुक्तावल्याम् अपि साधर्म्यविचारे तत्र तत्र अखण्डार्थजातिघटितं लक्षणं स्वीकृतम्। तथाहि- "क्षित्यादीनां नवानां तु द्रव्यत्वमुपयोगिता" इत्यत्र गुणवत्वं साधर्म्यं क्षित्यादीनां नवानामित्युक्तम्। तच्चोत्पन्नविनष्टे घटेऽव्याप्तम्। अतः गुणसमानाधिकरणसत्ताव्याप्यजातिमत्वं तत् परिष्कृतम्। एतस्य लक्षणस्य समन्वयो गगनादौ, तथाविधद्रव्यत्वजातिमादायैव वक्तव्यः। द्रव्यत्वजातिमत्वं लघुभूतं लक्षणं यद्यपि सम्भवति, तथापि गुरुभूतस्यास्य लक्षणत्वं यादृशजातिपरिचयार्थं-

---

१. 'अथावच्छेदकतात्वावच्छिन्नत्वस्य तादृशावच्छेदकतात्वातिरिक्ततधर्मानवच्छिन्नत्वरूपतया तादृशावच्छेदकतात्वस्यापि तादृशावच्छेदकतात्वगगनोभयभेदवत्वेनासम्भवप्रसङ्गः। यदि च विलक्षणप्रतियोगितासंसर्गेण तादृशावच्छेदकतात्वविशिष्टभेदवदवच्छिन्नत्वविशिष्टाभावत्ववत्त्वरूपमेव तदित्युच्यते, तदा विलक्षणस्वावच्छिन्नप्रतियोगितासंसर्गेण साध्यतावच्छेदकविशिष्टाभाव एव साध्याभावपदार्थोऽस्त्वलमुक्तक्रमेण पर्याप्तिघटिततद्व्युत्पादनेनेति चेत् सत्यम्। उक्तरूपवृत्तित्वस्य तत्तद्धर्मावच्छिन्नत्वरूपताप्रतिपादनेन विलक्षणप्रतियोगितायां बालोव्युत्पादयितुं शक्यो नान्यथा। तद्घटकभेदादिषु तच्छङ्कायां तदादिशब्दोपबन्धेन तद्धर्मावच्छिन्नप्रतियोगिताकाभावस्य तद्धर्मातिरिक्तधर्मानवच्छिन्नप्रतियोगिताकाभाव इति सामान्येन विलक्षणप्रतियोगितामात्रे व्युत्पादयितुं शक्य इति उक्तरूपेण लक्षणकरणान्नायुक्तमिति गृहाण।' इति जागदीशीपंचलक्षणीविवरणम्।

मवश्यं वक्तव्यंभवति। तादृशजातेर्यथावत्परिचये गुणसमानाधिकरणत्वाद्यंशस्य परित्यागेऽपि न हानिरिति। एतात्रत्पर्यन्तं नैयायिकानां मतमवलंब्य कृतेन प्रज्ञावाक्यवैशारद्यविचारेणालम्। अथ साहित्यविदोऽपि एतद्विषये कथं प्रस्तुवन्ति इत्यपि विचार्यते। प्रज्ञावैशारद्यं वाक्यवैशारद्यं च उभयविधं भवति। एकं न्यायविद्यासाहाय्येन सन्देहनिरासक्षमं निर्वचनबहुलं सखण्डमभिधया अभिधीय-मानतायोग्यम् अभिनयेन वृद्धव्यवहारेण वा सामाजिकानां हृदये बोधजननयोग्यं च। अपरम् अनिर्वचनीयमखण्डम् अभिधयानभिधेयमभिनयायोग्यं च तद्व्यक्तिमात्रपरम्। पुनरुभयमपि सप्रयोजनं चेति निर्णीतम्। तदेव व्युत्पत्तिशक्तिभेदेन द्विविधं गदन्ति साहित्यविदः। तयोर्मध्ये न्यायविद्यया परिष्कृत्य तदर्थबोधे व्युत्पत्तिरित्युच्यते। अखण्डोपाधिबोधे तु शक्तिरित्यभिधीयते। उदाहरन्ति चात्र। तथाहि-गायकाः कवयो वा केचिदेवं भवन्ति, ये गायने व्यञ्जकस्वरसमूहविशेषापरपर्यायं रागविशेषं स्रग्धरादि छन्दो वा श्रुत्वा अनुकर्तुं पारयन्ति (यथा 'अनूच्चरितः भैरवोराग-स्रग्धराछन्द आदि), किन्तु एवंविधशक्तिमन्तोऽपि तयोः स्वरूपं ते यथावद् विवेचयितुं यदि असमर्थास्तर्हि एते अव्युत्पन्ना इति कथ्यन्ते। अपरे पुनः निर्वचनपटवो न्याय-विद्यासाहाय्येन परिष्कृतस्वरूपं विन्दन्तोऽपि उक्तरागछन्दआदीन् शृण्वन्तोऽपि अविलम्बेन नानुकर्तुं पारयन्ति। एते व्युत्पन्ना अपि अशक्ता इत्युच्यन्ते। अधिकं तु काव्यप्रकाशव्याख्यायां श्रीगोकुलथोपाध्यायकृतायां द्रष्टव्यम्। अतः सर्वसाधारण्येन शक्तिविशिष्टज्ञानं विविक्तार्थविषयकज्ञाने कारणम्। वैशिष्ट्यं स्वाश्रयपदविषयकत्व-स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्योभयसंबन्धेनेति ब्रुवन्ति पारिष्कारिकाः। उभयविधस्यास्य व्युत्पत्तिशक्तिनिर्वचनस्य प्रागुक्तमुपयोगित्वं अजानन्तः न्याय-विद्यायाः परिष्कारप्रणालीं खण्डयन्तः सुखावहम् अखण्डोपाधिबोधमुररीकुर्वन्ति केचित्। अपरे पुनः न्यायविद्यापरिष्कृतिमेव उत्तमां मन्यन्ते। राजनीतिस्तु व्युत्पत्ति-शक्तिभेदेन उभयविधमपि बोधम् अभिमन्यते, यद्विषये इयं प्रशस्तिः :—

आदौ शास्त्रान्धकारे पतित इव ततोऽभ्यासमार्गे चरिष्णुः
पश्चाद् व्युत्पत्तिदेहल्यपग इव ततः शक्तिवाटीप्रविष्टः।
नानाशब्दाख्यपुष्पावचयकरणतो वाग्वशीभूतविश्वो
यत्प्रेमापाङ्गदृष्ट्या भवति कविवरो भारती सा पुनातु। इति॥
(वसिष्ठस्मृतिटीकायां मङ्गलाचरणम्)

एतेषु मतेषु कतरन्मतं सत् इति तु पर्यालोचितदिशा अवसेयम्। इदमेव च वैशारद्यं द्विविधाभ्यां सङ्क्षेपतोऽधो लिखिताभ्यां पद्याभ्यां लिख्यते।—

मोहं रुणद्धि विमलीकुरुते च बुद्धिं
सूते च संस्कृतपदव्यवहारशक्तिम्।
शास्त्रान्तराभ्यसनयोग्यतया युनक्ति
तर्कश्रमो न तनुते कमिहोपकारम्॥

प्रदीपस्सर्वविद्यानां उपायस्सर्वकर्मणाम् ।
आश्रयस्सर्वधर्माणां शश्वदान्वीक्षिकी मता ।। २ ।।

इति विनयाधिकारिके विद्यासमुद्देशे आन्वीक्षिकी
स्थापना । द्वितीयोऽध्यायः ।

वैदिकसिद्धान्तसंरक्षिणी

प्रायः काव्यैर्गलितवयसः पाणिनीयाम्बुराशेः
पारज्ञस्याप्यपरिकलितन्यायशास्त्रस्य पुंसः ।
वादारम्भे गदितुमनसो वाक्यमेकं सभायां
प्रह्वा जिह्वा भवति कियतीं पश्य कष्टामवस्थाम् । इति ।
(विश्वगुणादर्शचम्पूः)

प्रज्ञावाक्यवैशारद्याभ्यां क्रियावैशारद्यम् अपि व्याख्यातम् । तद्यथा दीर्घकालदर्शनेन विवेकपुरस्सरं कर्तव्याकर्तव्ययोः सम्यक् प्रौढिपरिचयं लब्ध्वा उत्तमैरारब्धा क्रिया विना फलप्रसूतिं मध्ये न विश्राम्यति, न वा सा विघ्नभयेन सन्देहेन आहार्येण न प्रारभ्यते वा । तथा हि—

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।। इति । (नीतिशतकम्)

इत्यलं प्रसक्तानुप्रसक्तचिन्तया ।

करोतीति आन्वीक्षिकीत्यनेनान्वयः । न्यायविद्याध्ययनेऽपि विना विद्याप्रसादं उक्तफलत्रयं न भवेत् इति आन्वीक्षिक्याः कर्तृत्वप्रदर्शनेन स्फुटीकृतम् । विवेचितं चेदमधस्तात् ।

श्रीमूला

प्रदीप इति । आन्वीक्षिकी सर्वविद्यानां प्रदीपः परीक्षणसाधनत्वात् । सर्वकर्मणाम् उपायः, आरम्भादिफलाधिगमपर्यन्तानुष्ठानवैचित्र्यप्रतिभोत्पादकत्वात् । सर्वधर्माणां शश्वद् आश्रयः वैदिकलौकिकानां सर्वेषां धर्माणामन्वीक्षावधार्यत्वात् सर्वदा आश्रयभूता । एवञ्च त्रय्यादिविसदृशस्वरूपफलत्वादान्वीक्षिक्या विद्यान्तरत्वं सिद्धमित्यभिप्रायः ।।

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे द्वितीयोऽध्यायः । विद्यासमुद्देशे आन्वीक्षिकीस्थापना ।।

नी० टी० १. अध्यायप्रान्ते श्लोकमाह ।

वैदिकसिद्धान्तसंरक्षिणी

पूर्वोक्तप्रयोजनं अध्यायान्ते सङ्क्षिप्य दर्शयितुमाह प्रदीप इति। प्रदीपः समस्तविद्यानां प्रकाशकः इतरासां विद्यानां वास्तविक-प्रमेयनिरूपिकाणाम् प्रामाण्यस्वरूपनिरूपणाधीनत्वात्। सर्वविद्यानिष्ठप्रामाण्यनिरूपक इति यावत्। तदुक्तम्—न्यायवार्तिके प्रदीप इत्यादिना[1]

उपायः प्रज्ञावाक्यक्रियावैशारद्यम्। इतरविद्यासु प्रतिपादिता विषयाः केचित् यथाश्रुते बाधिता भवन्ति, तन्निरासाय ते ते परस्परं समन्वयमाकाङ्क्षन्ते तद्रीतिप्रदर्शकः, वैदिकेषु विधिषु साध्यसाधनेतिकर्तव्यताविधेयत्वनिर्णायकत्वात्। द्रव्यगुणकर्मणां अभिमतानभिमतोपायतापरिज्ञापनं वा, इति तु न्यायविदः। तदुक्तम् न्यायवार्तिके—

"प्रकाशितानां करणादुपायः यस्मात् प्रमाणादिप्रकाशितमर्थमितरा विद्याः कुर्वन्ति विषयं विधेयतया निषेध्यतयेति शेषः—"[2] १।१।१ इति।

तट्टीकायाम् :—

"सम्प्रति विद्यानां यानि कर्माणि प्रतिपाद्यानि सोमाग्निहोत्रकृष्यादीनि तत्राप्यान्वीक्षिक्युपायमाह-उपायः सर्वकर्मणां विद्याव्युत्पाद्यानाम् न तु हालिकमृगयादिकर्मणामपि। नहि विद्यापदेभ्यो यावन्मात्रावगतिस्तावन्मात्रेण प्रेक्षावतां परितोषः। मा भूदादित्यो वै यूप इत्यादिभ्य आदित्यादीनां यूपादिता। तस्मात् संशयपरीक्षाप्रमाणविनिवेशद्वारेण तदर्थतत्त्वमवधार्य तत्र त्रयी विनिवेशनीया। एवं दण्डनीतिवार्तयोरप्यवगन्तव्यम्। यस्मादान्वीक्षिकी-परिशोधित-प्रमाणप्रकाशितं सामादि इतरा विद्याः कुर्वन्ति। विषयमिति शेषः। अपिच द्रव्यगुणकर्मणामभिमतानभिमतोपायतापरिज्ञापनेन यथा—एवं सर्वाः विद्याः प्रेक्षावतः प्रवर्तयन्ति निवर्तयन्ति च। तत्र किमविशेषेण साध्यसाधनेतिकर्तव्यतासु प्रवर्तयन्ति, आहोस्वित् साधनेतिकर्तव्यतामात्रे। तत्र यदि साध्यांशोऽपि प्रवर्तनागोचरः तदा श्येनादिसाध्याया हिंसायाः

---

१ "प्रदीपः सर्वविद्यानां भवति प्रकाशकत्वात् प्रदीपवत्। प्रमाणादिप्रतिपादितमर्थं इतरा विद्याः प्रतिपद्यन्त इति। किमितरासु विद्यासु प्रमाणादीनि न सन्ति? न सन्तीत्याह। कथं न सन्ति? अनधिकारात् न ता विद्याः प्रमाणादिपरिज्ञानेनाधिक्रियन्ते इति। प्रमाणादिप्रकाशिते त्वर्थे ताः प्रवर्तन्त" इति।

—न्यायवार्तिक १।१।१ सूत्रम्।

२. "यद्यपीतरा विद्याः प्रामाणिकमेवार्थमभिनिविशन्ते। तथापि एतद्विद्याप्रतिपाद्यमेव प्रमाणाद्युपजीव्य स्वे स्वे व्युत्पाद्ये अर्थतत्वे प्रवर्तन्ते। न तु प्रमाणाद्यपि व्युत्पादयन्ति। यथा प्रत्यक्षाद्युपजीव्य प्रवर्तमानमनुमानं न प्रत्यक्षादिविषयमपि तदानीं एव गोचरयति। तदनेन विद्योपकरणग्रहणेन व्यापारः आन्वीक्षिक्या दर्शितः" इति।

—न्यायवार्तिक तात्पर्य टीका, अ० १-१-१

वैदिकसिद्धान्तसंरक्षिणी

विहितत्वेन नानर्थत्वम् । अत्र साध्यांशं रागतः प्राप्तमनूद्य साधनेतिकर्तव्यत्वे एव विधीयेते। ततः श्येनादिसाध्याया हिंसाया अविहितत्वेन ''न हिंस्यात् सर्वा भूतानी''ति प्रतिषेधादनर्थत्वम्। तदिह साध्यांशेऽपि अप्रवर्तनमान्वीक्षिकीगम्यम्'' इति ।

आश्रयः व्यसने अभ्युदये च बुद्ध्यवस्थापकत्वात् । विद्यया प्रवर्तनायां कर्तव्यायां सहकारोति न्यायमतानुसारिणः । तदुक्तं न्यायवर्तिके—

''सर्वविद्योपकारकत्वादाश्रयः । सर्वासां विद्यानां इयमुपकरोति उपकारित्वादाश्रयो राजभृत्यवदिति'' । इति । (—१।१।१। न्यायवार्तिकम्)

तट्टीकायांच :—

''तदेवमान्वीक्षिकीमाश्रयन्ते सर्वा विद्या इत्याह-आश्रयः सर्वकर्मणाम् सर्वासां विद्यानां पुरुषप्रवर्तना धर्माः तेषामाश्रयः । वार्तिककारस्तु धर्मद्वारेण विद्यानामेवाश्रय इति व्याचष्टे । सर्वविद्योपकारकत्वादाश्रयः । सर्वासां विद्यानामियमुपकरोति विद्यया प्रवर्तनायां कर्तव्यायां इयं सहकारितयोपकरोतीत्यर्थः'' इति ।

(न्या० वा० टी० १।१।१।—)

सर्वधर्माणां सर्वविद्याप्रतिपाद्यानां पुरुषप्रवर्तनानां सकलशास्त्रार्थानुष्ठानानामिति यावत् । षष्ठ्यर्थश्च प्रयोजकत्वम् । एवञ्च विद्याप्रकाशेन स्वरूपापेक्षया च आन्वीक्षिक्या उपयोगित्वं सिद्धम् ।

इति अर्थशास्त्रव्याख्यायां वैदिकसिद्धान्तसंरक्षिण्यां द्वितीयोऽध्यायः । आदितो द्वितीयः ।

जयमङ्गला

आन्वीक्षिकी·······················

इति विद्यासमुद्देशे आन्वीक्षिकी स्थापना द्वितीयोऽध्यायः ॥

जयमङ्गलाक्रोडपत्रम्

जयमङ्गलापूरणम्

आन्वीक्षिकीति । इतः परं जयमङ्गलाग्रन्थः त्रुटितो वर्तते तस्य पूरणं नीतिसारव्याख्याया न्यायभाष्यस्य च आधारेण यथामति क्रियते ।

आन्वीक्षिकी हेतुविद्या । विसदृशफलं प्रदर्शयन्नाह धर्मेति । धर्मः इज्याऽध्ययनादिः । अधर्मः श्वमांसभक्षणादिः । अर्थः काले बीजवपनादिनिष्पन्नो, ऽकाले वीजवापादिनिष्पन्नः अनर्थः । ज्यायसा सह सन्धिर्योगनिष्पादकत्वान्नयः विग्रहस्तु अनिष्पादकत्वात् अपनयः । आन्वीक्षिक्याः उपकारित्वं दर्शयति । बलाबले इति । एतेन तासां परस्पर विरुद्धत्वपरिहाराय क्रियमाणन्यायसञ्चारणमान्वीक्षिक्याः

जयमङ्गलाक्रोडपत्रम्

फलम्। तदेव सूचयति एतासामिति। त्रयीवार्तादण्डनीतीनामित्यर्थः हेतुभिः युक्तिभिः। ताश्च ज्ञापिकोत्पादिकाभेदेन द्विविधाः। तद्यथा। वेदस्मृत्योः विरोधे क्वचिद् वेदस्य, क्वचित् स्मृतेः प्रावल्यमिति। अर्थशास्त्रधर्मशास्त्राभ्यां कृतेऽपि ऐकमत्येन चौर्यनिषेधे क्वचिद् धर्मत्वव्यवस्थापनम्।

द्वितीयं फलमाह व्यसन इति। विपत्तौ। वुद्धेस्सत्वात्मिकायाः अवस्थापनम् इति तृतीयं फलमाह प्रज्ञेति। प्रज्ञावैशारद्यं क्रियावैशारद्यं वाक्यवैशारद्यं चेत्यर्थः। तत्र प्रज्ञावैशारद्यं सत्यासत्यान्वेषणकुशलत्वम्। वाक्यवैशारद्यं प्रकृतिप्रत्ययादीनां व्यत्पत्तिस्वरूवम्। क्रियावैशारद्यं दीर्घकालदर्शनेन विवेकपुरःसरं कर्तव्याकर्तव्ययोः परिचयप्रौढिः। (मतिभाव इति यावत्) शेषं क्रोड़पत्रे उक्तम्।

अध्यायान्ते प्रयोजनं दर्शयति प्रदीप इति। एतद् विद्याप्रतिपाद्यमेव प्रमाणादि उपजीव्य समस्तानां विद्यानां स्वस्वव्युत्पाद्ये अर्थे प्रवर्तनात् प्रदीप। उपायः इतरविद्यासु प्रतिपादितानां विधानानां यथाश्रुतार्थस्य वाधितत्वेऽपि समन्वयसाकाङ्क्षत्वादुपायः। आश्रयः विद्यया प्रवर्तनायामितिकर्तव्यतायां सहकारित्वात्। अतएव शश्वदित्युक्तम्। अर्थात् आन्वीक्षिक्याः कालत्रये अवाधितत्वमिति बोध्यम्। शेषं कोडपत्रे द्रष्टव्यम्।

इति श्री पण्डितराज राजेश्वरशास्त्रिद्राविडव्याख्याते
जयमङ्गलाक्रोडपत्रे द्वितीयोध्यायः

तृतीयोऽध्यायः—

त्रयीस्थापना

[त्रयीवेदतदङ्गानां स्वरूपं तदुपकारश्च]

सामर्ग्यजुर्वेदास्त्रयः[1] त्रयी, अथर्ववेदेतिहासवेदौ[2] च वेदाः ।

श्रीमूला

त्रयीस्थापनार्थं तत्स्वरूपमाह—**सामेत्यादि**। सामवेदः ऋग्वेदो यजुर्वेद इति त्रयस्त्रयीपदवाच्याः, अथर्ववेदः, इतिहासवेदो महाभारतादिश्च वेदपदार्थाः ।

वैदिकसिद्धान्तसंरक्षिणी

यद्यपि पूर्वाध्याये लोकायतमतस्य निरूपणावसरे संवरण त्रयीत्युक्त्या त्रयी लोक-संरक्षणार्थं अप्रत्याख्येयेत्युक्तम् जयमङ्गलायाम् । तथापि त्रय्याः ब्रह्मज्ञानरहितस्य-राज्ञः कृते वास्तवोपयोगित्वविषये सन्दिग्धता न दूरे अपास्ता भवतीति, अत आह मूले—त्रयीति । तदुक्तं नीतिनिर्णीतौ—'बर्हिस्पत्यैराक्षिप्तायास्त्रय्याः स्थापनामाह' (—१।३) इति ।

तस्या उपकारं प्रदर्शयिष्यन् विभागमाह—सामेति । 'गीतेर्माधुर्यात्, 'गायन्तं स्त्रियः कामयन्ते'·········' इति वचनात्, गायनस्य स्वभावत एवाल्हादकर-त्वात्, सहस्रशाखावत्वेन शरीरबाहुल्याच्चादौ सामग्रहणम् । उक्तञ्चैतत् नीति-निर्णीतिटिप्पण्यामपि ।

"दृष्टादृष्टपूर्वं वेदयति इति सहस्त्रशाखतया वैपुल्यात् च सामवेदस्य प्रथममुपन्यासः" । (१।३।२। इति । सामाश्रिततया ततः ऋग्ग्रहणम् । ततो यजुः । एते त्रयो मिलिताः वेदाः यज्ञादि निर्वर्तयन्तीति ज्ञापनार्थम् । 'त्रय' इति । एतेषां स्वर-सापेक्षत्वात् समासेनोपादानम् । त्रयीति । त्रयीशब्दो यथा सामर्ग्यजुर्वेदवाचकः तथा सर्वैरङ्गैः सहितस्यापि वाचको वर्तते ।

नी० टी० १. बार्हस्पत्यैराक्षिप्तायास्त्र्य्याः स्थापनामाह स्वरूपतस्तावत् सामेत्यादि । दृष्टा-दृष्टमर्थं वेदयतीति सहस्त्रशाखतया सामेति वैपुल्यात् सामवेदस्य प्रथममुपन्यासः । तदनन्तरं पाठसौन्दर्यादृग्वेदस्य ।

२. प्रत्येकं वेदग्रहणमप्रसिद्धस्य वेदत्वस्य स्थापनार्थम् ।

वैदिकसिद्धान्तसंरक्षिणी

'श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ।' इत्यमरकोषे,
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः !
धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते ॥
इति नीतिसारेऽपि—उक्तत्वात् नीति० १।२।

मूलस्थं त्रयीपदं......'वेदा.......अङ्गानि' इत्यनेन च सम्बध्यते। अतः एतत् त्रयीपदसन्निवेशस्य देहलीदीपन्यायेन उभयत्रान्वयात् 'सामेत्यारभ्य 'अङ्गानी'त्यन्तम् एकं वाक्यं बोध्यम्। तस्मात् 'वेदत्रयम् वेदचतुष्टयम्, साङ्गं वा-सर्वमपि त्रयीसंज्ञया व्यवहर्तव्यमिति फलितम्। अत एव 'त्रयींधर्मं इत्यत्र' त्रयी ग्रहणं साभिप्रायं बोध्यम्।

अथर्ववेदेति। पुनर्वेदग्रहणं साभिप्रायं बोध्यम्। तदुक्तम्—

'प्रत्येकं वेदग्रहणं अप्रसिद्धस्य वेदत्वस्य ख्यापनार्थम्' ।इति (नि० नी० अ०१।३।२)

अत्रेदं बोध्यम्। अथर्ववेदस्य पारायणमात्रेण फलसिद्धिः। इतरेषां वेदानां तु पुरश्चरणेन फलसिद्धिः इति अथर्ववेदतदितरवेदानां वैलक्षण्यं सायणाचार्यैः स्वभाष्ये भूमिकायामुक्तम्—

अत एव सारवत्वात् सिद्धमन्त्रता 'समाम्नायते ।'
न तिथिर्न च नक्षत्रं न ग्रहो न च चन्द्रमाः ॥
अथर्वमन्त्रम्संप्राप्सा सर्वसिद्धिर्भविष्यति' । इति ।

तथा 'स्कान्दे' कमलालयखण्डे—आथर्वमन्त्राणांजप मात्रेण अभिमतफलसाधनत्व-मुक्तम्।'

'यस्तत्राथर्वणान् मन्त्रान् जपेच्छ्रद्धासमन्वितः ।
तेषामर्थोद्भवं कृत्स्नं फलं प्राप्नोति स ध्रुवम् ॥' इति

अथर्ववेदस्य वेदत्वं रहसि आसीत् तदिदं रहस्यं, औपनिषदिकप्रकरणं च सुगुप्तं अथर्वणः वेदत्वोक्त्या प्रकाश्यतां नोतं मूलकृतेति बोध्यम् ।

अथर्ववेदस्य वेदत्वम्

ननु अथर्ववेदस्य वेदत्वे किं प्रमाणमिति चेदुच्यते। यथा इतरेषां वेदानां वेदत्वप्रसिद्धिरद्ययावत् वर्तते अविच्छिन्नपरम्परया, एवं सर्वैरपि शिष्टतमैः तेषां पूज्यत्वेन गृह्यन्ते अतः ते सर्वेपि वेदा इत्युच्यन्ते। तथा तेनैव हेतुना अथर्ववेदस्य तथैव स्वीकृतत्वात् वेदत्वे का हानिरिति न विद्मः।

तदुक्तम्—"निरमिमीत सर्पवेदम् पिशाचवेदम् इतिहासवेदं पुराणवेदम्"
इति। (गो० ब्रः० १।१।१०—)

तथा अथर्ववेदेतिहासवेदौ च 'वेदा'
इति। (को० अ० अ० १ अ० २।)—

यद्यप्यत्र इतिहाससाधारण्येन सर्वेषां वेदत्वं समानमेव भाति, अभियुक्तप्रसिद्ध-त्वात्। तथापि ऋगाद्यथर्वान्तेषु वेदेषु अद्य यावत् सृष्टिकालादारभ्य अविच्छिन्न-

वैदिकसिद्धान्तसंरक्षिणी

परम्परया स्वसजातीयोच्चारणसापेक्षोच्चारणकानुपूर्वीकत्वं यथा निर्णीतमस्ति तथा नेतिहासादिषु इति राद्धान्तो बोध्यः। प्रलयकालानन्तरमपि पूर्वसृष्टौ वर्तमानं वेदं स्मृत्वा ऋषीन् भगवानध्याययामासेति सिद्धान्तात् तेषां स्वसजातीयोच्चारणसापेक्षोच्चारणकानुपूर्वीकत्वे न विरोधः एतादृशमानुपूर्वीकत्वं तु इतिहासादिषु नास्ति, तेषां इतिहासादिषु दृढकर्तृकत्वस्मरणात्। इत्यादि सर्वमैतिहासिकदृष्ट्या वेदापौरुषेयत्वविचारे 'शान्ति का अग्रदूत' ग्रन्थस्य द्वितीयभागे निर्णीतमस्ति। एवं सत्यपि इतिहासादिषु वेदत्वोक्तिः वेदार्थनिर्णयार्थमपेक्षितत्वात् बोध्या इति नात्र कश्चन विरोधो मन्तव्यः अत एवोक्तम्—'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति।[1]

---

१. किञ्च अथर्ववेदस्य वेदत्वविषये श्रीजयन्तभट्टैर्न्यायमञ्जर्यां यदुक्तं तत्तर्कबहुलत्वादत्रोपस्थाप्यते।

"अत्रकश्चिदाह—युक्तमितरेतरव्यतिषक्तार्थोपदेशित्वेनैक कर्तृकत्वानुमानद्वारकं त्रिवेद्याः प्रामाण्यम्। अथर्ववेदस्य तु त्रय्याम्नातधर्मोपयोगानुपलब्धेस्त्रयीबाह्यत्वेन तत्समानयोगक्षेमत्वम्। अनपेक्षत्वलक्षणप्रामाण्यपक्षेऽपि विक्षिप्तशाखान्तरोपदिष्टविशिष्टज्योतिष्टोमाद्यनेककर्मानुप्रविष्ट-होत्राध्वर्यवादिव्यापारव्यतिषङ्गदर्शनात् तदर्था त्रयी एव यथा प्रमाणमात्रविभागिनी भवितुमर्हति, न तथा पृथग्व्यवहाराऽऽथर्वणश्रुतिः। तथा च लोके क्षत्रस्येमा विद्या प्राणिनामनुग्रहाय प्रवृत्ता। आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरिति प्रसिद्धिः। श्रुतिस्मृती अपि तदनुगुणार्थे एवं दृश्येते। श्रुतिस्तावत् 'ऋग्भिः प्रातर्दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्येन्हः सामवेदेनास्तमेति वेदैरशून्यस्त्रिभिरेति सूर्यः।' इति। तथा प्रजापतिरकामयत बहु स्यां प्रजायेयति' स तपोऽतप्यत तपस्तप्त्वेमांस्त्रीन् लोकानसृजत पृथिवीमन्तरिक्षं दिव'मिति। तान् लोकानभ्यतपत्तेभ्यस्त्रीणि ज्योतींषि अजायन्त 'अग्निरेव' पृथिव्या अजायत वायुरन्तरिक्षाद्दिव आदित्य इति। तानि ज्योतींष्यभ्यतप्यंस्तेभ्यस्त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेद इति। तथा सैव विद्या त्रयी तपतीति स्मृतिरपि मानवी प्रतिवेदं द्वादशवार्षिकब्रह्मचर्योपदेशिनी दृश्यते। षट्त्रिंशद्वर्षाधिकं चर्यं गुरौ त्रैविद्यकं व्रतमिति।
श्राद्धप्रकरणेऽपि—

'यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम्।
शाखान्तरगमथाध्वर्युं छन्दोगं वा समाप्तिगम्।' इति।

त्रिवेदपारगानेव श्राद्धभुजो ब्राह्मणान् दर्शयति नाथर्ववेदाध्यायिनः। प्रत्युत निषेधः क्वचिदुपदिश्यते तस्मादाथर्वणं (न) न प्रवृञ्ज्यादिति। एवमाक्षेपे सति केचिदेवमाचक्षते।

'यदि यज्ञोपयोगित्वं नेहास्त्याथर्वणश्रुतेः।
अर्थान्तरे प्रमाणत्वं केनास्याः प्रतिहन्यते॥

शान्तिपुष्ट्यभिचारार्था एकब्रह्मर्त्विगाश्रिताः ।
क्रियास्तथा प्रमीयन्ते त्रय्यैवात्मीयगोचरे ।। इति ।

एवं, तत्तु सर्वं न साध्यमभिधीयते । तथाहि—तदप्रामाणं बादरस्याऽनपेक्षत्वादिति । य एव वेदप्रामाण्याधिगतौ जैमिनिना निरदेशि पन्थाः, योवाऽक्षपादेन कणादेन प्रकटितः, तद्वचनादाम्नायप्रामाण्यमिति मन्त्रायुर्वेदप्रामाण्यवच्च तदप्रामाण्यमाप्तप्रामाण्यादिति स चतुर्ष्वपि वेदेषु तुल्यः । तत्र विशेषतृषोपि न कश्चिदस्ति प्रयत्नेनान्विष्यमाणः प्राप्यते । नहि मीमांसकपक्षे एवं वक्तुं शक्यते त्रय्यैवानादिमती नाथर्वणश्रुतिस्तस्यां कर्तृस्मरणसम्भवादिति । नापि नैयायिकादिपक्षे एवं वक्तुं शक्यम् । आप्तप्रणीतास्त्रयो वेदाः चतुर्थस्तु नाप्तप्रणीत' इति । तेन प्रामाण्याधिगमोपायाविशेषात् समानयोगक्षेमतया चत्वारोऽपि वेदाः प्रमाणम् । व्यवहारोऽपि सर्वेषां सारेतरविचारचतुरचेतसां चतुर्भिरपि वेदैश्चतुर्णां वर्णानामाश्रमाणां च चतसृषु दिक्षु चातुरब्धिमेखलायामवनौ प्रसिद्धम् इति कोयमत्रान्यथात्वभ्रमः ?। श्रुतिस्मृतिमूलश्चार्यावर्तमित्रासिनां भवति व्यवहारः । ते च श्रुतिस्मृती चतुरोऽपि वेदान् समानकक्षानभिवदतः । ऋग्यजुःसामवेदेष्वपि अथर्ववेदाशंसीनि भूयांसि वचांसि भवन्ति । तद्यथा शतपथे—'अथ तृतीयेऽनीत्युपक्रमस्याश्वमेधे पारिपत्रव्याख्याने सोऽयमाथर्वणो वेद' इति श्रूयते । छान्दोग्योपनिषदि ऋग्वेदो यजुर्वेदः सामवेद आथर्वणः चतुर्थ इति पठ्यते । नन्वितिहासपुराणः पञ्चम इति तत्र पठ्यत एव । अतः किमित्याथर्वणश्चतुर्थो न भवति वेदः ?। चतुर्थपदोपादानादितिहासतुल्योऽसौ न वेद समानकक्ष्य इति चेत्, केयं कल्पना ? चतुर्थ्यन्तशब्दोपादानादप्राधान्ये त्रयी वेदा असृज्यन्ते'त्यादौ त्रित्वसङ्ख्योपादानात्'तेऽपि न प्रधानतामधिगच्छेयुः इतिहासादिभिर्वा सहपरिगणनमप्राधान्यकारणं यदुच्यते तदपि सर्ववेदसाधारणमिति यत्किञ्चदेतत् । तथा शताध्ययनेऽपि ऋचो ब्रह्मणः प्राणा इत्युपक्रम्य आथर्वणे वै ब्रह्मणः समान इति पठ्यते । तथा येऽस्योदञ्चो रश्मयस्ताएवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत' इति । तथा तैत्तिरीये 'तस्माद्वा एतएस्मात् प्राणमयादन्योन्तर आत्मा मनोमय इति प्रस्तुत्य तस्य यजुरेव शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्ष आदेश आत्मा, अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा' इति पठ्यते । तथाऽन्यत्र ऋचां प्राची महती दिगुच्यते दक्षिणामाहुर्यजुषां साम्नाम्मुत्तराम् अथर्वणामङ्गिरसां प्रतीची महती दिगुच्यते' इति ।

शतपथे ब्रह्मयज्ञविधिप्रक्रमे पय आहुतयो वा देवानां शता देवानां यदृच इत्युपक्रम्य मेद आहुतयो वा शता देवानां यदथर्वाङ्गिरसः स्म य एवं विद्वानथर्वाङ्गिरसो ऽहरहः स्वाध्यायमधीते मेद आहुतिभिरेव देवान् स तर्पयति त एनं तृप्तास्तर्पयन्ति' इति । मन्त्रा अपि तदर्थं प्रकाशनपराः अनुश्रूयन्ते । 'त्वामग्ने पुष्करादध्यथर्वा निरमन्यते'त्यादयो । न चैषामथर्वा नाम कश्चिदृषिरित्येवंप्रकारं व्याख्यानं युक्तम् । अन्यत्राऽप्यसमाश्वासप्रसङ्गात् । इत्येवञ्जातीयकास्तावदुदाहृताः श्रुतिवाचः ।
स्मृतिवाक्यानि खल्वपि-मनुस्तावत् श्रुतिराथर्वाङ्गिरसीः कुर्यादित्याभिचारयन्निति श्रुतिशब्देन त्रयीवद् व्यवहरन्ति । याज्ञवल्क्यश्चतुर्दशविद्यास्थानानि गणयन्—

'पुराणतर्कमीमांसा-धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश । इति ।

चतुर एव वेदानावेदयते नान्यथा हि चतुर्दश सङ्ख्या पूर्यते । स्मृत्यन्तरे च स्पष्टमेवोक्तम् ।

'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्याह्येताश्चतुर्दश ॥' इति

अन्यत्राप्युक्तम्—पुराणं धर्मशास्त्रं मीमांसा न्यायश्चत्वारो वेदाः षडङ्गानीति चतुर्दशविद्यास्थानानीति ।

शातातपोऽप्याह—

'ऋक्सामयजुरङ्गानामथर्वाङ्गिरसामपि ।
अपौरुष्यस्य विज्ञानाद्योऽनूचानः स नो महान् ॥' इति ।

तथाऽन्यत्र 'चत्वारश्चतुर्णां वर्णानां वेदानां पारगाधर्मज्ञाः परिषदित्युक्तम् । शङ्खलिखितौ च–'ऋग्यजुः सामाथर्वविदः षडङ्गविद्धर्मविद्वाक्यविन्नैयायिको नैष्ठिको ब्रह्मचारी पञ्चाग्निरिति दशावरा परिषदित्युक्तम् । तथा च पङ्क्तिपावनप्रस्तावे चतुर्वेदः षडङ्गवित् ज्येष्ठसामगोऽथर्वाङ्गिरसोऽप्येते पङ्क्तिपावना गण्यन्ते । तदयमेवमादिचतुष्टयप्रतिष्ठाप्रगुण एव प्राचुर्येण धर्मशास्त्रकाराणां व्यवहारः । अन्येऽपि शास्त्रकारास्तथैव व्यवहरन्तो दृश्यन्ते । यथा च महाभाष्यकारो भगवान् पतञ्जलिरथर्ववेदमेव प्रथमममुदाहृतवान् शन्नो देवी रभिष्टय' इति । मीमांसाभाष्यकारेणापि वेदाधिकरणे 'काठकं कालापकं मौद्गलं पैप्पलादकमि'ति । यजुर्वेदादिवत् अथर्ववेदेऽपि पैप्पलादकमुदाजह्रे । सर्वशाखाधिकरणेऽपि वेदान्तरशाखान्तरवन्मौद्गलपैप्लादकाख्ये अथर्वशाखे अप्युदाहृत्य विचारः कृतः । तथा च प्रथमयज्ञोनाम चतुर्ष्नकश्चिदस्तीत्यधिकरणान्ते एव लिखितम् । एवं श्रुतिस्मृतिशिष्टाचारव्यहारविदामत्र विप्रतिपत्तिसम्भावना एव नास्ति । आह ! न ब्रूमः अथर्ववेदो न प्रमाणमिति । किन्तु त्रयीबाह्य इति । उच्यते । त्रयीयं अथर्ववेदबाह्यैव । न केवलमेवं त्रय्यामपि परस्परबाह्यत्वमस्त्येव । ऋक्सामबाह्यानि यजूंषि यजुःसामबाह्या ऋचः । ऋग्यजुर्बाह्यानि सामानि इति कियानयं दोषः ? सर्वभावानामितरेतरसाङ्कर्यसहितत्वात् । येहि शब्दात्मानो ग्रन्थसन्दर्भस्वभावा येच तदभिधया अर्थस्वभावास्ते सर्वेऽन्योन्यसंमिश्रितात्मान एव । न च परेणाऽऽत्मानमभिश्रयन्तोऽपि ते स्वरूपमपि हारयन्तीति । अथोच्यते-नेदृशं त्रयीबाह्यत्वमथर्ववेदे विवक्षितम् । अपितु यदेष न त्रयीप्रत्ययं कर्मोपदिशति, न तत्संबद्धङ्किञ्चिदिति तदस्य त्रयीबाह्यत्वमिति । एतदपि न साधूपदिष्टम्, इष्टिकापश्वेकाहाहीनसत्रादिकर्मणां तत्रोपदेशदर्शनात् । सर्वशाखाप्रत्ययमेकं कर्मेति न्यायात् । त्र्युपदिष्टेऽपि कर्मणि सम्बद्धसर्वशाखाप्रत्ययमेव नाथर्वशाखाप्रत्ययम् । यतः सोमयागादिकर्मणामृग्वेदेन हौत्रं यजुर्वेदनाऽध्वर्यवं सामवेदेनौद्गात्रं क्रियतेनाथर्ववेदेन किञ्चिदि'ति । तदयुक्तम्, अथर्ववेदेन ब्रह्मत्वस्य करणात् । तथा च गोपथब्राह्मणम् । 'प्रजापतिः सोमेन यक्ष्यमाणो वेदानुवाचकं वो होतारं वृणीय'मिति प्रक्रम्य 'तस्मादृग्वेदमेव होतारं वृणीष्व स हि होत्रं वेद यजुर्वेदमेवाऽध्वर्युंवृणीष्वस हि आध्वर्यवं वेद सामवेद मेवोद्गातारं वृणीष्व सह्योद्गात्रं वेद अथर्वाङ्गिरोविदमेव ब्राह्मणं वृणीष्व स हि ब्रह्मत्वं वेदे'ति एवमभिधाय

वैदिकसिद्धान्तसंरक्षिणी

इतिहासवेद इति । एतन्नामनिर्देशो वेदे अस्तीति उपरिष्टादुक्तम् ।

इतिहासपदं पुराणानामुपलक्षणार्थम्, अग्रे इतिहासे तेषामन्तर्भावस्य वक्ष्यमाणत्वात् ।

पुनराह-अत्रचेन्नैवंविधं होतारमध्वर्युमुद्गातारं ब्रह्माणं वा वृणुते पुरस्तावदेव चैषां यज्ञो रिष्यती'ति तस्मादृग्वेदमेव होतारं कुर्यात्, यजुर्वेदमेवाऽध्वर्युं, सामवेदमेवोद्गातारमथर्वाङ्गिरसोविदमेव ब्रह्माणमिति । तथा यज्ञे यदूनं च विरिष्ठं च यातयामं च करोति तदथर्वणां तेजसाऽऽप्यायतीति । अथाऽनन्ते भृग्वङ्गिरोऽन्यः सोमः पातव्य.' इति । नन्वेताः श्रुतीरथर्वाण एवाधीयते नान्ये च त्रयीविदः । ते त्वेवं पठन्ति । यदृचा हौत्रं क्रियते यजुषाऽऽध्वर्यवं साम्ना चौद्गात्रं । अथ केन ब्रह्मत्वं क्रियते इति । त्रय्या विद्ययेति ब्रूयादिति तथाच यदृचैव हौत्रमकुर्वत, यजुषाऽऽध्वर्यवं साम्नोदगात्रं यदेव त्रय्यैव विद्यायै युक्तं तेन ब्रह्मत्व'मिति । उच्यते । वयमप्येवमादीनि वाक्यानि न नाधीमहि ! किन्त्वेषामयमेवार्थोऽथर्वोऽङ्गिरोविदेव ब्रह्मेति । कथम् ? यतो न त्रयी नाम किमपि वस्त्वन्तरम् । अपि तु त्रयाणां वेदानां समाहार इति । समाहारश्च समाह्रियमाणनिष्ठो भवति । समाह्रियमाणाश्च ऋग्वेदादयस्त्रयो होत्रादिपरत्वे चरितार्था न पुनस्तत्र भेदमर्हन्ति एकैकशः चरितार्थानां समुदायोऽपि चरितार्थ एव । समुदायबुद्धौ हि विभज्यमानायां समुदायिन एव प्रस्फुरन्ति, नावयविवदर्थान्तिरम् ते चान्यत्र व्याप्ताः । किन्तु खलु ऋग्वेदादीनां ब्रह्मत्वं कुर्वतामतिभारो भवति । न ब्रूमोऽतिभार इति । किन्त्वात्मिकत्वेन ब्रह्मत्वकर्तव्यतोपदिश्यते । आत्मिकश्चान्यतमोऽपि न तेषां न भवति वेदः । अथर्ववेदस्सर्वात्मक एव । तत्र हि ऋचो यजूंषि सामानीति त्रीण्यपि सन्ति तेन ब्रह्मत्वं क्रियमाणं त्रय्या कृतं भवति । ननु यस्त्रीन् वेदानधीते तेन चेत् ब्रह्मत्वं क्रियेत, तत् किं तया न कृतं भवति । बाढमित्युच्यते । सोऽपि एकस्मै कामादान्ये यज्ञक्रतवः समधीयन्ते, सर्वेभ्यो ज्योतिष्टोमः सर्वेभ्यो दर्शपूर्णमासाविति श्रुतावपि योगसिद्ध्यधिकरणन्यायेनाऽन्यतममेव बुद्धावादाय विदध्यान्न समुदायं बुद्धावारोपयितुं शक्नुयादित्येकेन तत् कृतं भवति न त्र······। ······न्येऽप्यात्मिका वेदा यद्येवं सुतरामथर्ववेदो न पृथक्करणीयः सर्वेषां रूपाविशेषात् । तेषां पृथक् प्रतिष्ठैः स्वैः स्वैः ऋगादिभिरेव व्यपदेश इति । न ते समुदायशब्दव्यपदेश्याः । यत्तु वाक्यान्तरे त्रय्यै विद्यायै शुक्रन्तेन ब्रह्मत्वमिति तत्रेयं चतुर्थी षष्ठयाः स्थाने प्रयुक्ता शुक्रमिति सारमाचक्षते तेन त्रयीविद्यायाः सारेण ब्रह्मत्वं क्रियत इत्युक्तं भवति । न च त्रय्यैव त्रय्याः शुक्रं भवति न चात्यन्तं ततोऽर्थान्तरमेव । तेनेदमथर्ववेदात्मकमेव त्रय्याः शुक्रं शुक्रम् इति च गुह्यमाहुः । अथर्वशब्दोऽपि रहस्यवचनः । यज्ञाथर्वाणं चैकस्या इष्टय इति । तेन त्रयी शुक्ररूपेणाऽथर्ववेदेन ब्रह्मत्वमितीत्थमथर्ववेदस्य न त्रयीब्रह्मत्वमित्यलम्, सर्वशाखाप्रत्ययमेकं कर्मेति न सर्वशब्दः सङ्कोचितो भवति । अत एव ब्रह्मवेदाथर्ववेद इति पूर्वोत्तरवाक्ये पठति ऋग्वेदो यजुर्वेदः सामवेदः ब्रह्मवेदः इति । यथा च काठकशताध्ययने ब्राह्मणे ब्रह्मौदने श्रूयते ब्रह्मवादिनो वदन्ति पुरो वा औद्दालकिः आरुणिमुवाच ब्रह्मणे त्वा प्राणाय जुष्टं निर्वपामि ब्रह्मणे त्वा व्यानाय जुष्टं निर्वपामि'इत्युपक्रम्य आथर्वणो वै ब्राह्मणः समानोऽथर्वणमेवैतष्टं निर्वपति चतुःशरावो भवति चत्वारो होमे वेदास्तानेव भागिनः-

वैदिकसिद्धान्तसंरक्षिणी

वेद ग्रहणप्रयोजनम्

वेदाःइति। पुनर्वेदग्रहणं इतिहासस्य प्रामाण्यख्यापनाय बोध्यम्। तथाहि चक्र-करोति मूलं वै ब्रह्मणो वेदा वेदानामेतन्मूल्यं यदृत्विजः प्राश्नन्ति तद्ब्रह्मौदनस्य ब्रह्मत्वमिति। तथा सामवेदे पृष्ठ्यस्य चतुर्थेऽहन्याभंवे पवमाने आथर्वणे साम्नो रुद्रात्रं यत्तद्विधाने श्रूयते चतुर्विध-माथर्वणं भवति चतूरात्रस्य वृत्यै चतुष्पदामानुष्टुभाऽनुष्टुममेवैतदहर्यश्चतुर्थं भैषजं वायवीयं तद्धि भैषज्यमेव तत्करोत्याथर्वणानि यागभेषजानीत्येतदालंबनेयं स्तुतिरत एव प्रागुक्तं यज्ञे यदूनं च विरिष्ठं च यातयामं च करोति तदथर्वणा तेजसाऽऽप्याययतीति तस्मादाथर्वण एव ब्रह्मेति। एतच्च शाखान्तरे विस्तरेणाऽभियुक्तैर्युक्तिभिरापादितमिति नेहेत्यन्ताय प्रतायते। अथापि श्रौतमिदं वाक्यं तदपि प्रकरणाधीतं चेत् तत्रैव क्वचित्कर्मणि निवेक्ष्यते। अनारभ्यवादपक्षेऽपि पूर्वोक्तवाक्यविसदृशार्थत्वादथर्ववेदस्य च त्रयीबाह्यत्वेन सम्पर्कपरिहारार्हत्वान्नियतविषयमेव व्याख्यास्यते। यदप्युच्यते। क्रियते उच्चैः साम्नोपांशु यजुषैतावदर्थधर्मोऽपि न वेदाम्नातः इति तदप्यपास्तम्। मन्त्रधर्मोह्ययमुपदिश्यते न वेदधर्मः। मन्त्रब्राह्मणसमुदायस्य भावा हि-चत्वार इमे वेदग्रन्था मन्त्रास्तु ते गद्यपद्यभेदास्तद्विधैव। गद्यबन्धो यजुरुच्यते पद्यबन्ध ऋगिति। गीतिनिबन्धनन्तु भेदान्तरं सामेति। अत एव जैमिनिना,मन्त्रविभागं प्रस्तुत्य तेषामृग्यत्रार्थवशेन पादव्यवस्था गीतिषु सामाख्या, शेषे यजुः शब्दः इत्थमेव तेषां त्रैविध्यमुपपादितम। तेषामेव चायमुच्चैरादिधर्मो न वेदशब्दवाक्यानां मन्त्राब्राह्मणसमुदायात्मकग्रन्थानाम्। अथर्ववेदेऽपीयं त्रिविधैव मन्त्रजातिः इति तत्रापीदं धर्मजातमुपदिष्टं भवति। मन्त्रविभागकृत एवायं त्रयी-व्यपदेशः, इति। तच्च सैषा त्रयी विद्या तपतीत्याद्यपि न विरुध्यते एवमृग्यजुःसामसमुदायात्म-कमन्त्रोपबन्धात् त्रय्यन्तर्गतश्चाथर्ववेदः पृथग्व्यवस्थितग्रन्थसन्दर्भभावत्वाच्च भिन्न इति स्थितम्। अन्ये पुनः ऋक्प्रचुरत्वात् प्रविरलयजुष्ट्वात् गीयमानसामवत्त्ववशाच्च वेदमेवाथर्व-वेदमाचक्षते। अनयोरपि पक्षयोस्तु न कश्चिद्विरोधः। यत् पुनरभिधीयते वेदशब्दास्त्रयाणामेव वाचको न चतुर्थस्येति। सोयमत्युत्कटो द्वेषः। वृद्धव्यवहारो त्र प्रमाणम्। वेदेऽयं ब्राह्मणोयमिति तत्र तत्र वेदशब्दे उच्चारिते चत्वारोऽपि प्रतीयन्ते। वेदो मयाऽधीत इति, वदन्तं पृच्छन्ति व्यवहर्तारः, कतमस्त्वयाऽधीतो वेद इति। स आहाऽथर्ववेद इति। न तमेवाक्षियन्ति नाऽसौ वेदो यस्त्वया पठित इति। सोपपदेऽथर्ववेदे वेदशब्द इति चेत्, वेदान्तरेष्वपि तुल्यमेतत्। ऋग्वेदो यजुर्वेदः सामवेद इति। नित्योपपदोऽपि तेषु वेदशब्दः प्रयुज्यते इति, तदितरत्रापि समानमित्युक्तम्। 'चतुर्वेदाध्यायी भारद्वाज'इति। सर्वथा तु सोपपद एवाआयुर्वेदादिषु वेदशब्द इति, न तत्तुल्पकक्षताऽधिक्षेपपक्षेत्रतामथर्ववेदो नेतव्यः। ब्रह्मचर्यविधिश्च श्रौतश्चतुर्ष्वप्य-विशिष्ट इत्युक्तम्। स्मार्तोऽपि तथैवास्ति। यथाह याज्ञवल्क्यः—

'मेदस्य तर्पयेद्देवानथर्वाङ्गिरसः पठन्।
पितॄंश्च मधुसर्पिर्भ्यामन्वहं शक्तितो द्विज।' इति

साम्प्रदायिकमध्यापनम् आदि। यजनादि सर्वमभिन्नमेवेत्यलं प्रसङ्गेन।

इति न्यायमञ्जरी

शिक्षा [1]कल्पो व्याकरणं निरुक्तं छन्दोविचितिः ज्योतिषमिति चाङ्गानि ।

वैदिकसिद्धान्तसंरक्षिणी

वर्ती सम्राट् मन्त्रिणोपदेष्टव्यः, मन्त्रिद्वारा विशेषतो नीतिस्तेनाध्येतव्या भवति । नीतौ उपवर्णिताः सर्वेऽपि अर्थाः नीतिलक्षणानुसारेण यदा अनुमानप्रमाणेन अनुप्राणिता भवन्ति तदा नीतिलक्षणलक्षिता भवन्ति । अनुमानं व्याप्ति आकाङ्क्षते । सा चोदाहरणेन व्यक्ता भवति । तच्चोदाहरणं वर्तमानचक्रवर्तिनां कृते भूतकालीनानां चक्रवर्तिननां राज्ञां चरितं भवति, एकसमये चक्रर्तिद्वयेन स्थातुमशक्यत्वात् । राजानश्चेतिहासेषु प्रामाणिकेषु प्रसिद्धाश्चेत् व्याप्तिस्तर्हि सिद्धैवे । तदनुसारेण निर्णयो यथार्थो भवितुमर्हति अन्यथा न । अतः कल्पितस्य मनुष्योपवर्णितस्य चेतिहासस्य व्यावृत्त्यै वेदतदुपजीविपुराणोपवर्णितानामितिहासानां वेदत्वकथनेन तेषु प्रामाण्यं बोध्यते । अत एव काव्यप्रकाशस्य आदिमोल्लासस्य "शक्तिर्निपुणतेति" श्लोकव्याख्यायां शक्तिकारणतयोपदिष्टेतिहासस्यार्थः "पुराणवर्णित इतिहास" कृतः ।

श्रीमूला

शिक्षा वर्णोच्चारणोपदेशकं शास्त्रम् । कल्पः क्रत्वनुष्ठानोपदेशपरमाश्वलायनादिप्रणीतं सूत्रम् । व्याकरणं शब्दानुशासनं पाणिनीयादि । निरुक्तं निर्वचनशास्त्रं यास्कप्रणीतम् । छन्दोविचितिः छन्दश्शास्त्रं पैङ्गलादि । ज्योतिषं सूर्यादिगत्यादिप्रतिपादकं शास्त्रम् ।

वैदिकसिद्धान्तसंरक्षिणी

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते ।'

इति ग्रन्थेन पुराणादीनां त्रय्यामन्तर्भावस्य नीतिसारे उक्तस्य विषये स्वसम्मतिं प्रदर्शयन्नाह—शिक्षेति । शिक्षादीनां त्रय्यामन्तर्भावादेव विद्याचतुष्टयविभाग उपपद्यते । अन्यथा शिक्षादीनां त्रय्यतिरिक्तविद्यानां सत्वाद् विद्यानां चतुर्धा विभागोऽनुपपन्नः स्यात् । शिक्षा वर्णोच्चारणोपदेशकं शास्त्रम् । कल्पः क्रत्वनुष्ठानेतिकर्तव्यतोपदेशः आश्वलायनादिप्रणीतं सूत्रम् इति यावत् । व्याकरणं शब्दानुशासनं पाणिनीयादि । निरुक्तं वैदिकशब्दानां अवयवार्थनिरूपणम् । छन्दोविचितः पिङ्गलादिप्रणीतं पद्यबन्धशास्त्रम् । ज्योतिषं सूर्यादिग्रहाणां मध्यमस्पष्टगत्यादिबोधकं शास्त्रम् ।

नी० टी० १. शिक्षेति । 'सामादीनाँ प्रयोजनम् । अ'''कादिकम् । इतिहास'''नु'''धनुर्वेद आयुर्वेद ताट्यवेद'''इति त्रुटितः पाठः ।

एष त्रयीधर्मः चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः[1]।

वैदिकसिद्धान्तसंरक्षिणी

अङ्गादिषु त्रयीसङ्केतः

अङ्गादिसाधारण्येन कृतः त्रयीपदव्यवहारः कौटिल्यात्प्रभृत्येवावर्तत इति वैयाकरणसङ्केतितनदीवृद्धादिशब्दव्यवहारवत् कौटिल्येनैव अङ्गादिषु त्रयीशब्दः; सङ्केतित इति न मन्तव्यम्, व्यवहारोयं पूर्वत एव प्रवृत्तः न कौटिल्यात्प्रभृति इति सिद्धान्तितत्वात् । तथाहि—

तदधीते तद्वेद इति पाणिनिसूत्रेण न्यायव्याकरणादिपदं शास्त्रे तदर्थेषु च सङ्केतितं वर्तते इति अवगम्यते। अतएव "अयं नैयायिकः अयं वैयाकरण" इति व्यवहारः भवति। एतन्मतं काव्यादिषु विदग्धमतिभिरपि तथा स्वीकृतमुपलभ्यते। तद्यथा—

"तथा च विनिगमनाविरहादर्थविशेषावरुद्धः शब्द इव शब्दविशेषावरुद्धोऽर्थोपि लोकोत्तरचमत्कारव्यञ्जकतया काव्यमित्युभयोः शब्दार्थयोः प्राधान्येन निर्देशो वर्तते। "काव्यं श्रुणोति" इतिव्यवहारस्स्वार्थांशेपि शाब्दबोधार्थकश्रुणोतिनोपपादयितुं शक्यते, "आत्मा श्रोतव्य" इतिवत् इति। (अत्र काव्यप्रकाशविवरणं द्रष्टव्यम्) एवञ्च त्रयीशब्दस्यार्थो वेदवत् वेदार्थोऽपि अतः शिक्षाकल्पादयोपि वेदार्थत्वात् त्रयीस्वरूपा इति कौटिल्येन तत्र तत्र व्यवहृतः त्रयोशब्दो न कौटिल्यकल्पितः, अपि तु परंपराप्राप्त इति।

श्रीमूला

त्रय्याः फलं वक्तुमाह—एष इति। एष त्रयीधर्मः त्रय्युपदिष्टो धर्मः, चतुर्णां ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च औपकारिकः उपकारफलः। कस्मात्, स्वधर्मस्थापनात् स्वधर्मेषु स्थापनात्, स्वधर्मानुपदिश्य तेषु नियन्त्रणाद्, अर्थाद् वर्णाश्रमाणाम्।

वैदिकसिद्धान्तसंरक्षिणी

त्रय्या उपयोगमाह एष इति। एषः बुद्धिस्थः अग्रेवक्ष्यमाणः। एतत्पदार्थं व्याचष्टे त्रयोधर्म इति। त्रयीप्रोक्तः। अयं भावः, त्रयीं ज्ञात्वा तदन्तर्गतविधिप्रतिपाद्यशाब्दीभावनया इष्टसाधनतामनुमाय प्रवृत्तौ सत्यां तद्विषयोऽर्थो धर्मो भवति अतएव चोदनालक्षणार्थो धर्म इति धर्मलक्षणं जैमिनिना कृतम्।' तदेवं अनुष्ठेयोर्थः त्रय्या विहितश्चेत् त्रयीधर्मः अन्यथा स न इति विग्रहेण द्योत्यते। अत्रेदमनुसन्धेयम्। यः कोऽपि जग-

नी० टी० १. औपकारिकइति इत्युपकारदर्शनम्।

वैदिकसिद्धान्तसंरक्षिणो

तीतले भवतु स यदि स्ववंशपरंपराप्राप्तं धर्ममनुतिष्ठति तर्हि तेन तेनानुष्ठितः सर्वो धर्मः त्रयीधर्मं' इति वक्तुं शक्यते। यतः त्रयी सर्वस्यापि कृते स्वपरंपराप्राप्तं धर्मं अनुमनुते। नह्यत्र अपरेणापरस्य धर्मोऽनुष्ठातव्य इति वेदस्य समीहाऽस्ति। यथा ब्राह्मणेन स्वधर्म एव परिपालनीय इत्यादि। एवञ्च यथा वर्णाश्रमाचारधर्मो वर्णाश्रमिणां कृते विहितः तथा "मलेच्छानां कल्पिता धर्माः" इत्युक्तत्वात् तैः अनुष्ठितःकिल्पितोपि स तेषां कृते त्रयीधर्म एव। न च तर्हि म्लेच्छानां वेदबाह्यत्वं कथमुच्यते इति वाच्यम्। वेदप्रामाण्यास्वीकारे तेषु तथोक्तत्वात्। तथाच केवलं म्लेच्छैर्यदि "वेदानुयायित्वं स्वीकृत्य तथा वर्तामहे', इति बुध्या प्रवर्त्येत धर्मबुद्धया, तर्हि स एव धर्मः वैदिको धर्मस्तेषांकृते भवितुमर्हति। नेदृशी अन्येषु धर्मेषु व्यवस्था अस्ति। अतएव श्रुत्या "धर्मो विश्वस्य जगतः प्रतिष्ठा" इत्युक्तम्—नह्यत्र कश्चित् कमपि स्वस्वकर्मणि स्थितं ततः अन्यत्र बलात् प्रेरयितुं प्रवर्तते एवं स्थिते सर्वेषां वेदानुययिनां विभिन्नाचाराणां भ्रातृभावो नासुलभः। अत इदं सिद्धं यत् आत्मनि वेदानुयायित्वस्य वेदप्रोक्तत्वस्य च तथा स्वीये

जयमङ्गलाक्राडपत्रम्

ननु श्रुतेर्धर्मनिर्णायकत्वं केन न्यायेनेतिचेदुच्यते। यदा हि 'किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः' इति न्यायेन प्रतिव्यक्तिभेदेन बुद्धिवैलक्षण्यात् केन किं कर्तव्यमिति निर्णयः न भवति, (तदिदं अमेरिकनदेशीयस्थप्याटमहोदयस्य लेखानुवादावसरे पृ० १९३-९४ प्रपञ्चितम्।) तदा मोह-निरासाय कलह-निराकरणाय कर्तव्यनिर्धारणाय च सर्वैर्मिलित्वा कश्चन मतिमान् निर्दुष्टः कर्तव्यनिर्णायकत्वेन निर्णेतव्यो भवति। तत्कार्यं निर्दुष्टया अपौरुषेय्या तात्पर्यवत्या श्रुत्या क्रियते। यथाहि सांप्रतं विधानपरिषदि विधिनिर्माणावसरे परिषत्सदस्यानां मतानि यदा समानतया संभवन्ति। तदा विधिनिर्माणमशक्यं भवति। अतः तत्परिषदः सभापतिः स्वीयमताधिक्यात्मकेनस्वीयमतद्वयेन बहुमतं यत्र कर्मणि प्रकाशयति तदेव विधिरूपेण सर्वैः संमन्यते। तथैव धर्मस्य निर्णयविषयेऽपि श्रुति-प्रतिपादिततत्वस्याशयः अनुमन्तव्यः। किञ्च श्रुतिप्रोक्तानां कर्मणाम् अनुष्ठाने अपरमिदमपि फलमस्ति यत् आस्तिक्यस्थापनापुरःसर सत्वोद्रेकमूलिकायाः प्रतिभायाः अभ्युदयः, श्रुतिप्रामाण्यविश्वासात् कर्तव्यनिष्ठायान्दार्ढ्यम्, तत्प्रयुक्ता विश्वास्यता च इति।

अत एव मानसरामायणे—श्रुतिः परतीरगमनाय महती नौका अस्तीति उक्तमुपपन्नं भवति। तदुक्तं- तत्र मङ्गलाचरणप्रसङ्गे—

'बन्दौ चारिउ वेद भववारिधि बोहित सरिसु।
जिन्हहि न सपनेहु खेद बरनत, रघुबर बिसदु जसु॥

यदि चात्र धर्मनिर्णये श्रुतिः नापेक्ष्यते, आत्मतुष्ट्यैव धर्मः कर्तव्यत्वेन निर्णेष्यते इति उच्यते- तर्हि धर्मनिर्णये कस्यात्मतुष्टिः प्रमाणत्वेन स्वी-

जयमङ्गला

स्वधर्मस्थापनादिति । स्वग्रहणमसाधारणधर्मख्यापनार्थम् । तस्य व्यवस्थापनाद् औपकारिकः उपकाराय प्रभवति ॥

वैदिकसिद्धान्तसंरक्षिणी

धर्मे अस्वीकृते तत्र त्रयीधर्मत्वं न भवति इति । अत्रेदमुदाहरणम् धरातले या कापि भाषा भवतु तस्यां पाणिनीयव्याकरणसंस्काराभिव्यङ्ग्यत्वं यदा भवति तदा तत्र संस्कृत-भाषात्वं नानुपपन्नं तदव्यङ्ग्यत्वेतु संस्कृतभाषापि अपभ्रष्टैव भवति । "यथा यावत्तैलं तावद्व्याख्यानः" इत्येवं वाक्यं अस्ति । "अत्र व्याख्या नः" इति पदविभागस्याज्ञातत्वे

जयमङ्गलाक्रोडपत्रम्

कर्तव्या । इत्ययं महान् प्रश्नः जागरिष्यत्येव । परस्परं विरोधश्च उत्पद्येत इति धर्मनिर्णयो न स्यात् । दृष्टञ्चैतत् भाषान्दोलनप्रस्तावेन । तथाहि—तत्तद्देशीयभाषायां राष्ट्रियभाषात्वस्वीकारे इतरप्रान्तस्थाः अतीव क्रोधकलुषितान्तःकरणाः भवन्ति । संस्कृत- भाषायाः राष्ट्रभाषास्थाने स्वीकर्तव्ये न कश्चित् दोषः । तथैव प्रकृतेऽपि बोध्यम् ।

स्थापनादिति । असाधारणधर्मख्यापनं त्रय्याः असाधारणं प्रयोजनम् । सत्याहिंसादि-साधारणधर्मस्य वेदानधिकारिभिः तदधिकारिभिर्वा लोकतः अनुष्ठेयत्वेन ज्ञातत्वात् ।

असाधारणधर्मप्रयोजनम्

ननु असाधारणधर्मस्य व्यवस्थापनमन्तरापि अनुष्ठितेन साधारणधर्मेण समाजे सुव्यवस्था भवितुं कुतो नार्हति ? इति चेदुच्यते । वैदिकसमाजे स्वस्वधर्मव्यवस्थापनेन सह स्वस्वजीविकोपायस्यापि त्रय्या नियमनं कृतं वर्तते । नहीदं नियमनम् अन्यसमाजे उपलभ्यते । अतः एकार्थाभिनिवेशित्वलक्षणस्य अरित्वस्य वैदिकादन्यस्मिन् समाजे प्रायशः निश्चितत्वमेव । अतः स समाजः सत्यादिसाधारणधर्मं पालयितुं वाञ्छन्नपि न समर्थो भवति । एतस्मादेव कारणात् वैदिकादन्यस्मिन् समाजे वृत्तिसाङ्कर्यं जाति-साङ्कर्यं वा रोद्धुं अद्ययावन्न कोऽपि समर्थो बभूव । कस्य कुलीनत्वं सङ्कररहितं परंपरायातमस्ति इति केन निर्णेतुं शक्यते । वैदिकसमाजेषु नाऽयं निर्णयः दुरधिगमः । अत्र वृत्तिनियमनव्यवस्थाया आश्रमव्यवस्थायाश्च त्रयीमाधारीकृत्य धर्म्यत्वेन अद्यापि परिपालनदर्शनात् ।

यद्यपि अस्मिन् समाजे साङ्कर्यं कुत्रापि नाभूत् इति न वक्तव्यम् रागान्धत्वप्रयुक्तस्य अत्रापि दर्शनात् । तथापि अद्यावधि तथाविधान्यपि कुलानि अस्मिन् समाजे वर्तन्ते येषु साङ्कर्यदोषाभावस्य निर्णयेन वक्तुं शक्यत्वात् । तद् वक्ष्यते मूलकृता अध्यायान्ते—"तस्मात् स्वधर्मं भूतानामि'त्यादि आरभ्य 'व्यवस्थितार्यमर्यादः' इत्यन्तम् ।

वैदिकसिद्धान्तसंरक्षिणी

तद्वाक्यं असाधु भवति, उक्तपदविभागस्य ज्ञातत्वे तु तदेव वाक्यं साधु भवति। यच्च "काट रेट" इत्याद्याङ्ग्लभाषायां प्रयुज्ते तच्च व्याकरणसंस्कारानभिवाङ्ग्यत्वात् असाधु भवति। परं एकाक्षरीकोशेन एकदेशे नामग्रहणं इत्यादिन्यायेन उणादिना वा आङ्ग्ल-भाषया भाषिते प्रयोगे कथञ्चिदपि व्याकरणसम्मता व्युत्पत्तिः प्रदर्श्येत तर्हि तस्य-प्रयोगस्य तथैव साधुशब्दत्वात् यज्ञादावुच्चारणे न काऽपि क्षतिः। एवं व्याकरण-संस्काराभिव्यङ्ग्यत्वं आङ्गलशब्दान्तर्गतेषु सार्धष्टिशतसङ्ख्याकशब्देषु व्युत्पत्ति-र्विवेचिताऽन्यत्र। तद्वत् त्रयीधर्मोऽपि सर्वस्य धर्मस्य सङ्ग्राहकः बोध्यः। किञ्च धर्मस्य त्रयीप्रोक्तत्वेन ज्ञातस्य स्वीकृतस्य अपरोप्ययं विशेषः यत् अनुष्ठाने त्रय्या विहितत्व-हेतोः इष्टसाधनत्वमनुमाय यदि सुकृतं भवति तर्हि तत्तद्धर्माय भवति अन्यथा अर्थार्थम् कामार्थं वा इति भक्तिरसायने उक्तम्।

तद्यथा—

> दृष्टादृष्टफला भक्तिस्सुखव्यक्तैर्विधैरपि।
> निदाघद्रूनदेहस्य गङ्गास्नानक्रिया यथा॥ इति।

जयमङ्गलाक्रोडपत्रम्

तस्मात् स्वविशुद्धिपूर्वकस्य साधारणधर्मस्य परिपालनोपयोगिनः असाधारण-धर्मस्य व्यवस्थापनं त्रय्याः प्रयोजनं सिद्धम्।

उपकाराय प्रभवतीति। अयं महानुपकारः त्रय्या क्रियते, यत् वैदिके समाजे समाजव्यवस्थोपयोगितया अपेक्षितानां गुणानां जन्मत एव आधानाय कुलशुद्धिः तया व्यवस्थाप्यते। अस्याः माहात्म्यं टीकाकृता राजपुत्ररक्षणे स्पुटीकृतमस्ति। तदुक्तम्—

> 'आहारेष्वथ योनौ च बीजे कर्मणि चापि यः।
> शुचिः कृच्छ्रगतस्यापि न पापे रमतेऽस्य धीः॥' इति

(कौ० ज० म० राजपुत्ररक्षण प्रकरणे)

त्रयीधर्मे उपकारकत्वस्य प्रत्यक्षतया प्रत्यभिज्ञायमानत्वम्।

ननु उपर्युक्तं त्रयीधर्मस्योपकारकत्वं शब्दप्रमाणेन निर्णीतमपि नीतिलक्षणा-नुसारेण प्रत्यक्षतया तत् प्रत्यभिज्ञायमानं कथं भवेत्? इति चेत् उच्यते—इदं तु सत्यमेव यत् कस्यापि वस्तुनः अप्रत्यभिज्ञातत्वे तद्विषयिणी तत्तद्वस्तुतत्वप्रतिपादि-कया विधया कृतापि व्युत्पत्तिः व्यर्थतामापन्ना भवति। प्रसङ्गेषु अशक्तिमतः पुरुषस्य चेतसि व्युत्पत्तेः अविस्फुरणात् इति प्रथमेऽध्याये चिन्तितमस्ति। अतः प्रत्येकस्य वस्तुनः वास्तविकस्याखण्डोपाधिस्वरूपस्य "तदेवेद"मितिरूपेण यदा परिचयो भवति तदा शक्तिरूपतामापन्नं तद् वस्तु सदा स्फुरतीति। तन्न्यायेन त्रयी-प्रोक्तेन धर्मेण कृतमुपकारित्वमवश्यं प्रत्यभिज्ञया विचारणीयम्। ततः पूर्वं प्रत्य-भिज्ञायाः किं स्वरूपमिति यावन्न विमृश्यते, तावत् धर्मेण कृतमुपकारित्वं प्रत्यक्षतया प्रत्यभिज्ञायमानं न भवेत्। अतः प्रत्यभिज्ञायाः स्वरूपं विमर्शनीयम्।

वैदिकसिद्धान्तसंरक्षिणी

इत्येतत् एष त्रयीधर्मं इत्युक्त्या मुलकृता स्फुटीकृतम्। अस्यौपकारिक इत्यनेनान्वयः। त्रयीधर्मस्य फलमाह-**चतुर्णामिति**। इदं पदं वर्णानामाश्रमाणां चेत्युभाभ्यां संबध्यते। वर्णानां ब्राह्मणक्षत्रियविट्शूद्राणाम्। आश्रमाणां ब्रह्मचारिगृहस्थवानप्रस्थसन्यासिनाम्। **स्वधर्मेति**। असाधारणधर्मं इत्यर्थः। तस्य स्थापनात् तेषां तेषां कृते अदृष्टांशे दृष्टांशे च धर्मेण त्रय्या धर्मंजीविकयोनिर्यमितत्वात्। **औपकारिकः**—एकार्थाभिनिवेशित्वस्य समुद्धतत्वस्य च बह्व शेनापसारकत्वात् शान्तिप्रतिष्ठापकः।

अयं भावः। त्रयीप्रोक्तधर्मादितरत्र त्रय्यामिव दयाऽहिंसादिसाधारणानि कर्तव्यान्युपदिश्यन्ते यद्यपि, तथापि तत्रासाधारणानि कर्तव्यानि नोपदिश्यन्ते अतः तत्र विवाह-नियमबन्धनाभावात् तत्समाजे स्त्रीणां दीर्घकालं सुरक्षास्थिति र्न सम्भाव्यते तेन साङ्कर्यन्दुर्निवारं भवति। किञ्च तत्र यः कोपि जीविकार्थं कीदृशमपि यस्य कस्यापि कर्म करोतु तत्र प्रतिबन्धो नास्ति। अतः एकार्थाभिनिवेशित्वरूपमरित्वं बह्वंशेन दुरपनेयम्। एवं तत्र स्वे स्वे कर्मणि कुशलतालाभायापेक्षितानां संस्काराणां परंपरया उद्बोधचिन्ताया अभावेन कुलीनत्वादि उपेक्षितं वर्तते, अत्र तु न तथा। अतः एकार्थाभिनिवेशस्याभावाय नियमनं सदाचरणादिस्वरूपकार्यविधानं पुरुषसंबन्धविरहितया त्रय्या संपादितं फलाय भवति। पुरुषसम्बन्धे सति पक्षपातसम्भावनायाः सदा जागरूकत्वं दुरपनेयम्। ननु त्रय्या स्थापितधर्मविषये दृष्टफलानि शास्त्राणि, पाश्चात्यशास्त्रचिन्तकानां वाक्यानि च संवदेयुर्यदि, तर्हि अस्योपयोगित्वं असन्दिग्घं

जयमङ्गलाक्रोडपत्रम्

प्रत्यभिज्ञास्वरूपं

तच्च जीवस्य स्वरूपविमर्शे सति संभवतीति आदौ तत्स्वरूपं साहित्यशास्त्रानुसारेण उपवर्ण्यते। तथाहि भावप्रकाशने जीवविमर्शः चतुस्त्रिंशद्च्छ्लोकैः नादवर्णनप्रसङ्गे कृतः। तत्र आद्यः श्लोकः।

इह तत्वानि षट्त्रिंशत् शिवः शक्तिः सदाशिवः।
ईश्वरः शुद्धविद्येति शुद्धान्येतानि पञ्च च॥ इति।

"षड्त्रिंशद्तत्वनिरूपणम्"।

इदं हि प्रत्यभिज्ञातन्त्रं साङ्ख्यरहस्यबोधानन्तरं ज्ञातव्यं भवति। अतएव साङ्ख्येन सह अस्य विरोधे एतत्सिद्धान्त एव सिद्धान्तत्वेन स्वीकर्तव्यः इति शास्त्रमर्यादा। तद्यथा—साङ्ख्यशास्त्रे पञ्चविंशतितत्वानि अभिहितानि वर्तन्ते। अत्र तु तदुपदिष्टादपि एकादशतत्वानि अधिकानि सन्ति आहत्य प्रत्यभिज्ञासिद्धान्ते शुद्धविद्यास्वरूपबोधनाय षड्त्रिंशत्तत्वानि उक्तानि।

वैदिकसिद्धान्तसंरक्षिणो

स्वीकर्तुंमर्हं स्यात्। तत्तु नास्ति। इतिचेदत्रोच्यते। एतद्विषये कामसूत्रायुर्वेद पाश्चात्यविदुषां वचनानि संवदन्ति इति ब्रूमः। तेषु कामसूत्रे धर्मविषये वात्स्यायनेनैवमुक्तम् अस्ति—

"शास्त्रस्यानभिशङ्क्यत्वात्, अभिचारानुव्याहारयोश्च क्वचित्फलदर्शनात्, वर्णाश्रमाचारस्थितिलक्षणत्वाच्च लोकयात्रयाः, हस्तगतस्य बीजस्य भविष्यतसस्यार्थेत्यागदर्शनाच्चरेद्धर्मानिति वात्स्यायनः" इति।

उपर्युक्तसूत्रे धर्मस्य यानि फलानि उक्तानि तानि सर्वाणि दृष्टानि। अतः त्रयोस्थापितधर्मस्य दृष्टफलविषये कामसूत्रं संवादि इति निश्चितम्। तेषु फलेषु वर्तमानसमये वर्णाश्रममधिकृत्य सर्वैः शङ्कितत्वात्-वार्णाश्रमाचारस्थितेः लोकयात्रोपयोगित्वं अस्ति न वेति विशेषतो विमृश्यते।

लोकयात्रां प्रति धर्मे बाधकत्वं संमन्य अर्थस्यैव साधनत्वं जानन्ति तद्विदः। अतोऽर्थं पुरुषार्थं मन्वानाः प्रयत्नपुरस्सरं अधिकादधिकं तमेव अर्जयितुं प्रयतन्ते। तेन मनोरथस्य पूर्तिः सन्तोषवैदग्ध्यं च भविष्यतीति निर्णयन्ति। परन्तु अद्य यावत् इतिहासे एकोपि तथाविधो नोपलभ्यते येन हि धर्ममुपेक्ष्य अर्थमर्जयता मनोरथपूर्तिसन्तोषवैदग्ध्यानि लब्धानिस्युः। तदुक्तम्—

यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
न दुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते॥ इति।

जयमङ्गलाक्रोडपत्रम्

तत्र शिवः ज्ञानस्वरूपः, शक्तिश्च ज्ञानचिकीर्षाकृतिमत्वरूपं कर्तृत्वमिति शिवशक्त्योः स्वरूपं बोध्यम्। अनयोः प्रत्यभिज्ञा सर्वसाधारणेषु मनुष्येषु कथमुपपन्ना भवतीति चेत् 'घटमहं जानामी'ति प्रयोगेण उपपद्यते।

तदुक्तम्—नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं।
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिस्स्पन्दते।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ (द० स्तो ४) इति।

जानामीति प्रयोगे पदद्वयं प्रकृतिप्रत्ययभेदेन वर्तते। तत्र धात्वर्थः प्रकृत्यर्थः ज्ञानम्। स एव शिवः। मिप्प्रत्ययार्थः कर्तृत्वम्। तदेव शक्तितत्वम्। एतदुभयमपि शुद्धतत्वमित्युच्यते। यद्यपि जीवः क्वचिदंशेन ज्ञानशक्तिसंपन्नोऽपि शिवशक्तिरूपताआत्मनि ख्यापयितुमर्हति तथापि जीवे नास्ति शुद्धत्वम्, अनानन्दतापादकऽऽवरणसहचरितस्या (परिमितप्रमातृत्व-बुद्धेः) आणवमलस्य (मम तव इत्यादिबुद्धेः) मायिकमलस्य (पुण्यपापात्मकस्य) कार्मिकस्य मलस्य च सत्वात्।

वैदिकसिद्धान्तसंरक्षिणी

प्रत्युत तेनेदं स्फुटं यत् धर्मंमुपेक्ष्यार्थार्जिकैः यथा यथा अर्थ उपार्ज्यते तथा तथा तत्प्रयुक्तेन कामसुखेन इन्द्रियाणां तृप्तिरावश्यकी आसीत् परन्तु कामाङ्कुराणां बाहुल्येन कार्यं-पूर्णअभूत् इति बुद्धिर्न भवति । नापिच इन्द्रियाणां तृप्तिः । तदुक्तम्—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूयएवाभिवर्धते । इति

अतएव चाणक्येन धर्ममुपेक्ष्य जीवतां विरुद्धवृत्तित्वात् विनाशो भवति इत्युक्तम् । तृप्तिस्तु दूरंगता[1]—

एतदनुबन्धीतिहासोपि प्रदर्शितिः नीतिसारादौ, तत्रैव द्रष्टव्यः[2] ।

जयमङ्गलाक्रोडपत्रम्

षट्त्रिंशत्तत्वेषु उक्तं शिवशक्तितत्वन्तु परस्परं नैर्मल्यात् प्रकाशकत्वात् शुद्धमभिहितं प्राक् । अत्र अनानन्दतापादकम् आवरणं कदापि नास्ति । उपर्युक्तस्य जीवनिष्ठस्य त्रिविधस्य मलस्य षट्त्रिंशत् (३६) तत्वान्तर्गते शिवे शक्तौ च असत्वात् । एतस्मादेव कारणात् शिवः शक्तिश्च परस्परं यदा सङ्गच्छतः तदा वस्तुमात्रसम्बन्धिना असत्वापादकेन आवरणेन आवृते यथा न भवतः तथा अभानापाद-कावरणेनापि । इति कृत्वा तयोः सर्वं प्रत्यक्षं सिद्ध्यति । इदं शक्तितत्वं साङ्ख्यैरभि-हितायां प्रकृतौ न अन्तर्भावनीयम् । प्रकृतेः जडत्वेन शक्तेस्तु चेतनत्वेन स्वीकारात् ।

यदा किल समरसतापन्नं शिवशक्तितत्वं भगवत्प्रसादेन गुरुप्रसादेन वा यस्य चेतसि उच्छलति तदा अयं उच्छलितचेतस्कः कविः क्रान्तदर्शीत्युच्यते । एतत्तत्वस्या-शीर्वादेन कविः यद् ब्रूयात् तदेव स्यात् । नात्र किमपि बाधकं भवितुमर्हति । तदेवो-क्तम् काव्यप्रकाशस्य मङ्गलपद्ये—

नियतिकृतनियमरहितां ल्हादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।। इति

तथा एतदनुबन्धी इतिहासः प्रसिद्धः । तद्यथा—हनुमता पाषाणेलिखितस्य हनुमन्नाटकस्य समुद्रे प्रक्षिप्तस्य संशोधनावसरे—

---

१ तद्यथा—तद्विरुद्धवृत्तिरवश्येन्द्रियश्चातुरन्तोपि राजा सद्यो विनंक्ष्यति । इति ।

२ दाण्डक्यो नृपतिः कामात्क्रोधाच्च जनमेजयः ।
लोभादैलस्तु राजर्षिर्वातापिर्हर्षतोऽसुरः ।।
पौलस्त्यो राक्षसो मानान्मदाद्दंभोद्भवो नृपः
प्रयाता निधनं ह्येते शत्रुषड्वर्गमाश्रिताः ।।
इति । का० नीस०

वैदिकसिद्धान्तसंरक्षिणी

किञ्च उपार्जितेप्यर्थे यदाअर्थार्थी आत्मनि अपरिपूर्णतां व्ययाधिक्यं चानुभवति तदा न्यायसीमानं अतिक्रम्यापि परस्मात् अर्थं स समीहते। परस्य पश्यतः अर्थअपहर्तुं नशक्नोतीति परान् वञ्चयति इति स्वभावसिद्धम्। दृश्यते चेदं वर्तमानसमये पुत्रः, पितरं, पिता पुत्रं, स्वामी भृत्यम्, भृत्यः स्वामिनम्, अध्यापकः शिष्यम्, शिष्योऽध्यापकं च वञ्चयति। वर्णाश्रमाचारोपेक्षायां स्वार्थसाधनतत्पराणामयं महान् वञ्चनात्मको दुर्नयः येन दुर्नयेन शङ्काहेतुना सर्वे धर्ममनपेक्ष्यार्थार्थिनः सर्वस्मात् शङ्कन्ते। तदुक्तम् अनर्थप्रतिभा शङ्का परक्रौर्यात् स्वदुर्नयात्। इति

ननु च शङ्काऽस्तु तेषु, कोवा दोषः? इति चेदुच्यते। शङ्कायां जागरुकायां मैत्रीविनाशो नियत इति महान् दोषः। इति शङ्कास्वरूपञ्चिन्त्यते—[1]

जयमङ्गलाक्रोडपत्रम्

"अयि खलु विषमः पुराकृतानां भवति हि जन्तुषु कर्मणां विपाकः" इति लिप्या बद्धः प्राप्तः प्रस्तरखण्डेष्वन्यतमः प्रस्तरः भोजराजसभायायामुपस्थापितः। तदानीमेकेन कविना उक्तसमस्यापूर्तिः एवं कृता—

"क्व जनकतनया क्व रामजाया क्व च दशकन्धरमन्दिरे निवासः"।
अयिखलु.............................॥

परन्तु क्रान्तदर्शिना महाकविना कालिदासेन तु—

"शिवशिरसि शिरांसि यानि रेजुः शिव शिव तानि लुठन्ति गृध्रपादैः"॥ इति पूर्वार्धपूर्तिः कृता। ततः पुनः संशोध्यमाने अपरस्मिन् प्रस्तरखण्डे श्री हनूमतः कालिदासोक्तपद्यमुपलब्धमिति। तदेतद् शिवशक्त्योः स्वरूपं स्फुटीकृतम् भवति। राज्ञाऽपि गुरुप्रसाद ईशप्रसादश्च सम्पादितश्चेत् तर्हि समेषां विश्वासाधायकं शक्तिप्रभावितं कर्म प्रजानुरागक्षमं भवति। एवं स्थिते नृपः राजा इत्यमिधीयते। तदुक्तं 'राजा प्रकृतिरञ्जनात्' इति। जयमङ्गलाकृताऽपि पूर्वमत्र चोपवर्णितायाः शक्तेः महत्वमाकलय्य नीतिलक्षणे शक्तितत्वं समावेशितम्। तदुक्तम्—

'प्रत्यक्षानुमानागमप्रमाणदेशकालशक्तिपुरास्सरं अर्थसाधनविनियोगलक्षणा-

---

१ तदुक्तं गोकुलनाथोपाध्यायैः—
अनर्थप्रतिभा शङ्केति—घनिकः—
अनिष्टाभ्यागमोत्प्रेक्षां शङ्कामाचक्षते बुधाः। इति महाराजः।
नीचेष्वनर्थसन्देहरूपा शङ्का तदा भवेत् इति शार्ङ्गदेवः।
तेन द्वेषविषयस्य वस्तुनो विद्यमानोत्कटकोटिकः सन्देहः शङ्का इति पर्यवस्यति।
का० गो० वि० ४-३१

वैदिकसिद्धान्तसंरक्षिणी

शङ्का—किमनिष्टं मम भविष्यतीत्याकारश्चित्तवृत्ति विशेषः इति वर्णितम् रसगङ्गाधरे। एवञ्च यत्र शङ्का वर्तते तत्र मैत्री न भवितुमर्हति इति अर्थादायातम्।

मैत्र्यां अनर्थशङ्काया अप्रसक्तिः। यदि मैत्री अभिलष्यते तर्हि शङ्कानिरासोपेक्षितः तदर्थं धर्मस्य शासनं अपेक्षितं भाति तत्रार्थस्य मर्यादितत्वं भवति। यावत्पर्यन्तं वर्णाश्रमाचारस्थितिरासीत् तावत्पर्यन्तं वञ्चकत्वप्रसक्त्यभावेन मैत्री अप्रतिहता-बभूव। नेदमनैतिहासिकं वक्तुं शक्यते। भारतीयेषु परस्परं शङ्कावसरो नाभूत् इति इतिहासतः पुराणेषु वर्णितत्वात्। यदाप्रभृति च धर्मस्तिरस्कृतः तदा प्रभृति अर्थतत्परता समुद्भूता ततः प्रागुक्तरीत्या वञ्चनादिशङ्काकारणमपि प्रसक्तम् अतः भारते भेदनः संवृत्तं, तत्स्वरूपस्य तथाभिधानात्। "शङ्काजननं निर्भर्त्सनं च भेद"। इति।

अमुं भेदमुत्पाद्य दृष्ट्वा वा शत्रुः पराक्रमस्यावसरं लब्ध्वा मतं स्वीयं भारते प्रचारयितुं सफलोऽभूत्।

तेनेदं सिद्धं भवति यत् वर्णाश्रमाचारमर्यादायां दुर्नयस्य परिहारः शास्त्रेण धर्मं पुरस्कृत्य साधितः। धर्मप्राधान्ये अर्थरुचिः ह्रसमाना भवति। तद्ध्रासेन वञ्चनायाः प्रसङ्गो नास्ति। पारस्परिकशङ्कानां पराहतिश्च।

तदेतत् अभिसन्धाय 'वर्णाश्रमाचारस्थितिलक्षणत्वाच्च लोकयात्रायाः' इत्युक्तं कामसूत्रे। इति।

जयमङ्गलाक्रोडपत्रम्

क्रिया नीतिः' इति (ज० मं० अर्थशास्त्र, पृ० ५) एवं रीत्या षट्त्रिंशत्तत्त्वेषु शिव-शक्त्योः स्वरूपमभिहितम्।

अथ सदाशिव-ईश्वर शुद्धविद्यातत्वानि षड्त्रिंशत् तत्वान्तर्गतानि निरूप्यन्ते। तत्र **सदाशिवः**—'अहंविशेष्यिका तादात्म्यसम्बन्धेन जगत्प्रकारिका अहं जगदित्याकारिका धीः उच्यते।' **ईश्वरः** 'जगद्ः—विशेष्यिका तादात्म्येन अहंप्रकारिका "जगदिदमहम्' इत्याकारिका धीः उच्यते। शुद्धविद्या भेदधीतिरोधानमित्युच्यते। इमानि त्रीणि तत्वानि शिवशक्त्युभयापेक्षया विलक्षणानि भवन्ति। तदन्तर्गतं वैलक्षण्यंच अनान्दतापादकावरणस्य शिवशक्त्योः असत्वात्। एतेषु पञ्चसु साधारणो धर्मः असत्वापादकस्याभानापादकस्य चाभावः एवंरीत्या इमानि त्रीणि तत्वानि शिवशक्त्युभयापेक्षया न्यूनानि, केनचिदंशेन समानानि। भेदधीतिरोधानदृष्टया तु शिवशक्तिभ्यां सह शुद्धानि भवन्ति इत्यभिप्रेत्य षड्शित्सु तत्वेषु शिव-शक्ति-सदा-शिवेश्वर-शुद्धविद्याः इति पञ्च शुद्धानि तत्वानि परिगण्यन्ते।

अथ शुद्धाशुद्धानि तत्वान्याह—

माया कालोऽथनियतिः कला विद्या ततः परम्।
रागः पुरुष एतानि शुद्धाशुद्धानि सप्त वै॥ भा० प्र०

श्रीमूला

धर्माभावे अपस्मारः कुष्टाद्युत्पत्तिश्च भवति इति साहित्ये आयुर्वेदे चोक्तत्वात्[1] देतद्विषये साहित्यायुर्वेदोभयसंवादित्वं अपि सिद्धम्।

जयमङ्गलाक्रोडपत्रम्

माया—भेदबुद्धिः, तस्या स्वरूपम् अहं त्वं चेत्याद्याकारकं भवति। यदा हि जीवस्य एतादशी बुद्धिः भवति तदाऽहन्ताप्रमाया आत्मनि इतरापेक्षया सङ्कुच्य परिच्छिन्नता अनुभूयते। सैव परिमितप्रमातृतापदेन व्यपदिश्यते। इदमेव जीवस्य मायिकं मलमाणवमित्युच्यते। यदा हि जीवः परिमितप्रमातृताभावमापन्नः म्रियते मलेन तदा अयं बाल्यतारुण्यवार्धक्याद्यवस्था अनुभवन् तिष्ठमानः शिवशक्त्युभयावस्थायामुपवर्णितादानन्दात् वञ्चितो भवति। एतस्मादेव च कारणात् आत्मनि शक्तितत्वं सदपि तिरोहितं भवति। एतेन कालतत्वमपि व्याख्यातम्।

यदा किल मायाकालयोः आवरणं जीवेषु संपन्नम् तदा जीवः नियतिपरतन्त्रो भवति। नियतिश्च नैयायिकादिसिद्धा अदृष्टरूपा कार्यकारणभावस्वरूपा वा

---

१. तत्र सुश्रुतः--

मिथ्यातियोगेन्द्रियार्थकर्मणामभिसेवनात्।
विरुद्धमलिनाहारविहारकुपितैर्मलैः॥
वेगनिग्रहशीलानां अहिताशुचिभोजिनाम्।
रजस्तमोभिभूतानां गच्छतां च रजस्वलाम्॥
तथा कामभयोद्वेगक्रोध शोकादिभिर्नृणाम्।
चेतस्यभिहिते पुंसामपस्मारोभिजायते॥
हृत्कंपः शून्यता स्वेदो ध्यानं मूर्छा प्रमूढता।
निद्रानाशश्च तस्मि स्तु भविष्यन्त्यथ भवन्ति च।
इति। -सु० उत्तर अपस्मारनिदानं ६१।४-

तथा--ब्रह्मस्त्री सज्जनवध परस्वहरणादिभिः।
कर्मभिः पापरोगस्य प्राहुः कुष्ठस्य संभवम्॥
इति। —निदान कुष्टनिदाने ६।३०—

माधवनिदाने च—

विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम्
उन्मादहेतुर्भयहर्षपूर्वो मनोभिघातो विषमाश्च चेष्टाः।
इति —उन्मादनिदान ४

भावप्रकाशनेऽपि—

अपस्मारो महाभूत पिशाचग्रहणादिभिः
कालातिक्रमणाद्धातुवैषम्यादशुचित्वतः॥ इति।—भा० अ० १—

जयमङ्गलाक्रोडपत्रम्

व्यपदिश्यते। जीवः इमां कार्यकारणभावरूपां नियतिमालोच्यालोच्य तदनुसारेण कार्यं कुर्वन् यदा प्रवर्तते तदेव वर्तनं जीवस्य नियतिपारतन्त्र्यमित्युच्यते। इत्येवंरीत्या शुद्धाशुद्धविद्यायां मायाकालनियतितत्वानि व्याख्यातानि। अथ तदन्तर्गतानि अपराणि तत्वान्युच्यन्ते। तथाहि—अतिविज्ञानबहुलेषु अनेकेषु कार्यकारणभावेषु प्रसृतेषु परिगणितान् कार्यकारणभावान् महता क्लेशेनालोच्य समालोचितकार्यमात्रकर्तृत्वम् जीवेन क्वचित्स्थलेषु संपाद्यते। तदेव च जीवनिष्ठं कर्तृत्वं 'कलापदेन' व्यपदिश्यते। अनया सह शुद्धाशुद्धविद्यान्तर्गतं पंचममविद्यातत्वमपि जीवस्याच्छादकं भवति। एतदवस्थायां शुद्धविद्यापेक्षया अयं विशेषः यदत्र अभानापादकमावरणं न निवर्तते। अत एव मायायां स्थितः पुरुषः 'सर्वं पश्यामीति व्यवहर्तुं न शक्नोति अपि तु शुद्धाशुद्धत्मायादितत्वस्थितेन पुरुषेण कार्मणमलाभावात् 'सर्वमस्ती'ति ज्ञातुं शक्यते अतः तस्य असत्वापादकावरणं नास्ति। इयं या अवस्था, सा अविद्यापदेनोपदिश्यते इदमविद्यातत्वं जीवभावमापन्नस्येश्वरस्य। मायाकालनियतिकलाऽविद्यास्तु पंचमं-कंचुकं व्यपदिश्यते शास्त्रेषु।

अधुना किल अविद्यायां वर्तमानः जीवः कालपरिच्छिन्नः आणवमायिकमलाभ्यामावृतः नियतिपरतन्त्रः क्वचित् स्थलेषु आत्मनः कर्तृत्वं प्रकाशयन् केषुचिदेव धिषयेषु ततद्शरीरवशाद्वा वासनावशाद्वा अनुरज्यते यथा उष्ट्रस्य निम्बभक्षणे, मार्जारस्यीयमूषकमक्षणें, मृगस्य गानेत्यादि। तदा तत्ताद्सुखवासनावासितान्तःकरणोऽयं तत्र तत्र अनुरक्तः इति व्यपदिश्यते। सेयं जीवस्यावस्था रागपदेनाभिधीयते अत्र शास्त्रे। एवंरीत्या मायाकालनियतिकलाअविद्यारागपदव्यपदेश्यैः षडत्रिंशत्तत्वान्तर्गतैः षड्तत्वैः कञ्चुकितः परिच्छिन्नो वा शिव एव पुरुषशब्देन जीव शब्देन वा व्यवह्रियते। एतेषु सप्तसु तत्वेषु आणविकं मायिकं उपर्युक्तं मलमस्तीति अणुत्वं भवति तथापि कार्मणस्य मलस्याभावेन असत्वापादकावरणनिवृत्या तदेशे शुद्धत्वमप्यस्ति इति कृत्वा इमानि सप्ततत्वानि मायामारभ्य पुरुषान्तानि शुद्धाशद्धानि इति व्यपदिश्य। एतेन शुद्धत्वमशद्धत्वंच परस्परविरोधि कथमुच्यते इति शङ्का परास्ता। शुद्धाशुद्धपदस्य शुद्धत्वतदभावरूपर्थतात्पर्यकत्वाभावात्।

एतावत्पर्यन्तं षड्त्रिशंत्तत्वान्तर्गतानि शिवमारभ्य पुरुषान्तानि द्वादश तत्वानि निरूपितानि। अथावशिष्टानामशुद्धपदव्यपदेश्यानां पञ्चविंशतितत्वानां निर्देशमाह—तत इति।

"ततः प्रकृतिरेतस्याः प्रकृतेस्तु गुणत्रयम्।
गुणत्रयेऽपि भिद्यन्ते रूपनामक्रियाः सदा॥" इति

अत्र प्रकृतिपदेन उक्ताणवादिमलत्रयविशिष्टानां सत्वरजस्तमसां दोषाणां साम्यावस्था बोध्यते। सर्वं प्रकृतिः ईशसमवेता सती। ज्ञानक्रियामायाभेदेन व्यप-

जयमङ्गलाक्रोडपत्रम्

दिश्यते। जीवसमवेता सती तु सत्वरजस्तमोभेदेन व्यपदिश्यते। अर्थात् ईशसमवेतं ज्ञानं जीवे यदा प्रभातं भवति तदा सत्वं भवति। एवमेव क्रिया रजः, माया च तमः इति बोध्यम्। तदुक्तम्।

"स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
माया तृतीये ते एव पशोः सत्वं रजस्तमः॥"

इति प्रत्यामिज्ञादर्शनम्।

एतत्छ्लोकार्थः पूर्वं विस्तरेण प्रपञ्चितत्वात् न विस्तार्यते। अस्यां सत्वरजस्तमस्साम्यावस्थायां प्रकृतौ त्रितयविधाणवादिमलसत्वात् जाड्यमस्तीति अस्याः जड़त्वसंज्ञा साङ्ख्यैः प्रदत्ता। अस्याऽयं भावः-यत् आनन्दपरिपूर्णः शिवः शक्तिसंपन्नोऽपि जडरूपतां गतः इति। ततः विषमभावतया गुणात्रयस्योत्पत्तिः ते च सत्वरजस्तमपदेन व्यवह्रियन्ते। अत्रदं बोध्यम्। ईश्वरनिष्ठा इच्छेव ज्ञानरूपतां क्रियारूपतां वा भजमाना गुणत्रयपदभागिनी भवति। यद्यपि च नैयायिकादयः ज्ञानत्वेइच्छात्वकृतित्वानां सामानाधिकरण्यं न स्वीकुर्वन्ति, तथापि आत्मैव नामरूपक्रियाभेदेन जगत्रूपतां गतः इति सिद्धान्तात् ज्ञानत्वेच्छात्वकृतित्वानां सामानाधिकरण्यं स्वीक्रियते इति सर्वेषामात्मतादात्म्यमस्तीति वेदेनैव सिद्धम् नान्यथयितुं शक्यते। तदुक्तम्। "तदैक्षत, आत्मानं स्वयमकुरुत बहु स्यां प्रजायेय" इत्यादि। एतदनन्तरं विकृतिभावमापन्नैः गुणैः सत्वादिभिः रूपनामक्रियाः उत्पद्यन्ते। तत्र रूपत्वं सोमसूर्याग्नित्रितयत्वमिति बोध्यम्।

तदुक्तम् —

'बीजत्रयेण भिन्नं स्यात् सोमसूर्याग्निरूपिणा।

इति भा० प्र० ७ स०

नामत्वं च अकारउकारमकारेति भेदात् प्रणवत्वमिति बोध्यम्।

क्रियात्वन्तु रुद्रोपेन्द्रब्रह्मादिभेदेन तत्तद्देवतान्यतमत्वम्। ताभ्यः सृष्टयादिप्रवर्तना। एतत्सर्वं भावप्रकाशनस्थेन स रुद्रो' इत्यादि पद्येन व्याख्यास्यते। तथाहि–

'स रुद्रोप्रेन्द्रपदमोत्थगुणत्रयविभेदिना॥' इति–भा० प्र० ७

शेषाणि तु तत्त्वानि द्वाभ्यां त्रयाणां व्यक्तिः स्यात् इत्यादिपद्यैर्व्याख्यास्यन्ते। पृथिव्यादिपञ्चकसमष्टेः शरीरस्य आधारभूतत्वात् जीवस्य परिचयः आदौ कर्तव्यः। तं बोधयितुं पुरुषभेदमाह ईदृगिति।

ईदृग् विलक्षणां शक्तिं यदा सङ्क्रमते पुमान्।
प्राज्ञतैजसविश्वत्वभेदत्रयमथाऽन्वगात्॥

अस्यार्थः—अनानन्दतापादकावरणेन आवृतः शुद्धाशुद्धावस्थाभावमापन्नः मायाकालनियतिकलाअविद्यारागैः कञ्चुकितः पुमान् पुरुषः यदा शक्तिं प्रकृतिं तमो

जयमङ्गलाक्रोडपत्रम्

रूपां सङ्क्रमते गृह्णाति। तदा सः पुरुषः जाग्रत्स्वप्नसुषुप्तिभेदेन विश्वतैजसप्राज्ञ-भेदेन च संज्ञां विधत्ते।

अथैषां प्राज्ञादिनां स्वरूपम् अभिधास्यमानः प्राज्ञमाह प्रधानमिति।
प्रधानमनयोर्व्याप्तं प्राज्ञ एकोऽन्यवस्तुनि।
शिष्टस्त्वस्मिंस्त्वसंपूर्णः इत्थमेषां प्रवर्तनम्। भा० प्र० अ० ७

यदा किल जडात्मिका प्रकृतिः सुखरूपतया भानविषयो भवति पुरुषस्य। तदा सा प्रधानपदेन व्यपदिश्यते प्रकृतेः सुखरूपतया भानं च निद्रायामनुभूयते। तत्र हि निर्विकल्पकावृत्तिर्भवतीति सर्वानुभवसिद्धम्। अतः निद्रासुखं प्रधानपदेन बोध्यम्। तत्प्रधानम्। अनयोः प्रकृतिपुरुषयोः व्याप्तम्। अथवा तत्सुखम् प्रधानयोः विश्व-तैजसयोः व्याप्तमिति वाऽर्थो बोध्यः। अस्मिन् समये पुरुषे प्रमातृत्वस्य आत्म-संबन्धित्वात् अपूर्णत्वं न भासते। इति सः पुरुष इत्युच्यते। शिष्टेति शिष्टपदेन विश्व-तेजसौ ग्राह्यौ। स्वप्नजाग्रदवस्थायां प्राप्तौ इति यावत्। तौ अस्मिन्-प्रधाने। **असंपूर्णः**—असंपूर्णत्वस्य कारणम्। तत्र अनयोः सुखभानाभाव इति।

अथ तैजसस्य कार्याण्याह—
तैजसस्सप्तधा भिन्नः बुद्धिगर्वखवायुभिः।
वन्ह्यम्भःक्षितिभिश्चैते कार्यकारणमूर्तयः। इति।

अत्र बुद्धिगर्वौ निश्चयाहंकारपदाभिधेयौ अन्तःकरणे अन्तर्भावनीयौ। तदुक्तं-न्यायरत्नावल्याम् 'तस्य च ज्ञानशक्तिप्रधानांशोऽन्तःकरणम्।
तच्च बुद्धिर्मन इति द्विधोच्यते।'

न्यायरत्नावल्याम् बुद्धेरप्यहमित्याकारकनिश्चय तदन्यनिश्चयरूपवृत्तिभेदेना-हंकारोअनहंकारश्चेति द्वैविध्यम्। तौ तथा आकाशवायुतेजोजलक्षितयः पञ्च-मिलित्वा सप्त भवन्ति। एभिः तेजसः विभिद्यते कार्यकारणस्वरूपेण। तदुक्तं कार्येति। अथ तेषां समुदायात्मके पिण्डे तन्मयत्वेन आभासमानः पुरुषः विश्वसंज्ञां लभतेइति भावः। तदाह—

'एतेषां समवायात्तु विश्व आसीच्चतन्मयः।' इति भा० प्र० अ० ७

अत्र समवायपदेन स्वातन्त्र्यविरोधकः ऐक्यापादकः सम्बन्धविशेषो बोध्यः। तदुक्तं समवायनिरूपणे न्यायकन्दल्याम्—

'यतश्चासर्वगतानामधिगतान्यत्वानामविष्वग्भावः स समवायाख्यः सम्बन्धः'। इति। (भा० प्र० भा० पृ० ७७४ स० निरूपणे)

कन्दली—इहेदमिति बुद्धिर्यतः कारणाद्भवति यतश्चासर्वगतानां नियतदेशा-वस्थितानामधिगतान्यत्वानामधिगतस्वरूपभेदानामविष्वग्भावोऽपृथग्भावोऽस्वातन्त्र्यम् स समवायः। भिन्नयोः परस्परोपश्लेशस्य सम्बन्धकृतत्वोपलम्भात्।

तथा 'धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः' इति समवेतपदस्यापि अर्थोबोध्यः। उपर्युक्तं परस्परं समवायसम्बन्धस्य फलं पारस्परिको विश्वासः। स चर्गर्वखादि-

वैदिकसिद्धान्तसंरक्षिणी

संप्रति एतेषां रोगाणां वृद्धिः प्रत्यक्षसिद्धा वर्तते । तन्निदानं धर्मोपेक्षा अस्तीति आयुर्वेदवचनात् कृते निर्णये नास्ति प्रत्यवायः । अशुचित्वस्य परिणामःशीतलाप्रकोपः सुखण्डीरोगश्च वर्धते इति तु न तिरोहितं वर्णाश्रमिणाम् । अपस्मारकुष्ठशीतलादि रोगाशुचित्वयोः साध्यसाधनभावविषये प्राचीननवीनवैद्यानां एकमेव मतं भाति इदं रोगत्रयं वातव्याधेरुपद्रवः इति सुश्रुते वातव्याध्युपद्रवे निरूपितमस्ति । वात-व्याधिश्च ज्ञानतन्तूनां क्रियातन्तूनां च कृशतया भवति इति चिकित्साचन्द्रोदयवचनात् स्फुटम् । एवञ्च उभयमतेन ज्ञानतन्तूनां क्रियातन्तूनाञ्च विकृतिः उक्तोपद्रवत्रये-निदानमिति पर्यवस्यति । तन्निरसनस्योपायः शुचित्वं प्राचीनपरंपराप्राप्तानां नियमानां परिपालनं चेति सर्ववादिसंप्रतिपन्नम् । वेदमूलकानां वर्णाश्रमाचारशुचितादीनामपरि-पालने एतेषां रोगाणां प्रादुर्भावः केवलं भवति इति न अपितु विश्वस्मिन् अनेके अभि-शापाः सम्पद्यन्ते । इत्येवं पाश्चात्यविद्वद्भिरपि वर्तमानसमाजस्य स्वरूपं प्रकटी-कुर्वद्भिः साधु निरुपितम् । तथाहि—अमेरिकन फिलासाफिकल कांग्रेसाधिवेशने दिसम्बरमासे २००६ सञ्जाते प्रो० श्रीपियाटमहोदयेन कृते अध्यक्षीयभाषणे दि"फिला-साफिकल रिव्यू" पत्रे प्रकाशिते सेप्टेंबरमासीये ४१२—,२४ पृष्ठे उद्धृतमस्ति तस्य सारांशोऽत्र विलिख्यते । तथाहि "न केवलममेरिकन समाजः किन्तु पाश्चात्य संस्कृति-निष्ठः सर्वं एव समाजः सत्प्रतिपक्षितमतेषु शृङ्खलया बद्धो दास्यमनुभवति । शृङ्खला-बन्धने मूलकारणं सततात्यन्तिकदुःखानुभव एव । समाजान्तर्गताः सर्वा व्यक्तयः सत्प्रतिपक्षितमताः सन्ति ।…… ।

जयमङ्गलाक्रोडपत्रम्

सम्मिलितेषु पिण्डेषु दृश्यते । स एव राजनीत्याऽपि सम्पादनीयः तदर्थमेव राजनीति-प्रयत्नः । इत्येतत्सर्वं व्याख्यातृभिः वाल्मीकिरामायणस्य प्रथमसर्गस्य व्याख्यायां व्याख्यातम् । एवंभूताः गर्वखपृथिव्यादिसप्तभिर्मिलितेषु पिण्डेषु तन्मयत्वेन भासमानाः पुरुषाः विश्वपदव्यपदेश्याः व्यष्टिजीवा इत्यभिधीयन्ते । अथ व्यष्टिशरीरे जीवं निरूप्य समष्टिशरीरे विराट्स्वरूपतया वर्तमानमुपर्युक्तं पुरुषं निरूपयति ।

सोऽपि त्रैविध्यमन्विच्छम् विराट् पुरुष इति ।

सोऽपिईश्वरोऽपि इत्यर्थः । अथ तत् त्रैविध्यमाह ।

बीजत्रयेण भिन्नःस्यात् सोमसूर्याग्निरूपिणा । इति

बीजत्रयेण-गुणत्रयेण । शेषं पूर्वं व्याख्यातम् ।

एतावत्पर्यन्तं पूर्वैः पद्यैः आकाशदिसप्तभिः मिलिते शरीरपिण्डे तन्मयत्वेन भासमानः विश्वाख्यः पुरुषः अस्तीति निरूपितम् । शरीरस्य स्वरूपं तदुत्पत्तिश्च न निरूपिता । अतः तदुत्पत्तिमाह पञ्चभिः श्लोकैः—भा० प्र० ७ अ०

वैदिकसिद्धान्तसंरक्षिणी

किञ्च उन्मादावस्थायां गतानां व्यक्तीनां मनस्सु सामाजिकव्यवहारेषु च सुसंबद्धता नाभिव्यज्यते। कीदृग्विधे लाभे जातेपि इष्टसिध्यनुभवो न तेषु भवति। ध्येयानिश्चितया न अनुष्ठेयविषये निश्चितिः। ततश्च प्रतिव्यक्ति पराभवनिराशाग्रस्तत्वम्। तथाभूतं मनः न्यायान्यायोत्साहप्रेमसद्भावनासंपत्तिविभागशास्त्रीयोप भोगशमसुखविहीनं संपन्नम्। अग्रिमदुःखपूरभावग्रस्तं मनः अन्याय्याक्रमणेन परकीयसंपत्तिमेव न केवलमपि तु तत्सर्वस्वमपि हर्तुं चेष्टते, बहुसङ्ख्यव्यक्तीरुद्धे जयति' चिकीर्षिताक्रमणस्य साफल्याय पशुसमाजेष्वप्यसंभाव्यं, परां काष्ठां गतं क्रौर्यं कर्तुं व्यक्तिः समाजश्च न विचिकित्सते। इदं मानवसमाजस्य हीनतमदास्यावस्थायाश्चिन्हम्" इति। एतत्प्रतिज्ञासमर्थनाय प्रमाणानि सुविस्तृतानि परीक्षकेण तेनैव पियाट्महोदयेन समुत्थापितानि। "समाजान्तर्गताःउपन्यास लेखकाः, नाटयकराः, तत्परीक्षकाः, समाजपरिवर्तका, वक्तृ-पत्रकर-रेडियोवार्ताहराः, जीवशास्त्र-समाज-शास्त्रमनोविज्ञान-शास्त्रज्ञाः, स्वीयानुसन्धानेन क्रान्तिसमर्थाः, पदार्थविज्ञान-रसायनप्रभृतिशास्त्रज्ञाः, व्यवहार-प्रविष्टाः साधारणा, जीविकार्जनाय प्रयतमाना, विद्यार्थिनश्चैते सर्वे एव परीक्षिता उक्तां प्रतिज्ञां पोषयन्ति" इति। तेन महोदयेनान्यदुच्यते। विकृतमज्जायन्त्रका विपन्नज्ञानशक्तिक्रियाशक्तिका एव प्राचुर्येण अमेरिकनसमाजे सन्ति इति। पुनः तेन महोदयेन विवाहकुटुंबापरिमितासङ्ख्येयव्यापार राजकीय तदितर-

जयमङ्गलाक्रोडपत्रम्

'विश्वाख्ये पार्थिवे चाण्डे प्राणिनो भूतमूर्तयः।
चतुष्प्रकारसम्भिन्ना नश्वरास्तु प्रजज्ञिरे॥
जीवत्वमेषामपरं प्रतिभेदमियात्प्रभुः।
कालप्रेरितयोर्वायुर्दम्पत्योः सङ्गमान्मिथः॥
पौरुषीं प्राकृतीं शक्तिं शुक्लशोणितरूपिणीम्।
वायुर्यदर्थसहितं गर्भाशयमुपानयेत्॥
अनादयश्च क्षेत्रज्ञा बहवः कर्मभाविताः।
सन्ति कालार्थिनः शेषाः कश्चित्कालेन चोदितः॥
गर्भाशयं स्वयं पित्रोर्मलाभ्यां सह संविशेत्।
तत्र नित्यो भवेद्वायुः प्राणापानात्मकः स्वयम्॥ इति।

(भा० प्र० अ० ७)

एषां श्लोकानामर्थः स्फुटत्वान्न व्याख्यायते।

अथ आनन्दरूपतामापन्नं शक्तितत्त्वं वस्तुतः स्वतन्त्रं सदपि जीवभावं यदा प्राप्नोति, तदा तत् आणवादिमलत्रयेण आवृतं भूत्वा शरीरस्य आधारभूतं यत् बीजं तेन रूपेण गौणभावं गतमिति दर्शयितुमाह—गुणेति।

वैदिकसिद्धान्तसंरक्षिणो

सर्वव्यवहाराः समाजे प्रसृतापराधाः मद्यव्यसनं च तत्र कारणानि इत्युपन्यस्तम्। तत्रैव। एतद्विषये तेन दी मार्डन ब्रूमनेन, दी लास्टसेक्सनामकेन श्री लार्ड वर्ग महोदयेन श्रीमत्या फार्नहममहोदयया चाचिरादेव प्रकाशितो ग्रन्थः प्रमाणार्थं मुपन्यस्तः। किञ्च ते महोदयाः विवाहविच्छेदापृथग्वासवन्ध्यावस्थानां विस्तीर्यमाणं प्राचुर्यम् वैयक्तिककौटुम्बिकप्रेम्णोः कौटुंबिकसामाजिकव्यक्तित्वयोः लोपं व्यक्तित्व-मपि विनश्यदवस्थं च हेतुत्वेन प्रमाणयन्ति। तथा श्री पियाट महोदयाः व्यापार राजकीयसामाजिकव्यवहाराणां नवयुगीना विशेषता विश्वासघाते प्रविष्टा द्योतते इति च वदन्ति इत्यादि।

अपरञ्च धर्मस्य लौकिकफलसाधने उपयोगित्वं आधुनिकानां मतेनापि व्यक्तम्। तदेतत् १—सं० २००६ साङ्गवेद विद्यालयीयविवरणे ३४—३७ पृष्ठे द्रष्टव्यम्। [1]

जयमङ्गलाक्रोडपत्रम्

"गुणभूतात्मके बीजे कारणार्थसमन्विते।
सर्वव्याप्ता परा शक्तिः अस्मिन् क्षेत्रज्ञतामियात्॥" इति

अर्थात् सर्वेषु व्याप्ता परा शक्तिः गुणभूते स्वयङ्गुणभावतामापन्ना शरीरा-रम्भकबीजभूते तत्वे अधिष्ठिता सती क्षेत्रज्ञभावं प्राप्नोति। अस्मिन् बीजे अपेक्षित-रीत्या सर्वे संस्काराः वर्तन्त एव। वयं गर्भपिण्डे शरीरे यादृशं संस्कारमपेक्षामहे तथा संस्कारेण संस्कृतत्वं शरीरारम्भके बीजे संपादयितुं शक्नुमः। एतत्प्रदर्शयितुमाह—

---

१ कम्पनीनां वार्षिकायव्ययः, विक्रयाय विज्ञापनानि, शेयरमार्केटव्ययहारः, सर्वत्र उपयुज्य-मानानि पौतवानि राजपुरुषव्यापारीयव्यवहारः करनिर्देश-ग्रहणे, ट्रस्टे, रिसिव्यरशिप् इन्साल्टमेन्टानां व्यवस्थाः विश्वासघातेनोत्कोचेन प्रतारणया च परिपूरिता इति गणनया प्रदर्शितास्तैः पृ० ४०० तमे। परकीयवित्ताहरणप्रवृत्तिश्च तद्द्वारा साधिता। तात्कालिक-विस्मरणाय मद्यव्यसनसेवनाय प्रसक्तता समाजान्तर्गता।

सततं पराभवनिराशाग्रस्तमनस्कतया तज्जन्यात्यन्तिकदुःखःनिवृत्त्यर्थं ·मार्गान्तरालाभात् व्यक्तयः निद्रायामपि स्वप्नरूपेण भयप्रदर्शनोत्प्रेक्षया तद्विस्मरणाय मद्यसेवया कञ्चित्कालं सुखाशां वाञ्छन्ति। सर्वमेव जगत् शत्रुभूतमपि प्रियमित्रं मन्यमानाः तत्समालिङ्गनेन मित्रप्रेम सफलयितुमिच्छन्ति। प्रेमानुभवहीने जीविते समुद्गीर्णाश्रवः मद्यसेवनेन हसनसुखमनुभवन्ति।

परस्वलुण्ठनभ्रूणहत्यामनुष्यमारणाद्यपराधानां विस्तीर्यमाणानां परीक्षणेन परां काष्ठां अधिरूढं क्रौर्यं सिद्धम्भवति। क्षणिकवासनापूर्त्यर्थं समनुष्ठीयमानाः नानाविधोपायाः न्यायालय-व्यवहारेषु प्रकटीभूता ज्ञायन्त एव। युद्धेषु शत्रुसमाजोपरि क्रियामाणो व्यवहारः ततोप्युत्कटं क्रौर्यवेगं प्रमाणयति, यः पशूनामपि समाजेषु न स तथा गण्यते। एवं विधायामवस्थायामन्ततो गत्वा आत्महत्यायामेव विश्राम्यन्ति तत्रत्या व्यक्तयः। एवंविधानां हत्यानाम् सङ्ख्यापि तत्र प्रतिदिनमेधते।

नैदिकसिद्धान्तसंरक्षिणो

"स्मृतिमन्तो भक्तिमन्तः कृतज्ञाः प्राज्ञाः शुचयो महोत्साहाः दक्षाः धीराः समरविक्रमयोधिनः त्यक्तविषादाः सुव्यवस्थितगतिगम्भीरबुद्धिचेष्टाः कल्याण-भिनिवेशिनश्च सत्वसाराः एषां स्वलक्षणैरेव गुणा व्याख्याता" इति चरके सत्वसाराणां लक्षणं निरुक्तमस्ति, तत्लक्षणलक्षिता वर्तमाने समये अलक्षितप्राया दृश्यन्ते। तदेतत् जयमङ्गलाक्रोडपत्रे १ अध्याये उदयनाचार्योक्तह्रासकारणसमूहस्य उल्लेखेन निरूपितं वर्तते। अधुना केवलं महनीयानां बुद्धिमतां प्रतापिनां कथाः कथास्वेव गीयन्ते एवंविधायाः सर्वस्या दुरवस्थाया मूलं वर्णाश्रमाचारविलोपप्रसक्ता ज्ञानतन्तु क्रियानन्तुविकृतिरेवेति सिद्धम्।

वर्णाश्रमधर्मो भारतस्य प्रकृतिः।

यद्यपिवर्णाश्रमधर्मः न मानवप्रकृतिरिति केचित् वदन्ति। तथापि टिप्पण्युक्त[1] प्रमाणैः धर्मो भारतीयानां प्रकृतिरस्त्येवेति साध्यते।

जयमङ्गलाक्रोडपत्रम्

'द्वाभ्यां त्रयाणां व्यक्तिः स्यात् त्रिभ्यो भवति पञ्चकम्।
पञ्चभ्यः पञ्चकानां तु चतुष्कं प्रतिपद्यते।' इति।

अस्य कूटश्लोकस्य व्याख्यां स्वयमेव आह—

शुक्रार्तवौ द्वयं तत्र-त्रितयं तु गुणत्रयम्।
भूतानि श्रवणादीनि शब्दवागादिपञ्चकम्।
भाषणादीनि वाक्यानि चतुष्टयमुदाहृतम्।
तत्संशयप्रमातृत्वनिश्चयानुभवार्थकृत्॥' इति। भा० प्र० ७ अ०

---

१ तथाहि—चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः। अ० ४।१३
इति गीतापद्यव्याख्यायां मधुसूदनसरस्वतीभिः उक्तम्।
शरीरारंभकगुणवैषम्यादपि न सर्वे समानस्वभावा इत्याह। चातुर्वर्ण्यमिति।

कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः। इति पद्यव्याख्यानावसरे तेषां चतुर्णामपि वर्णानां कर्माणि प्रकर्षेण विभवतानि इतरेतरविभागेन व्यवस्थितानि। कैः स्वभावप्रभवैर्गुणैः सत्वादिभिः। तथाहि—ब्राह्मणस्वभावस्य सत्वगुण एव प्रभवः प्रशान्तत्वात्। क्षत्रियस्वभावस्य सत्वोपसर्जनं रजः ईश्वरस्वभावत्वात्। वैश्यस्वभावस्य तम उपसर्जनं रजः ईहास्वभावत्वात्। शूद्रस्वभावस्य रजउपसर्जनं तमो मूढस्वभावत्वात्। अथवा मायायाः प्रकृतिः स्वभावः तत उपादानात्प्रभवो येषां तैः। प्राग्भवीयः संस्कारः वर्तमाने भवे स्वफलाभिमुखत्वेनाभिव्यक्तः स्वभावः स निमित्तत्वेन प्रभवो येषाम्। इति १८ अ० श्लो० ४१

वैदिकसिद्धान्तसंरक्षिणी

गीतायां स्वभाव इति यदुपवर्णितं तदर्थः प्रकृतिरित्येव मन्तव्यम्। तदुक्तं जयमङ्गलायाम् नीतिसारव्याख्यायाम् – १९ सर्गे। तस्मात् वर्णाश्रमिणां भारतीयानां प्रकृतिरियं यत् स्वस्वधर्मंपरिपालनमिति। तन्मर्यादामतिक्रम्य लोलुपत्वं, कामक्रोधवत्त्वं च वंशपरंपरायां भोजनविहारप्रभृतिषु शैथिल्यात्, कर्मणामशुद्धिप्रसङ्गात्, दुष्टसंसर्गात्, आहारप्रातिलोम्यात् व्यसनाभिभूतत्वाद्वा यथा यथा विकृतिस्तेषु यदाप्रभृति संभूता। तथा तथा तदाप्रभृति उपर्युक्तो ह्रासः समभूत्। यथा शरीरे रोगो न प्रकृतिगतो धर्मः अपि तु मिथ्याहारविहाराभ्यां दोषधातुमलानां वैषम्यं यदा भवति तदा तेन रोगाजायन्ते। पथ्यमश्नतो रोगो न भवति। तथैव कामक्रोधादयो मर्यादामतिक्रम्य सेविताः विकृताः संभवन्ति रोगोत्पत्तिवत्।

विकृतितः आत्मनः संरक्षणार्थं तत्प्रागभावपालनार्थं तन्निरसनार्थं वा वर्णाश्रमधर्माः औषधमिव यदि सेव्यन्ते तर्हि एते शरीरे मनसि शुचित्वमासाद्य विकृतिमपसारयन्ति। सुख मुत्पाद्य स्वां प्रकृतिं च प्रापयन्ति। इति स्थितम्। अथ कामक्रोधादीनां विकृतित्वं रोगकारणत्वं च कथं भवति इत्यत्र प्रमाणं सुश्रुते द्रष्टव्यम्।[१]

जयमङ्गलाक्रोडपत्रम्

अत्र हि संशयप्रमातृत्वनिश्चयानुभवपदेन चित्तबुद्ध्यहङ्कारमनोरूपाण्यन्तःकरणानि बोध्यानि। संशयादिवृत्तिभेदेन अन्तःकरणभेदः उक्तः तस्मिन् विषये चित्तमनसोः संशयनिश्चयवृत्तिविषये वेदान्तशास्त्रस्य मतभेदो दृश्यते। स च स्वस्व शास्त्रानुसारी पन्थाः इति ज्ञातव्यम्। एतावता ग्रन्थेन पूर्वप्रतिज्ञानिर्देशानुसारेण

---

१ चतुर्विधाः आगन्तुकाःशारीरा मानसाः स्वाभाविकाश्चेति। तेषामागन्तवोऽभिघातनिमित्ताः। शारीरा अन्नपानमूला वातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः। मानसास्तु क्रोधशोकभयहर्षविषादेर्ष्याऽभ्यसूयादैन्यमात्सर्यकामलोभप्रभृतयः इच्छाद्वेषभेदैर्भवन्ति। इति। (सुश्रुतम् विरुद्ध संयोगाध्ययः)।

क्रोधस्ताडनशीलता च बहुलं दुःखं सुखेच्छाधिका।
दम्भः कामुकताप्यलीकवचनं चाधीरता दुष्कृतिः॥
ऐश्वर्यादभिमानिताऽतिशयिताऽऽनन्दोधिकश्चाटनम्।
प्रख्याता हि रजोगुणेन सहितस्यैते गुणाश्चेतसः॥
नास्तिक्यं सुविषण्णताऽतिशयिवाऽऽलस्यं च दुष्टा मतिः।
प्रीतिर्निन्दितशर्मकर्मणि सदा निद्रालुताहर्णिशम्।
अज्ञानं किल सर्वतोऽपि सततं क्रोधान्धता मूढता।
प्रख्याता हि तमोगुणेन सहितस्यैते गुणाश्चेतसः॥ —भा० प्रकाशे

नैदिकसिद्धान्तसंरच्चिणी

ये किल वर्णाश्रमधर्मात्तदनुयायित्वाद्वा बहिर्मुखाः प्रकृत्या वर्तन्ते ते बाह्याः कामक्रोधादिप्रवृत्तयो भवन्तु कामम् न तावता हानिः। तेषां कृते वर्णाश्रमधर्मों न कर्तव्यत्वेनोच्यते शास्त्रेषु। तद् दृष्टान्तेन वर्णाश्रमेषु समाजान्तरस्थ कामदिपकृति सादृश्यं न मन्तव्यम्। अतएव वर्णाश्रममर्यादा भारतीयैरेव पालयितुं शक्येति। स्थितम्।

"क्रिया हि द्रव्यं विनयति नाद्रव्यम्" इत्युक्तं मूले। तस्यायंभावः-यद्धि सुवर्णं-नास्ति तत् खनितो निष्कास्य संस्क्रियेत यदि केनचित्, तर्हि किं तत् सुवर्णगुणवत्वेन भूयेत तथैव वर्णाश्रमधर्मस्य वर्णाश्रमिणांच संबन्धे ज्ञेयम्। तदनुबन्धेनैव शास्त्रं वर्णाश्रमिणां कृते धर्मं विदधाति। यतः शास्त्रं उत्तम संस्कारो वा विकृतिं अपसारयितुं

जयमङ्गलाक्रोडपत्रम्

षट्त्रिंशत्तत्वनि निरूपितानि भूतादिवस्तूनां सर्वैरेव ज्ञातत्वात्। अनेन ग्रन्थेनेदं स्फुटीभवति। यत् मनःप्रभृतितत्वानि शरीरारम्भकबीजद्रव्यस्य परिणामभूतानि इति। तेन "यत्सत्वपरिणामि स्यात् द्रव्यं तन्मन उच्यते" इत्यादीनि भावप्रकाशनोक्त-पद्यानि प्रथमाध्याये व्याख्यातानि भवन्ति। एतत्पद्यस्थद्रव्यपदेन शरीरारंभकस्य बोजभूतस्य तत्वस्य ग्रहणात्। ईश्वरे तु तदद्रव्याभावेऽपि यन्मनः तिष्ठति, तदिच्छा-रूपं बोध्यम्। तेन रजःपरिणामि द्रव्यं, तमःपरिणामि द्रव्यं च स्फुटं भवति। तस्मात् सत्वात्मकस्य ज्ञानस्याऽपि एतन्मते शरीरारंभकबीजद्रव्यरूपत्वमेव स्वीक्रियते। ज्ञानस्य द्रव्यरूपत्वं तु सत्वस्वरूपविचारप्रसङ्गे—

यत् सत्वपरिणामि स्यात्

इइत्यादिपद्यनिरूपणप्रसङ्गे प्राङ्गनिरूपितमस्ति। पृ० १६।१९

किञ्च-दहराकाशमध्यस्थ सहस्रदलभोमिते।

प्रस्फुरत्कर्णिकाश्लिष्टकर्णिके पङ्कजोदरे ॥'

इति पद्यव्याख्यानावसरे ज्ञानतन्तुपदाभिधेयाभिः "नर्वससिस्टम्" शिराभिरा-वेष्टिते मस्तके वर्तमानाः तन्तवः केशरस्थानीयाः तथा आत्मा च तत्रैव स्थितः, तद्वारेव प्रेरणं संवेदनं च भवतीति प्रागभिहितप्रकारेण। स्थूलदृष्टया च विचार्यमाणे 'स्यामिति' सङ्कल्पात्मकं मनः आयुर्वेदोपदिष्टसंस्कारस्वरूपं तत्तत्तन्तुषु वर्तते इति ज्ञानस्य द्रव्यरूपत्वं साधयितुं शक्यते। एवमेव उपासनादृष्टया मनः प्राणवचसां सोम-सूर्याग्निरूपाणां स्वातन्त्र्येण कार्यकरणे जीवत्वम् ईश्वरकार्यकरणेतु देवत्वं व्यव-स्थितमस्ति। इत्याद्यपि प्राक् प्रपञ्चितमेत्रव समन्वैति अपि च सोयमीशसङ्कल्पः संसारिखु अहन्त्वेन परिणम्य प्रवर्तते। अतः शरीरपरिमाणकं मनः इत्यपि सिद्धं भवति। तदुक्तम्—

"संसारिणामहन्त्वेन परिणम्य प्रवर्तते।' इति

यद्यप्यत्र मनस्त्वेन परिणम्येति पाठः "प्रकाशितपुस्तकेऽस्ति। परन्तु सः न

वैदिकसिद्धान्तसंरक्षिणी

समर्थो न तु प्रकृतिमिति। तस्मात् सीमातिक्रान्ता अर्थकामादयःवर्णाश्रमिणां शरीरस्य मनसो वा यदि प्रकृतयः स्युः तदा धर्मानुष्ठान-वैयर्थ्यात् शास्त्र विसंवादि भवेत्। तन्न दृश्यते इति तत्संवादित्वादेव अद्ययावत् न शास्त्रवैयर्थ्यम्। एतेन सर्वथा काम-क्रोधादयः विकृतयस्सदा परिहरणीया इति मन्येत कश्चित्। तदपि न साधु मन्तव्यम्। यतो रोगो हि मिथ्यायोगेन यथा भवति तथा अयोगेन अपि भवति अयोगोऽपि विकृति-रेव। अतः तत्तत्सीमानमनतिक्रम्य कामक्रोधादीनां व्यभिचारिभावसाचिव्येन स्वीकरणं न दोषाय। युक्त्या सेविताः कामादयः प्रकृतात्रेवान्तर्भूताः न वर्णाश्रमधर्मात् बहिर्भूताः इति। सच सोमा प्राकृतिकः आरोग्यकर. रसायनसदृशः लोकस्याविक्षोभ-करश्च कियदवधिक इति न सर्वज्ञशास्त्रमन्तरा कश्चित् निर्वक्तुं शक्नोति किन्तु शास्त्र-मेव। तच्च न विकृतिं कारयितुं अभिजानाति। अपि तु प्रकृतिमनुसृत्य शास्यान् प्रेरयति इति बोध्यम्। अत्र प्राकृतिकरूपेण आहारविहारादीनामायत्तीकरणे॰ नैहिकसुखमात्रं तत्फलं अपितु ब्रह्मणः निरतिशयसुखस्यानावरणनुभवोऽपि फलान्तरं भवतीत्यपि व्यक्तम्।

जयमङ्गलाक्रोडपत्रम्

युक्तः, शिष्टैः अपरिग्रहात्। अहन्त्वेन परिणतः द्रव्यभागः शरीरे प्रभापदेन बोधितत्वात् तेजोरूपः अनुमन्तव्यः। तदुक्तम्—

'यदादित्यगतं तेजो जगत् भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्।' इति। (भ०गी०अ०१०)

अत्र स्थितेन तत्तेज इति पदोपादानेन ज्ञानतत्वस्य ब्रह्मणस्तेज एव आदित्ये अस्ति इति ध्वन्यते।[1]

---

१. स्पष्टं चैतत् शाङ्करभाष्ये मधुसूदनीटीकायां च। ''यदादित्यगत-मादित्याश्रयं किं तत्तेजो दीप्तिः प्रकाशो जगद् भासयते प्रकाशयत्यखिलं समस्तम्। यच्चन्द्रमसि शशभृति तेजोऽवभासकं वर्तते। यच्चाग्नौ हुतवहे तत्तेजो विद्धि विजा-नीहि। मामकं मदीयं मम विष्णोस्तज्ज्योतिः। अथवा यदादित्यगतं तेजश्चैतन्यात्मकं ज्योतिर्यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं मदीयं मम विष्णोस्तज्ज्योतिः। ननु स्थावरेषु जङ्गमेषु च तत्समानं चैतन्यात्मकं ज्योतिस्तत्र कथमिदं विशेषणं 'यदादित्यगतमि'त्यादि। नैष दोषः, सत्त्वाधिक्यादाधिक्योपपत्तेः। आदित्यादिषु हि सत्त्वमत्यन्तप्रकाशमत्यन्तभास्वरमतस्तत्रैवाविस्तरां ज्योतिरिति तद्विशिष्यते, न तु तत्रैव तदधिकमिति।

'यथा हि लोके तुल्येऽपि मुखसंस्थाने न काष्ठकुड्यादौ मुखमाविर्भवति आदर्शादौ तु स्वच्छे स्वच्छतरे च तारतम्येन आविर्भवति तद्वत्।—

(शा० भा० अ० १५, श्लो० १२)—

मधुसूदनी—

'न तत्र सूर्यो भाति, न चन्द्रतारकम् नेमा विद्युतो भान्ति, कुतोऽयमग्निः ?' इति श्रुत्यर्थं प्राग् व्याख्यातम् न तद् भासयते' सूर्य' इत्यादिना। "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति श्रुत्यर्थमनेन व्याख्यायते। 'यदाऽऽदित्यगतं तेजश्चैतन्यात्मकं ज्योतिर्यच्चन्द्रमसि यच्चाऽग्नौ स्थितं तेजोजगदखिलमवभासयते, तत्तेजो मामकं मदीयं विद्धि। यद्यपि स्थावर-जङ्गमेषु समानं चैतन्यात्मकं ज्योतिस्तथाऽपि सत्त्वोत्कर्षेणाऽऽदित्यदीनामुत्कर्षात् तत्रैवाविस्तरां चैतन्यज्योतिरिति तैर्विशिष्यते।'यदाऽऽदित्यगतमि'त्यादि। यथा तुल्येऽपि मुखसन्निधाने काष्ठकुड्यादौ न मुखमाविर्भवति, आदर्शादौ च स्वच्छे स्वच्छतरे च तारतम्येनाविर्भवति, तद्वत्। 'यदाऽऽदित्यगतं तेज' इत्युक्त्वा पुनस्तत्तेजो विद्धि मामकमि'ति तेजोग्रहणाद् यदाऽऽदित्यादिगतं तेजः प्रकाशः परप्रकाशसमर्थं सितभास्वरं रूपं जगदखिलं रूपवद् वस्तु अवभासयते, एवं यच्चन्द्रमसि यच्चाग्नौ जगदवभासकं तेजः सन्मामकं विध्दी' ति। विभूतिकथनाय द्वितियोऽप्यर्थो द्रष्टव्यः। अन्यथा तन्मामकं विध्दि' इत्येतावद् ब्रूयात्, तेजोग्रहणमन्तरेणैवेति भावः।

तथा तैत्तिरीब्राह्मणे (तै० ब्रा० २-२-१०)

"इन्द्रः प्रजापतिगतं हरः तत्समीपे आगत्य याचितवान्। तदेव हरः रूप्यं भूत्वा किरीटस्वरूपेण इन्द्रस्य मस्तके अतिष्ठत् इति वर्णनमस्ति। तदपि तेजोरूपमेव। स्पष्टं चैतत् उक्तब्राह्मणे—भाष्यादौः (४७ पृ०) "अथ वा इदं प्रजापतौ हर आसोत्। यदस्मिन्नादित्ये। तदेनमब्रवीत्। एतन्मे प्रयच्छ अथाहमेतेषां देवानामधिपतिर्भविष्यामीति। कोऽहमस्यामित्यब्रवीत्, यदेव ब्रवीषीति को ह वै नाम प्रजापतिः। य एवं वेद। विदुरेनं नाम्ना। तदस्मै रुक्मं कृत्वा प्रत्यम्मुञ्चत्। ततो वा इन्द्रोदेवानामधिपतिरभवत्"।

अथ प्रजाप्रतेरग्रे स्वकीयतिरस्करणादूर्ध्वमेवं वृत्तान्त आसीत्। यदिदमिदानीमस्मिन्नादित्ये सन्तापकं तेजो दृश्यते तदिदमस्मिन्काले प्रजापतावासोत्। यादृश आदित्यो अन्धकारादिभर्त्सने समर्थस्तथा प्रजापतिरपि दुष्टशिक्षायां समर्थ आसीत् तत्तेज उद्दिश्येन्द्र एनं प्रजापतिमब्रवीत्। 'हे प्रजापते, एतत्तेजो मह्यं प्रयच्छ। अथाहं तेजस्वी सन्नेतेषां देवानामधिपतिर्भविष्यामो'ति। ततः प्रजापतिरिदमब्रवीत् एतत्तेजस्तुभ्यं प्रदाय कोऽहं स्यामक्षमं मां को वा गणयेदित्यभिप्रायः। अथेन्द्रः प्रजापतिं प्रत्यब्रवीत्—'कोहमित्यत्रक इत्यनेन शब्देन यदेतत् ब्रवीषीत्ये तदेव त्वम्।' (भाष्ये)

एवं जगदीशादिभिः सुवर्णस्य तैजसत्वं, 'अग्नेरपत्यं हिरण्यमि'ति श्रुत्यैव प्रतिपादितमस्ति। तस्मात् ज्ञानस्य तेजोरूपत्वं सिद्धम्।

वैदिकसिद्धान्तसंरक्षिणी

वेदस्य निर्णायकत्वम्

अथ उपकारकत्वनिरुपणप्रसङ्गात् वेदस्य अपरोऽपि महानुपकारः स्मर्यते सं न विस्मरणार्हः। तथाहि-भारते अनेकेषु संप्रदायेषु सत्स्वपि तान् उपजीवयन् सर्वान् एकसूत्रे अयं निवध्नाति। यथा अत्रत्यानां संप्रदायानां इदं अपूर्वं वैशिष्टयम् यत् सर्वैरपि स्वात्मा वेदाय त्रयीस्वरूपनिरूपणे समर्पितः। एते स्वस्वोपासनायां दाढर्यार्थं यथाकथमपि पारस्परिकं मतिभेदं उररीकृत्यापि स्वकीयां इष्टदेवतामेव सर्वापेक्षया मुख्यत्वेन भजन्ति। नैतिके तु कार्ये वैदिकमेव पन्थानमवलंबन्ते। अतएव नीतिशास्त्रस्यास्य

जयमङ्गलाक्रोडपत्रम्

इदमेव ज्ञानतत्वं मातापितृभ्यां प्राप्तं सत्वपरिणामिभूतमोजोरूपतया शरीरे तिष्ठति। तस्य किरणाः प्रभारूपाः अराशब्देन ध्वन्यन्ते। तत्संपन्नानां दर्शनं स्पर्शनं, समस्तरोगशमने कारणं भवति, इति आधुनिकैरपि स्वीक्रियते। अत एव मस्तके वरदहस्तस्पर्शनमात्रेण शिष्ये विद्यास्फूर्तिः अभूत्, इति महाभारतोक्तेतिहास उपपन्नो भवति। फ्रेञ्चन्यायालये अस्य विषयस्य स्वीकृतत्वात् नास्ति अत्र सन्देहावसरः। एवमेव प्राणवाचावपि रजस्तमःपरिणामिभूते व्याख्याते इत्यलं ज्ञानस्वरूपविचारस्य प्रसक्तानुप्रसक्तचिन्तया।

अत्र त्रयीप्रमाणेन प्रमितं लोकोपकारकत्वं जीवस्य नीतिलक्षणानुसारेण प्रत्यक्षतया प्रत्यभिज्ञायमानं कथं भवेदित्यंशः एतावत्पर्यन्तं न समाहितः तत्समाधानाय षट्त्रिंशतत्त्वस्वरूपमभिधाय एतत्प्रकरणान्तर्गतः भावप्रकाशनोक्तः अग्रिमो भागः प्रस्तूयते।

ईदृग्विलक्षणोजन्तुः जरायुग्रस्तदेहवान्।
कालपाकेन पूर्णाङ्गो जायतेऽयमवाङ्मुखः। भावः प्र० अ० ७

अस्यायं भावः—यादृशेन संस्कारेण संस्कृतं शरीरपिण्डं गर्भ एवं मातापितृभ्यां प्राप्तं भवति तस्यानन्ततरं परिवर्तनमशक्यम्। तदुक्तं सुश्रुते—

'शुक्रशोणितसंयोगे यो भवेद् दोष उत्कटः।
प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु। इति। (सुश्रुतम्)

अत्र भावप्रकाशनपद्ये यस्य जीवस्य वर्णनं कृतं स जीवः पूर्वमुपवर्णितात् लिङ्गशरीरे वर्तमानात् जीवात् अपरः स्थूलशरीरविशिष्टो ज्ञेयः। तत्र स्थितस्य ज्ञानतत्वस्य नादरूपतया परिचयं प्रदर्शयिष्माणः नादस्वरूपमुपवर्णयितुमाह—

'षण्णवत्यङ्गुलायामं सर्वेषां च शरीरिणाम्।
शरीरं तस्य मध्यःस्यादाधारः कन्दसंज्ञितः॥
वलयत्रितयाकारः सोमसूर्याग्निमण्डलैः।
वह्नेः शिखा तस्य मध्ये नीपान्तःकेसराकृतिः॥
परा प्रकृतिरेषा स्यात् अम्बिकेत्यपपरे विदुः'। इति॥

वैदिकसिद्धान्तसंरक्षिणी

मूलरचयिता वैदिको ब्राह्मणः कौटिल्यः। तट्टीकाकर्तारश्च वैदिका एवं जैना बौद्धाः अपि वर्तन्ते। यथा भट्टस्वामि-शङ्करार्य-सोमदेव-योग्घमभिक्षुप्रभमतिप्रभृतयः। एते सर्वेऽपि एकस्वरेण वर्णाश्रमधर्मं लोकयात्रोपकारकत्वेन मन्यन्ते। तथाविधसिद्धान्ताभावेन पाश्चात्यदेशे प्रो० श्री पियाटमतानुसारेण सत्प्रतिपक्षितत्वं संपन्नं, भारते तु मतभेदेषु सत्स्वपि निर्णायकत्वं अपौरुषेय्यां त्रय्यां स्वीकृतं समस्ति। अतोऽत्र न विवादस्य सत्प्रतिपक्षस्यवाऽवसरः। तदुक्तं भारविणा।

जयमङ्गलाक्रोडपत्रम्

अर्थात् जीवस्य इदं स्थूलं शरीरं षण्णवत्यङ्गुलपरिमितं वर्तते। तस्य यः मध्यभागः सः वलयत्रयेण सोमसूर्याग्निमण्डलेन च अधिष्ठितोऽस्ति। तस्य मध्ये वह्नेः शिखा ऊर्ध्वमुत्तिष्ठमाना प्रज्वलति। तस्य अयं भावः—यत् मध्यमा या सुषुम्नानाडी तन्मार्गेण तर्कस्य सञ्चारात् तत्र तर्करूपः अग्निः प्रज्वलति। तदिदमूर्ध्वप्रज्वलनात्मकं ज्ञानं वह्निशिखापदेन जडवादिनां बोधार्थमुच्यते। चेतनवादिनां मतेन तु सा ऊर्ध्वमुत्तिष्ठमाना वह्निशिखा अम्बिकेति भाषया भाष्यते।

नीवारशूकवततन्वी पीता भास्वत्यणूमपा—
'अस्याः शिखाया मध्ये परमात्मा व्यवस्थितः।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमस्वराट्॥' (ना० उ०)
'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्।' गीता०

'भगवानग्निः ईश्वरोऽन्नस्य पाचकः।' चरक १. इति

उपनिषदि अस्या वन्हि शिखायाः ज्ञानमयत्वेन प्रतिपादनात् सोऽयमुदर्यः शिवरूपतयोपवर्णितोऽग्निः चेतनात्मकः निरूपितः सः विद्युद्रूपः सन् तत्र तत्र शरीरान्तः प्राणपानादिवायून् सञ्चारयन् नादं समुत्पादयति। इति दर्शयितुं प्राणापानादिवायुभेदं तत्कार्याणि च निरूपयति।

"बहिस्तिर्यक् चरन्वायुः शरीरान्तः शिवाज्ञया।
प्राणादिभेदात् पञ्चात्मा शरीरं'व्याप्य तिष्ठति॥
येन प्राणिति सर्वत्र स प्राणो मूर्धनि स्थितः॥
उरः कण्ठचरो बुद्धिहृदयेन्द्रियचित्तधृक्-
ष्ठीवनक्षवथूद्गारनिःश्वासान्तः (न्न) प्रवेशकृत्!
उरः स्थानमुदानस्य नासानाभिगलांश्चरेत्।
वाक्प्रवृत्तिप्रयत्नोर्जा(र्ज)बलवर्णस्मृतिप्रदः॥
गत्यवक्षेपणोत्क्षेप निमेषोन्मेषणादिकृत्।
प्रायः सर्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम्॥"

वैदिकसिद्धान्तसंरक्षिणो

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ।। इति

जयमङ्गलाक्रोडपत्रम्

समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वदा ।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति ।।
अपानोऽपानगः श्रोणि-बस्ति मेढ्रोरुगोचरः ।
शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रामणक्रियः ।।' इति ।

एतेषु पद्येषु प्राणः मूर्धनि स्थितः इत्युक्तम् । अतः उपरिवाहित्वात् तस्य ज्वलनशीलत्वमुष्णत्वं च भाति । 'निश्वासान्तःप्रवेशकृत् इति पाठस्थाने 'निश्वासान्नप्रवेशकृत् पाठो बोध्यः । उरःस्थानमुदानवायोरधिष्ठानभूतं तत्त्वम् । यस्य वाक्प्रवृत्त्यादीनि कर्माण्युक्तानि । अत्र वाक्पदेन पूर्वोक्तं तमः परिणामि द्रव्यं बोध्यम्। तदेव विश्वजनकमप्यस्तीति, "उक्ता क्रोधादिभिर्भावै स्तत्फला व्यभिचारिणी" इति पद्यनिरूपणप्रसङ्गे प्रागभिहितमस्ति । तथा 'वाक्प्रवृत्ती'ति पद्ये 'ऊर्जा' इति पाठस्थाने 'उर्ज' इति पाठो युक्तो वर्तते । उदानवायुस्तु सुषुम्नामार्गेण अशुद्धरक्तवाहिन्या नीलवर्णया नाड्या ओजः प्रवाहयितुं यदा पूर्णतया समर्थो भवति, तदा ऊध्वरेतस्कत्वं बलस्मृत्यादिकञ्च संभवति । एव "मन्नं गृहणाति पचतीत्यादिना कोष्ठगते अग्नौ विद्युत्स्वभावयोः ग्रहणविक्षेपयोः 'दर्शनात् अयमग्निः विद्युदन्तर्भूतोऽस्ति इति वक्तुं शक्यते । अपानः अधोमार्गगामी मलादिगतिप्रेरकः शैत्यमनुभावयति, इति प्राणादिवायूनां विशेषोऽवगन्तव्यः । शेषं निगदव्याख्यातम् ।

अथ स्थूलशरीरस्य संरक्षणं सर्वत्र ओजसः प्रसरणेन भवतीति ओजः जीवनस्य जीवातुभूतं तत्त्वमस्तीति दर्शयितुमाह ।—

'दश जीवनधामानि शिरोरसनबन्धनम् ।
कण्ठोष्ठहृदयं नाभिः बस्ति-शुक्ले गुदौजसि ।।
दशः स्थूलशिराहृत्स्थाः ताः सर्वाः सर्वतो वपुः ।
रसात्मकं वहन्त्योजः तन्निबद्धं हि चेष्टितम् ।।' इति ।

अर्थात् जीवनस्याधारस्थानानि दश वर्तन्ते शिरः रसनबन्धनं कण्ठः, ओष्ठं स्रगिति पाठान्तरे, हृदयं, नाभिः, शुक्रम् बस्तिः, ओजः इति । एतेषु जीवनधामसु ओजः प्रधानम् तदधीनत्वात् चेष्टितस्य इति तन्निबद्धं हि चेष्टितमिति वर्णनात् ।

अत्र तन्निबद्धं यथेप्सितमिति पाठान्तर'मस्ति । अस्यायं भावः यत् ओजसि एतावत्सामर्थ्यमस्ति यदभिलष्यते तत्सर्वमोजसा प्राप्तुं शक्यते । अत एव ओजोवाहिन्यः नाड्यः न वेध्याः' । इति आयुर्वेदसिद्धान्तः ।

इदमोजः हृत्स्थाभिः दशस्थूलशिराभिः सर्वतः वायुः प्रवहन् धारयति । सुषुम्नया नाड्या यदा तदोजः प्रवहेत् तदा तदेव ओजोमलतत्वं ज्ञानरूपं सत् वन्हि-

वैदिकसिद्धान्तसंरक्षिणी

एतद्विषये अपरमपि विदुषां चरितं उपस्थाप्यते तद्यथा—अस्माकं शास्त्रेषु कश्चित् वचनविरोधपरिहाराय मीमांसान्यायं समन्वेतुं तर्कंसुपस्थापयति अपरश्च तदीयतर्के

जयमङ्गलाक्रोडपत्रम्

शिखास्वरूपं भवतीतिप्राङ्निरूपितम्। ओजसः वह्नेः शिखा उपरि प्रवहन्ती कथं नादं समुत्पादयतीति प्रदर्शयितुमाह।

'भिद्यन्ते तास्ततः सप्त शतान्यासां भवन्ति तु।
शिरा जालन्धरा नाम तिस्रश्चाभ्यन्तराश्रयाः॥
इडा च पिङ्गला चेति सुषुम्नाचेति नामतः।
सुषुम्ना मध्यमा नाडी शिखां वह्नेः समाश्रिता॥
शिखा प्राणेन संसृष्टा नादाख्यां लभते स्फुटम्।
सुषुम्नावर्त्मनैवोर्ध्वं याति व्योमाम्वुजावधिः॥
योगिनान्नादरूपेण स्वानुभूतिविधायिनी।
इतरेषां कलारूपान् वर्णान् विसृजति क्रमात्'॥

इमान्येव पद्यानि वाग्भटेऽपि क्रमवैपरीत्येन उक्तानि वर्तन्ते। तत्र सुषुम्नादयः शिराः नादजनकस्योजसः प्रवाहिका' इति नोक्तम्। अत्र तूक्तम्। इत्ययं ग्रन्थस्यास्य विशेषो वोध्यः।

अत्रेदं बोध्यं। यत् इडाप्रभृतयः जालन्धरासंज्ञिकाः याः नाड्यः वर्तन्ते, तासु सुषुम्नामार्गेण वायुसहकारेण ऊर्ध्वंगामिनः वह्नेर्या शिखा ज्वलनात्मिका सैव ज्ञानम्। तन्नादश्रवणे सञ्जाते कुण्डलिनी उत्थिता भवति इति योगिनो वदन्ति।

अत्र ओजसः प्रवहणशीलस्य ऊर्ध्वगामिनः वन्ह्यात्मकज्ञानस्वरूपत्वं यदुक्तं तत्र प्रमाणं चरके द्रष्टव्यम्—

'हृद्यं तत्स्यात् यदौजस्यं स्रोतसां संप्रसाधनम्।
तत्तद् यत्नेन संसेव्यं प्रशमो ज्ञानमेव च॥ इति

एवञ्च जीवस्य तत्संबद्धशरीरस्य च उपर्युक्तरीत्या स्वरूपेऽवगते सति इदं स्फुटं भवति यत् सर्वमेव जगत् शिवशक्त्योः क्रमशः मायादिसप्तावरणेन आवृतयोः सतोः तादात्म्यमेव जडचेतनभेदद्वैविध्येन भण्यते। तत्र नादरूपेण ओजः मातृपितृ-शरीरात् संप्राप्तं शिराद्वारा तत्तच्छरीरेषु सर्वत्र प्रसरति इत्यपि सिद्धमेव। तथा—हृद्यं तत् स्यात्'इति चरकवाक्येन ओजसः चेतनशरीरेषु वर्तमानस्य ज्ञान-रूपत्वमपि साधितमस्ति। तदोजोरूपं ज्ञानं प्रमाणप्रमेययोः बाधितं सत् अप्रामाण्या-शङ्कादिकवलितं यदा भवति, तदा तस्य ज्ञानस्य अस्थिरत्वं अभिनिवेशानात्मकत्वं च सहजतएवापादयितुं शक्यते। अतः ओजसस्थैर्यार्थं ओजोरूपस्य ज्ञानस्यापि अबाधितत्वमपेक्ष्यते। अवाधितत्वं च यत्र वस्तुनि प्रत्यक्षादिप्रमाणत्रयेण प्रमितत्वं

वैदिकसिद्धान्तसंरक्षिणी

दोषं मत्वा स्वीयं मतं यद्युपस्थापयति तत् युक्तियुक्तंचेत् तन्मतं सर्वे तत्वपक्षपातिनः स्वीकुर्ववन्ति ।अनुतिष्ठन्ति च तथैव वेदार्थम् । तस्मात् पारस्परिकमतभेदसत्वेपि वेदस्यैव निर्णायकत्वात् भारते वर्तमानानां समस्तसत्संप्रदायानां विदुषां मतैक्यं

जयमङ्गलाक्रोडपत्रम्

भवति, तद्वस्तुविषयकज्ञानस्य कालत्रये बाधः बृहस्पतिनाऽपि कर्तुमशक्यः । अतः यत्र यस्मिन् यस्मिन्नंशे प्रमाणत्रयप्रमितत्वं भवति, तस्मिन्तस्मिन्नंशे यज्ज्ञानमुत्पद्यते तदपि अबाधितत्वात् स्थिरमेव । इत्यत्र न काऽपि विप्रतिपत्तिः । तस्मात् विवेचनदृष्ट्या सचेतस्केन पुरुषेण प्रमाणत्रयप्रमितमेव वस्तु सदा आलम्बनीयम् । तच्च वस्तु भारतीयराजनीतावस्तीति नीतिलक्षणव्याख्यानावसरे प्राक प्रपञ्चितत्वानुसारेण निर्णेतुं शक्यते । अत एव अत्र भारतीयराजनीतौ अभिनिविष्टानां व्यवहारः 'विदग्धानां व्यवहारः इत्युच्यते । तथा तेषामत्र सन्तोषोऽपि नियत एव । "अपूर्वप्रतिभानं स्यान्मतिः" इति निर्दिष्टवचननिरूपितायाः मतेश्च भारतीयराजनीतिवित्सु लाभः सुलभः । एवंविधः लाभः भारतीय-राजनीतीतरराजनीतिषु अन्वयव्यतिरेकयोः व्यभिचारदर्शनात् पूर्वपरंपराप्राप्तस्य प्रमाणभूतस्य शब्दस्य पार्ष्ठिकबलानुपलंभात् व्यवहारेषु वेदग्ध्यस्य, सन्तोषस्य मतेश्च लाभः कालत्रये ऽबाधितरूपेण स्यादिति न वक्तुं शक्यते । अतएव भारतीयराजनीतीतरराजनीत्यवलंबने पर्यन्ते मतिक्षयस्य संभावितत्वात् ज्ञानरूपस्य जीवनाधारस्य उपर्युक्तस्योजसः क्षयः संभावयितुं शक्यते । सोऽयं दोषः भारतीयराजनीतौ नास्ति तथा सति ओजसि संरक्षिते "तन्निबंद्ध यथेप्तितमिति प्राङ्निरूपितवचनबलात् ईप्सितस्य सर्वस्यापि सौलभ्यं भवतीति हेतोः विद्वद्भिः शास्त्रनुकूल्येन वर्तनशीलैः यथेच्छया सर्वमपि स्वानुकूल्येन निर्मातुं शक्यते । इत्यस्ति भारतीयराजनीतेर्महान् गुण. ।

यदा प्रभृति अस्याः भारतीय राजनीतेः उपेक्षणं विद्वत्सु संप्रवृतम् तदा प्रभृति ओजसः न्यूनत्वं तेषु समायातम् । अत एव प्राङ्निरूपितः सुषुम्नान्तर्वर्तिनादरूपेण परिणम्यमानः ऊर्ध्वगामी तेजोवेगोऽपि अतीव न्यूनतमो जातः । तस्यैवायं परिणामोऽपि अनुभूयते, यत् प्रमाणत्रयसमन्वयबलात् योगिनः ओजसो बलेन अनेकविधान् रोगान् प्रशाम्यन्तिस्म । परं तेषां रोगाणां प्रशमनमोजसः न्यूनत्वेन न कर्तुं पार्यते । एतावदेव न, अपितु साम्प्रतम् प्रत्यक्षादिप्रमाणत्रयस्याधारेण वस्तुनिर्णायकानां मननशीलानां अभाव एव सर्वत्र दृग्गोचरीभवति । यदि तथाविधाः मननशीलाः तत्र तत्र स्थाने संभवेयुः तर्हि तेषां हृदि यादृशः संस्कारः नादरूपेण जागृयात् स एव नादः समस्तानां हृदि समानाकारतयैव उद्बुध्येत । ततश्च संस्कारमहिम्ना कलारूपेण वर्णेन स एव नादः तत्र तत्र स्थानेषु अभिव्यक्तो भूत्वा सर्वत्र सन्तोषं प्रसारयेत् सर्वेषां मनःसन्तोषः प्रमाणत्रयेण प्रमिते नीतितत्वे एकस्मिन्नेव स्वीकृते सति भवति । अस्य अभावादेव नीतिमननशीलाः दुर्लभतां गताः इत्युच्यते । अस्यापि कारणं

[वर्णधर्माः]

[1]स्वधर्मो [2]ब्राह्मणस्य—अध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति;

वैदिकसिद्धान्तसंरक्षिणी

नासुलभमिति । शेषं क्रोडपत्रे प्राचीनभारतीयदृष्टिकोणे च द्रष्टव्यम् । अधिकं सूतसंहिताया भाष्ये उक्तं तत एवावगन्तव्यम् इति ।

जयमङ्गलाक्रोडपत्रम्

तत्तत्कुलस्यापेक्षानुसारेण संरक्षणाभावोऽस्ति । न हि सर्वे संस्काराः सर्वत्र समुद्बुद्धाः भवन्ति । अपि तु ते पूर्वपरंपराप्राप्ताः संस्काराः तत्तत्कुलीनेष्वैव भवन्ति । यत्र कुले संस्कारा उद्बुद्धा न दृश्यन्ते तत्रकुलेषु अपेक्षितसंस्कारप्रतिबन्धकानां दोषाणां प्रसरणाद् कुलोनत्वप्रयुक्ताः संस्काराः अभिभवस्थितिं प्राप्ताः । अतः दोषनिर्हरणं कार्यम् । शुद्धकलेषु संस्कारास्तु मातापितृद्वारा प्राप्तेन ओजसा सह पूर्वपरम्परया प्राप्ता एव वर्तन्ते इति तत्तत्कुलीनानां कृते न संस्कारप्राप्तौ परिश्रमः किन्तु केवलं इतस्ततः समागतानां दोषाणां निर्हरणं संभाव्यमानेभ्यो दोषेभ्यो वा आत्मनः संरक्षणं च कर्तव्यं भवति । तदेव त्रयीमाधारीकृत्य चतुवर्णाश्रमधर्मेण कर्तुमभिलष्यते । एवं रीत्या त्रयीधर्मस्योपकारकत्वं शब्दप्रमाणेन निर्णीतम्, कुलोनानां कृते आत्मनः संभाव्यमानदोषेभ्यः संरक्षणाय, आत्मनि सञ्जातदोषनिर्हरणाय संभवतोति ज्ञापनानन्तरं वर्णाश्रम धर्मे तत्प्रयुक्तफलोपयोगित्वं प्रत्यभिज्ञायमानं भवितुमर्हतीति सिद्धम् । कथञ्चित् यदि वयं पूर्वोक्तं त्रयीधर्मस्योपकारकत्वं विस्मृत्य "बहवो जनाः वदन्तीति" कृत्वा वर्तामहे, तर्हि लोकोक्तिपश्चाद्भावेन अस्माकं गमनं अन्धविश्वासाधायकं सत् ओजसः क्षयान्नातिरिक्तमिति मन्तव्यम् ।

श्रीमूला

वर्णधर्मं विवृणोति—**स्वधर्म** इत्यादि ।

जयमङ्गला

अतो राज्ञा लोकधर्मा ज्ञातव्या इत्यादिदर्शनार्थमाह स्वधर्म इत्यादि । अयमधिकार उत्तरत्र वर्तते । तत्र ब्राह्मणस्य यजनं दर्शपूर्णमासादि । अध्ययनं स्वाध्याय एव । दानं दक्षिणेति । एतानि कर्माणि धर्माय । याजनाध्यापनप्रतिग्रहास्त्वर्थाय एते प्रधानभूताः । अन्येऽपि धर्मशास्त्रादवगन्तव्याः एवमुत्तरत्रापि योज्यम् ।

नी० टी० १. कः कस्य स्वधर्म इति तत्प्रदर्शयन्नाह । स्वधर्म इत्यादि । धर्मशब्दोऽत्रानुष्ठाने ।
२ योगविभागश्च पृथक् प्रयोजनप्रतिपादनार्थम् ।

वैदिकसिद्धान्तसंरक्षिणी

वर्णानां धर्ममाह-स्वधर्म इति। स्वग्रहणं इतरप्रतिषेधार्थम्। धर्मः कामसूत्रानुसारेण त्रयीप्रोक्तविधिशब्दार्थप्रवर्तनाया विषये प्रवृत्तिः, तथाविधाया निवर्तनाया विषये निवृत्तिर्वा।[1]

जयमङ्गलाक्रोडपतम्

'स्वधर्म' इति—

'भारतीय संस्कृतेः स्वीयं वैशिष्टयम्'।

ननु वर्तमानसमये पूर्वसमृद्धभारतीयसंस्कृत्यपेक्षया तदितरसंस्कृतेः उन्नतिः तदन्तर्गतेषु ज्ञानरूपयस्योजसोऽपि समृद्धिः अवलोक्यते। तथा सति भारतीयसंस्कृतेः वैशिष्ट्यं अनितरसाधारणं कीदृशमस्तिन् इति चेत्, विमृश्यते। अस्याः भारतीयसंस्कृतेः वैशिष्ट्यं 'जन्मान्तर्गताः संस्कारा, धृतिः, 'प्रतिभा, एवं एतेषां गुणानां स्वाभाविकी स्थितिश्च' इति भेदेन चतुर्विधं दृश्यते। किञ्च विश्वस्मिन् यावत्यः संस्कृतयः वर्तन्ते, तावतीषु संस्कृतिषु भारतीया संस्कृतिः अतिप्राचीना, तथा पूर्वं समृद्धायाः भारतीयसंस्कृतेः ह्रासः इतरसंस्कृतिभिः कृतेनाक्रमणेन उत्तरोत्तरमभिवर्धमानो न तिरोहितः इत्यपि च निर्विवादमेव। इयमेवावस्था पाश्चात्यदेशेष्वपिहिटलरजिम्, फासिजम् मिसमेरिजम्-इत्यादि तत्तत्संस्कृतीनां समभूत्। एवंसत्यपि पाश्चात्यदेशे समुद्भूतानां संस्कृतीनां भारतीय संस्कृतेश्च एकमितिहासप्रसिद्धं महदन्तरमस्ति। यत् पाश्चात्यप्रदेशेषु अनेकाः एवंविधाः संस्कृतयः यासां समुदयो ह्रासञ्च समभूताम्, ह्रासानन्तरं ताः संस्कृतयः कुत्र सन्तीति वक्तुमपि अशक्यप्रायतां गतमस्ति। भारतीयसंस्कृतिस्तु पूर्वं समृद्धा सती मध्ये क्षयं यातेव समभूदिति भासमानाऽपि अद्यावधि स्वस्यास्तित्वं स्थापयन्ती चकास्ते इति। अयं तु अन्यो विषयः यत् प्रचारकाणां न्यूनतया इतरसंसर्गेण च भारतीयसंस्कृतिविषये समुद्भूताभिः शङ्काभिः अस्याः अस्तित्वं अतीव स्वल्पपरिमाणतया लोकेषु दृश्यते इति। तावन्मात्रेण भारतीयसंस्कृतिः विनष्टा इति तु वक्तुं न शक्यते। पुनः विवेकद्वारा तर्कसाहा-

---

१ तदुक्तम्—कामसूत्रे अलौकिकत्वाददृष्टार्थत्वादप्रवृत्तानां यज्ञादीनां शास्त्रात्प्रवर्तनं लौकिकत्वात् दृष्टार्थत्वाच्च प्रवृत्तेभ्यः मांसभक्षणादिभ्यः शास्त्रादेव निवारणं धर्मः। इति। का०२।७ टी० "तत्र लोके रूपादिवदविदितस्वरूपत्वादलौकिका यज्ञादयः। ननु विशिष्टद्रव्य —गुणकर्मात्मकत्वाद्विदितस्वरूपाः कथमलौकिका इत्यत आहादृष्टार्थत्वादिति। तेषामनन्तरं फलस्यादर्शनात् ये अदृष्टफलाः सन्तो लौकिकाः न ते प्रेक्षावद्भिः दृष्टसामर्थ्योषधिवत्प्रवर्त्यन्ते इत्यप्रवृत्ताः। आदिशब्दात्तपश्चरणादयः। तेषामप्रवृत्तानां शास्त्रात्पवर्तनं धर्मः। अयं प्रवृत्तिरूपो धर्मः। लौकिकत्वात् दृष्टार्थत्वादिति ये दृष्टतृप्त्यादिफलाः सन्तः लौकिकास्ते तदर्थिभिर्मृगादिमांसभक्षणवत्प्रवर्त्यन्ते। तस्मात्प्रवृत्तेभ्य श्वमांसभक्षणादिभ्यः। आदिशब्दात् सत्वाभिद्रोह परस्वादानादिभ्यः शास्त्रादेव निवारणं प्रतिषेधनं इति। अयन्निवृत्तिरूपः इति।

वैदिकसिद्धान्तसंरक्षिणी

अत्रेदं बोध्यम्—इत्युक्तम् प्रवृत्तिर्निवृत्तिश्च धर्मः कामसूत्रे वर्तते। तेन एवञ्च एकमेव गङ्गास्नानं उक्तरीत्या प्रवृत्तिविषयश्चेत् धर्मः अन्यथा अर्थः कामो वा भवति इति। मन्तव्यम्

सर्ववैदिकधर्मरक्षाणेषु ब्राह्मणत्वरक्षणं मुख्यमुक्तं भगवत्पूज्यपादैः—

ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद्वैदिको धर्मः। इति

अतो ब्राह्मणस्य धर्ममाहाध्ययनमिति। एतेषु अध्यापनयाजनप्रतिग्रहाणां धर्माणां वृत्तिरूपत्वम् इति नीतिसारे उक्तम् अत्रापि बोध्यम्। तदुक्तम्—

याजनाध्यापने शुद्धे विशुद्धाच्च प्रतिग्रहः।
वृत्तित्रयमिति प्रोक्तं मुनिभिर्ज्येष्ठवर्णिनः। इति। का० २-३।

मूले तु उपस्थितिलाघवात् परस्परसान्निध्यात् धर्मांशं तत्प्रयुक्त धर्मवृत्त्यंशञ्चानुसन्धाय अध्ययनमध्यापनमिति रीत्योक्तम्।

जयमङ्गलाक्रोडपत्तम्

य्येन शङ्कायाः निरासान्तरं सुषुप्तिगतायाः इव अस्याः संस्कृतेः अभ्युदयः पुनः बाहुल्येन लोकेषु प्रदर्शयितुं नाशक्यम्। तदुक्तम्—

'अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा।
स सदा फलशालिनीं क्रियां शरदं लोकइवावतिष्ठति॥' इति।

यदि च मूलत एव भारतीया संस्कृतिः नष्टा स्यात् तर्हि वारिणा महता प्रयत्नेन कृतेऽपि सेचने बीजाभावे अङ्कुरानुत्पत्या फलपत्रशाखादीनामनुत्पत्तिरिव भारतीय-संस्कृतेरपि अभ्युदयः कथं शक्यः स्यात्? तस्मात् भारतीयसंस्कृतेः मूलभूतं तत्त्वम् अतीव सुदृढमस्ति। ग्रीष्मकाले सुदृढदूर्वाबीजं भूमौ विलीनमिव इयं संस्कृतिः बद्धमूला तिष्ठति। पुनः विवेकजलप्राप्त्यनन्तरं दूर्वासमृद्धिरिव भारतीयसंस्कृति-समृद्धिः नाशक्या। मूलभूतं बीजं भारतीयेषु वेदादारभ्य कुलीनत्वस्य सुव्यस्थितरीत्या संरक्षणमेव नान्यत्। यन्माहात्म्यं कालिदासस्य अधोनिदिष्टेन पद्येन स्मारयितुं शक्यते। तथाहि—

'युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः।
वपुःप्रकर्षात् अजयत् गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत्॥र०वं०३स०

अर्थात् जराजीर्णस्य कृशाङ्गस्य राजपदाधिष्ठानप्रयुक्तकृतभूतिपरिश्रमस्य वृद्धस्य पितुः दिलीपस्य पुरतः स्वभावतः युगव्यायतबाहोः कपाटवक्षसः परिणद्ध-कन्धरस्य यूनः रघोः सभामुपस्थाय विनयेन उपस्थानमभूत् तस्य गर्भपिण्डेनैव सह मातृपितृद्वारा संस्कारसाचिव्यप्रयुक्तं कुलीनत्वमेव कारणमिति वक्ष्यमाणात् कालिदा-सोक्तपद्यादेव निर्णीयते—

'रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकुमन्नतत्वम्।
न कारणात् स्वात् बिभिदे कुमारः प्रवर्तितो दीप इवं प्रदीपात्॥'

जयमङ्गलाक्रोडपत्रम्

अनेन हि पद्येन पितुः मातुश्च शरीरस्य शुद्धस्य यादृशः संस्कारः यादृशी च आकृतिः, यादृशं च तेजः, यादृशं बलं च, यादृशं च उन्नतत्वं तादृशमेव तत्सर्वं विशुद्धमातापितृजन्ये बालके गर्भत एव इति वर्णितम्। इयं च मातृपितुशुद्धिः जाति-प्रधान-संस्थायां सत्यां संभवितुमर्हति। दृष्टंचैतत् अद्यावधि तत्तज्जातीयसंस्थानां रुचिभेदानुसारेण आहारविहारादिषु। यथा-द्रविडजातीयः बालकः अम्लं, महाराष्ट्र-जीतोयो मधुरम् तैलङ्गजातीयबालकः तिक्तं आस्वदते। किंवहुना? तत्तद्बालकाना-मुदर्यः अग्निरपि स्वानुकूलतया तांस्तानेव रसान्वाऽऽहरति, पचति च। अत एव तेषां तेषां रसः 'आहार' इत्युच्यते। सा चेयमाहाररुचिः पिण्डन एव उदर्याग्नौ अभिव्यज्यमाना जातिप्राधान्यादेव वर्तते। तथोक्तम् वेङ्कटाध्वरिणा लक्ष्मीसहस्र-श्लोक-संपुटे दशावतारे कल्क्यवतारेः—

अम्लेच्छां स महीं करिष्यति विभुः चान्ध्रीयजिह्वामिव।

इदमेव तत्वमभिप्रेत्य अभिनवगुप्तपादैः तत्तच्छरीरे तत्तद्संस्काराणामुदबोधे तत्तज्जातीयता कारणम् इत्यभिहितमस्ति। तथैव गीतायामपि उक्तम्—

कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः। इति[1]।

अ० १८-४१

---

१ शां० भा० ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्राह्मणक्षत्रियविशस्तेषां ब्राह्मण-क्षत्रियविशां शूद्राणां च शूद्राणामसमासकरणमेकजातित्वे सति वेदेऽनधिकारात्, हे परन्तप कर्माणि प्रवि-भक्तानीतरेतरविभागेन व्यवस्थापितानि, केन स्वभावप्रभवैर्गुणैः स्वभाव ईश्वरस्य प्रकृतिस्त्रि-गुणात्मिका माया सा प्रभवो येषां गुणानां ते स्वभावप्रभवास्तैः। शमादीनि कर्माणि प्रवि-भक्तानि ब्राह्मणादीनाम्। अथवा ब्राह्मणस्वभावस्य सत्वगुणः प्रभवः कारणं, तथा क्षत्रियस्वभावस्य सत्वोपसर्जनं रजः प्रभवः, वैश्यस्वभावस्य तमउपसर्जनं रजः प्रभवः, शूद्रस्वभावस्य रज उप-सर्जनं तमः प्रभवः, प्रशान्त्यैश्वर्येहामूढतास्वभावदर्शनाच्चतुर्णाम्। अथवा जन्मान्तरकृतसंस्कारः प्राणिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभावः स प्रभवो येषां गुणानां ते स्वभावप्रभवा गुणाः। गुणप्रादुर्भावस्य निष्कारणत्वानुपपत्तेः स्वभावः कारणमिति कारण-विशेषोपादानम्। एवं स्वभावप्रभवैः प्रकृतिप्रभवैः सत्त्वरजस्तमोभिर्गुणैः स्वकार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि। ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणदीनां शमादीनि कर्माणि, कथमुच्यते सत्वादिगुणप्रविभक्तानीति। नैष दोषः। शास्त्रेणाऽपि ब्राह्मणदीनां सत्वादिगुणविशेषापेक्षयैव शमादीनि कर्माणि न गुणानपेक्षयैवेति शास्त्रप्रविभक्तान्यपि कर्माणि गुणप्रविभक्तानीत्युच्यन्ते।

श्रीधरी—ननु च यथैवं सर्वमपि च क्रियाकारकफलादिकं प्राणिजातं च त्रिगुणात्मक-मेव। कथं तर्हि अस्य मोक्ष इत्यपेक्षायां स्वस्वाधिकारविहितैः कर्मभिः परमेश्वराराधनात्-तत्प्रसादलब्धज्ञानेनेत्येवं सर्वगीतार्थसारं सङ्गृह्य प्रदर्शयितुं प्रकरणान्तरमारभते—'हे परन्तप शत्रुतापन ब्राह्मणानां क्षत्रियाणां विशां शूद्राणां च कर्माणि प्रविभक्तानि प्रकर्षेण विभागतो—

जयमङ्गलाक्रोडपत्रम्

एतेन टिपण्ण्युक्तभाष्यादिवचनप्रामाण्यात् तेषां तेषां संस्काराणामभिव्यञ्जने ब्राह्मणत्वादिकमभिव्यञ्जकमस्तीति सिद्धम्। इदमेव जातिमर्यादया स्थितस्य भारतीयसंस्कृतिमतः कुलीनत्वप्रयुक्तं साभिनिवेशं विनयस्थापनं भारतीयसंस्कृतेः वैशिष्टयम्। किञ्च यत्र कुलीनताप्रयुक्ता अपेक्षिता संस्काराः उद्बुद्धा वर्तन्ते तान् विलोक्य इतरस्मिन् कुलोने सर्वथा असूयालुत्वं न भवतीत्यपरं तत्त्वं एतत्संस्कृति वैशिष्ट्यमधोलिखितेतिहासादवगम्यते । तद्यथा—कदाचित् भीष्मार्जुनसङ्ग्रामे अर्जुनः स्वबाणप्रहारेण भीष्मस्य रथमनेकक्रोशं पश्चात् प्रत्यावर्तितवान्। ततः भीष्मः, सर्वजगदधिष्ठाता श्रीकृष्णः यत्र रथे स्थितः, तं अर्जुनरथं पश्चात्भागे चतुर्हस्तं प्रत्यावर्तितवान् तदा अमुं भीष्मस्य संस्कारोद्बोधमपूर्वं दृष्ट्वा अर्जुनस्य पुरतः कृष्णः भीष्मं प्रशशंस इति। अतः ईदृशी अनसूयालुत्वस्थितिः सर्वत्र साङ्कर्यं प्रसूते जातिशुद्धिविलोपे संस्कारविनाशानन्तरं न भवितुमर्हति इति दाढर्येन वक्तुं शक्यते। अतः विशेषतया राजनीतौ अपेक्षितानां संस्काराणं एतच्छरीरे पिण्डशुद्ध्या उद्बोधनाय जातिसाङ्कर्य पर्यन्ते विरोधि भविष्यतीत्यत्र नास्ति सन्देहः।

न च प्रयत्नेन शिक्षणादिना राजनीतौ राज्यसञ्चालनाय अपेक्षिताः संस्काराः विभिन्नजातीयेषु याचितकमण्डनन्यायेनापि आधातुं शक्यन्ते तथा सति तत्तजातीयेषु कुलीनेषु तथाविधसंस्काराणां किं मूल्यम् इति वाच्यम्। शुद्ध संस्कारैः संस्कृतः आपतितायां विपदि धीरो भूत्वा स्वीयं पूर्वं प्रतिज्ञातं तथैव निर्वहेदिति दाढ़र्यैन वक्तुमनाश्वासात्। नचेष्टापत्तिरितिवाच्यम्। विना विपत्ति राजनीतौ अधिकृतस्य उत्साह—प्रभावक्लेशसहिष्णुताधृत्यनुरागस्थैर्यगुणानां परीक्षणस्य अशक्यत्वात् इति। अतो येन नेत्रा भवितव्यं तेन विपत्तिमात्मनः भूषणं मत्वा तदानीम् उपर्युक्ताः गुणाः अवश्यं परिचाययितव्याः इति। येषु कुलीनत्वं नास्ति ते विपदि धीरा भविष्यन्ति' इति नास्ति नियमः। सोऽयं जातिप्रधानायाः भारतीयसंस्कृतेः पाश्चात्यसंस्कृत्यपेक्षया विशेषः स्वीकर्तव्य एव। अथ प्रतिभाविषयेऽपि उच्यते। जातिसाङ्कर्ये पूर्णतया संपन्ने परस्परसत्प्रतिपक्षितत्वेन राज्यसञ्चालनाय अपेक्षितानां संस्काराणां विलयनं भविष्यति। अस्तु कामं, तेन किम्? इति चेत् संस्काराभावेन स्मृतिविलोपो भविष्यतीत्यर्थादायातम्। अतः पूर्वं निर्दिष्टायाः अपूर्वप्रतिभारूपायाः मतः अभावेन जाडयं निश्चितमेव। तच्च कर्तव्यविस्मरणात्मकं। सति च तस्मिन् स्वहस्तेनैव अर्जितां स्वतन्त्रतामपनोद्य आत्मनः पारतन्त्र्यमपि स्वहस्तेनैवापादितं स्यात्, किंच-नह्यत्रैव

विहितानि। शूद्राणां समासात्पृथक्करणं द्विजत्वस्वभावेन वैलक्षण्यात्। विभागोपलक्षणमाह—'स्वभावः सात्विकादिः प्रभवति प्रादुर्भवति येभ्यस्तैगुणैरूपलक्षणभूतैः। यद्वा स्वभावः पूर्वजन्म—संस्काररस्तस्मात् प्रादुर्भूतैरित्यर्थः। तत्र सत्वप्रधाना ब्राह्मणाः। सत्वोपसर्जनरजःप्रधानाः क्षत्रियाः। तमउयसर्जनरजःप्रधाना वैश्याः। रजउपसर्जनतमः प्रधानाः शूद्राः॥ ४१॥ इति।

जयमङ्गलाक्रोडपत्रम्

विश्रामः, अपितु जाड्येन सह मदमानयोः अभ्युदयश्च ज्ञानाभावे घृतेरसत्वेन नियतः इत्यपि बोध्यम्। नन्वस्तु इष्टापत्तिः। इति चेन्न। ततः गुरुं देवतां वा मदमानान्वितः न भजते ततश्च जनापरागो अवश्यं नियत एव। इत्येवं दोषोऽअवश्यमुत्पद्येत इति गृहाण। तथा च राजनीतौ प्रविष्टः यः कोऽपि भवतु सः राज्स्य यस्मिन् कस्मिन्नपि पदेऽऽधिष्ठितोऽपि स्वदुर्नयेन शङ्काकवलितः सन् यदि विचरेत् तर्हि नीतिमात्मानं च विहन्यात् इत्यादयः दुष्परिणामा अपि जातिमर्यादया प्राप्तसंस्काराणां स्व कर्मणि अभिनिवेशप्रयोजकानामभावे सिद्धा भवन्ति इति स्थितम्। न च गुरुदेवताः न समुद्धतो भजति इति दोषः उक्तः तन्निरासाय गुरुदेवताभजनमावश्यकमिति भाति। तस्य प्रकृते क उपयाग इति शङ्क्यम्। गुरुभक्त्यैव उपर्युक्तदोषाणां निरसनस्य संभवदुक्तिकत्वात्। तदुक्तम्।

भयं द्वितीयाभिनिवेशतः स्यात्—
ईशादपेतस्य विपर्ययोऽस्मृतिः।
तन्माययाऽतो बुध आभजेत्तं।
भक्त्यैकयेशं गुरुदेवतात्मा॥' इति। (भागवते ११-२-३७)

अतः भागवतस्यापि आशयः अयमेव। यत् निर्भयत्वाय अकार्यान् निवृत्तये वा साधनभूतायाः धृतेः संपादनाय गुरुदेवता-भक्तिः साधनमिति। सा च कुलोनैरेव कर्तुं शक्यते, नान्यैः तेष्वेव प्रागुक्तानसूयुत्वस्य संभवादिति। किञ्च राज्यसञ्चालनाय अपेक्षितायाः सात्विकोप्रतिभायाः उद्बोधनाय गुरुसङ्गतिः यथा संभवेत् विनय-पुरःसरं, तथा प्रयतर्नामिति। तदुक्तं गौतमेनापि "तं गुरुंशिष्य स ब्रह्मचारिशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात्'इति। अस्यायंभावः—यत् यावत्पर्यन्तं शास्त्रार्थः गुरुकृपया स्वयं न स्फुरति तावत्पर्यन्तं शास्त्राध्ययनस्य फलमेव न प्राप्तमित्यपि अधिगच्छति शास्त्रार्थं इति पद्येन प्राङ्निरूपितमत्र स्मर्तव्यम्। 'ननु सरस्वती तदुपासकैः उपास्यते तथापि जाड्यं न विनश्यति इति चेत् सरस्वत्याः उपासना न जाता इत्येवं वक्तव्यं हठादापतितं भवति। तदुक्तम्—

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता।
या वीणा-वरदण्डमण्डितकरा या श्वेतपद्मासना॥
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा बन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाडयापहा॥

किञ्च भारतीयराजनीतेरुपर्युक्तवैशिष्ट्येण सह तृतीयं वैशिष्ट्यमधोनिर्देशनुसारेणान्यदपि उपस्थापयितुं शक्यते। तद्यथा—उपर्युक्तरीत्या वेदगुरुप्रसादकामनया कुलोनाः धर्मतत्वविषये यथा यथा प्रतिभां प्राप्नुवन्ति तथा तथा एते कञ्चन अन्तःशमसन्तोष मनुभूय अर्थमप्रधानीकृत्य स्वीयेषु कर्तव्येषु रमन्ते इति। यत्र किल कुलीनत्वं वर्णेन

जयमङ्गलाक्रोडपत्रम्

कर्मणा वा विपर्यस्तं तत्र विद्याप्रतिभाप्रयुक्तः शमसन्तोषः स्यादेवेति वक्तुं न शक्यते। बहुना तदवस्थायां तद्विद्याः प्रधानतया अर्थं मन्यमानाः अर्थलाभे सत्येव सन्तोषमनुभवन्ति। अतः तस्य अर्जनाय वर्धनाय च ते प्रवर्तन्ते। तदानीमिदमपि सिद्धं यत् अकुलीनेषु अर्थप्रधानमनोवृत्तेः स्वभावात् रौद्ररसताऽपि अभिवर्धते। न चास्तां तथैवेति वाच्यम्, तथासति स्वातन्त्र्ये सुखानुभवस्य विस्मरणप्रसङ्गात्।

तथाहि—तर्कः मतिश्च व्यभिचारिभावौ रौद्रे न स्तः इति अर्थरुचिः स्वातन्त्र्येण जीविकोपायमजानानः सेवावृत्तिं कुर्वाणः स्वीयं स्वातन्त्र्यं विस्मरति। नात्र आश्चर्यम्। यतो हि क्वचित् कुलीनोऽपि पञ्जरे अवरुद्धः शुकः उड्डयनं विस्मरति। किमुत सङ्कीर्णविषये।

ननु सांप्रतं कुलीनेष्वपि स्वातन्त्र्यापादकः जाड्याभावो न दृश्यते ? इति चेदुच्यते। यत्र हि कुलीनत्वं सुरक्षितमस्ति दोषाणां च प्रसरणं नास्ति तत्र जाड्यं न भवति। अतः तत्प्रसरणं यथा न भवेत् तथा प्रयतनमपेक्ष्यते तत्रत्यायाः स्थितेर्विलक्षणाया अद्यापि दृश्यमानत्वात् तद्यथा—

'नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
विक्रमार्जित-सत्वस्य स्वयमेव मृगेन्द्रता। इति। (तन्त्रे)

मृगेन्द्रापेक्षया सामर्थ्ये गजः अतिबलवान् परं गजः सिंहं दृष्ट्वा विकृतः स न स्वसामर्थ्यं विस्मरति जडश्च भवति। तत्र कारणं अप्रियदर्शनप्रयुक्तं जाड्यम्। तथा मीनः बडिशनिबद्धं भोज्यं दृष्ट्वा तद्ग्रहणाय प्रयतते। आत्मानं च कण्टकेन बद्धमनुभवन्नपि स्वभोज्यं त्यक्तुं नेहते। तत्रापि कारणं प्रियदर्शनप्रयुक्तं जाड्यमेव। उभयत्रापि कर्तव्यविस्मरणं पारतन्त्र्यं च समानमेव। तदुक्तम्—

'जाड्यमप्रतिपत्तिः स्यात् सर्वकार्येषु सर्वदा।
प्रियाप्रियश्रुतेस्तत्तद्दर्शनैर्व्याधिभिर्भवेत्॥
तूष्णीमिप्रतिभा चाक्ष्णोरनिमेषोऽनवेक्षणम्।
अभाषणं पारवश्यं एतैर्जाड्यं निरूप्यते॥ इति। भा० प्र० १ अधि०

एतद्वैपरीत्येन मृगेन्द्रस्तु गजेन्द्रन्द्रष्ट्वा लघुत्वात् आत्मनः स्वरूपं ध्यायति कर्तव्यं च न विस्मरति। सहजतयैव स गजं निहन्तुं यतते निहन्ति च। तत्र कारणं जाड्याभावः सत्वात्मिका धृतिर्वा। तदुक्तं उत्साहप्रशंसायां कामन्दकेन—

प्रमाणाभ्यधिकस्यापि महत्सत्वमधिष्ठितः।
करोत्येव पदं मूर्ध्नि केसरी मत्तहस्तिनः॥१६॥ इति। का० नी० १४।प्र०२०

एवमेव ये गार्हस्थ्ये कर्मणि आसक्ताः सांसारिकं वस्तुजातं एकत्रीकुर्वन्तोऽपि यदा—

'हे बावा, नास्ति तैलं न च लवणमरीच्यादि वाचां' प्रचारः।

जयमङ्गलाक्रोडपत्रम्

इति श्रृण्वन्ति तदा ते तदप्रियं मन्यमानाः सदा व्यथन्ते। ततश्च क्वचिद-प्रियदर्शनेन क्वचिद् प्रियदर्शनेन च जड़ताप्रयुक्तं पारतन्त्रयम् कुलीनत्वप्रयुक्त-संस्कारोद्बोधाभावेन उत्लङ्घयितुमसमर्था भवन्तीति अनुभवसिद्धम्। अतः आत्मनः जाड्यात् सरंक्षणाय स्वस्मिन् अविकारित्वमपेक्षते। तदर्थं च धृतिरपि। सा च स्वभावसिद्ध संस्काराभावे न भवितुमर्हति। ते च शुद्धमातापितृप्रयुक्तया दोषा-पहरणसहचरितया जातया उद्भवन्ति। अत्र विषये एक एव प्रश्नः अवशिष्यते। यत् धृतिभावसम्पादनशीलैः योगक्षेमौ कथं निर्वर्तितव्यौ इति। तदुत्तरं तु स्वयं कृष्ण एव उक्तवान्—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।। इति

तथा पण्डितराजेन जगन्नाथेनापि—

'सन्तापयामि किमहं धावन् धावन् धरातले नितराम्।
अस्ति मम शिरसि नन्दकुमारः प्रभुः परमः।' इति

अत्रेदं तत्वं गीतावाक्येन रसगङ्गाधरवाक्येन च धृतिभावः आलम्बनमित्युक्तम्। स च जीविकोपायः अस्माभिरुच्यते। यतः स एव लोकविश्वासस्य हेतुरस्तीति यत् प्राक् प्रपञ्चितं तत् स्मर्तव्यम्। तथा च धृतिसंपन्नं नरं लोकः यथा विश्वसिति, तथा ईश्वरोऽपि तं विश्वसित्येव। जगन्मित्रं सः कुलीनान् कथमुपेक्षेत। स्वस्वधर्म-स्थितान् पशुपक्ष्यादीनपि ईश्वरो जीवयति, किमुत बुद्धिसंपन्नान् संस्कारसंपन्नान् ईश्वरो न जीवयेत्। इति सुधिय एव विचारयन्तु। तदुक्तं मलुकदासेन हिन्दीसाहित्ये–

अजगर करै न चाकरी पंछी करै न काम।
दास मलूका कह गयो सबके दाता राम।।

तथैव समर्थरामदासैः—

'ब्राह्मणत्त्व साण्डूनि झाले शिष्य शिष्यांचे।'

तथा—

एष नित्यो महिमा ब्राह्मणानामिति।'

तस्मात् जीविका अनेन मार्गेण सुलभा। तदुक्तं मनुना जीविकाप्रकरणे

'न लोकवृत्तं वर्तेत वृत्तिहेतोः कथञ्चन।
अजिह्मामशठां शुद्धां जीवेद ब्राह्मणजीविकाम्।।११।।
सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्।
सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः।
अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः।
स्वर्गायुष्ययशस्यानि व्रतानीमानि धारयेत्।। इति

जयमङ्गलाक्रोडपत्रम्

जीविकोपायं धृतिभावमुपेक्ष्य राजनीतिं च कुलीनैः विस्मृत्य यदाप्रभृति स्वीयाः पुत्राः आङ्ग्लशिक्षामध्याप्य भक्ष्याभक्ष्येषु शौचाशौचेषु प्रेरिताः, अतएव तदा प्रभृति एते लोकस्य ईश्वरस्य वा अविश्वास्यत्वस्थितौ समापतिताः । एवं स्थिते दारिद्रयं नियतमेव । तदुक्तम्—

अविश्वासो हि जन्मभूमिरलक्ष्म्या इति ।

यथा अस्तेयप्रतिष्ठायां नष्टायां सर्वरत्नोपस्थानं कथं भवेत्? इति प्रश्नः असमाहितो भवति, तथा धृतिभावमुपेक्ष्य कृतः अयं प्रस्तुतप्रश्नोऽपि असमाहित एव तिष्ठेत् । अतः वंशपरंपरया शुद्धमातापितृजन्ये पिण्डे जन्मान्तर प्राप्त-संस्काराणामुद्बोधेन जन्मत एव स्वस्व कर्तव्यं प्रति अपूर्वप्रतिभानस्य, अनसूयालुत्वस्व, धृतेः संस्काराणाञ्च दोषसंसर्गाभावे स्वाभाविकी स्थितिरिति प्रमाणत्रयण इदं प्रमितवस्तुनः भारतीयसंस्कृतेः पाश्चात्यसंस्कृत्यत्पेक्षया वैशिष्ट्यं सिद्धम् ।

"जातेरस्तित्वस्यानुभवः"

ननु जातिप्रयुक्ताः संस्कारादयः गुणाः भारतीय-संस्कृतौ शुद्धमातापितृ-प्रयुक्ताः इत्युच्यते परन्तु चतुर्वर्णाश्रमेषु अवान्तरजातेः अस्तित्वे प्रत्यक्षप्रमाणप्रमितत्वं कुतो मन्तव्यम् । इतिचेन्निरूप्यते ।

प्रायः कृत्वा ब्राह्मणत्वजातेः तत्तद्रत्नत्वादिजातेरिव प्रत्यक्षसिद्धत्वमस्ति, कुशल-परीक्षकैः तत्तद्रत्नादीन् हस्ते गृहीत्वैवरत्नत्व जातिप्रत्यभिज्ञानसामर्थ्यदर्शनात् । परन्तु ये अकुशलाः सन्ति ते इन्द्रियसबन्धसत्वेऽपि जातिं प्रतिं प्रत्यभिज्ञातुं असमर्था भवन्तीति तेषां कृते अभिव्यञ्जकत्वेन अपरे धर्माः पयोक्तव्या भवन्ति । तदनुसारेण तत्तज्जातिप्रत्यक्षेअभिव्यञ्जकत्वेन आयुर्वेदोक्ता चिकित्सा अपि वक्तु शक्यते । ततस्तन्मुखेन जातीनां प्रत्यक्षत्वं कथं भवतीति निरुच्यते । तथाहि—

स्तनन्धयस्य कुमारस्य वा नेत्ररोगविशेषे तदपसारणाय उपयुक्तेषु योगेषु प्रायः सर्वत्र स्त्रीस्तन्यं चिकित्साशास्त्रे चिकित्सात्वेन विहितमस्ति । तद्द्रष्टव्यं काश्यप- संहितायाम् ।[1]

यदि तद्रोगापसारणे विजातीयमातुः स्तन्यं तस्य नेत्ररोगे क्षिप्यते, तर्हि स रोगः विशेषतया अभिवृद्धो भवति । किंबहुना कदाचित् विजातीयमातुः स्तन्येन शिशोः

---

१ चक्षुष्या पुष्पकं माता— रोचना(हर्रे)ऽथ रसाऽञ्जनम् ।
कतकस्य फलं षष्ठं तेषां कल्पान्निबोध मे ॥ १० ॥
जन्मतश्चतुरो मासान् पञ्च षड्वाऽक्षिरोगिणाम् ।
विघृष्य नारीस्तन्येन चक्षुषी प्रतिपूरयेत् ॥
षटकल्पाध्यायः १८३ पृ०

जयमङ्गलाक्रोडपत्रम्

सङ्कोपनं आपतितं चेत् विजातीयरक्तसंयोगात् तस्य ऐहिकयात्रासंपूर्त्यांचिकित्सकस्यापराधात् स पञ्चत्वं प्राप्नुयात्। अतः शिशोः सङ्कोपनाय मातुः स्तन्याभावे सजातीया धात्री उपयोक्तव्या इति वदन्ति आयुर्वेदविदः।[1]

---

१ तदुक्तं सुश्रुतादौ—

ततो यथावर्णां धात्रीमुपेयात्। मध्यमप्रमाणां मध्यमवयस्कामरोगां शीलवतीमचपलामलोलुपामकृशामस्थूलां प्रसन्नक्षीरामलम्बोष्ठीम् अलंबोर्ध्वस्तनीमव्यङ्गामव्यसनिनीं जीवद्वत्सां दोग्ध्रीं वत्सलामक्षुद्रकर्मिणीं कुले जातामसंभूयिष्ठैश्च गुणैरन्वितां श्यामामारोग्यबलवृद्धये बालस्य। तत्रोर्ध्वस्तनी करालं कुर्यात्। लम्बस्तनी नासिकामुखं छादयित्वा मरणमापादयेत्। ततः प्रशस्तायां तिथौ शिरःस्नातमहतवाससमुदङ्मुखं शिशुमुपवेश्य धात्रीं प्राङ्मुखीं चोपवेश्य दक्षिणं स्तनं धौतं ईषत्परिसृतमभिमन्त्र्य मन्त्रेणानेन पाययेत्॥ २५॥

"चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिनः।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये।
पयोऽमृतरसं पीत्वा कुमारस्ते शुभानने।
दीर्घमायुरवाप्नोतु देवाः प्राश्याऽमृतं यथा॥२७॥ इति

अतोऽन्यथा नानास्तन्योपयोगस्यासात्म्याद् व्याधिजन्म भवति।

२८ सुश्रुते शारीरस्थाने अ० १०

तत इत्यादि। यथावर्णामिति। ब्राह्मणस्य ब्राह्मणीं क्षत्रियस्य क्षत्रियां इत्यादि धात्रीमुपेयात् स्तनदायिनीसमीपं गच्छेत् भिषक् बालग्राहको वा इति शेषः। श्यामा हि प्रायशः प्रचुरक्षीरा भवति। उक्तविपर्यासिन दोषस्य दिङ्मात्रं दर्शयनाह—तत्रेत्यादि। इति शब्दोऽयं एवंप्रकारे। तेन अन्येपि दोषाः एवंप्रकाराः स्वयमप्यूह्य ज्ञातव्याः। अभिमन्त्रणमाह—चत्वार इत्यादि। नियतधात्र्यभावे दोषं दर्शयन्नाह—अतोन्यथेत्यादि।

मातुरेव पिबेत् स्तन्यं तद्ध्यलं देहवृद्धये।
स्तन्यधात्र्यावुभे कार्ये तदसम्पदि वत्सले॥१५॥
अव्यङ्ग्ये ब्रह्मचारिण्यौ वर्णप्रकृतितः समे।
नीरुजे मध्यवयसौ जीवद्वत्से न लोलुपे॥१६॥
हिताहारविहारेण यत्नादुपचरेच्चते।

बालो मातुः जनन्या एव स्तन्यं पिबेत्। कुतः। यस्माच्च तस्याः स्तन्यमतिशयेन देहस्य वृद्धये स्यात्। तदसम्पदि मातृस्तन्यासम्पत्तौ द्वे स्तन्यधात्र्यौ च वत्सले—स्नेहले कार्ये। तथा व्यङ्ग्यरहिते, ब्रह्मचारिण्यौ वर्जितमैथुने, वर्णेन प्रकृत्या—

जयमङ्गलाक्रोडपत्रम्

अत्रायं विशेषः—आधुनिकपद्धतौ मातुः स्तन्यालाभे शिशोः सङ्गोपनाय तदीयरक्तसजातीयरक्तवत्या धाच्या दुग्धमनुमोद्यते तावता जातेरस्तित्वं सिध्यत्येव। एतावन्मात्रेणापि बालकानां प्रतिभादिसंपत्तिलाभदृष्टया जीवनं निर्वाधं भवेदेवेति आयुर्वेदशास्त्रं न मनुते नवीनशोधानुसारेण असवर्णधात्र्याः सजातीयरक्तवत्या अपि दुग्धमुपार्जयितुं शक्यत्वात्। तेन जाड्यादिदोषोद्भवप्रसारप्रसक्तेः। अतः तद्दोषनिरासाय धात्र्यां सजातीयरक्तमिव स्वसाजात्यमपि शिशुसङ्गोपनाय च काम्यते। नचायुर्वेदेन अत्र प्रसङ्गे रक्तपरीक्षणं नोक्तमिति वाच्यम्। स्वसजातीयदुग्धेनैव स्वसजातीयरक्तस्य अवश्यंलाभात्। तत्र कारणं यत् रक्तेन प्रभावितं 'लिम्फाटिक' तत्वं दुग्धरूपतामापन्नं दुग्धसजातीयरक्तसाजात्यस्यानुक्तत्वेऽपि संभवति इति रक्तपरीक्षणानुक्तावपि न न्यूनतामापादयति। एवं च आयुर्वेदप्रामाण्यात् अन्वयव्यतिरेकाभ्यां च जातिः धर्मशास्त्रेणापि प्रत्यक्षसिद्धा। तामनुरुदध्य सर्वो वर्णाश्रमधर्मः विहितः इति नात्रानौचित्यस्यावसरः। तद्वैपरीत्येनाचरणे तु अनर्थोऽपि संभवितुमर्हति, इत्यवधेयम्। तदुक्तम्—

'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः। इति (भ० गी० ३ अ०)

अस्मात् कारणात् साम्प्रतं विदेशीयानां समृद्धिः वर्तते इति दृष्ट्वा कुलीनतायाः परित्यागः बेश्यासमृद्धिमवलोक्य दरिद्रायाः सतेजस्कायाः पतिव्रतायाः पातिव्रत्यपरित्याग इव अनुचिताय भवेत्। चाकचक्यमात्रेण अकुलीनेषु धनसमर्पणम्, कुलीनेषु दारिद्र्यानुभवात् कुलीनतायाः परित्यागश्च इति उभयमपि भाविपरिणामालोचने

च तुल्ये, तथा निरामये, मध्यवयस्के जीवद्वत्से न लोलुपे—लौल्यवर्जिते आदरयुक्ते, ते हितेनाहारविहारेण यत्नादुपचरेत् (अष्टाङ्गहृदये बालोपचरणीयाध्याये)—

अथ ब्रूयात् धात्रीमानयतेति समानवर्णां यौवनस्थां निभृतामनातुरामव्यङ्गामव्यसनामविरूपामविजुगुप्सां देशजातीयामक्षुद्रां अक्षुद्रकर्मणि कुले जातां वत्सलां जीवद्वत्सां पुंवत्सां दोग्ध्रीमप्रमत्तामनन्त्यावशायिनीं कुशलोपचारां शुचिमशुचिद्वेषिणीं स्तनस्तन्यसम्पदुपेताम्। इति। ५१। चरक सं० १ अ०

टी०—'समानवर्णामिति' तुल्यजातीयां यौवनस्थामित्यनेन बालावृद्धे बालावृद्धयोरसम्पूर्णाङ्गक्षीणाधातुत्वेन निरस्यति। निभृतामिति विनीताम्। अविरूपामिति अविकृतावयवाम्। अव्यङ्गामिति अहीनङ्गीम्। देशजातीयां समानदेशजाम्। अनन्त्यावसायिनीमिति शूद्रस्य हि सवर्णत्वे चाण्डालादिस्त्री च प्रसक्ता। सा च निषिध्यते ब्राह्मणादीनामसवर्णत्वेनैव सा निरस्ता। किं वा ब्राह्मणादीनामपि पतितब्राह्मण्यादि—'अनन्त्यावसायिनीम्' इति शब्देन क्षिप्यते। युक्तपिप्पलकाविति उच्चैस्तरवृत्तौ ॥५१॥

जयमङ्गलाक्रोडपत्रम्

महामोहाय भविष्यति इति बोध्यम् । अत एव उक्तम् ।
या वेदबाह्याः स्मृतयः याश्च काश्च कुदृष्टयाः ।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः (मनु० १२ अ०)
उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् ।
तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ।। १६ ।।

एवं सति जातेः कुलीनत्वस्य च उपयोगे उक्तरीत्या प्रत्यक्षतः सिद्धे जातिमतां कुलीनानामात्मनि शिष्यत्वस्वीकृतिमपहाय अकुलीनानां आत्मनि शिष्यत्वञ्च अथवा तेषामनुकरणं स्वकीयगुणगौरवस्य विनाशहेतुत्वात् स्वहानिकरमेव मन्तव्यम् । अकुलीनाः इतरेषां कुलीनानां गुणानां हानिं कारयित्वा स्वकीयव्यापारकौशलेन अर्थमुपार्जयन्ति इत्यत्र इतिहासः प्रसिद्ध एव । यथा भारते 'ढाकामलमल' नाम्ना अतिसूक्ष्मवस्त्रं प्रसिद्धमासीत् यावत्, तावत् यान्त्रिकवस्त्राणां क्रयः अत्र नाभूत् । तदा तैः अत्रत्यानां शिल्पिनामङ्गुष्ठं छित्वा पुस्तकान्यपहृतानि, वस्त्रास्तरणप्रावरणादीनि नवीनकलान्वितानि निर्मितानि, अत्यल्पपरीक्षायामुत्तीर्णाः उच्चपदेषु संस्थापिताः । विशिष्टसंस्था द्वारा व्यसनेषु ते अभिभाविताः तल्लोभे निपतितैः सुवर्णादिद्रव्यजातमाङ्ग्लानां हस्ते समर्पितम् । किञ्च निरर्थकाः शङ्काः उद्भाव्य वेदे शास्त्रे सदाचारे धर्मभावे चाप्रामाण्यम् उपस्थाप्य ततः अत्रत्यानां स्नेहभावस्तैर्विनाशितः । तेन शिल्पिनामुत्तरोत्तरं क्षयोऽभूत्त तस्य परिणामोऽयं जातः यत्तै शिल्पमपि आसीदिति नमन्यन्ते आधुनिकतार्किकाः । तदिदं धर्मविजयानाटकेद्रष्टव्यम् । अन्ततो गत्वा अस्माभिः एतद्विदित्वा आत्मा देशश्च संरक्षणीय एव स्वस्य ह्रासः पारतन्त्र्यं च कुतः केनवाऽभूत् इति अवश्यं विचारणीयम् । पूर्वोक्तरीत्या जातिसंरक्षणस्य कुलीनत्वस्य स्वधर्मस्य च रक्षणस्याभावेन आनुवंशिकाः संस्कारा अपि विलुप्ता बभूवुः, असूयादीनां प्राकट्यं चाभूत्, इत्यादि दोषाणामपसारणाय जातेः अस्तित्वं प्रत्यक्षसिद्धत्वं च साधितम् । किञ्च जातिः भारते अतीव सुसंगठिता १८ दश शताब्दीपर्यन्तमासीत् इति अधोनिर्दिष्टटिप्पणीतः स्फुटं भवति । तन्त्राप्यवधेयम् ।[1] इत्यलं विस्तरेण ।

भारतवर्षकी जाति-प्रथा

१ Q. अठारहवीं शताब्दी में एक पादरी मि० आब्बे जे. ए. डुबोइस (Mr. Abbe J. A, Dubois) सन् १७९२ में भारत आये थे और सन् १८२३ तक दक्षिण भारत में रहे । लगभग ३० वर्ष तक उन्होने दक्षिण भारत में उन गरीबों के बीच उन्हीं की वेश-भूषा में तथा उन्ही के जैसी झोपड़ी में रहकर उनके जीवन का अध्ययन किया था । उस अध्ययन की जानकारी उन्होंने अपनी पुस्तक 'हिन्दुओं के रीति-रिवाज और उत्सव' (Hindu

Manners, Customs and Ceremonies) में व्यक्त की है जो आक्सफोर्ड विश्वविद्यालय प्रेस द्वारा प्रकाशित की गयी है। उनका उद्देश्य केवल भारत में ईसाई धर्म के प्रसार की सम्भावनाओं का अध्ययन करना था। इस सम्बन्ध में अपना अध्ययन पूर्ण करने के बाद उन्होंने यह टिप्पणी की थी कि जाति-पांतिकी कट्टरता के कारण भारत में ईसाई धर्मका प्रसार बहुत कठिन कार्य है, लेकिन इसके साथ-साथ यह भी कहा कि एक समय आ सकता है जब हिन्दू मन्दिरोंपर ध्वजाओंकी जगह क्रास दिखाई देने लगेंगे। उस समय की जो जाति-पाँति की स्थिति उन्होंने वर्णन की है उसके कुछ उद्धरण यहाँ दिये जा रहे हैं। उद्धरण के संकेतों के लिये ग्रन्थ की पृष्ठ-संख्या आदि जो दी गयी हैं वे सन् १८५९ में मुद्रित संस्करण से हैं—

१. लेखक द्वारा लिखी गयी ग्रन्थ की प्रस्तावना (सहिष्णुता)

"भारत का प्रत्येक निवासी जहाँ भी उसको अच्छा लगे वहाँ अपना निवास बनाने के लिये पूर्ण रूप से स्वतन्त्र हैं। वह अपने ढङ्ग से रहे, अपनी भाषा बोले और अपने ही रीति-रिवाज बरते, इसमें कोई किसी प्रकारका झगड़ा नहीं करता। उससे केवल इतनी ही अपेक्षा की जाती है कि साधारणतया वह अपने अड़ोस-पड़ोस की मर्यादा से सम्बन्धित प्रचलित नियमों का पालन करे।" (पृष्ठ १२, पंक्ति ६ से १२)

२. जाति-प्रथा के लाभ

"हिन्दू विधान में जाति-विभाजन कई पहलुओं से उत्कृष्ट व्यवस्था है—मैं ऐसा विश्वास करता हूँ। मेरी यह मान्यता है कि लोगों के जातियों में विभाजित होने के कारण ही केवल भारतवर्ष असभ्यता की हालत में पहुँचने से बचा रहा है और इसलिये वह अपनी सभ्यता की कला और विज्ञान को कायम रख सका है और पूर्णता की हालतमें पहुँचने से बचा रहा है और इसीलिये वह अपनी सभ्यता की कला और विज्ञान को कायम रख सका है और पूर्णता की हालत में ला सका है, जबकि पृथ्वी की अन्य अनेक जातियाँ असभ्यता की हालत में पड़ी हुई हैं। मैं यह नहीं मानता कि जाति-प्रथा में कोई भी कभी नहीं है, तो भी मेरा विश्वास है कि हिन्दू समाजको जाति-पाँति की प्रथा से जो लाभ हुए हैं, वे हानि से कहीं अधिक हैं।" (पृष्ठ २८, पंक्ति ८ से २८)

"बहुत सोच-विचार करने के बाद मुझे जाति-प्रथा के अतिरिक्त कोई ऐसी बात नहीं मिली जो हिन्दुओंको उस प्रकार की असभ्यता का हालत में गिरने से बचाये हुए है जिस प्रकार की स्थिति में उसके अड़ोस-पड़ोस की अन्य जातियाँ और उष्ण प्रदेश की प्रायः सभी जातियाँ फँसी हुई हैं। जाति-प्रथा के अन्तर्गत प्रत्येक व्यक्ति के लिये अपना निजी व्यवसाय नियत किया गया है और वह व्यवसाय पीढ़ी-दर-पीढ़ी से पिता से पुत्र को मिलता आ रहा है तथा जो व्यवसाय विधान द्वारा नियत किया गया है उसको किसी भी व्यक्ति या उसके उत्तराधिकारीके लिये बदलना सम्भव नहीं है। हिन्दुस्तानके विभिन्न विशिष्ट गुणवाले लोगों में सभ्यता बनाये रखने के लिये ऐसा समाज ही सम्भवतः उपाय था जिसका

सृजन बड़ी दूरदर्शिता एवं बुद्धिमत्ता द्वारा किया गया।'' (पृष्ठ २९, पंक्ति ३ से १५)

३ जाति-प्रथा की नींव

''भारत के विधि-विधान बनाने वाले, चाहे वे कोई भी रहे हों, बहुत ही बुद्धिमान थे और जिनके लिये उन्होंने विधि-विधान बनाये, उनके प्राकृतिक गुणों से अच्छी प्रकार परिचित थे।'' (पृष्ठ ३०, पंक्ति ५ से ७)

''सभी प्राचीन विधि-विधान बनानेवालों के एक-से धार्मिक सिद्धान्तों से उन्होंने यह निश्चय किया कि कोई व्यक्ति राष्ट्र के लिये निकम्मा न रहे।''

(पृष्ठ ३०, पंक्ति १३ से १५)

''धर्म और राजनीति के नये परिवर्तनों से होनेवाले संकटों से अच्छी प्रकार परिचित एवं हिन्दुओं की विभिन्न जातियों के लिये स्थायी और अलंघ्य नियम स्थापित करने के इच्छुक इन प्राचीन विधि-विधानकर्त्ताओं को सुदृढ़ शासनके लिये धर्म और राजनीति के दो बड़े आधारों को अच्छी तरह से मिला देने के अतिरिक्त और कोई विश्चित मार्ग नहीं मिला। अतः उनके कोई भी ऐसे प्राचीन आचार और नियम नहीं हैं जिनके साथ धार्मिक सिद्धान्त या लक्ष्य संलग्न न हों। वास्तवमें प्रत्येक बात श्रद्धा के द्वारा निश्चित की गयी है और धर्म उसका प्रेरक है। अभिनन्दनकी रीति, वेश-भूषा का ढंग, पोशाक की कटाई, आभूषणोंका आकार और उनके धारण की रीति, शृंगार के अनेक विवरण, गृह-निर्माण-विद्या, चूल्हेका स्थान, पाक करने के बर्तनों के रखने का स्थान, शयन-विधि, शिष्टता और विनय के रूप—जितने भी नित्य जीवन के पालनीय नियम हैं उनका निश्चित रूप से पालन इन सबको दृढ़ता के साथ नियमित बनाया गया है।'' (पृष्ठ ३०, पंक्ति २४ से ४२)

''कोई भी बात अवसर के लिये नहीं छोड़ दी गयी, सबके नियम बना दिये गये हैं और उन सब रीति-रिवाजों का आधार शुद्ध रूप से केवल धर्म है। इसी कारण से हिन्दू लोग अपने रीति-रिवाजों को अलंघ्य मानते हैं क्योंकि ये सब धर्म से सम्बन्धित हैं। वे उनको उतना ही पवित्र मानते हैं जितना धर्म को।'' (पृष्ठ ३१, पंक्ति ४ से ८)

४. इजिप्ट (मिश्र) में जाति-प्रथा

''मिश्र के लोगों में भी जाति-प्रथा है। उनमें भी हिन्दुओं की तरह विधि-विधान द्वारा प्रत्येक व्यक्ति के लिये एक व्यवसाय नियत किया गया है जो पिता से पुत्र को मिलता रहता है। किसी भी व्यक्ति के लिये दो व्यवसाय (पेशे) की या व्यवसाय-परिवर्तन की आज्ञा नहीं है। प्रत्येक जाति के लिये रहने के लिये निश्चित स्थान हैं और दूसरी जाति के लोग वहाँ जाकर नहीं बस सकते।'' (पृष्ठ ३१, पंक्ति १७ से २३)

५. प्राचीन राष्ट्रों में जाति

''जिन-जिन ने जाति व्यवस्था स्थापित की, उन सबने यही समझकर ऐसा किया कि अपरिपक्व अवस्थावाले राष्ट्रों में जितना विस्तृत जाति-भेद होगा उनमें उतनी ही अधिक व्यवस्था और समता बनी रहेगी और व्यवस्था बनाये रखने तथा नियन्त्रण रखने में भी

उतनी ही अधिक आसानी होगी। हिन्दू समाज में जाति-भेद से जो सफलता मिली, यह वास्तव में उसी का परिणाम है। किसी जाति के एक व्यक्ति का ऐसा अपराध, जिससे सा॰ी जाति बदनाम होती है, बिना दण्ड के नहीं छोड़ा जा सकता—यह इस बात का साक्षी है कि जाति के मुखिया अपनी जाति के सम्मान की रक्षा के लिये न्याय ही करेंगे और और अपनी जाति के सब लोगों को अपने-अपने कर्त्तव्य की सीमा में बांधे रखेंगे। यह समझ लेना चाहिये कि प्रत्येक जाति के अपने विधि-विधान होते हैं अथवा यह कहा जा सकता है कि उन सबके अपने-अपने रीति-रिवाज होते हैं जिनके अनुसार उन्हें कड़े से कड़ा दण्ड भी मिलता है।" (पृष्ठ ३२, पंक्ति १९ से ३२)

६. जातिदण्ड

"अपराध अनेक प्रकार के होते हैं, जिनके सम्बन्ध में जाति के मुखिया केवल अपराधकर्त्ता के विरुद्ध ही नहीं, बल्कि उन सब व्यक्तियों के विरुद्ध जिन्होंने उसमें किसी प्रकार का भाग लिया हो, कार्यवाही कर सकते हैं। इस प्रकार यह जाति का प्राधिकार ही है जिसके बुद्धिमत्तापूर्ण नियमों और अबाध अधिकार द्वारा अच्छी व्यवस्था रखी जाती है, बुराइयों का दमन किया जाता है और हिन्दू समाज को असभ्य अवस्था में निमग्न होने से बचाया जाता है।" (पृष्ठ ३३, पंक्ति ७ से १४)

"कभी-कभी देखने में आता है कि जाति व्यवस्था के कारण एक जिले के सब व्यापारी अपनी दूकानें बन्द कर देते हैं, मजदूर लोग अपने कार्यक्षेत्र से चले जाते हैं, कारीगर अपने कारखानों के काम छोड़ देते हैं। यह सब केवल इसलिये होता है कि उनकी जाति के किसी सदस्य का साधारण अपमान कर दिया जाता है या उससे कुछ ज्यादती की जाती है। पीड़ित समुदाय इस प्रकार के प्रतिकार में दृढ़तापूर्वक तब तक अड़े रहते हैं जब तक कि उनके कष्ट का शमन नहीं कर दिया जाय तथा जो उसके लिये जिम्मेदार हैं उनको दण्ड नहीं दे दिया जाता।" (पृष्ठ ३३, पंक्ति ३४ से ४१)

७. हिन्दू सन्तति की पवित्रता

"जाति-प्रथा का दूसरा लाभ है परिवार की वंशानुगत परम्परा तथा सन्तति की पवित्रता। यह हिन्दुओं की एक विशेषता है और इससे एक समाज या जाति का रक्त दूसरे से कभी मिश्रित नहीं होने पाता। विवाह केवल उसी समाज में अथवा कम से कम उसी जाति में होते हैं। जैसे योरोप के देशों में अज्ञात या निम्न श्रेणी के वंश के व्यक्तियों के साथ सम्बन्ध स्थापित करने के कारण जो परिवार भ्रष्ट हो गये हैं उन्हें बदनामी का भय होता है, वैसा भय भारतवर्ष में होने की गुंजाइश नहीं है। उच्च वर्ण का हिन्दू अपनी जाति-उपाधि एवं वंशावली बताये बिना ही दो हजार वर्ष से भी अधिक पुराने अपने पूर्वजों का किसी प्रकार के प्रतिरोध के बिना ही अनुसन्धान कर सकता है। अपने उच्च वर्ण के अतिरिक्त अन्य किसी आधार के बिना वह व्यक्ति निर्धन होने पर भी अपने उच्च वर्ण के

आधार पर ही किसी भी जगह उपस्थित हो सकता है और वैवाहिक सम्बन्ध के लिये नीचे वर्ण के धनवान से भी अधिक आदर पाता है।'' (पृष्ठ ३४, पंक्ति १ से १७)

८. भारतीय कला और निर्मित वस्तुएँ

''यह उक्ति भी न्याय-संगत है कि जाति-भेद के कारण ही भारत की कला और उद्योग सुरक्षित रहें। यदि शासकों का लोभ बाधक न होता तो उन चीजों में भारत प्रवीणताका वहुत ऊँचा स्तर प्राप्त कर लेता। इसी लक्ष्यको लेकर इजिप्ट (मिश्र देश) के लोगों ने भी जाति-विभाजन किया और उनके विधि-विधान ने देश के प्रत्येक व्यक्ति को एक निश्चित कार्य दिया। निःसंदेह उनके विधि-विधानकर्त्ताओं ने यह विचार किया कि इसी उपाय से सभी प्रकार की कला और उद्योग पीढ़ी-दर-पीढ़ी उन्नत होते जायेंगे क्योंकि मनुष्य उसी काम को अच्छी प्रकार कर सकता है जिसे वह वरावर करते हुए देखता आया हो और जिसका वचपन से ही वह अभ्यस्त हो।'' (पृष्ठ ३४, पंक्ति २३ से ३६)

''उनके कारीगरों में न तो परिश्रम की कमी है और न कौशल की। योरोपियनों की वस्ती में ऐसे वहुत-से देशी शिल्पी-कारीगर मिलेंगे जहां उनको उनकी योग्यता के अनुसार पैसे मिलते हैं और जिनकी कारीगरी पश्चिम के श्रेष्ठ शिल्पी-कारीगर से भी उत्तम श्रेणी की होगी। इसके अतिरिक्त उन देशी कारीगरो को योरोपियनों के ढंग के के अनेक प्रकार के औजार और अन्य यन्त्र भी काम में लेने की आवश्यकता नहीं पड़ती, जिनके नाम भी खास तौरपर स्मरण करने पड़ते हैं। एक या दो वसौली, वैसे ही कुछ आरी और रन्दे, जो इतने साधारण ढंग के होते हैं कि योरोप के कारीगर उनसे कुछ भी काम नहीं कर सकते, केवल ऐसे हो कुछ औजार देशी वढ़इयों के हाथों में होते हैं। रोजपर काम करनेवाले सुनारों के हाथ के काम करने के औज़ारों में एक नन्ही सी निहाई (एनविल), एक छोटी-सी धातु गलाने की घरिया (क्रूसविल), दो-तीन छोटी-छोटी हथौड़ियाँ और कुछ रेतियाँ होती हैं। ऐसे साधारण औजारों से धैर्यवान् हिन्दू कारीगर-धन्य है उसके परिश्रमको—ऐसी कारीगरीका काम करके दे सकते हैं जो विदेशों से आयात की हुई मूल्यवान वस्तुओं की तुलना में रखी जा सकती है।''

(पृष्ठ ३५, पंक्ति से २८)

''यदि हिन्दू कारीगर को अपने स्वाभाविक उद्योग के लिये उचित प्रोत्साहन मिला होता तो वह अपनी कला और विनिर्माण शक्ति से क्या करके दिखाता – इस वात की जानकारी प्राप्त करनी हो तो इसके लिये जुलाई के यहाँ या कपड़े की छपाई करनेवाले (किसी छिपी) के यहाँ चलिये और वहाँ उनके औजारों और यन्त्रोंका गौर से पराक्षण कीजिये, जिनके द्वारा वे लोग अद्वितीय मस्लिनका कपड़ा, वहुत वारीक कपड़ा, सुन्दर रंगीन कपड़ा तैयार करते हैं, जिनकी विश्व में सर्वत्र प्रशंसा होती है और जिनको योरोप में सजावट की वस्तुओं में बहुत उच्च स्थान प्राप्त है।''

(पृष्ठ ३५, पंक्ति ३२ से ४०)

९. जातियोंका संगठन

"कपड़ा बुनने के पूर्व जिस धागे की आवश्यकता होती है उसको बनानेवाला चर्खा, तथा कर्घा एवं अन्य यन्त्र-औजार—जो इस काम में लाये जाते हैं, सभी इतने साधारण हैं और इतने थोड़े हैं कि उन सबका मिलकर बोझा एक आदमी द्वारा उठाये जाने के लायक भी मुश्किल से होगा। सचमुच किसी जुलाहे को अपना स्थान वदलने और नये स्थान पर पहुँचते ही कार्य प्रारम्भ करने के लिये आवश्यक सारा सामान अपनी पीठ पर लादकर ले जाते हुए देखनेका अवसर वहुत ही कम आता है।

उनके छपे हुए छींटके कपड़े—जिनकी प्रशंसा मस्लिन (मलमल) से कम नहीं है—इसी प्रकार के साधारण ढंग से ही तैयार किये जाते हैं। कपड़ा फैलाकर तानने के लिये तीन-चार वाँस, कुछ रंग चढ़ाने की वुरुश, कुछ रंग रखने के टूटे-फूटे वर्तनों के टुकड़े और उन रंगों को मिलाने का गड्ढेदार पत्थर—वस इतना-सा ही उनके व्यापारका सामान होता है।"

(पृष्ठ ३६, पंक्ति १ से १६)

"इस प्रकार हिन्दू समाज के शृङ्खलाकी कड़ी इस दृढ़ता और निष्कपटता के साथ बनायी गई थी कि उसको आज तक कोई भी नहीं तोड़ सका।

भारत के प्राचीन विधि-विधान के निर्माताओं ने जाति प्रथा की स्थापना द्वारा इसी लक्ष्य की पूर्ति की और इसी से उनको विश्व के इतिहास में अद्वितीय प्रतिष्ठा मिली। उनकी यह व्यवस्था हजारों वर्षों की परीक्षा में भी सफल उतरी है और विश्व के इस भाग में अनेक उलट-फेर और परिवर्तनों के वावजूद यह दीर्घकाल से जीवित वनी रही है। हिन्दुओं को उन विदेशी आक्रमणकारियों के अधीन रहना पड़ा है, जिनके धर्म, विधि-विधान, रीति-रिवाज उनसे वहुत भिन्न थे। इतने पर भी भारत के लोगों पर विदेशी ढंगों कों लादने की सम्पूर्ण चेष्टाएँ निष्फल रहीं और विदेशी शासन भी हिन्दू प्रथाओं पर साधारण चोट के अतिरिक्त और विशेष कुछ नहीं कर सका। सर्वप्रथम यह जाति प्रथा ही थी जिनको बचाये रक्खा।"

(पृष्ठ ३६, अन्तिम ६ पंक्तियाँ एवं पृष्ठ ३७, पंक्ति १ से १०)

१०. जाति से बहिष्कार

"सव प्रकार के दण्डों में-से हिन्दू के लिये सबसे कठिन और असह्य दण्ड है—जाति विरादरी से अलग कर देना।"

(पृष्ठ ३८, पंक्ति १ से ३)

"जाति के सरपञ्च प्रायः सभी जिलों में होते हैं। जाति व्यवस्था सम्बन्धी सन्देहास्पद या कठिन प्रश्न सव उन्हीं के पास ले जाये जाते हैं। ऐसे प्रश्नों के निर्णय में सहायता लेने को वे सरपञ्च कुछ ऐसे बुजुर्गों को बुला लेते हैं जो झगड़े के मामलों को जटिलता के जानकार होते हैं।

जयमङ्गलाक्रोडपत्रम्

धर्मातिरिक्तेनोपायेन पालनमसम्भवि

ननु राजप्रजाभ्यां यदि धर्मः पाल्यते, तर्हि तयोः संरक्षणं संभविष्यति, नान्येनोपायेन, इत्यत्र किं बीजम् ? इति चेदभिधीयते । पालनमित्यस्यार्थः पारस्परिकविश्वास्यतया बाधानिरासपूर्वकं स्वस्वमर्यादामनतिक्रम्य संरक्षणम् । विश्वासश्च ममेष्टं साधयिष्यती'ति निश्चयः । राजा भवतु, प्रजा वा भवतु, यः, कोऽपि वा

जाति के नियमों के उल्लंघन के कारण अथवा किसी ऐसे सार्वजनिक अपराध के कारण—जिसके लिए दण्ड न दिये जाने पर समाज के कलंकित होने का डर हो- जाति से बाहर निकालना एक प्रकार का सामाजिक बहिष्कार है जो उस अभागे मनुष्य का संसार से सम्बन्ध-विच्छेद कर देता है और बाकी समाज के किसी भी काम में वह सम्मिलित नहीं हो सकता । अपनी जाति खोकर वह केवल अपने परिवार और मित्रों को ही नहीं खो बैठता, बल्कि अपनी स्त्री और बच्चों से भी हाथ धो बैठता है, जो उस अभागे के अपमान में हिस्सा बटाने की जगह उसको अपने भाग्य पर ही छोड़ देते हैं । कोई भी उसके साथ रोटी खाने का साहस नहीं कर सकता अथवा उसको एक बूँद पानी तक नहीं देता । यदि उस अभागे के विवाह योग्य कन्याएँ हों तो उनसे कोई विवाह नहीं करता और उसी प्रकार उसके लड़के को भी कोई अपनी कन्या देने को राजी नहीं होता । वह जहाँ भी जाता है, सब उससे अलग रहते हैं, उसकी तरफ घृणा से अँगुली उठाते हैं और ऊसको जाति से बहिष्कृत मानते हैं ।''

(पृष्ठ ३८, पंक्ति ६ से २६)

''अपने आचरण से भ्रष्ट ब्राह्मण से अपनी प्रतिष्ठा और सच्चरित्रता का ध्यान रखने वाला कोई साधारण शूद्र भी न तो मिलेगा और न बात करेगा''

(पृष्ठ ३८- पंक्ति ३० से ३२)

११. जाति उत्सवों की प्राचीनता

''निस्संदेह विश्व में कोई भी ऐसा दूसरा राष्ट्र नहीं है जो अपने सामाजिक रीति-रिवाजों का इतने दीर्घकाल से उसी रूप में संरक्षण किये रखने का गर्व कर सके ।

हिन्दुओं के प्राचीन विधि-विधान निर्माताओं ने इन रीति-रिवाजों के साथ कुछ बाह्य उत्सवों को मिलाकर इनको स्थिरता प्रदान करने में बड़ी बुद्धिमत्ता का कार्य किया और इस प्रकार मनुष्यों के मन में विश्वास जमाकर इनके निष्ठापूर्वक पालन को सुनिश्चित किया । इन उत्सवों को बराबर निश्चित रूप से मनाया जाता है, और इनके भिन्न-भिन्न रूपों द्वारा इनको विकृत नहीं होने दिया गया । जिन रूपों के कारण बिना गम्भीर परिणामों के लापरवाही की जा सके, उनमें से यदि किसी एक का भी पालन करने में चूक की जाती है तो चाहे वह कितना भी तुच्छ हो, उसको दण्ड दिये बिना नहीं छोड़ा जा सकता ।''

(पृष्ठ ४६, पंक्ति ८ से १९)

जयमङ्गलाक्रोडपत्रम्

भवतु, तस्य यदि अर्थे रुचिः स्यात् तदा स मदीयं इष्टं साधयिष्यति इति निश्चय-विषयः स्यादेवेति वक्तुं न शक्यते यत्र च विश्वासो नास्ति स मित्रं वा रक्षको वा भवतीति न वक्तुं शक्यते, तस्य अर्थप्राणहरणस्वाभाव्यात्। तदुक्तम् अर्थशास्त्रे आबलीयसाधिकरणे—

---

१२. भारतीय जुलाहे

"भारपीय विनिर्माण-कला और जो कारखाने विश्व में प्रसिद्ध मुलायम मलमल (मस्लिन), वढ़िया कपड़े और सुन्दर कपड़े आदि बनाते हैं, उन कारखानों के सम्बन्ध में लेखकों की वातें पढ़कर योरोप के वहुत से लोगों ने यह समझा कि ऐसे वढ़िया-बढ़िया सामान वनाने के भारतीय कारखानों में भी मैनचेस्टर, वरमिंघम, लिओन्स एवं योरोप के अन्य शहरों की तरह नमूने के माडल रक्खे जाते होंगे। किन्तु सच्चाई यह है, जिससे अनेक लोग जानकार नहीं हैं, कि ये सब चीजें घास,फूस की छतवाली और मिट्टी की दीवाल वाली झोपड़ियों में वनती हैं जो लगभग २०-३० फीट लम्बी और ७-८ फीट चौड़ी होती हैं। इस प्रकार के काम करने के कमरे में जुलाहा अपने करघे का ढाँचा फैला कर रखता है और जमीन में वैठता है तथा करघे की ढरकी (Shuttle) चलता रहता है। वहीं उसका परिवार, गायें और मुर्गे-मुर्गियाँ रहते हैं। जिन औजारों का वह उपयोग करता है वे बहुत ही प्राचीन ढंग के हैं और उसके व्यापार का कुल सामान इतना-सा है कि जो एक आदमी उठा कर ले जा सकता है। सच पूछा जाय तो इन भारतीय कारखानों का यही रूप है।"

(पृष्ठ ८० की अन्तिम ७ पंक्तियाँ और पृष्ठ ८१ की प्रथम ११ पंक्तियाँ)

१३. यन्त्रों (मशीनरी) का प्रचलन

"आधुनिक भारत की गरीबी का दूसरा गम्भीर कारण है मशीनों के प्रचलन तथा योरोप में निर्माण-सम्बन्धी विकसित तरीकों के प्रसार के परिणामस्वरूप मजदूरों की माँग में कमी। वास्तव में अब योरोप किसी भी वस्तु के लिए भारत पर निर्भर नहीं रहा क्योंकि उसने भारत से ही सीखी हुई कला द्वारा उसे मात दे दी है। यहाँ तक कि जिन विलक्षण उद्योगों तथा विनिर्मित वस्तुओं के लिए हम अनादि काल से भारत पर निर्भर रहे आये उनके लिए भी अब नहीं रहे। सच्चाई यह है कि अब पासा पलट गया है और यह परि-वर्तन भारत के पूर्ण विनाश का द्योतक है।" (पृष्ठ ९४, पंक्ति २६ से ३५)

"ऐसी दयनीय स्थिति है जिसमें हिन्दू फंस गये हैं और वह स्थिति दिन पर दिन विगड़ती जा रही है—धन्य है मशीनों की गर्वपूर्ण उन्नति जिसके लिए कुछ राष्ट्र गौरव मानते हैं। काश! यदि उन औद्योगिक विकास के आविष्कारक बेचारे लाखों करोड़ों हिन्दुओं के श्राप को सुन सकते। उनके कारण तथा उनके आविष्कारक मस्तिष्क के कारण जिस भयंकर दरिद्रता ने सारे प्रान्त को आच्छादित कर लिया

जयमङ्गलाक्रोडपत्रम्

"त्रयोऽभियोक्तारो धर्मलोभासुरविजयिन इति। तेषामभ्यवपत्या धर्मविजयो तुष्यति, तमभ्यत्रपद्येत परेषामपि भयात्। भूमिद्रव्यहरणेन लोभविजयी तुष्यति, तमर्थेनाभ्यवपद्येत। भूमिद्रव्यपुत्रदारप्राणहरणेन असुरविजयी, तं भूमिद्रव्याभ्यां उपगृह्याग्राह्यः प्रतिकुर्वीत।" इति (कौ० अ० पृ० ४०६) इदमेवाभिप्रेत्य कामन्दकीय जयमंगलायामुक्तम् "धर्मासुरलोभविजयिनस्त्रयो राजानः तेषां धार्मिकं धर्मविजयिनं धर्माविरोधेन प्रवृत्तत्वात् प्रजापतिमिवाभिमन्यन्ते प्रजाः लोकाः। लोभासुरविजयिनौ तु सर्वलोकोद्वेगकारित्वादनभिमतौ"। इति। अतः भारतीयराजनीतिः पारस्परिकविश्वाससम्पादनार्थं उपर्युक्तार्थशास्त्रावचनानुसारेण राजानं तदनु प्रजां च धर्मविजयिनीं निर्मातुमभिलषति। एतद्रीत्या धर्मविजयित्वाभिमानी राजा प्रजया आद्रियेत चेत् तर्हि दाढर्येन वक्तुं शक्यते यत्—

प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम्। का० नी० १ सं०

इति पद्यं सार्थकं भवेदिति। अतः राजनीतिमर्यादानुसारेण राजप्रजयोर्मध्ये पारस्परिकविश्वास्यत्वसंपादनाय संरक्षणहेतुत्वेन धर्मं विना अन्योपायः नास्तीति। एतदनुबन्धीतिहासोऽपि उपलभ्यते तथाहि—

नमे स्तेनो जनपदे न कदर्यो न मद्यपः।
नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः।' (वा० रा० उ० का०) इति।

है, इसको यदि मेरी तरह वे भी अपनी आँखों से देख लेते तो यदि उनमें से मानवता का बिल्कुल ही नाश न हो गया होवे तो वे निश्चय ही अपने विनाशकारी नयी पद्धतियों पर पाश्चात्ताप करते जिससे उन्होंने लाखों-करोड़ों गरीबों को हानि पहुँचा कर मुट्ठी भर थोड़े से आदमियों को धनी बना दिया है। इन गरीबों के लिए अपने सर्वनाशकारी उन प्रतिद्वन्द्वियों का नाम भी घृणा की वस्तु बन गया है।"

(पृष्ठ ९५, पंक्ति १५ से २९)

१४. हिन्दुओं का स्वाभाविक सनातनीपन

"हिन्दुओं की नयी पीढ़ी (race) बनाने के लिए उन्हें नास्तिक और जंगली-गँवार बनाकर उनकी सभ्यता, धर्म, राज्य-समाज व्यवस्था के आधार को ही नष्ट करने से अपना कार्य आरम्भ करना होगा। इस प्रकार के भयंकर उलट-फेर को पूर्ण करके तब शायद हम उनके लिये विधि-विधानकर्त्ता और धर्मगुरु बन सकते हैं। इस पर भी हमारा कार्य आधा ही पूरा होगा। जिस जंगलीपन, अराजकता, नास्तिकता गहरे गर्त में हम उनको ढकेल देंगे उसमें से उनको बाहर निकाल कर तथा उन्हें नये विधि-विधान, नयी राज्य-समाज व्यवस्था, नया धर्म देकर भी उन्हें नयी प्रकृति (नया स्वभाव) तथा भिन्न-भिन्न प्रकार की नयी प्रवृत्तियाँ हमारे लिये देना बाकी ही रहेगा।"

(पृष्ठ ९६, पंक्ति २० से ३१)

जयमङ्गलाक्रोडपत्रम्

धर्मोऽपि वेदतदनुयायिस्मृत्यादिप्रणीत एव अत्र पालनोपायत्वेन विवक्षितः। तदुक्तम्—

'तस्मात् धर्मं पुरस्कृत्य यतेतार्थाय भूपतिः।
धर्मेण वर्धते राज्यं तस्य स्वादु फलं श्रियः ॥' इति। (का० नी० स० १)

टी० 'मन्वादिप्रणीतपालनं धर्मः।' इति।

धर्मसंवरणस्यानौचित्यम्

ननु विश्यास्यत्वसंपादनार्थं त्रयीप्रोक्तः धर्मः संवरणरूपेण अनुष्ठाने अस्तु कामं, तस्य वांस्तविकत्वमस्तीति कुतो निर्णेतव्यम्? इति चेन्न। यद्यपि संवरणं कृत्वा किञ्चित्कालपर्यन्तं प्रजायाः आत्मनि विश्वास्यत्वमुत्पादयितुं न शक्यमिति न स्थितिः। तथापि साङ्कर्यस्य प्रवृत्तिः एतावन्मात्रेण अवरोद्धुं न शक्यते। सति च साङ्कर्ये तद्दोषप्रसङ्गेन विपदादिषु सः राजा एकरूप एवस्थातुन्नार्हेत् इति उपरि विवेचितमस्ति। सङ्करजातस्य प्रकृतौ विना फलानुसन्धानं क्लेशसहत्वे सात्विकं श्रमकारित्वं शौर्याद्युत्साहगुणवत्वं स्थायिमित्रावर्जनकुशलत्वं विनयपुरस्सरः प्रभावः, दारिद्र्येऽपि आत्मानुसन्धानसहितः सुखानुभवश्च सातत्येन दृष्टिगोचरा भवन्त्येवेति न स्थितिः। यद्यपि सङ्करजातेऽपि उपयुक्तगुणा आपाततो दृश्यन्ते तथापि तत्र सङ्करजातविषये इदं पद्यं स्मर्यन्ते—

'काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
'वसन्तसमये प्राप्ते काकः काकः पिक' पिकः। इति

एतन्यायेन 'प्रकृतिस्त्वां नियोक्ष्यती'ति न्यायेन च विपत्तौ संव्यवहारकाते वा प्रकृत्यनुगामित्वं एकशृगालहुङ्कारे सति तत्समीपवर्त्यपरशृगालस्य हुङ्कार इव अनिवार्यमेव भवति। तदिदं 'स्वभावप्रभवैर्गुणैः' इति गीतापद्यमुद्धृत्य प्रागपि प्रपञ्चितमस्ति।

कुलीनेऽपि क्वचित् ते गुणा न दृश्यन्ते इत्यत्र कारणं तु प्राक्प्रपञ्चितम् तत एवानुसन्धेयम्। अतः विना फलानुसन्धानं क्लेशसहत्वादयः उपर्युक्ताः गुणाः यदि राजनीतौ अभिलष्यन्ते तर्हि तत्संपादनाय धर्मस्य संवरणमात्रत्वभावना राजनीतो सर्वथा दूरीकरणीयैवेत्यलमतिविस्तरेण।

किञ्च उपर्युक्तानां क्लेशसहत्वादिगुणानां नीतिविदा संपादनं क्रियते तत्रापि मूलभूतं बीजं तस्य नीतिविदः किञ्चन आभिमानिकं सुखमस्ति इत्यपि स्मर्तव्यम्। स च अभिमानोऽकुलीनेषु कथमिव संभवेत्? यतः आभिमानिकसुखं कीदृशं भवतीति न्यायपरिशुद्धौ वैशेषिकभाष्ये च नीतिवाक्याभृते च विवृतमस्ति।[१]

---

१ नीति वाक्याभृते—

आभिमानिकरसानुबिद्धा यतः सर्वेन्द्रियप्रीतिः स कामः ३ कामसमुद्देश ॥१॥ न्यायपरिशुद्धौ वैशेषिक भाष्ये च ६ आन्वीक्षिकी समुद्देशे च।

जयमङ्गलाक्रोडपत्रम्

इदमाभिमानिकं सुखं संवरणमात्रं बुद्ध्वा धर्मस्य अनुतिष्ठासोः न कदापि भवितुमर्हति। यत्र नीतौ त्र्य्याः बहिष्कारः वर्तते तद्रीत्या क्लेशसहादिकर्मणि आभिमानिकं सुखं संवरणशीलेषु अकुलीनेषु कदापि नोत्पत्तु मर्हति। क्षत्रियः परार्थतया कर्तव्यबुद्ध्या हसन्मुखः स्वकीयमैहिकं सर्वं सुखं पृष्ठतः कृत्वा महता उत्साहेन असिधारव्रतं सङ्कल्प्य यदाचरति, तदिदमसिधाराव्रतं वंशपरंपराप्राप्तशुद्धसंस्कारवद्भिः आभिमानिकसुखम् स्वकर्तव्यविषये अनुभवद्भिरेव संपादयितुं शक्यते। युद्धस्थलात् परावर्तनप्रयुक्तजनिष्यमाणापकीर्त्यपेक्षया असिधारायां प्राणोत्सर्गं वरं मन्यमानः यशसि अभिरुचिश्च तस्यैव भवितुमर्हति यः परलोकवादी स्यात् यः किल शरीरात्मवादी वर्तते स तु वर्तमानशरीरं परहिताय परित्यक्तुं न कदापि अभिलषति अतः तत्र सर्वविधसुखसामग्रीसमुपलब्धिसत्वे आभिमानिकसुखात्मकं उपर्युक्तं हेतुं परित्यज्य अपरोनास्ति हेतुः कश्चित् तथाविधो यः अस्माभिः निरूपयितुं शक्येत। भारतीयसंस्कृतौ तु संस्कृतेषु वंशेषु विशुद्धमातापितृजन्यत्वात् परलोकरुचेः जागरूकत्वाच्च तत्सुलभं भवितुमर्हति। तदुक्तं—

सत्वात्मनाममलधर्मविशेषजन्मा, जन्मान्तरानुभववासनयावतीर्णः।
सर्वात्मसंपदुदयातिशयैकहेतुः जागर्ति कोऽपि हृदि मानमयो विकारः॥ इति

अतः संवरणमात्रेण अन्तःकष्टमनुभवन् युद्धे विपदादौ वा अनेकान् क्लेशान् निष्कारणं प्रसह्य अग्रेसरत्वं नोपपद्यते। इति संवरणं धर्मस्य नोपयुक्तमिति

अथ धर्मस्य वास्तविकत्वम् अपौरुषेयवेदतदनुयायिशास्त्रपुराणाद्याप्तवृद्धवाक्यै रभिहितत्वात् सफलत्वदर्शनाच्च तद्वैपरीत्ये साधकहेत्वनिर्णयाच्च सर्वथा सिद्धम्। अधिकं वेदापौरुषेयत्व सर्वस्वत, मीमांसा तर्कपादादि शान्तिका अग्रद्वत ग्रन्थैः बोध्यम्।

'अभिमानवतां लाभं विनाऽपि धर्मे प्रवृत्त्युपपत्तिः'

नन्वेवं आभिमानिकसुखमात्रेण मानिनः ऐहिकं सुखमनपेक्ष्य कल्पनातीते महति तपस्यादिकर्मणि, युद्धादौ, मर्यादितलाभवति व्यापारे सेवाकार्येऽपि वा प्रवृत्तिः कथमुपपन्ना भवति इति चेन् निरूप्यते।

अभ्यासाभिमानसंप्रत्ययविषयाः सुखस्य कारणानि ॥१२॥
क्रियातिशयः परिपाकहेतुः अभ्यासः ॥१३॥
प्रश्रयसत्कारादिलाभेन आत्मनः उत्कर्षसंभावनम् अभिमानः ॥१४॥
अतद्गुणे वस्तुनि तदगुणत्वेनाभिनिवेशः संप्रत्ययः ॥१५॥
इन्द्रियमनसोस्सन्तर्पणो भावो विषयः ॥१६॥ सुखनिरूपणे

जयमङ्गलाक्रोडपत्रम्

रसमयजीवनस्य अयं स्वभाव एव यत् यजुःशिरस्कं ऋग्दक्षिणपक्षवन्तं, सामोत्तरपक्षवन्तं मनोमयशरीमुररीकृत्य ये स्थिताः, ते विगलितपरिमितप्रमातृभावाः साधारणैः अनुष्ठातुमनर्हेऽपि कर्माणि महता सुखेन यथा प्रवर्तन्ते, न तथ अन्नमये प्राणमये कोशे वा स्थिताः। तदुक्तं भोजराजेन—

तद्भाव भावितविभाव-विभाव्यमानो।
यो भाव्यते मनसि भावनया स भावः।
यो भावनापथमतीत्य विवर्तमानः।
साहङ्कृतौ हृदि पुनः स्वदते रसोऽसौ। इति।

अयं चानुभवः तत्तत्कुलीनानामेव नान्येषामिति।

अत्र उपपत्तिः उच्यते। जीवने जीवितस्य अवलम्बनीयं वस्तु किं तदस्ति, येन जीवनं सुस्थिरं भवेदिति चिन्तायां स्थायी चित्तसन्तोष एव तादृशं वस्तु इति वक्तव्यं भवति। यतः तमपहाय सांसारिकपदार्थेषु कोऽपि अन्यतमः पदार्थः यदि-आलम्ब्येत तर्हि तस्य नश्वरत्वात् अत एव तल्लाभाय कृतस्य प्रयत्नस्य वैफल्यात् मनोरथपूर्तिं प्रति अक्षमत्वात् तस्करादिभिः अपह्रियमाणत्वाच्च पर्यन्ते श्रम एव हस्तगतो भवति। ततो दुःखं च। तदुक्तम्—

बालस्तावत् क्रीडासक्तः तरुणस्तावत् तरुणीरक्तः।
वृद्धस्तावाच्चिन्तामग्नः परे ब्रह्मणि कोऽपि न लग्नः।
पितृमातृमयो बाल्ये यौवने दयितामयः।
पुत्रपौत्रमयश्चान्ते मूढो नात्ममयः क्वचित्॥' (गरुड प्र०धर्मकाण्ड अ० १२.१९)

तथा— 'भोगे रोगभयं सुखे क्षयभयं वित्तेषु चौराद्भयं।
दासे स्वामिभयं जये रिपुभयं वंशे कुयोषिद्भयम्॥
माने ग्लानिभयं गुणे खलभयं कार्ये कृतान्ताद् भयं।
सर्वं नाम भयास्पदं भगवतः शम्भोः पदं निर्भयम्।' इति। (वैराग्यशतके)

अतः जीवनस्यावलम्बनार्थं वैराग्यमुपदिष्टम्। तत्पर्यायत्वेन शम इति संज्ञया शास्त्रेषु उच्यते। शमश्च अभीप्सितवस्तुनः निवृत्तौ सुखवासनारूपो भवति। तदुक्तं गोकुलनाथोपाध्यायैः—सा चेष्टसाधनस्यापि बलवदनिष्टसाधनत्वावगाहिनी द्वेषद्वारा निवृत्तिं भावयन्ती शमसुखं जनयति। इति। का० प्र० उल्लासे, पृ० १५३

अस्य बीभत्सापेक्षया इदमेवान्तरं यत्, किंचिद्वस्तुविषये ईप्सिते संजातायां घृणायां ततो निवर्तने या सुखवासना सा वीभत्सः। सर्वजगत्विषपिण्यां जुगुप्सायां सत्यां ततः निवर्तने या सुखवासना सा 'शमः'। एवञ्च यतः निवर्तनमावश्यकं तद्विषयिणी जुगुप्सा शौचफलमित्युच्यते। तदुक्तम्—शौचात् स्वाङ्गजुगुप्सा इति। यदीयं न परिपाल्यते, तर्हि कस्मादपि विषयान्निवृत्तिर्न भवति। तथा सति विषयलोलुपत्व-

जयमङ्गलाक्रोडपत्रम्

स्याभिवृद्धौ राजा मनोरथपूर्त्यर्थं मात्मानं रक्षेद् वा प्रजामौरसतुल्यां वेति सुधिय एव विवेचयन्तु।

यथाशक्ति परित्राणं दुःखिनामविशेषतः। विना रागेण सर्वत्र सुखिनामनुमोदनन्[1]। इति राजनीतिसम्मतं यत्कार्यम् तत् शमप्रधानेन चित्तसन्तोषमनुभवतैव आभिमानिकेसुखे[2] स्थितेन राज्ञा कर्तुं पार्यते नान्येन।

साम्प्रतं तु उपर्युक्तं परित्राणं काम्यते। परं धर्मः खण्ड्यते विषयेषु जुगुप्सामपसार्य शौचं च परित्यज्यते अर्थात् मांसभक्षणपरस्त्रीस्पर्शना भक्ष्यभक्षण—गोमांसभक्षणादिषु लोलुपत्वं प्रसार्यते।

किञ्च लोलुपत्वेन उपभुक्तेष्वपि विषयेषु न वैरस्यम्। पुनर्भोजनेच्छा मनसोऽतृप्तिः दिदृक्षा च उतरोत्तरं अभिवर्धिष्यन्ते एव।' एवं सत्यामवस्थायां कौ वा आत्मानं गोपायेत्? ब्रह्मचारी वा भूयात्? स्त्रियं वा न गच्छेत्? किं न हिंस्यात्? प्रतिज्ञां वा नातिक्रमेत्? सुहृज्जनान्न तिरस्कुर्यात्, गुरून् वा न लङ्घयेत्, दीनोभ्यो वा दद्यात्, तृणाय मन्येत। राज्यं वा परित्यज्य वनं गच्छेत्, भरत इव भ्रातरं वा अन्वियात्, प्रजां रंजयेद् वा इत्यादयः अनेकाः समस्याः उपतिष्ठेयुः। अतः जीवनस्य आलम्बनार्थं उक्तसमस्यानां समाधानाय च कुलीनैः स्वकर्मणि अभिमानशीलैः चित्तसन्तोष एव महदौषधमिति मत्वा अवलम्बयितव्यः। यदि तु प्रमाणेन अप्रमितेषु बाधितेषु वा अर्थेषु निमित्तेषु सः अवलम्ब्येत तर्हि सन्तोषविषयस्यार्थस्य असत्यत्वात् निराधारः स्यात्। अतः प्रमाणप्रमितत्वं अर्थेषु, नीतिविदा चित्तसन्तोषस्य स्थैर्यार्थं चिन्तनीयं भवति। तत्रापि परलोकहेतुना अनुष्ठाने ऐहिकजीवने चित्तसन्तोषो न भवितुमर्हतीति प्रमाणत्रयसन्निवेशो यत्र वर्तते तथाविधा नीतिः चित्तसंन्तोषार्थमनुसर्तव्या भवति। तेन लौकिकेषु वैदिकेषु कविसमयसिद्धेषु चार्थेषु परिचयप्रौढ्या तद्विषये व्यवहारोऽपि आदर्शरूपतां गतः विदग्धव्यवहारत्वेन सुलभो भवति।

तथा च सूक्ष्मेक्षिकया विचार्यमणे चित्तसन्तोषः विदग्धव्यवहारश्च मति-

---

१. तदुक्तं भावप्रकाशने।

'शाकमूलफलैरन्नैः शरीरस्थितिसाधनम्।
व्रतोपवासनियमो वत्कलाजिनधारणम्॥
अहिंसा सर्वभूतानामविशेषादनुग्रहः।
अङ्गेषु कार्श्यं कार्कश्यं स्नानं त्रिषवणोचितम्॥
ऋज्वायतासनं ध्यानं नासाग्राहितलोचनम्।
विषयेभ्यो नियमनमिन्द्रियाणां निवृत्तये॥' इति।

२. 'रसाभिमानोऽहंकारः।'

जयमङ्गलाक्रोडपत्रम्

भावस्य अनुभावरूपो येन अनुभूयते तदाभिमानिकं सुखं महनीयानां मानवानां प्रवृत्तये सोपपत्तिकं कारणं भवति। तदेतत् भावप्रकाशनात् स्फुटीभवति।

नानाशास्त्रार्थनिष्मन्ना मतिः स्याच्छुतधारिणी।
संशयच्छेदनैः शिष्यहिताधानर्थदर्शनैः॥
वर्ण्यते चित्तसन्तोषात् विदग्धव्यवहारतः इति॥

"चित्तसन्तोषस्य नीतावुपयोगित्वम्"

ननु चित्तसन्तोषलाभाय मनोरथपरिपूर्त्यादयः शौचातिरिक्ताः अन्येऽपि उपायाः कथं न संभवितुमर्हन्ति इति चेन्न। यदि मनोरथपूर्तिः धर्ममन्तरा अर्थार्जनादिभिः संभवेत् तर्हि चित्तसन्तोषोऽपि स्यात्। परन्तु पृथिव्यां व्रीहियवं सर्वमपि समर्प्यते एकस्मै, तथापि सन्तोषः तस्य स्यादिति नास्ति स्थितिः। तदुक्तम्-

'पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
न दुह्यन्ति मनः प्रोतिं पुसः कामहतस्य ते॥

तथा हिन्दी भाषायां कबीरदासेन उक्तम—

'गोधन गजधन बाजिधन रतन धन सबधन खान।
जो आवे सन्तोष धन सब धन धूर समान॥' इति।
(क० साखी ग्रन्थ)

तथैव गरुड़पुराणे—

इच्छति शती सहस्रं साहस्री लक्षमीहते कर्तुंभ्।
लक्षाधिपती राज्यं राजाऽपि सकलां धरां लब्धुं।
चक्रधरोऽपि सुरत्वं सुरभावे सकलसुरपतिर्भवितुम्।
सुरपतिरुर्ध्वगतित्वं तथापि न निवर्तते तृष्णा॥ इति
गरुड धर्मकाण्ड १२ अ० १४ प्रे० कल्प

यावत्पर्यन्तं चेतसि जुगुप्साभावः अर्थविषये नोत्पद्यते, तावत्पर्यन्तं ततः निवृत्तिर्न भवति इति प्राक् प्रपञ्चितम्। अतः स आदौ संपादनीयः। ततश्च ईश्वरनिःश्वासप्रसूतस्य वेदस्य उपदेशात् कर्तव्यबुद्ध्या पूर्वं जुगुप्सितोप्यर्थो यदि स्वीक्रियते, तर्हि तावत्पर्याप्तैव चेतसः तदर्थग्रहणे प्रवृत्तिः सम्भवति। तामनुसृत्यापि कर्त्तव्य बुद्ध्या राजा राज्यं प्रजां आत्मानं वा संरक्षति। युद्धार्थमपि अग्रे पदं निदधाति। समये विसर्जयति धनं सत्पात्रेषु। नवा वेदमर्यादां अतिक्रामति।' इति। यद्यत्र सन्तोषस्योपयोगितासम्बन्धिनि विषये उपेक्षा क्रियेत, तर्हि विद्या भवतु, धनं वा भवतु, बलं वा भवतु त्रयमपि विनयमनासादयत् विवादे मदे पीडने पर्यवसितम्भविष्यति। एवं सति लोकानां रागोऽपि अस्मद्धस्तादपगतः स्यादिति।

तदुपपादितं भारविणा—

'मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नयान् नयहीनादपरज्यते जनः ॥
अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत् सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥'

तथा भावप्रकाशनेऽपि—

'विद्याभिजात्यसंपत्तिमदेनुत्तरभाषणम् ।
अवज्ञागर्भितंवाक्यं सुहृदामप्यनादरः ।
इत्यादयोऽनुभावाः स्युः विद्याभिजनिते मदे ।' इति ।

तस्मात् राजनीतौ स्वकीयकर्तव्यपरिपालने अत्यन्तमभ्यर्हितं चित्तसन्तोषं उत्पादयितुं मनोरथपूर्त्यादीनि साधनानि न भवितुमर्हन्ति, अपि तु शुचित्वमेव इति ।

'शुचित्ववेदधर्मनीतीनां सम्बन्धः'

नन्वेवं सति शुचित्वं जुगुप्सोत्पादकं विषयेभ्यः निवर्तनक्षमं परमावश्यकमित्यायाति तच्च कथं भवतीति चेदुक्तमेवोत्तरं पुनः स्मार्यते । शुचित्वं हि सन्तोषहेतु अस्ति तत् सर्वज्ञेनापौरुषेयेण वेदेन ज्ञाप्यते । अद्य वयं वेदं विस्मृत्य तिष्ठामः अतः शुचित्वमपि अप्रत्यभिज्ञातं सद् वर्तते । तत्र बीजं वेदस्य विस्मरणम् अस्यार्थः मित्रद्रोहजनितं पातकमस्ति । तदुक्तम्-यस्तत्याज सखिविदं सखायं न तस्य वाच्यपि भागोअस्ति । यदि श्रृणोति अलकं श्रुणोति । इति । नहि एतावतैव विश्रान्तिः, किन्तु मित्रद्रोह-जनितेन पातकेन श्रुत्यनुगामीनि स्मृत्यादीनि नीडं विहाय कपोत इव अस्मान् विहाय दूरं गतानि न शास्त्रार्थं प्रकाशयन्ति । तदुक्तम्—

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
तस्यैतेऽकथिताह्यर्थाः प्रकाशन्ते महात्मनाम् ॥ इति

यदा हि स्वयं कृपया शास्त्रं हि प्रसादसुमुखं भवत्ति मतिमतां चेतसि, तदा ते कर्तव्यनिष्ठया नीतिप्रचुरया धर्मसम्बद्धया विनयसहितया मर्यादया श्रियं लोहबुम्बकं लौहमिवकर्षन्ति । अस्यामवस्थायां समागता श्रीः विनयाधानाय कीर्तये सर्वेषां संरक्षणाय चोपयुज्यते । अन्यथा तु अनीत्या संपादिता श्रीः तेषामेव विनाशाय हेतुर्भवति । तदुक्तम् किराते—

असमापितकृत्यसंपदां हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां मदमुत्तंभयितुं विभूतयः ॥ इति कि० २।४८

किञ्च-अयमुक्तः श्रिया सह धर्मस्य नीतिमत्सु विनयाधायकः संबन्धः कथ-

जयमङ्गलाक्रोडपत्रम्

मस्तीति शब्दकल्पद्रुमे पुराणवाक्योद्धरणेन स्फुटीकृतोऽस्ति।[१] धर्मस्य हि—श्रद्धादयः त्रयोदश पत्न्यो वर्तन्ते।[२] एतासु धर्मस्य पुत्राणां समुत्पत्तिरुक्तास्ति,

तैःपुत्रगणैः श्रद्धानृतादीनां सन्बन्धे ज्ञाते धर्मस्य निवासः कुत्र सति च मित्रभावेनालम्बिते धर्मे किं लभ्यते ? इत्यादि सर्वं स्फुटमवगम्यते अतएव मधुसूदन-सरस्वतीभिः मेधाप्रभृतीनां प्रमोपलब्धिमत्रिणैव नेतृत्वं संपादयितुं शक्यते इत्यनिप्रायः

---

१ तथाहि—सुकेशिरुवाच।

'किं लक्षणो भवेद्धर्मः किमाचरणसत्क्रियः।
यमाश्रित्य न सीदन्ति देवाद्यास्तु तदुच्यताम्॥

ऋषय ऊचुः—

देवानां परमो धर्मः सदा यज्ञादिकाः क्रियाः।
स्वाध्यायवेदवेत्तृत्वं विष्णुपूजारतिः स्मृतिः॥
दैत्यानां बाहुशालित्वं मात्सर्यं युद्धसत्क्रिया।
निन्दनं नीतिशास्त्राणां हरशक्तिरूदाहृता।
सिद्धानामुदितो धर्मो योगयुक्तिरनुत्तमा।
स्वाध्यायं ब्रह्मविज्ञानं भक्तिर्दार्ढ्यमपि स्थिरम्।
उत्कृष्टोपासनं ज्ञेयं नृत्यवाद्येषु वादिता।
सरस्वत्यां स्थिराभक्तिर्गान्धर्वो धर्मं उच्यते। इति।

२ तदुक्तम्—

श्रद्धालक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा तथा क्रिया।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदश॥
श्रद्धा कामं च श्रीर्दर्पं नियमं धृतिरात्मजम्।
सन्तोषं च तथा तुष्टिर्लोभं पुष्टिरसूयत॥
तथा क्रतं क्रिया दण्डं नयो विनयमेव च।
मेधा श्रुतं क्रिया दण्डं नयं विनय मेव च।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम्॥' इति
'व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत।
सुखं सिद्धिर्यशः कीर्तिरित्येते धर्मसूनवः॥
कामो नन्दीसुतं हर्षं धर्मपौत्रमसूयत।' इति।

जयमङ्गलाक्रोडपत्तम्

उपवर्णितः[1] । उपपन्नो भवति

एवंसति ये वास्तविकनीतितत्वस्यानुष्ठातारः, तेषु नेतृत्वं संभवतीति किमु वक्तव्यम्। लक्ष्मीसहस्रनामसु मातुः महालक्ष्याः राजनीतिप्रमेतिनामोपवर्ण्यते तदुक्ताभिप्रायेणैव। तस्मात् यावत्पर्यन्तं शुचित्ववेदधर्मनीतीनां सम्बन्धमवगत्य कश्चिन् न पुरो वर्तते तावत्पर्यन्तं स्वकल्पनया नीत्याभासमुद्भा व्यलोकान्वञ्चयन्ति चेत् नात्राश्चर्यंमतः नीत्यनुष्ठानकामेन उपर्युक्तरीत्वा वेदोदिते शुचित्वे धर्मे चित्तसन्तोषत्मिकायां धृतौ च आत्मनः स्थितिः संपादनीया। तथा सति सर्वत्र प्रमाणपुरःसरंप्रमितार्थविषये तर्क-मति-भावानां विनयप्रभृत्याचाराणां च "यच्छीलो-राजा तच्छीलास्तस्य प्रकृतयो भवन्ती"ति न्यायेन प्रसरणात् सर्वं सुस्थं भविष्यति। ये च किल नीत्याभासं प्रकाशयन्ति जनानुरागमात्मनि संपादयन्ति ते सम्पादयन्तु प्रकाशयन्तु च कामं प्रारम्भदशायां, किन्तु पर्यन्ते तत्रैदं निश्चितमस्ति यत्र प्रमाणाभासेन अधर्मेण वाऽभिवृद्धिस्तत्र अप्रामाण्यशङ्कया भेदेनाचावश्यं भाव्यम्। तेन च विनाशोऽपि स्यादेवेति। (तदिदमृषभस्य वंशावल्या स्फुटं भवति[2]) तथा सति प्रसादोपि समुपद्यते

---

१ तथाहि-कीर्तिः 'श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः, क्षमा' इति।

संहारकारिणां मध्ये सर्वहरः सर्वसंहारकारी मृत्युरहम्। भविष्यतां भाविकल्याणानां य उद्‌मव उत्कर्षः स चाहमेव। नारीणां मध्ये कीर्तिः श्रीर्वाक्च स्मृतिर्मेधा धृतिः क्षमेति च सप्त धर्मपत्न्योऽहमेव। तत्र कीर्तिर्धार्मिकत्वनिमित्ता प्रशस्तत्वेन नानादिग्देशीयलोकज्ञानविषयतारूपा ख्यातिः। श्री धर्मार्थकामसंपत्, शरीरशोभा वा, कान्तिर्वा। वाक् सरस्वती सर्वस्यार्थस्य प्रकाशिका संस्कृतवाणी। चकारान्मूत्यादयोऽपि धर्मपत्न्यो गृह्यन्ते। स्मृतिश्चिरानुभूतार्थस्मरणशक्तिः। अनेकग्रन्थार्थधारणाशक्तिर्मेधा। धृतिरवसादेऽपि शरीरेन्द्रियसङ्घातोत्तम्भनशक्तिः उच्छृङ्खलप्रवृत्तिकारणेन चापलप्राप्तौ तन्निवर्तनशक्तिर्वा। क्षमा हर्षविषादयोरविकृतचित्तता यासामाभासमात्रसंबन्धेनापि जनः सर्वलोकादरणीयो भवति। तासां सर्वस्त्रीषूत्तमत्वमतिप्रसिद्धमेव।

२ तदुक्तम् भागवते—

मैत्रेय उवाच—सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः।
नैते गृहान्ब्रह्मरूपा ह्यावसन्नूर्ध्वरेतसः॥
मृषाऽधर्मस्य भार्याऽऽसीद्दंभं माया च शत्रुहन्।
असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः।२।
तयोः समभवल्लोभो निकृतिश्च महामते।
ताभ्यां कोपश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः।।३।।
दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम।
तयोश्च मिथुनं जज्ञे यातना निरयस्तथा।।४।।—

जयमङ्गलाक्रोडपत्रम्

सच 'प्रसादे सर्वदुःखानां हानिरस्योपजायते' इति गीतावाक्येन (६ पृ०) प्रागुद्धृतेन बोधविषयीकृतः चित्तसन्तोषमूलकः सन् धर्ममपि उत्पादयति। गीतायामुपवर्णितः प्रसादपदार्थः राजनीतिदृष्टया हर्षे पर्यवस्यति। तस्य तात्पर्यमपीदमेव यत् चित्तसन्तोषजनितेन प्रसादेन हर्षप्रकाशितेन ये संपन्नाः, ते अतिदूरं स्थिता अपि लोकस्य प्रीतिविषया भवन्ति।

तदुक्तं मनुना— (मनु० ८।४२)

स्वानि कर्माणि कुर्वाणाः दूरे सन्तोऽपि मानवाः।
प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः। इति।

तस्मात् राजनीतिशास्त्रे चित्तसन्तोषधृत्योरवलम्बनेनैव राजा प्रकृतिं रञ्जयितुं समर्थो भवतीति मत्वा राज्यस्य आधारभूतं तत्वं सत्वमस्तीति कामन्दकः उपदिदेश। तदुक्तम् 'सत्वबुद्धिव्यपाश्रयम्' इति

सत्वस्यापि व्यावहारिकं स्वरूपं धृतेः विद्याजनितायाः प्रकाशकं आस्तिक्यादिकमेव। तदुक्तम्— भावप्रकाशे—

'आस्तिक्यं प्रविभज्य भोजनमनुत्तापश्च तथ्यं वचः।
मैधा बुद्धिर्धृतिक्षमाश्च करुणा ज्ञानं च निर्दम्भता॥
कर्मानिन्दतमस्पृहं च विनयो धर्मः सदैवादरात्।
एते सत्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः॥ इति।

अतः राजनीतेः प्रथममिदं कर्तव्यं यत् तर्कप्रचुरया विद्यया आस्तिक्यादेः प्रचारणमेव।

यः उपर्युक्तरीत्या राजनीतिकुशलः सत्वगुणादिप्रचारेण लोकस्य प्रियः कीर्तिमान् स एव परलोकेऽपि अमृतमश्नुते। तदुक्तम्—

'विद्ययाऽमृतमश्नुते' इति। अयं च प्रचारः यथासम्भवं संस्कृतवाण्यैव कर्तव्यः इति प्रथमः कल्पः। तस्याकर्तुमशक्यत्वे इतरा अपि भाषाः उपयोजयितुं शक्यन्ते इति प्राङ्मीमांसान्यायवर्णनपुरःसरं प्रदर्शितमस्ति। (पृ० ३५-१६५) अत एव धर्मविजयनाटके (३–४–३०) विद्यानां प्रवेशः प्राकृतभाषाभिः सह प्रदर्शितः। इदं हि नाटकं कविना यवनराज्ये निर्मितम्। तत्र राजनीतिविदा उपर्युक्तस्य सत्वगुणस्य प्रसारणाय तर्कबहुलविद्याया एव प्रचारणं सदाचारमुखेन प्रदर्शितम्। अद्यापि तदेवालम्बनीयमस्ति। तदिदं मनसि निधाय शुचित्वबेदधर्मनीतीनां सम्बन्धं निरूपयितुकामः जयमङ्गलाकर्ताकर्तव्यनिरूपणप्रस्तावे विद्याविभागेन सह सङ्गतिं प्रदर्शितवान्। तथाहि—"एवं धर्म-

---

सङ्ग्रहेण मयाऽख्यातः प्रतिसर्गस्तवानघ।
त्रिः श्रुत्वैतत्पुमान् पुण्यं विधुनोत्पात्मनो मलम्॥५॥
(४ स्कन्धे ८ अध्याये १ तः)

जयमङ्गलाक्रोडपत्रम्

मालोच्य लोके प्रवर्तितविद्यः चतुर्वर्णाश्रमलक्षणं लोकं स्वधर्मकर्मसु व्यवस्थापयेत्। (का० नी०० ज० म० २।४) इत्यलं प्रसक्तानुप्रपक्तचिन्तया।

(पृ० २०६ ज०) **तत्र ब्राह्मणस्येति।** ननु ब्राह्मणानां वहुत्वात् ब्राह्मणस्येति मूलकृतःटीकाकृतश्च षष्ठ्यन्तैकवचनकथनमसङ्गतम्? इति चेन्न। अत्र निर्दिष्टमेकवचनं न ब्राह्मणव्यक्तिपरतया, किंतु ब्राह्मणत्वादिजातिपरतया। तत्र च एकत्वस्य अन्वयात् संपन्नो व्रीहिरित्यादाविव नानुपपत्तिः।

ब्राह्मणत्वजातिभेदः—ननु पूर्वं जातिसिद्धौ प्रदर्शितायां युक्त्यां तत्तन्माता-पितृजन्यतावच्छेदकतया ब्राह्मणत्वादिजातिः सिद्धा अस्तीत्येतावन् मन्तुं शक्यते। सृष्ट्यारंभे मातापित्रोरभावेन तदानीन्तनेषु ब्राह्मणेषु ब्राह्मणत्वमस्तीति कथं निर्णेतव्यम्? इति चेदभिधीयते।

यथा 'हलन्त्यमि'त्यत्र सूत्रे वैयाकरणैः चतुर्विधः समासः स्वीक्रियते तथैव ब्राह्मणत्वादिजातिः न एकविधा, अपितु चतुर्विधा। तासु प्रथमा वंशपरंपराप्राप्ते ब्राह्मणे अभिव्यज्यते। द्वितीया सृष्ट्यारंभसमये स्थितेषु आद्यब्राह्मणादिषु। तृतीया विद्यातपोयोगसमाधिभिः शरीरान्तर्वर्तीनवयवान् स्वजातीयदेहारंभकानपसार्य तत्स्थाने ब्राह्मणदेहारंभकान् अवयवान् संयोज्य संजनिते शरीरपिण्डे विश्वामित्र इव। चतुर्थी अनुलोमविवाहेन पञ्चमे सप्तमे वा वंशे इति। तदुक्तं सनातन धर्मप्रदीपे स्नेहप्रपूरिण्याम्[1] द्रष्टव्यम्—

---

१ इदं हि चातुर्विध्यं नानुभवसिद्धमिति न वक्तुं शक्यते, वृश्चिकमातापितृजन्ये गोमयोद्भवे च वृश्चिके वृश्चिकत्वस्य अथवा शुक्तिकाजनितायां मुक्तायां गजमुक्तायां च मुक्तात्वस्य, कदलीजन्यकदल्यां काण्डजन्यायां च कदल्यां कदलीत्वस्य अनेकविधस्य प्रत्यक्षसिद्धत्वात्।

ब्राह्मणत्वजातिरपि चतुर्विधा एका ब्राह्मणमातापितृजन्यशरीरवृत्तिः, अपरा जात्युत्कर्षन्यायेन विजातीयमातापितृजन्यशरीरवृत्तिः, अपरे योगिसङ्कल्पविशेषेण ईश्वरसङ्कल्पविशेषेण वा निर्मिते सृष्ट्यादिब्राह्मणे मुनौवा वर्तमाने द्विविधे ब्राह्मणत्वे यथा कदलीकाण्डजन्ये कदलीकाण्डे एका कदलीत्वजातिः, दग्धवेतसबीजजन्ये कदलीकाण्डे द्वितीया, ईश्वरसङ्कल्पनिर्मिते सृष्ट्यारंभकालिक-कदलीकाण्डे तृतीया, योगिसङ्कल्पनिर्मिते तदनन्तरभाविनि कदलीकाण्डे चतुर्थी। सर्वासामप्येतासां जातीनामविशेषेण कदलीपदवाच्यत्वं, यतः पित्तज्वरशान्त्यर्थं-कदलीदलस्य सर्वविधस्य ग्राह्यत्वं भवति। चन्द्रसूर्योभयबोधकपुष्पदन्त—पदवत्किंचिद्विपर्यासेन एकशक्त्यैवानेकार्थबोधकत्वात् ब्राह्मण-पदस्यापि ब्राह्मणत्वादिचतुष्टय-वाचकत्वम् ज्ञेयम्' इति। ब्राह्मणत्वादीनां एवं विधमनेकत्वं चातुर्विध्यादिकं च द्रव्यसारसङ्ग्रह बालम्भट्यादिषु स्पष्टम्।

जयमङ्गलाक्रोडपत्रम्

ब्राह्मणादिषु गुणानामावश्यकता

ननु ब्राह्मणत्वं जन्मना सिद्धं येषु वर्तते, ते तावन्मात्रेणैव राजनीतौ सर्वत्र किं ग्राह्याः ? इति चेदुच्यते ।

२३५ पृ० टिप्पण्युद्धृते कदलीदलोदाहरणे शुष्कस्य कदलीदलस्य भर्मरशब्दं कर्वतो जातिमात्रकदलीत्ववतोऽपि गुणहीनस्य परित्याज्यत्वम् किन्तु कदलीदलोचितसरसतादिविशिष्टत्वमेव तदीयग्राह्यतायां यथा कारणम् तथैव जन्मसिद्धब्राह्मणत्वादिजातिमतोऽपि देहस्य वृत्तहीनस्य परित्याज्यत्वमेव किन्तु ब्राह्मणकार्येषु तदुचित-गुणवत्वमेव ग्राह्यत्वे कारणमित्यनेन प्रतिपाद्यते ।

अत एव

'वृत्तं यत्नेन संरक्ष्यं ब्राह्मणेन विशेषतः ।
अक्षीणवृत्तो न क्षीणो वृत्ततस्तु हतो हतः ।।
पाठकाः पाचकाश्चैव येचान्ये शास्त्रचिन्तकाः ।।
सर्वे व्यसनिनो मूर्खाः यः क्रियावान् स पण्डितः ।।
चतुर्वेदोऽपि दुर्वृत्तः स शूद्रादतिरिच्यते ।
योऽग्निहोत्रपरो दान्तः स ब्राह्मण इति स्मृतः ।'

इति महाभारते वन पर्वणि १३ शेऽध्याये युधिष्ठिरेण ब्राह्मणंप्रकृत्यैव वृत्तस्यावश्यकत्वप्रतिपादनं विहितं सङ्गच्छते ।

तथैव 'तेन तुल्यं क्रिया चेद्वति' : इति (५।१।११५) पाणिनिसूत्रे महाभाष्ये "सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते, ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति । अतश्च गुणसमुदाये एवंह्याह—

'तपः श्रुतं च योनिश्च एतद्ब्राह्मणकारकम् ।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ।।'

यथा गौरः शुच्याचारः पिङ्गलः कपिलकेश इत्येतानभ्यन्तरान् ब्राह्मण्ये गुणाः कुर्वन्ति" इत्यनेन महाभाष्य ग्रन्थेन तपःश्रुतयोनिसमुदायस्य ब्राह्मण्ये मुख्यत्वं, सति सम्भवे गौरवर्णात्मकगुणस्यपीति सिद्धान्तं प्रदर्श्य मुख्यगुणशून्यानामब्राह्मण्यमेव न ब्राह्मण्यमित्यर्थदर्शनाय एवमुक्तम । "समुदाये प्रवृत्ताः शब्दाश्चावयवेष्वपि वर्तन्ते तद्यया पूर्वे पञ्चालाः उत्तरे पञ्चालाः तैलं भुक्तं घृतं भुक्तं शुद्धो नोलः कपिलः कृष्ण इत्यैवमयं ब्राह्मणशब्दः समुदायेऽपि प्रवृत्तोऽवयवेष्वपि वर्तते" इति निरूपितम् ।

महाभाष्यप्रदीपे कैयटेनेत्थं व्याख्यातम्—"तपश्चान्द्रायणादि, श्रुतं वेदवेदाङ्गानि-योनिः-ब्राह्मणाद् ब्राह्मण्यां जन्म'ब्राह्मणकारकं ब्राह्मणव्यपदेशस्य निमित्तं, शेषे षष्ठया समासः ।…………तपः श्रुताभ्यामिति । नासौ परिपूर्णो ब्राह्मणः ।

जयमङ्गलाक्रोडपत्रम्

ज्ञातिलक्षणैकदेशाश्रवस्तु तत्र ब्राह्मणशब्दप्रयोगः। अत एव तस्य सर्वासु ब्राह्मण-क्रियासु नाधिकार" इति।

अत एव 'जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च।
एभिर्युक्तो हि यस्तिष्ठेन् नित्यं स द्विज उच्यते ॥

इति आग्नेयोक्तं सङ्गच्छते। तस्मात् कुलविद्याश्रुत्यादिसंपन्नो यो ब्राह्मणः स एव राजनीतौ ब्राह्मणकर्तव्यस्थाने अधिकारित्वेन विवक्षित इति।

"वर्णं प्रति वर्णस्याकारणत्वप्रतिषेधः"

ननु 'न योनिर्नापि संस्कारः न श्रुतं न च सन्मतिः।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥

इति वचनैः जन्मनः कारणत्वं ब्राह्मण्यं प्रति निषिध्यते, इति चेदुच्यते। दग्धवेत्रबीजात् कदलीकाण्डोत्पतिर्भवति इति वृक्षायुर्वेदसिद्धं प्रागभिहितमस्ति, तदृशस्थले कदलीकाण्डोत्पत्तिं प्रति कदलीबीजं न कारणम्। किन्तु ईश्वरकृतमर्यादा-नुसारेण वेत्रबीजस्य संस्कारविशेषे कदलीत्वाविर्भावक्षमत्वं भवति। तथैव 'जात्यन्तर-परिणामः प्रकृत्यापूरात्' इति योगसूत्रानुसारेण एकस्मिन्नेव जन्मनि वर्णः विपरिवर्त-यितुं शक्यते तत्र वृत्तमेव कारणम्। अथवा

जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेऽपिवा'

इति निर्देशानुसारेण सञ्जनिष्यमाणजात्युत्कर्षं प्रति न ब्राह्मण्यादि कारणम्। अपितु तत्पर्यायभूतं वृत्तमेव। अन्यत्र तु ब्राह्मणमातापितृशरीरतज्जाजातिसंबन्धात् ब्राह्मणस्यैवोत्पत्तिः कदलीतः कदल्युत्पत्तिरिव संभवतीति तादृशस्थलविशेषे ब्राह्मण्यमेव ब्राह्मण्यस्य कारणं युक्तम्। तेन न उक्तवचनस्य विरोध। इति।

"अनुलोमेषु जात्युत्कर्षः"

ननु 'शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायते।
अश्रेयान् श्रेयसीं जातिं गच्छेदासप्तमाद् युगात् ॥

इति वचनेषु श्रेयसा अश्रेयस्यां क्रमात् समुत्पन्नस्यैव ब्राह्मणत्वं संभवति सप्तमे युगे, इति निर्णीतम् तदपेक्षया 'शूद्रो ब्राह्मणतामेतो'त्यादौ शूद्रपदस्य पुंस्त्री-लिङ्गोभयसाधारणवत् पुल्लिङ्गनिर्देशं प्रधानीकृत्य पुंसन्ततिपरंपरायामपि सप्तम्यादौ केवलब्राह्मणेन ब्राह्मणत्वं कुतो नाङ्गीक्रियते इतिचेत् उच्यते।

'द्विजनामसवर्णासु कन्यासूपयमस्तथा'

इत्यसवर्णो विवाहः द्विजानां कलिवर्ज्यः उक्तोऽस्ति। एवंविधविवाहपरम्परा युगान्तरे आसीत्, तत्र च 'अश्रेयान्श्रेयसीं जातिं गच्छत्यासप्तमाद् युगात्' इत्ययं नियमः मनुष्य-तिर्यगादिसाधारण्येन एक एव कल्प्यते। तथाचोक्तम् "विशेषाणां कार्यकारणभावग्रहः

जयमङ्गलाक्रोडपत्रम्

तर्केण विरोधिशङ्कायामपनीतायां जायमानः सामान्यव्यभिचारानिर्णयानुगतागुरुविशेषरूपान्तरानुपस्थितिलाघवप्रतिसन्धानादिवशात् सामन्यत एव तं परिच्छिनत्ती'ति तर्कग्रन्थदीधित्यनुसारेण सामान्यत एव कार्यकारणभावे सिद्धे तद्विरोधिनूतनकार्यकारणभावो न कल्प्यते। एतन्मूलकः एव अन्यत्र नियतपूर्ववर्तिभिरेव कार्यसम्भवे तत्सहभूतं अन्यथासिद्धमिति न्यायः बोध्यः यथा घटत्वावान्छिलं प्रति अनियतपूर्ववर्तिनया अकारणतया निश्चितस्य रासभस्य तद्घटं प्रति नियतपूर्ववृत्तित्वेऽपि न कारणत्वं नूतनतया कल्पयितुं शक्यम्। तत्र कारणं पूर्वोक्त न्यायः एवं गवादितिर्यग्जातिषु उत्कृष्टजातोयेन वृषभेण उत्पादितायाः स्त्रीसन्ततेरेव जात्युत्कर्षो युगविशेषे दृश्यते न पुंसन्ततेः। एवं च तत्साधारण्येन कार्यकारणभावकल्पनायां लाघवात् निवन्धकृद्भिः तत्साधारण्येन पूर्वोक्ता व्यवस्था युगान्तरेऽभ्यूहिता। 'शूद्रो ब्राह्मणतामेतीति'' श्रूयमाणमपि पुंल्लिङ्गमुद्देश्यगतत्वादविवक्षितमेव। 'ग्रहं संमार्ष्टी'तिवत्, आयुर्वेदादावपि हिं 'ज्वरितः पथ्यमश्नीयात्' इत्यादिवाक्ये श्रूयमाणमपि ज्वरितादिगतं पुंरुपं उद्देश्यगतत्वादविवाक्षितमेवेति सर्वेऽपि सम्मन्यन्ते। नहि ज्वरितस्य पुंसः पथ्यं त्रिहितं न तु स्त्रियाः इति कल्पयितारः केऽपि भवन्ति। तथा च 'वह्निमानयेत्युक्ते' केवलस्य वन्हेरानयनासंभवात् आधारपात्रेण सहैवानीयते, तथैव ज्वरितः पथ्यमश्नीयात्, 'शूद्रो ब्राह्मणतामेति इत्यादावपि लिङ्गविशेषरहितस्य प्रयोक्तुमशक्यत्वात्, कस्यचिल्लिङ्गस्य प्रयोक्तव्यत्वेऽविवक्षितस्यापि प्रयोगः इत्येवंरीत्या पूर्वोक्तकार्यकारणभावबलात् न्यायबलाच्च स्त्रोपरंपरायमेव जात्युकर्षःसिद्धः तथापि कलिवर्ज्यत्वात् अनुपयुक्तत्वात् तत्राग्रहकरणं निष्प्रयोजनमिति सविनयं निवेदयामः।

"जात्युत्कर्षस्यास्तित्वम्"

ननु ब्राह्मणमातापित्रोः अशङ्क्यत्वात् तज्जन्येषु ब्राह्मणत्वं प्रत्यक्षसिद्धम्। एतान् विहाय पूर्वोक्तेषु त्रिविधेषु ब्राह्मणादिषु ब्राह्मणत्वादि कयं सिद्ध्यति इति चेदभिधीयते।

चतुर्विधेषु ब्राह्मणत्वेषु मातापितृजन्यब्राह्मणत्वं प्रत्यक्षसिद्धम्, तद्व्यञ्जकस्य मातापितृजन्यत्वस्य प्रत्यक्षसिद्धत्वात्। जात्युकर्षजन्ये ब्राह्मणे ब्राह्मणत्वन्तु न प्रत्यक्षगम्यम् किन्तु शास्त्रैकगम्यमिति सिद्धान्तः। दृष्टश्चैवंविधो व्यवहारः आयुर्वेदव्यवहारेष्वपि यथा मुक्तात्वं शुक्तिजन्यासु मुक्तासु प्रत्यक्षसिद्धम्। गजमुक्तादिषु तु शास्त्रैकगम्यम्। एवं विशेषे सत्यपि मुक्ताकार्येषु सर्वेषां विनियोगोऽनुमतः इति सर्वलोकसिद्धम्। तुल्योऽयं न्यायः ब्राह्मणत्वादिष्वपि वाच्यः इति नात्र पूर्वापरविरोधशङ्कावसरः।

"ब्राह्मणादिषु शूद्रत्वविचारः"

ननु ब्राह्मणत्वादिजातिः नित्या तर्हि—

जयमङ्गलाक्रोडपत्रम्

त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ।
जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते ।

इति वचनं कथं सङ्गच्छते ?

अत्रोच्यते । पूर्वोक्तप्रमाणैः ब्राह्मणत्वादीनां चातुर्विध्ये स्थिरीकृते ततोऽतिरिक्तस्य कारणस्य असम्भवदुक्तिकत्वेन जन्मजातेरनुवृत्त्यावश्यकतया मुख्यशूद्रत्वविधानासम्भवेन च गौण्या तद्व्यवहारः । शूद्र इत्यस्य शूद्रसम इत्यर्थः । अत एव "वृत्या शूद्रसम" इत्यादीनि बहूनि वचनानि जन्मना जातस्य शूद्रसाम्याभिधायीनि उपपद्यन्ते । तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपसाम्यस्य शूद्ररूपत्वेऽनुपपत्तेः । वेदेऽपि हि 'श्येनेनाभिचरन् यजेतेत्यादो' श्येनपदस्य 'यथा वै श्येनो निपत्यादत्ते एवमयं भ्रातृव्यं निपत्यादत्ते' इत्यर्थवादगत्तसादृश्यबलात् यागे श्येनशब्दो गौणः इत्यङ्गीकृतं पूर्वमीमांसायां तत्सिद्धिपेटिकायाम् । आयुर्वेदेऽपि औषधविशेषादौ 'आनन्दभैरव नारायणतैला'दिशब्दाः मुख्यार्थे देवताविशेषवाचकाः अर्थान्तिरे बाधितत्वात् तत्साम्यबोधका भवन्तीत्यङ्गीक्रियते । इति तत्साम्यार्थत्वे न कस्यापि विप्रतिपत्तिः ।

'गौण्या लक्षणया वापि वाक्यभेदेन वा स्वयम् ।
शब्दो यमाश्रयेदर्थं को नु तं प्रतिकूलयेत् ॥'

इति तन्त्रवार्तिकोक्तन्यायेन स्वरसतः गौणार्थप्रतिपादनपरे शब्दे स्फुटमुपलभ्यमाने तत्र मुख्यार्थकल्पनाक्लेशः केन सोढव्यः इति । अन्यथा आनन्दभैरव नारायणतैलादि शब्देषु पूर्वोक्तेषु स्पष्टतया गौणार्थेषु मुख्यार्थत्वमागृह्य अस्मिन रोगे आनन्दभैरव रसो देयः इत्यादि प्रयोगे आनन्दभैरवतीर्थमपि प्रयुज्येत तथा दीपावली शालिग्राम-स्नादौ तिलतैलस्यैवोपयोगं को वा कुर्यात् इत्यलम् ।

"कौशिकादीनां वर्णपरिवर्तनम्"

ननु एकस्मिन्नेव जन्मनि विश्वामित्रेण क्षत्रियत्वं विहाय ब्राह्मण्यं कथमुपलब्धमिति चेदुच्यते ।

तेषां ब्रह्मर्षित्वसिध्या सामर्थ्यविशेषसिद्धिरेव २४६ पृ० निर्दिष्टयोगसूत्रवचनैरुच्यते । न तु उपनयनविशेषाधिकारितावच्छेदकब्राह्मणत्वादिसिद्धिरिति खण्डदेवाचार्यप्रभूतीनां सिद्धान्तः बोध्यः । युक्तश्चायं, यदि ब्राह्मणत्वजातिसिद्धिरेव तत्र विवक्षिता स्यात् तर्हि तज्जातिनिमित्तकोपनयनादिकमपि तेषां कर्तव्यमापतेत् । यथाविध्यनुपनीतस्य पुनः संस्कारवत् । ब्राह्मणत्वादिजातिनिमित्तकोपनयनादि न तदीयकथायां पुराणेषु श्रूयते 'जन्मोषधिमन्त्रतपःसमाधिजाः सिद्धयः' जात्यन्तरपरिणामः प्रकृत्यापूरात्' इति पूर्वोक्त २३५ पृ० निर्णयानुसारेण विप्रशरीरारम्भकपरमाणुसंयोजनेनापि कौशिके ब्राह्मणत्वसिद्धेः तत्राभ्युपगमेऽपि

जयमङ्गलाक्रोडपत्रम्

न क्षतिः। खण्डदेवपक्षेण उपनयनाधिकारि 'ब्राह्मणत्वासिद्धौ वसिष्ठविश्वामित्रादीनामध्यापनाद्यधिकारः कथमिति तु न शङ्क्यम्, ब्रह्मणशरीरोद्भवस्य वसिष्ठस्यैव तादृशकथायां अभ्युपगन्तव्यत्वात् तस्य च प्रकृतवसिष्ठाभिन्नत्वात्। विश्वामित्रस्य तु "अब्राह्मणादध्ययनमापत्काले विधीयते" इति न्यायेनइतरदुर्लभविद्याध्यापनस्य सम्भवदुक्तिकवान्न दोषः। वस्तुतस्तु देवादीनामपि क्वचिदध्यापकत्वश्रवणात्, ब्राह्मणेनैव अध्यापनं कर्तव्यमिति नियमः संसारिमनुष्येषु वृत्त्यर्थाध्यापनकर्तव्येषु अङ्गीक्रियते ब्रह्मर्षीणां चाऽसंसारित्वाद्विधिनिषेधाविषयत्वेन लोकसङ्ग्रहार्थाध्यापनकारित्वेपि न कापि क्षतिः: अत एव "गोधर्मं 'सौरभेयात् शुश्राव' इत्यादि महाभारतादिवाक्येषु अमानुषाणामध्यापनश्रवणम् उपपद्यते। पुत्रशोकादिपीडितानां वसिष्ठादीनां कथमसंसारित्वमिति तु न शङ्क्यम् "पश्वादिभिश्चाविशेषात् विदुषोऽपि तथारूढो भिनिवेशः" इति पातञ्जलसिद्धान्तानुसारेण जीवधर्मोपपत्तेः। तेषु जीवन्मुक्तत्व प्रतिपादकशास्त्रसंभवात्तदंशे कस्यापि दोषस्याशङ्कितुमशक्यत्वात्।

सन्दिग्धेषु गुणमात्रेण ब्राह्मणत्वनिर्णयः

ननु जाबालस्य ब्राह्मण्यमार्जवकथनमात्रेणैव साधितम्[१]। तथा सति अत्र जाबालस्य ब्राह्मणैः ब्राह्मण्यनिर्णयः कथं उपपत्त्या कृतः। तत्रोच्यते 'अत्र हि गोत्राज्ञानमेव जाबालस्य तन्मातुर्वोच्यते न तु ब्राह्मणमातापितृजन्यत्वाज्ञानम्। तथोक्तम्-परिचरन्ती यौवने त्वामलभे" इति। अनेन स्वाभाविकमोहबहुले यौवनकाले यथावद्गोत्राज्ञानस्यैव संभवदुक्तिकत्वात्। ब्राह्मणमातापितृजन्यत्वाज्ञानस्य स्वीयपुत्रे ब्राह्मण्याः प्रत्यक्षविरोधेन वक्तुमशक्यत्त्वात्। "नैतद् ब्राह्मणोवक्तुमर्हती"ति आचार्यस्य तदीय ब्राह्मण्यनिर्णयस्तु सत्यकामस्य गोत्रलिङ्गेनानुपपन्नो 'प्यार्जवलिङ्गेन संजात' इत्येतावदत्रोच्यते।

---

१ तदुक्तं छान्दोग्योपनिषदि-'सत्यकामो ह जाबालो मातरमामन्त्रयाञ्चकार ब्रह्मचर्यं भवति विवत्स्यामि किं गोत्रोऽहमस्मि इति साहैनमुवाच नाहमेतद्वेद तात। यद्गोत्रस्त्वमसि। जाबालो ब्रवीथा इति। सह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्यं भगवति विवत्स्यामुपेयां भगवन्तमिति। तं होवाच किं गोत्रोऽनु सौम्यासीति। स होवाच। नाहमेतद्वेद भो यद्गोत्रोहमस्म्यपृच्छां मातरं सा मा प्रत्यवदत बताहं परिचरन्ती परिचारिणो यौवने त्वामलमे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला नामाऽहमस्मि सत्यकामो नाम त्वमसीति, सोहं सत्यकामो जाबालोऽस्मि भो'इति तं हो वाच। नैतद् अब्राह्मणो विवक्तुमर्हति समिधं सौम्याहरो यत्वा नेष्ये न सत्यादगाः।' इति।

जयमङ्गलाक्रोडपत्रम्

[1]शमोदम इति गीतोक्तन्यायेन स्वाभाविकस्य ब्राह्मणदेहस्यैतादृशगुणानां स्वभावसिद्धत्वावगमात्,

[2]अभयं इत्यादि गीतोक्तार्जवस्यामानित्वसहकृतस्याविकृते ब्राह्मणदेहे एवोपलभ्यमानत्वेन सन्दिग्धस्थले निर्णायकत्वान्च्च । अतएव —

वर्णापेतमविज्ञातन्नरं कलुषयोनिजम् ।
आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् ।

इत्युक्तं मनुना । तच्च परिच्छिन्नदेहाभिमानवतां मानिनामेतादृशमार्जवं सर्वथाऽसंभवदुक्तिकमपि ब्राह्मणशरीरेऽत्यन्तशुद्धे क्वचिदुपलभ्यते बहुपरिचरणपरमातृपुण्यप्रभावेण । अत एव मनुनापि उक्तम् ।

पित्र्यं वा भजते शीलं मातुर्वोभयमेव च ।
न कथञ्चन दुर्योनिः प्रकृतिं स्वां नियच्छति । इति । (मनु १०।५९)

तथाऽपि परिच्छिन्नदेहाभिमानरहितानां परलोकगामिसूक्ष्मशरीराभिमान विशिष्टानां जन्मिनामस्मिन् युगे प्रायेणासंभवदुक्तिकं अभिमानप्राचुर्यात् ।[3] इत्यपि चिन्त्यम् ।

---

१ 'शमोदमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥
शौर्यं तजो धृतिर्दाक्ष्यं युद्धेचाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥
कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्याऽपि स्वभावजम् (गीता० अ० १८)

२ 'अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता
भवन्ति संपदं दैवीमभिजातस्य भारत ।' (गी० अ० १६)

३ तदुक्तम् नाट्यशास्त्रोपक्रमेऽ अभिनवभारत्याम् ।

'कृतयुगे स्वोत्कर्षबलादेव सर्वः स्वधर्ममनुपालयति । अद्यत्वे तु राजसत्वात् शूद्रप्रकाराः करणादिजातीयाः सर्वेऽखर्वगर्वाक्रान्ताः वर्णत्रयानुवृत्तिन्न विदधति ! शास्त्रं भवद्भ्य एवमादिशतीति च ते वचनमात्रेण नाद्रियन्ते । न च ते वेदशास्त्रोपदेशयोग्या' इति । (१ अ० १२२ श्लोक०)

जयमङ्गलाक्रोडपत्रम्

एतेन इदमपि सुस्पष्टं भवति यत् नातिमानितासमानाधिकरणमेतादृशमार्जवं युगान्तर एव स्वभावसिद्धं संभवतीति कलौ तदाश्रयेण जातिव्यवस्थाखण्डनप्रयासो न मनोरञ्जकः इति।

"ब्राह्मणादिविभागस्यापरित्याज्यत्वम्"

ननु आत्मगुणसद्भाव एव ब्रह्मणः सायुज्यं भवति। केवलं जन्ममात्रेण न भवति। तदुक्तं वीरमित्रोदयसंस्कारप्रकाशे—गौतमेन "दया क्षान्तिरनसूया शौचमनायासो माङ्गल्यमकार्पण्यमस्पृहा च। यस्यैते न चत्वारिंशत्संस्कारा, न चाष्टावात्मगुणा न स ब्रह्मणः सायुज्यं सालोक्यं च गच्छतीति। यस्य तु खलु संस्काराणामेकदेशेऽपि अष्टावात्मगुणा अथ स ब्रह्मणः सायुज्यं सालोक्यं च गच्छती"ति तथाच—ब्राह्मणादिविभागाभावेऽपि अष्टसङ्ख्याकात्मगुणवतां परलोकप्राप्तिसौलभ्यात् तद्दृष्टया उक्तविभागः व्यर्थः इति चेन्न।

अष्टसु आत्मगुणेषु गौतमेन शौचस्य ग्रहणं कृतम्। तस्यार्थः स्वधर्मपरिपालनमस्ति इति बृहस्पतिना व्याख्यातम्।[1]

---

१ 'आत्मवत्सर्वभूतेषु यद्धिताय शिवाय च।
वर्तते सततं हृष्टः कृत्स्ना ह्येषा दया स्मृता॥
बाह्ये चाभ्यन्तरे चैव दुःखे उत्पादिते परैः।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्तिता।
न दुर्गुणान् गुणैर्हन्ति स्तौति मन्दगुणानपि।
नाऽन्यदोषेषु रमते साऽनसूया प्रकीर्तिता॥
अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः।
स्वधर्मेषु व्यवस्थानं शौचमेतत् प्रकीर्तितम्।
शरीरं पीड्यते येन शुभेनाऽपि च कर्मणा।
अत्यन्तं वर्जयेत्तत्तु सोऽनायासः प्रकीर्तितः॥
प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्।
एतद्धि मङ्गलं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः॥
स्तोकादपि हि दातव्यमहीनेनान्तरात्मना।
अहन्यहनि यत्किंचित्तदकार्पण्यमुच्यते॥
विवर्जयेदसन्तोषं विषयेषु सदा नरः।
परद्रव्याभिलाषं च साऽस्पृहा कथ्यते बुधैः॥

हितमायत्यां श्रेयस्करम्। शिवं शुभम्। दुर्गुणान् द्यूतचौर्यादीन्। गुणैः श्रोत्रियत्वादिभिः। मन्दगुणान् अल्पगुणान्। स्तौति बहुगुणत्वेन ख्यापयति।→

जयमङ्गलाक्रोडपत्रम्

एवं रीत्या शौचपदार्थस्य पर्यालोचने अष्टसु स्वधर्मत्वेन शौचपदेन वर्णधर्म एव गृहीतः इति निर्विवादम्,

'श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥' (गी० १ अ०)

इति गीतावाक्ये तथैवाभियुक्तव्याख्यानदर्शनात् । तथा चोक्तगौतमवचनेनापि—वर्णधर्मस्य त्यागः कथमपि न सङ्गच्छते । आश्रमधर्मस्यापि त्यागः सर्वथा न संभवत्येव ।

'अनाश्रमी न तिष्ठेत् तु क्षणमेकमपि द्विजः ।'

इति वचनेन तस्य निषिद्धत्वात्, आश्रमधर्मस्यापि स्वधर्मत्वावगतेः । किन्तु 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्, गृहाद् वा वनाद् वा । अथ पुनरव्रती वा व्रती वा, स्नातको वाऽस्नातको वा, उत्सन्नाग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् ।' इत्यादि जाबालश्रुत्यनुसारेण गार्हस्थ्यमविधाय प्रव्रजितस्य स्वाश्रमधर्ममनुतिष्ठतः सहधर्मचारिणीसंयोगादिबहुतरसंस्कारलोपेऽपि आत्मगुणाष्टकसमृद्धत्वस्य संभवितया गौतमवचनस्य तत्परत्वेन वर्णाश्रमविलोपपरत्वासंभवात् ।' इति ।

"भविष्यत्पुराणेन ब्राह्मणत्वादिव्यवस्थापनम्"

ननु भविष्यत्पुराणे ब्राह्मणत्वादीनां खण्डनं कृतम्[1] । तत्कथं जातिसत्वे उपपद्यते ? इतिचेदुच्यते—

एकचत्वारिंशादध्यायादारभ्य त्रिचत्वारिंशदध्यायपर्यन्तं स्पष्टलिङ्गकेषु वचनेषु अनेकविधस्मृत्यादिप्रोक्तेषु च सत्सु जन्मना ब्राह्मण्यमस्तीति सिध्दौ सत्यां टिप्पण्युक्तभविष्यत्पुराणवचनानां श्रुत्यादिसिद्धजन्मब्राह्मण्यादिनिरासकत्वन्न संभवति । किन्तु "अपशवो वाऽन्ये गोअश्वेभ्यः पशवो गो अश्वाः" इति श्रुतौ मातापितृजन्यलोमवल्लाङ्गूलवत्त्वरूपपशुत्ववतामेव छागादीनां श्रुत्यन्तर्गतपशुपदस्य प्रशस्तपशुपरत्वं परिकल्प्य तद्भिन्नत्वरूपनिन्दितपशुत्वपरत्वङ्गीकृतं तत्सिद्धिपेटिकायां मीमांसकैः । तेनैव न्यायेनोक्तभविष्यत्पुराणवचनेष्वपि गुणहीनत्वसमानाधिकरणायाः

शुभेन विहितेन धनार्जनादिना । पीड्यते शरीरमत्यन्तं क्लेशवत् भवति । प्रशस्ताचरणं गन्धमाल्यादिधारणम् । अप्रशस्तमात्मनिन्दादि । अदीनेनाननुशायिना । असन्तोषमतृप्तिम् ।' इति ।

१ शूद्रयोनौ प्रजातस्य सद्गुणानुपतिष्ठति ।
वैश्यत्वं लभते ब्रह्मन् ! क्षत्रियत्वं तथैव च ॥
आर्जवे वर्तमानस्य ब्राह्मण्यमभिजायते ।
'सन्त्यक्तव्याः प्रसिद्धा ये जातिभेदविधायिनः'—

जयमङ्गलाक्रोडपत्रम्

केवलजन्मजातेः विप्र शरीरे सत्वेऽपि परिपूर्णगुणस्वरूपविशेषणाभावप्रयुक्तः विशिष्ट-ब्राह्मणत्वाभावः ऐदंपर्येण प्रतिपाद्यः इति । अतएवोपक्रमे—

जातिः श्रेष्ठा भवेद्वीर ! उत कर्मं भवेद् वरम् ।
संशयस्तु महानेव दृष्टवा मे कृत्तिकासुत ।।
एतद्वद विनिश्चित्य न यथा संशयो भवेत् ।
जन्मतः कर्मतश्चैव यन्न्याय्यं तद् ब्रवीहि मे ।।'

इति प्रश्नः सङ्गच्छते। जातिकर्मणोर्मध्ये प्राशस्त्याभिप्रायक एव स दरीदृश्यते, एतदसञ्जात विरोधोपक्रमस्य प्रबलत्वात् गुणहीन-जाति-प्राशस्त्याभावे प्रकरणस्य तात्पर्यम् । न तु जाति स्वरूपस्यैवाभावे । तथा चोत्तरग्रन्थः सर्वोऽपि एतादृशोपक्रमा-विरोधेनैव व्याख्येयः ।

अत एव भविष्योत्तरपुराण एव तदुतरे ४४ अध्याये गुणपूर्णतया प्रशस्तानां जातीनां वर्णनेनोपसंहारः कृतः सोऽपि सङ्गच्छते । एवं ब्रह्माण्डपुराणे सर्वत्र ज्ञेयम् ।

तथा च गुणहीनायाः जाते. (४१–४३ भ० पु० अध्याये) अप्राशस्त्यमेव उप-संहृतम्, न तु जन्मजातिपरिवर्तने क्वापि । इति ।

"तस्मान्न गोत्ववत्कश्चिज्जातिभेदोऽस्ति देहिनाम् ।'

इत्यादौ हि प्रशस्तजातिभेदो नास्तीत्येवमर्थः बोध्यः । तदिदं कविसमयसिद्धम् । तथाहि—

ये मज्जन्ति निमज्जयन्ति च परांस्ते प्रस्तरा दुस्तरे
वार्धौ वीर ! तरन्ति वानरभटान् सन्तारयन्तेऽपि च ।
नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः
श्रीमद्दाशरथेः प्रतापमहिमा सोऽयं समुज्जृम्भते ।। हृ० ना०)

इत्यादौ प्रस्तरगुणादिषु सत्स्वेव तेषां प्रशस्तत्वाभावमात्रबोधने तात्पर्यतया,

'नैवाभवस्त्वमिह शीलवतीषु गण्या नैवाभजत्पितृमतां गणनां स रामः ।
नैवापमात्मजसुखान्यहमप्यनार्ये नैवापमम्बु भरतेन न मे प्रदेयम् ।।'

इत्यादौ पितृमत्वात्मजसुतत्वादिसत्वएव तदभावबोधनस्य प्रशस्ततदभावपरतया च लोके प्रयोगः । इति।

"ब्राह्मणादीनां वर्णपदवाच्यत्वम्"

ननु कथं ब्राह्मणत्वादिजातीनां वर्णपदवाच्यत्वम् यतः शुक्लादिषु रूढो हि वर्ण-शब्दः तत्तात्पर्येण ब्राह्मणादिदु प्रयुज्यतेऽ[1]इत्येव कुतो न वक्तव्यम् ।

---

१ 'कामभोगप्रियास्तीक्ष्णाः क्रोधनाः क्षत्रतां गताः ।।
त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गतः ।।
गोभ्यो वृत्तिं समास्थाय पीताःकृष्युपजीविनः ।→

जयमङ्गलाक्रोडपत्रम्

जातिब्राह्मणादिषु वर्तमानकाले नैवंविधा व्यवस्था दृश्यत इति कथं वर्णव्यवस्थायाः संभव इति चेत् उच्यते—

'ब्रह्मणे ब्राह्मणमित्यादौ (कृ० य० तै० ब्राह्मण अ ३) वेदे पुरुषमेधे विनिनियुक्तानां ब्राह्मणादीनां मध्ये चत्वार एव कण्ठतः पुरुषसूक्ते वर्णिताः अन्ये तु 'पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्यांश्च ये' इति सामान्यत एव वर्णिता इति । "अथैतान् ब्रह्मभिष्टौति सहस्रशीर्षेत्युपर्युद्धृतानुवाकेन" त्युक्तेः वर्णधातोः स्तुत्यर्थकत्वेन तत्रैव मुख्यं त्वस्वीक्रियते । शुक्लादिषु हि तत्संबधेनैव वर्णपदप्रयोगेऽपि तद्वाच्यत्वन्न संभवति श्रुतिसापेक्षत्वेन तस्य दुर्बलत्वात्, निरपेक्षस्य स्तुत्यर्थस्यैव प्रबलत्वात् । नरमेधस्य कृतयुगादानुष्ठेयत्वेन तस्मिन्समये—

'अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति भागशः ॥ (म० स्म० १-८३)

इत्यादिभिर्वचनैः कार्तयुगं स्वरूपं ब्राह्मणादीनां शुक्लादिस्वरूपमासीत् इति तदेवौचित्यरूपेण वर्ण्यतं कविसमयसिद्धमित्यभ्युपगमे क्षतिविरहात् ।

अयमत्र निष्कर्षः—ब्राह्मणत्वं हि ब्राह्मणपदजन्यबोधोयमुख्यविशेष्यतानिरूपितप्रकारतावत्स्वरूपमनेकविधं भवति, बोधस्य शक्त्या लक्षणया व्यञ्जनया वा जन्यमानत्वेन बहुविधत्वात् । तत्र आद्यबोधप्रकारीभूतो धर्मः ब्राह्मणत्वं पूर्वोक्तप्रसिद्धचतुर्विधान्यतमरूपमेव । ब्राह्मणकार्यकारिण्या गौण्या प्रयुक्तस्य ब्राह्मणशब्दस्य ब्राह्मणगुणकर्मसमुदाय एव ब्राह्मणत्वं इति बोधप्रकारो द्वितीयः । कविसमयसिद्धं तु गौरत्वादिकं व्यञ्जनाजन्यबोधप्रकारस्तृतीयः । सतु आदर्शरूपेण कविभिर्वर्ण्यते । विधिनिषेधस्थले तु व्यञ्जनाजन्यबोधप्रकाराणामपेक्षा नास्ति । न हि नदीनां सरोजवत्वं चन्दनस्य पुष्पाभावः इत्यादयः बहवः पदार्थाः कविभिर्वर्ण्यमाना अपि अधुना लोके क्वचिदपि दृश्यन्ते । न वा तादृशव्यङ्ग्यधर्महीनानां नदोचन्दनादीनाम् औषधविहारादिषु परित्याज्यत्वं आयुर्वेदज्ञा अप्यनुमन्यन्ते ।

'पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम् ।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ॥'

इत्यादौ फेनादिषु चन्दनगुणयोगाच्चन्दनशब्दे प्रयुज्यमानेऽपि चन्दनस्थाने फेनप्रयोगः चन्दनगुणकारितया वैद्यकशास्त्रेन मतो भवितुमर्हति । किञ्च गुण-

---

स्वधर्मन्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसाऽनृतप्रिया लुब्धाः सर्वकर्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥
इत्येतैः कर्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।' इत्यादि ।

जयमङ्गलाक्रोडपत्रम्

बहुलाया हरीतक्या अलाभे ईषद्गुणवत्या हरीतक्या उपादेयता, सर्वथा गुणहीनाया अनुपादेयता यथा आयुर्वेदविद्भिरभ्युपगम्यते। तथैव वर्णार्थकब्राह्मणशब्दविषयेपि बोध्यम्।

॥ गुणकर्मानिबन्धना जातिः ॥

ननु एक एव वर्ण आसीद् इति शास्त्रोक्तं कथमुपपद्यते ? इति चेदभिधीयते। न कदाचिदनीदृशं जगद् इति पूर्वमीमांसकमते एकः पक्षः।
सृष्टिप्रलयावपि वर्तेते इत्युत्तरमीमांसासम्मतोऽपरः पक्षः। तत्राद्ये पूर्वमीमांसकमपक्षे आम्रवृक्षस्य आम्रबीजादुत्पत्तिः, आम्रबीजस्य च आम्रवृक्षादुत्पत्तिः इति बीजाङ्कुर-न्यायः आम्रवृक्षतद्बीजपरम्परयोः परस्परकार्यंकारणभावापन्नयोरिदं प्रथमतायास्तर्क-गम्यतया वक्तुमशक्यत्वेन यथा अनादिपरंपराप्राप्तः। तथा वर्णाअपि। तत्त इदं प्रथमताबोधकानाम्—

"सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपशून्खगदंशमत्स्यान्। तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः" (भा० ११)-इत्यादीनां केवलभगवत्स्तावकत्वमात्रेणार्थंवादत्वमेव न स्वार्थे प्रमाण्यम्। तथैव ब्राह्मणत्वादिजातीनां जन्मसिद्धत्वावगमाद् ब्राह्मणमातापित्रोरभावे ब्राह्मणत्वस्य ववतुमशक्यतया एकवर्णाभिधायकानि वचनानि यज्ञकुण्डात् द्रौपद्याद्युत्पत्तिवचना-नामिवार्थंवादत्वादीश्वरस्तुतौ तात्पर्यांत् न स्वार्थे प्रमाणानि।

कुसुमाञ्जल्यनुसारेण वेदान्तसिद्धान्ते तु सङ्कल्पविशेषमाहात्म्येन एकरूपस्यापि वर्णस्य चातुर्वर्ण्यरूपत्वं संभवति। 'जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः इति योग-सूत्रानुसारेण सिद्धीनां जन्मसिद्धत्वमिवौषधिमन्त्रतपः समाधिसिद्धत्वमप्यगीङ्क्रियत एव। अत एव योगिनां व्याघ्रादिरूपनिर्माणे "जात्यन्तरपरिणामः प्रकृत्यापूरा"दिति न्यायेन मनुष्योचितदेहारम्भकावयवानामपनयनेन व्याघ्रोचितदेहावयवानां प्रकृतित आकर्षणेन च सिद्धि भवंतीति विवेचितं योगसूत्रे। दृश्यते चेदं तृणपुञ्जादिषु अग्निकणप्रक्षेपे पार्थिवोचितावयवानां धूमरूपेणापगमेन सह वन्ह्युचितावयवानां प्रकृतित आकर्षणेन सह ज्वलितस्य महावह्नेः उत्पतिस्तद्दर्शिभिः इत्यपि विवेचितं तत्रैव[1]—

---

१ योगसिद्धान्तचन्द्रिकायां नारायणतीर्थविरचितायाम्—'जन्मना विशेषतया देवविशेषेण। औषधिना दिव्यरसायनाद्यात्मकेन यथा माण्डव्यादीनाम्। मन्त्रेण शिव-विष्ण्वादिमन्त्रजपेन। होमपूजादिसिद्धिस्तु मन्त्रप्रधानत्वान्मन्त्रान्तर्गतैव यथा वत्स-राजनन्दीश्वरप्रभृतीनाम्। तपसा अनशनशीतोष्णादिबाधासहनादिरूपेण यथा विश्वामित्रादीनाम्। समाधिना आत्मविषयकभावनाविशेषरूपेण यथा याज्ञवल्क्य-दत्तात्रेयप्रभृतीनां सिद्धिः। इत्येताः पञ्च सिद्धयः। एताः सर्वा अपि पूर्वजन्मकृत-सुकृतक्षपितकल्मषाणामेव लभ्या भवन्ति। एतासु चतस्सृषु विषयविज्ञेयनिरसन-देहादिदार्ढ्यद्वारा समाधावप्युक्ताः। समाधिना तु कैवल्यमेव तेभ्य उत्कृष्टस्तस्मात्→

जयमङ्गलाक्रोडपत्रम्

तथा च उक्तयोगदर्शनानुसारेण यस्य महापुरुषस्य स्वकीयसङ्कल्पविशेषबलात् स्वस्य वा अन्यस्य वा जात्यन्तरपरिणामसामर्थ्यं असंदिग्धं यथा गौतमस्य अहल्यादौ यथा वा कल्पवृक्षस्य अन्नादिभावे। तादृशस्य महात्मनः सङ्कल्पविशेषानुसारिणा वचनेन एकवर्णतो वर्णाश्चतुर्विधाः सृष्टाः इत्युच्यते। तदनुसारेण अग्रेपि ब्राह्मण्यादिपरिवर्तनं न भवतीति न अस्माभिरपि वक्ष्यते। तादृशस्तु महात्मा अधुना नावलोक्यते। अतो जन्मकृतैव जातिव्यवस्था अस्मिन्समये शरणीकरणीया भवति। सूक्ष्मेक्षिकया पर्यालोचने तु प्रकृत्यवयवानां आकर्षणविकर्षणाभ्यां जायमानं सङ्करविशेषेणवा जायमानं जातिपरिवर्तनं जन्मकृतमेव न तु मृत्वा जन्मान्तर भाविगुणकर्मादिकृतं अतो ब्राह्मणमातापित्रोरनपेक्षया जातत्वात् तत् पृथगुच्यते। तथा च पूर्वमीमांसादृष्ट्या उत्तरमीमांसादृष्टया वा न जन्मान्तरगुणकर्ममात्रकृतजातिसिद्धिरधुना वक्तुं शक्यते अतः पूर्वमेकवर्णसत्वेपि ईशसङ्कल्प कृतेन चातुर्वर्ण्येन न विरोध इति सिद्धम्।

"तपस्विनां ब्राह्मणानां वैशिष्टयम्"

ननु शमो दमस्तपः शौचमित्यादिना ब्राह्मणदीनां स्वभाविको धर्मः गीतायां, भविष्यत्पुराणे, महाभारते च निरूपितः परं तेऽपि सत्यवसरे क्रोधादिविकृतिपराधीना बभूवुः, किंबहुना विश्वामित्रादयोऽपि। तथा सति तेषां एतत्सामयिकब्राह्मणापेक्षया किं तत्ब्राह्मण्यमस्ति ? इति चेत् सत्यम्।

धर्मयुगादौ ब्राह्मणाः शमदमादिगुणसंपन्नाः सन्तोऽपि क्रोधादिविकृतिमन्तो बभूवुः। तत्र कारणं न ब्राह्मण्यमपि तु मानुष्यम्। तदुक्तं महाभारते—

'स्वाध्यायस्तेषां देवत्वं क्रोधस्तेषांनृणामिव।'

कैवल्यार्थं समाधौ इह जन्मन्येव तदर्थमौषधादौ इह जन्मनि जन्मान्तरेऽपि वा तल्लाभाय मन्त्रतपआदौ सोत्साहानां विवेकिनां प्रयत्न आवश्यक इति भावः ॥१॥

ननु सिद्धिस्तृतीयपादे वर्णिताऽणिमादिप्रादुर्भावरूपा तत्राणोर्महद्भावः। एवं स एकधा भवति त्रिधा भवति पञ्चधा। शतञ्चदश चैकं च सहस्राणि च विंशतिरित्यादि श्रुतिसिद्धकामरूपतादशायां मनुष्यादिरूपेण परिणम्य स्थितानां देवतिर्यगादिजातिपरिणामः एवं महतोऽणुभावादिश्च कथम्। पूर्वपरिणामवति परिणामान्तरायोगात्। "न अनुपमृद्य प्रादुर्भावं" इति न्यायेन पूर्वपरिणामनाशस्य हेतुत्वात्। न च तेषां सङ्कल्पमात्रेण तत्सिद्धः, संयमस्य निमित्तमात्रत्वात्। तत्राह- जात्येति। प्रधानादिपृथिव्याद्यन्ताः कायेन्द्रियादिप्रकृतयः। तासामापूराद्धर्माद्यनुरोधेन मनुष्यादिदेहावयवेषु अनुप्रवेशात् कामरूपतादशायां देवतिर्यगादिरूपजात्यन्तरपरिणामः। अणोर्महद्भावश्च भवति। एवं महतोऽणुभावः प्रकृत्योपगमादित्यपि बोध्यम् (ना० ती० योगसिद्धान्त चन्द्रिका -)

जयमङ्गलाक्रोडपत्रम्

ब्राह्मणत्वं तु अधुनातनब्राह्मणापेक्षया तेषु क्रोधादिमत्स्वपि सत्सु किञ्चित् विलक्षणमस्ति इत्यपि न विस्मर्तव्यम् । तथाहि—

"तप इति तपोनित्यः पौरुषिष्टिः । स्वाध्यायप्रवचन एवेति नाको मौद्गल्पः तद्धि तपस्तद्धि तपः" । इति तैत्तिरीयोपनिषदुक्तरीत्या तपः स्वाध्यायश्रुतशीलवत्वं ब्राह्मण्यं तत्तु क्रोधादिविकृतिमत्स्वपि ब्राह्मणेषु तेषु एतद्युगीनब्राह्मणापेक्षया विशिष्टमस्ति इति । किञ्च श्रुतशीलवद्भिः ब्राह्मणैः क्रुध्यते कदाचित्, इत्यपि सत्यं परं तैः कृतः क्रोधः एतद्युगीनब्राह्मणानां क्रोधापेक्षया कश्चन अन्यादृश एव । इति वक्ष्यमाणरीत्या स्फुटं भवति । तथाहि—तेषां क्रोधः द्विविधावस्थायां संभवदुक्तिकः । कश्चित् राज्ये वर्तमानः अपराध मातनोति देवादिरिव तस्मिन् ब्राह्मणैः क्रोधभावप्रयुक्तः दण्डः यदि निक्षिप्यते, तर्हि तदानीन्तनः क्रोधः दण्डो वा इति । सेयमेका क्रोधस्यावस्था ब्राह्मणैः प्रदर्शिता न अपराधरूपा । अपितु दण्डदातृत्वात् गुणरूपैव अपरस्यामवस्थायामनपराधिनमधिकृत्य कदाचित् ब्राह्मणाः क्रुध्यन्ति, तदानीं तेषु दण्डदातृत्वं न धर्मप्रयुक्तं कल्पयितुं शक्यते अपितु मोहप्रयुक्तं एव सोयं दण्डः क्रोधो वा अपराध्वस्था । एतस्यामवस्थायां तेषां ब्राह्मणानां मानुष्यमभिव्यक्तम् भवति । तथापि तेषु शमदमादिगुणसंपत्तेः जागरूकत्वात् स्वीयां मोहादिप्रयुक्तविकृतिं ज्ञात्वा यावन्मात्रया क्रोधोऽभूत् तावन्मात्रया किं तदपेक्षया आधिक्येन ते ब्राह्मणाः पश्चात् तेपुः प्रसिद्धं चेतत् सौदासमनपराधिनं राजानं प्रति शापानन्तरं वसिष्ठस्य अतीव विलापः इति । तदुक्तं नारदपुराणे—

तद्याहि राक्षसत्वं त्वं तदाहारोचितं नृपः ।
इति शापं ददत्यस्मिन् सौदासो भयविह्वलः ॥२७॥
आज्ञप्तो भवतैवेति सकंपः स्म व्यजिज्ञपत् ।
भूयश्च चिन्तयामास वशिष्ठस्तेन रोदितः ॥२८॥ इति

(ना० पु० ९।२७-२९)

इदं हि वैशिष्टयं शमदमादिगुणसंपत्तिमत्स्वेव ब्राह्मणेषु संभवति । इति मानुष्यप्रयुक्तक्रोधमात्रदर्शनेन तेषां ब्राह्मण्ये वर्तमानयुगीनब्राह्मण्यसादृश्यं न कल्पनीयम्, तेषु कायव्यूहन-आकाशसञ्चरण, त्रिकालदर्शन, शापानुग्रहसामर्थ्यादि गुणानां प्रसिद्धेः । अतः विश्वामित्रादयो महात्मानः न वेषमात्रेण ब्राह्मणाः आसन् इति कल्पनीयम् । इत्यलमतिविचारप्रसक्त्या । इदं तु अवश्यमेव सिद्धं यत् अतीव महता परिश्रमेण अन्यकुलक्रमागतस्य व्यापारस्य तदुपयोगिन्याः प्रतिभायाः समुत्पत्तिः अपरकुलीनेष्वपि महता श्रमेण चरणेषु हस्तकार्यकरणसामर्थ्योत्पत्तिरिव कदाचित् संभवितुमर्हति । परं तदपेक्षया कुलीनत्वप्रयुक्तप्रतिभायाः संस्कारस्य वा स्वल्पेनैव परिश्रमेण आधानं तत्तत्कुलीनेषु संभवितुमर्हति इति पूर्वनिर्दिष्टविश्वास्यता

जयमङ्गलाक्रोडपत्रम्

लाभाय, पूर्वंपरंपराप्राप्तजातिसंरक्षणं नानुचितमिति हेतुना अत्यन्तं अभ्यर्हितत्वात् धर्मस्मृत्यादि शास्त्रानुमोदितं तत्तज्जातीनामस्तित्वं कौटिल्येनाऽपि स्वीकृतम् । इति ।

'वृत्तिनियमनेन शूद्राणामर्जनाधिकारवञ्चनाभावः'

ननु धर्मशास्त्रेण अर्थशास्त्रेण वा शूद्राः याजनाध्यापनप्रतिग्रहादिधर्मेभ्यः वञ्चिताः सन्ति । तेन एतद्वृत्तित्रयप्रयुक्तार्जनस्य अधिकारापहरणेन शूद्राः याजनादिमूलक— संपत्तिभोगवञ्चिताः कृताः इत्यवं शास्त्रकर्तॄणां पक्षपातः किं नीतिसम्मतो भवितु-मर्हति ? इति चेदुच्यते । शूद्राः न सामान्यतया धनार्जनाद् वञ्चिताः शास्त्रकर्तृभिः । अपितु शूद्रैः याजनाध्यापनप्रतिग्रहाः न कर्तव्या इति शास्त्रकर्तृभिः उक्तं । धनं सेवावृत्या अर्जयितव्यम् तदेव ब्राह्मणैस्तु याजनादिभिः अर्जयितव्यमितिरीत्या विहितम् । एवं रीत्या उभयोः वर्णयोः अर्जनहेतुभूता वृत्तिनियमनव्यवस्था शास्त्रेण कृता । यदि अनयोः वृत्तिनियमनव्यवस्थयोः तुलनां पश्यामः तर्हि शास्त्रस्य पक्षपातः कुत्र वर्तते इति स्फुटीक्रियते ।

भारतीयराजनीतिमतेन धनार्जनं आत्मनि जनानुरागमासाद्य वर्णैः कर्तव्यम् । इति निर्णीतमस्ति तदुक्तम्—नी० सारटीकायाम्—

'जनानुराग प्रभवाहि सम्पदः' इति

अनुरागश्च ईश्वरस्य तस्मिन् भृत्ये भवति यः स्वामिनं सेवया प्रसादयति इति अद्यापि दृष्टचरम् । तन्न्यायेन शूद्रः यदि सर्वान् सेवते तर्हि इयं शूद्रस्य सेवावृत्तिः सर्वानुरागसम्पादने सहजत एव कारणं भवति । ब्राह्मणादयः यां याजनादिवृत्ति-मनुतिष्ठन्ति सा व्यवहारे न सेवावृत्तिं दर्शयति अतः एतद्वृत्तौ जनानुरागसम्पाद-कत्वं न भासते तथा सति जनतासु विप्रकीर्णायाः संपत्तेः स्वाभाविको भोगजनकः अर्जनधाराप्रवाहः शूद्रस्य सेवावृत्तौ वर्तते, ब्राह्मणस्य याजनादिवृतौ वा इति सुधीभिरेव ऊह्यताम् । अतः सम्पत्यर्जनस्य मुख्यं साधनं शूद्रायत्तमेव अस्ति इति सः सहजत एव यथा जनान् अनुरञ्जयितुं शक्नोति, न तथा इतरवर्णः इति यदि आलोच्यते, तर्हि शूद्राः सम्पत्यर्जनात् वञ्चिताः इति कथं वक्तव्यम् ? यद्धि ते दरिद्रताभावे संस्थिताः दृश्यन्ते, तत्र कारणं न शूद्रस्य वृत्तिनियमनमपि तु तेषां व्यसनित्वमस्ति । अतः कियदपि धनं धान्यं वा ते अर्जयन्तु, यावत् शूद्रेषु व्यसनित्वं वर्तते तावत् ते सर्वविधवृत्युपायाधिकारप्रदानेऽपि दारिद्र्यान् न कदापि मुक्ताः भविष्यन्ति । अयं च शूद्रैः कृतोऽपराधः व्यसनासक्त्यादिः, न शास्त्रस्य, तदुक्तं मानसरामायणे—

जयमङ्गलाक्रोडपत्रम्

यह हमारि अति बड़ि सेवकाई। तेहिं न बासन वसन चौराई।
हम जड जीवगन घाती। कुटिल कुचाली कुमति कुजाती।
पाप करत निसि वासर जाही। नहिं पट कटि नहिं पेट अघाही ॥

विप्रेषु दण्डव्यवस्था (अ० का० दो० २५१)

ननु शूद्रेण कर्तव्यां वृत्तिं ब्राह्मणः अनुतिष्ठति, तत्कथं सङ्गतं स्यात्? इति चेन्न। शूद्रवृत्तिं भजन् ब्राह्मणः श्रीमान् भवतु कामम् पर्यन्ते तु स जनतायां द्वेष्य-कोटावेव समुपतिष्ठति, इति द्वेष्यत्वरूपो दण्डः शास्त्रेण तेषु परवृत्तिहरणे समुपस्थापितः।

किञ्च, आपाततः शूद्रादिवृत्तिः ब्राह्मणाय रोचते, परं आपदाद्यवसरे उक्त-द्वेष्यत्वादिस्थितौ वा "विना शूद्रवृत्तिपरिग्रहपरित्यागेन सुखी न भविष्यामी"ति मत्वा ब्राह्मणः तत् परित्यागमेव यदा कुर्यात्, तदा स विश्वमित्रं भवेत्। शूद्रादयस्तु सेवावृत्ति-परिग्रहे अधिकृता न उक्तद्वेष्यत्वस्थितिभागिनः सन्ति। अतः कथमपि तेषां कृते सेवावृत्तिपरिग्रहपरित्यागप्रसङ्गो नास्ति। इति भारतीयराजनीतिरहस्यं बोध्यम्।

अपरञ्च शास्त्रेण ब्राह्मणाः कथं उपांशु दण्डिताः इति चिन्त्यते। ब्राह्मणः कामादिपराधीनो भूत्वा सवर्णया परपरिणीतया सह कृतेनाऽनैतिकव्यवहारेण सन्ततिं समुत्पादयति यदि, तर्हि इयं सन्ततिः जीवत्पतिकत्वाजीवत्पतिकत्वभेदेन कुण्डगोलकसंज्ञाम् संप्राप्ता शास्त्रेण यजनादिषट्कर्मभ्यः परिहीयते पातित्यात्। अयं दण्डः शूद्रेण समुत्पादितायां तथाविधसन्ततौ नास्ति, तस्याः शूद्रत्वजातिमत्वात्। अपरञ्च ब्राह्मणस्य जनतायां सम्मानं दृष्टवा दर्शकाः तानाक्षिपन्ति। परन्तु सूक्ष्मेक्षिकया पर्यालोच्यमाने अयमाक्षेपः तदा सार्थकः स्यात्, यदा ब्राह्मणादि-वर्णः किञ्चिदपि जनतायाः अपकारकम् कार्यं कुर्वन् सन्मानं लभेत। तथा नास्ति। यतः स लोके जाड्यम् मा प्रसरतु इति कृत्वा ततः संरक्षणाय समस्ताः विद्याः ब्राह्मणेन उपस्थापनीया इति शास्त्रमर्यादा। तत्सत्व एव ब्राह्मणानां देवत्वं सिद्धमिति (२४८ पृ०) प्रागुक्तमस्ति। तत्र यदि कथमपि ब्राह्मणः अनुष्ठाने, अभ्यासे, अध्ययने प्रमाद्येत्, तर्हि सत्वस्य विलयनात् जाड्यस्यावरणे विलम्बो नास्ति। तदुक्तं 'क्षणादूर्ध्वंमतार्किकाः' इति। ततः आत्मनः संरक्षणाय सदा ब्राह्मणेन सावधानेन भाव्यम्।

तदुक्तम् 'न विप्रः क्षणिको भवेत्' इति। एवंविधः महान् परिश्रमः सत्वप्रधान-शरीरेणैव सोढः, न तमःप्रधानशरीरेण कथमपि सोदुम् शक्यः स्यात्। अतएव मा जीव मुनिपुत्रक' इति कविभिः मुनिभ्यो दत्ताः आशिषः साधु सङ्गच्छन्ते। तस्य ब्राह्मणैः कृतस्य कल्पनातीतस्य श्रमस्य विद्याभ्यासस्य इदं फलं यद् ब्राह्मणस्य सन्माननं नाम। एवमेवेतरवर्णैरनुष्ठितस्य धर्मस्यविषये ज्ञेयम्। तस्मात् श्रमजीविनः शूद्रा एव

जयमङ्गलाक्रोडपत्रम्

नापरे इति न, सर्वैरेव स्व-स्वकर्मानुकूलपरिश्रमस्य अनुष्ठितत्वात्। एतेन इदं सिद्धं भवति यत, यत्र सम्मानहेतुस्थितिकत्वं सर्वदृष्टं वर्तते, तत्र शास्त्रकारेण तेषां कृते विधिनिषेधमर्यादायाः बाहुल्यमतीव बोधितं अस्ति तदेतत् अज्ञात्व उक्ताक्षेपा असूयामूलका एवेति सिद्धम्।

"वृत्तिनियमनस्योपयुक्तत्वम्"

ननु भारतीयराजनीतिशास्त्रेण ब्राह्मणत्वादिजातिभेदानुसारेण विहितस्य जीविका-वृत्तिनियमनस्य नीतौ कीदृशमुपयोगित्वमिति चेत्? श्रुणु। पदार्थाः यावत्पर्यन्तम् निराकाङ्क्षाः भवन्ति तापत्पर्यन्तं ते परस्परं न संयुञ्जन्ति। यदा तु तेषु आत्मनः संयोगस्याऽऽकाङ्क्षा उदेति, तदा तयोः साकाङ्क्षयोः पारस्परिकः सम्बन्धः स्थितो भवति सापेक्षत्वात्। यावत्पर्यन्तं च इयमाकाङ्क्षा वर्तते, तावत्पर्यन्तं प्रायः वध्यवधिकभावादिकलहोऽपि न सम्पद्यते। उपवर्णितं चेतत् मार्जारमूषक-कथायां। (महाभारतस्य शान्तिपर्वराजधर्मानुशासनपर्वणि माजार्रमूषिकसंवादे १२८ तमे अध्याये)

यदि कदाचित् साकाङ्क्षत्वात् परस्परं संयुक्तेषु कलहोऽपि संभवेत्, तर्हि तस्य निराकृतिः सहजगत्या कर्तुं शक्यते। इत्येवंदृष्टतत्वा राजनीतिः लोके सर्वेषु मनुष्येषु जीवनोपयोगिपारस्परिकसङ्घटनेन निर्वाह्यामाकाङ्क्षां प्रसारयितुं वर्धयितुं च वाङ्छन्तो धर्मप्रधानां जीविकावृत्ति नियमयति इति निगूढतत्वं भारतीय-राजनीत्या समाहितम्।

यद्यपि पारस्परिकसङ्घटनाय अपेक्षितं वृत्तिनियमनं यथाकथञ्चित् येन केनापि कर्तुं शक्यते, परम् शास्त्रकर्तृभिः यदिदं नियमनं कृतमस्ति, तत् कुलपरम्परां समादृत्य। तेन (२४७ पृ०) पूर्वोपवर्णितमतिभावस्य उद्‌बोधकानां समुपलब्धिर्नाऽसुलभा। अत एव राज्ये अभ्यर्हिता मन्त्रशक्तिः प्रभुशक्तिः उत्साहशक्तिश्च तत्र तत्र वर्णेषु विभज्य स्थापिता। स्वयं स्वतन्त्रा चेत् सा असमर्था भवति।पारस्परिक सापेक्षानुसारेण सम्मेलने ते सा उत्तमतां भजते। इत्येवं रीत्या यस्यां राजसभायां परम्परागतास्तत्तच्छक्तिमन्तः सर्वेऽपि वर्णाः एकीभावेन स्थिताः, सा सभा असाधारणी इत्यत्र नास्ति विवादः। इदृशीयं पूर्वपरम्परागतस्वभावानुगामिनी व्यवस्था भारतादन्यत्र देशे न दृश्यते। न वा पूर्वपरम्परागतवृत्तिनियमनप्रयुक्तं आपेक्षिकं सर्वजातिषु सर्वसाकाङ्क्षं बान्धव-

---

भीष्म उवाच—'ग्राहयित्वा तु तं स्वार्थं मार्जारं मूषिकस्तथा।
प्रविवेश तु विश्रम्य, क्रोडमस्य कृतागसः॥
एवमाश्वासितो विद्वान् मार्जारेण स मूषिकः।
मार्जारोरसि विश्रब्धः सुष्वाप पितृमातृवत्॥
लीनन्तु तस्य गात्रेषु मार्जारस्य च मूषिकम्॥८३॥

जयमङ्गलाक्रोडपत्रम्

रवं ना सुलभं भवति। अतः शास्त्रकर्तृभिः धर्मसूत्रेण सर्वान् विभिन्न-विभिन्न-सम्प्रदायानाबद्ध्य देशे बन्धुभावं समुत्पाद्य भृतकश्रेणिमित्र-शत्र्वाटविक-सैन्यापेक्षया बन्धु-सैन्यबलं यथा साधितं भवेत्, तथा साधितमस्ति इति वृत्तिनियमनस्य नीतौ उपयोगित्वं बोध्यम्।

विशुद्धाच्चप्रतिग्रह' इति कामन्दकीयस्य समन्वयः।

(ज० २०६ पृ०) 'प्रतिग्रहास्त्विति'।

ननु कामन्दकीयनीतिसारे याजनाध्यापने शुद्धे इत्युक्त्यनन्तरं 'विशुद्धाच्च प्रतिग्रहः' (का० नी० २ स०) इति –उक्तम्। अत्र तु केवलं प्रतिग्रह एव निरूपितः। तत्र विशुद्धाच्चेत्यस्य किं तात्पर्यम् ? इतिचेत् उच्यते—

नीतिसारे वर्णाश्रमधर्मव्यवस्थात्मकचतुर्थप्रकरणेन सह लोकसङ्ग्रहाख्यं षष्ठं प्रकरणं तृतीयेसर्गेंअभिहितम्। इदं च प्रकरणं नाट्यशास्त्रे वर्णितेषु पञ्चसु सन्धिषु विमर्शसन्धिस्वरूपतां प्राप्तं राज्यस्य आदर्शस्थापकमस्ति इति सर्वे भारतीय-राजनीतिविदः मन्यन्ते। तत्र दानमेकं कर्तव्यत्वेन विहितमस्ति। तदुक्तं—

वाक्सूनृता दया दानं दीनोपगतरक्षणम्।
इति सङ्गः सतां साधु हितं सत्पुरुषव्रतम्॥ इति।

इदं सर्वमपि लोकसङ्ग्रहहेतुभूतं वाक्सूनृतादि पञ्चविधं कर्म राजा-शूद्रो वा भवतु, क्षत्रियो वा भवतु, सर्वेणापि राजपदाधिष्ठितेन अनुष्ठेयमेव, लोकसङ्ग्रहस्य आकाङ्क्षितत्वात्। यदा हि राजा शूद्रः स्यात् तदा सः मम (–शूद्रस्य–)कर्म यजनादि विहितं नास्ति इति मत्वा तदुपेक्षेत। परन्तु लोक-सङ्ग्रहभूतानि कर्माणि तु कदापि तेनापि नोपेक्ष्याणि भवितुमर्हन्ति। एवं सति यदि सः मूढः अविशुद्धो भवेत्, तदानीं 'अयं दानकर्माणि अविशुद्धत्वादनधिकारीति" उक्त्वा मत्वा वा अप्रतिग्रहेण ब्राह्मणः तं दण्डयितुं प्रभवेत्। इति उन्मत्ततामङ्गतस्य शूद्रस्य राज्ञः दण्ड्यत्वख्यापनार्थं वर्णाश्रमधर्मव्यवस्थाप्रकरणे चतुर्थे सर्गे नीतिसारकृता "विशुद्धाच्च प्रतिग्रह" इत्युक्तम्। इदमेवाभिप्रेत्य लोकसङ्ग्रहप्रकरणे षष्ठे दानस्वरूपविवेचनावसरे "स्थितिमान्[1] इत्यनेन पूर्वोक्तं वेदितव्यम्। तदिदं अर्थशास्त्रवार्तिकभूतस्य नीतिसारस्य 'विशुद्धाच्च' इतिपदतात्पर्यं बोध्यम्।

---

१ तदुक्तम्— गुणानुरागी स्थितिमान् श्रद्दधानो दयान्वितः।
धनं धर्माय विसृजेत् प्रियां वाचमुदीरयन्।

स्थितिमान्—स्वयमप्याचारवान् अन्यथा हि आचारस्थितिभ्रष्टादस्मात् कःप्रतिगृह्णीयात्।

क्षत्रियस्य—[1]अध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च;

जयमङ्गलाक्रोडपत्रम्

(ज० २०६ पृ०) एते प्रधानभूता इति। तत्तद्वर्णानां कृते विहितानां अध्ययनादि धर्माणामपहारेण अन्ये धर्माः तेस्तैरनुष्ठेया इति ज्ञापनाय प्रधानभूतत्वोपादानम्।

विहितेषु अन्यधर्माणां समावेशः

ननु नीतिवाक्यामृतादौ ब्राह्मणादीनां कृते अनुष्ठेयत्वेन अन्येऽपि धर्माः उक्ताः इति चेत् ? ते सर्वेऽपि सङ्गृहीता एव, यथायोग्यं तेषां तत्र तत्र अन्तर्भावयितुं शक्यत्वात्। वस्तुतस्तु विशेषतया नीतिवाक्यामृते प्रयुक्तानामितरेषां धर्माणां अर्थशास्त्रे अग्रहणमनङ्गित्वाद् बोध्यम्। अर्थात् यथा इज्यादिधर्माः साध्येरन् तथा लोके प्रयतनीयम्। नतु तानुपेक्ष्य अन्ये धर्माः सेवितव्या[2] इति। एवञ्च लोकस्य इज्याध्ययनादिको धर्मःप्रधानतयासंरक्ष्यः। इति शास्त्रस्य तात्पर्यं बोध्यम्।

(ज० २०६ पृ०) अपरानपि धर्मान्सूचयितुमाह अन्ये इति। अत्रेदं तत्वम् यथा अमरकोषे 'संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्' इति प्रतिज्ञातम्। किन्तु तत् संपूर्णतया नोक्तम् अतः अमरकोषस्य न्यूनत्वं संभवत्येव। तत्रेदं शास्त्रकारैश्चिन्त्यते। व्यवहारोपयोगिनी काचन दिक् संस्कृतभाषाभाषिणां कृते अमरकोषकारेण प्रदर्शिता। शेषं तु शिष्टव्यवहाराद् बोध्यते। इतिरीत्या सर्वनामलिङ्गानुशासनं निरुक्तं भवति इति। तथैव प्रकृतेऽपि तत्तद्धर्मनिरूपणविषये मूलकृतामाशयः अवगन्तव्यः।

श्रीमूला

शस्त्राजीवः शस्त्रेण आजीवो वृत्तिः। भूतरक्षणं प्राणिपालनम्।

वैदिकसिद्धान्तसंरक्षिणी

क्षत्रियस्येति।क्षत्रियस्याध्ययनादिधर्ममुक्त्वा धर्म्यां वृत्तिमाह शस्त्रेति। यद्यप्यत्र भूतरक्षणग्रहणेन शस्त्राजीवनं लभ्यते तथापि विनाप्याजीवनेन आपन्नानां भूतानां त्राणंकर्तव्य मिति ज्ञापयितुं पृथक् भूताभिरक्षणग्रहणम्। अत्रापि इतिशब्दोनुवर्तते।

---

१ नी० टी० क्षत्रियस्यापि स्वानुष्ठानमिति शेषः।

२ तदुक्तं नी०सा० षष्ठ सर्गे—

धर्मसंरक्षणपरो धर्मायार्थं विवर्धयेत्।
ये ये प्रजाः प्रबाधेरन् तांस्तान् हन्यान्महीपतिः॥
धर्माधर्मौ विजानन् हि शासनेऽभिरतः सताम्
प्रजा रक्षेन्नृपः साधु हन्याच्च परिपन्थिनः॥

जयमङ्गला

क्षत्रियस्येति। अध्ययनादयो धर्माः अध्यापनादिषु नाधिकारी क्षत्रियः। शस्त्राजीवः शस्त्रेणाजीवः जीवनम् अर्थार्थम्। भूतरक्षणम् आपन्नभूतत्राणन्धर्मार्थं च। यद्यपि रक्षणं कुर्वन् शस्त्रेणाजीवन लभते, तथापि विनाऽप्याऽऽजीवनम् आपन्नत्राणं कर्त्तव्यमिति रक्षणग्रहणेन दर्शयति।

जयमङ्गलाक्रोडपत्रम्

'क्षत्रियस्य अध्यापनाधिकारः

'क्षत्रियस्येति। अध्यापनादिषु इति। ननु क्षत्रियस्य अध्यापनाधिकारित्वं केन हेतुना नोक्तम्? क्षत्रियेण 'दानमीश्वरभावश्च युद्धे चाप्यपलायनम् (गी० १८) इति गीतोक्त-वाक्यानुसारेण युद्धकरणं हि क्षत्रियस्य स्वभावः। तदनुकूलतयैव क्षत्रियेण वर्तितव्यम्। अतः अयं रणशूरत्वात् ओजः प्राधान्याच्य गौडीगुम्फ एव स्थितो भवितुमर्हति। तदनुबन्धीनि च-टकार-ठकार-संश्लिष्टानि वाक्यान्येव उपयुक्तानि भवन्ति। तदुक्तं चन्द्रालोके 'मूर्ध्नि वर्गान्त्यगाः' इति। वेणीसंहारनाटके भीमवाक्येपि तथा—

''चंचद्भुजभ्रमित चण्डगदाभिघातः
सञ्चूर्णयामि गदया न सुयोधनोरू।
स्त्यानावनद्ध घनशोणितशोणपाणिः
उत्तंसयिष्यति कचांस्तव देवि! भीमः॥' इति।

इत्येतत्प्रमाणजातैः 'क्षत्रियः रणप्रधानः क्रूरो वा, इति हेतोः स न कदापि मधुर-वाक् भवति। इत्ययं उपदेशकुशलत्वाभावेन अध्यापनाधिकारान् निषेधितः शास्त्र-कर्तृभिः। कदाचित् अध्ययनादिकौशलेन क्षत्रियः मधुरवाग् भवतु कामं, तस्य हृदयं तु दण्डप्रणयनकर्तृत्वाधिकारात् अतीव कठोरमिति तु निश्चितमेव। अतएव तत्स्वा-भाव्यात् सैन्ये क्षत्रियप्रायस्य ग्रहण कृतम्। ब्राह्मणदीनां प्राधान्ये तु ते कोमलहृदय-त्वाच्छ शरणागतिमात्रेणैव शत्रषु दयालवो भूत्वा तमुपक्षेरन् इति सैन्ये ब्राह्मणस्य ग्रहणं न कृतम्[1]। शाकुन्तले अतएव पशुमारणकर्मदारुण इत्युक्त –

साधु[2] सङ्गच्छते? विप्रोयत्र हि पशुमारणकर्मणि प्रवर्तते तस्यापि कारणं नास्य स्वभावः, अपि तु वेदस्य आज्ञा अस्ति इति। तस्मादेव कारणात् वेदानुमोदितहिंसाति-

---

१ कौटिलीयार्थशास्त्रे अभियास्यत्कर्म-प्रकरणे—'ब्राह्मण-क्षत्रिय-वैश्य-शूद्र सैन्यानां तेजः प्राधान्यात् पूर्वं पूर्वं श्रेयः सन्नाहयितुम् इत्याचार्याः। नेति कौटिल्यः। प्रणिपातेन ब्राह्मणबलं परोऽभिहारयेत्। प्रहरणविद्याविनीतं तु क्षत्रियबलं श्रेयः, बहुलसारं वा वैश्य-शूद्र बल'मितिः।

२ ''सहजतकिल यद् विनिन्दितं न खलु तत् कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः॥''

जयमङ्गलाक्रोडपत्रम्

रिक्तकर्मणि जुगुप्सन्ते। ये हि किल सर्वथा सात्विकाः कोमलहृदयाः, ते वैदिकहिंसाकर्माण्यपि कर्तुं ह्रियन्ते किमुतान्यत्र। तदुक्तं भागवते षष्ठस्कन्धे चित्रकेतुस्तुतौ।

परहिंसया तथाऽधर्मः।' इति।

ब्राह्मणः सत्वप्रधानत्वात् कोमलहृदयवान् भवति। अतः सः उपदेष्टुं कुशलः इत्येतत्स्वभावं चिन्तयता शास्त्रेण ब्राह्मणानां कृते अर्जनाय उपयुक्तं अध्यापनं वृत्तिरूपेण विहितं न तु क्षत्रियाणां कृते इति।

अयमेव न्यायः वैश्यादिविषयेऽपि बोध्यः। स हि अर्थप्रधानत्वात् न शमप्रकृतिको भवितुमर्हति। अतस्तस्य बाहुल्येन क्षत्रियसादृश्यमेतददंशे वर्तते। इति सः अपेक्षानुसारेण उपदेशकुशलत्वशोभनहृदयत्वयोः सामञ्जस्याभावात् नाध्यापनस्याधिकारी। एतादृशमतिसूक्ष्मं वर्णनं तेषां तेषां मनोमयस्थितिमालक्ष्य शास्त्रेण तत्तद्वर्णानामुपनयनमपि विभिन्नेषु विभिन्नेषु समयेषु निर्दिष्टमस्ति।

तथाहि— 'गर्भाष्टमेऽष्टमेवाब्दे ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तुद्वादशे विशः॥ इति (म० २।३६)

अत्रायं भावः सर्वथा अहिंसाशीलत्वात् तस्या एव नैरन्तर्येण आवर्तनाय ब्राह्मणस्य अष्टमे वर्षे उपनयनम् विधीयते। क्षत्रियस्य एकादशवर्षपर्यन्तं कामचारित्वं शास्त्रेणानुमोदितं तेन तावत्पर्यन्तं तस्य कामचारित्वात् स्वभावानुरूपम् हिंसाऽऽदिशीलत्वं अपि दृढं भवति। सवर्था तदेव दृढं न भवतु इत्येतदर्थंउपनयनमपि विहितम्। वैश्यस्तु अनृतशीलो भवति स्वभावतः। अतः तस्य कृते स्वभावानुरूपं क्षत्रियसमयात् अधिकसमयपर्यन्तं कामचारित्वं अभिहितम्। इति—

अतः यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्'

इत्युक्तदिशा बाल्ये कर्मणि उद्बुद्धानां संस्काराणां तेषु तेषु वर्णेषु स्थितिः पुनस्तेषां ततो नियमनं च सोपपत्तिकं ध्येयम्।

'क्षत्रियस्याऽपि अध्यापनाधिकारः'

ननु क्षत्रियः यदि नाध्यापनाधिकारी, तर्हि क्षत्रियैः अध्यापनं कृतमिति इतिहासः कथमुपपन्नो भवति ? इतिचेदुच्यते। यदा हि कुलवन्तः स्वीयकर्मनिष्णाताः नोपलभ्यन्ते, तदा इतरद्वाराऽपि तत्कार्यं कर्तव्यमिति शास्त्रासमयानुसारेण उत्तमानां कार्यस्य करणेऽधिकारिणामभावे अवरेभ्यः विभिन्नकुलोनेभ्यः कार्यकरणसमर्थेभ्यः उत्तमकार्यकर्तृत्वाधिकारः शास्त्रेण अनुमोदितो वर्तते।

अत एव उक्तं मनुना—

'स्त्रियोरत्नान्यथो विद्या धर्मः शौचं सुभाषितम्।
विविधानि च शिल्पानि समादेयानि सर्वतः॥

जयमङ्गलाक्रोडपत्रम्

तथा—अब्राह्मणदध्ययनमापत्काले विधीयते।

अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥ इति (म० २।२४१)

किञ्च-राज्यसरंक्षणादिसदृशं महत्तरं कार्यं कर्तुं क्षत्रियो यदा असमर्थो भवति, शूद्रश्च समर्थः वर्तते तदा शूद्रस्तत्कार्यं कर्तुं प्रभवति, न हि क्षत्रियः वर्तते इत्यतावन्मात्रेण तत्कार्यकरणे अगुणः क्षत्रिय आनेयः।

तदुक्तम्—'न चैकपुत्रमविनीतं राज्ये स्थापयेत्' इति।

(कौ० अ० पुत्ररक्षण प्रकरणे—

अपारे यो भवेत् पारमप्लवे यो भवेत्प्लवः।
शूद्रो वा यदि वाऽप्यन्यः, सर्वथा मामर्हति ॥ इति च।

(महाभारत—वाक्याच्च)

अपरञ्च मध्यमकर्मणि ये नियुक्ताः, ते यदि उदारगुणसंयुक्ताः वर्तन्ते, तर्हि समयमालक्ष्य यथावसरं प्रोन्नेया, इति नीतिसारे उक्तमस्ति[१]। तत् अपि एतदभिप्रायेण बोध्यम्। अतो न क्षत्रियाः अध्यापनाधिकारात् सर्वथा वञ्चिताः किन्तु कुलीनलाभे क्षत्रियाणामध्यापनाधिकारो नास्ति इत्येव प्रागुक्ताशया बोध्यः। तेन क्षत्रियस्याध्यापनाधिकारनिरूपकविधिनिषेधयोः अयं भावः यत् कुलीनाः अध्यापनाय अपेक्षितगुणसंपन्नाः तत्तद्कार्यदक्षाः यदा भवेयुः तदा स्वस्वकार्यस्य अव्यभिचरितत्वलाभार्थं नियुक्ताः,

समुत्पनेषु कृच्छ्रेषु दारुणेष्वप्यसंशयम्।
दर्शयेत्स्वच्छहृदयः कुलीनश्चतुरस्रताम् ॥

इत्युक्तत्वात्। तदा ते ते कुलीनाः स्वस्वकर्माणि कुर्युः, अन्यथा तु अपरेऽपि कुलीनाः तत्तत् कार्यदक्षाः तत्तत्कर्माणि कुर्युः इति सिद्धम्।

कुलीनत्वस्य स्थितिः

नन्वेवं भारतीयराजनीतिशास्त्रे कुलीनत्वं तत्तद्कर्मकर्तृमातापितृप्रयुक्तमस्ति अथवा तेन सह जातिप्रयुक्तमस्ति ? इति चेत् तत्तज्जातिप्रयुक्तमस्तीति सिद्धान्तो वर्तते। यदाहुः—'यथा कन्या तथा हविः इति।' (बालं भट्टी)

एतेन तत्तज्जातिप्रयुक्ताः राज्यायापेक्षिता गुणाः तेषु तेषु उपलब्धुं शक्याः। शक्या च सजातीयेषु अधर्मात् अव्यवहार्यात्, अशुचिकर्मणः निवृत्तिः। तदेतत् महत्फलं जातिशुद्धिप्रयुक्तकुलीनत्वस्य बोध्यम्। तदाहुरभियुक्ताः—

"आहारेष्वथ योनौ च बीजे कर्मणि चापि यः।
शुचिः कृच्छ्रगतस्यापि न पापे रमतेऽस्य धीः।" इति।

---

१ गुणैरुदारैः संयुक्तान् प्रोन्नयेन्मध्यमाधमान्।
महत्तां प्राप्तुवन्तो हि राजानं वर्धयन्ति ते ॥

जयमङ्गलाक्रोडपत्रम्

वृत्तिवैषम्याभावः

अतो जातिमर्यादा भारतीयराजनीतिशास्त्रेणापि समस्तविद्याप्रतिष्ठापनकामेन स्वीकृता वर्तते। अत्रायं निष्कर्षः अपेक्षितसंस्कारोद्बोधाय तत्तद्जातीयेष्वेव विवाहः भोजनं च शास्त्रेण नियमिते। तथानियमेऽपि नैतिकवृत्तिव्यवस्था तु सन्मानादिपरीक्षित-गुणतारतम्यानुसारेण नियुक्तानामधिकारिणां कृते समानरूपेणैव वर्तते। अतो वैषम्य-नैर्घृण्ये न स्तः। तेन नात्र अर्थकामयोः विभागविषये कश्चन पक्षपातोऽस्ति इत्यपि सुमन्तव्यम्। तदुक्तं सनातनधर्मप्रदीपस्नेहप्रपूरिण्याम् द्रष्टव्यम्। तथाहि —

डा० श्री अम्वेडकर महोदयेनोक्तं हिन्दुधर्मे ना स्माकमस्त्युन्नत्युपायइति मया बौद्धेन भूयते। इति चेदभिधीयते। यादृशीमर्थकामोन्नतिमभिलषति महोदयोऽयम् तादृश्या उन्नतेः किं स्वरूपं स मनसि निर्धारितवान् इति विचारावसरे अन्ततो गत्वा सर्वमतसाधारण्येन धर्मार्थकामसमृद्धिरेव सेति वक्तव्यमापतति। किन्तु उक्त-महोदयोऽयं केवलमर्थकामयोरेव समृद्धिमपेक्षते न धर्मसमृद्धिम्। भवतु तथैव। तत्रापि ब्रूमः। कामसमुन्नतिः अर्थसमृद्धिमन्तरा दुःशकेति हेतोः अर्थसमृद्धिरेवोन्नतिपदार्थो मन्यताम्। तथा च समाजे वृत्तिनियन्त्रणशीलस्य धर्मस्य सत्वात् तत्रार्थसमृद्धि-मदृष्ट्वा बौद्धधर्मानुयायितां स्वीकर्तुं प्रयतते सोऽयं महोदयः। परन्तु भारतीयराज-नीत्यनुसारेण स्वधर्मे सर्वस्योन्नतिः भवितुमर्हति न वेति पूर्वं विमृश्यते। राज्ये हि अनेकेषु कार्यविभागेषु तत्र तत्र कश्चनाध्यक्षः आध्यक्ष्यपदे नियोजनीय एव राज्ञा। यथा सुवर्णचर्मणोरध्यक्षस्थाने सुवर्णकारचर्मकारजातीयावेव। एतेन राज्ञा तावपि सदा नियन्त्रयितुं शक्येते अवग्रहादिवलादिति विवेचितं शान्तिका अग्रदूत ग्रन्थे द्रष्टव्यम्[1]।

---

१ शासनकार्यार्थं भारतीयराजनीतौ प्राधान्येनाष्टादश विभागा निर्दिष्टाः तेषु विभिन्नकार्योद्देश्येन विभिन्नजातीया मन्त्रिणो निर्वाचिता भवेयुः। उदाहरणार्थं एको विषयः प्रस्तूयते। भारतीयराजनीत्यनुसारेण सुवर्णाध्यक्षनिर्वाचनं स्वर्णकारजातीयैरेव कर्तव्यम्। केषा-ञ्चिदाभूषणनिर्माणमभीष्टं चेत्तद्विभागद्वारा कारयितुं शक्यं भवति। तस्येद फलं यत् तद्विभाग निर्देशने यदि सुवर्णचौर्यं न्यायालयतः सिद्धं भवेत्तर्हि तदुत्तरदायित्वं सुवर्णाध्यक्षस्यैवेति तद्वेतनात् क्षतिपूर्तिः राज्ञा कर्तव्या। वेतनापेक्षयाऽधिकक्षतौ तु तन्निर्वाचनकर्तॄणां तज्जातीयानामुपरि दण्डो विधेय इति। एवमेवान्यत्र ज्ञेयम्। अतोऽनया रीत्या मतदानसमय एवोच्छृङ्खलस्य निर्वाचनं यथा न भवेत् तथा तत्तज्जातीयैः स्वहितैर्भूयेत। एवञ्चाऽनया पद्धत्या योग्यरीत्या मतदाने प्रवृत्तिरपि जनतायां जागृता स्यात्। अमात्योऽपि जातीयमर्यादापालनद्वारा जनतायाः स्थायिविश्वासपात्रतार्थं सदा प्रयत्नशीलो भवेदित्येवं जातीयनिर्वाचनास्य महान् लाभः।

एवं रीत्या कृतं जातिनिर्वाचनं शास्त्रेण "स्वजनेभ्यो विजानीयात् कुलं स्थाननवग्रहम्" इति पद्येन प्रतिपाद्यते। प्रसङ्गादिदमपि स्मार्यते यत् मन्त्रिनिर्वाचने अपरेप्युपायाः अनेन

तदनुसारेण तत्तदध्यक्षऽपदेषु स्थिता अध्यक्षास्तत्तज्जातीयाः सर्वेऽपि समानवेतनादिभिः समानतयैव सम्मानभाजो भवन्ति। तदीयव्यवसायलब्धद्रव्यविनियोगः तत्कर्मसु नियुक्तिश्च तत्तज्जातीयेष्वेवात्र प्रतिपादिते। तथा च चर्मणो व्यवसाये चर्माध्यक्षाधीनं स्वजातीयेषु विनियोक्ष्यमाणं द्रव्यं याजनाद्युपलब्धद्रव्यापेक्षया न्यूनं भवति भविष्यति वेति विश्वसितुं को वा पारयेत्। तथा चाऽर्थसमृद्धिर्नास्ति हिन्दूधर्मे, इति कथनं भारतीयराजनीतेः अज्ञानस्य फलम् एतेन—

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥

इति कालिदासोक्तं सङ्गच्छते।

शास्त्रेण—प्रतिपादिताः। ते च विद्वन्मतं, जातीयमतं, लोकमतं प्रत्यक्षमनुमानं चेति पञ्चभिरुपायैः परीक्षितगुणा मन्त्रिणः शासनसभां प्रविश्य शासनकार्ये सम्पूर्णतया सहायका यदि भवेयुस्तर्ह्यवश्यं गौरूपेयं पृथिवी वत्सस्थानीयाया जनतायाः कृते स्वयं समस्तसम्पद्धारां प्रवाहयिष्यति इत्यत्र नास्ति संशयलेशोऽपि। एतादृशनिर्दुष्टव्यवस्था भारतीयराजनीतितोऽन्यत्र अत्यन्तं दुर्लभैव—

अपि च अपराधानुसारेण दण्डव्यवस्थां विधायापि लोकप्रियतासम्पादनपूर्वकं जनतायां शासनसंस्थायाः पूज्यत्वबुद्धिनिर्माणमतिदुष्करम्, दण्डव्यवस्थायां अपराधिनां संपत्तिहरणे वधदण्डे वा कृते जनतायाः कोपस्य सम्भाव्यमानत्वात्। दण्डो यदि न प्रणीयेत तर्हि शासनसंस्थाया एवान्यथासिद्धत्वं भवेत्। शासनसंस्थाभयाभावेन च सर्वत्र मात्स्यन्यायःप्रचलेत्। तदुक्तं कामन्दकेन—

परस्परामिषतया जगतो भिन्नवर्त्मनः।
दण्डाभावे परिध्वंसी मात्स्यो न्यायः प्रवर्तते। इति।

अतो दण्डविधानमावश्यकम्। भारतीयव्यवस्थानुसारेणाऽन्यजातीयमन्त्रिणां तदनुगामिनांच च समर्थनं प्राप्य निर्वाचितस्यैकजातीयमन्त्रिणोऽपराधे तज्जातीयेष्वन्येषु दण्डविधानं सुशकं भवति। एतादृशदण्डभयमेवान्येषु मन्त्रिषु तदनुयायिवर्गेषु च सम्यङ्नीतिमार्गानुसरणे प्रवृत्तिमुत्पादयेत्। जातिव्यवस्थामन्तरा सर्वसाधारण्येन लोकमतेन निर्वाचितस्य मन्त्रिणोऽपराधे यदि सर्वेषां मतदातृणामुपरि दण्डविधानप्रसङ्गः स्यात् तर्ह्यवश्यं जनतायाः कोपपात्रीभूता शासनसंस्था न बहुकालं स्थितिं लभेत। अत एवोक्तं कामन्दकेन—

उद्वेजयति तीक्ष्णेन मृदुना परिभूयते।
दण्डेन नृपतिस्तस्माद्युक्तदण्डः प्रशस्यते। इति।

अयमर्थः—यादृशो दण्डो लोकविद्वेषजनको यादृशं शासनसंस्थानं वा आत्मनो व्यर्थतां संपादयेत्तदुभयस्माद् भिन्नः सुप्रयुक्तो दण्ड एव प्रशस्त इति। वर्तमानपाश्चात्यनीतौ तु मन्त्रिभिर्महत्यपराधे कृतेऽपि शासनसंस्थया तत्क्षेत्रीयेभ्यः सर्वेभ्यो मतदातृभ्यो दण्डदाने साहसं कर्तुं न पार्यते। निर्वाचने जातिनियमाभावेन च जनतायाः सविधे येन मन्त्री निगृहीतः स्यात्तादृशमङ्कुशरूपं जातीयनियमनमपि नास्ति। एतस्य दुष्परिणामोऽयमेव यन्मन्त्रिभिर्निर्भयतया प्राप्तस्याधिकारस्य पदस्य च दुरुपयोगः क्रियते। विशेषतः सौजन्यस्यापि विस्मरणं तेषां भवति। एतद्दोषस्य निवारणोपायः कोऽपि जातिमर्यादाया उच्छेदिकायां वर्तमानराजनीतौ नास्ति। इति।

जयमङ्गलाक्रोडपत्रम्

कुलीनेषु श्रद्धादार्ढ्यम्

किञ्च कुलीनत्वस्य जातिप्रयुक्तस्य प्रतिभोद्बोधफलातिरिक्तोऽपरोऽपि एको गुणो वर्तते यत् धर्मेषु अनुष्ठीयमानेषु श्रद्धादार्ढ्यमिति। यस्य श्रद्धादार्ढ्यं नास्ति सः न अपेक्षितफलभाग् भवति इति।

इदञ्च श्रद्धावत्वं यथा कुलीनेषु दृश्यते संस्कारदार्ढ्यात्, तथा अपरत्र स्वभावतः बाहुल्येन सम्भवतीति न वक्तुं शक्यते। तदुक्तं गीतायाम्—

शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।
अथवा योगिनामेव कुले भवति धीमताम्॥ इति[1]। (गो० ६।४१, ४७)

इदं हि सुप्रजाजननं जातिमत्कुलीनत्वप्रयुक्तं यदुच्यते, तत् आधुनिक-गवेषकैरपि न उपेक्षितुं शक्यते, सुप्रजाजननस्य तैरपि अपेक्षितत्वात्, गोधूमधान्य-गवाद्युत्तमपश्वादिप्रभवार्थं तेषां प्रकृतिदर्शनाच्च।

इदं हि कुलीनत्वस्य प्रतिभोद्बोधरूपं सुप्रजाजननकार्यं कथं भवतीत्यत्र उदाहरणं कापालिकसिद्धान्तः। तथाहि—तत्सिद्धान्ते नरबलिः स एव शुद्धो भवति, यः खड्गघातादिभिः म्रियमाणः पुरुषः सहजत एव भगवन्नाम कीर्तयेदिति। एतादृग्रीत्या वृत्तिनियमनेन सर्वेषु वर्णाश्रमेषु एकदेशनिवासिषु पारस्परिकं बन्धुत्वं राजनीतिशास्त्रेण साधितम्, यत्र बन्धुत्वमुद्बुद्धं भवति, तत्र क्रुद्धत्वलुब्धत्वभीतत्वापमानितत्वेषु अन्यतमस्य भेदहेतोः प्रसङ्गः नोत्पद्यते। अतः बन्धुभृतकश्रेणीमित्रशत्र्वाटविकेषु नियमितवृत्तिमतां बन्धूनां सैन्यस्य अतीव प्राबल्यमभेद्यत्वं च साधितम्। इत्येवं कुलीनत्वस्य स्थितिः उत्तरोत्तरप्रतिभोद्-बोधनाय विनयस्थापनाय च अपेक्षिता तत्तद्कर्मकर्तृजातीयताप्रयुक्ता वेदितव्या। इदमवधेयमत्र, यत् राजनीतिरियं जातिप्रयुक्तकुलीनत्वस्य माहात्म्यं वर्णयन्ती न केवलं कुलीनत्वमवस्थापयति, अपि तु तत इतरगुणैः अपेक्षितैः सहचरितं सद् यत् कुलीनत्वं तदेवात्राऽनुमन्यते इति।

अकुलीनेषु प्रतिभोद्बोधः

ननु व्यासादयः शूद्रायां उत्पन्नाः तथापि तेषु प्रतिभोद्बोधः कथं समभूत्? इति चेदुच्यते। ते हि जन्मत एव सिद्धिसम्पन्नाः नास्माकमनुकार्याः अत एव जन्मतः सिद्धत्वात् व्यासादयः शास्त्रप्रणेतारः यथार्थवक्तारश्च संबभूवुः इति तेषामुच्चकुली-

---

१ म० सू० भाष्यम्—श्रद्धावैराग्यादिकल्याणगुणाधिक्ये तु भोगवासनाविरहात् पुण्यकृतां लोकानप्राप्यैव योगिनामेव दरिद्राणां ब्राह्मणानाम्, न तु श्रीमतां राज्ञां कुले जन्म भवति। धीमतां ब्रह्मविद्यावताम्। एतेन योगिनामिति न कर्मिग्रहणम्। यच्छुचीनां श्रीमतां राज्ञां गृहे योगभ्रष्टजन्म तदपि दुर्लभमनेकसुकृतसाध्यत्वान्मोक्षपर्यवसायि-त्वाच्च।"

जयमङ्गलाक्रोडपत्रम्

नोत्पन्नत्वाभावेऽपि न क्षतिः । तथाविधा सिद्धिः अस्मासु नास्ति । अत्रेदमवधेयम् । संस्कारोद्बोधाय प्रतिभोद्बोधाय च कुलीनत्वमेकमस्मासु अवशिष्टं वर्तते । तदऽपि यदि अदृश्यं भवेत् तर्हि विनयस्य स्थाने अहङ्कारस्य प्रादुर्भावः भविष्यति । यतः—दृश्यते यत्र रसमयमेवाध्ययनम् तत्र तावन्मात्रेण मोहस्यापि संभवः ततः शक्तिह्रास एव इति वैदिकसिद्धान्तसंरक्षिण्यां प्रपञ्चितमस्ति । अतः क्वचित् केनचिद् सिद्धेन लब्धमिति कृत्वा असिद्धेनापि तदनुष्ठेयमिति न सम्यक् । किन्तु कार्यकारणभाव एव शरणीकरणीयः । तदनुसारेण कुलीनत्वस्य सुरक्षापुरस्सरं निरभिमानितया सत्वं वर्धनीयम् । तत्र गुरुभक्तिः ईश्वरभक्तिश्च सहकारिण्यौ । ततो ज्ञानलाभः इत्येमुपवर्णितः कार्यकारणभावः यावत्पर्यन्तं देशे जागरूकः आसीत् तावत्पर्यन्तं अष्टादशविद्यासु चतुष्षष्टिकलासु च पारङ्गताः सम्बभूवुः । एवंविधः समयः ५००० पञ्चसहस्रवर्षपूर्वमासीत्, सान्दीपनिद्वारा समस्तानां विद्यानां कलानां च कृष्णेन कृतस्याऽध्ययनस्य पुराणेषु उपवर्णनात् । यद्यपि तादृशी स्थितिः अधुना नास्ति तथापि "अर्थी समर्थो विद्वानधिक्रियते" इति न्यायेन यावच्छक्यं तावत् कुलीनत्वसुरक्षार्थं प्रयतितव्यमेव इत्यलम् ।

(ज० २०६ पृ०) धर्मार्थम् इति । फलमनभिसन्धाय भूतरक्षणं राज्ञा कर्तव्यमन्यथा सः नरकभाक्स्यात् इति ज्ञापनार्थम्, धर्मस्य अपूर्वत्वमतेन तत्पालनार्थं वा ।

धर्मस्वरूपं

ननु धर्मस्य स्वरूपं कीदृशमिति चेत् राजनीतिशास्त्रं हि सर्वशास्त्रस्य प्रतिष्ठापकत्वात् यन्मते यादृशं धर्मस्वरूपम् निर्णीतमस्ति तत्सर्वमत्र ग्राह्यम् । तत्र केचन धर्मः अपूर्वमिति वदन्ति । अन्ये धर्मः क्रियेति वदन्ति । अपरे ईशप्रसाद एव धर्मं इति च वदन्ति । यन्मते हि अपूर्वं धर्मः तन्मते 'धर्मः क्षरति कीर्तनात्' इति पद्यस्य समन्वयो भवति । अर्थात्—यदि धर्मः क्रियास्वरूपः स्यात् तर्हि तस्याः अनुष्ठानसमय एव नाशात् पुनः कीर्तनेन धर्मस्य नाश्यत्वमनुपपन्नं स्यात् अतो धर्मस्य अदृष्टरूपत्वं स्वीकृतमस्ति । इति नैयायिकमतम् ।

यस्मिन मते च धर्मस्य क्रियारूपत्वमुच्यते तन्मते "धार्मिकोऽयमिति अनुष्ठानसमये प्रामाणिकव्यवहारात् तदानीं चादृष्टोत्पत्यभावात् यागादिक्रियाणामेव धर्मत्वं स्वीक्रियते । यच्चोच्यते "धर्मः क्षरति कीर्तनादिति तत्तु क्रियाजनितफलपरतया व्याख्येयम् । इत्यवं मीमांसकमतम् ।

यन्मते ईश्वरस्यास्तित्वमस्ति तन्मते विधिनिषेधयोः परिपालने सति सः प्रसन्नो भवतीति ईशप्रसाद एव धर्मो भवति । तदुक्तम्—

वैश्यस्य—अध्ययनं यजनं दानं कृषिपाशुपाल्ये वणिज्या च;

जयमङ्गलाक्रोडपत्रम्

यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः ।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम् ॥ (भा० ४।९।४७)
तितिक्षया करुणया मैत्र्या वाऽखिलजन्तुषु ।
समत्वेन च सर्वात्मा भगवान् संप्रसीदति ॥
संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः ।
विमुक्तो जीवनिर्मुक्तो ब्रह्मनिर्वाणमृच्छति ॥ इति । (अ०४।११।१३।१४)

एतदुपासकानां भक्तानां मतम् । अथ सर्वनिर्दिष्टतत्तन्मत-सिद्धस्य धर्मस्य शब्दप्रमाणकत्वेऽपि प्रत्यक्षप्रमाणप्रमितत्वं सिद्ध्यधीनेन नीतिलक्षणेनाक्रान्तत्वं कथं भवतीति विशेषनिर्वचनं तु अग्रे यथावसरमाश्रमधर्मनिरूपणे निरूपयिष्यते ।

श्रीमूला

कृषिपाशुपाल्ये कृषिः केदारेषु । पाशुपाल्यं पशुपालनकर्म गवाश्वादीनां पोषणचिकित्सादि । वणिज्या क्रयविक्रयव्यवहारः ।

वैदिकसिद्धान्तसंरक्षिणी

[1]वैश्यस्येज्यादित्रयं धर्ममुक्त्वा धर्म्यां वृत्तिमाह । कृषीति । कृषिः बीजावापादिः पराशरोक्ता । पाशुपाल्यं पशुपालनकर्म गौतमशालिहोत्रादिप्रणीतम् । वाणिज्यं क्रयविक्रयव्यवहारो विदेहराजप्रोक्तः ।

पशुपालनकृष्योः पौर्वापर्यम्

ननु पाशुपाल्यं कृषिः पण्यं वैश्यस्याजीवनं स्मृतम् । का० नी० स० २-४
इति पद्येन पशुपालनकर्मणः नीतिसारे प्राथम्येन ग्रहणमस्ति । अत्र तु कृषिः पूर्वमुक्ता उभयोः समन्वयः कथमितिचेन्न ।

प्रजापतिर्हि प्रजाः सृष्ट्वा वैश्याय परिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ॥
न च वैश्यस्य कामः स्यात् न रक्षेयं पशूनिति ।
वैश्ये चेच्छति नान्येन रक्षितव्या इति स्थितिः ।

इति मनुवचने वैश्यैः पशुपालनं कर्तव्यम् इति विहितम् । अनेन पशुपालनप्रतिभूत्वं वैश्येषु वर्तत इति निर्णीयते अतः तदनुगुणवान् कामन्दकः वैश्ये तत्प्रतिभूत्वस्य स्थापनार्थं नीतिसारे पाशुपाल्यं प्रागभिदधे ।

---

१ (२०८ पृ० संरक्षिणी शेषः) अध्ययनं षडङ्गस्यस्वाध्यायस्य गुरुसान्निध्ये । अयं धर्मः । अध्यापनम् उपनीतान् वत्तदधिकारिणः प्रति । इदं वृत्तिः यजनं दर्शपूर्णमासादिः अयं धर्मः । याजनं याज्दस्य अधिकारवतः । इदं वृत्तिः । दानं दक्षिणादानादिः अयं धर्मः । प्रतिग्रहः शुद्धात् अयं

वैदिकसिद्धान्तसंरक्षिणी

मूलकारस्तु कृषिप्रधाने भारते देशे अर्थोपार्जनोयायेषु तस्याः प्राधान्यं चिन्तयित्वा आदौ कृषिमभिदधाति । शेषं क्रोडपत्रे द्रष्टव्यम् ।

जयमङ्गला

वैश्यस्येति अध्ययनादयो धर्माः । कृषिपाशुपाल्ये वृत्यर्थे प्राधान्येन, योगविभागकरणात् । वणिज्या च वणिक्कर्म अन्वाचीयमाना । अल्पफलत्वात् । अतोवार्तेति नोक्तम् ।

जयमङ्गलाक्रोडपत्रम्

कृषिपाशुपाल्योः वणिज्यातः पृथक्करणम्

वैश्यस्येति । कृषिपाशुपाल्ये इति—

ननु कृषिपाशुपाल्ययोः वणिज्यातः विभज्य निरूपणे कोऽभिप्रायः ? इति चेच्छृणु । वणिज्यायाः वैश्येन मूलधनादुपरि यः लाभः कर्तव्यः स तु शास्त्रेण मर्यादितः व्यवहारप्रकाशेउक्तः, मर्यादायाः अतिक्रमणे तु वणिजां दण्ड्यत्वं निरूपितम् । एतदेवाभिप्रत्य कौटिल्येनापि पण्याऽध्यक्षप्रकरणे उक्तम्—

"उभयं च प्रजानामनुग्रहेण विक्रापयेत् । स्थूलमपि च लाभं प्रजानामौपघातिकं वारयेत् ।" इति । कृष्यां तु इयन्मर्यादया अन्नमुत्पादनीयमिति वक्तुं केन शक्यते ? तत्र यावान् लाभो भवति स सर्वोऽपि कृषिस्वामिन एव स्वत्वास्पदं भवति । इत्येतत् कृषिकार्यं शास्त्रलोकोभयसम्मतत्वात् वणिज्यापेक्षया अधिकफलप्रदमस्ति । अतः कृषिं वणिज्यातः पृथक्कृत्य तस्या आदौ निरूपणमिति ध्येयम् ।

कृषिपाशुपाल्ययोः पूर्वनिर्देशे मतभेदः

ननु नीतिसारे "पाशुपाल्यं कृषिः पण्यं वैश्यस्याजीवनं स्मृतम् इत्यभिदधता कामन्दकेन पाशुपाल्यस्य कृष्यपेक्षया आदौ उपन्यासः कृतः स कौटिल्येन सह विरोधं प्रतिभासयतीति चेन्न ।

अत्र हि मतद्वये तस्य तस्य ग्रन्थकर्तुः दृष्टिभेदो वर्तते । तत्र कौटिल्यः अर्थ एव प्रधान इति उक्तवानुतद्वचन निर्देशात् । तेन सः अर्थोपार्जनमभिलक्षयति । इति सिद्ध्यति । कामन्दकस्तु एतद् धर्म-निरूपणे तत्तद्वर्णानां प्रतिभूत्वं प्रदर्शयति । तत्र मूलं वाक्यं मनुवचनं बोध्यम् तथाहि—

प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ॥
वैश्ये चेच्छति नान्येन रक्षितव्या इति स्थितिः ।
न च वैश्यस्य कामः स्यान् न रक्षेयं पशूनिति ॥ इति ।

वृत्तिः । स च ब्राह्मणस्य विशुद्धः । चकारात् पाशुपाल्यादि आपत्कालीना वृत्तिर्वा बोध्या । इति-शब्दः इतरप्रतिषेधार्थः ।क्षत्रियधर्ममाह—क्षत्रियस्येति । यजनं राजसूयाश्वमेधादिः शेषं स्पष्टम् ।

शूद्रस्य[1]—द्विजातिशुश्रूषा[2] वार्ता कारुकुशीलवकर्म च ॥

जयमङ्गलाक्रोडपत्रम्

इदं हि मनूक्तं पाशुपालनकर्म वैश्येन अनुष्ठेयमेव। इत्येतद्धेतोः पशुरक्षणं प्रति प्रतिभूत्वस्य वैश्ये अस्तित्वप्रदर्शनार्थं कामन्दकेन पाशुपाल्यं आदावुपन्यस्तम्। कौटिल्येनतु अर्थदृष्टिं चिन्तयता कृषावर्थलाभस्याधिक्यात् आदौ सोपन्यस्ता इति बोध्यम्।

आधुनिकेषु वैश्येषु वैश्यत्वम्

ननु 'वैश्येन वेदोऽध्येतव्यः' इति शास्त्रेण विहितत्वात् वेदाध्ययनार्थं गुरुणा स उपनेतव्यः। परन्तु साम्प्रतं बाहुल्येन उपनयनकर्म वैश्यस्य लुप्तप्रायं दृश्यते। अतः वेदाध्ययनादपि स वञ्चितः दृश्यते। एतदवस्थायां स्वीयधर्मविलोपेन वणिक्षु वैश्यत्वजातिः कथं स्वीकर्तव्या ? इति चेदभिधीयते।

तत्तज्जातीयानां कृते ये ये धर्माः निरूपिताः तेषां विलोपेन तत्र वंशे सर्वत्र जातिः परिवर्तते इति न शास्त्रस्य मर्यादा, अपि तु वंशे यदा हि साङ्कर्यं कर्मकृतं, कुलकृतं वा संभवति, तदा तद्वंशे जातिः परिवर्तते इति शास्त्रस्य मर्यादा। तदनुसारेण वर्तमानेभ्यः वणिग्भ्यः वैश्यत्वं व्यपगतमिति कथं वक्तव्यम्? ते हि स्वीयं वणिज्याकर्मं परम्पराप्राप्तमद्यावधि अनुतिष्ठन्तः सन्त्येव। तस्य यावत्पर्यन्तं स्थिरता वर्तते, तावत्पर्यन्तं तेषु साङ्कर्यं कथमपि नास्ति। तथा च साङ्कर्याभावात् अधुनातनेषु वणिक्षु वैश्यत्वमस्तीति स्वीकारे किमपि बाधकं न पश्यामः। उपनयनादिसंस्काराणां विलोपात् वेदाध्ययनस्य अभावाच्च संस्कारलोपप्रयुक्तं ब्राह्मणेषु व्रात्यत्वमिव वणिक्षु व्रात्यवैश्यत्वमस्तु कामम्। तेषु वैश्यत्वन्तु स्थिरमेव।

यदि च ब्राह्मणानां कृते जीविकार्थं अनुष्ठेयत्वेन विहितं वेदाध्ययनं प्रति अङ्गभूतोपनयनमिव वणिज्यां प्रति उपनयनं वैश्यानां कृतेऽङ्गत्वेन विहितं स्यात् तर्हि उपनयनविलोपप्रयुक्तं वैश्यस्य वणिक्कर्मापि विलुप्तं स्यात्। तथाविधा स्थितिः न क्वचिद् शास्त्रकर्तृभिः शास्त्रेषु निर्दिष्टा। ब्राह्मणवंशपरम्परायां तु उपनयनाभावे वेदाध्ययनाभावात्, तत्प्रयुक्तजीविकाविलोपप्रसक्तेः अवश्यंभावात् प्रायश्चित्तानपनोद्यपातकस्थितौ पुनर्वेदाध्ययनस्य अप्रसक्तत्वात् ब्राह्मणवंशपरम्परायां सांङ्कर्यमहिम्ना ब्राह्मणत्वजातिपरिवर्तनं भवितुमर्हति, न तथा वैश्ये। अतः वर्तमानेषु वैश्येषु वैश्यत्वस्वीकारे न कापि हानिः इति ध्येयम्।

श्रीमूला

द्विजातिशुश्रूषा द्विजातयो ब्रह्मक्षत्रियवैश्याः तेषां परिचरणम्। वार्ता कृषिपाशुपाल्यवणिज्याः। कारुकुशीलवकर्म शिल्पिकर्म चारणकर्म च।

---

१ नी० टी० अनुष्ठानमिति शेषः।

२ त्रयो वर्णा द्विजातय इति।

[आश्रमधर्माः]

गृहस्थस्य[1]—स्वकर्माजीवः[2], तुल्यैरसमानर्षिभि[3]र्वैवाह्यं, ऋतुगामित्वं, देवपित्रतिथिभृत्येषु[4] त्यागः, शेषभोजनं च ।

वैदिकसिद्धान्तसंरक्षिणी

शूद्रस्य धर्ममाह **द्विजातीति** । द्विजातयः ब्राह्मणक्षत्रियविशः । तेषां शुश्रूषा सेवा । इयं धर्मार्था बोध्या । इयं सामान्या वृत्तिः । विशेषामाह कार्विति । तत्रापि सति ब्राह्मणे न क्षत्रियस्य क्षत्रिये वा न वैश्यस्य इति ध्येयम् । धर्म्यां वृत्तिमाह वार्तेति । अस्य कर्मेत्यनेन संबन्धः द्वन्द्वान्ते श्रूयमाणं प्रत्येकमभिसंबध्यते इति न्यायात् । कारुकर्म तक्षणादि । कुशीलवकर्म नृत्यगीतवाद्यादि ।

जयमङ्गला

शूद्रस्येति । द्विजादीनां ब्राह्मणक्षत्रियविशां शुश्रूषा परिचरणन्धर्मार्थम् । वृत्तये च वार्ता । तथा कारुकर्मं तक्षणादि । कुशीलवकर्म नृत्तगीतादि । एतद् यथोत्तर मुपचीयमानं वृत्यङ्गम् ।

जयमङ्गलाक्रोडपत्रम्

वृत्तये इति । अत्र 'वृत्तये वार्ता' इत्युक्तम् । अग्रे यथोत्तरमुपचीयमानं वृत्यङ्गमिति वक्ष्यति । आभ्याङ्ग्रन्थाभ्यां वार्ताकारुकर्मतक्षणादिकर्मंसु उत्तरोत्तर-कर्मंकरणे शूद्रस्य बहुलं धनार्जनं इति टीकाकृता मूलकृदाशयः व्यञ्जितः । किञ्च वर्णधर्मनिरूपणे वार्ता वैश्यस्य आजीविकेति मूलकृता यद्यप्युक्तं, तथापि स्वस्वधर्मेण जीविकायाः असम्भवदशायां तत्तद्धर्मपरिपालनेन सह जीविकार्थे वार्ता अनुष्ठेया इति मूलकृदाशयोऽप्यत्राभ्यूहनीयः । तदुक्तम् उक्तानुक्तदुरुक्त-चिन्ताकृता अर्थशास्त्रवार्तिकभूते नीतिसारे तट्टीकायां च ।

'शुद्धा च वृत्तिस्तत्सेवा कारूचारणकर्म च' ।

टी०—शुद्धा च वृत्ति रिति चशब्दाद् वार्ता च सामान्या । इति ।

श्रीमूला

आश्रमधर्ममाह—**गृहस्थस्येत्यादि** । गृहिणः स्वकर्माजीवः स्ववर्णोक्तकर्मणा वृत्तिः । तुल्यैः कुलादिना समानैः । असमानर्षिभिः भिन्नार्षगोत्रैः । वैवाह्यं विवाहः,

---

नी० टी० १. आश्रमाणां स्वधर्ममाह । शेषः पाठः त्रुटितः ।

२ श्रुतवित्तादिना ।

३ एकर्षिगोत्राणां च विवाहनिषेधात् ।

४ देवशब्दोऽग्निरुणामुपलक्षणार्थं पञ्चयज्ञनिर्वर्तनमेवभभिहितं भवति ।

श्रीमूला

स्वार्थे ष्यञ्। ऋनुगामित्वं ऋतुः पुष्पस्नानदिनादूर्ध्वं द्वादशनिशाः तस्मिन् स्त्रीगमनशीलत्वम्। शेषभोजनं देवादिदत्तावशिष्टाशनम्।

वैदिकसिद्धान्तसंरक्षिणी

आश्रमधर्ममाह **गृहस्थस्येति**। "आश्रमाणां गृहस्थो योनिरप्रजनत्वादितरेषामि"ति—गौतमवाक्यात् सर्वाश्रमकारणत्वात् अन्नसन्तर्पणहेतुत्वाच्चादौ गृहस्थधर्माभिधानम्। **स्वकर्माजीव** इति। स्वकर्मणा परम्पराऽगतेन आजीवनेन एकार्थाभिनिवेशित्वात्मकस्यारित्वस्य न संभावना। तत्फलं परस्परं कलहाभावो बोध्यः। तुल्यैः समानजातीयवर्णैः। "श्रुतवित्तादिना" इति नीतिनिर्णीतिटिप्पण्यां अध्याहृतम् तत्र मूलं मनुवाक्यम् बोध्यम्। तद्यथा–

द्वयोर्विवाहो मैत्री वा नोत्तमाधमयोः क्वचित्। इति।

असगोत्रविवाहः

असमानर्षिभिः असमानगोत्रैः शास्त्राननुमोदितसमानप्रवरभिन्नैः। समानप्रवरेषु समानगोत्रेषु विवाहे रक्तसान्निध्यात् कुलक्रमागता दोषाः सन्ततौ जन्मतः प्रादुर्भवेयुः। तन्निराकरणाय असमानर्षित्वविधानम्[१]।

---

१ प्रपञ्चितं चैतत् भारतीय समाजशास्त्रे—

विवाह्य स्त्री पुरुष किस मर्यादा के बाहिर के होना चाहिये। अन्दर के न होना चाहिये यह भी एक मर्यादा है। एक रक्त के स्त्री पुरुषों का विवाह जिन कुटुम्बों में होता है उनमें त्वचा का रोग पाया जावा है।

"Stchthyosis is especially apt to be found in families in which consanguinous marriages occur"—DAVENPORT.

एक रक्त के स्त्री पुरुषों के विवाह को प्राणिशास्त्र की दृष्टि से यह आक्षेप है कि उससे उभयपक्ष के दोष संतति में स्थिर हो जाते हैं।

"Biological objection to cousin marriages is that they perpetuate like defects (Heredity and Eugenics)".

एक रक्त के स्त्री पुरुषों के विवाह भिन्न रक्त के विवाहों की अपेक्षा दुगुनी संख्या में अधिक संतानहीन होते हैं।

"Consanguinous marriages are more than twice as apt to be sterile than non-consanguinous marriages. (Heredity in relation to Eugenics).

इस प्रकार के निरीक्षण से शास्त्रज्ञों ने यह सिद्धान्त बताया है कि सुप्रजाजनन की दृष्टि से विवाह्य स्त्री पुरुष एकरक्त के न होना चाहिये। उनका रक्त भिन्न भिन्न वंशों का होना चाहिये। यहाँ एक यह प्रश्न उठता है कि एक रक्त की मर्यादा कहाँ तक समझना ? इसका सरल उत्तर यह है कि जहाँ तक उनका रक्त एक होने की जानकारी हो सकती है

वहाँ तक यह मर्यादा है। हिन्दू समाज में विशेषतः ब्राह्मणजाति में, प्रत्येक कुल को उसका गोत्र रहता है। गोत्र का अर्थ उस कुल का स्थापक मूलपुरुष अर्थात् इस मूलपुरुष का नाम गोत्र समझा जाता है। उस गोत्र के सब स्त्री पुरुष उसके वंशज अर्थात् उसके रक्त के होते हैं। इस गोत्र पुरुष तक एक रक्त की जानकारी की जा सकती है तो बीच ही में कहीं वह धागा क्यों और कहाँ तोड़ना ? वंश की सुरक्षितता की दृष्टि से बीच ही में वह तोड़ देना इष्ट नहीं है। इस कारण सवर्ण, पर सगोत्र में स्त्री-पुरुष का विवाह न हो ऐसा निर्वन्ध रक्खा गया है। भिन्न गोत्र विवाह से संतति में एकरक्त दोष नहीं आने पाते और नये गुण प्राप्त होंने का संभव रहता है। आजकल केवल व्यावहारिक सुविधा के लिए सगोत्रत्व का निर्वन्ध न मानने की लोगों में प्रवृत्ति हो रही है, पर सुप्रजाजनन की दृष्टि से वह घातक है। केवल गोत्रनाम भिन्न होने से असगोत्रत्व निश्चित नहीं होता।

गोत्र भिन्न होने पर प्रवर एक रहें तो भी सगोत्रत्व होता है, कारण एक मूलगोत्र में आगे चलकर अनेक गोत्रप्रवर्तक उत्पन्न होते हैं। इससे मूलगोत्र एक रहकर भी गोत्र नाम भिन्न हो सकते हैं। मूलगोत्र एक है या नहीं यह समझने का साधन प्रवर है। एक गोत्र में आगे चल कर अनेक गोत्रप्रवर्तक होते हुये भी उन भिन्नगोत्रप्रवर्तकों ने अपने मूल के प्रवर नहीं बदले, इस कारण गोत्र सैंकड़ों होते हुए भी प्रवर केवल ४८ ही हैं। मूल गोत्र ८ अथवा ९ ही हैं। वे प्रवरों से पहिचाने जा सकते हैं। इस कारण असगोत्रत्व के साथ असप्रवर का निर्वन्ध भी रखा गया है।

सब मानवसृष्टि मूलभूत एक स्त्री और एक पुरुष की संतति होने के कारण वहाँ तक पीछे जाने से सारीं मानव सृष्टि एक रक्त की है ऐसा कहना पड़ता है, फिर कोई विवाह एकरक्तता के दोष से छूट नहीं सकता यह आपत्ति आती है। पर यह आपत्ति हिन्दू समाज में नहीं आ सकती क्योंकि हिन्दू समाज में यह नहीं माना जाता कि समाज के सब स्त्री पुरुष एक मूल स्त्री और पुरुष की सन्तान हैं। ब्रह्मदेव ने मानस पुत्र निर्माण किये। उन मानसपुत्रों की संतति हिन्दू समाज है। इसका यह अर्थ है कि मूल ऋषि-मानस पुत्र एक रक्त की संतति नहीं है। उन्हें ब्रह्मदेव ने भिन्न-भिन्न रक्त-पिण्ड युक्त ही निर्माण किया। ईश्वर ने जैसा एक साथ भिन्न वर्ण निर्माण किया वैसे ही भिन्न-भिन्न रक्त-पिण्ड ऋषि निर्माण किये यदि ऐसा न होता और सब ऋषि यदि एक ही रक्तपिण्ड के होते तो शास्त्र-निरीक्षकों के उक्त सिद्धान्त के अनुसार सब मानव सृष्टि नष्ट हो गयी होती। अतः एक-एक ऋषि का अलग-अलग रक्त पिण्ड था ऐसा माने बिना सृष्टि की धारणा की सुसंगत उपपत्ति नहीं लगती; अर्थात् एक ऋषि का वंश ही सगोत्र स्त्री-पुरुष एक रक्त के सिद्ध होते हैं और उनका विवाह निषिद्ध होता है और असगोत्र विवाह प्रशस्त सिद्ध होता है।

गोत्र के साथ सापिण्डय का निर्वन्ध भी विचारना पड़ता है। सापिण्डय का अर्थ है एक शरीरान्वयित्व। मूल पुरुष से पुरुष सन्तति द्वारा एक शरीरान्वन्यी है वह गोत्र से ज्ञात होता है, पर संतति द्वारा जो एक शरीरन्वयित्व है वह गोत्र से जाना नहीं जा सकता। बीज

वैदिकसिद्धान्तसंरक्षिणी

किञ्च विवाहस्य उत्तमं फलं आत्मसंपत्सपन्नस्य पुत्रस्य प्राप्तिः इति निर्णीतमस्ति। तदुक्तम्-"पुत्रफला हि स्त्रियः" इति। नीतिवाद्भिः तदर्थमसमानार्षास गोत्रविवाहोपि अनेकेषु कारणकलापेषु अन्यतमं कारणं अस्ति इत्युच्यते। यद्यत्रोपेक्ष्येत तर्हि पुत्ररक्षणं अतिकठिनं स्यात्। यदि स्वल्पापि विगुणता पुत्ररक्षणं प्रति स्यात् तर्हि पुत्राणां कर्कटकसधर्मत्वात् स पितुः संपत्तिमतो राज्ञः सहजशत्रुः स्यात् इत्पापद्येत। वक्ष्यति च कौटिल्यः सर्वं वैशद्येन–राजपुत्ररक्षणप्रकरणे स्वयमेव। अतः उत्तमभार्यात्वं सम्पादनीयमिति शास्त्रमर्यादामनुसृत्य मूलकृता असगोत्रत्वमसमानर्षित्वं च विहितं बोध्यम्। एवंरीत्या दृष्टोपयोगित्वमसमानर्षिविवाहे निरुपितम्। तस्य अदृष्टोपयोगित्वविषये प्रमाणतया धर्मशास्त्रस्थान्यनेकानि वचनानि विद्वद्भिः सर्वैरेवावगम्यन्ते। तानि नात्रोपन्यस्यन्ते।

सवर्णविवाहः

नन्वेवमपि असमानर्षिभिः यैः कैः सह विवाहसंबन्धस्य निर्दोषत्वं भवतु। का नाम सवर्णत्वस्यपि विवाहे अपेक्षा ? इति चेन्न। आधुनिक पत्रेषु डा० श्री राजगोपालाचारीप्रभृतिमिः विजातीयरक्तसंबन्धे प्राणहान्यादिदोषप्रसङ्गस्योक्तत्वात्।
(आज पत्र सौर २ फा० सं० २०२४ जनवरी)

आयुर्वेदादिशास्त्रानुसारेणापि विजातीयरक्तसंबन्धस्य दोषवत्वं निरूपितम् तत्सर्वं जयमङ्गलाक्रोडपत्रे द्रष्टव्यं। (पृ० २१४)

जनसङ्ख्या

वैवाह्यं विवाहप्रयुक्तं भार्यात्वम्। विवाहानन्तरं भ्रूणहत्यातः गोपनाय उत्तमवंशप्राप्तये शरीरसंरक्षणाय चाह ऋत्विति। ऋतुकालाभिगामित्वं "ऋतौ भार्यामुपेयात्' इति विधानात् बोध्यम्। ननु अनेन विधिना अनेकपुत्रोत्पत्तिः अनुज्ञायते। इष्टापत्तौ जनतायाः अपरिमितसङ्ख्यावृद्धिःस्यात् इति चेन्न। अर्थशास्त्रे स्त्रीणां अवस्रावणस्य स्त्रीव्यसनभयाद् विहितत्वात्। तदुक्तम्—'उपांशुदण्डेन व्याधिना वा व्यावर्तयितुमवस्रावयितुं वा'। इति। एवंरीत्या तस्या अवस्रावणं यदि क्रियते तर्हि ऋतुकालाभिगामित्वं निवारितं भवति। न च दृष्टोपायावलंबनेन तासां कृते अवस्रावणे ऋतुकालेऽनभिगमनमापद्यते तथा सति अदृष्टहानिः स्यादिति वाच्यम्। अपुत्रस्य कृते एव ऋतुकाले अभिगमनविधानात्। तदुक्तं वीरमित्रोदये—"एतदजातपुत्रविषयम्। "जायमानोह वै ब्राह्मणः त्रिभिरृणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन

रक्त पिण्ड के समान क्षेत्रीयरक्त पिण्ड इस अगतिमान विषय में इतना प्रभावी न होने से स्त्री संतति द्वारा एक शरीरान्वयित्व पितृतः ७ और मातृतः ५ या ३ पीढ़ियों तक न हो इतना यदि देखा जाय तो भी विवाह सम्बन्ध में बाधा नहीं आती। शुक्ल यजुर्वेदी ब्राह्मणों में माता के जनक के कुल का गोत्र भी वर्ज्य माना जाता है इत्यादि।

—भारतीय समाजशास्त्र अथवा सनातन धर्म तत्त्वप्रणाली–हिन्दी अनुवाद, अनुवादक रायबहादुरसदाशिव माधव पराण्डे बी० ए०, एल० बी पृष्ठ १०९ से १११ तक।

वैदिकसिद्धान्तसंरक्षिणी

देवेभ्यः, प्रजया पितृभ्यः, एवं वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वा स्यादिति श्रुतेः" । इति । इदं चानृण्यं ज्येष्ठजननमात्रेणैव भवति । इतरेषां कामजत्वात् ।[1] अपि च "व्याधिते" इति टिप्पण्युद्धृतवचनान्—

नारीणामृतौ प्रवासादिगते पत्यौ अस्वस्थे वा ऋत्वनभिगमनेपि भ्रूणहत्या न भवतीति बोध्यम् । अस्वस्थप्रतियोगिनः स्वस्थस्य[2] स्फुटीकरणं सुश्रुतात् बोध्यम् । तथाहि—

समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते । इति

सु० सू० १५ अ० सूत्र ४१—

अतः सुश्रुतोक्तरीत्या पुमान् स्वस्थश्चेत् ऋतावुपेयात् अन्यथा ऋतुकालानभिगमनेपि न भ्रूणहत्यादिदोषः इति सिद्ध्यति । इदमेव कामन्दकेनापि स्फुटीकृतम्—

अग्निहोत्रोपचरणंजीवनं च स्वकर्मभिः ।
धर्मदारेषु कल्येषु पर्वजं रतिक्रिया ।। इति

तट्टीकायां कल्येषु स्वस्थेषु सत्सु इत्यर्थः कृतः । सोयमर्थः सुश्रुताशयं समर्थयति । अतो बहुप्रजाभिवृद्धिर्यथा न भवेत् तथा राज्येन प्रयत्नो विधेयः स च प्रयत्नः सत्वस्थापनम् । प्रजाभिवृद्धिनिराकरणाय राज्यमूलभूतस्य सत्वस्य स्थापनमकृत्वा परिवारनियोजनं क्लैव्यादि द्वारा यत् काम्यते तत्तु न मनोरमम् । अनारोग्यकृतोः रजस्तमसोरनिराकरणात् । अतः कामादिविकारापाकरणाय सत्ववृद्ध्यां जातायां सुश्रुतरीत्या परिवारनियोजनं अनुषङ्गतएव सिद्धं भवति । किञ्च प्रजावृद्धिह्रासाय परि-

---

१ अतएव मनुः– ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ।।
यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते ।
स एव धर्मजः पुत्रः कामजानितरान् विदुः । इति ।

—वी०सं० गर्भाधान संस्कार पृ० १५

२ किञ्च ऋतुकालाभिगमनमपि स्वस्थपरम् । इत्यपि तत्रैवोक्तम् । तथाहि—इदं तु ऋतुगमनं स्वस्थं सन्निहितं प्रत्युच्यते ।

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
यः स्वदारान् ऋतुस्नातान् स्वस्थः सन्नोपगच्छति ।

इति च पराशरस्मरणात् । इति । अतएवास्वस्थादेरगमने दोषाभावमाह व्यासः—
व्याधिते बन्धनस्थे वा प्रवासेष्वथ पर्वसु ।
ऋतुकाले च नारीणां भ्रूणहत्या प्रमुच्यते ।। इति ।

वैदिकसिद्धान्तसंरक्षिणी

वारनियोजनसाधने स्वीकृते अपरोऽप्ययं महान् दोषः यत् व्यभिचारप्रोत्साहनं नाम। अवैधपुत्रोत्पत्तौ धर्मभावस्य सत्वभावस्य वा दूरे भीतिः तिष्ठतु। समाजस्य पुरतः लज्जाप्रसङ्गस्य या स्थितिरासीत् सापि आधुनिकयुक्त्या निरस्ता। एवमवस्थायां व्यभिचाराद्यपनयबाहुल्यं केन निवार्यताम्? इत्यलमतिचिन्तया! तस्मात् सत्व-स्थापनेन ऋतुगामित्वविधानेऽपि न प्रजाभिवृद्धिरिति निर्णीतम्।

(मू. २६४) देवेति। अग्निगुरूणामपि पूज्यत्वात् देवताग्रहणम् उपलक्षणार्थं बोध्यम्। तेन पञ्चमहायज्ञस्य नित्यकर्मणो लाभः। यद्यपि आस्तिकान्तर्गताः मीमांसकादयः देवा-नामस्तित्व न मन्यन्ते तन्मतेन देवपूजनस्यानुऽपयोगित्वं भासते, तथापि ईशभक्तौ स्थितायां वंशे स्वानुरूपा उत्तमसन्ततिप्राप्तिर्न भवेदिति आयुर्वेदादिकामसूत्रादिशास्त्रा-ज्ञया दृष्टलाभाय देवपूजनमुक्तम्। न च तथापि तद्विधानं व्यर्थमितिवाच्यम्, शास्त्रा-णामनुसारेण कृतया देवपूजया अदृष्टस्यापि सोलभ्यसंभवात्। शेषभोजनमिति यज्ञशेषभोजनमित्यर्थः।

जयमङ्गला

आश्रमानधिकृत्याह—गृहस्थस्येति। सर्वाश्रमाणां प्रभवत्वाद् उपकारित्वाच्च प्राग् गृहस्थग्रहणम्। गृहं भार्यां यत्र तिष्ठतीति गृहस्थः, तस्य ब्राह्मणादेः स्वेन स्वेन कर्मणा पूर्वोक्तेन आजीवनं वृत्तिः। तुल्यैः अभिजनतस्तुल्यैः। तत्रापि असमानर्षिभिः असमानप्रवरैः अतुल्यगोत्रैरित्यर्थः। वैवाह्यं विवाहकर्म कन्यादानवरणम्। ऋतुगामित्वम् ऋतुकालेऽभिगमनशीलता, धर्मप्रजावृद्ध्यर्थम्। अन्यथा दोषः। यथोक्तम्—

"ऋतुमतीन्तु यो भार्यां सन्निधौ नोपगच्छति।
तस्याः पुरीषे षण्मासान् पितरस्तस्य शेरते।" इति।

अन्यत्र रत्यर्थम्, सर्वत्र वा प्रतिषिद्धवर्जमिति। देवेषु त्रयीचोदितेषु पितृषु च यथास्वं विप्रादीनां सोमप (।)-हविर्भुग-आज्यप-सुकालिषु। अतिथिषु तत्कालोप-स्थितेषु। भृत्येषु दासकर्मकरादिषु। त्यागः कृताकृतद्रव्यविनियोजनम्। शेषभोजनं पश्चात्कालभोजनं देवपित्रतिथ्यर्थपाकावशेषभोजनं विघसाशित्वप्रतितषेधार्थम्।

जयमङ्गलाक्रोडपत्रम्

गृहस्थस्येति। आश्रमधर्मनिरूपणे ब्रह्मचर्याश्रममपहाय आदौ गृहस्थधर्म-निरूपणं येन हेतुना कौटिल्याभिप्रेतं तं दर्शयति। सर्वाश्रमाणामिति, स्वकर्माजीवाद्य-

जयमङ्गलाक्रोडपत्रम्

ष्टविधधर्मापेक्षया नीतिसारे अन्येऽपि धर्माः निरूपिता वर्तन्ते तथापि तेषामन्तर्भावः यथायथं ऊहनीयः। तथा नीतिवाक्यामृते गृहस्थधर्माः प्रचुरमात्रया निरूपितास्सन्ति। तेऽपि अत्रैवान्तर्भावनीयाः व्युत्पन्नबुद्धिभिः। सङ्क्षेपेण अव्युत्पन्नबुद्धयः गृहस्थस्य समस्तान् धर्मान् ज्ञातुं न शक्नुवन्तीति मत्वा नीतिवाक्यमृते नीतिसारे च पार्थक्येन विस्तरेण धर्मा उक्ताः तत एव वेदितव्याः[1]।

गृहस्थधर्मफलम्

धर्मो हि गृहस्थादिभिः अज्ञानपूर्वकः ज्ञानपूर्वको वाऽनुष्ठीयते। तदुभयस्यापि धर्मस्य फलं विभिन्नं विभिन्नं भवति। तच्च तत्तत्कुलेष्वभीप्सितेषु वा तत्तल्लोकेषु अभीप्सितपदार्थादिभोगः, तदनुबन्धिनी प्रतिभा च इत्येतद् द्वयम् अबोधपूर्वकस्य धर्मस्य फलम्। बोधपूर्वकस्य धर्मस्य तु विशिष्टकुलेषु जन्म प्राप्य परमश्रद्धामनुभूय गुरुसंनिधिमात्रेण जन्मान्तरागतप्रतिभया पूर्णसुखोत्पत्तिः[2]। इति।

---

१ नित्यनैमित्तिकानुष्ठानस्थो गृहस्थः।

ब्रह्मदेवपित्रतिथिभूतयज्ञा हि नित्यमनुष्ठानम्, दर्शपौर्णमासौ हि नैमित्तिकम्। (नीतिवाक्यामृते)

अग्निहोत्रोपचरणं जीवनं च स्वकर्मभिः।
धर्मदारेषु कल्येषु पर्ववर्जं रतिक्रिया॥
देवपित्रतिथिभ्यश्च पूजा दीनानुकम्पनम्।
श्रुतिस्मृत्यर्थसंस्थानं धर्मोऽयं गृहमेधिनः।
(का० नी० २।२२६६) इति।

२ तदुक्तं वैशेषिकभाष्ये।

'अविदुषो रागद्वेषतः प्रवर्तकाद्धर्मात् स्वल्पाधर्मसहितात् ब्रह्मेन्द्रप्रजापति पितृमनुष्यलोकेष्वाशयानुरूपैरिष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति। तथा प्रकृष्टादधर्मात् स्वल्पधर्मसहितात् प्रेततिर्यग्योनिस्थानेष्वनिष्टशरीरेन्द्रियविषय-दुःखादिभिर्योगो भवति। एवं प्रवृत्तिलक्षणाद्धर्मादधर्मसहितादेव मनुष्यतिर्यङ्नारकेषु पुनः पुनः संसारबन्धो भवति। ज्ञानपूर्वकात्तु कृतादसङ्कल्पितफलादिशब्दे कुले जातस्य दुःखविगमोपायजिज्ञासोराचार्यमुपसङ्गम्योत्पन्नषट्पदार्थतत्त्वज्ञानस्याज्ञान-निवृत्तौ विरक्तस्य रागद्वेषाद्यभावात् तज्जयो धर्माधर्मयोरनुत्पत्तौ पूर्वसञ्चितयो-श्चोपभोगान्निरोधे सन्तोषसुखं शरीरपरिच्छेदं चोत्पाद्य रागादिनिवृत्तौ निवृत्ति-

लक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्तते। तदा निरोधात् निर्बीजस्यात्मनः शरीरादिनिवृत्तिः पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्ष इति। (गुणनिरूपणे धर्मप्रकरणम्)।

'एवमधर्मस्य साधनमभिधाय सम्प्रति साध्यं कथयति। 'अविदुष' इत्यादिना। यः कर्त्ता भोक्तास्तीत्यात्मानमभिमन्यते, परमार्थतो दुखसाधनं च बाह्याध्यात्मिक विषयं सुखसाधनमित्यभिमन्यते सोऽविद्वान्। स च स्वोपभोगतृष्णापरिप्लुतः सुखसाधनत्वारोपिते विषये रज्यते, तदुपरोधिनि च द्विष्टो भवति। तस्य प्रवर्तकाद्धर्मात् देवो वा स्यां गन्धर्वो वा स्यामिति पुनर्भवप्रार्थनया कृताद् धर्मात् प्रकृष्टात् फलातिशयहेतोराशयानुरूपैः कर्मानुरूपैरिष्टशरीरादिभिः सम्बन्धो भवति ब्रह्मेन्द्रादिस्थानेऽपि मात्रया दुःखसम्भेदोऽस्ति। न चाधर्मादन्यद्दुःखसंभेदोऽस्ति न चाऽधर्मांदन्यद दुःखस्य करणमतः स्वल्पाधर्मसहितादित्युक्तम्। यस्य प्रकृष्टो धर्मस्तस्य प्रकृष्टानि शरीरादीनि भवन्ति। यस्य प्रकृष्टतरो धर्मः तस्य प्रकृष्टतराणि भवन्ति, यस्य प्रकृष्टतमो धर्मस्तस्य प्रकृष्टतमानीति प्रतिपादयितुमाशयानुरूपैरित्युक्तम्। इष्टशब्दः प्रत्येकं शरीरादिषु सम्बद्ध्यते द्वन्द्वानन्तरं प्रयोगात्। तथा प्रकृष्टादधर्मात् प्रेतयोनीनां तिर्यग्योनीनां च स्थानेष्वनिष्टैः शरीरादिभिर्योगो भवति। प्रेतादिस्थानेऽपि मनाक् सुखमस्ति, तच्च धर्मस्य कार्यम्। अतः स्वल्पधर्मसहितादित्युक्तम्। उपसंहरति 'एवमि'ति।

एवं धर्मात् संसारं प्रतिपाद्यापवर्गं प्रतिपादयति ज्ञानपूर्वकात्त्विति। स्वरूपतश्चाहमुदासीनो बाह्याध्यात्मिकाश्च विषयाः सर्व एवैते दुःखसाधनम् इति यस्य ज्ञानमभूत्, स दृष्टानुश्रविकविषयसुखवितृष्णः" एवमहं भूयासमिति मे भुयासुः "इतिफलाकाङ्क्षया बिना निवृत्तसाधनतया विहितमपरं चावश्यकरणीयं कर्म करोति। तस्मात् कर्मणो ज्ञानपूर्वकात् कृतादस्य विशुद्धे कुले जन्म भवति। अकुलीनस्य श्रद्धा न भवति। न चाऽश्रद्दधानस्य जिज्ञासा सम्पद्यते। नचाजिज्ञासोस्तत्वज्ञानम्। तद्विकलस्य च नास्ति मोक्षप्राप्तिः। अतो मोक्षानुगुणसङ्कल्पितफलं कर्म विशुद्धे कुले जन्म ग्राहयति, विशुद्धे कुले जातस्य प्रत्यहं दुःखैरभिहन्यमानस्य दुःखविगमोपाये जिज्ञासा सम्पद्यते" कुतो नु खल्वयं मम दुःखोपरमः स्यात्" इति स चैवमाविर्भूतजिज्ञास आचार्यमुपगच्छति, तस्य चाचार्योपदेशात् षण्णां पदार्थानां श्रौतंतत्तत्वज्ञानं जायते। तदनुश्रवणमनननिदिध्यासनादिक्रमेण प्रत्यक्षं भवति। उत्पन्नतत्तत्वज्ञानस्याज्ञाननिवृतौ विरक्तस्य विच्छिन्नरागद्वेषसंस्कारस्य रागद्वेषयोरभावात् तज्जयोर्धर्माधर्मयोरनुत्पादः। क्लेशवासनोपनिबद्धा हि प्रवृत्तयस्तुषावनद्धा इव तण्डुलाः प्ररोहन्ति। क्षीणेषु क्लेशेषु निस्तुषा इव तण्डुलाः कार्यं न प्रतिसन्दधते। यथाह—भगवान् पतञ्जलिः—'सति मूले तद्विपाको जात्यायुर्भोगाः' इति। यथाह भगवानक्षपादः—न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य' इति।

जयमङ्गलाक्रोडपत्रम्

गृहस्थ-धर्म-तत्फलादीनां नीतिलक्षणाक्रान्तत्वम् ।

यथा हि चित्तशुद्धिः प्रातिभं ज्ञानं च अनुष्ठितस्य स्वधर्मस्य फलम् तथा सुप्रजाजननमपि अपरं फलं बोध्यम् । विवेचितचैतत् प्रागेव । (पृ.२१४)एतेन तत्तत्धर्मे वेदशब्दप्रमाण्यप्रमितत्वमिव शब्दप्राभाण्यस्य अनुमानप्रामाण्ये अन्तर्भावं निरूपितवतां वैशेषिकाणां सम्मत्या अनुमानप्रमाणप्रमितत्वमपि अर्थादेव सिद्धं भवति । एवमेव सुप्रजाजननरूपदृष्टफलं प्रति साधनत्वस्य पूर्वं (पृ० २५९) विवेचितत्वात् प्रकृतधर्मे प्रत्यक्षप्रमाणप्रमितत्वमपि सिद्धं भवतीति समस्तधर्मस्य नीतिलक्षणाक्रान्तत्वमवगन्तव्यम् ।

ननु नीतिवाक्यामृतादिप्रतिपादिते धर्मान्तरे स्वीयेअनुष्ठिते सति अनुष्ठातॄणां चित्तशुद्धिः संभवतीति शास्त्रकर्तृभिरुच्यते ।

चित्तशुद्धे रूपयुक्तता

तस्याः नीतौ कीदृशमुपयोगित्वमस्तीति चेत् उच्यते । चित्तशुद्धिः तस्यैव भवति, यस्य मनःप्रसादो वर्तते संशयश्च नास्ति यः विशुद्धाभिसन्धिमान् स्यात् तच्च वैशेषिकभाष्ये स्पष्टम्[1] । विशुद्धाभिसन्धिश्च दम्भरहितः सङ्कल्पः, इति रीत्या व्याख्यातः न्यायकन्दल्याम्[2]—

पूर्वसञ्चितयोश्च धर्माधर्मयोर्निरोध उपभोगात्, निवृत्तिफलहेतोश्च कर्मान्तरात् सन्तोषसुखं शरीरपरिच्छेदं चोत्पाद्य रागादिनिवृत्तौ निवृतिलक्षणः केवलो धर्मः परमार्थदर्शनं सुखं कृत्वा निवर्तते । निवर्त्यंते संसारो नयेति निवृत्तिः निवृत्तिलक्षणं यस्यासौ निवृत्तिलक्षणो निवृत्तिस्वभावो धर्मः रागादिनिवृत्तौ भूतायां केवलो व्यवस्थितः सन्तोषसुखं शरीरपरिच्छेदं चोत्पाद्य परमार्थदर्शनज आत्मनि निर्बीजस्यात्मनः शरीरादिनिवृत्तौ पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्षः । यदा परमार्थदर्शनं कृत्वा निवृत्तो धर्मः तदा निर्बीजस्यात्मनः शरीरादिबीजधर्माधर्मरहितस्यात्मन उत्पन्नादीनाम् शरीरादीनां कर्मक्षयान्निवृत्तौ भूतायामनागतानां कारणाभावादनुत्पत्तौ यथा दग्धेन्धनस्यानलस्योपशमः पुनरनुत्पादः एवं पुनः शरीरानुत्पादो मोक्ष :' इति । (न्यायकन्दली-)

१. तथाहि वैं० भाष्ये० ६५१ संस्कारनिरूपणे—धर्मः पुरुषगुणाः । कर्तुः प्रिय मोक्षहेतुः अतीन्द्रियोऽन्यसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजः वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः । तस्य तु साधनानि श्रुतिस्मृतिविहितानि सामान्यविशेषभावेनावस्थितानि द्रव्यगुणकर्माणि । इति ।

२. विशुद्धो इति । विशुद्धोऽभिसन्धिः दम्भादिरहितः सङ्कल्पविशेषः । तस्माद् धर्मो जायते । वर्णाश्रमिणामिति । वर्णा ब्राह्मणक्षत्रियशूद्राः आश्रमिणो ब्रह्मचारिगृहस्थवानप्रस्थयतयः, तेषां धर्मः प्रतिवर्णं प्रत्याश्रमं चाधिकृत्य विहितैः साधनैः जन्यत इत्यर्थः ।

जयमङ्गलाक्रोडपत्रम्

अर्थात् यस्य विशुद्धाभिसन्धिः तस्य चित्तशुद्धिः यस्य तु दम्भः असङ्कल्यो वा वर्तते तस्य न चित्तशुद्धिः इति स्फुटम्।

एवं स्थिते अशुद्धचेतस्कः जनः अर्थतृष्णालुः .परान् वञ्चयितुं प्रवर्तमानः आत्मानं गोपायन् कञ्चन दुर्नयमपि अनुतिष्ठासति। कदाचित् सति प्रसङ्गविशेषे विशुद्धाभिसन्धिशून्यः जनः क्रूरकर्माण्यपि कर्तुमभिलषति। एवंरीत्या उक्ताभिसन्धिरहितः दुर्नयं क्रूरकर्माणि च अनुतिष्ठन् लोकस्य पुरतः ममेदं प्रतारणाप्रचुरं कर्म प्रकाशमानं मा भवतु इति हेतुना शङ्कया अनर्थसंभावनया आक्रान्तस्तिष्ठति। एवंविधशङ्काक्रान्तत्वं यस्य समाजस्य घटकेषु सदस्येषु वर्तते। स समाजः पारस्परिकशङ्काबहुलत्वात् सङ्घभावेन स्थातुं न कदाऽप्यर्हति। तथा च सामदानभेददण्डोपायेषु भेदस्य उपायस्य अधिकारित्वं तथाविधशङ्काक्रान्तसदस्यैः स्वदुर्नयमहिम्ना आत्मनि संपाद्यते। एतस्यामवस्थायांमुपर्युक्तशङ्काक्रान्तजनस्य तद्घटितसङ्घस्य वा सर्वाण्यपि कर्माणि तथाविधानि भवन्ति, येभ्यः तान् प्रति लोकः अपरज्येत। तस्य च फलं विनाशः एव[1]।

स्पष्टीकृतं चैतदुपरिष्टात्। अतः दुर्नयबहुलं क्रूरं कर्म वा जनानुरागाभिलाषुकेण सदस्येन तत्सङ्घेन वा न कदापि कर्तव्यम्। अपि तु लोकसङ्ग्रहार्थमुक्तमभिसन्धि संपाद्य यथोक्तं स्वीयधर्माचरणमवश्यं करणीयम्। तदुक्तम्।

'लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि।' इति।

तस्मात् चित्तशुद्धेः एकीभावरूपं फलं परस्परभेदनिःसारणाय उपयुज्यमानं नीतौ प्रत्यक्षसिद्धम्।

एवंच धर्मेण सम्पादयिष्यमाणं सुखरूपं फलं ब्रह्मादिदेवतादीनां शरीरविशिष्ट आत्मा अनुभवतीति वैशेषिकवाक्यप्रामाण्येन उक्तमेव। तस्मात् परलोके धर्मफलसुखमपि प्रत्यक्षसिद्धमेव इति मन्तव्यम्। तथा धर्मस्य साधनानि यानि प्रागुक्तवैशेषिकभाष्यवचने निर्दिष्टानि तानि द्रव्यगुणकर्माण्यपि प्रत्यक्षसिद्धान्येव। अतः धर्मः तत्साधनं साध्यं च त्रितयमपि प्रत्यक्षप्रमाणप्रमितत्वात् नीतिलक्षणाक्रान्तं भवितुमर्हति इति वेदितव्यम्।

अपूर्वप्रत्यक्षम्

ननु यागापूर्वस्य कथं प्रत्यक्षसिद्धत्वमिति चेत्? अपूर्वमपि प्रत्यक्षसिद्धमस्ति तथाहि—अस्मिन् लोके पवित्रात्मना हुताऽऽहुतिः यदा अबादिभूतसूक्ष्मरूपेण परिणता ऊर्ध्वमुत्तिष्ठति तदा तदाधारेण जीवः उपर्युपरि निष्क्रममाणः सूर्यमण्डले आहुतिं

---

१. तदुक्तम्—अपरागसमीरणेरितः क्रमशीर्णकुलमूलसन्ततिः।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि॥
मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नयान् नयहीनापरज्यते जनः॥

जयमङ्गलाक्रोडपत्रम्

निवेश्य क्रमेण चन्द्रमण्डले पर्जन्ये भूमौ पुरुषे स्त्रियामुपविष्टः शरीररूयेण परिणमते।

तदुक्तम्–"पञ्चम्यामाहुतौ आपः पुरुषवचसो भवन्ति"। (शां०भा०४ अ०) इति। सोऽयं विषयः शान्तिका अग्रदूत ग्रन्थे निरूपितोऽस्ति विस्तरभयान्नात्र प्रकाश्यते। तस्मात् अपूर्वस्यापि प्रत्यक्षसिद्धत्वं सुसम्पन्नम्। येषां तु मते अपूर्वं नास्ति ईश्वर-प्रसादादन्यात् इति सिद्धान्तस्तन्मते यागानुष्ठानानन्तरमीशप्रसादमहिम्ना स्वर्गादि-फलं संप्राप्यते इति उक्तमस्ति। तस्य ईशस्य वा अस्तित्वं प्रत्यक्षरूपत्वं च कथ-मित्यपि प्रसङ्गात् विमृश्यते। तथाहि—

ईश्वरस्यबीजत्वम्

स्थावरजङ्गमात्मकस्य जगतः उदयः शिवशक्त्योः सङ्गमेन सम्भवति इति भावप्रकाशनायुर्वेदादिग्रन्थेभ्यः विवेचनपुरसरं द्वितीयाध्याये द्वाभ्यां त्रयाणा-मुत्पत्तिः' (पृ० १६६) इत्यादिवाक्येन स्पष्टं।

समुत्पद्यमानस्य स्थावरजङ्गमात्मकस्य सर्वस्यापि अवस्थितिः संस्काररूपेण सूक्ष्मतया स्वस्वबीजेषु नियता। यस्य अवस्थानमेव नास्ति यथा बालुकाकणे तैलबिन्दुः तस्य उत्पत्तिरेव असम्भाविनी। अपि च स्वस्वोपादानेषु स्थितेषु ये संस्कारा देशका-लादिसमुदयात् विशेषतया उद्बुद्धा भवन्ति तदनुरूपा तत्तद्बीजैस्तत्तत्पिण्डसमुत्पत्ति-र्भवति इति यथा तत्तद्बीजव्यष्टिविषये वक्तुं शक्यते, तथा एतादृशमपि बीजं सम्भवति यत्र एकत्रैव समष्टिरपि संस्काररूपेण संभवेत्। तदुक्तम्–'एतन्नानाव-ताराणां निधानं बीजमव्ययम्' (भा० पु०) इति।

तस्मिन् अव्यये बीजे नानाऽवतारकारणीभूते जगदुत्पतेः प्राक् बुद्धि-चित्ताहङ्कारमनोरूपमन्तःकरणचतुष्टयं शरीरं प्राणश्च संस्काररूपेणैव वर्तन्ते। तस्मात् एकस्मादेव बीजात् सत्वादिगुणभेदेन देशकालादिसाधनवशात् सङ्कल्पाद्वा विभिन्न-विभिन्नस्वभावानां अन्तकरणदीनां तेषु तेषु जीवेषु समुत्पत्तिश्चेत्, तत्र नाश्चर्यम्। यथा "वायोः तिर्यग्गमनं, अग्नेरूर्ध्वज्वलनम्। अयसोऽयस्कान्ताभिसरण"मित्यादि।

अतः सत्वादिगुणमहिम्ना अन्तःकरणपदव्यपदेश्येषु बुद्धिचित्तादिषु निर्मलत्वसंशयितत्व-निर्णयकारित्वाहङ्कारित्वादयो धर्माः पृथक् समुदीयन्ति। एवं रीत्या समष्टिव्ययष्ट्योरुत्पत्तिप्रकारस्य एकविधत्वेऽपि व्यष्टिबीजेन व्यष्टिपदार्थस्य, समष्टिबीजेन समस्तस्योत्पत्तिर्भवति। इति जगदुपादानं एक ईश्वरोऽस्तीति सिद्ध्यति।

संस्काराणां कार्यकारित्वम्

संस्कारस्य एतावत्सामर्थ्यमस्ति, यद्ध्यानमात्रेण यादृशः संस्कारः उपासकैः उद्-बोध्यते तदा तावताऽपि तादृशस्य कार्यकारित्वं दृष्टम्। यथा वृश्चिकदष्टेदेशे अपामार्ग-

जयमङ्गलाक्रोडपत्रम्

संयोगः वृश्चिकविषमपसारयति यथा वा किञ्चिदन्तरितेनापि अपामार्गेण विषनिर्हरणं सम्भवति तथा ध्यानमात्रेणापि तद्विषयस्य अपामार्गतादात्म्यस्य विषनिर्हरणरूपकार्यं कारित्वं सम्भवति, इति योगिनामनुभवः। एवमेव अभिनयादिस्थलेऽपि सामाजिकानां पुरतः विभावानुभावादिमहिम्ना पारस्परिकरजोगुणप्रयुक्तभेदविगलनेन, सह सत्वोद्गम साचिव्येन साधारणीकरणेन अप्रथमेन व्यञ्जनजनितव्यभिचारिभावादिबोधात्मकेन काव्यव्यापारेण नटः यदा भावान् सञ्चारयति, तदा सामाजिकेषु रसास्वादः भवतीति अनुभवसिद्धम् साहित्यिकानाम्। एवञ्च कयापि रीत्या यत्र यादृशाः संस्काराः उद्बुध्यन्ते तत्र तदनुरूपं तत्तद्कार्यं समुत्पद्यते इति स्थिरम्। अत्रेदं चिन्त्यम् सर्वत्रापि संस्कारोद्बोधसमये यदा रसास्वादस्यानुभवः तदा अनुकार्यसामाजिकयोर्मध्ये भेदस्य विगलनेन अनुकार्यस्य ज्ञानानन्दक्रियाप्रभाः अपि स्फुरन्ति। तन्न्यायेन रससञ्चारणद्वारा ईशमूर्ति ध्यानिनअर्चकस्य सहृदयस्य चेतसि ईश्वरभेदस्य विगलने सञ्जाते ध्यानेन प्रत्यक्षीक्रियते यथा तथा ईश्वरीयज्ञानानन्दक्रियाणां प्रभाअपि सङ्क्रमितुं शक्यन्ते तथोक्तम्—

'परस्मादात्मनो भान्ति ज्ञानान्दक्रियाप्रभा' इति।

अस्य पद्यस्यायं भावः यत् ज्ञानानन्दक्रियाप्रभाः परस्माद् भान्ति, आत्मनः भान्ति, परस्मादात्मनः भान्ति इति।

संस्काराणां वैकल्पम्

यत्र तु केचनोपासकाः कृतेऽपि ध्याने अभीप्सितसंस्काराणामुद्बोधात् तत्कार्याद् वा वञ्चिता दृश्यन्ते, तत्र कारणं मनसि सत्वगुणस्य यावदतिशयितत्वमपेक्ष्यते तावन्नास्तीति मन्तव्यम्। पुनः केषुचित् स्थलेषु प्रदर्शितेऽपि काव्यव्यापारे सर्वथा सत्वोद्गमः येषां हृदि न भवति न वा संवेदनं, नापि च रसप्रतीतिः ते तु काष्ठकुड्याश्मसन्निभा एव। अतएव रसप्रतीतौ व्याप्तिसंस्कारः सहृदयतासंस्कारः स्थायिभावसंस्कारः इति त्रितयं कारणं काव्यप्रकाशटीकाकर्त्रा वैद्यनाथेनोक्तं वैदिकसिद्धान्तसंरक्षिण्यां उद्धृतमनुसन्धेयम्। (पृ० ६) एतावता विस्तारपूर्वकम् निरूपितेन विषयेणेदं स्पष्टं भवति यत् केवलं रङ्गमध्ये एव स्थितः अभिनयं पश्यन्, तावन्मात्रमेव वस्तु ज्ञातुं परिचेतुं शक्तोतीति न अपि तु यस्य चेतसि यथा यथा सत्वगुणस्य अतिशयितत्वं भवेत् तथा तथा तत्तद्गुणसम्पन्नं मनः रसास्वादपरम्परासजातीयेन ध्यानमहिम्ना सर्वमपि जगज्जातं प्रत्यक्षीकर्तुं शक्नुयात्। तदुक्तम्—

'आदितयः सर्वसाक्षित्वान् मनो यत् तदधिष्ठितम्।
तत् संस्कारवशाद् वेत्ति सर्वं तत् तेन निर्मलमिति'। (भावप्रकाशनम्)

निर्मलं मनः इत्यस्य अर्थं एव अयं यत् उपर्युक्तसत्वबहुलं मनः यस्य सः ईशसमवेतसमस्तज्ञानस्य प्रभारूपेण आत्मनि संपादने शक्तः चित्रतुरगन्यायेन ध्यानबलात्

जयमङ्गलाक्रोडपत्रम्

ईश्वरः प्रत्यक्षः

ईशस्वयोः मध्ये भेदविगलनात् परस्मादात्मनः तादात्म्यं प्रत्यक्षीकरोति तथा च ईशस्य प्रसादः कथं प्रत्यक्षविषयस्स्यात् ? इति प्रस्तुतप्रश्ने इदमेवोच्यते यत् सत्वात्मकमनोवृत्तौ रसात्मकध्यानद्वारा सञ्चरितः ईश्वरोऽपि यदि प्रत्यक्षसिद्धो भवितुमर्हति, तर्हि सुतरामेव तत्समवेतः प्रसादोऽपि । इति ।

प्रसङ्गात् अत्रेदं स्मार्यते—सर्वज्ञतालाभाय सर्वविधोपायानां सरलानां साहित्यनाट्यनीतिन्याय वेदान्तसाङ्ख्यतन्त्रेषुउक्तानां सारल्येन उपलब्धावपि तानुपेक्ष्य दोषानेव आत्मनि प्रादुर्भाव्य वयं असर्वज्ञा भूत्वा तिष्ठामः, तन्न सम्यक्, अतस्तन्निरासार्थं विद्याचिन्तनेन सह तदधिष्ठाता ईश्वरोऽपि रसप्रतीत्या आस्वादनपुरस्सरं उपासकैः नीतिविद्भिः तदाकर्षणार्थं सदा चिन्त्यः ।

यदि आन्वीक्षिक्याः साहाय्येन पदार्थानां द्वितीयोध्यायोक्तरीत्या आत्मभावो न ज्ञायते तर्हि प्रागुक्तं घृत्यात्मकं सत्वम् अस्मद्धस्तादपगतम् भवेत् । तत एव प्रतिभास्थाने जाड्यं समृद्धं दृश्येत । तथाविधेषु अमुमेवास्वादमभिलक्ष्य भोजराजेन औद्धत्य प्रेयादयः प्रसिद्धरसेभ्यः अतिरिक्ता; कतिपये रसा उक्ताः सरस्वतिकण्ठाभरणे—

शृङ्गारवीरकरुणाद्भुतरौद्रभयानकाः ।
बीभत्सहास्यप्रेयांसः शान्तोदात्तोद्धता रसाः ॥
रतौ सञ्चारिणः सर्वान् गर्वस्नेहौ घृतिं मतिम् ।
स्थायिनोऽप्युद्धतप्रेयः शान्तोदात्तेषु जानते । इति (का० वि० गोकुल ४)

परं एतेषु द्वादशविधेषु गर्वमदौ जाड्यसंपादकत्वात असर्वज्ञत्वसंपादनात् त्याज्यौ । भगवतः परमेश्वरस्य तादात्म्यभानार्थं उत्साह-स्थायिभावः वीररसः धृतिप्रधानः शमरसो वा अवलम्बनीयः । शेषं प्रागुक्तमेव । तस्मात् ईश्वरः वृत्तिरूपतामापन्नः तथा तत्प्रसादोऽपि हर्षानतिरिक्तः रसप्रतीतौ प्रत्यक्षसिद्ध एव ।
तदुक्तं हरिभक्तिरसामृतसिन्धौ—द्रष्टव्यम्

---

१. अन्याभिलषिताशून्यं ज्ञानकर्माद्यनावृत्तम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥१॥
क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा ॥१३॥ (पू० १ लहरी)

तथा श्रीमद्भागवतेऽपि—
यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैः तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः । इति

जयमङ्गलाक्रोडपत्रम्

आश्रमधर्मे वर्णधर्मस्य अगतार्थता

ननु आश्रमधर्मं प्रतिपाल्य नीतौ अभ्यर्हितस्य कार्यस्य संभवे वर्णधर्मस्य अनुपयोगित्वमेवास्तु ? इति चेन्न । आश्रमधर्मो हि न केवलं तत्तज्जातिमात्रमर्यादितः वर्णत्रयेणापि तस्य पाल्यमानत्वात्, तथैव वेदेषु कर्तव्यत्वेन विहितत्वात् । अतः कुलीनत्वप्रयुक्ताः गुणाः संस्काराश्च आश्रमधर्मस्य पालनमात्रेण न प्राप्तुं शक्यन्ते, इति कुलीनत्वप्रयुक्तसंस्काराणां तन्मूलकप्रतिभायाश्च समुद्बोधाय जातिशुद्धिरपेक्ष्यते । विशेषतया अस्य स्फुटीकरणपेक्षितं चेत् तत् पूर्वं विस्तृतमस्ति, तत एव द्रष्टव्यं । (पृ० २६७) इदं तु सत्यम् । यदि आश्रमधर्मान् प्रधानीकृत्य वर्णधर्मा उपेक्ष्यन्ते, तर्हि जातिसाङ्कर्यम् जातीयकर्तव्यनियमनिबन्धाभावात् संभविष्यति । तथा सति विपदादौ-क्लेशासहिष्णुत्वदशायाम् लोके पूर्वक्रमागतप्रतिज्ञातः चलितो भवति । तद्दशायां, परस्परं विश्वास्यता समुच्छिद्येत[1] पूर्वतः प्राप्तं पारस्परिकं प्रेमापि उच्छिन्नं स्यात् । तस्य तु फलं दारिद्रयं नियमेन संभवेत् । तदुक्तं वाल्मीकिरामायणे अयोध्याकाण्डे सर्गे १०९ ।

कुलीनमकुलीनंवा वीरं पुरुषमानिनम् ।
चारित्रमेव व्याख्याति शुचिं वा यदि वाऽशुचिम्[2] ॥४॥ इति ।

किञ्च स्वपरंपरायां येन यथा यशः पूर्वजैः अर्जितम् । तमेव पन्थानं यदि तद्वंशीयः अनुसरत्यग्रेपि, तर्हि तन्मूलिकया स्वापदानप्रसूतया कीर्त्या जनतायाः अनुरागस्य विश्वास्यतायाश्च पात्रं भूत्वा पूर्वजैः संपादितयशोपेक्षयाऽपि अति कीर्तिभाग् भूत्वा जगत्पालको भवति[3] । इदं महत्फलं कार्यं न आश्रमधर्मस्य परिपालनमात्रेण सर्वैः सर्वत्र प्राप्तुं शक्यते जातिमर्यादामुपेक्ष्य ।
यदि च वयं कुलीनत्वमुपेक्ष्य साङ्कर्यं प्रसार्य यशः सम्पादयितुं प्रयतामहे ।

तर्हि सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् ।
कुले जन्म मदायत्तं दैवायत्तञ्च जीवितम् ।

---

१ अविश्वासो हि जन्मभूमिरलक्ष्म्याः (नीतिवाक्यामृते)

२ ति० टी० - इदानीं वैदोक्ताचार एव पुंसामिहामुत्र संमानहेतुरित्याह— 'कुलीनमि'ति । पुरुषमानिनं अधीरमिति यावत्, चारित्रं वैदानुमताचारः, तत्संपन्नः सन्कुलीतत्वादिख्यातिं ख्यापयति—असंपन्नश्चाकुलीनत्वादिति'भावः ॥ ४ ॥

३ पूर्वपरम्परा प्राप्ता कृतिः तद्वंशीयैः यदाऽनुस्रियते, तदा सा कृतिः 'कीर्ति'पदेन व्यपदिश्यते । पूर्वपरम्परायां पूर्वजैः अननुष्ठितं सदपि यत् तत् कर्म अपरैः तद्वंशभिः अनुष्ठितं सत् यशो भवति । तदुक्तं भावप्रकाशने —

'स्वापदानप्रसूता चेत् यश इत्यभिधीयते ।
यतो विश्वस्य शमिति तस्माद यश इतीरितम्'' (भाव० ३ अधि०) इति ।

जयमङ्गलाक्रोडपत्रम्

इत्येवं रीत्या बह्वीषु असाधारणीषु आपत्सु समापतितासु सत्सु ततः पूर्वं प्रतिज्ञाते कर्मणि अविकृतरूपेण तथैव स्थास्यामः इति निर्णेतुं न शक्यते। मनोमयकोशस्य मानजीवातुभूतस्य साङ्कर्यमहिम्ना समुत्पन्नेषु विलयनदर्शनात्। तदिदं कर्णार्जुनोदाहरणप्रदर्शनेन सुबोधमस्ति। अत एव गीतायां 'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्' इत्युक्तम्। तस्मात् विपदि स्थैर्यस्य संरक्षणाय अभ्यर्हितस्य कुलीनत्वस्य सुरक्षणं आश्रमधर्ममात्रपालनेन न भविष्यति किन्तु जातिमर्यादापालनेनसह। इति आश्रमधर्मे वर्णधर्मस्यागतार्थता मन्तव्या।

विवाहफलम्

(ज०पृ० २६६) वैवाह्यमिति—आहरेष्वथ योनौच बीजे कर्मणि चापि यः।
शुचिः कृच्छ्रगतस्यापि न पापे रमतेऽस्य धीः॥
(अर्थं० जयमङ्गला)

इति वचनानुसारेण विनीतस्य पुत्रस्य निर्मितिः आहारबीजयोनिकर्मणां शुचितानिबन्धनेति राजपुत्ररक्षणे वक्ष्यमाणे स्पष्टम्। तत्र योनिर्बीजं संस्काररूपं कर्मचेति त्रयं, शुद्धविवाहसंस्काराधीनं, तथा राष्ट्रस्योन्नतिरपि सत्पुत्रावलम्बिता। तदेतत्।

जातिसूत्रीयशारीराध्याये ·कुमारभृत्याकश्यपसंहितायामिदं प्रतिपादितम्।

तथाहि:-

अथातो जातिसूत्रीयं व्याख्यास्यामः॥ १॥
इतिहस्माह भगवान्कश्यपः॥ २॥

जातौ जातौ खलु स्वभाव एवाकृतिभेदं निर्वर्तयिता भवति। स्वभावतो ह्यस्य वायुपरमाणवः संयोगविभागचेष्टाधिकाराः आकुञ्चन प्रसारणकोष्ठाङ्ग प्रत्यङ्ग धातुचेतनास्रोतांसि विभजन्ति। समत्यके धातुरिव निषिक्तः पुरुषः पुरुषमभिनिर्वर्तयति। गौर्गामश्वोऽश्वमेवमादि। नृणा ·ना मपितु ? मध्ये गर्भनिवृत्तिः। तत्र द्वयोर्दम्पत्योः स्वभावात्स्वकर्मपरिणामाद्वा प्रजाभिवृद्धिर्भवति। तौ धन्यौ अतो न्यथा भिषजितव्यौ। स्नेहस्वेदवमनविरेचनास्थापनानुवासनैः क्रमश उपचरेत्, मधुरौषधसिद्धाभ्यां क्षीरधृतपुष्टं पुरुषम्। स्त्रियं तु तैल सांसा-भाषा-यामित्येके। सात्म्यैरेवेति प्रजापतिस्व रजस्वलायां चेत्प्रथमे हनि गर्भमावपेत्, तं वातगर्भं ·ते बिफलं वातपुष्पामिवोद्भिदानाम् द्वितीये हनि चेत् स्रंसते च्यवते वा, तृतीये हनि सूतिकासने म्रियते न वा दीर्घायुर्भवति। हीनाङ्गश्च जायते। अत ऊर्ध्वं ऋतुर्द्वादशाहं ब्राह्मणीनामेकादशाहं क्षत्रियाणां, दश वैश्यानां, नवरात्रमितरासाम···ऋतुंर्बीजकालमवेक्षते इत्याहुर्महर्षयः अतऊर्ध्वं मकालजमाहुः अकालजं हीनं दुर्बलमस्थिरमदृढमपीनभङ्गुरं धान्यमिव भवति॥५॥

अथ शुद्धस्नातां स्त्रियं चतुर्थेऽहनि स्नानगृहे श्वेतेनैवान्येन वाससा वगुण्ठयानवलोकयन्ती शुचिदेवगृहं प्रविश्योद्वाहाग्निं प्रज्वलन्तं धृताक्षतेनाभ्यर्च्य ब्राह्मणमीश्वरं–

जयमङ्गलाक्रोडपत्रम्

एवंरीत्या विवाहस्य महत्वे परिज्ञाते आदौ विवाहपदार्थो विविच्यते ।

विवाहपदार्थः ।

विवाहो नाम विजातीयसंस्कारप्रयोजकं पाणिग्रहणम् । ग्रहणंच ममेयमिति-स्वत्वास्पदीभूततया ज्ञानम् । स्वत्वं च प्रतिग्रहजन्यं विवक्षतम् । संस्कारश्च पाणि-ग्रहणमन्त्रावधिकसप्तपदीगमनविहितमन्त्रान्तमन्त्रसमुदायकरणकक्रियाकलापजन्यादृष्ट-विशेषः । तथाविधोक्तसंस्कारप्रयोजकप्रतिग्रहजन्यस्वत्वास्पदीभूतज्ञानविषय पाणि-ग्रहणंमेव विवाहपदार्थः ।

विवाहस्य कालः

संवर्ती विवाहकालमाह—

रोमदर्शनसंप्राप्ते सोमो भुङ्क्तेऽथ कन्यकाम्
रजो दृष्ट्वा तु गन्धर्वाः कुचौ दृष्ट्वा तु पावकः ।
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ।
माता चैव पिता चैव ज्येष्ठो भ्राता तथैवच
त्रयस्ते नरकं यान्ति दृष्टवा कन्यां रजस्वलाम् ।
तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् ।
विवाहोष्टमवर्षायाः कन्यायास्तु प्रशस्यते ।

यमाङ्गिरसावपि—अष्टवर्षा भवेद्गौरीति[1] ।

विष्णुं स्कन्दंच सम्प्रेक्ष्य अभिवाद्य निष्क्रम्य सूर्याचन्द्रमसाविति । ननु प्रेतपिशाच-रक्षांसि । शुद्धस्नातमात्रा हि स्त्री यं वा पश्यति मनसा वाभिध्यायति तादृशाचार-वपुषं प्रायेण जनयति । तस्माद्देवगोब्राह्मणगुरुबृद्धाचार्यान् स्वतः पश्येत्कल्याणमनाश्च-स्यात् । न तु सन्ध्ययोः स्नानं मैथुनं वा, उपेयान्नान्यमनाः । सा चेदिच्छेद्धोरमोजस्विनं शुचिमायुष्मन्तं पुत्रं जनयेयमिति, तस्या एवं शुद्धस्नानात्प्रभृति शुक्लयवसक्तूनां मधुघृताभ्यां श्वेतायाः श्वेतपुंवत्सायाः गोः क्षीरेण संसृज्य मन्थं राजते कांस्ये वा सदा पाययेत् । शालिगौरयवक्षीरदधिघृतप्रायं च काले मात्रयाश्नीयात्, पुष्पाभरणवा-सांसि च शुक्लानि बिभृयात्, सायं प्रातश्च श्वेतमश्वं वृषभं वा पश्येत्, सौहितप्रिय-कथाभिरासीत, अनुकूलपरिवारा च स्यादिष्टमपत्यं जनयति । या तु श्यामं लोहिताक्षं व्यूढोरस्कं पुत्रमिच्छेत्कृष्णं वा, तत्र तादृगुपचारो भोजनवसनकुसुमालङ्काराणान्ता-दृग्देशानुचिन्तनञ्चेति । यवागूस्तु कन्यार्थिनीभ्यो दद्यात्, क्षीरोदकतिलसिद्धास्तु वर्ज्याः गौरश्यामकृष्णेभ्योऽन्येवर्णा निन्दिताः ।

१ मरीचिः—गौरीन्ददन्नाकपृष्ठं वैकुण्ठं रोहिणीन्ददत् । कन्यां दददब्रह्मलोकं रौरवन्तु रजस्वलाम् । स्मृतिः—सर्वेषामेव दानानमेकजन्मानुगं फलम् । हाटकगृह-गौरीणां सप्तजन्मानुगं फलम्—

भट्टभाष्ये स्मृतिः—यावन्न लज्जया कन्या पुरुषसन्निधौ योन्यादीन्यवगूहेत तावद्भवति कन्यका

आचारमाधवीयेप्येतत् किन्तु तत्र नग्निकेत्यत्र कन्यकेति पाठः ।

सङ्ग्रहकारः—यावच्चैलं न गृह्णाति यावत्क्रीडति पांसुभिः । यावद्दोषन्नजानाति तावद्भवति कन्यका ।

माधवीये स्मृतिः—जन्मतो गर्भाधानाद्वा पञ्चमाद्वापरं शुभम् । कुमारीवरणं दानं मेखलाबन्धनन्तथा ।

ज्योतिर्निबन्धे– षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः । सोमो भुङ्क्ते ततस्तद्वद्गन्धर्वश्च तथाऽनलः । न चैवं सोमादिभोगकालबोधकं रोमदर्शनसंप्राप्ते इत्यादि संवर्तवाक्यं विरुध्यत इति वाच्यम् । द्वयोरप्यर्थवादरूपतया विरोधाभावात् । तथाहि-ज्योतिर्निबन्धे तावत् षडब्दमध्ये नोद्वाह्या इत्यस्यार्थवादतया वर्षद्वयं यत इत्यादिकमुक्तम् । संवर्तेनापि रोमदर्शनसंप्राप्ते इत्याद्यर्थवादमभिधाय तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत् इत्युपसंहृतम् । उभयत्रैव विधेयत्वेनाभिमतोर्थस्तदनुगुणार्थंवादोपन्यासेन समर्प्यते इति न किञ्चिदनुपपन्नम् ! अङ्लकृत्य पिता कन्यां भूषणाच्छादनाशनैः । दत्वा स्वर्गमवाप्नोति पूजितस्तु सुरादिषु । रोमदर्शनसंप्राप्तौ सोमो भुङ्क्तेऽथकन्यकां रजो दृष्ट्वा तु गन्धर्वः कुचौ दृष्ट्वा तु पावकः । अष्टवर्षाभवेद्गौरी नववर्षा तु रोहिणी दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला । प्राप्ते तु द्वादशे वर्षे यः कन्यान्नप्रयच्छति । मासि मासि रजस्तस्याः पिबन्ति पितरः स्वयम् । अष्टमे तु भवेद्गौरी नवमे रोहिणी भवेत् दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृता । संवर्तः –ऊर्ध्वं दशाब्दाद्या कन्या प्राग्रजोदर्शनात् सा गान्धारी स्यात्समुद्वाह्या चिरञ्जीवितुमिच्छता । आश्वलायानः प्रदानं प्रागृतोः ।

गौतमः—तस्माद्विवाहयेत्कन्यां यावन्नर्तुमतीभवेत्–

यमः—माता च जनकश्चैव ज्येष्ठो भ्राता तथैव च त्रयस्ते नरकं यन्ति दृष्ट्वा कन्यां रजस्वलाम् ।

शाट्यायनिः –सुप्तां रुदन्तीं निष्क्रान्तां वरणे परिवर्जयेत् ॥११॥

दत्तां गुप्तां द्योतांमृषभां शरभां विनतां विकटां मुण्डां मण्डूषिकां साङ्किरकां रातां पालीं मित्रां स्वनुजां वर्षकरीं च वर्जयेत् ॥१२॥ आप०गृ०१-३

गृह्यसङ्ग्रहे—अप्राप्ता रजसो गौरी प्राप्ते रजसि रोहिणी अव्यञ्जिता भवेत्कन्या कुचहीना च नग्निका ।

व्यञ्जनैस्तु समुत्पन्नो सोमो भुञ्जीत कन्यकां पयोधरैस्तु गन्धर्वो रजसाग्निः प्रकीर्तितः । तस्मादव्यञ्जनोपेतामरजस्कामपयोधरां अभुक्तां चैव सोमाद्यैः कन्यकान्तु प्रशस्यते । रजस इति शेषे षष्ठी । भुञ्जीत भुङ्क्ते । अरजामरजस्कामीदृशीं कन्याममिप्रेत्य प्रशस्यते प्रशंसा क्रियते । नग्निका ।श्रेष्ठेति सूत्रयता गोभिलेनेति वाक्यशेषः । सकर्मकादपि भावे लट् । अत्र च विवाहकर्त्रा तावद्धृताधोवसनाया गौर्याः प्राप्तौ

यतनोयम् । तत्रैव तस्याभ्युदयविशेषात् । रोहिणीकन्ययोस्तु ततोपकर्षः पञ्चषडब्दावनुकल्पौ । सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः । "कन्यकायाः शस्यते राजन् अन्यथा गर्भगर्हित" इति महाभारतवचनात् । दातुस्ते निर्वसनाया दानं प्रशस्तमित्यूहनीयम् । पैठीनसिः—"यावन्नोद्भिद्येते स्तनौ तावदेव देयाऽथर्तुमती भवति दाता प्रतिगृहीता च नरकमाप्नोति । पितृपितामहप्रपितामहाश्च विष्ठायां जायन्ते तस्मान्नग्निका दातव्या । नग्निकाऽनागतार्तवा ।"

माधवीये वसिष्ठः—प्रयच्छेन्नग्निकां कन्यां ऋतुकालभयात्पिता ।
ऋतुमत्यां हि तिष्ठन्त्यां दोषःपितरमृच्छति ।

अङ्गिरा आह—

प्राप्ते द्वादशे वर्षे यदा कन्या प्रदीयते ।
तदा तस्यास्तु कन्यायाःपिता पिबति शोणितम् ।

यमः—

कन्या द्वादशवर्षाणि याऽप्रदत्ता गृहे वसेत् ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम् ।
प्राप्ते द्वादशमे वर्षे यःकन्यान्न प्रयच्छति ।
मासि मासि रजस्तस्याःपिता पिबति शोणितम् ।
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ।
यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः ।
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः ।
वन्ध्या तु वृषली ज्ञेया वृषलीऋतुमृत्प्रजा ।
शूद्री तु वृषली ज्ञेया कुमारी तु रजस्वला । इति ।

प्रायेणैतावताकालेनर्तुमती भवतीति द्वादशवर्षोपादानम् । सर्वथात्वनागतार्तवा दातव्येत्यत्र तात्पर्यम् ।

अत्रिकाश्यपौ—पितुर्गृहे तु या कन्या रजःपश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ।

यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः । अश्राद्धेयमापाङ्क्तेयं तं विद्याद्वृषलोपतिम् । अत्र द्वादशवर्षग्रहणन्नकुर्वते । अतएव पूर्वलिखिततवचनेष्वपि नग्निकाया दानमुपदिष्टम् ।

तथा महाभारते—

त्रिंशद्वर्षःषोडशवर्षां भार्यां विन्देत कन्यकाम् ।
अतोऽप्रवृत्ते रजसि कन्यां दद्यात्पिता सकृत् ।
महदेनः स्पृशेदेनमन्यथैष विधित्सताम् ।

अन्यथा प्रवृत्ते रजसि । इति ।—

जयमङ्गलाक्रोडपत्रम्

तथाचैभिर्वचनैः विवाहोऽष्टवर्षमारभ्य दशवर्षपर्यन्तं प्रशस्यते इति अष्टवर्षमारभ्य दशमवत्सरान्तं मुख्यः कालः। अनन्तरन्तु तेषां वर्णानां कृते स्त्रीणां विवाहस्योपनयनस्थाने सत्वात् वर्णानुसारेण तत्तद्वयोमर्यादा, स्त्रीणां विवाहे गौणः कालः।

गौण उपनयनकालस्तु यथाक्रमं षोडशद्वाविंशचतुर्विंशतिपर्यन्तमुक्तः। अत्र वचनानि त्वनेकशः "अषोडशादाद्वाविंशादाचतुर्विंशाच्चवत्सरात् इत्पादीनि ज्ञातव्यानि। एवं सत्यपि ऋतुदर्शनानन्तरं अर्थात् द्वादशवर्षानन्तरं षोडशवर्षपर्यन्तं कृतो विवाह आपत्कल्पतयैव मन्तव्य इतिध्येयम्।

अस्मिन्नापत्कालिके विवाहे द्वादशवत्सरानन्तर्यं स्थापितं नतु ऋतुदर्शनं, यतः तस्य प्रवृत्तिः न सर्वसाधारणतया एकमेव कालमपेक्षते।[1]

अत्र "अत ऊर्ध्वं रजस्वला" इति वाक्यानुसारेण दशमवयसः पूर्वमेव न विवाहो योग्यः किन्तु द्वादशपर्यन्तं इति केषांचिन्मतम्।

अन्येतु— ऋतुकाल इति प्रोक्तं गार्ग्यादिमुनिसत्तमैः

स्त्रीचिन्हं यौवनं प्राप्य षोडशे वत्सरे सदा।
कृत्रिमाद्दशमादूर्ध्वंऔषधस्य च सेवनात्
एकादशे द्वादशे वा ऋतुकालं वदन्ति हि।

यत्तु मनुवचनं—त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः। इति

तस्य इयता कालेन यवीयसी कन्या वोढव्या न पुनरेतावद्वयस एव विवाह इत्येस्वार्थः। तथा च शिष्टसमाचारो न विरोत्स्यते। मृतभार्यस्य पुनर्दारकरणे नैष वयोनियमः संभवतीति, पुनर्दारकरणोपदेशोऽन्यथा न स्यात्। मेधातिथिरप्येवं— "पूर्वोक्त विवाहप्रकरणमतिक्राम्याभिधानाच्चैतदेवं प्रतिपत्तव्यम्। इति। पूर्वोक्त-महाभारतवचनस्वारस्यादप्येषा व्याख्या समादर्तव्या भवति। मन्वर्थमुक्तावल्यामप्युक्तम्—"एतच्च योग्यकालप्रदर्शनपरम्। न तु नियमार्थम्। प्रायेणैतावता कालेन गृहीतवेदो भवति त्रैभागवयस्का कन्या वोदुर्यूनो योऽभ्येति गृहीतवेदश्चोपकुर्वाणको गृहस्थाश्रमं प्रति न विलम्बेतेति सत्वर इत्स्यार्थः" इत्यन्तेन इति। विष्णुपुराणम्— वर्षेणैकगुणां भार्यामुद्वहेत्त्रिगुणः पुमान् इति। कन्याया यवीयस्त्वमात्रे तात्पर्यम्। विवाहतत्वाणर्वेऽप्येषैव व्यवस्था। अतएव यवीयसीमित्यवरवयस्कामिति तत्रोक्तम्। अतएव मनुना त्रिंशद्वर्षस्य द्वादशवर्षाया, महाभारतेन च षोडशवर्षाया विवाहोऽभिहित इतिध्येयम।

१ यथा वातजा पित्तजा चेति दारुणा त्रिविधा स्मृता। वातजा द्वादशे वर्षे पित्तजा च चतुर्दशे। दारुणा षोडशे वर्षे शोणितं पतति ध्रुवम्। कालनिर्णयदीपिका-दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला। प्राप्ते तु द्वादशे वर्षे रजः स्त्रीणां प्रवर्तते इत्यादिवचनात्। षोडशवयसोऽनन्तरन्तु व्रात्यसंस्कारेणैव विवाहो योग्यो भवति।

जयमङ्गलाक्रोडपत्रम्

अनुरागात्द्वादशाब्दे त्रयोदश्यान्तु केचन ।
चतुर्दशे पञ्चदशे स्त्रीचिन्हन्तु भविष्यति ।

इतिवचनात् "दशवर्षा भवेत्कन्या" इति वचनाच्चैकादशवयसः पूर्वमेव विवाहो योग्यः इति । इदमेव मतं सम्यक् । तथाहि—

पिपासितः पशुर्बद्धः कन्यकाच रजस्वला । देवता च सनिर्माल्या हन्ति पुण्यं पुराकृतम् ।

इत्यादि वचने दशमवयोऽनन्तरजातविवाहे अपरिहरणीया दोषाः समुद्भवन्तीति । दशमवर्षानन्तरमेव ऋदतुदर्शनं भवत्येवेति यद्यपि न नियमस्तथापि तस्यावस्थायां बहीरजोऽभावेपि सा अन्तर्रजस्काऽस्त्येवेति आयुर्वेदेनोच्यते ।

वर्षद्वादशकादूर्ध्वं यदि पुष्पंबहिर्न हि ।
अन्तः पुष्पं भवत्येव पनसोदुंबरादिवत् । अन्तः समुद्भूतरजस्काया लक्षणन्तु सुश्रुते प्रतिपादितम् ।[१]

अनेनोल्लेखेनर्तुस्नाताया अविवाहितायाः अवश्यमुपर्युक्तान्यूनातिरिक्तमानेन शतेषु शत्तसंख्यया स्थितिर्भवितुर्महतीत्यतः अन्तर्गतरजस्कावस्थायाः पूर्वमेव विवाहस्तासां रक्षणदृष्टया जातिशुद्धिदृष्टया च हितावह एवेति निश्चप्रचम् ।

---

१ "ऋतुस्तु द्वादशरात्रं भवति दृष्टार्तवः अदृष्टार्तवाप्यस्तीत्येके ।
भाषन्तेचात्र—पीनप्रसन्नवदनां
प्रक्लिन्नात्ममुखद्विजाम् ।
नरकान्तां प्रियकथांस्त्रस्तकुक्ष्यक्षिमूर्धजाम् ।
स्फुरद्भुजकुचश्रोणिनाभ्यूरुजघनस्फिचाम् ।
हर्षौत्सुक्यपरां चापि विद्यादृतुमतीमपि ।

अनेन ऋतुकालः कामवासनाया उद्रेकं करोतीति सिद्ध्यति । तस्य परिणामोपि विवाहाभावे कीदृशो भवतीति तत्रैव व्यक्तम् ।

ऋतुस्नाता तु या नारी स्वप्ने मैथुनभावहेत् । आर्तवं वायुरादाय कुक्षेः गर्भं-करोति हि

मासि मासि विवर्धेत गर्भिण्या गर्भलक्षणम् । कललं जायते तस्या वर्जितं पैतृकैर्गुणैः । इति ।

अर्थात् इदं कललंरक्तार्बुदरोगरूपेण तासु अविवाहितासु परिणमते इति सिद्धं भवति । स्वप्नोत्पत्तेस्तु कार्यकारणभावो वैशेषिकभाष्ये स्पष्टः ।

कामी क्रुद्धो वा यदा यमर्थमादृतश्चिन्तयन् स्वपिति तदा सैव चिन्तासन्ततिः प्रत्यक्षाकारा सञ्जायते । धातुदोषाद्वातप्रकृतिस्तद्दूषितो वाऽऽकाशगमनादीन् पश्यति । पित्तप्रकृतिः पित्तदूषितो वा ग्निप्रवेशकनकपर्वतादीन् पश्यति । श्लेष्मप्रकृतिः श्लेष्मदूषितो वा सरित्समुद्रप्रतरणहिमपर्वतादीन् पश्यति ।" इति ।—

जयमङ्गलाक्रोडपत्रम्

२८३ पृष्ठोक्ते सुश्रुतवचने वर्षद्वादशकादिति यदुक्तन्तत् गर्भद्वादशतात्पर्यकम। त्रिमासाधिकदशवर्षानन्तरमेकेनापि दिवसेन तस्याअन्तर्गतरजस्कता भवतीति तोडरानन्दग्रन्थे संस्कारसौख्ये उल्लिखितमुपलभ्यते। तस्माद् अव्यञ्जनोपेतामरजस्कामपयोधरामित्यादिधर्मशास्त्रवचनानि तत्रैवोपोद्बलकानि। अतो बाल्ये विवाहकालएव प्रशस्ततरः।

(ज० पृ० २६६) ऋतुमतीमिति। ऋतुमतीविवाहः सर्वथा निन्द्यः यतो जातिशुद्धि स्तदा दुर्लभा।

आङ्ग्लानां राजनीतेर्वर्णसङ्करप्रधानतया तैःऋतुमतीविवाहोपरोधो न कृतो, वरं प्रोत्साहितः। भारतीयराजनीत्या तु तद्विरुद्धतया उत्तरदायिन्यां राज्यव्यवस्थायां जातिशुद्धेरावश्यकत्वाद्बाल्यविवाहएव योग्य इति निर्णीतमस्ति। यद्यपि २८३ पृष्ठोद्धृतसुश्रुत वचनैः सामान्यतो द्वादशवत्सरादारभ्य षोडशवत्सरमध्ये ऋतुस्रावो भवति। किञ्च स्त्रीशरीरस्याभिवृद्धिस्तावच्छोडषवत्सरपर्यन्तं भवतीति वाग्भटग्रन्थेनापि ज्ञायते। तथापि तस्यापवादः कश्यपसहितायां द्रष्टव्यः। (पू०पृ० ५४ सू०—) यच्च—व्यासः—"अनन्यपूर्विकां दर्वीं शुभलक्षणसंयुताम्।

घृताधोवसनां गौरीं विख्यातख्यातनाम्नः पुत्रवतः सदाचारवतःसतः।

दातुमिच्छोर्दुहितरं प्राप्य धर्मेण चोद्वहेत् इति।

धृताधोवसनां किञ्चिदुपजातलज्जामिति यावत्। स्तनयोरनुद्रेकादधोधृतोत्तरीयामिति द्योतायितुमधःपदम्। अतएव गौरोमिति स्मरन्ति।

एष्टव्या बहवः पुत्रा यद्येको पि गयां व्रजेत्।

गौरीं वाप्युद्वहेद्भार्यां नीलं वा वृषमुत्सृजेत्।

अत्र यजेत वाऽश्वमेधेनेतितृतीयचरणे पाठान्तरम्। यस्याः पितृकुले पञ्च मातृकुले च इत्येवं दशपुरुषा विख्यातास्ताम्। तदसम्भवे ख्यातनाम्न इति स्मृतम्।

"ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम्।
यथा धत्ते पुमान् गर्भं गर्भस्थः स विपद्यते।
जातो वा नचिरञ्जीवेत् जीवेद्वा दुर्बलेन्द्रियः
तस्मादत्यन्तबालायाङ्गर्भाधानं न कारयेत्।
अष्टाङ्गहृदये—"पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता।
शुद्धगर्भाशये मार्गेरक्ते शुद्धेऽनिले हृदि।
वीर्यवन्तं सूतं सूते ततो न्यूनाब्दयोः पुनः।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा।
पूर्णषोडशवर्षा स्त्री पूर्णविंशतिकः पुमान्।
समत्वागतवीर्यौ तौ जानीयात्कुशलो भिषक्।—

जयमङ्गलाक्रोडपत्रम्

अनेन[1] वचनेन तत्पूर्वमेवार्थात् त्रिमासाधिकदशवर्षानन्तरमेवाहारादिसुव्यवस्थायां स्त्रीशरीरावयवोपचयः पूर्णतां गच्छति इति कथने न कोपि बाधः। तस्यामवस्थायां च कामवासनाया उद्रेकस्य पूर्णत्वात्स्वप्ने मैथुनादिसंभवाद्रोगः संभाव्यते इति। तदानीं पतिसहवासेन पूर्णायुष्मत्याः प्रजाया एव निर्माणन्नाशक्यम्। किञ्च रजोदर्शनानन्तरमेव गर्भाधानसंस्कारस्य विहितत्वात् तदानीमल्पायुष्मत्याः प्रजायाः कथमपि न सम्भवः। पूर्वोक्तापस्तम्बसूत्रानुसारेणापीदमेव सिद्ध्यति दत्तांगुप्तां—वर्षकरीं च परिवर्जयेत्[2] इति ॥

अत्रायं निष्कर्षः—स्त्रीणां विवाहे गर्भतोष्टमवर्षो मुख्यकालः नवमदशमौ मध्यमौ, तदूर्ध्वं यावदृतुदर्शनं गौणः कालः। ऋतुदर्शनोर्ध्वं तु सर्वथा निन्द्यः इति।

वराद्यलाभेनाविवाहितायास्तादृश्या विषये प्रायश्चिादिकम् विधेयम्। तस्मादृतुमतीविवाहः सर्वथा निन्द्य एवेति। तद्विवाहकाल आपत्कालिक एव सप्रायश्चितः। अन्तर्रजस्कतापूर्वं तु प्रशस्ततरः काल इति।

वरस्यादृश्यत्वे दण्डः

नारद :—दत्तां न्यायेन यः कन्यां वराय न ददाति तां। अदृष्टश्चेद्वरो राज्ञा स दण्डयस्तत्र चोरवत्। इति दण्डं विधन्ते। इति स्मर्तव्यम्

---

१ मनुः—"गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥
असपिण्डा च या मातु रसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥
गृहस्थोऽसमानार्षीमस्पृष्टमैथुनां कनीयसीं भार्यां विन्देत। वसि० ७ अ०
कुलं च शीलंच वपुर्वयश्च विद्यां च वित्तं च सनाथतांच।
एतान् गुणान् सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम्। इति।

२ अस्मिन् सूत्रे ऋतुमतीं कन्यां राताशब्देन सम्बोध्य तस्या विवाहो निषिद्धः तदनुसारेण ब्राह्मणमहासम्मेलने मध्यस्थ निर्णयः—

"धर्मशास्त्रेषु ऋतुमतीविवाहः सर्वात्मना निन्दितः। क्वचिन्महत्यामापदि प्रायश्चित्तविधिपूर्वकं तादृश्या अपि विवाहोऽभ्यनुज्ञायते। एवमपीदमेव व्याजीकृत्य मुख्यकल्पानुष्ठानसमर्थैरपि अयं पक्षो नावलम्नीयः, अस्य पक्षस्यात्यन्तिकापद्विषयत्वात्। आपद्यल्पत्वमहत्वनिर्णस्तु तत्तत्समाजेनैव करणीयः। व्यवहार्यत्वविषये तत्तत्कुलाचारः प्रमाणम्। ऋतुदर्शनानन्तरं सर्वथा साहसेन विवाहविमुखकन्यायास्तु परित्याग एव। इति। धर्माचार्य निर्णयः।

जयमङ्गलाक्रोडपत्रम्

वरान्तरम्

दुष्टे तु पूर्ववरे वाग्दत्तापि वरान्तराय देया। तथा च पराशरः—
नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते।

अवान्तरजातीयविवाहः

ननु कन्यालक्षणविचारे "उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्वितां मित्यनेन सर्वणत्वमेवोक्तम्। नत्ववान्तरजातीयत्वम्। तर्हि अवान्तरजातीयत्वं विवाहे कुतोऽपेक्ष्यते ?

अत्रोच्यते। पूर्वपक्षस्यायं भावः। यत् येष्ववान्तरविभागेषु जन्मयौनादि विभागः प्रचलति तेषु यौनः संबन्धोऽयोग्यः शास्त्रविरुद्धश्च। अर्थात् "यथा कन्या तथा हविः" इति वचनानुसारेण यज्ञादौ येषां यैः सह हविस्संबन्धो योग्यस्तेषां यौन-सम्बन्धोपि योग्य इत्यूरीकर्तव्यं इति।

तत्र केषां चन यज्ञसम्बन्धमात्रम्, केषां चन यज्ञयौनोभयसम्बन्ध इति कल्पने वैरूप्यकल्पनापेक्षया सर्वेषां सर्वसम्बन्धकरणं योग्यमिति यद्यमीषां आशयस्तर्हि इदं विचारणीय। कथं क्षत्रियाणामपि ब्राह्मणेन यौनसम्बन्धो न भवतीति। अतोऽत्रा-वश्यमिदमूरीकर्तव्यम्, यत् कन्यासम्बन्धो यज्ञसम्बन्धश्च साधारणतया न कल्पायितुं युज्यते। किन्त्ववान्तरविभागमादायैव। तथा च यथा श्राद्धादौ अवरणीयान्नान्न-यौनोभयसम्बन्धयोग्यत्ता, एवमेवान्तरविभागेष्वपि न सर्वथा तद्योग्यता। अतएव विवाहाङ्गो कुलपरीक्षणमुपपद्यते। नहि ब्राह्मण्यादिपरीक्षणं कुलपरीक्षणन्नाम। अवान्तर विभागं परीक्ष्यह्ययं विवाहः सर्वथा परिपालनीयो नान्यथा। तत्र सगोत्रायाः सपिण्डायाःदोषान्तरदूषितायाश्च यथा ब्राह्मणत्वादिसाम्येपि न विवाहयोग्यता एवम-वान्तरविभागान्तर्गताया अपि न तद्योग्यता। अस्य चावान्तराविभागपरिपालनस्य कुलपरीक्षायां विशेषत उपयोगः कुलीनत्वविचारे व्यव्यक्तः। (पृ० २६७) इममुप-योगमभिप्रेत्यैव कुमारिलपादा अपि स्त्रीरक्षणार्थं समूहलेख्यं प्रवर्तितमिति विवेचयन्ति। तत्रैव द्रष्टव्यम्।[1]

तथा च प्रतिकुलं गुणदोषस्मरणात्तदनुकूलं स्वपितृपितमहादिपरंपरासु यत्र विवाहसबन्धो वर्तते तत्रैव विवाहसम्बन्धकरणं योग्यम्। नायं विभागः अप्रामा-

---

१ तद्यथा-"न स्त्रीणां क्वचिद्व्यभिचारदर्शनात्सर्वत्रैव कल्पना युक्ता। लोकविरुद्धानु-मानासंभवात्। विशिष्टेन हि प्रयत्नेन महाकुलीनाः परिरक्षन्त्यात्मानमनेनैव हेतुना। राजभिर्ब्राह्मणैश्च स्वपितृपितामहादिपरंपरास्मरणार्थं समूहलेख्यानि प्रवर्तितानि"। इति।

णिकः तथा ब्राह्मणेष्वनुभूयमानत्वात् । वालंभट्ट्यामपि तथैवोपलंभाच्च ।[1]

"तदनुसारेण यद्देशवासित्वेन येषां यथा अनुष्ठानं उक्तम् तेषान्देशान्तरगमनेपि तथैवानुष्ठानम् । अन्यथा शाखारण्डत्वप्रयुक्तप्रायश्चित्तापत्तिः । न चैषां निर्मूलत्वमितिवाच्यम् । महार्णवेऽस्योपलभ्यमानत्वात् सदचारस्य तथैवोपलभ्यमानत्वाच्चेति दिक् ।"

अत्र हि नर्मदोत्तरभागे ये वर्तन्ते ये च नर्मदादक्षिणभागे वर्तन्ते तेषां च विवाहादिसंबधो न युक्त इति स्पष्टं विवेचयित्वा नर्मदादक्षिणभागेपि तैत्तिरीयशाखावलंबिनामाश्वलायनशाखावलम्बिनाञ्च पृथक्करणात्तेषामपि विवाहादिसम्बन्धायोगः प्रतिपाद्यमानो विरुद्धत्तच्छाखावलम्बिनां परस्परं विवाहायोगङ्गमयति इति चिन्त्यम् ।

---

१ तथाहि—किञ्च चरणव्यूहाख्यपरिशिष्टभाष्ये स्पष्टं वेदशाखयोर्विभाग उक्तः । तथाहि —इतरदेशेषु वेदशाखयोर्विभाग उच्यते । तथाच महार्णवे—

पृथिव्या मध्यरेखा या नर्मदा परिकीर्तिता ।
दक्षिणोत्तरभागेन शाखावेदश्च उच्यते ।
नर्मदादक्षिणे भागे आपस्तंबाश्वलायनी ।
राणायनो पिप्पलायनी यज्ञकन्याविभागिनः ।
माध्यन्दिनी शाङ्खायनी कौथुमी शौनकी तथा ।
नर्मदोत्तरभागे च यज्ञकन्याविभागिनः ।
तुङ्गा कृष्णा तथा गोदा सह्याद्रिशिखरावधि ।
आ आन्ध्रदेशपर्यन्तं बह्वृचस्याश्वलायनी ।
उत्तरे गुर्जरे देशे वेदो बह्वृक् प्रकीर्तितः ।
कौषीतकी ब्राह्मणं च शाखा शाङ्खायनी स्थिता ।
आन्ध्रादिदक्षिणाग्नेयी गोदासागरआवधि ।
यजुर्वेदस्तैत्तिरीया आपस्तंबी प्रकीर्तिता ।
सह्याद्रिपर्वतारम्भादिशां नैर्ऋत्यसागरात् ।
हिरण्यकेशीशाखा च पर्शुरामस्य सन्निधौ ।
मयूरपर्वताच्चैव यावद् गुर्जरदेशतः ।
व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता ।
अङ्गवङ्गकलिङ्गाश्च कानीनो गुर्जरस्तथा ।
वाजसनेयि शाखा च माध्यन्दिनी प्रतिष्ठिता ।
ऋषिणा याज्ञवल्क्येन सर्वदेशेषु विस्तृता ।
वाजसनेयिवेदस्य प्रथमा कण्वसंज्ञिका । इति ।

जयमङ्गलाक्रोडपत्रम्

अत्र चापस्तंबशाखीयानामाश्वलायनशाखीयैर्न विरोधः उभयोरपि अभिन्न देशस्थत्वात् । एतेन सामगा अपि व्याख्याताः । प्रतिवेदं बह्वीनां शाखानामवस्थानाद्येषां यच्छाखीयत्वं परम्परयाऽवगतम् सा शाखा यत्र वेदे वर्तते तत्रैव विवाहो भवति, तर्हि तेषां परस्परविवाहयोगोऽविवादसिद्ध एव । एवञ्च दाक्षिणात्येष्वान्ध्राणां केषाञ्चन वाजसनेयिनां बह्वृचानां परस्परविवाहस्तु स्पष्टमेव वचनेनैव निषिद्धः । आपस्तम्बीयानामेवान्ध्राणाम् द्राविडानां महाराष्ट्रीयानां च परस्परम् विवाहस्तु नायोग्यः । यतः स सम्प्रदायो बहुकालादारभ्य प्रचलति । पुनः द्राविडेष्वेवान्ध्रेषु गुर्जरेषु वङ्गीयेषु कानोनेष्वन्येषु च विभागा बहवो यत्र च परस्परम् विवाहसम्बन्ध इदानीमपि नास्ति, न योग्य ? इति च बहुनां वाद इदानीं वर्तते तैस्तु विवाहाङ्गतया कुलपरीक्षा कर्तव्या वर्तते नह्यादित आरभ्य कुलपरीक्षा सर्वैरपि कर्तुं शक्यत इति । यत्र परस्परम् विवाहो बहोः कालादारभ्य प्रवृत्तआसीत् तेषां नामविशेषादिना व्यवस्था कृतेति मन्तव्यम् । स्त्रीणां कामचारवुद्धौ स्वपतेर्विवाहयोग्यकुलीनत्वमप्येकं निमित्तम् । अतः समुचितं यत्र स्वापितृमातृवंशयो रन्यतरस्य सम्बन्धोऽनादिकालमारभ्य प्रचलितः तत्कुलमेव विवाहार्थं ग्रहणीयम् इति ।

ग्रामादिभेदेन द्राविडादीनां विभागोपि-वडम, बृहच्चरण, अष्टसहस्त्रम्-इत्यादिर्योग्य एव । अतो यावच्छक्ति यत्र पूर्वतनानां सम्बन्धः कया चन परम्परया बहोः कालादारभ्य प्रचलति तत्कुलमेव विवाहार्थं स्वीकर्तव्यमिति । विभागान्तरीयाणां स्वीये विभागे कन्याया वरस्य वाऽलाभेपि विभागान्तरीयकन्यास्वीकारार्थं प्रवृत्तिरनुचितैवेति सिद्धम् । अतिप्रयत्नेनापि स्वीये विभागे वरालाभवादस्तु साहसमात्रनिबन्धनो वैतण्डिकश्चेति वयं सुधोरं वदामः ।

आचाराअन्यथाकरणम्

विवाहपरम्परागताचारान्यथाकरणे शास्त्रविरोधोस्ति किम् ?
उच्यते । आचारप्रामाण्यं मीमांसायां साधितम् पुनरत्रेदमेव वक्तव्यम् । यदनादिसिद्धाचाराख्यशास्त्रविरोधोऽन्यथाकरणे वर्तते । इष्टापत्तौ तु—

"शिखां पुण्ड्रं च सूत्रं च समयाचारमेव च ।
पूर्वैराचरितं कुर्यादन्यथा पतितो भवेत् । इति स्मरणेन
देशजातिकुलाचारधर्माः सम्यक् प्रकीर्तिताः ।
तथैव ते पालनीयाः धर्मः प्रक्षुभ्यते ऽन्यथा ।"

इति वचनेन च पातित्यादिदोषः प्रसज्येत । अतः अवान्तरविभागेन सहाचारपरिपालनं यौनसम्बन्धरक्षणमत्यरयन्तमेवोचितम् ।

जयमङ्गलाक्रोडपत्रम्

अत्रेयं विचारत्रयी

असमानार्षगोत्रजामित्यत्र समस्तपदत्वाद्गोत्रप्रवरयोर्मिलितयोः पर्युदासनिमित्तत्वं वक्तुं शक्यते ? इति चेन्न।

प्रत्येकं दोषाभिधानात्पार्थक्येन निषेधः अनुमन्तव्यः।[1]

ऋत्वनन्तरं विवाहो धर्म्यः

ऋत्वनन्तरविवाहोढा परित्याज्या, उत प्रायश्चित्ताचरणापूर्वकं सा धर्माधिकारमप्यर्हति वेति चेत्।

अत्र एवं मन्यन्ते, यदृतुमत्यप्यूढा न परित्याज्या किन्तु प्रायश्चित्ताचरणपूर्वकं धर्माधिकारमप्यर्हत्येवेति। अयमाशयः—यथाहि सगोत्राया विधवाया वोढाया परित्यागो विहितः न तथोढाया ऋतुमत्याः परित्यागः कुत्रापि विहितः, प्रत्युत तस्याः स्वीकारार्हतैव प्रायश्चित्तानन्तरं सर्वत्र प्रतिपाद्यते। अयमत्र निष्कर्षः। विधवात्वं हि स्त्रीणां न पातित्यापादकं किन्तु सम्यक्परिपालितं श्रेयस एव भवति। न हि कुत्रापि वैधव्यमपि पातित्यापादकतया विहितमिति तस्मिन्निमित्ते कस्यापि प्रायश्चित्तस्याविधानात्। प्रायश्चित्तशतेनाप्यपरिहरणीयत्वात्। अनन्यपूर्विकात्वांशस्य विवाहाधिकारप्रयोजकस्य वृषल्यां सत्वात तस्या दाने भवति स्वत्वम् संप्रदानस्यातः। ऋतुमत्या सह विवाहे तस्यां पत्युः स्वत्वमुत्पत्तुमर्हति सहैवानेन पातकमपि वर्तते तन्निराकरणाय प्रायश्चितं कर्तव्यं भवति। यथा ब्राह्मणादेः भृत्यर्जिते स्वत्वम् अस्ति।

---

१ तदाह बोधायनः—"सगोत्राम् चेन्मत्योपयच्छेन्मातावदेनां बिभृयादिति। गौतमश्च—असमानप्रवरैर्विवाह" इति। शातातपः—परिणीय सगोत्रान्तु समानप्रवरान्तथा। कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रविशोधनमिति। आपस्तंबः—समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते। इति। सङ्ग्रहे—सगोत्राम् समानप्रवरां कामतः परिणीय प्रजामुत्पाद्य गुरुतल्पव्रतं चरेत्। प्रजां चण्डालेषु निक्षिपेत्। अकामतस्तप्तकृच्छ्ं प्रजाया भरद्वाजगोत्रान्तर्भावः। प्रजानुत्पादने चान्द्रायणम्। विवाहमात्रे कृच्छ्ं। सर्वत्र व्रतान्तेऽष्टोत्तरशतं होमः। परित्यक्तां तां जननीवद्रक्षेत्। स्मृत्यर्थसारेपि—इत्यसगोत्रसम्बन्धिविवाहविषये स्थिते, यदि कश्चिज्ज्ञानतस्तां कन्यामुद्वाह्य गच्छति। गुरुतल्पव्रताच्छुद्ध्येत्। गर्भस्तज्जोऽन्त्यतां व्रजेत्। भोगतस्तां परित्यज्य पालयेज्जननीमिव। अज्ञानाच्चेदैन्दवैस्तु शुद्ध्येद्गर्भस्तु कश्यपः। इति। वीरमित्रोदये तु—पालनविवाहयोर्विकल्पः। अथवान्येन विवाह, इति पालनविवाहयोर्विकल्पः प्रतिपादितः। अनेनेदं सूच्यते यत्सगोत्रत्वदोष इव परिहरणीयदोषे सत्येव पुनर्विवाहपक्षोपि सम्भवत्यन्यथा तु मातृवत्परिपालनमेवेति। एतेनाव्यङ्गाङ्गीमित्याद्योपि व्याख्याताः।

जयमङ्गलाक्रोडपत्रम्

परं तत्र दुष्टत्वमपि स्वीक्रियते। अतएव भगवतो भार्गवस्य विजितपृथ्व्याम् स्वत्वमुपन्नम्। किन्तु ब्राह्मणस्य विजितस्वत्वे गौतमवचनेन गर्हितत्वं वर्तते "यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्। तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव चेति गर्हितार्जितस्यत्याग बोधनात् कश्यपाय तेन तन्निष्कृत्यै पृथ्वी दत्तेत्यन्यदेतत्। स्वत्वे तु न सन्देहः अतएव क्षत्रियस्य ब्राह्मादिनं प्रशस्तो विवाहः तस्मै दानस्याधर्म्यत्वादित्यभिप्रेत्य राज्ञः प्रति भीष्मवाक्यं महाभारते आदि १०२ अध्याये स्वयंवरन्तु राजानः प्रशंसन्त्युपयन्ति च प्रमथ्य तु हृतामाहुर्ज्यायसीं ब्रह्मवादिनः इति। तत्रैव-११९-२२०-२२१-अध्यायेषु सुभद्राहरणप्रस्तावेपि स्पष्टमेव। प्रसह्यहरणे तु विजितत्वप्रयुक्तमेव स्वत्वम् तत्तु धर्म्यमेव क्षत्रियस्येति तदाशयः। इत्थंच ऋतुमती भार्यादिषु स्वत्वं निष्कण्टकं प्रायश्चित्तेन धर्मार्हत्वं च सिद्ध्यतीत्यलमतिविस्तरेण।

अवान्तरजातीयविवाहफलम्

अवान्तरजातीयस्य विवाहस्य किं फलम् ? इतिचेत्,

उच्यते। समाजसङ्घटनमेव फलम्। तच्च समाजावयवानां नियन्त्रणं विना न संभवति। बहूनामवान्तरविभागानां प्रतिसमाजं कल्पनेन समाजान्तरीयैः साकं विवाहभोजनादिसम्बन्धायोग्यताव्यवस्थापनेनैव भवति। नान्यथा। इदानीं हि बहवः समाजान्तरेणापि यौनसम्बन्धादिकरणेनन केवलं स्वीयसमाजोल्लङ्घनेन स्वीयं समाजमेव न विघटयन्ति। किन्तु समाजान्तरमपीत्यवान्तरविभागपरिपालनं हि नितरां योग्यम्। वानरा अपि हि ग्रामान्तरीयवानरैःसाकं न यौनसंबन्धं कुर्वन्ति, प्रत्यक्षमिदं तिरुपतिप्रभृतिषु देशेषु। तत्र गोपुरान्तरवर्तिभिर्वानरैर्गोपुरान्तर्वर्तिनो वानरा व्यवहारमपि न कुर्वते। तथा च समाजसङ्घटनं यद्यभिलषितं तर्हि अन्ततो गत्वा विवाहमात्रेऽवान्तरविभागपरिपालनमेव योग्यम्। इदानीं हि समाजात् बहिष्कृतस्य समाजान्तरेणावलंबदानात् विवाहादिसम्बन्धकरणेन सर्वेपि प्रायेण स्वपितरमपि तृणाय मन्यन्ते इति विवाहे अवान्तरविभागपरिपालने दृष्टं प्रयोजनमेकं वर्तते। एवं अवान्तारविभागपरिपालनत्यगेन बहूनि द्वाराणि सङ्कराय प्रवर्तकानि भवेयुः। यथा इदानीमेकर्षिवंश्यत्वेन ब्राह्मणानामनन्तरं द्विजत्वेन त्रैवर्णिकानाम् ततो वर्णत्वेन ब्राह्मणक्षत्रियाविटशूद्राणामथ मानवत्वेन सर्वजातीनां ततःस्त्रीत्वेन पुरुषत्वेन च सर्वेषां यौनसम्बन्ध इति कल्पनेन हि सर्वः स्वतन्त्रो भवेत् इति समाज शैथिल्यमपरिहरणीयां पूर्वोक्तपतनदशामेवाऽनुयायादतो, विवाहेऽवान्तरविभागपालनमावश्यकमेवेति।

'यत्तु केचिदेकपङ्क्तिभोजनवतां मिथः कन्यासम्बन्धो योग्य इति चाटाः। किमत्र न्याय्यम्। एक पङ्क्तिभोजनेन मिथः कन्यसम्बन्ध उत कन्यासम्बन्धाभावात् पङ्क्तिविच्छेदः। पश्यतुभवान्। एकपङ्क्तिभोजनवत्सु पशुपक्ष्यादिषु किंमिथः शरीर-

जयमङ्गलाक्रोडपत्रम्

सम्बन्धः अस्ति ? अहो पशुभिरपि समानजातिः प्राथ्यंते मनुष्यैस्तु विस्मर्यते । तस्मादिद मत्र न्याय्यं यत् कन्यासम्बन्धाभावात्पङ्क्तिविच्छेद इति । "यथा कन्या तथा हवि" रिति वचनं चात्रानुकूलम् । मिथः पङ्क्तिव्यवहारे जातिविस्मरणमपि प्रसङ्गात् आपद्येत । जातिविस्मृतौ मिथः कन्यासम्बन्धप्रसङ्गात् अश्वतरादिवद्वैरूप्यप्रसङ्गात् सन्ततिविच्छेदापत्तिप्रसङ्गात् सङ्करजातेरन्यस्याएवाङ्गीकारप्रसङ्गाच्च ।

अतः उदितोदितवंशस्य कुलीनत्वादिगुणसंपन्नस्य निर्माणमावश्यकम् यथा वा सङ्करोन भवेत् तथा संशुद्धवंशसंरक्षणायोद्योगः श्लाध्यतमः भारतीयराजनीति समादृतः कार्यः । कुलीनत्वादीनामुपयोगोपि जयमङ्गलायां "ब्राह्मणोन्यो वा कुलपुत्र-त्वान्नव्यभिचरति" इत्यादिनोक्तः बोध्यः । विस्तरा द्विरम्यते ।

प्रजावृद्ध्यन्नसमृद्धी

(ज० पृ० २६६) धर्मप्रजावृद्ध्यर्थमिति ।

ननु राजशास्त्रे धर्मप्रजावृद्ध्यर्थं ऋतुकाले अभिगमनशीलता विहिता वर्तते । परन्तु यदा हि अन्नस्य उत्पत्तिः प्रजाभिवृद्धिपरिमाणतः न्यूनपरि-माणा भवति तदा परिवारनियोजनं भारतीयराजनीतिसम्मतं नास्ति किं ? इति चेद् विमृश्यते । अत्र केवलम् ऋतुकालाभिगामित्वमेव न विहितमपितु तेन सह स्वशुद्ध्यर्थं वंशशुद्ध्यर्थं च भारतीयराजनैतिकदृष्ट्या अपेक्षिताः अपरेपि गुणा विहिताः सन्ति । ते हि यथासम्भवं सर्वैः परिपाल्यन्ते, तर्हि तद्गुणवतां सदाचारिणां शुद्धतमे वंशे प्रजाबाहुल्यं भविष्यतीति न कदापि मन्तव्यम् । अतः भारतीय-राजनीतिप्रतिष्ठायां प्रजाबाहुल्यस्य अवसर एव नास्ति । वस्तुतः भारतीय-राजनीतेः एतद्विषये अपरमपि एकं मतमस्ति तथाहि—प्रजाबाहुल्यं जातमिति अथवा प्रजाबाहुल्यं भविष्यतीति कृत्वा प्रजायाः नियोजनं न अत्र चिन्त्यते । किन्तु यथा धनधान्ययोः प्रजासङ्गोपनाय समृद्धिः प्रचुरमात्रया येनोपायेय संभवेत् तथा चिन्तितमिति । अत्रोदाहरणं यथा प्रकृतिः भाविनं वंशमवरोद्धुन्न वाञ्छति अपि तु यदा प्रजायाः अभ्युदयस्य अवस्था शरीरे संभवति, तदा तदुत्पत्तेः प्राक् बालकस्य जीवनादृष्टहेतुना गर्भिणीशरीरे दुग्धम् उत्पादयितुं सा प्रयतते । ततः प्रजा समुद्भ-वति । स एव न्यायोऽत्र स्मर्त्तव्यः । कस्माच्चित् कारणवशात् यदि गर्भिणी पुत्रवती वा क्रोधेन, शोकेन वा समाक्रान्ता, वात्सल्यशून्या वा भवति तर्हि तु दुग्धमाशु प्रणश्यति ।[1]

---

१ तदुक्तम्—पृ० ८ क० संहिता १६ अ० क्षीरोत्पत्तिः—
"लशुनानां पलाण्डूनां सेवनं शयनं सुखम् ।
क्रोधाध्वभयशोकानामायासानां च वर्जनम् ।
अ···या ··भवति वत्स इति क्षीरविवर्धनम् ।—

जयमङ्गलाक्रोडपत्रम्

स एव न्यायः भूमितः अन्नोत्पत्तिविषयेऽपि मन्तव्यः। पृथिव्यां यदन्नमुत्पद्यते तस्य प्रथमावस्था क्षीरसदृशी वर्तते इति प्रत्यक्षसिद्धम्। तस्यापि विनाशः मातुः दुग्धविनाशसामग्रीतुल्यसामग्र्या संभवितुमर्हति। अस्मन्मते पृथिवी मातृस्थानीया वर्तते सा यावत्पर्यन्तं प्रजाविषये वात्सल्यभावं क्रोधशोकायोः राहित्यं च आत्मनि नानुभवेत्, तावत्पर्यन्तं यावत्यः प्रजाः वर्तन्ते तावतीनां सर्वासां सङ्गोपनाय पूर्वत एव प्रस्नोष्यत्येव। यदि केनापि कारणेन वात्सल्यतः च्यावयिष्यते तर्हि ततः अन्नपूर्वावस्थापन्नस्य पयसो विनाशेन अन्नस्य विनाशोऽवश्यं स्यात्। साम्प्रतं हि इयं पृथिवी माता अनुचितशासनेन अस्मत्प्रमादेन वा आक्रान्ता दुःखमनुभवन्ती उद्विग्नचित्ता वर्तते। एतदवस्थायां इयं कं वत्समधिकृत्य वत्सला भूयात्? वर्णितं चैतत् श्रीमद्भागवते पृथुचरिते द्रष्टव्यम्।[1]

वटादीनां च वृक्षाणां क्षीरिकायाश्च वल्कलम्।
पाक्यः कषायः क्वथितः क्षीरं तेन पुनः शृतम्।
पाक्यं गुडविडोपेतं सघृतं शालिमाशयेत्।
अपि शुष्कस्तनीनां तत् क्षीरोपजननं परम्।
शालिषष्टिकदर्भाणां कुशगुन्द्रोत्कटस्व च।
सारिवावीरणेक्षूणां मूलानि कुशकाशयोः।
पेयानि पूर्वकल्पेन श्रेष्ठं क्षीरविवर्धनम्।
स्वभावनष्टे शुष्के वा दुष्टे साध्वीक्षिते हितम्।
अव्याहतबलाङ्गायुररोगो वर्धते सुखम् (?)॥
शिशुधात्र्योरनापत्तिः शुद्धक्षीरस्य लक्षणम्॥"

(इति का० सं० १६ अ० क्षीरोत्पत्तिः, पृ०)

'अवात्स्यल्याद् भयात् शोकात् क्रोधादत्ययतर्पणात्।
स्त्रीणां स्तन्यं भवेत् स्वल्पं गर्भान्तरविधारणात्॥" इति भावप्रकाशे।

सुश्रुत अ० १० शारीरस्थानम्—३०

क्रोधशोकावात्सल्यादिभिश्च स्त्रियाः स्तन्यनाशो भवति। अथास्याः क्षीरजननार्थं सौमनस्यमुत्पाद्य यवगोधूमशालिषष्टिकमांसरससुरासौवीरकपिण्याकलशुनमत्स्यकशेरुकशृङ्गाटक बिदारिकन्द-मधुकशतावरी-नालिकालाबू-कालशाकप्रभृतीनि विदध्यात्। ३०।

१ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा।
तत्र योगेन दृष्टेन भवानादातुमर्हति।
वत्सङ्कल्पय मे वीर येनाहं वत्सला तव।
धोक्ष्ये क्षीरमयान् कामाननुरूपं च दोहनम्।९।

जयमङ्गलाक्रोडपत्रम्

किञ्च पृथिव्यां यदन्नमुत्पद्यते तत् तस्याः हर्षचिह्नमिति पृथिवी-धर्मसंवादे १ स्कन्धे निरूपितमस्ति।

तदाहुः श्रीधरस्वामिनः "यस्याङ्घ्रिणा रजस्युत्थितेन विटङ्किताया अलङ्कृतायाः सस्यादिमिषेण रोमोत्सवो भवति" ॥३६॥ इति। (स्कं-१,अ० १६, श्री० ३६)

साम्प्रतं अधर्मस्याभिवृद्ध्या भूमिः न हर्षेणोल्लसति अतः हर्ष-प्रकाशकस्य रोमाञ्चस्यापि अभावः समुल्लसितः तत्र वर्तते।

किञ्च—अस्मिन् देशे पूर्वं सर्वत्र भगवत्पूजनमिषेण घण्टायाः मधुरो नादः गुञ्जति स्म। वार्तालापोऽपि पारस्परिकः शमप्रधानैः, उत्साहप्रधानैः रसिकैः क्रियमाणः स रि म प – स्वरैः स्वर्यमाणः सर्वेषां आनन्दाधायकः सन् वृक्षेषु फलोत्पादकः बभूव। वृक्षाः यदा हर्षेण उत्फुल्लाः भवन्ति, तदा तेषु हर्षप्रयुक्तः सञ्जायमानः रोमाञ्चः फलरूपतया पर्यवस्यति। विपरीतस्वरं श्रुत्वा आत्मनः प्रतिकूलाञ्च स्थितिं ज्ञात्वा ते क्लिश्यन्ति। तदा ते रोमाञ्चिता न भवन्ति, अतएव न फलोत्पत्तिरपि। तत्र रोमाञ्चो भवति। इति वैशेषिकभाष्ये आत्मप्रकरणे स्पष्टम् (पृ० २००)

एवं जगदीशचन्द्र बोस महाभागेन घण्टादिमधुरनादं शृण्वत्सु वृक्षेषु तज्ज-नितकम्पेन चैतन्यमस्तीति साधितमस्ति। अतएव वृक्षाः घण्टानादश्रवणमात्रेण असात्म्यभूमिमापन्ना अपि रोहन्तीत्युक्तमुपपद्यते। तदुक्तम्–

निधिदेवमहीपानां प्रभावाच्चैव कृत्स्नशः।
असात्म्यभूमिमापन्ना अपि रोहन्ति पादपाः।' इति।

पूर्वं यत्र यत्र अस्मिन्देशे मधुरनादः आसीत्, साम्प्रतं तत्र तत्र प्रायशः रौद्र-प्रकृतीनां नादो वर्तते। तं श्रुत्वा वृक्षेषु प्रसन्नता कथं संजायेत ? कथं वा ते फलानि प्रस्नुयुः ? अतः अस्मिन्समये भूमिः वृक्षाः वा प्रभूतमात्रया न अन्नं फलं वा प्रयच्छन्ति।

भारतवर्षे तथाविधसमयः आसीत्, यत्र भूमिः प्रचुरमन्नं वितरति स्म। पुरा चतुर्भिः पणकैः एकमणपरिमितं धान्यं लब्धमासीत्। अकबरसमये तावत्परिमाण-कमन्नं षड्भिः पणैः लभ्यमभूत्। आङ्ग्लराज्ये तु येन मार्गेण भूमिः वृक्षाश्च समुल्लसिता भवन्ति स्म, स मार्गः अवरुद्धः अन्नं च विनष्टम्। पञ्चाशत्वत्सरेभ्यः प्राक् पूर्वसंस्कारेण यन्मात्रया भूमिरन्नं व्यतरत् यस्य त्रिंशच्छेटकपरिमितस्य उप-

---

देहस्य वृद्धि-क्षतभग्नसंरोहणादिनिमित्तत्वाद् गृहपतिरिव। इति। (न्या०कं०) देहस्येति। वृद्धिः प्रसिद्धैव। क्षतस्य भग्नस्य च संरोहणं पुनः सङ्घटनं तयोर्निमित्त-त्वात् गृहपतिरिव प्रयत्नवानधिष्ठाता अनुमीयते शरीरस्य वृद्धिक्षतसंरोहणं प्रयत्न-वता कृतं वृद्धिक्षतभग्नसंरोहणत्वाद् गृहवृद्धिक्षतभग्न—संरोहणवत्।" इति।

जयमङ्गलाक्रोडपत्रम्

लब्धि: एकेन रूप्येणाभूत् तन्मात्रया तदपि अधुना न दृश्यते। अस्यायमेवार्थः यत् भूमिः वृक्षा वा न हृष्टाः सन्ति, अतएव ते यावन्मात्रयाऽन्नमपेक्ष्यते तावन्मात्रया न प्रयच्छन्ति। भारतीयराजनीतिः अत्र नाश्चर्यं मन्यते। यत्र राजानः अपालकाः चोरा बहुलमात्रया अभिवृद्धाः, यज्ञश्च शून्यतां गतः। अत्यधिकमात्रया वृक्षाः छिद्यन्ते तत्र इदं भविष्यत्येव। अतः परिवारनियोजनचिन्तयापि किंस्याद् ? यदि च अन्नं प्रचुरमात्रया लब्धं न भवेत्। यदि चान्नस्य प्राप्तिः प्रचुरा भवेत् तर्हि परिवार-नियोजनया किं स्यात् ?, अतः इदं कर्तव्यमस्ति, यत् भारतीयराजनीतिसिद्धान्तः सर्वत्र प्रतिष्ठापनीयः। प्रतिष्ठिते च तस्मिन् एतावत्अन्नम् उत्पद्येत यस्य विनियोगः भारतीयैरन्यत्रापि कर्तुं शक्येत। यदा इयं रीतिः स्थिरा भवति। तदानीं सुखसमृद्धिः कथं भवतीति विचारणायां भूमिः अकृष्टपच्या भवति, दावाग्निः वृष्टिं विनापि प्रशाम्यति, फलं पुष्पं च विशेषतः अभिवर्धते, बलवान् ऊनं न बाधते[1] इत्यादि। विलासितानिमित्तेन परदेशे धनं प्रेष्यते। महद्दौर्भाग्यं देशस्य यत् विलासितां लक्ष्यीकृत्य यथा वृथा धनव्ययः न भवेत्, तथा तु न चिन्त्यते। अपितु प्रजानियोजनार्थं कृत्रिमैरुपायैः जनाः पुंस्त्वात् स्त्रियश्च आर्यमर्यादायाः प्रच्याव्यन्ते। सर्वत्र रसप्रधानं शिक्षणं प्रसृतम् तेन सर्वेऽपि आत्मनि नटभावमलङ्कुर्वन्ति। नटाःयथा महाराजवत् उपचार्याः इति शास्त्रे उक्तं तन्न्यायेन सर्वेऽपि राजोपचारैः संभावनीयतां गताः। यदा हि समस्तेषु अयमुपचारः प्रसक्तस्तदा अनेकविधविलाससाधनसामग्री—(मोटर-रेडियो- फर्नीचर आदि)—बहिःप्रदेशात् आनेतव्या भवति तन्मिषेण अनाचारहेतूनां दोषाणां च व्यभिचारस्य समृद्धिरेव परिणामः स्मर्तव्यः।

अपि च समस्तस्य पदार्थस्य उत्पादकाः इलेक्ट्रान प्रभृतयः असङ्ख्याताः पर-माणवः किरणा इतस्ततः परिभ्रमन्ति तेषां संयोगेन प्रचुरमात्रया अन्नं यावद-पेक्ष्यते, तावत् उत्पादयितुं शक्यते। स संयोगः कथं भवेदिति चिन्तनीयम्। यथा समुद्रेषु मेघाः सततं उत्पद्यन्तएव वायुगतिवैपरीत्यात् ते अभिमतदेशं न गच्छन्ति। अतः स्वानुकूलतया वायुगतिः यथा भवेत्, यथा च तत्प्रतिबन्धकमदृष्टमवग्रहात्मकं निरस्येत् तथा चिन्तनीयम्। एवं भारतीयराजनीत्या देवगुरुभर्तृप्रसादादिजनकम् अदृष्टम् उत्पाद्यते। एलेक्ट्रॉनप्रभृतीनां परमाणूनां संयोगः यथा भवेत् तथा प्रयत्यते

---

[1] तदुक्तम्—शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः।
ऊनन्न सत्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने॥
रघुवंश २ सं० १६

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति। इति।
कि० जु० १ स० १७ श्लो०

जयमङ्गलाक्रोडपत्रम्

तदर्थंच देवगुरुभर्तृप्रसादः अपेक्ष्यते अत एव स सदा धर्मतः लोकैः न्यायतः परिपालनीयो भवति इति चिन्त्यतामर्हति। तदुक्तं दुर्भिक्षकारणविचारप्रसङ्गे—(साङ्ग० वे० वि० वार्षिकविवरणे[1] संवत् २०२१ का पृ० ५)

नीत्यन्तरे अनिर्णयः

इमां भारतीय राजनीतिसरणिं विहाय अपरस्यां राजनीतौ किंकर्तव्यम्, को वा न्यायः इत्येतत्सर्वमपि स्थिरं नास्ति। अतः कः सिद्धान्तः केन कथमवलम्बनीयः? इति स्थिरतया न निर्णेतुं शक्यते। यथा कस्मिंश्चित् समये गर्भपातः दोषजनकत्वेन मन्यते स्म। अधुना तु तस्य वैधत्वं चिकित्सकैः चिकीर्ष्यते। एकत्र हिन्दूसङ्ख्यायाः परधर्मप्रवेशेन ह्रासो भवति स कथं निरोद्धव्य इति चिन्त्यते। अपरत्र परिवार-नियोजनं काम्यते। इत्येतादृशविचारणा यस्यां राजनीतौ वर्तते सा नीतिः कदा किमालोचयिष्यति इति सिद्धान्तितुमशक्यत्वात् सर्वमेव दुर्वचं भवति। अत्र तु यः सिद्धान्तः स त्रिकालाबाधितत्वात् स्थिर एव। अस्मिन्नेव देशे पूर्वत्रापि जनताया अभिवृद्धिरभूत्। तत्र तस्य ह्रासमियं राजनीतिर्न चिन्तयामास। द्वारकायां कोटित्रयपरिमिताः गुरवः अध्यापकत्वेन तत्र तत्र वृता आसन्। तत्र तेनैव शिष्याणां बाहुल्यात् प्रजासङ्ख्या प्रचुरा आसीदिति निश्चीयते। सत्यप्येवं तदानीं दुर्भिक्षस्य स्थितिः यथा न भवेत् तथा तदानीं प्रयतितम्। तथैव प्रकृतसमयेऽपि अन्न-समृद्ध्युत्पादकमार्गः यथा सफलो भवेत् तथा यतनीयम्। तेनैव रक्षणं भविष्यति। पुंस्त्वात् विचालनन्तु प्रतिभायाः अनुद्गमने पर्यवस्यति। तेन च पारतन्त्र्यादिरूपा महती हानिः राज्येन अनुभूयेत। अतः भारतीयराजनीत्यनुसारेण प्रजाधर्मवृद्ध्यर्थ-मिति यत् टीकायामुक्तं तत्समञ्जसमेवेति ध्येयम्।

ब्राह्मणादिभुक्तस्यान्नस्य यो ऽवशेषः तद्भोजनं राज्ञा कर्तव्यमिति भ्रमऽ-निरासायाह पश्चादिति। (ज० पृ० २६९) तदेव व्याचष्टे देवेति।

---

१ "देश में अन्न आदि संकट क्यों उपस्थित होते हैं, तथा उनके निवारण का उपाय भी कौन सा है? इसमें नीतिसार एवं जयमंगलाका मत है कि राष्ट्र की उन्नति या अवनति मन्त्री एवं पुरोहित की सहयोगिता तथा निर्व्यसनिता पर निर्भर रहती है। "राजराज्याभि-रक्षणं मन्त्रिपुरोहिताधीनम्।"

उपर्युक्त वचनानुसार मन्त्रिवर्ग और पुरोहितवर्ग के बिना देश को घोर अन्धकार से और कौन बचावेगा? यदि नेता लोग बल, शील, सत्व, आरोग्य इन चार गुणों से सम्पन्न न हों, तो देश किसका अनुगामी होकर सुख की नींद लेगा, इन चार गुणों में से सत्वगुण ही निर्व्यसनिता, सहयोगिता और गुण समृद्धि में साधक होने से वही सुरक्षा में प्रधान कारण है। वह जब प्रचुरमात्रा में रहता है तब नीति का निर्धारण सम्भव होता हैं। सत्व की समृद्धि हुई है अथवा नहीं, इसकी परीक्षा यह है कि सात्विक प्रकृति का मनुष्य आधी रात के अतिरिक्त समय में सदा जागता हुआ प्रसन्न रहता है। सुश्रुत में "सत्वभूयिष्ठा-नामर्धरात्रे ऐसा कहा है।"

जयमङ्गलाक्रोडपत्रम्

(ज० पृ० २६६ विघसाशित्वप्रतिषेधार्थम्। भृत्येषु इति शेषः। "अनेन देवतापित्र-तिथिभृत्येषृ त्यागः शेषभोजनं च" इति मूलोक्तानुसारेण देवपित्रतिथिभोजनानन्तर भोजनं यथा कर्तव्यं, तथा तेन राज्ञा भोजनं भृत्यभोजनानन्तरमेव कार्यम् इति भ्रमनिरासः सूचितः। अर्थात् भृत्यभोजनात्पूर्वं भोजनं राज्ञा कर्तव्यम् इति भावः। विघसस्वरूपस्य, तथैव व्याख्यानात्।[1]

एवं श्राद्धप्रकाशेऽपि भुक्तशेषप्रकरणे-शिष्टमन्नं किं क्रियताम् इष्टैः सह भुज्यतामित्युक्तत्वाच्च—

विघसाशित्वलाभः

ननु विधसाशित्वे को लाभः ? इति चेन् मायाजय एव लाभः इति मन्तव्यम्। तदुक्तं भागवते—

'त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः।
उच्छिष्टभोजिनो दासाः वयं मायां जयेमहि॥' इति

तेन उच्छिष्टं भोजनं भक्त्यङ्गमिति भाति। तथा च देवता–पित्र तिथिगुर्वर्थ-पाकभुक्तावशिष्टं भोजतं भक्त्यङ्गत्वादुचितम्। भृत्यदासास्तु राजसेवकाः। अतः तैर्भुक्तस्य शेषग्रहणम् राज्ञः कृते नोचितम्।

विधसाशित्वपरिसङ्ख्याविधिः

न च देवतापित्रतिथिभृत्येपु त्यागः इत्यनेन वाक्येन भक्त्यङ्गत्वात् देवताभुक्ता-वशिष्टभोजनं राज्ञः कृते प्राप्तमेव। पुनरिदमभिधानं व्यर्थमेवेति वाच्यम्। तस्य "पञ्च पञ्चनखा भक्ष्याः" इति विधेरिव परिसङ्ख्यापरत्वात्। यथाऽस्य वाक्यस्य 'पञ्च-पञ्चखातिरिक्तस्य भक्षणं न कुर्यात्' इत्यर्थस्तथा देवतापित्रतिथिगुरुभुक्ता-वशिष्टातिरिक्तस्य अपरेण भुक्तावशिष्टस्य भोजनं न्न कुर्यात् इत्यर्थो बोध्यः।

अत्रेदं बोध्यम्। ये किल गृहस्थस्य धर्माः अत्र नीतिवाक्यामृतेचाभिहिताः ते सर्वेपि भूतरक्षायामिज्यायां च गृहस्थस्य कर्तव्यत्वे पर्यवस्यन्ति। तदुक्तम् भागवते—

भिक्षोर्धर्मः शमोऽहिंसा तपोऽन्वीक्षे वनौकसाम्
गृहिणां भूतरक्षेज्या द्विजस्याचार्यसेवनम्। इति।

---

१ तदुक्तम् शब्दकल्पद्रुमे—विधसः—
विघसाशी भवेन्नित्यं नित्यं अमृतभोजनः।
विधसो भुक्तशेषन्तु यज्ञशेषं तथाऽमृतम्।
'आहारः' इति शब्दरत्नावली। यथा
अयि वनप्रिय विस्मृत एव किं बलिभुजो विघसो भवताऽधुना।
यदनयैव कुहूरिति विद्यया, न पततश्चरणौ धरणौ तब॥"इत्युद्भटः।

ब्रह्मचारिणः[1]—स्वाध्यायोऽग्निकार्याभिषकौ भैक्षव्रतत्वं, आचार्ये प्राणान्तिकी वृत्तिः, तदभावे गुरुपुत्रे सब्रह्मचारिणि वा ।

श्रीमूला

ब्रह्मेत्यादि। ब्रह्मशब्दो वेदवाची तद्ग्रहणार्थे दण्डाजिनधारणादिलक्षणे व्रते वर्तते, तच्चरितुं शीलमस्येति ब्रह्मचारी तस्य ब्रह्मचारिणः। स्वाध्यायः स्ववेदाध्ययनम्। अग्निकार्याभिषेकौ अग्निशुश्रूषात्रिषवणस्नाने। भैक्षव्रतत्वं भैक्षं भिक्षावृत्तिः व्रतत्वं व्रतित्वं गोदानान्तं कर्म तदुभयम्। एवं तावदुपकुर्वाणस्य वेदब्रह्मचारिण आसमावर्तनादनुष्ठानम्। नैष्ठिकस्य विशेषमाह—**'आचार्ये प्राणान्तिकी वृत्तिरि'-त्यादि**। गुरुकुले आप्राणोत्क्रमणकालभाविनी स्थितिः। गुरुपुत्रे आचार्यपुत्रसमीपे। सब्रह्मचारिणि वा समानशाखाध्यायिनि वा वृद्धे। कार्येति शेषः।

वैदिकसिद्धान्तसंरक्षिणी

ब्रह्मचारिधर्मानाह ब्रह्मचारिण इति। स्वाध्यायेति। एते धर्माः नीतिनिर्णीतौ टिप्पण्यां च नैष्ठिकमुदिश्योच्यन्ते ''नोपकुर्वाणक'' मित्यादिना। जयमङ्गलाकृतस्तु अत्र-केचित् धर्मा नैष्ठिकस्य केचित्तु उपकुर्वाणकस्येति मूलकृदभिप्रायं व्याख्यान्ति। किमत्र युक्तमिति तु नीतिसारग्रन्थात् उक्तानुक्तदुरुक्तचिन्तनं कर्तुं अधिकृतात् वार्तिकात् बोद्ध्यम्। तदाधारीकृत्य मूलमिदं यथायथं नैष्ठिकोपकुर्वाणकपरतया योज्यम्। स्वाध्यायः स्वशाखाऽध्ययनम्। तच्च गुरुकुले स्थित्वा कर्तव्यम्। तदुक्तं नीतिसारे—

गुरौ वासोऽग्निशुश्रुषा स्वाध्यायो व्रतचारणम्। इति।

गुरौ वासो ब्रह्मचारिणो विशेषतयाभ्यर्हितो धर्मः 'द्विजस्याचार्यसेवन'मिति श्रीमद्भागवते-११ स्कन्धे-उक्तत्वात्। अयं धर्मः विद्योपयोगितया बोध्यः। अग्निकार्यम् अग्निशुश्रुषा। अभिषेकः स्नानं त्रिषवणम्। भैक्षं भिक्षोपात्तम्। भोजनार्थं मिदं विहितम्। भिक्षया केन ब्रह्मचारिणा कीदृग्विनयः साधित इति निर्णये सौलभ्यं भवति। अत्रायं भावः—ब्रह्मचारिणा एवं वक्तव्यं एवं वा भाव्यं यन्मुद्रया प्रसन्नान्तःप्रहृष्टाः जनपदवासिनः स्वयंप्रदद्युरस्मै भिक्षां इति। व्रतचारिता ब्रह्मचर्यम्। इदं स्वाध्यायाध्ययने अङ्गं वर्तते। तस्य फलं ओजोभिवृद्धिः सत्वगुणप्रकर्षण च प्रतिभोत्पादनम्।

नैष्ठिकब्रह्मचारिणो धर्ममाह आचार्ये इति। गुरुकुले इत्यर्थः। प्राणान्तिकी प्राणस्यान्तोऽवसानं यस्या इत्यर्थः। यदि गुरुर्नास्ति तदाऽऽह तदभावे इति। गुरुपुत्राभावे पक्षान्तरमाह-सब्रह्मचारिणीति। तुल्यशाखाध्यायिनीति तदर्थः। औपकुर्वाणकनैष्ठिकयोः स्वाध्यायाध्ययनसमये परिश्रमेण वातादीनां प्रकोपोत्पत्तिजयित तच्छम-

---

१. नी० टी० नैष्ठिकमुद्दिश्योच्यते। नोपकुर्वाणकम्।

वैदिकसिद्धान्तसंरक्षिणी

नाय बलवर्धनोद्भूतये च यानि साधनान्यपेक्षितानि शरीरे, तानि एतद्वार्तिके नीतिसारे उक्तानि ।—

समेखलो जटी मुण्डो दण्डी वा गुरुसंश्रयः ।
आविद्याग्रहणात् गच्छेत् कामतो वाऽऽश्रमान्तरम् ।। इति ।।

तानि सर्वाणि अत्र विवक्षितानि । एतेषां मेखलादीनां स्वाध्यायाभ्यसने कथं विशेषोपयोगित्वं इति-जयमङ्गलाकोडपत्रे द्रष्टव्यम् ।

जयमङ्गला

ब्रह्मचारिण इति । ब्रह्म वेदः । तदध्ययनार्थं यद् व्रतं तदपि ब्रह्म तच्चरति यः । "व्रते" (३.२.८०) इति णिनिः, तस्य । स्वाध्यायो यस्मिन्नेव वेदे व्रतञ्चरति स एवाध्येय इति स्वग्रहणम् । **अग्निकार्यम्** अभिषेकञ्च स्नानं **यथोक्तम्** । 'व्रत भोजने' (?) इति ण्यन्तात् **कर्मकर्त्तरि पचाद्यच्** । एतद् वेदब्रह्मचारिण उपकुर्वाणस्य (आ) समावर्तनात् ।

आ मरणान्तात्तु **नैष्ठिकस्य** । **अयं विशेषः**[१] आचार्यकुले प्राणान्तिकी प्राणा एवान्तोऽवधिर्यस्या विद्यते सा । **वृत्तिः शुश्रूषा** । तदभावे गुरुपुत्रे द्वितीयः । सब्रह्मचारिणि वा समानचरणे तुल्यशाखाध्यायिनि वृत्तिरिति तृतीयः कल्पः । "चरणे ब्रह्मचारिणि ६. ३. ८६) इति सभावः ।

जयमङ्गलाक्रोडपत्रम्

ब्रह्मचारिण इति । ननु अग्निकार्यस्य क उपयोगः ? इति चेदुक्त एव शान्तीका अग्रदूतग्रन्थे, यत् "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते" इत्यादि (पृ० २७४) शेषं तत्रैवद्रष्टव्यम् ।

यथोक्तम् इति । नीतिसारे इति शेषः । ब्रह्मचारिणा त्रिसन्ध्यं स्नानं कर्तव्यमिति यावत् । स्वास्थ्याभावेतु मन्त्रादिना स्नातव्यम् । तथा सति अस्वस्थस्य ब्रह्मचारिणः त्रिसन्ध्यस्नायिता भवितुमर्हतीति भावः । अनेन ब्रह्मचारिणा शान्तरसे स्थितेन भाव्यमिति द्योत्यते, त्रिसन्ध्यस्नानस्य शान्तरसानुभावत्वात् । तदुक्तम प्राक् (पृ० २२९) स्नानं त्रिषवणोचितं इत्यादि । "शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः" इत्यादि योगसूत्रोक्तानि फलान्यपि अत्र अनुसन्धेयानि । किञ्च अभिषेकपदमुपलक्षणार्थम् सन्ध्योपासनादीनि अपराण्यपि नित्यकर्माणि ब्रह्मचारिणां कृते बोद्धव्यानि । धर्मशास्त्रेषु तथा प्रतिपादनात् । तदुक्तं-मनुस्मृतौ—

पूर्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति ।
पश्चिमान्तु समासीनो मलं हन्ति दिवाकृतम् ।। १०२ ।।

---

१. अशुद्धम्
नैष्ठिकस्यायं विशेषः

जयमङ्गलाक्रोडपत्रम्

ब्रह्मचर्य नियमफलम् मित्रत्वम्

(ज० पृ० २९८) कर्मकर्तरीति । ब्रह्मचारिव्रतनियमफलं इति भावः। ननु ब्रह्मचारिभिः मूलोक्तानां स्वीयधर्माणां परिपालने कृते नीतौ क उपयोग ? इतिचेदुच्यते। ब्रह्मचर्यव्रतपालेन त्रीणि फलानि संभवन्ति—

तेषु उपर्युक्तनियमपरिपालनेन शान्तरसस्य सत्वमयस्य तेजसः प्रभायाश्च उद्भवेन तद्दीप्त्या तस्मिन् माधुर्यस्य अनुभवेन च प्रसन्नचेतोभिः सहवासिभिः स्वयं तस्मै भिक्षासमर्पणम् इत्येवं उक्तब्रह्मचर्यनियमस्य एकं फलम्। यस्मिन्समये अत्र देशे उपर्युक्ता ब्रह्मचर्यव्रतनियमशिक्षा ब्राह्मणादिषु प्रसृता आसीत् तस्मिन्समये अतिथयः दुर्लभाः बभूवुः भवन्ति च। तदानीं कश्चन अतिथिर्मद्गेहे आगच्छेत् इति मनीषया गृहस्थाः तथाविधं ब्रह्मचारिणं प्रति प्रतीक्षांबभूवुः इति इतिहासः वरीवर्ति। तदुक्तमुदयनाचार्यैः कुसुमांजलौ। (न्या०कु०रस्तवक पृ० ५७) "पूर्वं दुःखेन ब्राह्मणैरतिथयोऽलभ्यन्त, ततः क्षत्रियातिथयोऽपि संवृत्ताः ततो वैश्यावेशिनोऽपि सम्प्रति शूद्रान्नभोजिनोऽपि। पूर्वममृतभुजः, ततो विघसभुजः, ततोऽन्नभुजः सम्प्रत्यघभुज एव"। इति। एवं विधः समयो यदि अस्माभिः द्रष्टुममिलष्यते, तर्हि ब्रह्मचारिषु विनयस्य गुरुभक्तेश्च उक्तनियमसाहचर्येण तेषु विद्यातेजः समुद्भावनीयम्। तद्दीप्त्या च स्वयं तस्मै गृहस्थाः धनादीन् समर्पयेयुः इति। अतएव वात्स्यायनेनापि विद्याग्रहणादीनार्थान् ब्रह्मचारी षोडवर्षात् प्रागाप्नुयात् इत्युक्तं कामसूत्रे। तद्यथा—"**बाल्ये विद्याग्रहणादीनर्थान्**" इति।

यत्र च वास्तविकं विद्यातत्वं परहितस्य निदर्शकं शुद्धं अबाधितमुदेति सः सर्वस्य विश्वास्यत्वान् मित्रं भविष्यत्येव। अत्र न सन्देहः। केवलं राक्षसप्रकृतिरेव दुष्टस्वभावः तं न विश्वसिति इति तु अन्यदेतत्। मित्रत्वंच स्निग्धस्वरूपं हितसाधनत्ववासनातोऽभिन्नं। तदुक्तं भावप्रकाशने द्रष्टव्यम्।[1]

---

१ "आर्द्रता शिशिरत्वं यत्सर्वावस्थासु मानसम्।
द्विधा भवेत् स च स्नेहः कृत्रिमाकृत्रिमात्मकः।' इति (४ अधि०)
('यथोः परस्परं चास्ते तदपि स्नेह ईरितः' इति। मालती माधवे।)
'सोपाधिः कृत्रिमः स्नेहो निरूपाधिरकृत्रिमः।
उपाधौ विनिवृत्ते तु तज्जन्यो विनिवर्तते॥
स्नेहः स्वभावजो यावद् द्रव्यभावी भविष्यति।
शङ्का स्यात् कृतके तत्तद्विक्रियान्वेषणात्मिका॥
स्वाभाविके भयन्तावद्विषयादेः प्रमादतः।
एकाश्रयः स च क्वापि क्वापि स्यादुभयाश्रयः॥
एकाश्रयस्तिर्यगादौ मर्त्यादावुभयाश्रयः॥
आश्रयाद्वासनातश्च जायते तत्र तत्र तु।
एकाश्रयो वासनातो द्व्याश्रयो हेतुभिर्भवेत्॥—

जयमङ्गलाक्रोडपत्रम्

तदिदं मित्रत्वं स्थिरं भवति तत्र, यमधिकृत्य ममत्वेन चित्तस्य द्रवीभावो भवति। एवंभूतस्य स्नेहस्य उत्तरोत्तराभिवृद्धौ विद्यावतः अर्थज्ञस्य किं तद्वस्तु दुर्लभमस्ति, यत् स न प्राप्नुयात् एवंभूतस्य मित्रत्वस्य संप्राप्तिः येन व्यापारेण विद्वद्भिः अर्जयितुं शक्येत, सः व्यापारः स्थिरतया अन्तः-करणे शरीरे वा यैः नियमैः संभाव्यते ते नियमाः ब्रह्मचर्याश्रमे शास्त्रकर्तृभिः अत्र विहित्ताः। तदेतत् ब्रह्मचर्यव्रतनियमस्य द्वितीयं फलं बोध्यम्।

विद्यालक्ष्मीविरोधतत्परिहारौ

ननु विद्यालक्ष्म्योः परस्परं विरोधोऽस्ति, स कथमुपपद्येत ? इति चेत् उच्यते। विद्वांसः कृतविद्या अपि 'लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि' इति वाक्यं विस्मृत्य

वाक्सूनृता दया दानं दीनोपगतरक्षणं।
'इति सङ्गः सतां साधुहितं सत्पुरुषव्रतम् ॥"

इत्यादि नीतिसारोक्तं चतुर्थं प्रकरणमुपेक्षन्ते। ततः प्रजापरागेण लक्ष्मीः क्रुद्धेव दूरे तिष्ठति। सरस्वत्यपि सत्यां च धनसंपत्तौ तत्प्रयुक्तमदेन धनिनः सकाशात् दूरे गच्छति। इत्येवं सरस्वतीलक्ष्म्योः विरोधः। नीतेरालम्बने तु नैवं विरोधः। अतः गुरुभिः अर्थानुकूलतया मित्रोपलब्धिः गुणानां जनानुरागसाधन-भूतानां समुदयश्च च यथा विद्यया यैश्च नियमैः संभवेत्, तथाविधा विद्या तदुपयो-गिनियमाश्च ब्रह्मचर्यावस्थायां शिष्येषु उत्पादनीयाः।

अथ ब्रह्मचर्यनियमस्य तृतीयफलमुच्यते। उक्तब्रह्मचर्यव्रतनियमपरिपालने सति विनयसम्पन्नतायां ब्रह्मचारिणि परमेशितुः प्रसादोऽपि उपर्युक्तफलाभ्यां सह तृतीयं फलं संभवति। तदुक्तं भागवते सुदामकृष्णसंवादे—

'नाहमिज्या प्रजातिभ्यां तपसोपशमेन वा।
तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥' इति (१०।८०।३४)

स तु स्नेहस्त्रिधा प्रौढमध्यमन्द विभागतः।
विदेशस्थे मृते वापि दुर्बले प्रतियोगिनि।
धर्मिणः क्लेशकारी यः स प्रौढः स्नेह उच्यते।
तत्तद्वियोगजं दुःखं तादृशं प्रतियोगिना।
अनुभूयातिवृत्तश्चेत्स्नेहो मध्यः प्रकीर्तितः ॥" इति (भा० प्र० ४ अधि०)

१ तदुक्तम्—'उत त्वः पश्यन् न ददर्श वाचं उत त्वः शृण्वन् न शृणोत्येनाम् उत त्वस्यैतस्वं विसस्रे जायेव पत्युः उशती सुवासाः। अत्रासख्वायः सख्यानि जानते यथैषां लक्ष्मीः निहिताऽधिवाचि। सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमश्नुते।' इति। (ऋ० सं ८-२-२४)

जयमङ्गलाक्रोडपत्रम्

एतन्महिम्ना गुरुभक्तः विनयसंपन्नः कीदृशं लोकोपकारजनकं कार्यं करोतीति भगवत्पूज्यपादानामाचार्याणां चरित्रेण अनुमातुं शक्यते।[1] तच्च टिप्पण्यां व्यक्तं।

ईदृशी ईशप्रसादजनिका विनयसम्पत्तिः ब्रह्मचारिषु आधुनिकशिक्षापद्धतौ विलासशिक्षाप्रचुरयां कुत्र द्रष्टुं प्रभवेत् ? अतः उपयुक्तंफलत्रयलाभाय ब्रह्मचर्यव्रतनियमाः ब्रह्मचर्यावस्थायामवश्यं परिपालनीया इति तेषां नीतौ उपयोगित्वं सिद्धम्।

नैष्ठक ब्रह्मचर्यस्य सार्थक्यम्

(ज० पृ० २९८) नैष्ठिकस्येति। ननु नैष्ठिकब्रह्मचर्यस्य विधाने ग्रन्थकर्तुः किं तात्पर्यम् ? इति चेदुच्यते। यस्य वेदाध्ययनं न सम्पूर्णम् एकं वेदमधीत्य अपरोऽपि वेदः विद्याश्च अध्येतव्याः इत्याकाङ्क्षा जागर्ति तेन नैष्ठिकं ब्रह्मचर्यं पालयितव्यम् इति नैष्ठिकब्रह्मचर्यस्य तात्पर्यम्। तत्र उपोद्वलकः अधोलिखितो वैदिक इतिहासो द्रष्टव्यः।[2]

यद्यपि मूले ब्रह्मचारिणां लिङ्गानि नोक्तानि। तथापि नीतिसारोक्तानि लिङ्गानि अत्रापि उपयोज्यानि तद्यथा—

'समेखलो जटी मुण्डी दण्डी वा गुरुसंश्रयः।' (का० नी०) इति।

मेखलादीनां धारणफलम्।

ननु मेखलाऽजिनदण्डादिधारणे किं फलं ब्रह्मचारिषु भवतीति ? चेत्। त्रिदोष-हानिः वृष्यत्वं बलं चेति फलं ज्ञेयम्।[3]

---

१. भगवत्पूज्यपादाः कदाचित् भिक्षार्थं कस्याश्चन निर्धनायाः गेहे गताः भिक्षामयाचन्त। सा च अत्यन्तं विषीदमाना भिक्षार्थं किञ्चन वस्तु अप्राप्य दूनेन चेतसा तेभ्यः शुष्कमामलकं ददौ। तामवस्थां दृष्ट्वा पूज्यपादैः ईशमाराध्य तद्देशे सुवर्णामलकवृष्टिः केरलप्रदेशे कनकधारास्तोत्रेण कारिता।

२ तद्यथा भरद्वाजेन 'विध्याध्ययनस्य पूर्तये पौनःपुन्येन इन्द्रमाराध्य तत्सकाशात् ब्रह्मचर्यं आयुषः वृद्धिश्च वररूपेण प्रार्थिता इति। तदुक्तम् भरद्वाजो ह त्रिभिरायुर्भिः ब्रह्मचर्यमुवास तंह त्रीणि स्थविरं शयानं इन्द्र उपव्रज्योवाच। भरद्वाज। यत्ते चतुर्थमायुर्दद्याम्। किमेनेन कुर्या इति। ब्रह्मचर्यमेवैनेन चरेयमिति होवाच। तं ह त्रीन् गिरिरूपानविज्ञातानिव दर्शयाञ्चकार। तेषां हैकैकस्मान् मुष्टिनाददे। स होवाच। भरद्वाजेत्यामन्त्रय। वेदा वा एते। अनन्ता वै वेदा :। (का० ब्राह्मण अ० १-३-१०-११ अनुवाक्) तैत्तिरीयेपि।

३ तदुक्तं शालिग्रामकृते निघण्टौ – दण्डः—तद्भेदे स्यात् किंशुलुकः किञ्चुलो हस्तिकर्णकः।

हस्तिकर्णः परं वृष्यो मेधायुर्बलवर्धनः। (वटादिवर्गे ३२)

मुञ्जः—भद्रमुञ्जः शरो बाणः तेजनश्चक्षुवेष्टनः।

मुञ्जो मुञ्जातको बाणःस्थूलदर्भः सुमेखलः॥—

जयमङ्गलाक्रोडपत्रम्

दण्डादिधारणं नियमार्थं

ननु पलाशादिवत् अन्येऽपि पदार्थाः मुञ्जादिसदृशाः त्रिदोषघ्नाः ब्रह्मचारिभिर्धारयितुं शक्यन्ते, अतः ते एव कुतो न धार्याः ? इति चेत् ।

'मति भेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीपइवार्थदर्शनम् ।।

इत्युक्तन्यायेन शास्त्रस्य निर्णायकत्वात्, पलाशदण्डादिधारणादिविधेः नियमविधित्वात् तेषामधारणे नियमादृष्टं व्याहन्येत इति तद्रक्षार्थं पलाशमुञ्जादीनि एव ब्रह्मचारिणा धारणीयानि ।

अत्र विनयाधानपुरःसरं ब्रह्मचारिषु शिक्षाक्रमः कथं सञ्चालनीय इति अग्रे प्रकाशयिष्यते ।

जटित्वमुण्डित्वविकल्पः

ननु नीतिसारकृता ब्रह्मचारिलिङ्गेषु तस्य जटित्वं मुण्डित्वं वा इति विकल्पेनाभिहितम् तस्य किं तात्पर्यमिति चेत् ? अभिधीयते । यः उपकुर्वाणकः, तेन मुण्डिना भाव्यम् केशधारणे दोषबाहुल्यात् । नैष्ठिकेन तु जटिनाऽपि भवितुं शक्यते, तस्य गृहस्थधर्मे प्रवेशाप्रसङ्गात् । न च क्षौरं हि अमङ्गलमित्युच्यते इति वाच्यम्; गौतमेन तस्य मङ्गलेषु प्राथम्येन निरूपणात् तदुक्तम्—'एष प्रथमोलङ्कारः ।' इति ।

किञ्च केशधारणेन दौर्बल्यं भवति, यतः केशाः मलानि सन्ति, मलस्य च संरक्षणे उष्णता संवर्धते । अतः दुष्टस्य मलस्य निर्हरणमवश्यं कर्तव्यमिति सिद्धम् भवति । तदुक्तम् कामसूत्रे-(१ अ०४ अध्याये–१०७ पृष्ठे)[1]

पित्तदाहऽश्रमरजो दोषं चैव विनाशयेत् ।—गुडुच्यादि वर्ग ७६—
मुञ्जद्वयं तु मधुरं तुवरं शिशिरं तथा ।
दाहतृष्णाविसर्पास्रमूत्रबस्त्यक्षिरोगजित् ।।
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते ।
मुञ्जस्तु मधुरः शीतः कफपित्तजदोषजित् ।
ग्रहरक्षासु दीक्षासु पावनो भूतनाशनः ।। (गुडूच्यादिवर्ग—७२)
कुशः—कुशो दर्भस्तथाबर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ।
दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ।।
मूत्रकृच्छ्राश्मरीतृष्णाबस्तिरुक्प्रदरास्रजित् ।
दर्भस्तु मधुरः शीतो गर्भस्थापनकारकः ।

१ चतुर्थकमायुष्यम् । पञ्चमकं दशमकम् वा प्रत्यायुष्यमित्यहीनम् ।
सातत्याच्च संवृतकक्षा स्वेदापनोदः ।।६।।—

जयमङ्गलाक्रोडपत्तम्

तस्मात् पुंस्त्वविनाशकरत्वात्, अमाङ्गल्याच्च उपकुर्वाणकेन केशधारणं गृहस्थेन वा कदापि न कर्तव्यमिति सिद्ध्यति। अयमेव न्यायः वानप्रस्थिनां कृतेऽपि बोद्धव्यः। स हि ऊर्ध्वरेतस्कत्वात् व्रतित्वाच्च केशधारणेऽपि न दुष्यति।

न च शास्त्रेषु "वृथा न विकचो भवेत्" इत्यादीनि वचनानि कृते क्षौरे कथं समन्वितानि भवेयुः, इतिवाच्यम्, येषा कुलपरम्परानुसारेण स्वल्पतरकेशधारणं अनुमतमस्ति, तत्परतया उक्तवचनानां व्याख्येयत्वात्। तदुक्तं शिखां इत्यादि(पृ०२८८)

गुरुभक्त्युपयोगः कलौ विशिष्टः

ननु आस्तां ब्रह्मचारिणां कृते गुरुभक्तिः। राजसु नेतृषु वा गुरुभक्तेः किम् महत्वम् तज्जन्यकार्यस्य अन्यैरपि क्रियायोगैः प्राप्तुं शक्यत्वात्? इति चेत्सत्यम्।

अन्यैरपि क्रियायोगैः आन्वीक्षिकीत्रयीवार्तादण्डनीतयः अभ्यूहितुं शक्यन्ते, परन्तु तत्र विलम्बेन फलप्राप्तिरस्ति। अतः आञ्जस्येन फलप्राप्तये योगसूत्रे पतञ्जलिना "तपःस्वाधायेश्वरप्रणिधानानि क्रियायोगः" इत्युक्तम्। अत्र 'तपः अनशनं स्वाध्यायात् देवताप्रसादः' इत्यादि व्याख्यातं तट्टीकायां नारायणतीर्थ-स्वामिभिः।अस्य क्रियायोगस्य फलं पूर्वोक्तलक्षणकः समाधिः क्लेशतनूकरणञ्चेति द्वे भवतः। एवंरीत्या सत्स्वपि एतेषु क्रियायोगेषु पुनः पतञ्जलिना स्वातन्त्र्येण ईशप्रणिधानमेव क्रियायोगः उक्तः—

'ईश्वरप्रणिधानाद्वा' इति। ईशप्रणिधानेन चिन्तनात्मकेन ज्ञानविज्ञानतत्व-युक्तत्रिनयादिगुणप्राप्तिः कथं भविष्यतीति सोपपत्तिकम् प्रागुपादितमस्ति। (पृ०२७६) पुनरत्र विस्तरभयान्नोच्यते। अत्र तु सङ्क्षेपेण एतावदेव अलं यत् अप्रकाशिता अपि अर्थाः ईशचिन्तनमात्रेण नासुलभा इति। यद्यपि ईशः न साधारणतया दृष्टिगोचरः,

---

टी० प्रत्यायुष्यमिति—यद्गुह्ये क्षुरणकर्म तत्पञ्चमेऽहनि। यत्तु लोम्नामुत्पाटनेन तद्दशमे स्यादित्याह—दशमकं वेति। तत्र लोम्नां चिरेणोद्गमनात्। तथा चोक्तम्—

"आयुष्यं तच्चतुर्थह्नि स्याद्यत्तु क्षुरकर्मणा॥
प्रत्यायुष्यं यदुद्धाराल्लोम्नां तद्दशमेऽहनि॥

भावप्रकाशे च। (१ भागेपूर्वखण्डे पृ० ९३)

ज्वरातुरः शिरः स्नातो नाक्ष्णोरञ्जनमाचरेत्।
पञ्चरात्रान्नखश्मश्रुकेशरोमाणि कर्तयेत्॥
केशश्मश्रुनखादीनां कर्तनम् संप्रसाधनम्।
पौष्टिकं धनमायुष्यं शौचकान्तिकरम् परम्।
केशपाशे प्रकुर्वीत प्रसाधन्यात् तु साधनम्।
केशप्रसाधनं केश्यं रजोजन्तुमलापहम्।

अतएव भागवते—'लावण्ये केशधारण'मिति कलिदोषनिरूपणावसरे प्रोक्तम्।

जयमङ्गलाक्रोडपत्रम्

अतो न चिन्तनयोग्यः, तथापि तदधिष्ठितं ज्ञानं येन गुरुशरीरेण चिन्तनद्वारा सम्प्राप्यते तत् ईशस्य प्रतीकमेवेति कृत्वा ईशप्रणिधानस्थाने ईशाधिष्ठितज्ञान—प्रभासम्पन्नगुर्वाराधनं प्रतिभाप्राप्तिहेतुगुरुप्रसादलाभाय सदा कर्तव्यमिति सुदामानं प्रति ईशनिर्दिष्टात् भागवतीयात् (पृ० ३०० पृ०) वाक्यात् ज्ञायते। अतः गुरुप्रणिधानं कलियुगे विशेषरूपेण गुरुभक्तिस्वरूपतया ईशभक्त्यपेक्षया आधिक्येन उक्तमस्ति।
तदाहुः— 'यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।
तस्यैतेऽकथिताह्यर्थाः प्रकाशन्ते महात्मनाम्॥ इति।

अतः अतिसारल्येन सम्भवितुम् शक्यत्वात् सदा शास्त्रप्रतिभाप्राप्तये गुरुभक्तिरूपा ईशभक्तिः विशेषतया उपयुज्यते। प्रपञ्चितञ्चैतत् उद्दालकधौम्यारुणिशिष्याणां कथायाम् महाभारते प्रसिद्धायाम्। ननु ईदृशी गुरुभक्तिः ब्रह्मचर्ये एव सम्भाव्यते, गृहस्थेन राज्ञा तु कर्तुम् न सा शक्यते ? इति चेन्न। तत्र तत्र राजनीतिसिद्धान्ते विनय एव ब्रह्मचर्यमिति तात्पर्यं ब्रह्मचर्यस्य बोध्यम्। समस्तदेशवासिना गृहस्थेन राज्ञा वा सर्वस्य मित्रेण यथावन्नीरक्षीरविवेककुशलेन न्यायप्रियेण ओजोबलशौर्योत्साहसम्पन्नेन अत्यर्थसत्वेन भवितव्यम् यदि, तर्हि समाधिकुशलेन तर्कप्रभासम्पन्नेनैव भाव्यम्! तद्धेतुत्वात् ब्रह्मचर्यं विनयात्मकं राज्ञा नेत्रा वा अवश्यम् पालनीयमिति स्थितेः सदा सर्वदा प्रतिभाप्राप्तये गुरुभक्तिः सर्वैः समादरणीया। तदिदं विनयावस्थापनं गृहस्थस्यापि राज्ञः ब्रह्मचर्यरूपमेवेति बोध्यम्। सोऽयं विनयः राज्ञा नेत्रा वा यद्युपेक्ष्यते तर्हि प्रजापरागस्य सम्भवात् स्वात्मनः देशस्य विनाशोपि सम्भवेदिति गुरुभक्तेर्महत्वं स्मर्तव्यम्।

गुरोः संसेव्यता

ननु कीदृशः गुरुः संसेव्यः ? इति चेत् प्रपञ्च्यते। वरीवस्यारहस्यादौ भावनोपनिषत्प्रामाण्येन गुरुत्वं "विवेकवृत्त्यवच्छिन्ना चित्" इति निर्णीतमस्ति। सा यत्र शरीरे प्रकटा भवति, तत् पूर्वोक्तायाः गुरुरूपायाः चितेः शरीरम् इत्यर्थः निर्गलितो भवति। यद्येवंविधः गुरुः न संसेव्यते, तर्हि विवेकवृत्तिः दुर्लभा स्यात्। इत्येतदभिप्रेत्य कामन्दकेन उक्तमस्ति -

'सुनिपुणमुपसेव्य सद्गुरुं शुचिरनुवृत्तिपरो विभूतये।
भवति हि विनयोपसंहितो नृपतिपदाय शमाय च क्षमः। इति।

अत्र सुनिपुणसत्पदाभ्यां वरिवस्यारहस्योक्तः गुरुपदार्थः स्फुटीभवति। तस्य चिन्तनेन मायाप्रयुक्तं यद् आन्ध्यं तन्नश्यति। मानमदौ च विनाशकरौ निर्गलतः। तदेतत् 'विनयोपसंहित' इत्यनेन ध्वनितम्। पण्डितस्य तदेव पाण्डित्यं यत् अचक्षुष्मतः सेवकस्य साकाङ्क्षस्य आन्ध्यनिरसनम्। तदुक्तम्—

'योऽन्धंकरोत्यक्षिमन्तं यश्च बालम् प्रबोधयेत्।
तमहं पण्डितं मन्ये इतरे नामधारकाः'॥ इति

जयमङ्गलाक्रोडपत्रम्

शास्त्रस्य गुरुत्वं ईशत्वं निर्दुष्टत्वञ्च

पुनस्त्र एवं विचार्यंते । यत् गुरुणाऽपि कुतः अबाधितम् निर्मलम् ज्ञानमनुभूतमिति ? तर्हि इदमेवोत्तरम् । यत् परम्परया सम्यक् करणीयवर्जनीयविधायकात् शास्त्रादिति । तस्मात् अनुस्युतायां गुरुपरम्परायां प्रथमो गुरुः शास्त्रात्मकः । तत्र दृष्टविधायकशास्त्रतः अद्य यावत् यथावत्तात्पर्यमवबुद्ध्य निर्णीतोऽर्थः सुप्रयुक्तः यो वर्तते तत्र न केनापि दोषशोधकेन भ्रान्तिविप्रलिप्साकरणापाटवान्यतमोऽन्यो वा दोषः, दाढर्येन निर्बाधितया समुट्टङ्कितः किमुतादृष्टशास्त्रेषु । इत्यादिमगुरोः शास्त्रस्य यज्ज्ञानम् तत् निर्दुष्टत्वात् ईशसमवेतज्ञानसमानाकारकत्वात् यथार्थत्वात् "सत्यं ज्ञान"मिति वाक्यात् समस्तपुराणादिसम्मतत्वात् मधुसूदनसरस्वतीप्रमृतिभिः निबन्धकर्तृभिः निर्णीतत्वाच्च ईश्वरस्वरूपमिति सिद्धम् । अतः सुनिपुणः गुरुः ईश्वररूपतया संसेव्यः इति निर्णये न कोऽपि दोषः पदमादधाति । अस्य शास्त्रसमवेतज्ञानस्य निर्दुष्टत्वं कथमिति न शङ्क्यम् । यत्र प्रमाणत्रयप्रमितत्वं भवति, तत्र निर्दुष्टत्वं भवत्येव इति व्याप्तेः निर्दुष्टत्वसम्भवात् । यस्य गुरुभक्तिर्नास्ति, तस्मै प्रमाणत्रयप्रमितोऽर्थः न रोचते । केवलं आन्तरीयसंस्कारो यमर्थमुद्दिश्य उद्बुद्ध्यति सएवाऽर्थो रोचते इति तु अन्यदेतत् ।

न च तथैवास्तामिति वाच्यम्, तद्बलात् क्वचित् भ्रान्तिस्थलेऽपि प्रवृत्तिदर्शनात् । अर्थस्य बाधितत्वात् श्रममात्र एव पर्यवसानाच्च । अतः शास्त्रविरोधी पन्थाः जन्मान्तरीयसंस्कारेणोद्बुद्धः सर्वदा फलाय भवेत् इति न मन्तव्यम् । शास्त्रं हि अस्मद्धितावहः पन्था इति पूर्णनिश्चयस्य, तज्जन्यसंस्कारवतः त उदाहरणम् भारतीयेतिहासेषु, मर्यादापुरुषोत्तमः श्री रामभद्रः इति दाढर्येन वक्तुम् शक्यते । तथाहि —भोजराजकृते चम्पूरामायणे अयोध्याकाण्डे—

भीतो भूभरतः किमम्ब भरतः किंवा वनात् पावनात् ।
त्रस्तोऽहं सगरान्ववायककुदस्तातः कुतः शोचति ॥
दिव्यायाः सरितो निवापकरणाल्लघ्वीं प्रतिज्ञामिमां ।
आवाभ्यामभिपूरयिष्यति न चेत्पुत्री कथं स्यादयम् ।' इत्यादि ।

एवंरीत्या निर्दुष्टज्ञानरूपं शास्त्रम् आदिमः गुरुः तत्संपत्तिः यच्छरीरान्तर्वतिकोशे वर्तते स कोषः विज्ञानमयः चिन्तनीयत्वेन उपनिषदि विहितः । यत्र श्रद्धा शिरस्थानीया वर्तते ऋतं सत्यंच दक्षिणोत्तरपक्षस्थानीये योगश्च आत्मा तस्य उपेक्षणं येन क्रियते, सः दुर्भगएवेति अवश्यं वक्तव्यतामापतति ।

विज्ञानमयकोशः

अत्रेदं तत्त्वम् बहु भद्रकं मे विलुप्येतेति मत्वा निर्दुष्टज्ञानात्मकस्य शास्त्रस्य विज्ञानमयकोषस्य अन्तस्तलम् प्रवेष्टुं यः न प्रयतते । केवलं आलस्येन तद्विषयकद्वेषेण वा करतलगतं मणिं अज्ञानादिव विनिक्षिपति । स विज्ञानस्य शास्त्रस्य

जयमङ्गलाक्रोडपत्रम्

द्वेष्टा अभिमानात्मके तमोगुणप्रधाने मनोमयकोषे अवस्थाय अन्धे तमसि आत्मनं वृथा निपातयति। पूर्वजन्मान्तरीयमिथ्याज्ञानवासनावशात् अन्नमयात्मकं दृश्यं शरीरं आत्मत्वेन जनो मानयति। सत्यप्येवं स एव यदा महति दुर्धरदुस्सह व्रणादिस्फोटसङ्कटे प्राणबाधायां उपस्थितायां तत्संरक्षणसंस्कारः जागर्ति। तदा अयं जीवः शरीरस्थितं आत्मत्वाभिमानं विगलय्य प्राणं आत्मत्वेनाभिमन्य तद्रक्षार्थं तदनुकूलतया अङ्गच्छेदं कर्तुमपि चेष्टते। अनेनैव न्यायेन यदा किल मानहानि-प्राणरक्षाप्रसङ्गौ उपस्थितौ भवतः, तदा सः प्राणसंरक्षणापेक्षयापि मानमेव आत्मत्वेनानुमनुते। प्राणांश्च तिरस्करोति। एतावत्पर्यन्तम् प्रत्यक्षेण अन्नादिकोशभेदो जीवेन सहजत अनुभूयते। उक्तकोशेष्ववस्थाने तमःसत्वे विवेचयितुं नशक्येते यतः विज्ञानमयकोषावस्थानाभावेन जाड्यमभिवर्धते। स्वातन्त्र्यं च दूरम् अपगतम् भवति, किं बहुना पारतन्त्र्यं दुरपनेयमापद्यते, इत्येवंदोषं मनोमयकोषे स्थितः जीवः यदि भायात्, तर्हि अयं मानमपि पृष्ठतः कृत्वा विज्ञानार्थं गुरुमाश्रयति। तदिदं मनोमयकोषस्थितस्य जीवस्य ततः उपर्यवस्थानम् दुर्घटं, सम्मोहे एव आनन्दस्य भानात्। मनोमयकोशे जीवस्य अवस्थानं विज्ञानमये च अनवस्थितिः इत्यस्य अयमेवार्थः यत् तथाविधस्य जीवस्य रसमात्रमयं जीवनमिति। अत्र च अयं महान् दोषः यत् विवेककौशलाभावेन यः अभिमानो वर्त्तते स तामसो भवति। तदानीं पूर्वदर्शितरीत्या (पृ० ३०४) शास्त्रं हि अस्मद्धितावहः पन्थाः इति पूर्णनिश्चयस्य तज्जन्यसंस्कारविलासस्य च अप्रसक्तिर्भवति गुरुभक्तेश्च अभावो भवति। तर्कस्य च अनुनुगमोऽपि। इमे महान्तो दोषाः आदिमस्य शास्त्रस्य तत्प्रतीकस्य गुरोर्वा असंसेवनेन सम्भवन्ति इति उक्तमेव। तेषां दोषाणां निरासाय भारतीयराजनीति-शास्त्रेण गुरुः संसेव्यः इति सिद्धान्तितम्। तद्द्वारा शिष्येणोपासकेन तर्क उपलब्धव्यो भवति। तस्य परिचयस्तु टिप्पणीनिर्दिष्टलक्षणया[1] विकोशया दृष्टया कर्तुं शक्यते। तस्मात् 'सुनिपुणमुपसेव्येति (३०४ पृ०) पूर्वनिर्दिष्टवाक्येन वरिवस्यारहस्य-प्रामाण्येन च विज्ञानमयकोषे स्थितः विवेकवृत्यवच्छिन्नचिदभिन्नः गुरुः संसेव्य इति स्थितम्।

गुरुदर्शनं गुरुसौलभ्यञ्च

ननु विवेकवृत्यवच्छिन्नचिद्रूपगुरुतत्वस्य प्रतीकं शरीरमेव यदा दुर्लभं भवति, तदा सः कथं संसेवनीयतामर्हति ? इति चेत्सत्यम्। अयमंशो द्विविधरीत्या यदि चिन्त्येत तर्हि सम्यक्तया हृदयङ्गमः स्यात्। तथाहि दौर्लभ्यस्य — द्विविधं स्वरूपं दृश्यते। तद्यथा—उपरिनिर्दिष्टस्य तथाविधस्य गुरोः दौर्लभ्याद् गुरुभक्तेः ह्रासः,

---

१—विकोशितोभयपुटा प्रोत्फुल्ला चानिमेषिणी।
अनवस्थिततारा च विकोशा दृष्टिरिष्यते॥ (भा०प्र०५अ०)

जयमङ्गलाक्रोडपत्रम्

अपरश्च उपासकस्य अनधिकारित्वात् गुरुभक्तिसङ्क्रमणायोग्यता चेति। अतः गुरोः सौलभ्यं गुरुभक्तिसङ्क्रमणयोग्यत्वम् च कथं भवेदिति विभज्य प्रस्तुत विषयः विचारणीयतां गतोऽस्ति। तत्र आदिमं विषयमधिकृत्य उच्यते। गुरोः अभावो नास्ति। अपि तु अपेक्षितगुणवत्त्वेन तद्दर्शनमावश्यकम्। परम् दोषैराच्छन्नत्वात्भस्मान्तःस्थितः अग्निरिव गुरुरपि अदृश्यतां गतः। यदा हि शास्त्रनिष्णाताः अधीतविद्याःअपि परस्परम् शङ्कन्ते, शास्त्रेषु च अविश्वासमुत्पाद्य तत्र सन्देहमुपस्थापयन्ति, ज्ञानप्रभाजनितामानन्दप्रभामनुद्भाव्य जनतायाः पुरतः आत्मनः मुखमालिन्यम् प्रकाशयन्ति, विपरीतमुपदिशन्ति पुत्रान्, शास्त्रविपरीतं स्वतः अनुतिष्ठन्ति च, तदानीं तेषु विद्वत्सु शास्त्रप्रसूतप्रमाणत्रयप्रमितार्थज्ञानरूपगुण एतैर्दोषैराच्छाद्यते, इति गुणविशिष्टगुरुदर्शनं दुर्लभं भवति। अतः विद्वद्भिः आत्मनि उपयुक्तः विद्यागुणः तथा प्रकाशनीयः, विद्यानां तदनुरूपं प्रकाशनं सम्माननं च तथा कर्तव्यं, येन समाजस्य चेतः सहजत एव समाकृष्टं भवेत्। इदं तु निर्विवादं यत् अधुनापि आदिमं गुरुस्थानीयं शास्त्रतत्वमस्त्येव। केवलं तत्र बहिःस्थितैः व्यवहारविद्भिः स्वमतसंस्थापनाय एषु शास्त्रेषु नानाविधाः शङ्काः उत्थाप्यन्ते। समाधानस्य कर्तुमशक्यत्वे शास्त्रवित्स्वपि ताः शङ्काः सूक्ष्मरूपेण जाग्रति। अतः विद्वद्भिः शङ्कानिरासाय स्वस्वविद्यानां तार्किकनियमपद्धत्या चिन्तनं यावन्न क्रियते। तावदेव गुरुदर्शनं दुर्लभं भवति। किञ्च तथाविधा अपि बहवो विद्वांसो वर्तन्ते, येषु आन्वीक्षिकीसाचिव्यानां विद्यानां तेजः विद्वन्निष्ठं सदपि अभिभूतमिव भवति। अतः वास्तविकविवेकवृत्त्यवच्छिन्नगुरुतत्वप्रकाशनार्थं पण्डितसङ्गतिः परीक्षास्थापना च उपायत्वेन निर्दिष्टे वर्तेते। अन्यथा वास्तविकगुरुतत्वदर्शनाभावे कीदृशी दुरवस्था भवतीति धर्मविजयनाटके द्रष्टव्यम्। सांप्रतं पण्डितसङ्गतिपरीक्षयोः विलोपात् गुरुदर्शनं दुर्लभतां गतमस्ति। यच्च शास्त्ररूपं वास्तविकं वर्तते तदपि उपर्युक्तकारणादेव कार्यकारि न भवति इति प्रमाणत्रयसमन्वयेन विद्यातत्वं सम्यगालोच्य स्थिरतया राजनीतिं च समीक्ष्य याः विद्याः वर्तन्ते, तासां प्रकाशनं गुरुभिः कर्तव्यमिति स्थितम्।

यद्यपि शास्त्र रूपस्य एवंभूतस्य गुरुतत्वस्य प्रकाशने अनेकविधाः सामाजिकनैतिक-स्थितयः प्रतिबन्धिकाः सन्ति, तथापि प्रमाणत्रयसमन्वितं सर्वमपि शास्त्रीयं विधानं सर्वेषां पुरतः आत्मनः हितसाधनत्व स्फुटीकरणानुसारितया यदि प्रकाश्येत तर्हि तस्य शास्त्रस्य गुरुरूपतया प्रकाशने न कस्यापि विरोधः तेनैव च धर्मोऽपि सर्वेषां प्रीतिभाग् भवति। अत एव यदा नीतिमनुसन्दधानः विनयभावमुपगतः धर्मः अव्यभिचरितमर्थं यथा-यथा प्रापयितुं समर्थो भवति, तथा तथा सः लोके आनन्दमुखः

जयमङ्गलाक्रोडपत्रम्

सन् शोभनीयो भवति ।[1]

अत्र इदमपि अनुसन्धेयम् रागादि पक्षपातपुरः सरं शास्त्ररूपगुरुतत्वप्रकाशनं रोधयितुं केचन बहुमतप्राप्तिरूपं शस्त्रमायत्तीकुर्वन्ति, आस्वादयन्ति च आत्मनः मनोरथमपि । परन्तु यत्प्रमाणत्रयप्रमितम् शास्त्ररूपमाबाधिततत्वं, तत् तथैव स्थास्यति । तद्विरुद्धां स्थितिमभिमन्वानाः अर्थतृष्णयाभिवृद्धया कोपकन्यामसूयां दावाग्निमिव प्रज्वाल्य आत्मनोऽपि अपरेण सह विनाशं निमनत्रयन्ति । तदेतत् धर्मविजयनाटके स्फुटीकृतम् । एवं रीत्या शास्त्ररूपस्य गुरुतत्त्वस्य सर्वथा अभावासत्वेपि तस्य दौर्लभ्यपरिहारः कथं सम्भविष्यतीति चिन्तितम् ।

मनसामाकृष्टिः

अथ उक्तरीत्या प्रकाशितेन गुरुतत्वेन लोकस्य मनसः समाकर्षणं कथं भवतीति साहित्यप्रक्रिययोच्यते । यस्य याः आकाङ्क्षाः भवन्ति, तासां पूर्तिः येन कर्तुं शक्यते; तत्र तस्य आकर्षणं स्वभावतः सम्भवति । इत्येवंविधानां भेदः समाजे कामुकादिभेदेन अष्टविधः दृश्यते[2] भावप्रकाशने ।

कामुकादि भेदेन तत्तद्वर्गस्यकीदृश्य आकांक्षाः सम्भवन्ति, इति प्रश्नस्या समाधानं नाट्यस्वरूपनिरूपकेण शास्त्ररूपगुरुतत्वेन तत्रैव समाहितम् अस्ति तुष्यन्तीत्यादिना ।[3]

अर्थात् तरुणाः कामे, विदग्धाः समयाश्रिते, श्रेष्ठिनः अर्थपराः अर्थे, विरागिणः मोक्षे, शूराः नियुद्धादौ, वृद्धाः धर्माख्यानपुराणेषु, रसिकाः रसभावयोः, बालादयो नेपथ्यहास्ययोः रमन्ते । इति स्थितम् । तरुणादीनां तत्र तत्र पूर्वोक्तभेदेन कुतः प्रीतिः इति तु न शङ्क्यम् । तेषां शृङ्गाराद्यन्यतमरसपराधीनत्वात् । रसाश्च शृङ्गारहास्यवीररौद्रबीभत्साद्भुतकरुणभयानकशान्तभेदैर्विभिन्ना भवन्ति । तेषु वीरशृङ्गारशान्तरौद्ररसान् विहाय अवशिष्टाऽअन्ये रसाः येषु भवन्ति, ते शास्त्ररूपगुरुत्वेन हितसाधनत्वं प्रकाश्य आवर्जनीया भवन्ति ।

---

१ तदुक्तम्—

मुहुर्मुहुः काममुखं निरीक्षन् भजन्नथार्थस्य विधेयभावम् ।
मोक्षेण पृष्ठेऽनुगतः कथञ्चित् धृतावलम्बः परमूर्ध्वगत्या ॥
इति (ध० वि० नाटके०)

२ कामुकैश्च विदग्धैश्च श्रेष्ठिभिश्च विरागिभिः ।
शूरैर्ज्ञानवयोवृद्धैः रसभावविवेचकैः ।
बालमूर्खाबलाभिश्च सेव्यं तन्नाट्यमुच्यते (इति भा० प्र०)

३ 'तुष्यन्ति तरुणाः कामे विदग्धाः समयाश्रिते ।
शूरा बीभत्सरौद्रेषु नियुद्धेष्वाहवेषु च ॥
अर्थेष्वर्थपराश्चैव मोक्षेत्वथ विरागिणः ॥
धर्माख्यानपुराणेषु वृद्धास्तुष्यन्ति नित्यशः ।
सत्वभावेषु सर्वेषु बुधास्तुष्यन्ति सर्वदा ॥
बाला मूर्खाःस्त्रियश्चैव हास्यनेपथ्ययोः सदा । (भा०प्र० इति)

जयमङ्गलाक्रोडपत्रम्

तन्नान्तरीयकतया अद्भुतरसस्य आविर्भावः परामर्शादिरिव व्यापारस्थाने बोध्यः, हास्यबीभत्साद्भुतकरुणभयानकरसपराधीनः समाजः शृङ्गारवीरशान्तरौद्र-रसेषु अन्यतमेन संसक्तजनापेक्षया अधिकसङ्ख्यान्तिका एव भवति, नेतृसङ्ख्यापेक्षया नेयवर्गस्य बहुत्वस्वाभाव्यात्। अतस्तेष्वेव भक्तिः सङ्क्रामणीया वर्तते। तदर्थं च बीभत्सभयानकादिरसेषु तत्र तत्र कश्चन ईदृशः व्यभिचारिभावो वर्तते, यस्यालम्बने सति भक्तिः शास्त्रेण गुरुणा प्रापयितुं शक्यते। यथा करुणे तर्कः, भयानके मदः बीभत्से मतिः। तस्मात् शास्त्रेण स्वविषये भक्तिसम्वर्धनार्थं करुणस्य पुरतः तर्कः, भयानकस्य मदः, बीभत्सस्य च मतिरुत्पादनीया। तथा सति तत्तन्नेयवर्गेषु शास्त्रस्य गुरुतत्वस्य विभिन्नविभिन्न व्यभिचारिभावानां समुद्बोधाय विद्वद्भिः विभिन्नं नाट्यं कर्तव्यं स्यात्। तत्र च महान्प्रयासो भवेदिति विचार्य सर्वसाधारण-स्य पुरतः अद्भुतः यथा प्रकाशितो भवेत् तथाविधं नाट्यं शास्त्ररूपगुरुतत्वेन समुल्लासनीयम्। एवं सति अद्भुतरसान्तर्गतस्य तर्कस्य मदस्य मतेः च साहाय्येन तेषु तेषु करुणभयबीभत्सरसेषु अभिरुचिः शास्त्रम् प्रति उपर्युक्तरीत्या समुत्पादयितुं शक्या स्यात्। तस्याञ्च जातायां तेषां मनसः ध्यानात्मकमाकर्षणं सम्भवेत्। अत्राग्र्यं निष्कर्षः। यदि गुरुभक्तिः सञ्चारणीया, तर्हि विवेकवृत्त्य-वच्छिन्नचित्प्रतीकेन शास्त्रशरीरेण गुरुणा स्वस्मिन् अद्भुतरसस्य आविर्भावो यथा भवेत् तथा यतनीयम्। पूर्वोक्तरीत्या गुरुतत्वस्य सौलभ्यार्थं यः सत्वगुणसम्पन्नः उत्साही शास्त्रगुरुः भवेत् सः स्वचरित्रेण समाजस्य हृदये विस्मयमुत्पाद्य तेषां मनः आकृष्य स्वप्रतिपादिते कर्मणि समाजं प्रेरयेत् आत्मनः चरित्रमनुकारयेच्च। तदेतत् अद्भुतरसस्य विभावानुभावसामग्रीप्रदर्शनपरे भावप्रकाशने स्फुटीकृतमस्ति।[1]

---

१ तद्यथा भा० प्रकाशने ३ अधिकारे—

'कर्मणोऽतिशयान्नृणामीप्सितार्थोपसङ्गमात्।
मनोरथफलप्राप्तेर्दिव्यभावावलोकनैः॥
विमानोद्यानभवनसभारामावलोकनैः।
विरुद्धानां पदार्थानामविरुद्धसमागमैः॥
असम्भाव्यस्य चार्थस्य सम्भवोत्पत्तिदर्शनैः।
अदेशकालसम्पत्तेरभीष्टादेरचिन्तितम्॥
इत्यादिभिर्विभावैस्तैरद्भुताख्यो रसो भवेत्।
ध्यानं नयनविस्तारः प्रसादो वदने दृशि।
आनन्दाश्रु सरोमाञ्चमनिमेषावलोकनम्॥
अनिश्चलत्वं मनसो यस्मात् तन्मानसोऽद्भुतः।—

जयमङ्गलाक्रोडपत्रम्

अतो वीरेण अद्भुतरसप्रकाशनवता शास्त्रगुरुणा सम्भाव्यं इति उक्तम्। तस्य सङ्क्षेपेण न्यायवैशेषिकमताभ्यां युक्तयुञ्जानभेदः स्फुटीकृतः। तत्र वीरः युक्तयोगी अद्भुतो युञ्जानो भवति! यद्यपि भाष्यादौ युञ्जानस्य नाम नाऽस्ति तथापि तत्र युक्तः वियुक्तः इतिसंज्ञया योगी व्यवच्छिद्यते।

यद्यपि च मीमांसकमतेन योगिनामस्तित्वं नास्ति तथापि वेदे युञ्जानस्य निर्देशात्[1] सर्वथा तत्र अप्रामाणिकत्वं नाशङ्कनीयम्।

किञ्च यथा "वेदान्ते वज्रहस्तः पुरन्दरः" इति वचनात् देवतानामस्तित्वं तद् विग्रहश्च साधितः देवताधिकरणे, तथा प्रकृतेऽपि युञ्जानस्य अस्तित्वविषये बोध्यम्। अयं यः युक्तयुञ्जानयोः अन्तर्भावः वीराद्भुतरसयोः कृतः तत्र कारणं युक्तस्य चिन्ताया अभावत्वं अपरस्य चिन्ता च। तदुक्तम्—

"युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः"। इति। (न्या० मु) अद्भुतवीर रसयोः वीरे सत्वस्य अत्युत्कर्षेण अनूचानत्वात् "यत्किञ्चन अनूचानः अभ्यूहति आर्षं तद्भवती"ति वचनात् सर्वदा भानमस्ति, तत्र नाऽस्ति चिन्ता। 'अतः वीरस्य सर्वज्ञता। अद्तरसस्य तु चिन्तायाः सहकारित्वात् वीररसस्यापेक्षया किञ्चित् वैलक्षण्यं बोध्यम्। पुनः जिज्ञासासुस्मूर्षाभेदेन अद्भुतरसस्य वैचित्र्यादि आकरे निरूपित-

---

चेलाङ्गुलीनां भ्रमणमुत्थायोत्थाय बल्गनम्।
दानप्रबन्धो नटनमाश्लेषश्च परस्परम्।
परस्परस्य भुजयोः परस्परतलाहतिः॥
एवमादिविकारो यः स भवेदाङ्गिकोऽद्भुतः।
हाहाकारः साधुवादः कपोलास्फलनध्वनिः॥
उच्चैर्हासो दर्पघोषौ गीतमुच्चावचं वचः।
एवमादिर्विकारो य. स भवेद् वाचिकोऽद्भुतः॥ इति।

१ तदक्तुं काण्वसम्हितायां द्वादशाध्याये—

युञ्जानः प्रथमं मनस्तत्वाय सविता धियः।
अग्नेज्योतिर्निचाय्य पृथिव्या अध्याभरत।
युक्तेन मनसा वयं देवा न प्रतिरन्तु जीवसे

सत्याषाढ़श्रौतसूत्रे—जुहूं स्रुवं च संमृज्य चतुर्गृहीतमाज्यमष्टगृहीतं वा गृहीत्वा युञ्जानः प्रथमं मन इति। युञ्जान इति। सविता प्रेरकः परमेश्वरः। प्रथममग्निचयनविषये मनो युञ्जानः समादधानो धिया इष्ट्यादिविषयाणि ज्ञानानि तत्वायत्तानि वा विस्तार्याग्नि ज्योतिर्निचाय्य इत्यादि।

देवान् क्रीडापरत्वेन चपलानिन्द्रियविशेषान् मनसा युक्त्या च विषयेभ्यो नियम्य इति।

मस्ति। तत् अप्रस्तुतत्वान्न विमृश्यते। एतावता ग्रन्थेन इदं तु निर्णीतमेव यावत्पर्यन्तं शास्त्ररूपः गुरुः वीराद्भुतरसौ न प्रकाशयति तावत्पर्यन्तं नेयस्थानीयस्य बहुजनसमाजस्य भयानकादिबीभत्सान्तप्रकृतेः मनः आत्मानं प्रति आकृष्टं न भवति अतो नायं विषय उपेक्ष्यः इति।

ननु भयानकबीभत्सादिरसप्रधानता नेयहृदयेषु कथं भवतीति चेत्। जन्मत एव विना कस्यचित् प्रेरणया केचित् सुखं वाञ्छन्ति, केचित् उत्सहन्ते, केचित् जुगुप्सन्ते, केचित् क्रुद्ध्यन्ति इत्यादि दर्शनात् तत्तत्प्रकृतिप्राधान्यस्य सर्वेषां जन्मतः दर्शनात्, भयानकादिरसप्रधानतयाः जन्मसिद्धत्वम्।

केचित् तु अद्भुतरसं द्वारीकृत्य लोके प्रयतमानाः न शास्त्रमपेक्षन्ते। तन्न मनोरमम्। शास्त्रेण हि यदुचितं वस्तु अबाधितं तदेव निरूप्यते। अतः शास्त्रनिर्दिष्टप्रयोगमनुपेक्ष्य यदि अद्भुतरसः सञ्चार्यते गुरुभिः, तर्हि तत्र तन्निर्माणसामग्र्यां आन्तं कुत्रापि अनौचित्यं स्वप्नेऽपि न सम्भवदुक्तिकम्। शास्त्रस्य उल्लङ्घने तु अद्भुतरससामग्र्यां स्वकीयबुद्धिदौर्बल्येन कार्यसाधननिर्णयाभासस्यापि प्रसक्तत्वात् अनौचित्यसम्भवात् रसहानिः स्यात्। अतः शास्त्रप्रतिपादकैः गुरुभिः लोकेषु अद्भुतसञ्चारणाय निश्चितरसफलसाधनताबोधकं शास्त्रमालम्बनीयम्।[१] इत्येकं अद्भुतरससंचारणं शास्त्रश्रयणस्य फलम। द्वितीयं च फलं शास्त्रश्रयणस्य आस्तिकमतरीत्या इदमपि वक्तुं शक्यते यत् शास्त्रपारतन्त्र्येण पुण्यमधिकमस्ति। अतः पुण्यौचित्ययोर्लाभाय शास्त्रसहकारिता सङ्ग्राह्या।

शास्त्रचिन्तनम्

ननु अनन्तस्य शास्त्रस्य चिन्तनं सर्वैः दुरूहम्[१], एवं स्थिते गुरुभिः सर्वशास्त्रम् समालोच्य अद्भुतरससञ्चारणं कथं कर्तुं शक्येत इति? चेदुच्यते। अद्भुतरसनिर्माणं हि वीरकर्म इति प्रागुक्तमस्ति तत्रैव सत्यशौर्यत्यागाविस्मयाविसंवादित्वासंमोहदीनामद्भुतरसविभावानां साधितत्वात्। वीररसस्य च कीदृशं स्वरूपं सुन्दरमस्तीति "यत्किञ्चनानूचानः अभ्यूहती"तिप्राङ्निरूपितमस्ति (२१० पृ०)। अतः वीररससम्पन्नः यत् किञ्चिदभ्यूह्य प्रयोगविधिं निर्णयेत्। सः प्रयोगः शास्त्रसम्मत एव भवति। न हि तत्र अनौचित्यस्य सम्भवः। अतएव स्वकीयस्य अनूचानत्वं

---

१ ब्रह्मसिद्धान्तः —

छन्दः शास्त्रं तस्य पादौ कल्पः पाणी मुखन्तथा।
शब्दशास्त्रं श्रोत्रयुग्मं निरुक्तं घ्राणमेव च॥
शिक्षा शास्त्रं ज्यौतिषं तु नयनं पृष्ठमेव च
एतैरङ्गैरसावङ्गी राजते वेदविग्रहः।
प्रधानमङ्गमेवेदमङ्गेष्वेषु षट्सु च॥

जयमङ्गलाक्रोडपत्रम्

प्रदर्शितम् उदयनाचार्यैः ।[१]

गुरुभक्तैः शास्त्रचिन्तकैः सत्वमाश्रित्य यदि स्थीयते तर्हि उपर्युक्तं सर्वमपि वीररसस्य अद्भुतरसनिर्मापकं कर्म लोके चरित्रमिति व्यपदिश्यते । तदेव त्यागित्वं सत्यवत्वं शूरत्वमिति । तस्य किमलभ्यम् ? ये शूरा इत्यादिनोक्तत्वात् ।[२]

एतच्चारित्र्यवान् वीरः लोकस्यैव विस्मयसम्पादक इति न मन्तव्यम् । भगवानपि तं दृष्टवा विस्मितः सन् आत्मत्वेन मनुते । अतोऽयं चतुर्षु भक्तेषु चतुर्थः भक्तः इत्युक्तं आर्त इत्यादिना[३] ।

युक्तञ्चैतत्, उत्कृष्टविद्यावति उपर्युक्तलक्षणके धर्मविजयनाटकोक्तदिशा परीक्षिते मान्यत्वस्य मनुना निरूपणात्[४] ।

यद्यप्यत्र सामान्यतया विद्यायाः वित्ताद्यपेक्षया मान्यत्वमुक्तं, तथापि विद्यावत्वमाभासीकृत्य ये कूटपौराणिकाः कूटज्योतिषिणः कूटधर्मशास्त्रिणः कूटकर्मकाण्डिनः लोकस्थितिं धर्मञ्च रोधयन्ति तथाविधानां वञ्चकत्वात् मान्यत्वं तेषु न स्वीकरणीयम्, लोकापराधहेतुत्वात् । तदुक्तं रामायणे द्रष्टव्यम्[५] । तथा भारविणाऽपि[६] ।

अतः विद्यावत्सु गुणवत्सु सत्स्वेव वित्तापेक्षया मान्यत्वं मन्वभिप्रेतं बोध्यम् । विद्यासु मान्यत्वस्य मनूक्तत्वेऽपि व्यवहारे तथात्वं न दृश्यते । बहुलैः मूर्खैः विद्यावतां अपमाननात् । तथापि यदा केचित् विद्वांसः कञ्चन विद्वांस सम्मन्यन्ते, तदा मूर्खैरपि सम्माननीयत्वेन सः दृश्यते । तच्च—भागवते १ स्क० शुकागमनप्रस्तावे

---

१ वयमिह पदविद्यां तर्कमान्वीक्षिकीं वा ।
यदि पथि विपथे वा वर्तयामः स पन्थाः ।
उदयति दिशि यस्यां भानुमान् सैव पूर्वा ।
नहि तरणिरुदीते दिक्पराधीनचेताः ।

यथा वा—सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः । इति शा० ना०

२ ये शूरा ये च विद्वांसः ये च सेवाविपश्चितः ।
तेषामेव विकासिन्यः भोग्या नृपतिसम्पदः । इति ।

३ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।
तेषां ज्ञानी नित्ययुक्तः स मे युक्ततमो मतः ।

४ वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् । (म० स्मृ० सर्ग २)

५ 'लखि सुवेष जगवञ्चक जेऊ, कालनेमि जिमि रावण राऊ' ।

६ निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥

जयमङ्गलाक्रोडपत्रम्

द्रष्टव्यम्[1]। अतएव वेदस्य धर्मस्य च प्रामाण्यं महाजनपरिग्रहेण साधितं उपपन्नं भवति।

योहि महाजनपरिगृहीतो भवति, सः इतरेषामपि मान्यो भवति इति न्यायाभाष्यादिषु निरूपणादपीदमेव सिद्धं भवति।[2]

(न्या० मञ्जरी) के महाजनाः इत्यपि तत्रैव साधितम् ज्ञेयम्।[3]

एवं च विवेकवृत्त्यवच्छिन्नगुरुतत्त्वस्य शास्त्ररूपस्य क्वचित् तत्प्रतीकस्य शरीरस्य वर्तमानसमयेऽपि असौलभ्यमिति नास्ति स्थितिः। अद्भुतरसव्यापारेण गुरुभिः वीररससम्पन्नैः लोकेषु गुरुभक्तिसङ्क्रामणं कर्तव्यम् इति सोपपत्तिकं स्थितम्।

विद्वदसौलभ्यसौलभ्ये

अथ ईदृशस्य गुरुतत्वस्य परम्परायां तदसौलभ्यं कुतोऽभूत् इत्ययं प्रश्नः विचार्यते। अस्य असौलभ्यस्य कारणं द्विविधमस्ति। एकं वृत्तिव्यवस्थाविलोपः द्वितीयं विदुषां विद्यावन्तं प्रति असम्मानश्च तथाहि—पूर्वं हि राजभिः विद्यावत्सु वृत्यर्थं वंशपरम्परायां वर्षाशनव्यवस्था सञ्चारिता इति मानसरामायणे स्पष्टं निरूपितमस्ति। तद्यथा (अयो० काण्ड ८० दोहा)

कहि प्रियवचन सकल समुझाए।
विप्रवृन्द रघुवीर बोलाए।
गुरु सन कहि बरषासन दीन्हे।
आदरदान विनय बस कीन्हे॥

---

१ प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम्॥२८॥
ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भकाः महासने सोपविवेश पूजितः॥२२॥

२ (२अ० १ आ० ६८ सू० ८ प्र० शब्द विशेषपरीक्षा)
"एककर्तृकत्वेनेति। मन्त्रायुर्वेदवाक्यानि सर्वज्ञकर्तृकाणि
महाजनपरिग्रहे सति अलौकिकार्थप्रतिपादकत्वात्।

३ (न्या० मं० अ० ४ पृ० २६५ आगमानां प्रामाण्यव्यवस्या।)
"महाजनप्रसिद्धयनुग्रहे हि सति सुवचमाप्तोक्तत्वं भवति नान्यथा। महाजनश्च वेदानां वेदार्थानुगामिनां च पुराणधर्मशास्त्राणां वेदाविरोधिनां च केषांचिदागमानां प्रामाण्यमनुमन्यते, न वेदविरुद्धानां बौद्धाद्यागमानाम् इति। 'चातुर्वर्ण्यं चातुराश्रम्यं च यदेतदार्षदेशप्रसिद्धं स महाजन उच्यते।

"महाजनप्रसिद्ध्यैव वेदप्रामाण्यनिश्चयात्।
किमर्थः कण्ठशोषोऽयमियानार्येण संश्रितः।

वेदप्रामाण्यसिद्धयर्थं हि इदं शास्त्रमारब्धमिति गीयते वेदप्रामाण्यस्य च महाजनसिद्ध्यैव सिद्धत्वात् किं शास्त्रेण। इति।

जयमङ्गलाक्रोडपत्रम्

तथा अर्थशास्त्रेपि—"ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यः ब्रह्मदेयान्यदण्डकराण्याभिरूपदायादकादीनि प्रयच्छेदि"ति। अनेन हि कौटिल्यवाक्येन इदमपि ज्ञायते यावत्पर्यन्तं तद्वंशे पूर्वपरम्पराप्राप्ता विद्या अधितिष्ठति, तावत्पर्यन्तं तत्र वर्षाशनवृत्तिरपि नियता। यदा हि विद्यावत्वं विलुप्येत. तदा वृत्तिरपि विलुप्येत। यत्र च तद्विद्यावत्वं दृश्यते, तेषु इतरवंशाधिष्ठिततद्विद्यानिमित्तकवृतिसमर्पणं कर्तव्यमिति। यत्र वंशपरम्परायां वर्षाशनवृत्तिः नियता आसीत् स वंशो धनसम्बन्धेन वृत्तिच्छेदात्मकभयरहितेन विद्याभ्युदयं प्रति प्रमादी अभूत्। यत्र च विद्यावत्वं समुदितम् आसीत्, तत्र वंशपरम्परायां वर्षाशनव्यवस्थाया अव्यवस्थितत्वमभूत्। अतोऽपि हेतोः वृत्तिविलोपेन विद्याह्रासः समभूत्। यदि विद्यावृद्धिः वंशपरम्परायां काम्यते, तर्हि उपर्युक्तरीत्या वृत्तिच्छेदरूपदण्डभययुक्ता वर्षाशनव्यवस्था अपेक्षिता कर्तव्यत्वेन। तेन विद्यावत्वस्य सौलभ्यं भवति। सोऽयं प्राचीनेतिहासः श्री० ५ काशिराजैः माघशुक्लपञ्चम्यां (२०२४ विक्रम वत्सरे) सामवेदान्तर्गतैकशाखायाः पुस्तकमनेपक्ष्य कण्ठतः पारयणकर्त्रे श्रीकृष्णमूर्तिश्रौतिमहोदयाय त्रिपुरुषसंमितां वृत्ति समर्प्य प्रवर्तितः।

किञ्च-वंशे विद्यावत्ववृद्ध्यर्थं राजसम्माननमुपायत्वेन निर्दिश्यते। परमेतेन सह इदमपि स्मर्तव्यमेव, यत् 'ब्राह्मणानां ज्ञानतो ज्यैष्ठ्यं'—इति वचनात् विद्वद्भिः असूयामात्सर्यादीन् दोषानपहाय विद्वांसः सन्माननीयाः, तद्द्वारैव राजद्वारा सन्माननसम्भावनाकल्पनस्य उचितावहत्वात्। "मूर्खव्यसनिनायकः" इति भारतीयराजनीतिशास्त्रोक्तरीत्या राजद्वारा अविदुषामपि राष्ट्रस्य स्वलक्षणलक्ष्यत्वस्य याथार्थ्यार्थं सम्माननीयत्वस्य सम्भावितत्वेन विद्वन्मान्यत्वमपेक्ष्यते। तदेवोक्तं समर्थं रामदासस्वामिभिः। 'ब्राह्मण बुद्धिपासूनि चेविले गुरुत्व साण्डुनि गेले।' इत्यादि। अत्रेदं स्मर्तव्यम्-ब्राह्मणेन हि राजसम्माननं भविष्यति' इतिबुद्ध्या ब्राह्मणत्वं न संरक्षणीयं, किन्तु स्वकर्तव्यत्वबुद्ध्या। तदुक्त - ब्राह्मणत्वस्य रक्षणेन रक्षितः स्यात् वैदिको धर्मः इति (शां०भा०भू०) तथा "गुरुतायाः किं मूलं यतेतदप्रार्थनं नाम" इति। अतः विवेकवृत्यवच्छिन्नस्य गुरुतत्त्वस्य असौलभ्ये विदुषां वास्तविकं विद्यावन्तं प्रतिउपेक्षणं, राजद्वारा सञ्चाल्यमानवृत्तिव्यवस्थाविलोपनं च कारणं मन्तव्यम्।

ब्रह्मचारिप्राप्तिः

ननु वंशपरम्परायां विद्यारूपगुणसमृद्धये उपाये प्रदर्शितेऽपि यावत्पर्यन्तं पुत्रस्थानीयेषु शिष्येषु गुरोर्विद्या न सङ्क्रमति, तावत्पर्यन्तम् लोकविश्वास्यत्वम् गुरुषु न सम्भवेत्।

तदुक्तम्—

आत्मानं प्रथमं राजा विनयेनोपपादयेत्।
ततोऽमात्यान् ततो भृत्यान् ततः पुत्रान् ततः प्रजाः।' इति

वानप्रस्थस्य—ब्रह्मचर्यं भूमौ शय्या जटाऽजिनधारणं अग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः ।

जयमङ्गलाक्रोडपत्रम्

वर्तमान समये शिष्याणामपि असौलभ्यं विद्यते । अतः ते कथं प्राप्तव्या भविष्यन्ति ? इति चेदभिधीयते । दृष्टादृष्टोपायद्वारा ब्रह्मचारिणामुपलब्धिः गुरुभिः कर्तव्या । तत्र अद्भुतरससञ्चारणेन विद्वद्भिः लोकेषु आत्मानं प्रति अनुरागः उत्पादनीय इति प्रागभिहितम् । (पृ०३०९) तेन यथा लोके मातृपित्रादिः शास्त्राणि प्रति प्रीति भाग् भवति, तर्हि सः आत्मनः पुत्रान् शास्त्रमध्येतुं प्रेरयिष्यत्येव । शिष्या अपि तेषामधिकारानुरूपं काव्यनाटकादिरसमहिम्ना शास्त्राणि प्रति रुचिम् प्राप्नुयुः । तदनुसारेण शिक्षाक्रमः विद्वद्भिः प्रोत्साहनीयः । किञ्च तत्र अर्थकामसुखमपि यथा सम्भवितुमर्हेत् तथा बोधनीयम् । स च शिक्षाक्रमः अग्रे अभिधास्यते । एवं दृष्टोपायेन सह प्रतिबन्धकदुरदृष्टनिवारणार्थमदृष्टोत्पादकं कर्म श्रौतं अनुष्ठेयम् । तच्च कर्म उपनिषदि उपलभ्यते । तद्यथा—

"आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः ।
वासाँसि मम गावश्च अन्नपानेन च सर्वदा ।
ततो मे श्रियमावह" इति ।

एतन्मन्त्रजपेन श्रीप्रसादो भवतीति ज्ञायते । तथैव अदृष्टद्वारा ब्रह्मचारिप्राप्त्यर्थं अधोनिर्दिष्टाः मन्त्राः तत्रैव उपलभ्यन्ते । तेऽपि जपितव्याः । तद्यथा—

"आमायन्तु ब्रह्मचारिणः स्वाहा । प्रमायन्तु ब्रह्मचारिणः स्वाहा । विमायन्तु ब्रह्मचारिणः स्वाहा । यथापः प्रवतायन्ति यथामासा अहर्जरं । एवं मां ब्रह्मचारिणः" । इति ।

अस्यायंभावः-- यथा आपः मासः वा विस्तारं यान्ति तथा ब्रह्मचारिणोऽपि विस्तारं यान्तु इति । एवञ्च ब्रह्मचार्युपलब्धये तदाकाङ्क्षिभिः गुरुभिः पूर्वोक्तदृष्टव्यापारेण गुरुभक्तिपूर्वकेण विनयेन सह "आमायन्तु" इत्यादिमन्त्राः जपितव्याः, तेन सर्वसंसिद्धिः । सोऽयंऽनिर्गलितोऽर्थः भगवत्पूज्यपादैः शङ्कराचार्यैर्निरूपितो भङ्ग्यन्तरेण ।

वित्तं त्यागसमेतं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
दानं प्रियवाक्सहितं एतच्चतुर्विधं भद्रम् । इति (प्रश्नोत्तरी)

श्रीमूला

वानप्रस्थस्येत्यादि । वानप्रस्थस्य वने प्रकर्षेण तिष्ठतीति वनप्रस्थः, वनप्रस्थ एव वानप्रस्थः स्वार्थेऽण्, तस्य । ब्रह्मचर्यम् ऊर्ध्वरेतस्त्वम् । भूमौ शय्या स्थण्डिले शयनम् । अग्निहोत्रं सायंप्रातरनुष्ठेयमग्निकार्यम्, अग्नये होत्रं हविराज्यादि यस्मिस्तदिति व्युत्पत्तिः, तच्च अभिषेकस्त्रिकालस्नानं च अग्निहोत्राभिषेकौ । वन्य आहारः कन्दमूलफलादिः ।

वैदिकसिद्धान्तसंरक्षिणी

अथ वानप्रस्थधर्ममाह—**वानप्रस्थस्येति**। अस्य प्रधानो धर्मः तपोऽन्वीक्षे, "तपोन्वीक्षे वनौकसां" इति श्रीमद्भागवत्वचनात्। अन्वीक्षा न्यायादिविद्या, तस्या उपयोगः प्राक् ज०(पृ०१२४) विस्तरेण प्रपञ्चितः। तदनुगुणाः वार्धक्ये शरीरस्वास्थ्यकराश्च धर्मा अत्रोच्यन्ते ब्रह्मचर्यमित्यादिना। ननु वानप्रस्थाश्रमस्य कलौ निषिद्धत्वेपि **अत्र** किमभिप्रायेणोक्तिरिति जयमङ्गलाक्रोडपत्रे चिन्तितम्। भूमौ मृन्मय्याम् यत्र व्यायामादि क्रियते तादृश्यामित्यर्थः। तेन वार्धक्ये अभिवृद्धो दोषः भूमिशयनेन समतामुपगच्छति इति भूमिशय्याप्रयोजनमवगन्तव्यम्। जटा व्रतित्वात् वानप्रस्थैर्धार्यते। अग्निहोत्रम् भार्यासान्निध्यात् बोध्यम्। **अभिषेकः** स्नानम्। शान्तरसस्यानुभावोऽयं, "स्नानम् त्रिषवणोचित"मित्युक्तत्वात्। गार्हस्थ्यात् देवतापित्रतिथिपूजा एतदाश्रमकृते विधीयते। भृत्यानां वानप्रस्थाश्रमेऽभावेन तेषु त्यागस्याप्रसक्त्या न तद्ग्रहणम्। वन्य इति। वनोद्भवोऽकृष्टपच्यः। त्रिदोषघ्नानि षष्टिधान्यानि भवन्ति तथाविधानां आहारः उपादेयः। वृद्धावस्थायां अग्निः उपर्युक्तमेवाहारं पक्तुं समर्थः इति वन्याहारो वानप्रास्थनां कृते उक्तः। गृहस्थसमत्वमस्य वैद्यनाथोक्तचतुर्वर्गचिन्तामणिग्रन्थे द्रष्टव्यम्।

जयमङ्गला

वानप्रस्थस्येति। प्रतिष्ठन्तेऽस्मिन्निति **प्रस्थो** देश उच्यते। वनप्रस्थे वनोद्देशे भवो वानप्रस्थः। 'वैखानस इत्यपरनामा।

तस्य अपत्ये सङ्क्रमितगार्हस्थ्यस्य **पत्नीवत्वेऽपि ब्रह्मचर्यम्**। **भूमौ अनास्तरणायाम्**। शय्या शयनम्। **जटानां** विन्यासीकृतकेशानाम्। **अजिनस्य** चर्मणो **धारणम्**। **अग्निहोत्र**चरणं पत्नीयुक्तत्वात्। "वनं गच्छेत् सहैव वा" इति वचनात्।

अभिषेकः यथोक्त (:) देवतातिथिपूजा। **वन्यश्च** वनभवः **कन्दमूलफलनीवारादिः**। **आहारः** आह्रियते भक्ष्यत इति कृत्वा। न तु शास्त्रप्रतिषिद्धो मांसादिः।

जयमङ्गलाक्रोडपत्रम्

वानप्रस्थधर्ममभिधातुमाह वानप्रस्थस्येति।

वानप्रस्थोपयुक्तता

ननु वानप्रस्थस्य क उपयोगः ? इति चेत्, तपः अन्वीक्षा च स्तः। तदुक्तं भागवते-तपोऽन्वीक्षे वनौकसाम्" इति। अर्थशास्त्रे ये वानप्रस्थानां धर्मा उक्ताः ते तपोऽन्वीक्षाधर्मसमृध्यर्थं बोध्याः। तपः अनशनम्। अन्वीक्षा च तर्कप्रवाहरूपसमाधिपदेन प्रागुक्ता (पृ० १५२) अत्रापि बोध्या। ते च ग्रामे निवसद्भिः न कर्तुं शक्येते। तद्विरोधिवातावरणस्य तत्र समुत्पादात्। ग्रामे निवसतां लोकानां संमर्दनेन "कार्बनडाइआक्साइड्" विषस्योत्पत्तिर्भवति। तद् विषं यूनां न बाधते बलवत्वात्। अपि तु वृद्धानाम्। तद्विषबाधायाञ्च तपोऽन्वीक्षे यथावत्कर्तुं न पार्येते

जयमङ्गलाक्रोडपत्रम्

इत्यात्मनः संरक्षणाय वानप्रस्थिनां कृते वने वासो विहितः। किञ्च देवताः अपि तत्तत्पर्वसु यात्राप्रसङ्गे तीर्थस्नानाद्यर्थं यदा आगच्छन्ति तदा ताः पावित्र्यार्थं वने निवसन्ति न ग्रामे, तत्र अशुचित्वस्य प्रायः सम्भावितत्वात्। अतोऽपि हेतोः वानप्रस्थिनां वने निवासः शास्त्रेषु अनुमतः। तेन तेषां देवताप्रसादोऽपि नासुलभो भवति। ग्रामे रजोगुणसामग्रीबाहुल्यात् तपोऽन्वीक्षार्थमपेक्षितं देशकालनिवाससंवाससाहचर्यादिप्रयुक्तं प्राकृतिकं सत्वं वानप्रस्थिभिः नोपलभ्यते। अन्वीक्षार्थं तु एकाग्रता आवश्यकी। सा च यत्र चञ्चलतास्वभावः तस्मिन् रजोगुणे जागरूके कथं स्यात्? इत्यन्वीक्षणस्य अनुपपन्नत्वात् वने वानप्रस्थिनां निवासः निरूपितः। सात्विकान्तःकरणप्रयुक्ता एकाग्रता अधीतविद्यानां विरक्तानां एकान्ते एव सम्भविष्यति। तदैव तेषु ऋषित्वमपि समुदेष्यति।

तदुक्तम्—"तपसर्षयः। तद् ऋषीणां ऋषित्वम्" इति। एतदालोच्यैव भगवत्पूज्यपादैरपि "सुरतरुमूले निवासः" इत्याद्युक्तम्। अतः तपोन्वीक्षार्थं वानप्रस्थाश्रमः वने निवसतामुपयुज्यते। अन्वीक्षायाश्चोपयोगित्वं कियदस्तीति प्राक् (पृ० १५९) द्वितीयाध्याये आन्वीक्षिकीनिरूपणावसरे निरूपितम्।

वानप्रस्थस्य ब्रह्मचर्यम्

(ज० पृ० ३१६) तस्येति। पत्नीसत्वेऽपीति।

ननु पत्नीसद्भावेऽपि वानप्रस्थस्य ब्रह्मचर्यं कस्माद्धेतोर्निरूपितम्? इति चेत् तत्पुत्रस्य बहिष्कृतेर्धर्मशास्त्रेषु उक्तत्वात्।
तदुक्तं स्मृतिमुक्ताफले—अनुसन्धेयम्।[1]
(ज० पृ० ३१६) अनास्तरणायाम् इति।

भूमिशय्याफलम्।

ननु वृद्धावस्थायां भूमिशय्या कुतो विहिता? इति चेत् वृद्धावस्थायां वायुः प्रकुप्यति तस्य उपशम आवश्यकः। तत्र मृन्मयी मृद्वी शय्या उपयुज्यते—'भूशय्याऽनिलपितघ्नी" इति आयुर्वेदे विधानात्। अतः वायुदोषशमनाय भूशय्या विहिता।

(ज०पृ०३१६) जटानाम् इति। ब्रह्मचर्यधर्मनिरूपणावसरे केशधारणं निमित्तीकृत्य सप्रपञ्चं (पृ० ३०२) विस्तृतमस्ति तदेव अत्राऽपि मननोयम्।

(ज० पृ० ३१६) अजिनधारणम् इति। अजिनधारणविषये गुणदोषौ पुरश्चर्यार्णवे प्रतिपादितौ। तस्मात् शरीरस्य सुरक्षार्थमन्वीक्षासमये सम्भविष्णूनां दोषाणां निरासार्थं

---

१ 'यस्तु पत्न्या समङ्गत्वा मैथुनं कामतश्चरेत्।
तद् व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विजः॥
तस्यां यो जायते गर्भो न संस्पृश्यो द्विजातिभिः।
न वेदेऽप्यधिकारोऽस्ति तद्वंशे योपि जायते।'(१७० पृ०)

जयमङ्गलाक्रोडपत्रम्

च वानप्रस्थैः अजिनमवश्यं धारणीयमिति भावः। तद् अपि मार्गं वैयाघ्रं वा बोध्यम्। तदुक्तम् कामन्दकीय जयमङ्गलायाम्। "अजिनं मार्गं वैयाघ्रं वा" इति।

(ज० पृ० ३१६) अभिषेकः इति। स्नानस्य गुणाः रूपम् तेजः यशश्चेत्यादयः दश भवन्ति इत्यतः अभिषेकः तेषां गुणानां लाभाय[1] अवश्यं कर्तव्यः।

(पृ० ३१६) यथोक्तेति। गृहस्थधर्मे कृताकृतद्रव्यविनियोगः उक्तः अत्र तु स नास्ति इति गृहस्थवानप्रस्थयोर्विशेषः अवगन्तव्यः। किञ्च वानप्रस्थस्य भृत्योऽपि नास्ति। इति नापि भृत्यग्रहणं कृतम्।

(पृ०३१६) कन्दमूलेति। कन्दादयः त्रिदोषघ्नत्वेन आयुर्वेदे निरूपिताः। ते अत्र विवक्षिताः।

प्रतिग्रहनिवृत्तिः

'वन्य' इत्यनेन वानप्रस्थेन प्रतिग्रहो न कर्तव्यः इति ध्वनितम्—

'प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् इति वचनात्।

ननु वानप्रस्थस्य प्रतिग्रहनिवृत्तिः किमभिप्रायिका? इति चेत्, अन्यनिरपेक्ष-जीवनप्रदर्शनार्थं[2]।

अर्थात् कन्था चीराणि वृक्षस्य शीर्णपर्णानि वा वरम्। परमन्वीक्षायाः स्वातन्त्र्यस्य च प्रतिबन्धः येन भवेत् तथाविधम् द्वारीकृत्य जीवनं तु विद्यावतां न युक्तमिति। अतएव नीतिसारे प्रतिग्रहनिवृत्तिः कण्ठत एव उक्ता। 'प्रतिग्रहनिवृत्तिश्च त्रिस्नानं व्रतचारिते'ति।

वानप्रस्थस्य कलिवर्ज्यत्वम्

ननु "वानप्रस्थाश्रमः कमण्डलुविधारणमि"त्यादिना वचनेन धर्मशास्त्रेषु वान-प्रस्थपरिपालनस्य कलिवर्ज्यत्वमुक्तम्। अत्र मूलकृता कथं तद्विहितम्? इति चेत्सत्यम्। सुराग्रहस्य कलिवर्ज्यत्वेऽपि सौत्रामणियागस्य इतिकर्तव्यत्वेन तदनुमन्यते शास्त्रकृद्भिः। तथा चास्य वचनस्य अयमर्थोभवति, यत्कलिवर्ज्यं सुराग्रहणं उक्तम् तत् सौत्रामणियागोपयुक्तादन्यत् एवञ्च सौत्रामणियागोपयुक्तं तत् सद्भवति इति

---

१ तदुक्तम्—

"गुणा दश स्नानपरस्य साधो रूपं च तेजश्च यशश्च शौचम्।
आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च बलं च मेधा।' इति।
तथोक्तम् भागवतेऽपि।

२ 'चीराणि किं पथि न सन्ति दिशन्ति भिक्षाम्,
नैवाङ्घ्रिपाः परभृतः सरितोप्यशुष्यन्॥
रुद्धा गुहाः किमजितोऽवति नोपसन्नान्।
कस्माद् भजन्ति कवयो धनदुर्मदान्धान्। इति।

भागवतवचने उक्तमभजनीयत्वं मदमानसमुद्धतानां द्रष्टव्यम्।

[1]परिव्राजकस्य—संयतेन्द्रियत्वं अनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षमनेकत्र अरण्यवासो [2]बाह्यमाभ्यन्तरं च शौचम् ॥

[सर्वसाधारणाः धर्माः, सर्वेषां स्वस्व-धर्मानुष्ठानावश्यकता च]

[3]सर्वेषां—अहिंसा सत्यं शौचमनसूयाऽऽनृशंस्यं क्षमा च ।

जयमङ्गलाक्रोडपत्रम्

तदनुष्ठेयमेव इति । तथा कलावपि उपर्युक्तभागवतकौटिल्यादिवचनानुसारेण अन्वीक्षणस्य समाधेः अत्यन्तमभ्यर्हितत्वात् विचारः कर्तव्य एव । तत्र उपयुक्तं यदस्ति, तावन्मात्रमेव अत्र ग्राह्यम । अन्यत् तु सर्वं वर्ज्यम् । न च गृहस्थेनैव अन्वीक्षणात्मकं कार्यमपि कर्तुं, शक्यमिति वाच्यम्, तेन हि द्रव्यार्जनाद्युपयुक्तोद्योगेषु व्यापृतचित्तेन एकान्ते स्थित्वा सातत्येन तर्कप्रवाहात्मकस्य समाधिरूपस्य अन्वीक्षणस्य कर्तुमशक्यत्वात् । अतः "पुत्रेषु न्यस्तकार्यसम्भारः चित्तविक्षेपशून्यः वनम् एकान्ते निषेव्य अन्वीक्षेत" इत्यादि विधानबोधार्थं वानप्रस्थाश्रमग्रहणकालः पञ्चाशत्तमे वयसि शास्त्रकर्तृभिः आकरे विहितः[1] ।

श्रीमूला

परिव्राजकस्येत्यादि । परिव्राजकस्य परित्यज्य सर्वं व्रजतीति परिव्राजकः सन्न्यासी तस्य । संयतेन्द्रियत्वं जितेन्द्रियता । अनारम्भः नैष्कर्म्यम् । निष्किञ्चनत्वं निस्स्वत्वम् । सङ्गत्यागः प्रव्रजितान्तरेणापि संसर्गपरिहारः । अनेकत्र भैक्षं प्राणयात्रापर्याप्तस्यान्नस्य बहुषु गृहेषु भिक्षित्वा ग्रहणम् । बाह्याभ्यन्तरशौचं काय-वाङ्मनसोर्नैर्मल्यम् ।

सर्ववर्णाश्रमसाधारणान् धर्मानाह—**सर्वेषामिति ।** अनसूया गुणपक्षपातः आनृशंस्यम् अनिष्ठुरत्वम् ।

वैदिकसिद्धान्तसंरक्षिणी

शमप्रधानस्य आदर्शभूतस्य लोकस्थितिहेतुभूतसत्वगुणोत्कर्षशीलस्य सन्न्यसतो धर्ममाह—परिव्राजकस्येति । श्रीमद्भागवते "भिक्षोधर्मःशमोऽहिंसा" इत्युक्तम् तानेव धर्मान् आह संयतेति । जितेन्द्रियत्वमिति पाठान्तरम् । सन्यासिनां कृते अद्रोह-समता-वाग्यमव्रतचारिताप्रभृतयो गुणाः नीतिसारे अधिका उक्ताः—

१. तदुक्तम्—"वनं पञ्चाशतो व्रजेत् । द्वितीयमायुषो भागम्" । इति ।

नी० टी० १. परिव्राजकस्येति—परिव्रजतीति परिव्राजकः ग्रामादिष्वेकरात्रं नगरे पञ्चरात्र-मित्यादिक्रमेण ।

,, ,, २. बाह्यं मृज्जलादिभिः । आभ्यन्तरं भावशुद्ध्या, सा च सकलसत्वहितानुध्यानात् ।

नी० टी० ३. सर्वेषामिति ।……साधारणधर्ममभिधातुमाह ।

वैदिकसिद्धान्तसंरक्षिणी

सर्वारम्भपरित्यागो भैक्षाश्यं वृक्षमूलिता ।
निष्परिग्रहताऽद्रोहः समता सर्वजन्तुष ॥
प्रियाप्रियापरिष्वङ्गः सुखदुःखाविकारिता ।
सबाह्याभ्यन्तरम् शौचम् वाग्यमो व्रतचारिता ।
सर्वेन्द्रियसमाहारो धारणा ध्यानयुक्तता ।
भावसंशद्धिरित्येष परिव्राड्धर्म उच्यते । इति ।

तेऽत्र यद्यपि नोक्तास्तथाऽपि संयतेन्द्रियत्वे तेषामन्तर्भावो विज्ञेयः । अथवा यथायथं तेषु तेषु गुणेषु अन्तर्भावो योज्यः । यद्यपि समस्तानां गुणानां अन्तर्भावः संयतेन्द्रित्वे वक्तुं शक्यः, तथापि ब्रह्मचार्यादि धर्मापेक्षया सन्न्यासिनां कृते सन्न्यासोचितधर्मस्य प्रधान्यख्यापनार्थं अनारम्भादिगुणानां पृथगुपन्यासो बोध्यः ।

अनारम्भ इति । "सर्वासां यागादिक्रियाणां आश्रमधर्मव्यतिरिक्तानामननुष्ठानम्" इति जयमङ्गलोक्तमत्र द्रष्टव्यम् । अयं भावः—सन्यासाश्रमस्य धर्माः शान्तरसावस्थायां स्वाभाविका भवन्ति । मानोरथिकाभ्यासिकाभिमानिकवैषयिकशमसुखेषु एकं शमसुखं सन्यासिनां जीवनन्तस्मात् सन्यासाश्रमे आरम्भो नास्ति इति अनारंभस्य शमपरिचायकत्वम् स्फुटम् ।

सन्न्यासविधिप्रसक्तिः

गृहस्थेन चरित्रं स्थाप्यते सन्न्यासिना तत्परित्यज्यते । तत्र गृहस्थचरित्रस्य स्वरूपं कीदृशमुत्तममिति नाटकस्याभिनयेन व्यक्तं भवति । तथाहि—नाटकदर्शिनां इतिहासश्रोतृणां वा आस्वादास्पदं वीररसप्रधानस्य श्रृङ्गाररसप्रधानस्य वा नेतुः आदर्शचरित्रं उत्साहास्पदमेवावलंब्याभिनीतं भवति । अतएव नाटकेषु औत्सुक्यमारम्भोवा बीजनाम्ना व्यपदिश्यते, ततः आरभ्य चरित्रप्रस्तावात् । ततः यत्नप्राप्त्याशानियताप्तीः प्रदर्श्य पर्यन्ते त्रिवर्गसमृद्धिफलागमेन नाटकस्य परिपूर्तिः क्रियते । एते औत्सुक्यादयः पञ्च मुखप्रतिमुखगर्भविमर्शापसंहृतिसन्धिभिः सङ्गतिप्रदर्शनकाले व्यपदिश्यन्ते नाटकेषु । बीजयत्नप्राप्त्याशानियताप्ति फलागमरुपाः गृहस्थाश्रमिणां कृते उपयुक्ताः सन्न्यासाश्रमे न सन्ति । अथ त्रिवर्गसमृद्ध्यन्तरं बीजभूतस्यौत्सुक्यस्य त्यागः कथं कर्तव्यः इत्याकाङ्क्षायां सहजतः क्रमप्राप्तत्वात् सन्न्यासविधिरुपस्थितो भवति । अर्थात् सन्न्यासविधिपूर्वकं औत्सुक्यं त्यक्तव्यम् इति तात्पर्यम् । तत्रायं मीमांसान्याय एवं वक्तुं शक्यते-अङ्गकण्डूयनार्थं स्वीकृतस्य विषाणस्य दीक्षायागानन्तरञ्चात्वाले निक्षिपेदिति विधानेन परित्यागः कृतश्चेत् सम्मानपुरसरं, श्रृङ्गविसर्जनं वैधं भवति अन्यथा प्रायश्चित्तीयता भवेत् । इदमेव प्रतिपत्तिकर्म । तद्वत् प्रकृतेपि सन्यासविधिना अग्निहोत्रादीनां त्यागः कृतो निर्दोषाय भवति । तदेतदालोच्य अत्र अनारम्भो विहितः । अत्र केचित् यावज्जीवमग्निहेत्रं जुहोति इति विधिः सन्यासविधिना कृतेनाग्निहोत्रत्यागेन कथं समन्वेयः स्यादित्याक्षिपन्ति । तत्तु न मनोरमम् । सन्न्यासविधिना-

वैदिकसिद्धान्तसंरक्षिणी

कर्तव्यत्वावगमात् अग्निहोत्रात्यागो न दोषाय इति सिद्धान्तात्। त्यागोऽपि वैराग्ये सत्येव विहित इति न विस्मर्तव्यम्।

किञ्च शोकहर्षादिवृत्तिः सन्यासिषु नास्ति, अतोऽस्मिन् आश्रमे अनारम्भ उक्तः। सन्यासी आश्रमान्तरोचितकर्म कर्तुन्नोत्सहते तद्धि तस्य भूषणम्, अनुत्साहस्यानारम्भ-पदार्थत्वात्। आरम्भश्च भावप्रकाशने व्याख्यातः औत्सुक्यमारम्भ[1] इति।

सङ्गेति। बन्धुमित्रादिभिरसङ्गः[2] इत्यर्थः। तदुक्तं नीतिसारे-प्रियाप्रिया-परिष्वङ्गः इति, तट्टीकायाम् 'इष्टानिष्टसङ्गत्याग' इति च। अत्रैव सुखदुःखाविकारितापि नीतिसारोक्ताऽन्तर्भावनीया। "सुखे दुःखे च विकारो हर्षशोककृतो नास्ती"ति उपाध्यायनिरपेक्षायामुक्तं। सा च अवस्था सङ्गत्यागे सम्भवति इति। भैक्षमिति। केचित् 'भिक्षा अनेकत्र' इति अन्वयं वाञ्छन्ति। तेनैकत्र भिक्षा न ग्राह्येति भावः। तदुक्तम् उपाध्यायनिरपेक्षायाम्-"भैक्षं भिक्षासमूहमित्यर्थः" इति। अपरे तु 'वास इत्यनेन अनेकत्रेत्यस्य समन्वयमाहुः, अनेकत्रेत्यनेन अनेकग्रामे इत्यर्थः' इति वदन्ति। तेन वासो नैकस्मिन् ग्रामे नगरे वेति स्थितम्। जयमङ्गलायां तु अनेकत्रारण्ये वास इति उक्तम्। तस्यायं भावः-अनेकत्र नैकस्मिन् ग्रामे वास इति। "ग्रामादिष्वेकरात्रम्" इति विधानात्। इति। अथवा अनेकत्रारण्ये इत्येव पाठः। एतत्पाठे ग्रामसमीपे वासः, न तु ग्रामे इत्यर्थो बोध्यः।

बाह्येति। शौचं मलप्रक्षालनम्। तच्च द्विविधं बाह्यमाभ्यन्तरं च। तत्र बाह्यं मृज्जलादिना कायमलप्रक्षालनम्। आभ्यन्तरं मैत्र्यादिभावनाभिश्चित्तमल-प्रक्षालनम्। तदुक्तमीश्वरगीतायाम्—

बाह्यमाभ्यन्तरं शौचं द्विधा प्रोक्तं द्विजोत्तमाः।
मृज्जलाभ्यां भवेद्बाह्यं मनः शुद्धिरथान्तरमिति। इति।

एतेषाम् असाधारणधर्माणां नीतिलक्षणलक्षितत्वं कथं भवतीति स्वर्गानन्त्याय इति मूलव्याख्यानावसरे स्फुटीभविष्यति।

अथ साधारण धर्मं प्रदर्शयितुमाह सर्वेषामिति। वर्णानामाश्रमाणां चेत्यर्थः।

१.　औत्सुक्यमात्रबन्धस्तु यद्बीजस्य नियुज्यते।
महतः फलयोगस्य स खल्वारम्भ इष्यते॥ भावप्रकाशन अधि० ७

२. तदुक्तम्—मानापमानयोः शोकहर्षयोः सुखदुःखयोः।
समवृत्तितया प्रायो नानुभावा भवन्ति हि॥
गीतायामपि—निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत्॥ इति॥

वैदिकसिद्धान्तसंरक्षिणी

अहिंसेति। सा च द्विविधा बोध्या एका स्थायिनी अपरा व्यभिचारिणी। तत्राद्या परिव्राजकाणाम, एतेषां शमप्रधाना अहिंसा महाव्रतित्वात्। महाव्रतित्वञ्च योगसूत्रे उक्तम्—

[1]"जातिदेशकालसमयानवच्छिन्नाः सार्वभौमाः महाव्रतम्" इति।

द्वितीया तु अहिंसा संन्यासयतिरिक्तैः क्रियमाणा यथादृष्टयथाश्रुतयथानुमित--यथा ध्यातविषयं व्यवहरणम्। सा च योगसूत्रोक्तैर्जात्यादिभिरवच्छिन्नत्वाद् व्यभिचारिणी बोध्या। सत्यं इति। तस्य फलं "सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम" इति योगसूत्रोक्तं वेदितव्यम्। क्रियाफलाश्रयत्वं च "क्रियाफलं च सत्ये आश्रयति" इति व्याख्यातं टीकाकृद्भिः। तद्यथा "क्रियाऽत्र धर्माधर्मरूपा। फलं सुखदुःखे क्रियाफले आश्रयतीति तथा। तस्य भावः तत्वम्। क्रियाफले स्वेच्छया जनयतीत्यर्थः। यथा धार्मिको भव, स्वर्गी भवेत्युक्ते तथा भवति अमोघवाग्भवति सत्येन वाचः शुद्धा मन्त्रादिजपस्य पूर्णत्वात् इति भावः" इति।

शौचमिति। इदं प्राग्व्याख्यातम्।

अस्य बाह्याभ्यन्तरभेदेन भिन्नस्य फलं शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः इति। [2]"सत्वशुद्धिसौमनस्यैकाग्र्यन्द्रियजयात्मदर्शनयोग्यत्वानि च" इति योगसूत्रे वर्णितं फलमत्र स्मर्तव्यम्।

शौचस्य शास्त्रप्रमाणकत्वात् सर्वापि इयं राजनीतिः धर्मप्रधाना अस्तीति।

---

१ जातिर्ब्राह्मणत्वादिः। देशः तीर्थादिः। कालो नियतचतुर्दश्यादिः। समयः नियतो ब्राह्मणभोजनाद्यवसरः। एतैः, ब्राह्मणादिकं प्रयागादौ चतुर्दश्यादौ ब्राह्मणादिप्रयोजनं विना च न हनिष्यामीति क्रमेण जातिदेशकालसमयैरनवच्छिन्ना न भवन्ति, किन्तु कमपि कुत्रापि कदापि कस्याप्यर्थे न हनिष्यामीति जात्यादिभिरनवच्छिन्नाः। सार्वभौमाः सर्वासुरक्षाप्तादि भूमिकासु भवाः महाव्रतमित्युच्यते इत्यर्थः इति।—यो० १।३१ सूत्रम्—।

२. अथ नियमसाध्येषु सिद्धियोगेषु प्रथमं बाह्यशौचसिद्धिमाह-शौचं भावयतः पुरुषस्य शौचे निमित्तभूतामशुद्धिं कायादिषु पश्यतो भवति। घृणा अशुचिरयं कायः सर्वथाऽनहङ्कारः कर्तव्यः इत्यमुनैव हेतुना परैश्च कायवद्भिः स्त्र्यादिभिरसंसर्गः असम्बन्धो भवतीत्यर्थः। आन्तरशौचस्य फलमाह—**सत्वेति**।

भवन्तीति शेषः। आन्तरशौचा दित्यनुवर्तते। मैत्र्यादिभावनारूपाभ्यन्तरशौचात् सत्वस्य मनसः शुद्धिर्नमल्यम्। ततः सौमनस्यम् अक्षोभः। तत ऐकाग्र्यम् एकस्मिन् विषये परमात्मनि स्थिरता। तत इन्द्रियजयः विषयेभ्यः पराङ्मुखता तत आत्मदर्शनयोग्यत्वं सामर्थ्यम्। इत्यवं क्रमणे सत्वशुद्ध्यादयः शौचाभ्यासवतो भवन्ति इत्यर्थः। इति यो० २।४०-४१।

वैदिकसिद्धान्तसंरक्षिणी

अनसूया । असूयाया अभावः इत्यर्थः । असूया च परगुणद्वेषः ।[१]

तेनान्यगुणद्वेष एवासूयापदार्थं इत्यध्यवसीयते । असूयाल्वाद्यः परस्परमेकत्र सह न वसन्ति न वा तत्वमध्यवस्यन्ति । अतोऽनसूयायाः परस्परसङ्गत्यर्थं अत्यावश्यकता अस्ति । तदुक्तं —

"तं गुरुशिष्यसब्रह्मचारिशिष्टश्रेयोऽर्थिभिरनसूयुभिरभ्युपेयादि"ति— गीतायामपि—

"इदं ते नातपस्काय नाभक्ताय कदाचन ।
नचाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ इत्युक्तम् । १८.६७

आनृशंस्यम् अनुकम्पा । परदुःखप्रहाणेच्छेति यावत् । **क्षमा** क्रोधाभावः चकारात् नीतिसारे लोकसङ्ग्रहप्रकरणे उक्ताः परकार्येषु अनिन्दादयो बोध्याः ।

जयमङ्गला

परिजकस्येति । वर्षासमयाद् अन्यत्र । "ग्रामे एकरात्रम्, नगरे पञ्चरात्रम्" इति वचनात् । परिव्रजतीति परिव्राजकः, भिक्षुरिति द्वितीयनामा । तस्य यतेन्द्रियत्वम् अलोलुपेन्द्रियता । अनारम्भः क्रियादीनाम् । अकिञ्चनत्वं प्रव्रज्योपकरण—व्यतिरिक्तानुपादानात् । बन्धुमित्रादिभिः यः सङ्गः तस्य त्यागः । भैक्षं भिक्षाणां समूहः नैका भिक्षा[२] तत्रापि नैकस्मिन् ग्रामे नगरे वा स्यात्, किन्तु अनेकत्र । तत्राप्यरण्ये ग्रामादिसमीपे वासः न ग्रामादाविति । बाह्यं शौचं मृदादिभिः अमेध्यापनोदनार्थम् । आभ्यन्तरं मनःशौचम् रागद्वेषादिप्रहाणात् ।

वर्णाश्रमाणां धर्मानुक्त्वा सामान्यानाह **सर्वेषामिति** । **अहिंसा** सत्वस्यापीडनम् । **सत्यं** यथार्थवाक् । **शौचं** बाह्याभ्यन्तरम् । परगुणाक्षमता असूया तदभावोऽनसूया । आनृशंस्यम् अक्रूरता अनुकम्पेत्यर्थः । **क्षमा** च आक्रोशादितितिक्षा ।

जयमङ्गलाक्रोडपत्रम्

परिव्राजकस्येतीति । परिव्राजको यतिः । तत्स्वरूपं नीतिवाक्यामृते धर्मसमुद्देशे[३] द्रष्टव्यम् ।

सन्यासधर्मे विशेषता

अयं धर्मः शमप्रधानः "भिक्षोर्धर्मः शमोऽहिंसा" इति वचनात् बोध्यः । शमपदेन लौकिके समस्तेऽइष्टसाधने वस्तुनि अहितत्वं बुद्ध्वा ततः निवृत्तौ यत्सुख-

---

१. तदुक्तं गोकुलनाथोपाध्यायैः—
परोत्कर्षाक्षमा गर्वदौर्जन्यमन्युजा इति धनिकः ।
असूयाऽन्यगुणादीनामौद्धत्यादसहिष्णुता इवि महाराजः इति ।

२. अशुद्धम्
नैका भिक्षा, तत्रापि ।

३. यः सम्यग्विधानालाभेन तृष्णासरित्तरणाय योगाय यतते स यतिः । इति ।

जयमङ्गलाक्रोडपत्रम्

भानं तदेव बोध्यम्। उपर्युक्ता निवृत्तिः सुखसाधनत्वेन अभिमता यदि किञ्चित्-पदार्थविषयिणी भवति, तर्हि सा बीभत्सेऽन्तर्भवति, समस्तविषयिणी चेत् शम इत्युच्यते। उभयोरपि उद्वेगादीनि चिह्नानि सामान्येन भावप्रकाशने उक्तानि चिन्तनीयानि।[1]

न च बीभत्सानुभावे वर्णितं द्रुतपदगमनं सन्यासिनः नोपपद्यते इति वाच्यम्। सत्वाभिवृद्धया शरीरस्य लाघवेन द्रुतपदगमनस्य सम्भवदुक्तिकत्वात्। तदुक्तं—(७४ पृष्ठे) द्रष्टव्यम्।

राजनीतौ सन्यासिनामुपयोगित्वम्

राज्यं हि प्रजायां सुखकरं तदा भवति, यदा तत्स्वामी राजा अतिसूक्ष्मतया विचारपुरःसरम् अन्यायिनमत्याचारिणं तथात्वेन निर्णीय दण्डयति। न्यायमार्गं च संरक्षति। न्यायश्च तेनैव विदुषा निर्णेतुं शक्यते, यः शौचादिमहाव्रतसम्पन्नः स्यात् तस्यैव निर्विकारत्वात्। महाव्रतसम्पन्नता च चतुर्षु आश्रमेषु पूर्वपूर्वतने आश्रमे स्थित्वा ततदाश्रमधर्मान् यथोचितं पालयित्वा स्वकीयान्तःकरणस्य शुध्यनन्तरं क्रमशः सन्न्यासधर्मं स्वीकृतवता सन्न्यासिना सम्पाद्यते, एवंभूता स्थितिः शमप्राधान्ये एव सम्भवति। अत एव "जाति-देश-समयानवच्छिन्ना" इति योगसूत्रेण यन्महाव्रतमुपदिष्टमस्ति, तत् शमप्रधानानां कृत एव बोध्यम्। (३१२ पृ०) यस्य च शमप्राधान्यं नास्ति, सः रागद्वेषयोरन्यतरेण सम्पन्नः यथावन्न्यायं निर्णयेदिति केनापि वक्तुं न शक्यते, किमुत मानवैः। तद् वीरमित्रोदये द्रष्टव्यम्।[2]

सभासदां रागद्वेषशून्यानामध्यात्मविदामध्यात्मवित्त्वमिदमेव यत् सर्वेषु स्वकीयत्वभावनया दर्शनमिति। तत्रेदं मुदाहरणं प्रदर्श्यते—यथा नखशिखान्तशरीरावच्छिन्नः आत्मा सर्वावयवेषु आत्मभावमासादयन् शरीरान्तर्वर्तिनं कमपि अवयवं

---

१ वस्त्रावगुण्ठनं नासाच्छादनं नेत्रकूणनम्।
अस्पष्टपादपतनमपवर्त्तितवक्त्रता॥
द्रुतपादाग्रगमनं ष्ठीवनं च मुहुर्मुहुः।
एवमाङ्गिक उद्वेगजन्मा बीभत्स उच्यते। (भा०प्र०३अधि पृ०६७)

२ तथा च बृहस्पतिः—लोकवेदाङ्गधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राःस्युः सा यज्ञसदृशी सभा॥
चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा।
सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः॥
श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥

जयमङ्गलाक्रोडपत्रम्

न पक्षपातेन पश्यति द्विष्यति रज्यति वा। अत एव सः सर्वेषामपि अवयवानां यथावत् पालनाय यतते। एतस्मादेव कारणात् तस्य नखाशिखान्तसहितस्य उत्तम-पुरुषत्वमुच्यते।

मध्यमः प्रथमश्च तदा सम्भवतो यदोत्तमः मध्यमप्रथमपुरुषयोः शरीरं स्वस्मात् भिन्नम् इति भावं तौ प्रति प्रस्तौति। तदानीं मनसि मध्यमप्रथम – पुरुषयोः सुखदुःखसंवेदनाभावादुत्तमः पुरुषः लोभक्रोधादिपराधीनत्वम् आत्मनि स्वीकृत्य तयोः याथार्थ्येन सापराधत्वनिरपराधत्वनिर्णयं कर्तुं समर्थो न भवति परिमितशरीरान्तर्वर्त्तिनमभिमानं तिरस्कृत्य यः - विराट्पुरुषस्वरूपेण सर्वेषु आत्मीयत्वभावेन ख्यातः स न्यायतुलायामपराधं तोलयितुं समर्थः।

अत एव सन्न्यासधर्मो विहितः। यदा वेदान्तसिद्धान्तानुसारेण समस्तमपि जगत् विराट्पुरुषस्य एकस्य अन्तःस्थितादवयवान्नातिरिच्यते इति भानं शास्त्रोदितकर्मकर्तुः शुद्धेःऽन्तःकरणे समुदेति तदा तद्दृष्ट्या जगतीतले मध्यमत्व-मुदासीनत्वं च व्यपगतं भवति, केवलमुत्तमत्वमेव अभिव्यज्यते। इदमेव उदारचरि-तत्वम्। तदुक्तम्—

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥ इति

अतः अध्यात्मविदां न्यायनिर्णये सामर्थ्यात् सन्यासः तल्लाभार्थं राजनीतौ उपयुज्यते। किञ्च भारतीया राजनीतिः विवादस्थलेषु निर्णायकत्वेन अध्यात्मविदं स्वीकरोतीत्यत्र इदमेकमपरमपि कारणं आशु प्रयोगनिर्णयो वर्तते, राजनीतिशास्त्रं प्रयोगशास्त्रम्। प्रयोगश्च सर्वदैव प्रतिक्षणमेकरूपतयैव स्थितः स्यात् इति नास्ति नियमः, तत्प्रयोजकस्य निमित्तस्य प्रतिक्षणं भेदात्। तदुक्तम्—

प्रादुर्भवन्त्यर्थसमं यस्माच्चित्तान्यनुक्षणम्।
तस्माद् योगीव सततं भावयेत् सुसमाहितः। इति। (नी० स० ५)

यथा स्थलविशेषे कानिचन निमित्तानि दृष्टवा विद्वद्भिः एकः प्रयोगः निर्णीतः, परन्तु द्वितीयक्षण एव तस्मिन् स्थले निमित्तान्तरस्य अभ्युदयः पूर्वनिमित्तस्य वा ह्रासो जातः, तदा तत्क्षणमेव पूर्वनिमित्तानुसारेण निर्णीतं प्रयोगं परित्यज्य उत्तरनिमित्तानुसारेण प्रयोगान्तरं विधेयं भवति। दृष्टं चैतत्संनिपातादिषु कर्तव्यायां परिवर्तनीयायां वा चिकित्सायां वैद्यानां पाण्डित्ये। त्रिदोषप्रकोपे जनिते सन्निपात-स्थले तेषां प्रतिक्षणं वृद्धिह्राससन्दर्शनेन निमित्तस्य निर्णयं कर्तुं असामर्थ्यात् साधा-रणजनस्य कृते चिकित्साया अशक्यप्रायत्वात्। नहीदं लौकिकेष्वेव व्यवहारेषु मन्तव्य-मपि तु अलौकिकेष्वर्थेष्वपि निमित्तभेदानुसारेण प्रयोगान्तरस्य निर्णेतव्यत्वं भवति, इत्यपच्छेदाधिकरणे मीमांसकैः तत्र तत्र दर्शितत्वात्। तथैव राजनीतिप्रयोग—विषयेऽपि बोध्यम्। तदुक्तम्—

जयमङ्गलाक्रोडपत्रम्

'स्वल्पेनाप्यपचारेण ब्राह्मण्यमिव दुष्यति'' इति । नी० स०

चिकित्सायाम् अपचरितायां सत्यामेकाकी आर्त एव आर्ति गच्छेत् । किन्तु राजनीतौ यथावत् कर्तव्ये निर्णये स्तोकमपि सञ्जातायां स्खलनदशायाम् असङ्ख्यातानां जनानामपरिमेयद्रव्यस्य च हानिः रावणाधिकृतलङ्कादेशहानिवत् राष्ट्रे प्रसज्येत ।

किम्बहुना, अस्मिन् प्रसङ्गे इदमपि वक्तव्यमस्ति यत् राजनीतिप्रयोगनिर्णये, निमित्तभेदानुसारेण विपरिवर्तनीयतां गते सन्निपातादौ करिष्यमाणचिकित्सानिर्णयापेक्षया सहस्रगुणितं काठिन्यमस्ति । अतः अत्र विशेषतया राजनीतिः अध्यात्मविदं जिधृक्षतीति, शमप्रधानस्य अध्यात्मविदः सन्यासिनः आन्वीक्षिकीत्रयीवार्त्तादण्डनीतिसम्पन्नस्य उपायविकल्पे अतिकुशलस्य रागद्वेषवियुक्तस्य तन्निर्णायकत्वेन वरणं भारतीयराजनीत्या कृतम् । एवंभूता अध्यात्मविदः वसिष्ठरामदासब्रह्मेन्द्रस्वामिप्रभृतयः तथाविधा अन्ये च बहवः गुरुकल्पाः तत्र तत्र राज्ये स्थिताः तत्तद्राजानं यथार्वन्निर्णेयन्यायतत्वं बोधयामासुः ।

न च न्यायदानार्थं निर्णायकत्वेन राज्ञः स्थितेस्ततः पार्थक्येन अध्यात्मविदां सन्यासिनां वरणं भारतीयराजनीतिदृष्ट्याऽपि व्यर्थमेवेति वाच्यम् । उभयोः विभिन्नभाववत्वात् । तथाहि—राज्यस्वामी राजा वीररसाधिष्ठितः उत्साहमतिप्रधानो भवति, सन्यासाश्रमी तु वर्तमानवस्तुमात्रविषयकस्पृहात्मकधृतिप्रधानः शान्तरसाधिष्ठितो भवति ।

अत एव राज्ञः असन्तुष्टत्वात् विजिगीषुत्वम्, शमप्रधानस्य तु सन्तुष्टत्वात् आत्मसुखानुभूतिमत्वम्, तद्भावे तु तदभावः । तदुक्तम्—

'असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्चैव भूभृतः' । इति ।

अतः उत्साहमतिप्राधान्यधृतिप्राधान्यभेदेन राज्यसंरक्षणाय 'एका मन्त्रिप्रकृतिः अपरा राजप्रकृतिश्चेति भेदमनुरुध्य राज्ञो वीरस्य अध्यात्मविदश्च मन्त्रिणः शान्तस्य पृथक्तया विधानं राजनीतौ विहितमस्ति ।

यद्यपि सर्वसाधारण्येन सांसारिकैः शमप्रधानानाम् अलौकिकं सुखं नानुभूयते, तथापि तावन्मात्रेण शमनिमित्तस्य सुखस्य अलीकत्वं वक्तुं न युज्यते, इतिहासेषु तथाविधसुखमनुभवतां याज्ञवल्क्य-वसिष्ठ-प्रभृतीनां वर्णनात् सिकन्दरादिभिश्च स्वयात्रायां तन्निरूपितत्वात्, जीवन्मुक्तस्य सुखसंपत्तिविषयमधिकृत्योक्तत्वात्[1] "श्रोत्रियस्य चाकामहतस्येत्या''दिना वेदेनोपवर्णितत्वाच्च । येन राज्येन एवंभूतः शमसुखसम्पन्नः अध्यात्मविन्मन्त्री प्राप्तः, तस्य अतुलनीयं भाग्यमस्ति ।

---

१ भागवते—

'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ।' इति

जयमङ्गलाक्रोडपत्रम्

अतः उपर्युक्तं सुखं जीवितदशायां सम्प्राप्य यः अध्यात्मवित् स्वीयन्यायनिर्णयेन सर्वमङ्गलकारिप्रयोगनिर्णयेन च राज्यसंरक्षणे आत्मानं समर्पयति तथाविधोऽनया राजनीत्या काम्यते। ईदृशं सुखं वीररसप्रधानेन राज्ञा नानुभवितुं शक्यते इति राजप्रकृत्यपेक्षया अध्यात्मविदः पृथक् स्थानम्।

किञ्च सन्न्यासाश्रमस्य राज्यसंरक्षणायं स्वीकरणे अपरं तृतीयं कारणं जगत्सञ्चालने सर्वविधशक्तिमत्त्वसम्पादनम्। कथमेतदिति विमृश्यते।

नीतिस्वरूपं हि राज्ञा तदा साधितं मन्यते, यदा तेन किञ्चित् एकं कार्यमारभ्य मध्यसमये समापतिताः आपत्तीः निराकृत्य अन्ते यथावत् फलं प्राप्येत। अन्यथा नीतेः शाश्वतीत्वमेव अनुपपन्नं स्यात्। अतः यावत्पर्यन्तं सर्वमपि राज्यम् आत्मनः वशन्न भवेत् तावत्पर्यन्तं राजा शासनमपि कर्तुं न पारयेत्। यत्र राजा अन्यद् वाञ्छति, मन्त्री अन्यच्चिकीर्षति, सेनापतिः अन्यत् करोति, भृत्यवर्गः अन्यत् कल्पयति, तत्र वन्ध्यकोपस्य राज्ञः अस्तित्वमनस्तित्वप्रायमेव भवति। अवन्ध्यकोपस्यैव वशीकरणसामर्थ्यात्। तदुक्तम्—

'अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः' इति।

तदिदं महत्तरं कार्यं भारतीयराजनीत्यनुसारेण अध्यात्मविदा सङ्कल्पमात्रेण साधयितव्यमस्ति। तदुक्तं मम्मटेन—

'नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥' इति। (का० प्र०)

यद्यप्यत्र कार्यारम्भसङ्कल्पस्य उल्लेखो नास्ति। तथापि 'भारती'शब्देन कवयितुः अन्तर्गतः समाधिभावनायामभिव्यक्तः नाद एव सङ्कल्पाख्यो बोध्यः। सोऽयं नादरूपः अध्यात्मविदः सङ्कल्पः जगदन्तःपाती किमपि वस्तु आकर्षति, विकर्षति प्रक्षिपति, नवं निर्माति, इत्यादयोऽस्य गुणा लोकेषु दृष्टाः लोहचुम्बकवत् विद्युद्वद्वा सम्भवन्तीति अध्यात्मविदः सङ्कल्पस्य लोहचुम्बकेन विद्युता वा साधर्म्यं वक्तुं शक्यते। उभयोरन्तरमिदमेव यत् लोहचुम्बके विद्युदादौ च वर्तमानं तत्त्वं जडत्वेन भासते। उपर्युक्तसङ्कल्पे तु चेतनरूपेण भासते इति। येन इदं विद्युत्तत्त्वं शमे स्थित्वा स्वकीयसङ्कल्पे साधितं सः सर्वमपि जगत् तत्सजातीयविजातीय-विद्युदन्यतररूपेण सङ्कल्पेन कस्यचित् आकर्षणाय कस्यचिच्च विकर्षणाय समर्थो भवति। जगतः उपर्युक्तान्यतरविद्युद्रूपत्वञ्च योगवासिष्ठे उपवर्णितं दृश्यते।[1]

---

१. सर्वं तृष्णात्मकं किंचित्तेजोऽर्काग्न्यभिधं विदुः।
शीतात्मकं तु सोमाख्यमाभ्यामेव कृतं जगत्॥—

जयमङ्गलाक्रोडपत्रम्

तेन सर्वमिदं जगत् अग्नीषोमोभयात्मकमिति सिद्धं भवति। तत्र अग्निः सोमतत्वस्य अत्ता, तथा सोमोऽपि अग्नेः। यथा मनुष्यान्तर्वर्तिनोऽग्नितत्वस्य आकर्षणमन्तरूपेण वृक्षः करोति, वृक्षान्तर्वर्तिनः सोमतत्वस्याऽन्नस्य आकर्षणं मनुष्यः करोति, स्वसजातीयं तु दूरं विक्षिपति। अतः समस्तमपि जगत् अग्नीषोमोभयात्मकम्। अग्नीषोमतत्वयोः अन्तर्वर्तितत्वस्यापि आकर्षणविकर्षःणाभ्यां विद्युद्रूपत्वं सिद्धं भवति। यथा निगेटिव पोजेटिवान्यतरभूता एका विद्युत् सजातीयां विक्षिपति विजातीयामाकर्षति, तथा अग्नीषोमयोरपि अयमेव गुणो दृश्यते। इदमेव कार्यं स्वेच्छया जगतः सञ्चालनसमर्थे अध्यात्मविदां सङ्कल्पे निहितमस्तीति तस्य विद्युत्त्वमुक्तं भवति। तथाविधं कार्यं जडभूतया विद्युता कथं भवतीति अचेतनेषु वैज्ञानिकैः संसाध्य प्रकाशितमस्ति यथा निर्जीवानां मण्डूकानां नेत्राणि विद्युत्संवलनेन निमील्यन्ते उन्मील्यन्ते च। केशेषु प्रसाधनकाले दन्तिकाकचस्पर्शे जाने तज्जनितविद्युन्महिम्ना रोमाञ्चोऽपि भवति इत्यादि। तथाविधमेव कार्यं योगिसङ्कल्पेऽपि दृष्टम् अतः विद्युतः अतीवम् महत्तरं सामर्थ्यं सिद्धं भवति। एतस्मादेव कारणात् शमप्रधानस्य पुरुषस्य अभिमानाभावेऽपि स्तब्धताबाष्परोमाञ्चादयः अनुभावाः सम्भवन्तीति यत् भावप्रकाशने उक्तं, तत् विद्युत्सञ्चारमहिम्नैव ज्ञेयम्। अत एव नाट्यस्थले जीवातुभूताः सात्विका भावाः आनन्दरोमाञ्चादयः अनुकुर्वता नटेन स्थायिभावशून्येन कथं सञ्चारयितुं शक्याः ? इति चिन्तायां सङ्गीतरत्नाकरादौ नृत्याध्याये इदमेवोक्तमस्ति यत् पञ्चभूतेष्वन्यतमे तत्र तत्र तत्तन्नाडीद्वारा प्राणं सञ्चार्य सात्विकभावाः प्रकाशनीया इति। उक्तं चैतत् ३३३ पृष्ठेपि

अत एव नटेन शान्तानुभावोऽपि रोमाञ्चः गात्रसङ्कोचेन जलतत्वे प्राणसञ्चरणसहकृतेन साधयितुं शक्यः। इतोऽधिकं प्रत्यक्षशारीरके द्रष्टव्यम्। अत्रायं कार्यकारणभावनिष्कर्षः यत् सर्वत्रापि विभिन्न-विभिन्नकार्यकारणभावकल्पनापेक्षया साधारण्येन वेगवतो विद्युतो द्रव्यस्य संयोगे सति भूतेषु गतिर्भवति इति लाघवात् कल्प्यते कार्यकारणभावः। तेन चुम्बकसान्निध्ये लौहगतिः निर्जीवमण्डूकनयनोन्मीलनादि इत्यादौ समानभूता एका विद्युत्शक्तिरेव लाघवात् कल्पयितुं योग्या। सैवाध्यात्मविदः सङ्कल्पशक्तिरपोत्यभिधीयते। केचित् अदृष्टशक्तिपदेनापि तां व्यवहरन्ति।

इयं शक्तिः सङ्कल्परूपा शरीरान्तःस्थितं वायुं प्रेरयित्वा तस्य वेगेन उष्णतां समुत्पादयन्ती शरीरे नादात्मना परिणमति।[1]

विद्याऽविद्यास्वरूपेण सर्वं सदसदात्मना।
जगद्वा येन निर्वृत्तं तदेवैवं विभज्यते॥
संवित्प्रकाशं विद्यादि सूर्यमग्निं विदुर्बुधाः।
असज्जाड्यं तमोऽविद्यामाहुः सोमं मनीषिणः॥ (यो०वा०स०७१।७६-७७-७८)

१ आत्मा निःसङ्ग एवैकः साक्षी सर्वस्य कर्मणः।

जयमङ्गलाक्रोडपत्रम्

अत्रेदं तत्त्वम् जीवस्य ध्यानसहकृतेन सङ्कल्पेन मूलाधारस्थस्य अग्नेरुर्ध्वं यदा ज्वाला भवति तदा तद्वेगप्रयुक्तः नादोऽपि समुदेति इति योगिनामनुभवः उपवर्णितो वर्तते। तदुक्तम्—

'आनन्दलक्षणमनाहतनाम्नि देशे नादात्मना परिणतं तव रूपमीशे।
प्रत्यङ्मुखेन मनसा परिचीयमानं शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः। इति

एवं विधो नादः विराट् पुरुषशरीरनिष्ठः सन् सर्वत्र जगतीतले प्रसरति, जगच्चसञ्चालयति। उपासकैः प्रणवरूपेण यः उपास्यते, सः नादरूप एव। तस्य च व्याप्तिः बहुदूरं वर्तते, तत्र प्रमाणं शारदातिलके द्रष्टव्यम्। उपास्यानां प्रणवेष्वप्यन्तर्हितानाम् अक्षराणां वहुयोजनव्यापित्वम् तान्त्रिकैः साधितमासीत् तत् केवलं शब्दप्रमाणमधिकृत्य उच्यते स्म, परमधुना रेडियोद्वारा तेषां बहुयोजनव्यापित्वं प्रत्यक्षेणापि ज्ञायते। अतः अध्यात्मविदः सङ्कल्पः इच्छारूपः सर्वमपि जगत्—आकर्षितुं विक्षेप्तुं च शक्नोति। एवंरीत्या सन्न्यासाश्रमस्य शमप्रधानस्य ध्यानबलेनैव अभीष्टसाधकस्य राज्यसंरक्षणे महानुपयोगः सिद्धो भवति। अतः राज्यसंरक्षणे न्यायदानम् ततन्निमित्तप्रसङ्गे नैमित्तकस्य सफलं परिवर्तनम्, परिवर्तनेन राष्ट्रस्य संरक्षणम्, विद्युदभिन्नेन सङ्कल्पेन आभीप्सितस्य कार्यस्य सम्पादनम् च अध्यात्मविदां कार्यम्। अतो भारतीयराजनीत्या निर्णायकत्वेन तस्य संस्थानमभिलष्यते सोयमनितरसाधारणः सन्यासाश्रमराजनीत्योः सम्बन्धो बोध्यः।

वानप्रस्थसन्यासाश्रमयोरन्तरम्

ननु वानप्रस्थेन अन्वीक्षा कर्तव्या इति प्रागुक्तम्। सा च विना शमसाहाय्यं यथावन् न भवितुमर्हति। इति वानप्रस्थेनापि शमभावः आलम्बनीय एव। तथा सन्न्यासेन शमस्य प्राधान्यं स्वीकृतवतापि अन्वीक्षणं कर्तव्यमेव। तथा सति अनयोरुभयोः किमन्तरम्? इति चेत्, उच्यते। तत्र तत्र ततद् भावनां प्राधान्यमेवेति! तथाहि—कविर्हि क्वचित् ओजः प्रसादगुणं माधुर्यं बा अभिव्यञ्जयितुं तदनुबन्धिनः शब्दान् योजयितुमऽभिलषति। तदुक्तं चन्द्रालोके[1] द्रष्टव्यम्।

तस्य स्यामिति सङ्कल्पो मन आख्यां लभेत्तु सः॥
विषयेभ्यः प्रयत्नेन मन आत्माऽधितिष्ठति।
मनोऽधितिष्ठति प्राणपूर्वान् पञ्च समीरणान्॥
ते धातून् व्याप्य धमनीमुखेभ्यस्तत्र सम्भवान्।
अग्नीन् प्रज्ज्वलयन्त्येव तेभ्यो नादः प्रवर्तते।' (भा० प्र० ७ अधि०) इति।

१ सर्वैरूर्ध्वैः सकारस्य सर्वे रेफस्य सर्वथा।
मधुरायां समाक्रान्ता वर्गस्थाः पञ्चमैर्निजैः।—

जयमङ्गलाक्रोडपत्रम्

एवं योजने तद्तद्गुणप्रादुर्भावेन रसिकानां चेतसि दीप्तिव्याप्तद्रुतिभेदेन ओजःप्रसादमाधुर्यात्मके वृत्तिविशेषे सुखविशेषः उत्पद्यते । तदुक्तम् गोकुलनाथोपाध्यायैः काव्यप्रकाशविवरणे प्रथम उल्लासे तददोषौ गुणावित्यत्र[1]—

एवं च रसिकैरनुभूतौजोमाधुर्यप्रधानता क्रमेण वानप्रस्थसन्यासाश्रमयोः दृश्यते । तत्र ओजोगुणः वानप्रस्थ, यतः स आश्रमः आन्वीक्षिकीं प्रधानत्वेन मनुते । अतः वानप्रस्थाश्रमिणः काव्यं ओजोगुम्फितं भवति । तत्र चित्तद्रुतिर्नास्ति । अतएव माधुर्यमपि नाऽस्ति । शमप्रधाने सन्यासाश्रमे तु एतद्विपरीता स्थितिर्वर्तते । तेन निर्मिते काव्ये स्वभावतः चित्तस्य द्रवीभावः माधुर्यं च रसिकैरनुभूयते । एतद्विषये एकमुदाहरणं प्रस्तूयते—

पठन्तु कतिचिद्धठात् खफछठेतिवर्णच्छटाः ।
घटः पट इतीतरे कटु रटन्तु वाक्पाटवात् ॥
वयं बकुलमञ्जरीगलदमन्दमाध्वीझरी—।
धुरीणपदरीतिभिः भणितिभिः प्रमोदामहे ॥ इति ॥

अतः सर्वरसानुभवानन्तरं माधुर्यस्य पूर्णतया यत्र अनुभवस्तत्रैव शमे विश्रामः । तदुक्तम्—भावप्रकाशनस्य शान्तरसप्रकरणे—

सर्वप्रकारैः सम्पूर्णकामः सन्तुष्टमानसः ।
प्राप्नोति मुक्ति चरमे शान्तेनैव रसेन सः ॥ इति ।

सोऽयं वानप्रस्थसन्यासाश्रमयोर्भेदः द्रष्टव्यः ।

नीतिसारोक्तसन्यासधर्मान्तरस्यान्तर्भावः

ननु नीतिसारे अन्येऽपि सन्यासधर्मा उक्ताः । ते मूले अपरिगृहीतत्वान् नीतिसारकर्त्रा कल्पिताः किम् ? इति चेन्न । धर्मशास्त्रेषु उक्तत्वात् न कल्पिताः । न च मूलकृतोऽसम्मताः इति वाच्यम्, यथायोग्यं नीतिसारोक्तानां धर्माणां संयतेन्द्रियत्वादौ अन्तर्भावयितुं शक्यत्वात् ।

रहौ द्वेधा तु संयोगः परुषायां शषौ स्वतः ।
लकारश्च लसंयुक्तो ह्रस्वव्यवहितौ रणौ ॥
लकारोऽन्यैरसंयुक्तो लघवो घमसा रसौ ।
रेफाक्रान्ता वर्गयणाष्टवर्गात् पञ्चमादृते ।
ललितायां तथा शेषा भद्रायामिति वृत्तयः ।
कपाक्रान्तस्तवर्गः स्यात् प्रौढायां च कमूर्धता । (च० ६।२३-२४) इति

१ 'एवमासाद्यमाने भावे तिस्रोऽवस्था । आह्लादकत्वं दीप्तिर्व्यापकता चेति त्रयं द्रुतेन दीप्तेन व्याप्तेन चेतसा रसास्वादो गृह्यत इति त एव माधुर्यौजः—प्रसादाख्या गुणाः ।' इति

तत् विशदीक्रियते—

नीतिसारे	अर्थशास्त्रे
१—निष्परिग्रहतायाः	निष्किञ्चनत्वे
२—अद्रोहस्य	अहिंसायाम्
३—समतायाः	सङ्गत्यागे धृतौ वा
४—व्रतचारितामौनयोः	संयतेन्द्रियत्वे
५—समाहारधारणाध्यानानाम्	शमरूपे संयतेन्द्रियत्वे
६—भावसंशुद्धेः	आभ्यन्तरशौचे

अथ येन हेतुना नीतिसारोक्ताः उपर्युक्ताः गुणाः मूलस्थेषु गुणेषु अन्तर्भाविताः स हेतुः विस्तार्य निर्दिश्यते।

(१) सन्न्यासिना परिग्रहो न कर्तव्य इति नीतिसारकारो वदति। तदपि सत्यमेव। सन्न्यासस्य वैराग्याधिकारकत्वात्। 'यदहरेव प्रव्रजेत् तदहरेव व्रजेत्' इति विधानात्, न च जीवनमस्य कथं भवतीति शङ्क्यम्, वानप्रस्थाश्रमप्रकरणे चीराणि किं पथि न सन्ति' इति प्राङ्निर्दिष्ट (पृ० ३१८) भागवतपद्येन जीविकायाः अन्यथाऽपि साधयितुं प्रदर्शितत्वात्। अत एव सन्न्यासाश्रमे स्थितः पूर्णवैराग्यवत्वात् प्रतिग्रहं त्यजति, इति तस्य निष्किञ्चनतयाऽवस्थानमेव शोभनम्। अतः निष्परिग्रहता निष्किञ्चनतायां अन्तर्भाविता।

(२) साधारणधर्मेषु अहिंसादीनां सङ्गृहीतत्वात् विशेषतया सन्न्यासधर्मे अहिंसाप्रधानस्य शमस्य भागवते (पृष्ठ ३१३) निर्दिष्टत्वात् अहिंसायामद्रोहः अन्तर्भावितः।

(३) समता मिथ्यात्वनिश्चयाभावः तद्ध्वनितं गोकुलनाथोपाध्यायैः—काव्यप्रकाशविवरणे द्रष्टव्यम्[१] ("अहौ वा हारे वा" इति श्लोकव्याख्याने। ४ उ० १७० पृ०)

अत एव "ब्रह्मदर्शनं समत्व"मिति इति वदन्ति। केचित्तु 'प्रियाप्रियाविकारित्वं तत्' इति व्याख्यान्ति। तदुक्तम्—उपाध्यायनिरपेक्षायाम् द्रष्टव्यम्।[२]

एवञ्च समता धृत्तौ पर्यवस्यतीति यावत्। अत्र प्रमाणं गीताभाष्येपि द्रष्टव्यम्[३]। उपर्युक्तोभयविध (मिथ्यात्वनिश्चयाभाव प्रियाप्रियाविकारित्व) व्याख्यानेन हर्षशोकाभावयोः हर्षशोककृतविकाराभावस्य वा सङ्गत्यागे पर्यवसितत्वात् विना समवृत्तिं न्यायदानस्य असम्भवदुक्तिकत्वात्। 'समत्वं मूलकृदुक्ते परिव्राजकधर्मान्तर्गते सङ्गत्यागे वा अन्तर्भवतीति हृदयम्।

---

१ अत्र सर्वत्र समदृष्टिशिवशब्दप्रलापादिभिरनुभावैरुल्लासितो हर्षादिव्यभिचारी शमः स्थायी भावः' इति।

२ समता सर्वजन्तुषु समबुद्धिः सर्वप्राणिषूपकार्यपकारिष्वपि'।

३ 'समता रागद्वेषाभावः'।

जयमङ्गलाक्रोडपत्रम्

(४) व्रतचारितेत्यस्य ब्रह्मचर्यस्वरूपत्वात् जितेन्द्रियत्वे अन्तर्भावः, 'ब्राह्मणः पाण्डित्यं निर्विद्य बाल्ये तिष्ठासेत्" इति श्रुतिविधानात्। मौनमपि वाचालताप्रतिषेधरूपं संयतेन्द्रियत्वेऽन्तर्भावितम्। न च उपर्युक्तश्रुतौ मौनमभिहितमस्तीति कथमवगतमिति वाचयम्, तद्भाष्ये तथा निरूपणात्।

(५) नीतिसारे उक्तानि समाहारधारणाध्यानानि प्रधानशमरूपे संयतेन्द्रियत्वेऽन्तर्भावितानि। तत्र कारणं शमस्यैव लक्ष्यत्वम् बोध्यम्,[1] ।

अथ मनसो निग्रहविमर्शः

अत्रेदमवधेयम्—"कृत्स्नंहि शास्त्रमिदं इन्द्रियजयः'। इति वक्ष्यमाणमूलग्रन्थेन संयतेन्द्रियत्वे शास्त्रपारतन्त्र्यं इति निर्णीयते। जितेन्द्रियत्वं, विना मनसः वशीकरणं न सम्भवति। अत एवोक्तं नीतिसारजयमङ्गलायाम् "धारणा मनसो निरोधः" इति। अतः मनसो वशीकरणमावश्यकम्। ननु मनसः एकत्र धारणम् असम्भवि। मनसः अणुपरत्वेन प्रत्यक्षायोग्यत्वात्। इति चेन्न।

धारणाध्यान विमर्शः तद्भेदश्च

धारणायाः स्वरूपे अगवते सति मनसः वशीकरणं ज्ञातुं शक्यते इति धारणा विमृश्यते। तथाहि—मनःसहचरितो वायुः इत्युक्त्या याभिः नाडीभिः वायुः प्रवहति, ताभिरेव मनः प्रवहति इति योगप्रकरणे उक्तमस्ति। अतः वायुगत्यवरोधे तत्सहचरितत्वान् मनसोऽपि अवरोधः भवितुमर्हति। न च वायुरपि नावरोद्धुं शक्यते लौकिकैः इति वाच्यम्, स्वशरीरे सात्त्विकभावानां सञ्चारणाय लौकिकैः नटैः प्राणधारणं नाटकेषु कर्तव्यमिति काव्यप्रकाशविवरणे (पृ० ३३३) उक्तत्वात्। न च प्राणवहा नाड्योपि न प्रत्यक्षसिद्धाः। कदाचिन् नाडीनां प्रत्यक्षत्वेऽपि तन्निष्ठस्य प्राणस्य वायोरतीन्द्रियत्वात् अप्रत्यक्षत्वमिति दोषतादवस्थ्यम् इति वाच्यम्। यासु नाड़ीषु रक्तं प्रवहति, तासां प्रत्यक्षसिद्धत्वात्, रक्तस्य रङ्गवैजात्येन फेनादिप्रदर्शनेन च वायोः प्रवाहस्य उपनायकविधया सुज्ञेयत्वात्, प्राणवहनाड़ीनां प्रत्यक्षं भवितुमर्हतीति प्रत्यक्षशारीरके उक्तत्वाच्च। ननु प्रथमतः वायुप्रवाहस्यानुमानं कथमिति चेदुच्यते।

"पित्तादुष्णाश्च नीलाश्च श्वेता गौर्यः स्थिराःक्रमात"। इत्युक्तरीत्या रक्तवहनाड्यां परीक्षितायां वायुपित्तकफादीनां सञ्चरणमनुमातुं शक्यते। तद्यथा—शिरावेधे कृते सति यदि रक्तस्रावसमये बुद्बुदाकारता प्रत्यक्षगोचरा भवति तदा वायुः सञ्चरति। एवं यदा प्राणः सञ्चार्यते तदा रक्तस्य रक्तता भवति। नाडीनामु-

---

१ तदुक्तम्—

सुनिपुणमुपसेव्य सद्गुरुम् शुचिरनुवृत्तिपरो विभूतये।
भवति हि विनयोपसंहितो नृपतिपदाय शमाय च क्षमः।' इति। नी०सा०

ष्णतायां नीलतायाञ्च पित्तमभिव्यज्यते। श्वेततायां शिरासु कफसञ्चारो भवति इत्यादि। अतः रक्तवहनाडीनां शास्त्रमर्यादामनुसृत्य यदि वक्ष्यमाणनिर्देशानुसारेण नियमनं क्रियते, तर्हि प्राणवायुनियमनं सम्भवेत्। ततश्च मनसोऽपि नियमनं सम्भवति। अमुं विषयं मनसि निधाय योगसूत्रे नारायणतीर्थस्वामिभिः 'देशबन्धश्चित्तधारणा' इत्यत्र व्याख्यातम्[1]— तत्रैव व्यक्तम्।

किञ्च उक्तरीत्या वायोः नियमनेन मनसः नियमनं भवतीति ज्ञात्वैव योगसूत्रे योगसिद्धये साधनत्वेन तपसः पृथगुपन्यासे कृतेऽपि प्राणायामप्रकरणं पृथगुपन्यस्तं साधुसम्मतं बोध्यम्। तदुक्तं नारायणतीर्थस्वामिभिः। (पृ० १०२) इन्द्रियाण्येवेत्यत्र— "एवकारो भिन्नक्रमः तस्माद् सर्वस्यापीन्द्रियजयमूलकत्वात्तदर्थं चलचित्तेन प्राणायामाभ्यासोऽवश्यं कार्य इति भावः" ।।५२।। इति।

एतेन मनसः निरोधे प्राणायामस्यैव मुख्योपायत्वेन अभिहितत्वात् तं विना मनसः जयासंभवेन मनोजयेन आवरणस्य आत्यन्तिकी निवृत्तिः यावन्न भवेत्, तावत् ध्यानमपि नोत्पत्तुमर्हति। इत्यपि मन्तव्यम् तदुक्तं तैरेव तत्रैव द्रष्टव्यम्।[2]

अतः स्पर्शवहनाडया नियम्यमानस्य प्राणस्य इतिकर्तव्यतया प्रतिपादितः अवरोधप्रकारः वक्ष्यमाणः अवश्यमनुसन्धेयः। तथाहि —

यदाहि यस्य कस्यचन विषयस्य प्राप्ति प्रति मनुष्यस्य उत्कण्ठा भवति, तदा तस्य तद्विषयणी इच्छा तीव्रा भवति। सत्यां च तस्यां विजातीयप्रतिबन्धकापसारणपुरःसरम् अभिलाषानुसारेण प्राणसञ्चरणमपि सहजतः कर्तुं शक्यम्। इति सात्विकभावोत्पत्तिप्रक्रियायां नाट्यशास्त्रे दर्शितमस्ति।[3]

यस्मिन् विषये अभिलाषा भवति, स पिषयः मानसमूर्तिरूपेण परिणम्यते। तत्र च अभिलाषोपनयान् मनः संसृष्टं भवति। अत एव तद्बलात् सा मूर्तिः मानसप्रत्यक्षविषयाऽपि भवति। वायोः नियमनार्थं ध्येयभूता मूर्तिः यदि

---

१ आध्यात्मिके नाभिचक्रहृदयकण्ठमुखभ्रूमध्यमूर्द्धानासादौ, बाह्ये पर्वतमस्तकाकाशादौ बन्धश्चितस्य विषयान्तरपरिहारेण यच्चितस्य स्थापनं तदैकाग्र्यम् सा धारणेत्यर्थः।' इति।

२ 'अर्थमात्रस्य प्रत्ययादिवर्जितस्य ध्येयस्य निःशेषेणासन्दिग्धो सर्वात्मना भासो भानं यत्र तथाभूतं अहमिदं चिन्तयामीत्येवंविधाकारशून्यम्। अत एव निर्विकल्परूपत्वेन प्रत्यक्षागोचरत्वात् स्वरूपशून्यमिव न वस्तुतः स्वरूपशून्यम्, अनुमानवेद्यत्वात् तादृशं ध्यानं भावनाविशेषः'।

३ तदुक्तं गौकुलनाथोपाध्यायैः—'सात्विकास्त्वात्मत्वेनाऽध्यस्तस्य प्राणस्य सूक्ष्मभूत प्रकारात्मकाः स्तम्भत्वादिनाऽष्टधा भिद्यमाना व्यभिचारिणोऽपि वाह्यस्वरूपेण परिणामादनुभावतयाऽपि स्पृश्यन्ते (का० प्र० ४।३०)

जयमङ्गलाक्रोडपत्रम्

वायुना सह संसक्ता मानसप्रत्यक्षविषयीक्रियते, तर्हि मूर्तिसम्बन्धात् वायुरपि अलौकिकप्रत्यक्षगोचरो भवति इति अभिलाषापरम्परया वायोरपि प्रत्यक्षत्वं भवति इति । नचेदमशक्यमिति शङ्क्यम् । धूलिकणानां सामुदायिकरूपेण उच्छलनदशायां तत्संयुक्ततया वायोरपि धूलिकणस्य प्रत्यक्षेन सह अलौकिकप्रत्यक्षत्वं नानुपपन्नमिति शास्त्रेषु तत्र तत्र उद्घोषितमस्ति । वायुरूपतया कल्पितानां मूर्तीनां यत्र यत्र प्रदेशे स्थिरः विन्यासः स्यात्, तत्र तत्र वायोरपि स्थैर्यमवश्यमेव भवेत् । इति वायोःस्थैर्यान्मनसोपि स्थिरत्वं संभवितुमर्हम् । मूर्तयश्च याः मनोमय्यो निर्मातव्याः ताः शरीरस्वास्थ्यलाभदृष्ट्या मधुररसाप्लुत्ता निर्मातव्याः । तेन मधुररससञ्चरणात् शरीरमपि स्वस्थं भवति ।

नादः

अथ नादविषये उच्यते । योगः प्राणवायुं यथा स्वायत्तीकरोति तथा उदानवायुमपि स्वेच्छया ऊर्ध्वं सुषुम्नया नाडया ध्यानेन प्रतिलोमगतया सञ्चारयितुं प्रयतते तदा उदानवायुः सुषुम्नया नाडया वह्निना समं ऊर्ध्वमभिमुखोभूय शरीरान्तर्नाडीप्रदेशेन ब्रह्मरन्ध्रं प्रयाति, तदा तन्महिम्ना योगी नादं शृणोति । सोऽयं श्रूयमाणः नादः कुण्डलिनोनाम्ना व्यवह्रियते । सैव च अम्बिका परा प्रकृतिः इति नाम्नाप्यभिधीयते इत्यन्यदेतत्

प्रस्तुते पुनरुच्यते । यदोक्तरीत्या प्राणस्य तदधिष्ठितदेशात् स्वाधिष्ठितप्रदेशे निष्क्रमणं कारयितव्यम्, तत्र तीव्रा इच्छाशक्तिरपेक्ष्यते । इमामेव तीव्रामिच्छाशक्तिं 'विल्पावर' शब्देन आधुनिका वदन्ति । प्राञ्चस्तु सङ्कल्पपदेन ।

युवावस्थायां बलसत्वात् विना ध्यानादिमहिम्नाऽपि शरीरस्य धारणमारोग्यपूर्वकं भवति । वार्धक्ये तु शरीरस्य धारणं नीरोगपूर्वकं कठिनदशामाप्नोति । अतः तदवस्थायां जीवनरक्षणस्य कामनायाः प्राबल्यात् उक्तरीत्या हर्षजनिकां मनः प्रसादजनिकां मधुररसमूर्तिं कल्पयित्वा वृद्धैः स्वाभिलषितप्रदेशे प्राणधारणाव्यापारेण तत्र तत्र रसान् सञ्चार्य वार्धक्यप्रयुक्तदोषकोपस्य अपसारणं कर्तुं शक्यते । यावत्पर्यन्तं अभिलषितप्रदेशे प्राणधारणार्थं मनसः प्रयत्नः अपेक्ष्यते, तावत्पर्यन्तं स प्रयत्नः धारणेत्यभिधीयते । ततः धारणाप्रयुक्तेन अदृष्टेन सहजत एव ध्येयांशे मनः धार्यते, तदा ध्यानमिति व्यपदिश्यते । तत्प्रवाहे च समाधिर्भवति इत्यादि द्वितीयाध्याये तर्कविचारे प्रागुक्तमेव । (पृ० १५०)

तत्तन्मनोभिलषितां मूर्तिं चाभिध्याय स्तम्भिन्यादिभेदा योगसिद्धान्तचन्द्रिकायां वर्णिताः ।

एवंरीत्या धारणस्वरूपे विमृष्टे सति मनसः अतीन्द्रियत्वेऽपि तन्निरोधः न असम्भवदुक्तिकः ।

प्रत्याहारः

नीतिसारे सर्वेन्द्रियसमाहारस्य धारणाध्यानाभ्यां पृथग् ग्रहणं कृतम्

जयमङ्गलाक्रोडपत्रम्

सोऽयं समाहारः योगसूत्रे प्रत्याहारपदेन व्यपदिष्टः उभयोः एककार्यकरत्वात् । तदेतत्प्रत्याहारविमर्शनेन स्फुटीभवति ।

तथाहि—विषयेषु रञ्जनीयेषु कोपनीयेषु वा रूपादिषु इन्द्रियप्रवृत्तौ तत्संयोगो भवति । अतः एतत्परित्यागः कर्तव्यो भवति सोयं असंप्रयोगः, अन्तर्मुख परिणामः प्रत्याहारो वा भवति । तदुक्तं योगसिद्धान्तचन्द्रिकायां द्रष्टव्यम्[१] । अत्रापि पुनः तत्तत्प्रदेशे उपर्युक्ता प्राणवायोर्धारणाऽपि कारणत्वेन ज्ञेया ।[२]

---

१ चित्तस्य विषयो मोहनीयो रञ्जनीयः कोपनीयश्च रूपादिस्तेन संम्प्रयोगस्तदभिमुखता, "तत्परित्यागोऽसंम्प्रयोगो वैराग्येणान्तर्मुखपरिणाम इति यावत् । तस्मिन् सति मधुकरराजमनु मधुमक्षिकाणामिव यश्चित्तस्वरूपानुकार एवेन्द्रियाणां चित्तनिरोधे साधनान्तरं विना तद्वृत्तिनिरोधश्चित्तलक्ष्याभिमुखतारूपः सः । इन्द्रियाणि विषयेभ्यः प्रतीपमाह्रियन्तेऽस्मिन्निति व्युत्पत्तेः प्रत्याहारपदार्थ इत्यर्थः । (पृ०१०२) । 'इन्द्रियार्थेभ्यः शब्दादिभ्यो मनसा निवर्त्येति फलीभूतः प्रत्याहारः । प्राणायामसाध्यमाह दशद्वादशभिर्वेति । द्वाविंशतिसङ्ख्याभिः सञ्चोदनाभिश्चित्ताश्वस्य-प्रतोदनस्थानीयाभिः प्रेरणाभिः प्रतिमानात्मानं जीवं चतुर्विंशादज्ञानात् प्रकृतिसंज्ञकान्तं परं प्रति गन्तुं प्रचोदयात् प्रेरयेत् ।

२ तत्राष्टादसु स्थानेषु वायोः प्रत्याहरणं याज्ञवल्क्य आह-

अष्टादशसु यद्वायोर्मर्मस्थानेषु धारणम् ।
स्थानात् स्थानात् समाकृष्य प्रत्याहारो निगद्यते ॥
सम्पूर्य कुम्भवद्वायुमङ्गुष्ठान्मूर्ध्नि मध्यतः ।
धारयत्यनिलं बुद्ध्या प्राणायामप्रचोदितः ॥
व्योमरन्ध्रात् समाकृष्य ललाटे धारयेत् पुनः ।
ललाटाद्वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् ॥
भ्रूमध्याद्वायुमाकृष्य नेत्रस्थाने निरोधयेत् ।
नेत्राद् वायुं समाकृष्य नासामूले निरोधयेत् ।
नासामूलात्तु जिह्वाया मूले प्राणं निरोधयेत् ।
जिह्वामूलात् कण्ठकूपे ततो वायुं निरोधयेत् ॥
कण्ठकूपात्तु हृन्मध्ये हृन्मध्यान्नाभिमध्यमे ।
नाभिमध्यात् पुनर्मेढ्रं मेढ्राद्वाह्यलये ततः ॥
देहमध्याद् गुदे गार्गि गुदाद् वै ऊरुमूलके ।
ऊरुमध्यात्तयोर्मध्ये तस्माज्जान्वोर्निरोधयेत् ॥
चितिमूले ततस्तस्माज्जङ्घयोर्मध्यमे तथा ।
जङ्घां ततः समाकृष्य यस्त्वेवं धारयेद्धिया ॥—

जयमङ्गलाक्रोडपत्रम्

व्यवस्थितरूपेण हर्षजनकमधुररसमूर्तिः येन न साधितता, सः सङ्कल्पात्मकशक्तिं परिधुन्वन् किं वा साधयेत् ? यत्र किल रसमात्रं लक्ष्यीकृत्य अधीयते, तत्र रसनीयत्वमेव अभ्यस्तं सदा तिष्ठेत् । एवं सति वैराग्यमेव नास्ति । प्रत्याहारोऽपि अत एव दूरं गतः । सदा रसे स्थितः विषयं ध्यायन् ओजसः क्षयमेव कुर्यात् । अतः अन्वीक्षया ओजःसंरक्षणार्थं ध्यानमावश्यकम् । ज्ञानप्रभायामानन्दभानं प्रशमरूपं ओजसः निर्वाहकं भवतीत्यत्र प्रमाणम्—"हृद्यं तत्स्यादि"त्यादि" प्राङ्निर्दिष्टं चरकवाक्यं (पृ० २०४) वर्तते, इत्यलम् ।

विद्याबतोऽपि कर्तव्यांशे अप्रवृत्तिः

ननु सङ्कल्पशक्तेः एतावन्माहात्म्यं विजानतोऽपि फललाभाय विद्यावतः सङ्कल्पे प्रवृत्तिः कुतो न दृश्यते ? इति चेत् उच्यते । विद्यावतोऽपि तदंशे कृतिसाध्यत्वानिर्णयः विद्यावति प्रवृतिं न सम्पादयति । तथाहि-ज्ञानप्रभायां आनन्दमिश्रणमात्रेण सत्वमुद्बुद्धम् परम् तावन्मात्रेण प्रवृत्तिः कथं भविष्यति ? यावज् ज्ञानप्रभायां क्रियाप्रभामिश्रणं न भवेत् । अत एव विद्यावत्सु शक्तेरपि अनुद्गमः मन्तव्यः । तदुक्तम्—

ज्ञानप्रभा च सानन्दा तस्याः सत्त्वं प्रजायते ।
क्रियाप्रभा रजः सत्वात् शक्तिः स्यात् तु तमः प्रसूः ॥ इति ।
(पाठान्तरे–उत्तमप्रसूः)

अतः आनन्दप्रभासंवलितज्ञानप्रभायां क्रियाप्रभामिश्रणं कार्यमिति सिद्धं भवति । तदर्थं विद्यावद्भिर्विवेकः शरणीकरणीयः । तथाहि—यदि शरीरस्य कीदृशं स्वरूपमिति विद्यानुसारेण अधोलिखितरीत्या चिन्तयिष्यते, तर्हि विद्यावद्भिः प्रयत्नेनात्मनि प्रतिभावत्वं कृतिसाध्यत्वनिर्णायकं शक्तिमत्वं च उभयमपि संपादयितुं शक्यं स्यात् तद्यथा—शरीरे सुखदुःखादिसंवेदनं तदनुबन्धिन्यश्च चेष्टाः याः का अपि भवन्तु ताः सर्वाः मस्तिष्कस्य नियमनेनैव सम्भवन्ति शिराद्वारा मस्तिष्केण सह रसनानासिकादिसम्बन्धात् । यावन्ति रसनानासिकादिस्थानानि वर्तन्ते, तैः सह आमस्तिष्कं शिराद्वयं सम्बद्धमस्ति । एवमाहत्य सम्बद्धशिराणां द्वादशसमुदायाः भवन्ति । तद्बोधनार्थं प्रत्यक्षशारीरके तत्तद्सङ्ख्याक्रमोऽपि निर्दिष्टः ततः एव अवगन्तव्यः । एतासु शिरासु काश्चिज्ज्ञानप्रापिकाः, काश्चित् क्रियासंवेदिकाः, काश्चित् उभयसंवेदिकाः तथाविधस्थितेः छिन्नशवशरीरे दर्शनात् । एतेन विद्यावत्सु प्रवृत्तिः

निष्पापः स विशुद्धात्मा जीवेदाचन्द्रतारकम् ।
एतत्तु योगसिध्यर्थं सामस्त्येनापि कीर्तितम् ॥
प्रत्याहारेषु सर्वेषु प्रशस्तमिति योगिभिः ॥ इति ॥
एवमष्टादश प्रत्याहारचोदनाः (पृ० १०३)

जयमङ्गलाक्रोडपत्रम्

कुतो न भवति, इति यः प्रश्नः सोऽपि व्याख्यातो भवति। साम्प्रतं हि केचित् ज्ञानार्थं प्रयतन्ते, ते उपर्युक्तरीत्या ज्ञानसंवेदिकासु नाडीषु चेष्टनं चिकीर्षन्ति, अपरे तु क्रियासंवेदिकासु नाडीषु। अतः यत्र क्रिया वर्तते, तत्र ज्ञानं नास्ति उद्बुद्धम्, यत्र ज्ञानमुद्बुद्धम् अस्ति तत्र नास्ति क्रियाया उद्बोधः, इतरनाडीषु स्वकार्यातिरिक्तसम्पादनासामर्थ्यात्। इति कृत्वा विद्यावतां क्रियासम्पादिकासु शिरासु चेष्टाऽभावेन सङ्कल्पे कृतिसाध्यत्वानिर्णयेन न प्रवृत्तिः। तस्मात् क्रियाज्ञानेभयसंवेदिकाः याः नाडयः वर्तन्ते, तासु चेष्टनमावश्यकम्।

बुद्धिमत्वं कृत्यधीनम्

अपरे पुनरत्र बुद्धिमत्त्वं दैवाधीनं मत्वा ग्लानिमनुभूय अकर्मण्यतास्थितिं प्राप्ता दृश्यन्ते। तदपि न। बुद्धिमत्त्वं हि न दैवाधीनं वस्तु, अपि तु यथा हलेन आकर्षण-समये क्षेत्रेषु सीतायां मध्ये मध्ये गर्तसदृश्यः रेखाः भवन्ति तथा यस्य मस्तिष्के-गर्तसदृश्यः अधिकमात्रा रेखाः सम्भवन्ति तस्य प्रतिभावत्वं क्लृप्तम्। यस्य तु नास्ति तथाविधरेखासमूहवत्वम्, सः प्रतिभाहीनो भवति। यदि च अधोलिखित-रीत्या प्रयत्नः क्रियते, तर्हि मस्तिष्के रेखारहितेऽपि स्थले गर्तसदृशरेखावत्वं सम्पादयितुं शक्यते। तथाहि उदानवायोः ध्यानमार्गेण सुषुम्नानाडया विशिष्टोत्कण्ठामहिम्ना ऊर्ध्वमुच्छलनं सम्पाद्यते, तर्हि मस्तिष्के कर्णिकायां हलनिर्मित-सीतासदृशीनां रेखानां समुत्पत्तिः भवितुमर्हति। तथा च बलवर्णस्मृतिवाक्प्रवृत्तिः सम्भवितुमर्हति। एवंविधः यथा यथा आन्वीक्षिकीप्रस्तुतः विवेकः अभिवर्धते, तथा तथा उदानवायोः ऊर्ध्वगामित्वं भवति। सुषुम्नामार्गेणोदानवायोः उच्छलनमेव विवे-कात्मकं ज्ञानं वर्तते। अतः प्रत्यक्षशारीरके निर्दिष्टाः ज्ञानप्रत्यायिकाः क्रियाप्रतिपा-दिकाः उभय संवाहिकाश्च याः शिराः भवन्ति, तासां स्थानानि समालोच्य गुरुभिः शिष्ये वर्तमानानां ज्ञानक्रियोभयसंवाहिनीनां नाडीनां सञ्चालनं यादृग्विधेन उपदेशेन कर्तुं शक्यं तथाविधोपदेशे शिष्येण प्राप्ते सति मित्रत्वेन परिगणितः शिष्योऽपि स्वोद्दिष्टा-र्थस्य प्राप्तये कृतिसाध्यत्वमिष्टसाधनत्वेन सह अनुमाय पूर्वनिर्दिष्टं सङ्कल्पं फलो-पधायकम् स्वायत्तीकर्तुमवश्यं शक्नोतीति मन्तव्यम्। शेषं तु योगसूत्रे वैशेषिकभाष्ये प्रत्यक्षशारीरके भावप्रकाशने च अभ्यूह्यम्।

अन्विताभिधानादिशाब्दबोधविवेकः

अत्र केचित् ज्ञानपरिचायिकानां नाडीनां शरीरे वर्तमानानां स्वरूपं श्रुत्वा प्रसङ्गात् समीक्षन्ते। तद्यथा—सामान्यतया ज्ञानं शरीरेषु शिरासंवेदनेन यथा परिचाययितुं सुशकम् अनुभवसिद्धं च, तथा शास्त्रेषु उववर्णिताः शाब्दबोधस्य अन्तर्गताः (कार्यान्विताभिधानजः, अन्विताभिधानजः इत्यादयः) अनुभवाः लोकेषु अनुभवसिद्धाः भवन्ति किम्? इति चेद्नुभवन्त्येव। तथाहि—पूर्वं हि उदानवायुः सुषुम्नानाडया तत्र तत्र प्रदेशे मूर्तिध्यानबलात् यदा ऊर्ध्वमुच्छलति; तदा

जयमङ्गलाक्रोडपत्रम्

तेन सह उदर्यः वह्निरपि ऊर्ध्वमुत्तिष्ठति, ब्रह्मरन्ध्रं च गन्तुं समीहते। अस्यामवस्थायाम् उदर्याग्नेः ऊर्ध्वज्वलनेन उत्पद्यमानः नादःकुण्डलिन्याख्यः ज्ञानरूपः योगिभिः श्रूयते। संसारिभिस्तु अव्यक्ततया अवगतः मध्यमास्थानापन्नः यदा वैखर्यवस्थायां प्राप्तो भवति, तदा स श्रूयते इत्यादि आकरे प्रपञ्चितमस्ति। तेनेदं भवति—यत् एकमपि तथाविधं ज्ञानं नास्ति यत्र नादो न वर्तते। अस्य नादस्य विषये शास्त्रकर्तृभिः इदमपि सिद्धान्तितम् यत् मध्यमावस्थायां स्थिताः सर्वेऽपि पदार्था अव्यक्तरूपेण भासन्ते, यथा बीजे सूक्ष्मरूपेण स्थिताः पदाथा दृश्यन्ते, तथा तन्नादगताः पदार्था अपि अनुव्यवसायार्हा न भवन्ति। यदा किल पुनः सूक्ष्मरूपेणावस्थितानां भानं भवतु इति मनुष्योऽभिलषति तदा तद्-भानार्थम् इतरेषां कारणकलापानां, बीजेन सह अपेक्षितानां पवनभूम्युष्णताजला-दीनां इव संयोजनं नादेन सह, प्रमात्रा कर्तव्यं भवति। तत्कारणेषु इन्द्रिय-हेतु-सादृश्य-शब्दार्थापत्यादयः यथायथं ज्ञाताऽज्ञाततया कारणत्वेन अनुव्यवसायार्थमपेक्ष्यन्ते। तत्रापि इन्द्रियसन्निकर्षादिना प्रत्यक्षम् नादः, व्याप्तिज्ञानबलेन अनुमितिर्नादः, शब्दज्ञानेन शाब्दबोधात्मको नादः एवमर्थापत्यादयोऽपि स्वजनितनादे कारणानि भवन्ति।

बोधवैजात्यम्

केचन शब्दश्रवणेन शाब्दबोधं विजातीयत्वेन स्वीकर्तुं सङ्कोचमनुभवन्ति। तन्न—

पश्यतः श्वेतिमारूपं ह्रेषाशब्दं च शृण्वतः।
खुरविक्षेपशब्दाच्च श्वेतोऽश्वेतो धावतीति धीः॥

इति न्यायेन यत्र नादे ते ते पदार्थाः स्वस्वस्थाने स्थिता अपि पारस्परिका-काङ्क्षावशात् तत्तत्सम्बन्धबोधकव्यक्तकारणाभावेऽपि विशिष्टान्वयमुपर्युक्तमश्वद्रष्टृषु पदं विनाऽपि अनुभावयन्ति इति अनुभवसिद्धम्, तथा शब्दश्रवणेन सञ्जायमानः अनुभवोऽपि प्रत्यक्षाद्यनुभवापेक्षया पृथग्विजातीयोऽस्तीति अकामेनाऽपि मन्तव्यम्। तथाहि—यथा जगदीशादिभिः शब्दशक्तिप्रकाशिकाग्रन्थादौ नञर्थबोधकस्थले निरवच्छिन्नविशेष्यकत्वस्य शाब्दबोधे निर्णीतत्वात् शाब्दबोधस्य प्रत्यक्षाद्य-पेक्षया विजातीयत्वं साधितम्। तथा अन्वयव्यतिरेकमहिम्ना सञ्जातेपि अनुभवे (अनुमित्यादौ) अनुभूतेपि च विषये मनसः दाढर्यं तस्मिन् निष्कंपता च न मन्यते लोकैः। तथोक्तं कालिदासेन—

आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि हि शिक्षितानामात्मन्यप्रत्ययं चेतः॥ इति।

अत एव जातेऽपि रामदर्शने सन्तशिरोमणितुलसीदासः 'मया रामो न दृष्टः' इत्येवं जानानः खिन्नमना एवाभूत् परं यदा सः—

'चित्रकूट के घाट पर भई सन्तन की भीर।
तुलसीदास चन्दन घिसे तिलक देत रघुवीर॥

जयमङ्गलाक्रोडपत्रम्

इति हनुमद्वाक्यं श्रुतवान्, तदैव भक्तशिरोमणिः रामदर्शनावसरे निःसंदिग्धान्निष्प्रकंपावस्थां च प्राप्तः एवंरीत्या सन्देहापाकरणसमर्थस्य शाब्दबोधे सत्वात् प्रत्यक्षाद्यपेक्षया तस्य पृथग् विजातीयत्वमस्त्येव। एवमेव प्रत्यक्षशारीरकेष्वपि पृथग्जातीयानां ज्ञानानां चिह्नान्यपि मस्तिष्के विभिन्नानि सन्ति इति उक्तत्वात् शाब्दबोधादीनां पृथग् जातीयत्वं प्रत्यक्षदृष्ट्याऽपि नापलपितुं शक्यते। एतस्मादेव कारणात् अनुमित्यादयोऽपि नादात्मकाः भृकुटिसमुन्नयनाद्यनुभावभेदेन पृथग् जातीयाः सन्ति इत्यपि निर्णीतम्,[1] तद्युक्तमेव।

संबन्धस्य बोधविषयता

अत्रेदमनुसन्धेयम्। शब्दश्रवणानन्तरं तत्तत्पदार्थानां मध्यवर्ती आकाङ्क्षागम्यः यः सम्बन्धः, सः अनुभवानुरोधेन क्वचित् परम्परासंबन्धः, क्वचित् साक्षात्सम्बन्धश्च भवति। कथमिति अधोलिखितदृष्टान्तानुसारेण स्फुटी क्रियते। घटं प्रति दण्डः कारणम् इति सिद्धेऽनुभवे दण्डे विद्यमानायाः कारणतायाः अवच्छेदकः घटदण्डयोः मध्यस्थितः सम्बन्धः न साक्षाद् भवितुमर्हति, किन्तु स्वजन्यभ्रमिजन्यभ्रमिमत्तारूपः परम्परात्मको भवति, प्रामाणिकश्च। न चैवं रीत्या सर्वत्र सर्वेषां सम्बन्धो भवत्विति वाच्यम्। नैयायिकैः घटः दण्डस्य कारणमित्याद्यनुभवसिद्धस्थलेष्वेव अनुभवानुरोधेन मध्यस्थितेषु आकाङ्क्षाभास्येषु परम्परासम्बन्धस्वीकारात्। कपालद्वयसंयोगनिष्ठघटकारणतावच्छेदकः सम्बन्धः समवायः घटाधिकरणकपालतत्संयोगयोः मध्ये स्थितो भवति स च साक्षात्, एवञ्च कार्यकारणभावो वा भवतु, अन्वयबोधो वा भवतु उभयत्रापि द्वयोः पदार्थयोः अन्तराले वर्तमानः साक्षात् परम्पया वा भासमानः संसर्गः आकाङ्क्षामात्रेण भास्यो भवति। अतोऽन्वयबोधस्यापि विलक्षणविजातीयत्वमस्तीति सिद्धं भवति।

अथ पूर्वप्रतिज्ञानुसारेण शाब्दबोधान्तर्गतानामनुभवानां अपि वैजात्येनास्तित्वं साधयितुमुपक्रम्यते। तथाहि—यथा अन्वयबोधः विजातीयः तथा विशिष्टबुद्धिः, विशिष्टवैशिष्ट्यमर्यादां नातिशेते' इत्यपि अनुभवसिद्धम्। तत्र वैशिष्ट्यस्य प्रतियोगी प्रतियोगितावच्छेकं वा किं तत् ? इति यदा जिज्ञास्यते, तदा तत्तदाचार्याः स्वस्वगुरुपरम्परानुसारेण अधिकारिभेदेन सम्बोध्यस्य अवस्थाभेदेन च वैशिष्ट्यप्रतियोगी, प्रतियोगितावच्छेदकं च पृथक् पृथक् शाब्दबोधे भातीति निरूपयन्ति। एवंरीत्या अधिकारिभेदेन विशिष्टवैशिष्ट्यमर्यादां निरूपयन्तः प्रभाकर-भाट्ट-नैयायिकाः स्वकीयं मतं प्रकाशयन्तः आसते। तत्र शब्दश्रवणानन्तरं कार्यान्वितमर्थमनुभवन्ति प्राभाकराः। भाट्टा अन्वितमात्रम्। नैयायिकास्तु अनन्वितमिति। एतन्मतभेदेन उपवर्णितेषु शाब्दबोधेषु विजातीयताबीजं तत्तच्छास्त्रकर्तॄणां तत्तदनुभवएव।

---

१ वितर्कोद्वर्तितपुटा तथैवोत्फुल्लतारका।
अधोगतविकारा च दृष्टिरिष्टा वितर्किता॥

जयमङ्गलाक्रोडपत्रम्

तत्रापि किं बीजमिति चेत् साहित्यप्रक्रियया तत् उच्यते। शाब्दबोधो हि साहित्य-शास्त्रे मतिभावेषु परिगणितः चित्तसन्तोषादिभिः समाजस्य पुरतः अभिव्यञ्जयितुं शक्यते इति निर्विवादम्। तदुक्तम् सङ्गीतरत्नाकरे—

'अपूर्वप्रतिभानं स्यात् मतिस्तां तु विभावयेत्।
अन्वयव्यतिरेकोत्थैः प्रत्ययैः शास्त्रचिन्तनैः।
ऊहापोहैश्च विविधैः अथ तामनुभावयेत् इति।

तथा भावप्रकाशनेऽपि—

नानाशास्त्रार्थनिष्पन्ना मतिः स्यात्श्रुतधारिणी।
संशयच्छेदनैः शिष्यहिताधानार्थदर्शनैः॥
वर्ण्यते चित्तसन्तोषात् विदग्धव्यवहारतः। इति।

अभिव्यञ्जन प्रकारश्च व्यवहारेषु दृष्टः। तद्यथा—

पण्डितास्तदितरे च तेषां तेषां पदानां तत्तदर्थेषु शक्तिं प्रयोजक प्रयोज्यवृध्दानां व्यवहारं दृष्ट्वा अवजानन्ति। सोऽयं शक्तिपरिचयः बालाल्पज्ञ-विदग्धैस्सर्वैरपि समानतया क्रियते इति वक्तुं न शक्यते। बालकः वाक्यार्थम-जानानः केवलं पदानि श्रुत्वैव न वाक्यार्थं विजानति। अपितु 'गामानय' इति कस्यचित् वाक्यं श्रुत्वा प्रयोज्यवृद्धः सास्नादिमद्गवानयनाय प्रवर्तते। 'गां बधाने' ति श्रुत्वा तु तस्यैव प्राणिनः बन्धनाय प्रवर्तते। इत्येवं व्यवहारवैजात्यमेकविध प्राणिसम्बन्धिनं दृष्ट्वा बालकः गोपदस्य कार्यान्वितायां गवि शक्तिं गृण्हाति। इत्येवं-विधेन बालकस्य व्यवहारेण कार्यान्वितानुभवस्य वैजात्यं स्थिरं भवति। इति प्राभा-कराः। अपरे पुनः प्रयोज्य-प्रयोजकवृद्धव्यवहारदर्शनमन्तरा नाट्यादौ रामकृष्णादीनां विविष्टवेषं दृष्ट्वैव बुद्धिवैशद्यात् 'रामोऽयम्', 'कृष्णोऽयम्' इत्यादिरीत्या प्राति-पदिकार्थमनुभवन्ति। तन्महिम्ना विशेषणीभूतपदार्थसंसर्गेण सह प्रातिपदिक पदार्था-नुभवं दृष्ट्वा नामार्थयोः शक्तिग्रहः साधारणेषु जातः, सोऽन्वितविषयकत्वात् अन्वितानुभवः इत्येवंवादिनो भाट्टाः अन्विते शक्तिं गृण्हन्ति।

एतेषां सामाजिकानां तथाविधां स्थितिमालोच्य अभिनेतारोऽपि सुखादिकं हर्षादिव्यापारेण अभिव्यञ्जयन्ति। अन्ये च परोपदेशं श्रुत्वा तावन्मात्रेण सुखमात्र-मनुभवन्ति। एवंविधायामवस्थायाम् एतेषु सामाजिकविशेषेषुयः अनुभवः जातः सोऽनन्वितपदार्थस्यैव इति कृत्वा नैयायिकादयः अमुमनुभवविशेषमालोच्य अनन्विते शक्तिमभिदधति। तदेवेदं अनन्विताभिधानपदेन व्यपदिश्यते।

एवं च साहित्यशास्त्रोक्तरीत्या तत्तदवसरेषु अन्विताभिधानादिजा अनुभवादयः क्लुप्ताः शाब्दबोधेषु अन्तर्गता लोकेषु अनुभवसिद्धाः सन्ति। इत्यलं, सङ्कल्पे कृतिसाध्यत्व विचारप्रसक्तानुप्रसक्तचिन्तया। प्रकृतमनुसरामः।

(६) (पृ० २३१) भावसंशुद्धिः 'अविचिकित्सा' इति नीतिसारीय जयमङ्गलायाम, उपाध्यायनिरपेक्षायां तु 'प्राणिषु अद्रोहबुद्धिः' इत्युक्तम्, अतस्तस्या उभयसाधारण्येन अर्थशास्त्रानुसारेण आभ्यन्तरशौचे अन्तर्भावो बोध्यः।

स्वधर्मः स्वर्गाय [1]आनन्त्याय च। तस्यातिक्रमे [2]लोकस्सङ्करादुच्छिद्येत ॥[3]

जयमङ्गलाकाण्डपतम्

(पृ० २२३) रागद्वेषादिप्रहाणात् इति। जयमङ्गलाव्याख्यानेन नीतिसारोक्ता भावसंशुद्धिः आभ्यन्तरशौचे अन्तर्भावितेत्युक्तं प्राक् तत्रायं प्रश्नः।

भावसंशुद्धेः उपयोगिता

ननु भावसंशुद्धेः राजनीतौ किं प्रयोजनमितिचेदभिधीयते। मनसि हर्षमुत्पाद्य भुक्तस्याहारस्य यथावत् पाचनं भावसंशुद्ध्य तया शरीरस्य संरक्षणं विधातुं शक्यते इति तस्याः सप्रयोजनत्वं बोध्यम्। तथाहि—भुक्तस्य परिणामार्थं हि यानि पाचनयन्त्राणि शरीरे उन्नीतानि, तानि स्वकार्यकरणे क्षमानि तदा भवन्ति यदा मनः हर्षसमन्वितं स्यात् इति शरीरविज्ञानवादिभिः उच्यते, अनुभूयते च। तस्मात् भावसंशुद्धिः परिणामहेतूनां पाचनयन्त्राणामुल्लासाय उपयुज्यते। उक्तसंशुद्ध्यभावे जीवः कामक्रोधादिपराधीनो भूत्वा सदा आत्मनि न्यूनतामनुभवन् न हृष्यति ततो हर्षाभावः ततो मनसोऽपि विषादः तेन मन्दाग्निप्रसङ्गो नियतः ततः पाचनक्रिया अनुपपन्ना भविष्यति इति अविचिकित्सारूपा भावसंशुद्धिः अवश्यमपेक्ष्यते।

न च सत्यामपि भावशुद्धौ अनुष्ठानावसरे हितसाधनत्वं केनापि कारणेन यदि बाधितं भवेत्, तर्हि पुनरपि हर्षाभाव एव स्यात् इति वाच्यम्। एतदर्थमेव नीत्यनुष्ठानस्य अर्थशास्त्रे अभिधानात्। नीतिर्हि प्रत्यक्षादिप्रमाणत्रयसमुच्चयेन यथावत् हितसाधनत्वमनुमाय, यथोचितं देशकालौ च समीक्ष्य अनुष्ठिता सती न कदाचिदपि हितसाधनताबाधमवतारयितुं शक्नुयात्। एवं च सर्वानुमतत्वात् कार्यकारणभावस्य अबाधितत्वात् आनन्दप्रदत्वाच्च हर्षसाधनत्वं नीत्यनुष्ठाने नियतम्। (शेषं पृ० २८) द्रष्टव्यम्! अतः भावसंशुद्धेन अविचिकित्सेन मनसा येन अनुष्ठीयते, तस्य सङ्कल्पः अवश्यं भुक्तपरिणामहेतूनि पाचनयन्त्राणि सञ्चालयितुं समर्थो भवति। अत एव दम्भादिरहित एव भावसंशुद्धः सङ्कल्पः कार्यकारी भवतीति धर्मस्य व्याख्यानावसरे वैशिषिक भाष्ये उक्तम्। तत् पृ० २७२ द्रष्टव्यम्।

एतदेवाभिप्रेत्य भावसंशुद्धिपदम् अविचिकित्सापरतया व्याख्यातम्। एतेन यस्य भावसंशुद्धिर्नास्ति, स रागद्वेषयोः पतितः शरीरान्तर्वर्तिनः पाचनयन्त्रस्य विघटने सहायको भूत्वा जीवने क्लिश्यति इति रागद्वेषयोः अन्तर्भावः क्लेशे योगसूत्रेण निरूपितः सोपपत्तिको भवतीति बोध्यम्। इति दिक्।

श्रीमूला

स्वधर्मः किमर्थमादर्तव्यस्तत्राह—स्वधर्म इति स्वर्गाय परलोकसुखाय इति।

नी० टी० १. मोक्षाय।
२. चतुर्वर्णाश्रमः।
३. दुर्भिक्षव्याधिमरकादिभिः।

श्रीमूला

आनन्त्याय च इहाविनाशाय मोक्षाय वा। अतिक्रमे उल्लङ्घने। सङ्करादुच्छिद्येत अनुष्ठातृव्यवस्थाविरहेण कर्मसङ्कराद् वर्णसङ्कराच्च उत्सादं प्राप्नुयात्। अयमाशयः– वर्णाश्रमधर्मा हि यथोक्ता अविवादसिद्धलोकयोगक्षेमहेतुभावाः तदुपासकबीजक्षेत्र-सङ्क्रान्ततदनुष्ठानवासनासनाथैः तत्तद्वर्णाश्रमिभिरेव स्वकुलधर्मत्वबुद्ध्या भक्तिश्रद्धा-पुरस्सरमनुष्ठीयमानाः सन्तः सौष्ठवविशेषं प्रतिपत्तुं लोकोपकारे च कमपि कमप्यति-शयमाधातुं क्षमन्ते। ते चेदव्यवस्थमन्यैः कथञ्चिदनुष्ठीयेरन् ध्रुव तर्हि सौष्ठवाद्धी-येरन्, लोकोपकारे च नातिशयमादधीरन्, अनुष्ठानबाह्यतां च क्रमेणासादयेयुरिति धर्मव्याकुलीभावाल्लोकविनाशः स्यादिति।

वैदिकसिद्धान्तसंरक्षिणी

अनुष्ठितस्वस्वधर्मफलमाह –स्वधर्म इति। स्वीयो नीत्यात्मको धर्मः इत्यर्थः। स च नीतिशास्त्रस्य प्रस्तावात् अष्टादशविद्यास्थाननिर्णीतो ग्राह्य इति भावः। अधिकारिभेदेन अनुष्ठितस्य धर्मस्य फलं द्विविधं भवति स्वर्गः मोक्षश्च।[1] तत्र यः अनादिकालात् प्रवृत्तैः संस्कारैः बहुमात्रया विषयसुखाभिलाषुकः तेनानुष्ठितः स्वधर्मः तदनुष्ठातारं स्वर्गं प्रापयति। यश्च तथाविधाभिलाषाभाववान् तेन अनुष्ठितः स्वधर्मः आनन्दात्मकं मोक्षस्वरूपं फलं प्रापयति।

प्रयोजनमनुद्दिश्येति इति टिप्पण्युद्धृत भाष्योक्तिमनुसन्धाय आह स्वर्गायेति।

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरं
अभिलाषोपनीतंच तत्सुखं स्वःपदास्पदम्।

इत्युक्तसुखस्वरूपः स्वर्गो बोध्यः।

अननुष्ठिते धर्मे दोषमाह तस्येति। स्वधर्मस्येत्यर्थः। अयं भावः वैदिकधर्मसत्व-गुणयोः साहचर्यं नियतमिति (पृ० २०७) प्राक्साधितमस्ति। यथा यथा वैदिकं धर्मं लोकोऽतिक्रामति तथा तथा सात्विकमनोवृत्तिसूचकानां प्रागुक्तानां (२३४ पृ०) आस्तिक्यादि गुणानां ह्रासः संपद्यते। तदानीं सत्वस्याभिभवो भवति तमोगुणश्चाभिवर्धते। नास्तिक्यं अज्ञानं रागश्च तमसा सह प्रवर्धन्ते तेन मर्यादातिक्रमणात् जनतायां अशुचिता, ततः अशुचिपदार्थेष्वनुरक्तिः प्रसूयते, ततः मातापितृदोषस्वाहार-

---

१ तदुक्तं—वैशेषिकदर्शन—प्रशस्तपाद भाष्ये—कर्तुः प्रियहितहितमोक्षहेतुः अतीन्द्रियोऽन्त्यसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगविशुद्धाभिसंन्धिजः वर्णा-श्रमिणां प्रतिनियतसाधननिमित्तः।

संविज्ञान विरोधी—दृष्टं प्रयोजनमनुद्दिश्यैतानि साधनानि भावप्रसादौचा-पेक्ष्यात्ममनसोः संयोगाद्धर्मोत्पत्तिरिति-(धर्मनिरूपणे गुणनिरूतणान्तर्गते) टी० दृष्टं चेति लाभपूजादि।

वैदिकसिद्धान्तसंरक्षिणी

कर्मप्रभृतिषु अशुचितया मानसं वाचिकं शारीरं च साङ्कर्यं समुत्पद्यते। तत्प्रयुक्त गुणप्रातिलोम्यप्रदोषगुणाभावादियुता सन्ततिः समुत्पद्यते। तेन च दौर्बल्यं अप्रतिभावत्वं मानमादौ चापल्यं च जन्मत एव दृश्यन्ते। तत्संपर्कात् पराभियोगासहा सन्ततिः केवलं विषयसुखोपरुद्धा क्रमशीर्णकूलमूलसन्तति. शीर्यते इति राज्यं विनश्यति इत्येतत् राजपुत्ररक्षणप्रकरणे विशदीकृतम् इति।

तदेवाह लोक इति। लोकः चतुर्वर्णाश्रमः। सङ्करादिति। कर्मसङ्करात् वर्णसङ्कराच् च उच्छिद्येत। गुणानां आभिगामिकानां आश्रितोपकारिणां विनाशात् इति शेषः।[1] इदमुपलक्षणम्। धर्मातिक्रमे लस्यापस्मारादि दोषोपि अत्र न विस्मर्तव्यः कुष्ठोन्मादरोगा अपि संभवेयुः इति पृ० १८८) प्राक्प्रपञ्चितम्। तथा मरकहुताशनजलव्याधयोपि धर्मातिक्रमे प्रजापीडनादयश्च समुत्पद्यन्ते। तदुक्तम्—

"दैवान्यष्टौ महाभयानि अग्निरुदकं व्याधिः दुर्भिक्षं मूषिका व्यालाः सर्पाः रक्षांसीति"। अ० अ० ४ अ० ३ प्र० ७८-इति।

जयमङ्गला

स्वधर्म इति। स्वग्रहणं सामान्यनिरासार्थम्। यथायोगं कश्चित् स्वर्गाय कश्चिद् आनन्त्याय मोक्षाय। न विद्यते अन्तो अस्येत्यनन्तः, मोक्षः। अनन्त एव आनन्त्यम्। स्वर्गस्य अन्तवत्वात्। तस्य धर्मस्य, अतिक्रमे लङ्घने न केवलं फलाभावः, अपि तु लोकः सङ्करादुच्छिद्येत। नरकं यायाद् विनश्येद्वा। सङ्करो- द्विविधः—"कर्मसङ्करो वर्णसङ्करश्च। तत्र पूर्वः शूद्रस्य द्विजकर्म, द्विजस्य आपत्कल्पवर्जं शूद्रकर्मेत्यादि। द्वितीयो ह्यन्तरालाः प्रतिलोमानुलोमाः।

जयमङ्गलाक्रोडपत्रम्

धर्मनीतिस्वरूप भेदः

स्वधर्म इति—ननु धर्मनीत्योः को भेदः इति चेन् निरूप्यते। वेद बोधितेष्टसाधनताक इति धर्मः व्याख्यायते। नीतिस्वरूपं तु प्रत्यक्षादि-

---

१ तदैव गीतायाः—

धर्मे नष्टे कुलं कृत्स्नं अधर्मोऽभिभवत्युत।
अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः॥
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः।
सङ्करो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः॥
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः। इति।

जयमङ्गलाक्रोडपत्रम्

प्रमाणत्रयसमन्वितेष्टसाधनताकत्वम् इति । तेन पारलौकिकफलमात्रसाधने धर्मे चार्वाकबौद्धादयः प्रत्यक्षानुमानप्रमाणप्रमितत्वाभावात् सन्दिग्धाः सम्भवितुमर्हन्ति, नीत्यनुष्ठाने तु न तथा, चार्वाकबौद्धानां सन्तोषार्थं प्रत्यक्षानुमानप्रमाणद्वयसन्निवेशः आस्तिकानां सन्तोषार्थं अनुष्ठीयमानायां नीतौ अबाधितफलप्राप्त्यर्थं शब्दप्रमाणस्यापि सन्निवेशो नीतिलक्षणे कृतः । अत एव वेदविहितेषु अनेकेषु अर्थेषु यावानर्थः प्रत्यक्षानुमानप्रमाणाभ्यां हितायोपयुज्यते तावान् आयुर्वेदाद्युपयुक्तः वेदप्रणिहितोः अर्थः वाग्भटादिभिः स्वग्रन्थेषु निरूपितः बौद्धचार्वाकप्रभृतीन् नापरञ्जयति । चार्वाकोऽपि नीतिक्रमाचारेण वर्तनं धर्मः इत्यभिप्रायेण धर्मं सङ्गृह्णातीति न तिरोहितं सर्वदर्शनसङ्ग्रहदर्शिनाम् । अत एव सर्ववादिसम्प्रतिपन्नत्वात् प्रियत्वाच्च नीतेर्लक्ष्मीस्वरूपत्वं नारायणस्य धर्मरूपत्वं शास्त्रेषु उच्यते । तद्यथा—

'राजनीतिर्महालक्ष्मीः धर्मो नारायणः स्वयम्' इति ।

अर्थात् ब्राह्मणब्रह्मचारिणोरिव धर्मनीत्योः स्वरूपं बोध्यम् ।

यदि च नीतिः प्रत्यक्षानुमानप्रमिता नाभविष्यत्, तर्हि अस्य सुश्रुतादिग्रन्थवत् विशेषतया आलोढनं जैनबौद्धादिः नाऽकरिष्यत् । इदमेव नीतिशास्त्रस्य महत्वं यत् अनेकैः जैनबौद्धैरपि, वैदिकधर्मानुयायिभिः स्वीकृतं नीतिसागरं मथित्वा अर्थशास्त्रस्य समादरो नीतिवाक्यामृतादिग्रन्थनिर्माणेन प्रदर्शितः, तथैव सुश्रुतग्रन्थादि विषयेऽपि बोध्यम् । एतत्सर्वमन्तर्निगूढं तत्वममभिप्रेत्य धर्मनीत्योः सामानाधिकरण्यं भगवता अवतीर्य स्थापितम् । तदुक्तम् —

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।

इति गीताव्याख्याने उक्तं ज्ञानेश्वरमहाराजैः—'धर्माशी नीतीशी शेज भरी' इति । न च 'वेदेन धर्मनीत्योः इदं स्वरूपं न मन्यते' इति वाच्यम् 'मतिश्च मे सुमतिश्च मे' इति श्रुत्या धर्मनीत्योः स्वरूपप्रगटनात् । मानसरामायणेपि—

जहं सुमति तहं संपति नाना, जहं कुमति तहं विपति निधाना ।' इति

न च 'एवंविधस्य नीतिस्वरूपस्य समादरः आधुनिकैः विद्वद्भिः न क्रियते' इति वाच्यम्, तुलसीदासमहाभागैः स्वकृतमानसे तत्र तत्र नीतिस्थापनस्य प्रदर्शितत्वात् ।[१] शेषं पृ० २८ द्रष्टव्यम् ।

---

१ दोहा—'देश कालु लखि समऊ समाजू । नीति प्रीति पालक रघुराजू ।
सब नर कल्पित करहि अचारा । जाइ न बरनि अनीति अपारा ।
सहज कृपन सन सुन्दर नीति ।'
'जब जब होइ धर्म के हानि । बाढहि असुर अधम अभिमानी ।।
करहि अनीति जाइ नहि बरनी । सीदहि विप्र धेनु सुर धरनी ।।
तब तब विभु धरि विविध सरीरा । हरहि कृपानिधि सज्जनपीरा ।।—

जयमङ्गलाक्रोडपत्रम्

न च 'राजनीतिः आक्रमणाय प्रवर्तते इति दृश्यते । तन्न्यायेन भारतीया राजनीतिरपि परम् आक्रमितुं प्रवृत्ता स्वदुर्नयात् जनानुरागोत्पादने असमर्था सती शत्रूणां समुदयं कृत्वा जनेषु रागोत्पादनाय समर्था कथं भवेदिति शङ्क्यम्, भारतीयराजनीतेः न्यायतः प्रजापालनोद्देश्येनैव प्रवर्तनात्, अगत्या शत्रोर्दण्डनिपातनस्य अनुमोदितत्वात् । अतः इयं राजनीतिः आक्रमणशीलत्वाभावात् न तमोबहुला, अत एव प्रजारञ्जनक्षमा च । इतरराजनीतिस्तु परदेशं आक्रमितुमेव चिन्तयति । तस्यां तमोबाहुल्यात् प्रजारञ्जनक्षमत्वं नास्ति । ईदृग्विधराजनीत्यपेक्षया भारतीयराजनीतेः वैधर्म्येण आक्रमणशीलवत्त्वं नानुमन्तव्यम् ।

स्वर्गानन्त्ययोः प्रत्यक्षप्रमाणप्रमितत्वम्

(पृ० २४३)स्वर्गेति । ननु स्वर्गानन्त्योः शब्दप्रमाणप्रमितत्वेऽपि प्रत्यक्षप्रमाणप्रमितत्वाभावात् नीतौ फलत्वेन तयोः स्वीकृतिः कथं कर्तव्या ? इति चेदुच्यते ।

स्वर्गो हि गुरुत्वभावनादिवत् यदि अतीन्द्रियः स्यात्, तर्हि तस्य प्रत्यक्षप्रमावेद्यत्वं न भवितुमर्हति । स्वर्गविषये एतादृशी स्थितिः शास्त्रकर्तृभिः नानुमन्यते, तस्य सुखरूपत्वात् । तदुक्तम्—

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ।। इति ।।

व्याख्यातं चैतत् शब्दखण्डे माथुर्याम् (५०२ पृ० श० खं०), शब्दखण्डे तत्त्वचिन्तामणौ शक्तिवादे (पृ० ५०२) । तत्रैव द्रष्टव्यम्[१]

नीति निपुन जिन्हकै जगलीका । घर तुम्हार तिन्हकर मनु नीका ।।
सम सीतल नहि त्यागहि नीति । सरल सुभाऊ सबहि सन प्रीति ।।
कोटि विघ्न ते सन्तकर । मन जिमि नीति न त्याग ।।' इति ।।

१ 'न दुःखेन सम्भिन्नं' न दुःखसमानाधिकरणं न दुःखावच्छेदकशरीरावच्छेद्यमिति यावत् । अन्यथा स्वर्गिणः सुखस्याप्यात्मनि भावि-भूतदुःखसमानाधिकरणत्वादसम्भवापत्तेः । दुःखावच्छेदकावृत्तिजातिमच्छरीरावच्छेद्यमिति निष्कर्षः । तच्च एकजन्मावच्छेदेन दुःखानुत्पाद एव सम्भवति । तेन राजचक्रवर्तिनो धारावाहिक सुखमात्रावच्छेदककपुण्यपरिपाकमात्रजन्यखण्डशरीरमादाय तदवच्छिन्नसुखे नातिप्रसङ्गः । स्वर्गिणो मरणेऽपि न दुखम् 'ते तराः सुखगृघ्नत्र'' इत्यादिवेदेन तथैव बोधनात् पापविरहाच्च । अत एव स्वर्गिशरीरेऽपि पातभयजन्यदुःखश्रवणादसम्भवः इत्यपि निरस्तम् । पापशरीरविरहेणानायत्या तस्य संसारनिन्दामात्रपरत्वात् । अत एव धर्मजन्यमात्रवृत्तिजातिमच्छरीरावच्छेद्यसुखत्वं स्वर्गत्वमि'त्यपि वदन्ति । दुःखपदं वा मरण पातभीरुत्वादिजन्यदुःखातिरिक्तदुःखपरम् । ग्रस्तमिति । ग्रासो लौकिकसुखापेक्षयाऽपकर्षः तच्छून्यमित्यर्थः । अनन्तरं अन्तरा विच्छेदस्तद्रहितम् । स्वाश्रयावच्छेद्यसुखानधिकरणकालोत्तरोत्पत्तिकसुखावच्छेदकवृत्तिजातिमदनवच्छेद्य—

जयमङ्गलाक्रोडपत्रम्

एवं च धारावाहिदुःखरहितम् अनभिभूतम् अभिलाषमात्रेण नियतसामग्रीकं सुखं स्वर्गपदवाच्यम्। इदं च स्वभावत एव सुखत्वात् सर्वस्यैव कामनाविषयः, दुःखसंयोगात्मकस्य व्याधेः प्रागभावसंरक्षणाय विनाशाय वा सर्वैः प्रयतितत्वात्[१]।

न च अदृष्टद्वारा यागेन साध्यस्य परलोके सञ्जनिष्यमाणस्य स्वर्गसुखस्य इहलोके पुनरपि प्रत्यक्षाविषयत्वमस्त्येव इति वाच्यम्, तस्याः सुखव्यक्तेः इहलोके अप्रत्यक्षत्वेऽपि तद्वृत्तिसुखत्वजातेः प्रत्यक्षत्वात्, तद्विषयीभूततथाविधजात्याश्रयतया सामान्यलक्षणया प्रत्यासत्यापि देशान्तरस्थितयोः वह्निधूमयोः व्याप्तिप्रत्यक्षत्वस्येव प्रत्यक्षत्वस्य सम्भवदुक्तिकत्वात्। तदुक्तम्—

'युवा स्यात् साधु युवाऽध्यायकः आशिष्ठो दृढिष्ठो बलिष्ठः तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्'। इत्यारभ्य—"श्रोत्रियस्य चाकामहतस्य"। इति

अर्थात् कश्चन राजा दुकूलरत्नादिधारणेन आत्मानं सुखिनं मनुते तादृग्-

---

मिति यावत्। स्वपदं जातिपरम् स्वर्गिणः सुषुप्तावपि मानाभावात्- युगपत्सकल ब्रह्माडे खण्डप्रलयाभावात् सत्ता द्रव्यत्वादेः स्वाश्रयावच्छेद्य सुखानधिकरण कालाप्रसिद्धया न तदादायासम्भवः। तादृश सुखावच्छेदकावृत्तिजातिमच्छरीरावच्छेद्यमिति वा अनन्तरत्वं वक्तव्यम्। अत्रापि स्वपदं स्वर्गिशरीरवृत्तिजातिपरम्। इत्थं च युगपत् सकलब्रह्माण्डप्रलयाभ्युपगमेऽपि न क्षतिः। 'अभिलाषोपनीतञ्चेति। सुखाभिलाषानन्तरं तत्साधनार्जनविलम्बासहमित्यर्थः। स्वसमानाधिकरणस्वविषयकाभिलाषोत्पत्त्यनियतसामग्र्यजन्यम्, स्वार्गणां तथैव विलक्षणमदृष्टम् यतः सुखविषयकाभिलाषोत्पत्तिसमय एव तत्र कारणानां सर्वेषां सम्पत्तिरितिभावः। 'स्वसमानाधिकरणेत्यभिलाषविशेषणात् संसारितादशायां स्वर्गविषयकाभिलाषे स्वर्गानुत्पादेऽपि न क्षतिः। स्वसमानाधिकरणत्वं च स्वावच्छेदकशरीरावच्छेद्यत्वम्। अभिलाषव्यतिरेकोत्पन्नस्वर्गेऽव्याप्तिवारणाय निषेधद्वयगर्भता। स्वःपदास्पदमिति। स्वरादिपदशक्यमित्यर्थः। न चाग्रस्तत्वादिविशेषणवैयर्थ्यम्, तादृशसुखस्यैव दुःखावच्छेदकावृत्तिजातिमच्छरीरावच्छेद्यत्वनियमेनाव्यावर्तकतया तादृशजातिमच्छरीरावच्छेद्यसुखत्वस्यैव शक्यतावच्छेदकत्वौचित्यात्, ग्रासादिविशिष्टैतादृशशरीरावच्छेद्यसुखे मानाभावादिति वाच्यम्। प्रवृत्तिनिमित्ते विशेषणवैयर्थ्यस्यादोषत्वात् यत्प्रकारेण स्वारसिकबोधस्तस्याव्यावर्तकस्यापि गुरुतरस्यापि शक्यतावच्छेदकत्वादिति भावः। एतेन नारकीयशरीरमपि व्याख्यातम्।' इति।

१ तदुक्तं चरके (प्रथमाध्याये)

शरीरं सत्वसंज्ञं च व्याधीनामाश्रयो मतः।
तथा सुखानां योगस्तु सुखानां कारणं समः ॥५४॥
निर्विकारः परस्त्वात्मा सत्वभूतगुणेन्द्रियैः।
चैतन्ये कारणं नित्यो द्रष्टा पश्यति हि क्रियाः ॥५५॥ इति।

जयमङ्गलाक्रोडपत्रम्

विधं च सुख वल्कलधारिणा केनचित् भिक्षुकेण नानुभवितुं शक्यते इति जानन् आत्मनि कृतकृत्यतामनुभवति। परं तस्य तथाविधां स्थितिं पर्यालोचयन् भिक्षुकः आत्मसन्तोषस्य अनुभवेषु वैलक्षण्यमपश्यन् उभयविधेऽपि सन्तोषे एकविधमेव सुखत्वनुभवति। अतः सिद्धम् एकविधैव सुखत्वजातिः राज्ञा भिक्षुकेण च प्रत्यक्षीक्रियते। तत्र नास्ति किमपि अन्तरम्। अतः उभयोरपि सुखयोः व्यक्ति—भेदेऽपि तदुभयवृत्तिसुखत्वस्य प्रत्यक्षत्वात् राज्ञा अनुभूयमानं सुखं श्रोत्रियेण भिक्षुकेणापि अनुभूयते[1]।

यद्येवं राजादिभिः अनुभूयमानं सुखं अस्माभिर्नानुभूतमिति योगी मन्येत, अथवा सः तल्लाभाय प्रयतेत तर्हि सः सौभरिवत् योगात् अवश्यं च्यवेत्। 'इतो भ्रष्टस्ततोभ्रष्टः' इति गतिमनुभवन् पश्चात् तप्येत्। इति अवश्यं स्मर्तव्यम्। तदुक्तं योगसूत्रे 'परमा वश्यतेन्द्रियाणाम्' इति व्याख्याने[2] नारायणतीर्थस्वामिभिः (पृ० १०४ ना० ती०)—

एकाग्रतया ध्याने सत्वगुणसमृद्ध्या यत्सुखं जायते, यच्च सुषुप्त्यवस्थायामनुभूयते, तदुभयोः वैषम्यं एकविधजातिमत्वात् नास्ति, यतः उभयोरपि एककार्योत्पादकत्वमस्ति अतएव 'श्रोत्रियः ध्यानबलात् अन्तःसुखमनुभवन् व्याधिं नाशयितुं समर्थो भवति स एव व्याधिः सुषुप्तावपि निराकर्तुं सभाव्यते, इति निर्णीतम्।

तदुक्तम्—'अर्धरोगहरी निद्रा सर्वरोगहरी क्षुधा इति'। एतावदेव न। यां सुखत्वजातिमभिलक्ष्य चार्वाकप्रभृतयः अङ्गनालिङ्गजन्यं सुखं स्वर्गत्वेन व्यपदिशन्ति, तामेव सुखत्वजातिमभिलक्ष्य वैदिका अपि यागसाध्यं स्वर्गं सुखत्वेन अभिलषन्ति अपरे च पुनः श्रोत्रियाः 'वरं वृन्दावनं शून्यम्' इति वदन्तः ऐकान्तिकं सुखमनुभवन्ति।

नचैवं यदि सर्वैरनुभूयमाने सुखे सुखत्वमेकविधमेव तर्हि शास्त्रानुसार्येव पन्थाः नीतिविद्भिः कुतोऽवलम्ब्यते इति वाच्यम्, सुखत्वस्य एकविधस्य अनुभूय-

---

१ 'वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः।
सम इह परितोषे निर्विशेषो विशेषः॥
स तु भवति दरिद्रो यस्य तृष्णा विशाला।
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥' इति।

२ 'ततः प्रत्याहारादिन्द्रियाणां मनमआद्येकादशानां भोगकारणानां परमावश्यकता परमो जयः। मोहनीयादिस्वरूपैः रूपादिभिर्विषयैर्बहिर्मुखतां नीयमानान्यपि न यान्तीत्यर्थः। इयमेव वश्यता योगद्वारा परोक्षप्रमाया हेतुः। एतस्याभावादेव 'सौभरि' प्रभृतीनां योगात् प्रच्यावोऽपि। अतएवोक्तं भगवता—
'यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥' इति।

जयमङ्गलाक्रोडपत्रम्

मानत्वेऽपि तदाश्रयत्वं वास्तविकं कुत्रास्तीति सन्देहनिरासार्थं निर्णायकत्वेन शास्त्रस्य परिग्रहौचित्यात्। यथा रजतत्वं यादृशं प्रत्यक्षतः रजतेऽनुभूयते, तादृशमेव शुक्तौ-प्रत्यक्षीक्रियते। सत्यप्येवं रजतत्वाश्रयत्वनिर्णयार्थं पुनरपि विदग्धानां विचक्षणमतीनां व्यवहारः अज्ञजनैः अपेक्षितः, तथा सुखत्वाश्रयत्वनिर्णयार्थंम अस्माभिः अज्ञजनैः शास्त्रं शरणीकरणीयम्। नन्वेवं उपरिनिर्दिष्टेषु शात्रेण वास्तविकसुखत्वं कुत्रोच्यते इति चेत्, यथावसरं वक्ष्यमाणत्वात्। अत्र तु सुखत्वस्य प्रत्यक्षमस्ति नवेति विचारमात्रस्यैव अभ्यर्हितत्वेन चिन्तनीयत्वात्।

न च स्वर्गवृत्तिसुखत्वजातेः प्रत्यक्षत्वेऽपि तदाश्रयोभूतस्य स्वर्गसुखस्य तु अस्मद्दृष्टया पुनरपि अप्रत्यक्षत्वमस्त्येव इति शङ्क्यम्, इष्टत्वात्। लोके सर्वाऽपि गौः सर्वैं न दृष्टा इति अस्मद्दृष्ट्या देशान्तरस्थितायाः गोः अप्रत्यक्षत्वात् अनस्तित्वमिति केनापि नोच्यते। तथैव इहलोके दृष्टसुखत्वाश्रयीभूतस्य सुख-विशेषस्य स्वर्गात्मकस्य अस्माभिः अदृष्टत्वेऽपि कस्यचिद् दृष्टिविषयत्वमस्त्येव। तावतापि स्वर्गस्य नीतिफलतया घटकत्वे न व्याघातः। अथवा सामान्यलक्षणया तस्यापि देशान्तरस्य गोप्रत्यक्षत्वमिव प्रत्यक्षत्वं इति प्राक् (२४६ पृ०) निरूपितमेव। अतः स्वर्गत्वस्य तदाश्रयीभूतस्य स्वर्गस्य वा प्रत्यक्षप्रमाणप्रमितत्वं सर्वथा उपपन्नम्।

किञ्च एतादृशं वास्तविकं सुखं राजनीत्या इहलोकेऽपि अनुभवितुं शक्यम् इत्यपि राजनीतेः स्वर्गरूपं फलमस्ति इति न विस्मर्तव्यम्। तथाहि—यः (पृ० २३४) प्रागुक्तास्तिक्यप्रविभज्यभोजनादिसत्वगुणानाम् अवलम्बनं कृत्वा निष्कामतया नीति-धर्मम् अनुतिष्ठति सः तद्द्वारा अदृष्टविशेषमुत्पाद्य इहजन्मन्येव परलोके जनिष्यमाणं स्वर्गसुखसजातीयं शमसुखम् अनुभवन् आत्मानं कृतार्थं मनुते। यश्च उपर्युक्तं नीतिधर्मं सकामः सन् अनुतिष्ठासति सः तत्तद्देवादिशरीरम् उपलभ्य सुखमनुभवति न च देवादिशरीरं अस्माभिः कथं दृश्यताम् इति वाच्यम्। तथाविधानां विजातीय शरीराणां राजादिभावे स्थितानम् अत्रापि लोके दृश्यमानत्वात्। यावमात्रया मानवः स्वचरणौ दूरं निक्षिपन् गच्छति तदपेक्षयापि दूरं स्व-स्वामिगुणसम्पन्नः राजा स्व-चरणौ निक्षिपन् गच्छति। तदुक्तं नाट्यशास्त्रे[1] (१३ अध्याये २५, २६, २७ श्लोकः)

---

१ यदा मनुष्या राजानस्तेषां देवगतिः कथम्।
अत्रोच्यते कथं नैषा गती राज्ञा भविष्यति ॥
इह प्रकृतयो दिव्या तथा च दिव्यमानुषी।
मानुषी चेति विज्ञेया नाट्यनृत्तक्रियां प्रति ॥
देवा हि प्रकृतिर्दिव्या राजानो दिव्यमानुषी।
या त्वन्या लोकविदिता मानुषी सा प्रकीर्तिता ॥
देवान्वाजास्तु राजानो वेदाध्यात्मप्रकीर्तिताः ॥
एवं देवानुकरणे दोषोह्यत्र न बिद्यते ॥ (१३।२५-२८) इति।

जयमङ्गलाक्रोडपत्रम्

अत एव काव्येषु सिंहगतिः, अश्वगतिः इत्यादिवर्णनं सोपपत्तिकं भवति। तत्र उपपत्तिः- यथा यथा शरीरे सत्वमभिवर्धते, तथा तथा अस्य लाघवात् शरीरस्य लाघवं भवति, तेन च गतिरपि द्रुता भवति। तस्मादेव कारणात् सात्विक लघुशरीरस्य चरणयोरपि भूमौ प्रक्षेपः मानवचरणप्रक्षेपापेक्षया दूर शे भवति। यदि सत्वमत्यर्थमभिवृद्धं स्यात्, तर्हि तद्बलाद् योगिनः स्वर्गगमपि यान्ति प्रत्यावर्तन्ते, इतरशरीरे प्रविशन्ति दूरस्थं च श्रुण्वन्ति, जिघ्रन्ति, पश्यन्ति इत्यादि सर्वं प्रत्यक्ष सिद्धम्। एवं च सकामतया अनुष्ठितः नीतिधर्मः प्रत्यक्षसिद्धं देवादिशरीरं तदनुष्ठातारं प्रापय्य स्वर्गसुखसजातीयमेव सुखं समुत्पादयति।

एतेन सुखानवच्छेदक युगपदनेकावृत्तिदुःखावच्छेदकवृत्तिजाति नारकीयां तेषु तेषु शरीरेषु अभिव्यज्य अनीतिमार्गः नारकीयं दुःखं समुत्पादयति इत्यपि ज्ञेयम्। एवंरीत्या स्वर्गत्वस्य तदाश्रयस्य च प्रत्यक्षत्वं साधितम्।

मोक्षस्य प्रत्यक्षत्वम्

अथ आनन्त्यस्यापि प्रत्यक्षत्वं कथं भवति? इति निरूप्यते। आनन्त्यं हि मोक्षः।

स च स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसः, नित्यसुखाभिव्यक्तिः, अभिव्यक्तनित्यसुखं वा इति भेदेन शास्त्रेषु उपवर्णितो दृश्यते। एतेषु आद्ये दुःखध्वंसस्य प्रत्यक्षवेद्यत्वम् अस्त्येव। अथ तत्र स्वसमानाधिकरणदुःखासमानकालीनत्वं प्रत्यक्षीकरणीयमस्ति, तच्च सुषुप्त्यादौ प्रत्यक्षीक्रियते एव। यद्यपि जीवेन अज्ञानदशायां यः दुःखध्वंसः अनुभूयते तस्मिन् स्वसमानाधिकरणदुःखासमानकालीनत्वं नास्ति, भविष्यति काले जाग्रद्दशायां दुःखस्योत्पद्यमानत्वात्। तथापि तादृशदुःखासमानकालीनत्वं यथार्थतया कुत्र अस्ति इति तु शास्त्रेण निर्णेष्यते तच्च स्वर्गनिरूपणे व्यक्तम्। अत्र प्रस्तुते तथाविधदुःखासमानकालीनत्वं निद्रायां प्रत्यक्षी भवति इति यदुक्तं तत्तु सत्यमेव।

मोक्षमधिकृत्य पूर्वनिर्दिष्टयोः द्वितीय-तृतीयपक्षयोः ब्रम्हणः नित्यसुखस्य आत्मस्वरूपस्य प्रत्यक्षत्वं सर्वैरेव सुषुप्त्यादौ स्वीक्रियते। तदुक्तं यः साक्षाद् अपरोक्षाद्‌,ब्रह्म' 'आनन्दम् ब्रह्मणो विद्वान्' इत्यादि। अत्र त्रिविधेऽपि पक्षे इहलोके केनचित् तथाविधं ब्रह्मसुखं दृष्टं किम्? इति चेत् शुकाम्बरीषमैथिलप्रभृति जीवन्मुक्तानां, आधुनिके काले समर्थ रामदास, कबीरादीनाञ्च उदाहरणं दृष्टमस्ति इति नाविदितमैतिहासिकानाम्।

एवंभूतं मोक्षसुखं अश्रद्धावद्भिः गुरुभक्तिशून्यैः सन्दिग्धमतिभिः यद्यपि नानुभूयते, तथापि मोक्षसुखं अप्रत्यक्षम् इति कथं वक्तव्यम्। उलूको न पश्यतीति सूर्यं एवनोदीयात्? न सोऽस्ति इति वा उलूकेनाऽपि कथं निर्णेतव्यम्? अतः मोक्षः अप्रत्यक्षः इति वचनमेव अवचनीयतां गतं इत्यास्तां विस्तरः। तस्मात् स्वर्गः तद्वृत्ति सुखत्वं तदवच्छेदकानि तत्तद् देवादिशरीराणि तद्वृत्तयः; जातयः,

जयमङ्गलाक्रोडपत्रम्

आनन्त्यंच, प्रत्यक्षप्रमाणप्रमितत्वात् शब्दप्रमाणप्रमितत्वात् यथावसरं अनुमानस्य दर्शितत्वाच्च सिद्धमतः स्वर्गानन्त्यपदार्थौ नीतिफलघटकतया उक्तौ उपपन्नौ। इत्यलमति विस्तरेण ।

देवादिशरीरप्राप्तिः नीतिफलम्

ननु किं देवादिशरीरप्राप्तिः भारतीयराजनीतिमर्यादापालनेन संभवितुमर्हति ? इतिचेदर्हत्येव । भूदेवः, नरदेवः, कर्मदेव, आजानदेवः इत्यादि देवसंज्ञाः यानधिकृत्य शास्त्रेषु उपवर्ण्यन्ते तेषां हि नीतिपालनमेव तादृक् देवत्वं प्रति प्रयोजकं यथा गुणवान् ब्राह्मणः स्वाध्यायाध्ययनरूपनीतिशीलवान् सत्वप्रकृतिः यदि भवेत् तर्हि सः भूदेवो भवति ।

यश्च नीतिसारोक्तस्वामिगुणसम्पत्तिमान् भवति सात्विकश्च सोऽपि इमामेव नीतिमनुतिष्ठन् नरदेवो भवति । यश्च सत्वगुणसम्पन्नः मोक्षकामः जन्मान्तरवशात् राजससंस्कारवान् भूत्वा राजकीयसुखं वाञ्छति तर्हि सः तत्र तत्र लोके देवादिशरीरं प्राप्य कर्मदेवसंज्ञया व्यवह्रियते एवमेव तत्तत्कर्मभेदवशेन नीतिमर्यादया अनुतिष्ठन् आजानदेवादिसंज्ञया व्यवह्रियते। नारायणः, ब्रह्मा, शिवः, सरस्वती वा कोऽपि वा भवतु ते सर्वेऽपि नीतिमर्यादापालनेनैव ब्रह्मविष्णुसंज्ञाः तत्तकार्याधिकृतिञ्च अलभन्त । तदुक्तम्—नीतिकल्पतरौ द्रष्टव्यम्[१] ।

---

१ नीतिर्नाम नरस्य चक्षुरुदितं दिव्यं यदाश्लेषतो ।
देवत्वं नितरां परं तु बलिनी मान्या परेहा बुधैः ।
तत्राप्यत्र पदं विदां विदधतां किं नाम नाट्यं यया,
स्मायं समुपैतिसिद्धिममलां प्रज्ञाञ्च सोक्तान्ततः ।
आश्रित्यनीतिमिह सोऽपि महोत्पलस्थः
सम्यग्विधाय च परां विधिराद्यसृष्टिम् ।
तत्तद्पदेषु च निधाय निजांस्तनूजा—
नास्ते सुखेन परमेश्वर योगनिष्ठः ॥३॥
किं वर्ण्यो महिमास्य साधुजनतानन्द प्रदानोद्यतो
वेदोक्ताखिलधर्मपालनमतिस्तत्पीड़नो योगिनः ॥
संहर्तुं दनुजाधिपान्हतमतीन्यः साम्प्रतं चाप्यहो ।
भूबिम्बं चरणाब्जरेणुभिरलं संभूषयत्यद्भुतम् ॥
ईशानः स च सर्वदेवमहितो गौरीपतिः शङ्करो ।
भूतीशः स चराचरस्य जगतः कर्त्ताऽथ संहारकः ।
चिद्भ्रान्तां नियतिं नयज्ञकुशलः संस्थाप्य बद्धाजिनो ।
जूटोत्तण्ड १ तनुनिरन्तर सुखासक्तोऽभवत्संयमी ॥५॥
नयज्ञकुशलः कृती स खलु देववृन्दाधिपो
विभज्य विविधाः कृतीरधिकृतांश्च रात्रिंदिनम् ।—

जयमङ्गलाक्रोडपत्रम्

किञ्च यथा देवत्वरूपफलप्राप्तिः नीतिफलमित्युक्तम् तथा इहलोके जन्मान्तरे वा उत्तमकुलीनशरीरप्राप्तिरपि पूर्वजन्मनि अनुष्ठितायाः नीतेः फलं बोध्यम्[१]।

अर्थात् कुलीनैः श्रद्धा पूर्वकम् अव्यभिचरिततया सहजतः सात्म्यभावमापन्नेव नीतिः पाल्यते। नीतिश्च पालिता सति तथाविधसंस्कारोद्बोधवशात् शुचिकुले भावयतीति भावः। अन्यत्र तु आहारमातृपितृकर्मसु अन्यतमसाङ्कर्ये सति नीतिमर्यादापालनं, देवत्वं वा प्रजानुरागजनकं स्थिरं भवेदेवेति न वक्तुं शक्यम्। अत्र यदि कश्चित् कुलीनत्वं जातिमर्यादा वा राजनीतौ किं फलं प्रयच्छतीति प्रश्नमुपस्थापयेत् तर्हि सः (पृ० २०७ तः) प्राक् प्रपञ्चितमार्गेण तर्कसचिवेन तोषयितव्यः। एवंविधं हि उत्तमफलं इतरराजनीतौ केवलं अभिलाषाविषय एव बोध्यम् तत्र साङ्कर्यस्य दुरपनेयत्वात्।

गतानुगतिक[२] इत्यादि टिप्पणीस्थ पद्येषु गतानुगतिकत्वं यत्प्रदर्श्यते तत् अलसानां कृते एव न तु परम्परायातशब्दप्रमाणसिद्धयथार्थफलादायकभारतीयराजनीतिविदां कृते शोभनमित्यपि बोध्यम्। तस्मात् देवादिशरीरप्राप्ति र्नीतिमर्यादया संभावितुमर्हति इति तत्रत्यकार्यकारणभावपर्यालोचनं नीतिकल्पतरुप्रोक्तप्राङ्निर्दिष्टवचनानुसारेण सिद्धम्।

उच्च-नीचभावः

ननु स्वधर्मस्य फलं स्वर्ग आनन्त्यं साङ्कर्याभावो वा, भवतु कामं। तेन सह जनतासु उच्चनीचभावोऽपि भारतीयराजनीत्या मर्यादितो दृश्यते। तथा सति सामादिचतुष्टयोपायेषु अन्तर्गतस्य भेदस्याऽपि जनतायां भारतीयराजनीत्या अवसरप्रदानात् प्रजानुरागो विनष्टुमर्हः इति चेदभिधीयते। तत्रादौ इदं विचार्यतां यत् किमयं उच्चनीचभावः केवलं अत्रैवाऽस्ति वा अन्यत्राऽपि इति। यदि च सूक्ष्मे-

---

गुरुं गुरुतरंधिया सुचतुरं पुरोधाय तं
विवेकनिरतोऽस्त्यलं प्रशमयन्स्थितो दानवान्॥
इत्थं यस्य यथाविधोऽस्ति विभवो नीतेःफलं तद्विदुः
तस्माद्यस्य नये रतिः स चतुरा यादृक्छुभा जायते।
तादृङ्नीतिफलं बुधैर्निगदितं ब्रह्मादि कीटान्तकं
सर्वं नीतिफलं विचार्य मतिमांस्तस्माच्छुभां तां श्रयेत्॥७॥ इति

१ तदुक्तम्—
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभि जायते।
अथवा योगिनामेव कुले भवति धीमताम्। इति गीता० अ०

२ गतानुगतिको लोकः न लोको पारमार्थिकः।
वालुकालिङ्गमात्रेण गतं मे ताम्रभाजनम्। (हितोपदेश)

जयमङ्गलाक्रोडपत्रम्

क्षिकया पर्यालोच्यते तर्हि उच्चनीचभावः कुत्र नाऽस्ति यः बुद्धिमान्, वाग्मी, सेवाकुशलः, वर्तते सः उच्चपदे स्थास्यत्येव, उच्चो वा भविष्यत्येव यश्च न कुशलः, न शूरः, न वा सेवानिपुणः सः गजपृष्ठं नैवारोहेत् इत्यपि सत्यमेव। तथैव अत्रापि नीतौ यस्य यादृग्विधासाधारणकार्यकरत्वं तद्योग्यत्वानुसारेण तस्य तत्र तत्र नीतिविद्भिः नियोजनं कृतमस्ति न हि केवलं अमुककुले जन्म इति कृत्वा तावन्मात्रेण तस्मिन् पदे सः नियोज्यते नीतिविद्भिः।

यदि च तस्य अधिकारिण सन्माननं नीतिविद्भी राज्ञा वा लोकेन वा न क्रियते तर्हि अयमपराधः एतेषामेव न तु गुणवतः। तन्नीतिशतके व्यक्तम्[1]। किञ्च योग्यः योग्यस्थानेषु न नियोज्यते तर्हि लोकस्य हानिरपि स्यात्। अतः इमांमर्यादामनुध्याय तत्तत्कुलप्रयुक्ताऽव्यभिचरितगुणसम्पन्नः तत्र तत्र कर्मणि नियोज्यते, पूज्यते च तत्तद्कर्मानुसारं नीतिविद्भिः। स्वानुरूपं पदं प्राप्य कुलीनः आत्मनिप्रसादमनुभूय फलं यथा भवेत्तथा स्वकर्म आन्तं प्रसाधयितुं दृढ़सङ्कल्पो भवति। एवंचेत् लोकपालनार्थं गुणानुसारेण अपेक्षितः उच्चनीचभावः विघटनात्मकं भेदमापादयेत् इति कथनं तेषामपि नीतिविदां न शोभनं भवति।

पूर्वंपरम्परातएव उच्चनीचभावमवलम्ब्य मैत्रीभावेन स्थितेषु धर्मप्रधानेषु यो भेदो दृश्यते तस्य कारणं उच्चत्वं नीचत्वं वा नाऽस्ति, अपितु उच्चपदे स्थितः तत्कर्मणि नियुक्तः अज्ञानवशात् रागद्वेषाभ्यां वा निगडितः स्वकर्म विस्मृत्य अन्यान् भर्त्सयति, पिशुनोपदेशश्रवणेन तत्र दोषमविचक्षाणः अपरान् शङ्कते तत्र स्नेहरागविनाशात् मैत्रीस्थाने भेदस्य उत्पत्तिर्भवति। तदुक्तम्–नीसा० स० १८

"स्नेहरागापनयनं सङ्घर्षोत्पादनं तथा।
सन्तर्जनञ्च भेदज्ञैर्भेदस्तु त्रिविधो मतः।
(टी०) उत्पादिता हि शङ्का स्नेहं भक्तिञ्चापनयति स्पर्धाञ्चोत्पादयति" । इति।

अतः प्रकृतिव्यसने पठितं वाक्पारुष्यादिव्यसनं कदापि केनापि कुत्रापि न करणीयम्। इति भारतीयराजनीतिनियमः सर्वैः पालयितव्यः। तथा आन्वीक्षिक्या शङ्कानिरासोऽपि कर्तव्यः। तेन भेदस्य नावसर इति सर्वविधनानाजातीयकर्मसु कुशलतासम्पादनाय समस्तजातीनां संरक्षणमपेक्षितम् तदनुसारेण कर्मसु स्वधर्मे स्थितानामेव नियोजनस्य अभीष्टत्वात् उच्चनीचभावस्य अपेक्षितत्वात् सामाद्युपायान्तर्गतभेदं प्रति अन्यथासिद्धत्वात्, सर्वैरपि उच्चनीचभावोऽपि गुणान्तरेण सह समादरणीय एव। न च विभिन्न-विभिन्नजातीनां अस्तित्वमेवास्तीति केन प्रमाणेन ज्ञातं इति शङ्क्यम्। जातिविचारे अस्य दत्तोत्तरत्वात्। (पृ० २१४)

---

[1] शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमाः।
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।
तज्जाडयं वसुधाधिपस्य कवयोह्यर्थं विनापीश्वराः।
कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः। इति

जयमङ्गलाक्रोडपत्तम्

(ज० पृ० ३४३) विनश्येदिति । वेदेन निषिद्धत्वात् साङ्कर्यस्य नरकाधायकत्वं यथा क्लृप्तं, तथा पूर्वपरम्परागतोत्तमसंस्काराणाम् अभिभावकत्वात्प्रतिभा-विनाशकत्वात्, जाड्यस्याधायकत्वात , लोकविनाशकरत्वमपि बोध्यमिति भावः । अत्र अपेक्षिता सर्वाऽपि उपपत्तिः (पृ० २१४ तः) पूर्वग्रन्थाद् बोध्या ।

स्पृश्यास्पृश्यभावो न भेदकारणम्

ननु इतरराजनीतौ उच्चनीचभावे गुणानुरोधेन स्वीकृतेऽपि सर्वमतसङ्ग्रहार्थं स्पृश्यास्पृश्यत्वन्न उररीक्रियते । भारतीयराजनीतौ वैदिकधर्मनिगडितायां तु स्पृश्या-स्पृश्यकल्पना स्वीकृता अतोऽनया अनिच्छन्त्याऽपि भेदकारणं अस्पृश्यत्वप्रयुक्तम् भर्त्सनं सम्भविष्यत्येव इति पुनरपि लोकानुरञ्जनं भारतीयराजनीतौ दूरमेव इति चेन्न ।

स्पृश्यास्पृश्यत्वव्यवस्था कुलीनत्वस्य तत्प्रयुक्तगुणानां च साहजिकोद्बोधनाय विवाह, भोजन, पूजनादिकर्मविषयेषु समादृता वर्तते । राजनीतिक्षेत्रेषु तु अर्थ-सम्बन्धिनि व्यवहारे तत्तत्कर्मणि कुशलस्य सर्वविधस्याऽपि तत्तज्जातीयस्य समादरः समानरूपेणैव राजादिभिरनुष्ठेयः, इत्यादि सविस्तरं "शान्तीका अग्रदूत" ग्रन्थे प्रपञ्चितमस्ति ।

पूर्वोक्तजातिव्यवस्था (२१४ पृ०) प्रकरणेन कुलीनत्वप्रयुक्तगुणगौरवे अवगते सति भारतीयराजनीतिदृष्टया स्पृश्यास्पृश्यविभागस्य व्यर्थत्वं केन वक्तव्यम् ? प्रत्युत एतन्नीतिव्यवस्थायां समृद्धि पश्यन्तः सर्वे सोमदेवसूरिप्रभृतयः भारतराष्ट्रस्य सर्व-विधसमस्तलक्षणसम्पन्नत्वमेव व्याचख्युः । तदिदमपि (Customs and systems) "हिन्दुओं का रीति रिवाज" पुस्तकादप्यवगम्यते । केवलं कैश्चन अधीताङ्ग्लविद्यैः इदं हि निगूढतत्वमविजानद्भिः परराष्ट्रेण स्वानुकूलशिक्षया वञ्चितैः सरलस्वभावासु जनतासु शङ्का उद्भाव्य स्वराष्ट्रं स्वलक्षणात् प्रच्याव्यते । इति नीतिविद्भिः तेषां शङ्कासमाधानं यथा भवेत् तथा आन्वीक्षिक्यादिविद्याचतुष्टयस्य प्रचारः अनुष्ठातव्यः ।

स्पृश्यास्पृश्यविभागे लोकसम्मतत्वम्

अथ स्पृश्यास्पृश्यविभागः किं शास्त्रेण प्रत्यक्षादिना च हितसाधनत्वेन निर्णेतुं शक्यते ? इति चेच्छक्यते । तथाहि—बालकेषु 'सुखण्डी' नामको रोगः दृश्यते । तत्र कारणं, आयुर्वेदे रजस्वलादिस्पर्शो धर्मशास्त्रेण निषिद्धः प्रतिपादितोऽस्ति । मातृजातीनां पुष्पवतीनां अस्पृश्यत्वं दिनत्रयावधिकरोगजनकत्वात् स्वीकृतं अनुभवसिद्धम् । एतत् स्पर्शनिषेधातिक्रमणेन सुखण्डीप्राचुर्यं यवनादिषु दृश्यते तेषु उपर्युक्तस्पृश्यास्पृश्यत्वस्याविविक्तत्वात् । एवमेव (चेचक) शीतला-रोगः राष्ट्रे यदा प्रसरति तदा तस्य रोगिणः स्पृश्यास्पृश्यत्वविवेकः अवश्यं संरक्षणीयो भवति । यदि च अयं विवेकः न क्रियते तर्हि शीतलारोगः वर्धमानः अनेकविधान् रोगिणः यमपुरीं प्रदर्शयति । अतः पावित्र्यसंरक्षणाय, रोगपरिहाराय, प्रागुक्त-दिशा बुद्धिनैर्मल्यसम्पादनाय च स्वस्वकर्मानुरूपाणां तत्तत् कुलपरम्पराप्राप्तानां कीटाणूनां असजातीयेषु रोगप्रागभावसंरक्षणोद्देश्येन असञ्चरणाय स्पृश्या-स्पृश्यविभागः प्रत्यक्षदृष्टहिताहितप्राप्तिपरिहाराय क्लृप्तोऽस्तीत्यवश्यं वक्तव्यम् ।

जयमङ्गलाक्रोडपत्रम्

अमुं विषयमधिकृत्य चिकित्साचन्द्रोदये मस्तिष्कनिरूपणावसरे प्रागुक्तम्—'कुदरती कानून को मानो' इत्यादि स्मर्तव्यम् (पृ० १५)।

एतस्मादेव कारणात् एतन्नीतिशास्त्रे प्राकृतिकनियमानुसरणं ईशप्रकाशित वेदमर्यादां पुरस्कृत्य कृतमस्ति। अपि च स्पृश्यास्पृश्यव्यवस्था अतिसूक्ष्मविवेचनया निरूपिता सनातनधर्मप्रदीपे, (अप्रकाशिता) सांगवेदविद्यालये तत एव अनुसन्धेया।

न च वेदमर्यादां पुरस्कृत्य इदं नीतिशास्त्रम् प्रवर्तते इति सत्यं, परं वेदे सदोषत्वशङ्कया कवलिते प्राकृतकार्यकारणभावं पुरस्कृत्य न विवेचनमस्तीति शङ्क्यम्, वेदस्य अपौरुषयत्वेन सतात्पर्यकत्वेन फलवदर्थबोधकत्वेन च सर्वथा निर्दुष्टत्वात्।

वैदिकेषु शिष्टाः परीक्षणीयाः

न च केचन अपरेऽपि शिष्टाः भवितुमर्हन्ति। तेषामपि वचनं कुतो न प्रमाणत्वेन ग्राह्यं ? इति वाच्यम्। यदि ते शिष्टाः स्युः तर्हि तद्वचनस्वीकारे बाधकाऽभावः अतः शिष्टत्वं कुत्र कथं परीक्षणीयम् अस्तीति प्रसङ्गाद् विमृश्यते। तथाहि—वेदस्य उपदेष्टारं ईश्वरं विहाय अपरे अदृष्टविषये अभ्रान्ताः इति यावत्पर्यन्तं न निर्णीयते तावत्पर्यन्तं तदुपदिष्टेऽर्थे सफलत्वं सदा अस्त्येव इति कथं विवेक्तुं शक्यते ? यतः सफलत्वं हि फलसाधनत्वं, सर्वत्र साधनत्वं च शिष्टसमादृतत्वे सत्येव निर्णेतव्यं भवति। कारणत्वस्य प्रामाणिकपुरुषेच्छाघटितत्वेन वक्ष्यमाणत्वात्।

कारणत्वम्

तथाहि—अन्यथासिद्धभिन्नत्वेसति नियतपूर्ववृत्तित्वं हि कारणत्वस्य लक्षणं नैयायिकाः व्याख्यान्ति।

दण्डत्वदण्डरूपादौ कारणत्वव्यावृत्तये लक्षणघटकतया अनन्यथा-सिद्धत्वं प्रविष्टम्। तत्वं च यत्र यत्र प्रामाणिकानां अकारणत्वव्यवहारः तत्तद्भिन्नत्वं भवति। अकारणत्वव्यवहारश्च प्रामाणिकानां कुत्र भवतीति चेत् यः नियतो पूर्ववर्ती सन् शरीरेण उपस्थित्या सम्बन्धेन वा वृद्धैः त्रासाधायकेन गौरवेण युत भवति तत्रैव। यथा दण्डत्वे, दण्डरूपे, आकाशे, कुलालजनके रासभादौ च घटनियतपूर्ववर्तिनि उपर्युक्तगौरवबलात् प्रामाणिकैः अन्यथासिद्धत्वं व्यवहृतम्[1]। कुत्र कादृश गौरवमस्तीति तु मुक्तावलीटीकादिषु समीचीनतया व्याख्यातत्वान् नात्र विमृश्यते। केवलं सङ्क्षेपेण इदमेवोच्यते।

---

१ तदुक्तम्—न्या०मु०

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता।
कारणत्वं भवेत्, तस्य त्रैविध्यं परिकीर्तितम्॥

येन सह पर्वभावः कारणमादाय वा यस्य।
अन्य प्रति पूर्वभावे ज्ञाते यत् पूर्वभावविज्ञानम्॥

जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथापि यद्भवेन् नियतावश्यकपूर्वभाविनः॥
एते पञ्चान्यथासिद्धा दण्टत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम्॥

तृतीयन्तु भवेद्व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यात् एतेष्वावश्यकस्त्वसौ॥ (सि० मु० व०)

जयमङ्गलाक्रोडपत्रम्

यत्र तथाविधं गौरवं नाऽस्ति तत्रैव शिष्टाः व्यवस्थिताः इति, घटदण्डयोः कार्यकारणभावनिर्णयनियमानुसारेण कल्पयितुं शक्यते। इदं च व्यवस्थितत्वं उत्तर-शिष्टनोर्णीतार्थापेक्षया पूर्वशिष्टैः यत्र अन्यथासिद्धत्वनिर्णयः कृतः तत्र लाघवमस्ति सफलत्वञ्च इति उन्नीयते। तस्मात् पूर्वशिष्टनिर्णीतार्थविरुद्धेषु अर्थेषु फल-नियतपूर्ववृत्तिष्वपि सत्सु तत्फलं प्रति साधनत्वमस्तीति न निर्णेतुं शक्यते, अन्यथा-सिद्धत्वस्य सहजतएव प्राप्तत्वात्। एवं स्थिते पूर्वपूर्वशिष्टेषु सर्वापेक्षयाऽपि अति-प्राचोनः सर्वेषां हितदर्शी शिष्टः को भवितुमर्हति? इत्याकाङ्क्षायां सर्ववादिसम्प्रति-पन्नत्वात् वेदः तत्प्रकाशकईश्वरो वा वर्तते। तेन यत्र अकारणत्वं व्यवहृतं नियत-पूर्ववृत्तिस्थले, तत्सर्वं अन्यथासिद्धमिति हेतुना ईश्वरं विहाय अपरेण व्यवहृते वेदेनिषिद्धेऽर्थे (पृ० ३५४) सम्वन्धादिगौरवदोषसत्वात् अन्यथासिद्धत्वस्य निर्णीतत्वात् उद्दिष्टफलसाधनत्वं अर्थात् सफलत्वं नास्तीत्यवश्यमनुमन्तव्यम्।[1]

कारणत्वानुगमः

१. यत्र यत्र प्रामाणिकानां अकारणत्वव्यवहारः इति कारणत्वस्य लक्षणं निरूपित-मस्ति इदं कारणत्वलक्षणं यत्तत्पदघटितत्वात् असर्वज्ञदुर्ज्ञेयं भवति। अतः अनुगमकं कारणत्वलक्षणं कीदृशं भवतीति निरूपणार्थं काचन दिक् प्रकाश्यते। तथाहि—

यदाहि बुभुक्षा जायते तदा तत्पूर्तये भोजनसाधनानि यानि वर्तन्ते तेषु सञ्जिघृक्षाऽपि बुभुक्षोर्भवति इति दृष्टत्वात् कार्येच्छाप्रयोज्येच्छाप्रयोज्येछाऽप्रयोज्यत्वेसति कार्येच्छाप्रयोज्ये-च्छाविषयत्वं कारणत्वं इत्येवं कारणत्वलक्षणमनुगम्यते, कार्येच्छा उपायेच्छां प्रति प्रयोजिका इति सर्वसम्मतत्वात्। कार्यं घटः तदिच्छायां सत्यां व्यापारभूता भ्रमिः चक्रे दण्डेन कर्तव्या इति इच्छा कुलाले भवति। तदनन्तरं तत्साफल्याय दण्डः कुलालेन अभिलष्यते। एवञ्च दण्डे कुलालस्य घटरूपकार्येछाप्रयोज्येच्छाप्रयोज्यइच्छाऽप्रयोज्यत्वमुपपन्नम्।

दण्डत्वे लक्षणघटकविशेषणदलेच्छाऽप्रयोज्यत्वमस्ति इति तद्वारणाय द्वितीयदल-प्रवेशः। न च कार्येच्छाप्रयोज्येच्छाविषयत्वं पुर्वोक्तरीत्या भ्रमणे एव वर्तते। दण्डे तु नास्तीति वाच्यम् तत्रापि एतदिच्छाविषयत्वस्य सत्वात्, व्यापारेण व्यापारिणो नान्यथासिद्धिः भवतीति इति नियमाच्च। कारणत्वलक्षणे प्रयोज्यत्वनिवेशेन ततः कार्यत्वस्य विभिन्नस्वरूपत्वात् न अन्योन्याश्रयो दोषः। प्रयोज्यत्वञ्च स्वाभाववदवृत्तित्वात्मकव्याप्ति-स्वरूपं वोध्यं तेन जन्यत्वस्य प्रयोज्यत्वात्मकस्य निवेशे पुनरुक्तशङ्कालेशोऽपि न त्तिष्ठति। अस्य परिष्कारस्य अवशिष्टोंशो यथा आन्वीक्षिकीकौशलदृष्टया सुसम्पन्नो भवेत् तथा तर्ककर्कश विचारचातुरीनिपुणैः अनुसन्धेयः। अस्मिन् कारणत्वलक्षणे इच्छानिवेशः तस्याः लघुविषयकत्व-ग्रहणस्वाभाव्यात्। दृश्यते चैतत् कश्चित् चतुरस्रे महति क्षेत्रे ईशान्यां दिशि पिपासितः रासभः स्थितो वर्तते। तत्रैव आग्नेयकोणे तत्पानयोग्यं जलं उपस्थितं वर्तते। तदा स महाब्बुद्धि-मानपि जलपानार्थं जिगमिषुः सरलया रेखया प्रयाति न तु वायव्यादि कोणसंबद्धया वक्ररेखया इति ध्येयम्।—

जयमङ्गलाक्रोडपत्रम्

शिष्टः ईश्वरः

लाघवं यत्र भवति तत्र बुद्धिमतां इच्छाविषयता वर्तते इति व्याप्तिः स्थिरा वर्तते। परन्तु कुत्र लाघवमस्ति ? कुत्र वा तत्प्रयुक्तं बुद्धिमतामिच्छाविषयत्वमस्तीति ? निर्णयः असर्वज्ञानां कृते अशक्य एव। अतएव क्वचिद् अशक्येषु प्रवर्तमानस्य अङ्गवैकल्यं निष्फलत्वं विपत्तिः चित्तसन्तापश्चेति दोषचतुष्टयं असर्वज्ञैः स्वबुद्धिवैभव-महिम्ना अनुभूयते। तद्बलादेव च असवर्ज्ञोऽयं जनः नेतृपदे अधिष्ठतोऽपि पर्यन्ते स्वकर्मणैव लोकानां पुरतः अविश्वास्यत्वात् काकिणिकातुल्यमूल्योभवति। अतः सर्वज्ञस्य प्रेरणा यत्र वर्तते तत्रैव लाघवं प्रकृतिगतं हिताहितप्राप्तिपरिहारहेतु-त्वञ्चास्ति। अन्यत्र तु गौरवात् हिताहितप्राप्तिपरिहारहेतुत्वं निश्चयेन न वक्तुं शक्यम्, इति संमन्य असर्वज्ञेन सर्वज्ञस्य इच्छायाः अनुसरणं कृतं श्रेयः, सर्वज्ञानुमते उपाये अवश्यं साफल्यस्य दार्ढ्येन वक्तुं शक्यत्वात्। इदमेवानुसन्धाय भारतीय-राजनीत्या सर्वज्ञः ईश्वरः आत्मनः श्रेयसः यथावत् अबाधितमार्गनिर्णयाय प्रमाणी-कृतः। तत्रैव कर्तृत्वं ज्ञानप्रभामिश्रिता प्रागुद्दिष्टा क्रियाप्रभापि स्फुटा भवति।

श्रीगुरुचरणान्तेवासिनो नैष्ठिका गणपतिशास्त्रिण एवमाहुः।

घटपदात् घटो बोद्धव्य इत्याकारकप्रमाणिकेच्छाशक्तिरितिवत् घटार्थं प्राक्क्षणावच्छेदेन नियतपूर्ववृत्तितया दण्ड एष्टव्य इत्याकारकप्रामाणिकेच्छा-विशेष्यत्वं कारणत्वम्।

कार्यमुद्दिश्य नियतपूर्ववृत्तितया अपेक्षणीयत्वम् कारणसामान्यलक्षणम्। घटादिविशेषमुद्दिश्य तथापेक्षणीयत्वं दण्डादिकारणत्वमिति विशेषलक्षणम्। अपेक्ष-णीयत्वं चाभ्रान्तापेक्षाविशेष्यत्वम्। तेन नान्यथासिद्धेष्वतिव्याप्तिः। अन्यथा-सिद्धापेक्षाया अप्रामाणिकत्वाङ्गीकारात्। पट (Pet) पदात् पटो बोध्यव्य इत्या-दिवन् नियतत्वं कार्यतावच्छेदकसमवायादिसम्बन्धेन कार्याधिकरणे कारणता-वच्छेदकसम्बन्धेन विवक्षितम्। स्वजन्यभ्रमिजन्यभ्रमिमत्तेत्यादिषु सम्बन्धघटकजन्य जनकत्वे कार्यकारणलक्षणलक्ष्यतावच्छेदकतया क्लृप्ते स्वरूपसम्बन्धविशेषरूपे विवक्षणीये। एतादृशविशेष्यतया परम्परया निरूपितोद्देश्यत्वं कार्यत्वम्। नियत-त्वघटितत्वाद् व्याप्तिग्रहे प्रयोजकतर्कोपयोगित्वोपपत्तिः।

यत्र यत्र प्रामाणिकानामकारणत्वव्यवहारस्तत्तद्भिन्नत्वमित्यादिघटितं सर्वं अस्यैव परिचायकम्। सामान्याभावदिपरिष्कारे तत्तदवच्छेदकताभिन्नाव-च्छेदकत्वानिरूपकत्वादिघटिते विलक्षणप्रतियोगिताकत्वमिति पर्यवसायितव्यलक्षण-परिचायकत्ववत्। एवंविधाभ्रान्तापेक्षाघटितकार्यकारणभावानधीनाः सर्वे नवनव शोधाः भ्रान्तापेक्षाघटिताः—"उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित्। तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च" इति मनुरपि यथाह।

तेषामपरिनिष्ठितत्वात्, अद्यापि प्रयोगारूढत्वमात्रत्वात्, निगमनाभावात्, निगमयितुमशक्यत्वाच्च च। अत एव आधुनिका वैज्ञानिकाः स्वशोधेषु दृढमनाश्वस्ताः—

जयमङ्गलाक्रोडपत्रम्

अत्राऽयं निष्कर्षः यथा भक्तैः यथावत्सुपूजिता मूर्तिः तेषु यदि प्रसादसूमुखी भवति तर्हि तत्प्रसादहेतुना स्वकार्यस्य साफल्यमनुमाय ते ते भृत्याः तुष्यन्ति। तदाहुः—वत्सोत्सुकाऽपि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति नन्दतुस्तौ।

भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिन्हानि पुरःफलानि। इति (रघु० वं० सर्ग २,)

तथैव यदनुष्ठानं भारतीयराजनीतिसम्मतमस्ति तत् प्रमाणत्रयप्रमितत्वात् सफलं, लघु, संस्कृतं, अबाधितं अव्यभिचारि, दृढम् विघ्नैरनुच्छेद्यं, राजदेवतागुरुप्रसादकरं विदग्धव्यवहारविषयः उपदेशकरं क्रियाशक्तिसम्पन्नं सात्विकं सत् स्वमण्डलान्तर्गतानां सर्वेषां शुक्लघर्मरुचिकरं भवतीत्यत्र नाऽस्ति सन्देहलेशः। भारतीयराजनीत्य सम्मतमनुष्ठानं तु असाफल्यालाघवादिप्रयुक्तां गुणविपरीततां प्रकाशयत् तामसे— अन्धकूपे अवगाहने कारणं भवेत्। अतः स्पृश्यास्पृश्यविभागः सर्वज्ञप्रणीतवेदमर्यादां पुरस्कृत्य कार्यकारणभावनिर्दशिकायां भारतीयराजनीतौ निर्दिष्टत्वात् चाक्षुषादिनाऽपि तत्सफलत्वस्य दृष्टत्वाच्च न विश्लेषकरः। इति।

"चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः" इति तेषां शोधानां अश्रान्तापेक्षाघटितत्वानवधारणात्, "यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते" इति न्यायात्, वेदशास्त्रविरुद्धशोधानां अश्रान्तापेक्षापर्यन्तमप्राप्तत्वमिति तात्पर्यम्। एवंविधशोधा एव वेदेष्वपीति तु महाभ्रान्ताः। विधि निषेधादितत्त्वेषु अज्ञा विपर्यस्ताः क्वापि अनाश्वस्ताः "अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति। नायं लोकोऽस्ति न परो न सुखं संशयात्मनः" इत्युक्तस्थितिविषयत्वात्तेषाम्। इति। तदुक्तम्—

न्यायान्यायविवेकसाधनमियं नाकृत्रिमा चेच्छ्रुतिः।
नार्वाक्कालिकमन्यदस्ति तदहो! स्यात् कृत्स्नमन्धन्तमः। इति।

अथवा कारणत्वं हि अनन्यथासिद्धत्वघटितम्। अनन्यथासिद्धत्वञ्च प्रामाणिकानां यत्र यत्र नियतपूर्ववृत्तिषु अकारणत्वव्यवहारः तत्तद् भिन्नत्वरूपमिति दिनकरीकृताव्याख्याते कारणत्वलक्षणे आत्माश्रयत्वमन्योन्याश्रयत्वं वा दूषणमस्ति अतः कार्येच्छाप्रयोज्येच्छाप्रयोज्येच्छाविषयत्वमेव कारणत्वं बोध्यम्। प्रयोज्यत्वञ्च व्यापारव्यापार्युभयसाधारणं मन्तव्यम्। कार्यं (घटः) भवतु इतीच्छायां सञ्जातायां घट साधनाय चक्रे भ्रमणं भवत्वितीच्छा कुलाले समुत्पद्यते अथवा घटोत्पत्यर्थं कुलालो दण्डमभिलषति। घटस्य च साधकत्वसाफल्याय व्यापारमुखेन दण्डेन चक्रस्य भ्रमिं कर्तुं कुलाल इच्छतीति कार्येच्छाधीनेच्छाधीनेच्छाविषयत्वम्। क्वचित्तु कार्येच्छाधीनेच्छाविषयत्वमस्तीति उभयसाधारणं प्रयोज्यत्वमुपपन्नं भवति। उपायेच्छां प्रति कार्येच्छा प्रयोजिकेति सर्वैः स्वीकृतत्वात् कारणत्वलक्षणमुक्तं नानुपपन्नं भवति।

एतल्लक्षणे कार्यत्वस्य प्रयोज्यत्वस्य च निवेशात्। पुनरपि अन्योन्याश्रयो दोषो भाति तन्निवारणार्थं स्वाभाववदवृत्तित्वरूपं प्रयोज्यत्वमत्र बोध्यम्।

[धर्मस्थापनस्य राजधर्मता]

तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत् ।
स्वधर्मं सन्दधानो हि प्रेत्य चेह च नन्दति ॥३॥

[त्रय्याः लोककल्याणहेतुता]

व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः ।
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ॥ ४ ॥

इति विनयाधिकारिके प्रथमाधिकरणे त्रयीस्थापना तृतीयोऽध्यायः आदितः तृतीयः ॥

श्रीमूला

अतः किं कर्तव्यं तत्राह—**तस्मादित्यादि** । भूतानां मनुष्याणाम् । न व्यभिचारयेत् व्यभिचरन्तं नानुमन्येत । स्वधर्मं सन्दधानः सम्यगनुष्ठापयन् । प्रेत्य परलोके, ल्यप्प्रतिरूपो निपातः ॥

वर्णाश्रमधर्मविधानद्वारेण त्रय्या महाफलत्वं वदन्नध्यायमुपसंहरति—**व्यवस्थितेत्यादि** । व्यवस्थिता वर्णाश्रमप्रतिबद्धा आर्यमर्यादा सदाचारनियमो यस्य स व्यवस्थितार्यमर्यादः । प्रसीदति मोदते । न सीदति न नश्यति ।

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे तृतीयोध्यायः । विद्यासमुद्देशे त्रयीस्थापना ॥

वैदिकसिद्धान्तसंरक्षिणी

उपसंहरति श्लोकद्वयेन **तस्मादिति** । सर्वेषां सुखलाभाय प्रयतमानया विदग्धव्यवहारं ख्यापयन्त्या राजनीत्याऽनया त्रयीस्थापनादित्यर्थः । न व्यभिचारयेत् त्रयोविपरीतम् अनुष्ठाप्य भूतानाम् प्राणिनां सङ्करं नोत्पादयेत् इति भावः । **सन्दधानः** कर्मसङ्कराद् वर्णसङ्कराच्च व्यावर्त्य शासनेन स्वस्वजोविकाम् सम्प्रधार्य यथाधिकारं धर्मप्रेरकः । नन्दति उभयलोके कीर्तिभाग्भवति ।

द्वितीयश्लोकेन त्रय्याः फलं लोके सुखं शान्तिश्चेति दर्शयति **व्यवस्थितेति** । व्यवस्थिता अनतिक्रान्ता सुरक्षिता आर्यमर्यादा यत्रेति विग्रहः तस्य लोकेन सह अन्वयः । आर्येति । उपायविकल्पे कृतक्षणः आर्यः तदुक्तम्—
यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः । इति नीतिसारपद्यव्याख्यायां—
आर्या उपायविकल्पे कृतक्षणाः । इति ॥

उपायविकल्पप्रकरणे नीतिसारोक्ते एकद्विकत्रिक चतुष्कभेदेन सामाद्युपायानां संहृत्य विभज्य वा अधिकारिभदेन यः प्रयोग उक्तः तत्र कृतक्षणः निर्मलमतिरित्यर्थः । मर्यादा केन कियत् किं कर्तव्यमिति चतुर्वर्णाश्रमस्य परिच्छेदिका-

वैदिकसिद्धान्तसंरक्षिणी

रेखा स्वस्वकर्तव्या तदनतिक्रमणमिति यावत्। तदेवाह कृतेति। वृत्तिरपि सर्वेषां मर्यादितैवेति बोध्यम्।

त्रयीफलम्

एतन्नियमनं त्रय्या व्यवस्थाप्यते। सा नरकदण्डभीतिं स्थिरामुत्पाद्य प्रच्छन्नात् पापान्निवारयति कर्तव्येषु स्थिरबुद्धिमुत्पादयति। अतः लोको मर्यादान्नातिशेते। प्रसीदति इति। परस्परसाकाङ्क्षत्वात् स्वकर्मण्यभिरतः परं प्रति आत्मनः अङ्गभावं आसाद्य चतुर्वर्णाश्रमो लोक उन्नतिं प्राप्नोति। यदि त्रय्या अतिक्रमणं क्रियते तदा सुखं न भवति इति व्यतिरेकमाह नेति। विषाद सामग्री-विघटकत्वादिति शेषः। अन्यथा त्रयीलोपप्रयुक्तेन सत्वगुणापकर्षेण तमोबाहुल्येन च कार्यानिस्तरणात् विघ्नात् चौर्याभिग्रहणात् दैवव्यापत्तेः राजादिदोषाद्विषादो जायते [1]। ततः चिन्तानिःश्वासध्यानादिक्लेशम् सततमनुभवन् लोकः सदा विषादभाग्भवति।

इति अर्थशास्त्रव्याख्यायां वैदिकसिद्धान्तसंरक्षिण्यां तृतीयोऽध्यायः।

जयमङ्गला

यत् एवं तस्मात् स्वधर्मम् भूतानां मनुष्याणां राजा न व्यभिचारयेत् हेतुकर्तृत्वेन। हि यस्मात् स्वधर्मं सन्दधानः प्रतिपादयन्नित्यर्थः। प्रेत्य जन्मान्तरे इह च लोके। नन्दति मोदते[2] धर्मोपादनात्। त्रयीधर्मव्यवस्था नैकफला।

इति विद्यासमुद्देशे त्रयीस्थापना।

जयमङ्गलाक्रोडपत्रम्

आर्यत्वम्, अभियुक्तानां प्रामाणिकत्वञ्च

मूले आर्येति (पृ० ३५८) ननु आर्यत्वं किम्? तच्च जातिरूपमेव। तैः इतिहासेषु क्रूरकर्म कृतम् अत आर्यजातेः द्वेष्यत्वप्रसङ्गः। आर्याः लङ्कां गत्वा द्रविडान् अद्विष्यन्। अतः द्वेष्टृत्वात् एते अस्माद्देशान् निष्कासनीयाः। न चाऽयं देशः आर्याणामेव, कथं एतस्माद्देशात् आर्याः निष्कासनीया इति वाच्यम्? एतद्देशनिवासित्वस्य तेषु अस्वीकारात् आदिवासिष्वेव एतद्देशनिवासित्वस्य स्वीकाराच्च। इति चेदुच्यते।

आर्यशब्दः न जातिवाचकः अपितु वक्ष्यमाणगुणविशिष्टत्वं यत्र तद्वाचकः, तथैव संस्कृतवाङ्मये उपलब्धत्वात्। तथाहि आर्यशब्दोऽयं संस्कृतवाङ्मये वेदादारभ्य इतिहासपर्यन्तं व्यवहृतो वर्तते। यथा वेदे निर्दिष्टयवादिपदस्य

---

१ तदुक्तम्-

कार्यानिस्तरणाद्दैवव्यापत्ते राजदोषतः।
चौर्याभिग्रहणाद्विघ्नाद्विषादो नाम जायते॥

२ अशुद्धम्
मोदते। धर्मोपादानात्। त्रयी

जयमङ्गलाक्रोडपत्रम्

अर्थनिरूपणे वैदिकधर्मे अभियुक्ताः एव सर्वशिष्टसम्मतत्वात् प्रमाणिकत्वेन स्वीक्रियन्ते नत्वितरे। अतः म्लेच्छकल्पितः यवपदार्थः "यवैर्यजेत" इत्यादौ वैदिकैः न स्वीक्रियते, तथैव आर्यशब्दस्याऽपि व्युत्पत्तिः वेदार्थनिरूपणे अभियुक्तानां व्याख्यायामुपलब्धायां सत्यां तथाविधस्यैवार्थस्य स्वीकर्तव्यता उचिता। अतः आर्यशब्देन व्युत्पतिबलात् योगार्थं पुरस्कृत्य मनीषिभिः स्वीकृतोऽर्थः ग्राह्यः। तदुक्तम्—"अर्तुं आचरितुं योग्यः आर्यः" इति।

अमुमेव अर्थमनुसृत्य अपरे एवमाहुः—

"कर्तव्यमाचरन्कामम् अकर्तव्यमनाचरन्।
तिष्ठति प्राकृताचारे स तु आर्य इति स्मृतः।" इति।

अतएव अनार्यत्वेन परिगृहीतोऽपि यदि स्वानि कुलक्रमागतानि कर्माणि ईश्वरप्रसादोद्देश्येन सात्विकस्थितौ स्थितः सन् करोति तर्हि सोऽपि आर्येष्वेव परिगृह्यते। तदुक्तम्—

आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत्। इति। म० स्मृ०

एतेन चण्डालानां शूद्राणामादिवासिनां वा कर्म अनार्यकर्मेति मत्वा तान् अनार्यान् मन्यन्ते इति प्रत्याख्यातम्, स्वकर्मणा परमेशितुः अर्चकानां शूद्रादीनामपि यथायोग्यस्थाने निवेशितत्वात्। अतएव यदा क्षत्रियास्सन्तोपि पितुराज्ञामुल्लङ्घ्य विश्वामित्रपुत्राः ययातिपुत्राः इव अवर्तन्त तदा ते समाजेन अनार्येष्वेव निवेशिताः। तस्मात् स्वं स्वं कर्म यथायोग्यं येन पालितं भवति स सः आर्यं एव भवति। इत्येवं "अर्तुमाचरितुं योग्यः आर्यः" इति पूर्वोक्तस्य धातुव्याख्यानस्य आशयः।

यदि च आर्यत्वं जातिरूपं भवेत् तर्हि पतितेषु क्षत्रियेषु अनार्यत्वं, चण्डालेषु आदिवासिषु कुलीनेषु आर्यत्वं वेदार्थनिरूपणे अभियुक्तैः निरूपितं कथमुपपद्येत? एवञ्च असाधारण-विपदादियोगेष्वपि तत्तत्कुलीनाः स्वस्वोचितं कर्म कदापि न परित्यजन्ति इत्येवंविधं यत् कुलीनत्व तदेव सर्वसाधारणमार्यत्वमिति आर्यस्वरूपं सङ्क्षिप्तमवगन्तव्यम्। तदुक्तं नी० सा० कृता—

कुलं सत्वं दया दानं धर्मः सत्यं कृतज्ञता।
अलोभ इति येष्वेते नानार्यान् प्रचक्षते। नी० सा० १८ स० इति।

एतन्नीतिसारोक्तपद्यदिशा कुलादिगुणाष्टकवत्त्वं आर्यत्वमिति सिद्धम्। एवंभूताः आर्याः राज्ञा अकार्यात् अविचारात् आत्मनः कुपथान्निवृत्तये अङ्कुशस्थाने स्थापनीया भवन्ति। तेषां सामाद्युपायप्रयोगकौशलात्। धर्मतत्वस्य च तैरेव निर्णेतु शक्यत्वात्।[1]

---

१ तदुक्तम्—वीरमित्रोदये—भविष्यपुराणे—नीतिसारे च-
यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः।
स धर्मो यं विगर्हन्ति तमधर्मं प्रचक्षते। इति।
आर्याः उपायविकल्पे कृतक्षणः। इति च। टीका का० नी० ज० मं०

जयमङ्गलाक्रोडपत्रम्

आर्याणामङ्कुशत्वम्

अत्रेयमुपपत्तिः—राज्ञा हि तथा प्रयतनीयं यथा सः आत्मनि प्रजानुरागं सम्पादयेत्। तत्र प्रतिबन्धकं तस्य वाक्पारुष्यदण्डपारुष्यार्थदूषणादिव्यसनित्वं सम्भवति। अतस्तन्निरासाय लोकस्य पुरतः माध्यस्थ्यं प्रदर्शयता तेन विवादे न्यायतः यत्सत्यं भवति तदेव प्रकाशनीयं भवति। परन्तु एवंविधं कौशलं उत्साह-प्रधानेन वीररसस्थायिना राज्ञा आर्याङ्कुशमन्तरा कर्तुं न्न शक्यते इति सविस्तरं प्राक् प्रपञ्चितम्। (पृ० ३२६) अतः न्यायकौशलप्रकाशनाय अङ्कुशस्थाने आर्याः स्थापिताः। ते सात्विकाः, विदग्धाः, वीतरागाः, समदर्शिनः, स्वमण्डले परमण्डले वा तत्तदधिकारिणं विविच्य सामाद्युपायादिषु एकद्विकत्रिकचतुष्क भेदेन[1] सामादि प्रयोगं सफलं कर्तुमधिकृताः यत् राजानं आदिशन्ति तदादेशविषयीभूतः राज्ञा संपाद्यते। स एव उपर्युक्त भविष्यपुराणोक्तधर्मलक्षणसङ्गतः धर्मः नीतिशास्त्रे गृहीतत्वात् प्रजानुरञ्जनक्षमः न्यायः सम्भवति। अतः आर्याः यदुपदिशन्ति तदेव राज्ञा पालनीयं भवति इति स्थितम्। यः किल उपायविकल्पेऽसावधानः स न आर्यः इति उपर्युद्धृत (पृ० ३६१) जयमङ्गलाव्याख्यानात् अर्थत एव आयातम्। तथा चेयमीदृशी आर्यता कस्यचिज्जातीयस्य न जन्मसिद्धाधिकारविषयः अपितु येन पुण्यवता पुरुषेण प्राप्तुं शक्येत स एव आर्यः इति सिद्धम्। भगवत्पूज्यपादेषु श्रीमदाद्यशङ्कराचार्येषु केरलदेशवासिषु, तथा अनेकेषु वाचार्येषु आन्ध्रादितत्तद्देशवासिषु, विज्ञानेश्वरादिषु, विद्यारण्यस्वामिषु, गोकुलनाथोपाध्यायादिषु, बङ्गवासिषु श्रीचैतन्यमहाप्रभुप्रभृतिषु, समर्थ रामदास प्रभृतिषु, केरलेषु कुरलप्रभतिषु, उत्तरप्रदेशेषु गौडेषु तुलसीदासप्रभृतिषु नेपालवासिषु भानुभक्तप्रभृतिषु, महाराष्ट्रीयेषु सत्सु इयमार्यता दृश्यते। तस्या एव इदं फलं यत् उपर्युक्तानां तदन्येषां वा धर्मसिन्धुनिर्णयसिन्धुवीरमित्रोदयादिग्रन्थकर्तॄणां वाक्यस्य प्रामाण्यं पूर्वपश्चिमदेशनिवासिभिः सर्वैरैव सर्ववादिसम्प्रतिपन्नत्वेन अङ्गीकृतमस्ति। सन्ततुकाराम, कबीर, नामदेव, गोराकुम्भारप्रभृतीनां वचनस्याप्रामाण्यं केन वक्तुं शक्यते? तथा च एतेषु सर्वेषु महामहिमशाक्तिषु उपायविकल्पे कृतक्षणेषु आर्यत्वमप्रतिषिद्धम्। अतः आर्याभिधेया अमुकैव जातिः इति वक्तुं न शक्यते।

आर्यद्रविडकलहः

यदि च आर्यद्रविडकलहमिषेण द्रविडेषु आर्यत्वं न स्वीक्रियते तर्हि भगवत्पूज्यपादा आर्याः न स्युः न बा विद्वन्मुकुटमणयश्च। तस्मात् आर्याः एतद्देशीयाः नासन् इत्युक्तिः न साधीयसी इत्यपि स्फुटं भवति। तत्र कारणं 'कृण्वन्तो विश्वमार्यम्'

---

१. तेषामेकयोगाश्चत्वारः द्वियोगास्त्रयः त्रियोगाश्चत्वारः
एकश्चतुर्योगः इति पञ्चदश योगाः अनुलोमाः तावन्तः प्रतिलोमाः इति।

जयमङ्गलाक्रोडपत्रम्

आर्याणां निवासो भारते

इति वचनमेव । तथाहि—समस्त संस्कृतिषु प्राचीन संस्कृतेः निदर्शकः ग्रन्थः वेद एव अस्तीति सर्वैः संमन्यते । स च अस्मिन् आर्यावर्ते एव स्थितः । अत्रैव वेदप्रतिपादित मृग गोयवदर्भादिपदार्थानां उत्पत्तिमत्वात् । स च "कृण्वन्तः, इत्युक्त वचनेन विश्वमार्यतया द्रष्टुमभिलषति इति स्वाशयं प्रकटयति । तस्मात् अत्रैव स्थितवेदस्थार्यपद सङ्केतेन, अत्रैव च यज्ञस्य अनुष्ठेयत्वेन च आर्याणां एतद्देशनिवासित्वमासीत् इति सिद्धं भवति ।

अत्र केचिद् भारतादन्यत्र देशे गौरस्तीति वदन्ति तन्न साधु; सास्नारूपलक्षणलक्षितत्वस्य यूरोपादिदेशे समुद्भुते गवयेऽभावात् स गौर्नास्ति ।

वर्णेतरजातीनां धर्मः

ननु भारतीयराजनीतौ स्वीकृतायां जातिव्यवस्थायां प्रागुक्तायां 'ब्रह्मणे ब्राह्मणमालभेत' इत्युद्धृतवचनेन निर्णीतानां सङ्करजातीनां धर्मः वर्णाश्रमधर्मबहिर्भूतत्वात् त्रय्यामुपवर्णितो न वर्तते । तथासति सङ्करजातीनां धर्मः एतन्मते कीदृशो भवति ? इति चेदुच्यते । त्रय्यन्तर्गते भागवतधर्मे तासां सङ्करजातीनां अधिकारो भवितुमर्हतीति शास्त्रेषु प्रतिपादितम् । तदुक्तं भक्तिसूत्रे—

सर्वेषामधिकारो वर्णाश्रममाद्यनियमात् इति । भ० सू०

भागवतधर्माणां स्वरूपं तु तत्तज्जातीयानां कृते कीदृशमस्ति इति आकरात् द्रष्टव्यम् ।

त्रयीप्रामाण्यम्

मूले (३५८ पृ०) त्रय्येति । ननु त्रयीप्रामाण्यं कुतः स्वीकर्तव्यम् । इति चेदुच्यते । कामसूत्रे त्रय्याः प्रमाण्यं येन हेतुना साधितं । स एव हेतुः अत्र तदीयवचनोद्धरणेन उपन्यस्त : टिप्पण्याम्[1] ज्ञेयः ।

तथा "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यं आप्तप्रामाण्यात्" इति सूत्रेण गौतमादिभिः तट्टीकाकर्तृभिश्च वेदप्रामाण्यं साधितम् तदपि अत्र चिन्त्यम् । जयन्तभट्टेनाऽपि वेदप्रामाण्यसाधनं न्यायमञ्जर्यामुपन्यस्तमस्ति तदपि स्मर्तव्यम् । एवंरीत्या प्राचीनैः साधिता वेदप्रामाण्यविषयिणी रीतिः स्मारिता । तामेव मीमांसकादिरीतिं साधयितुं काचन अनुमानप्रणाल्यपि प्रकाशिता

---

१. का० सू०—शास्त्रस्यानभिशङ्क्यत्वात्—२ अ १ अधि० त्रिवर्गप्रतिपत्तिप्रकरणे—२५ शास्त्रस्येति—'धर्मस्यालौकिकत्वात्तदभिधायकं शास्त्रमुक्तम्, पौरुषेयमपौरुषेयञ्च यत्र पूर्वमभिशङ्कनीयम् ।

किमिदं सत्यं मिथ्या वेति, पुरुषादयो रागादिभिरविद्यया चोपप्लुतं वितथमपि ब्रुवन्ति । अपौरुषेयं च वेदाख्यं पुरुषसम्बन्धाभावाददुष्टमनभिशङ्कनीयम् । यथोक्तम्—दोषाः सन्ति न सन्तीति पौरुषेयस्य युज्यते ।

वेदे कर्तुरभावात्तु दोषशङ्कैव नास्ति नः ॥ इति ।

जयमङ्गलाक्रोडपत्रम्

वर्तते "शान्तिका अग्रदूत ग्रन्थे"। साऽपि अत्र विद्वत्सन्तोषाय टिप्पण्यां उद्धृताऽस्ति । एतद्नुमानप्रणाल्याः विशेषतया साहित्यमर्यादानुसारेण स्फुटीकरणं (शान्ती का अग्रदूत ग्रन्थे २ भागे) हिन्दीभाषायां व्यक्तम् अत्र विस्तरभयान्नोच्यते।

आयुर्वेदस्य सृष्टेः प्रागस्तित्वम्

ननु उपर्युद्धृतगौतमवचनेन आयुर्वेदप्रामाण्यात् वेदप्रामाण्यं साधितं नैयायिकैः। परम् आयुर्वेदस्यैव अस्तित्वं सृष्टेः प्राङ्नासीत् इति चेन्न। यदि आयुर्वेदः कुमारभृत्यादिरूपः प्राङ्नासीदिति स्वीक्रियते तर्हि कुमाराणां सङ्गोपनम् पित्रादिभिः अज्ञातं भवेत् तर्हि तदेवाशक्यं स्यात्। इष्टापत्तौ च कुमाराणामुच्छेदः स्यात्। तस्मात् आयुर्वेदस्यास्तित्वं सृष्टेः प्रागेवासीत् इति वक्तव्यमापतति।

किञ्च पृथक्पृथक्उपयुक्तस्य मधुनः धृतस्य च अतीवोपयोगित्वं आयुर्वेदे प्रतिपादितमस्ति। परम्, तयोः संयोगः हानिकरो भवति इत्येवंविधानेकसंयोगानाम-न्यूनानतिरिक्ततया परिगणनं असर्वज्ञानां कृते दुर्ज्ञेयमपि आयुर्वेदेन कृतमस्तोति हेतुना तस्यास्तित्वं प्रामाण्यञ्च साधयितुं शक्यते। तदुक्तम् साङ्गवेद-विद्यालीय २५ वार्षिकत्रिवरणे गोर्वाणवाग्वर्धिनोसभया प्रस्तुते निबन्धे तत्रैव द्रष्टव्यम्[२]।

---

१. "स्वाध्यायोऽध्येतव्य" इत्यध्ययनविधिवाक्यप्रयोज्यशाब्दभावनाहेतुकेष्ट साधनत्वानुमितिरद्य यावद्धर्मानुष्ठातृनिष्ठा, स्वसजातीयोच्चारणसापेक्षोच्चारणकानु-पूर्वीकशब्दवृत्तिशाब्दभावनाहेतुका, प्रभुशक्तिसमृद्धपुरुषसमवेतशाब्दभावनाहेतुज्ञाना-जन्यत्वे सति, शब्दाजन्ययथार्थज्ञानवत्पुरुषसमवेतप्रकृतेष्टसाधनताविषयक ज्ञानजन्य—शब्दवृत्तिशाब्दभावनाहेतुज्ञानाजन्यत्वे सति, शाब्दभावनाहेतुज्ञानजन्य-त्वात्। आयुर्वेदीयरसायनाद्यनुष्ठानगतप्रायश्चिताधीनपापनाशे इष्टसाधनत्वानुमिति-रेतावत्कालपर्यन्तं बौद्धादिष्वपि समवेता, शाब्दभावनाज्ञानमात्रजन्या अलौकि-कार्थत्वे सति यथार्थप्रवृतिजनकत्वात्। न प्रभुशक्तिसमृद्धनिष्ठशाब्दभावनाज्ञानजन्या, स्वेच्छाधीनप्रवृत्तिजनकत्वात्। एतेन एतावत्कालपर्यन्तं पूर्वं जायमानायामनुमितौ स्वसजातीयोच्चारणसापेक्षोच्चारणकानुपूर्वीकशब्दवृत्तिशाब्दभावनाज्ञानजन्यत्वं सिद्ध-मिदानीन्तनानामनुमित्यभावेऽपि न क्षतिः। इदानीन्तनोच्चारणस्य स्वस्वजातीयोच्चारणसापेक्षतायाः प्रत्यक्षसिद्धत्वादिति निष्कर्षः।

२. (पृ० ५२ सं० २००३ रजतजयन्ती)

उपवेदानां पर्यालोचने क्रियमाणे तेऽप्यनादिपरम्परामूलका इत्यभ्युगन्तव्यमा-पद्यते। गान्धर्ववेदः षड्जादिस्वरसमाहारात्मक इति सर्वविदितमेव। षड्जत्वादि-

जयमङ्गलाक्रोडपत्तम्

एवञ्च प्रत्यक्षानुमानशब्दैः साधितस्य त्रयीप्रामाण्यस्य वेदापौरुषेयत्वस्य च अस्तित्वं न केनाऽपि अपन्होतुं शक्यमिति विशेषतया परैः अपरिशीलितः त्रयीप्रामाण्यविषयः समस्तविद्याप्रचाराय अभ्यर्हितः अवश्यं राजनीतौ विद्यारसिकैः अनसूयुभिः अनुसन्धेयः।

नन्दति मोदते, प्रजानुरागद्वारा श्रियःप्राप्तेः देवगुरुप्रसादद्वारा पारलौकिकोत्तम फलप्राप्तेश्च। तथा नीतिसारेऽपि उक्तम्—

आत्मानं प्रथमं राजा विनयेनोपपादयेत्।
ततोऽमात्यान् ततो भृत्यांस्ततः पुत्रान् ततः प्रजाः॥
सदानुरक्तप्रकृतिः प्रजापालनतत्परः।

विवेकः उपदेशसहकृतश्रावणप्रत्यक्षेणैव भवतीति भामत्यादिदर्शनेन स्पष्टम्, गान्धर्वविद्भिः गायनाचार्यैरपि अयं सिद्धान्तः अभ्युपगम्यते। तथा च—

गान्धर्ववेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा॥-

इत्यनुमानं प्रसरति। तेनैव न्यायेन षड्जादिस्वरसमूहात्मकस्य सामवेदस्यापौरुषेयत्वे नास्त्येव विप्रतिपत्तेरवकाशः। तेनैव न्यायेन उदात्तादिस्वरसमूहात्मकस्येतरस्यापि वेदग्रन्थस्यसर्वस्य गुरुपरम्परामूलकत्वं निःसंशयमेव प्रतीयते, इति गान्धर्वोपवेदद्वारा वेदस्यापौरुषेयत्वं पर्यवस्यति।

आयुर्वेदोपवेदद्वाराऽपि अयमर्थः सिध्यति। तथाह्युक्तमुदयनाचार्यैरात्मतत्व विवेके—"तथाहि न तावदयमायुर्वेदो प्रमाणम्, संवादस्य प्रायिकत्वात्—न चास्या—न्वयव्यतिरेकभावो मूलम् आवापोद्वापेन योगानामनन्ततया अर्वाचीनेनाशक्यत्वात्। विषादौ तथाकरणे बहुतरानर्थप्रसङ्गात्" इति। औषधीनां तक्रकरकादीनां शीतत्वोष्णत्वे प्रत्यक्षमुपलभ्येते, तद्विपरीते उष्णत्वशीतत्वे तु अपौषेयमात्रैकगम्ये एव।

एवं विरुद्धसंयोगानां परिगणनं हि इतोऽन्ये विरुद्धसंयोगा न भवन्तीति सूचनद्वारा समस्तविरुद्धसंयोगपरिगणनाशक्त मनुष्यबुद्धिपूर्वकत्वाभावमायुर्वेदस्य सूचयद् वेदमूलकतां दृढयति। पाश्चात्यानां चिकित्सापद्धतिरपि मूलतः भारतीयायुर्वेदमेव अङ्गीकरोति इति स्फुटम् कश्यवसंहिताभूमिकादृशाम्। तर्कतोऽप्येतत्सिध्यति—कुमारभृत्यां विना हि जातस्य शिशोः संरक्षणमेव दुःशकमतः अपौरुषेयमूलकत्वमेव वक्तव्यमापतति आयुर्वेदस्य। मनुष्यसृष्टिश्च अत्र अनादिपरम्परामुलिकैव तर्कतः सिध्यति। अतः आयुर्वेदपरम्परा स्वस्य स्वमूलभूतवेदेन सह अनादित्वं स्थापयति।—

जयमङ्गलाक्रोडपत्रम्

विनीतात्मा हि नृपतिः भूयसीं श्रियमश्नुते ।
तस्माद्धर्मं पुरस्कृत्य यतेतार्थाय भूपतिः ॥
धर्मेण वर्धते राज्यं तस्य स्वादुफलं श्रियः ।
आयत्तं रक्षणं राज्ञि वार्ता रक्षणमाश्रिता ॥
वार्ताच्छेदे हि लोकोऽयं श्वसन्नपिन न जीवति ।
न्यायप्रवृत्तो नृपतिरात्मानमथ च प्रजाम् ॥
त्रिवर्गेणोपसन्धत्ते निहन्ति ध्रुवमन्यथा ।
धर्माद्वैजवनो राजा चिराय बुभुजे महीं ॥
अधर्माच्चैव नहुषः प्रतिपेदे रसातलम् ॥ इति ।

एतदेव वक्ष्यति नैकफलेति ।

इति कौटिलीये अर्थशास्त्रे प्रथमाधिकरणे तृतीयाध्याये जयमङ्गलाक्रोडपत्रं सम्पूर्णम् ।

धनुर्वेदस्तु अनेकमन्त्रग्रामात्मकास्त्रबहुलः साम्प्रतमुपलभ्यमानोऽपि गुरुपदेशमन्तरेण न कार्यकारी दृश्यते । पूर्वञ्च कार्यक्षम आसीत् गुरुमुखादवगम्यमान इति च इतिहासो दृश्यते यदा, तदा तस्यापि अध्ययनं गुर्वध्ययनपूर्वकमासीत् इति सिद्ध्यति इति सर्वथा सिद्धं धनुर्वेदस्यापि मन्त्रसमूहात्मकस्यानादित्वम् । अतएव गौतमेनाप्युक्तम् । "मन्त्रायुर्वेद प्रामाण्यवच्च तत्प्रामाण्यमाप्त प्रामाण्यादि"ति मन्त्राणामनादित्वञ्च स्पष्टं विवेचितं भामत्यां विज्ञेषु विदितमेव ।

चतुर्थोऽध्यायः
वार्तादण्डनीतिस्थापने
[वार्तास्वरूपप्रयोजने]

कृषिपाशुपाल्ये[1] वणिज्या च वार्ता;[2]

श्रीमूला

अथ वार्ताया विद्यात्वं स्थापयितुं स्वरूपादिकमाह—कृषिपाशुपाल्ये इत्यादि। कृषिः क्षेत्रबीजवापपरिकर्मादिप्रतिपादकं शास्त्रं पराशरप्रोक्तम्। पाशुपाल्यं गवाश्वादिपालनप्रकारोपदेशकं शास्त्रम् गौतमशालिहोत्रादिप्रणीतम्। वणिज्या क्रय-विक्रयव्यवहारतन्त्रं विदेहराजप्रणीतम्।

वैदिकसिद्धान्तसंरक्षिणी

आन्वीक्षिकीत्रय्योः सङ्ख्यां फलं प्रधानगुणभावं स्वरूपञ्च निरूप्य वार्तादण्ड-नीत्योस्तदभिधातुं आह—कृषीति। कृषिः पराशरोक्ता बीजवापपरिकर्मादिविधा-नार्था। पाशुपाल्यं गवाश्वादीनां पोषणचिकित्सादि। तच्च गौतमशालिहोत्रादि-प्रणीतम्। वणिज्या-क्रयविक्रयादिः। स च विदेहराजप्रोक्तः। एतत्त्रितयं वार्ताभेदः। कृषिः पाशुपाल्यं वणिज्या चेति जयमङ्गलापाठः। पृथक्करणं समस्तव्यस्तज्ञापनार्थम् इति टीकाग्रन्थे स्पष्टम्। एतेन वार्ताभेदस्य निरूपणं कृतम्। वार्तेति। एतेन तत्स्वरूपं बोध्यम्। तच्च वर्तते जीवति अनयेति।[3]

जयमङ्गला

वार्तायाः नीतेश्च[4] स्थापनमाह-कृषिरित्यादि। कर्षणं कृषिः। "इक्

---

१. नी०टी० ······पापप्रविण······तं पराशरप्रोक्तं शास्त्रमपि कृषिः।

२. नी०टी० शालिहोत्रराजपुत्रपालकाप्यगौतमादिप्रोक्तं शास्त्रम्······

३. तदुक्तं उपाध्याय—निरपेक्षायाम् नीतिसारव्याख्यायाम्—नीति स० २।१४—एतत्त्रयमेव जगद्भृतिहेतुत्वादिह जगति वर्तनाद्वार्तेत्यभिधीयते। जयमङ्गलायामपि तत्रैव वार्ता वर्तते जीवति लोकोनयेति कृत्वा। इति।

४ अशुद्धम्

नीतेश्च।

नीतेश्चेति। उपसंहारे एतदध्यायप्रान्ते वार्तादण्डनीतिस्थापने इति मूलकृता उक्तम्। तस्माज् जयमङ्गलायामपि वार्ताया दण्डनीतेश्च इत्येवपाठः समुचितो भाति। तेन नीतेश्च इति जयमङ्गलोक्तं चकारपदं समञ्जसं भवति। अतएव जयमङ्गलायां एतदध्यायान्ते 'वार्तास्थापना दण्डनीतिस्थापना च' इति उपसंहृतं उपपद्यते। न च एतस्य पाठस्य संवादित्वे इतरनिबन्धकर्तृलेखः प्रमाणं नास्तीति—

जयमङ्गला

कृष्यादिभ्यः" (३-३-१०५) इतीक्। तत्साहचर्यात् तच्छास्त्रमपि पराशरप्रोक्तम्। तत्र हि जलभूमिबीजपरिकर्मवापकालदोहृदव्याधिचिकित्सापुष्पफलरसगन्ध निर्यासविपर्याससम्पत्तिविधानम्। पशून् पालयतीति पशुपालः तस्य कर्म पाशुपाल्यम्। तत्साहचर्याद् गौतमशालिहोत्रादिप्रणीतशास्त्रमपि। वणिज्या वणिक्कर्म। दूतवणिग्भ्यां च (वा० ५-१-१२६) इति यत्प्रत्ययः तदस्यामस्तीति।

"अर्शआदिभ्योऽच्" (५-२-१२०) इत्यच्। वणिज्या वणिग्विद्या विदेहराजर्षिप्रोक्ता। तत्र हि सर्वपण्यानां लक्षणं क्रयविक्रयज्ञानञ्च। केचित् कृषिपाशुपाल्ये इति समस्य पठन्ति तत्र च प्रयोजनम् इतरेतरापेक्षत्वं। वणिज्यायाश्च पृथक्करणं निरपेक्षत्वादित्याहुः। तदयुक्तम्। सर्वेषां परस्परार्थकरणस्य अप्रतिषिद्धत्वात्। तस्माद् असमासकरणं समस्तव्यस्तज्ञापनार्थम्। एतत् सर्वं वार्ता। लोकस्य वर्तनं वृत्तिः सा अस्यामस्तीति "प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः" (५-२-१०१) इति णप्रत्ययः। वार्ता क्रिया, तत्साहचर्याद् विद्यापि। अयं स्वरूपभेदः।

जयमङ्गलाक्रोडपत्रम्

यथा त्रयीपदव्यवहारः वेदे तदर्थे च प्रवर्तते इति तृतीयाध्याये उक्तमस्ति तथैव कृष्यादिपदव्यवहारोऽपि कृष्यादिकर्मणि कृषिशास्त्रे च भवति इति ज्ञापयितुमाह तदिति। कृष्यवान्तरस्वरूपाणां केषां केषां स्वरूपं कृषिशास्त्रे निरूपितं भवति इत्याह तत्रेति। एवमग्रेऽपि बोध्यम्।

विदेहेति। एतेन कौटिल्यः कृषितन्त्रशिल्पगवाद्यायुर्वेदग्रन्थानुपलभ्य अमुमध्यक्षप्रचारं उक्तवानिति सूच्यते तत्र तत्र कौटिल्येन तथा उक्तत्वात्। तदुक्तम् "कृषितन्त्रशिल्पायुर्वेदज्ञाः चिकित्सकाः प्रतिकुर्युः" इत्यादि।

भारतीय राजनीतेः पूर्णता

इयं हि भारतीयराजनीतिः देशकालानुकूल्येनेति पदं स्वलक्षणे निवेश्य आत्मनः पूर्णत्वं व्यञ्जयति इति सत्यं, परं, कौटिल्येन संसूचितस्य विदेहप्रोक्तपण्यशास्त्रस्य पराशरनिर्दिष्टकृषिशास्त्रस्य च उपलब्ध्यभावात् वार्तासम्बन्धिनं प्रयोगं निर्णेतुं इयं भारतीय राजनीतिः अधुना न शक्नोति तथासति वर्तमान समये भारतीय राजनीतिः कथं सम्पूर्णा भवेत् ? इति चेदेवम्।

वार्तया अर्थार्जनमेव साध्यते तच्च वार्ताशास्त्रानुपलब्धौ कथं परिपूर्णं भविष्यतीत्याशङ्क्य वात्स्यायनेन कामसूत्रे अध्यक्षप्रचारेण अर्थः अर्जयितुं शक्यते इति समाहितमस्ति[1] तदेवोत्तरमत्र बोध्यम्।

वाच्यम्। टिप्पणी सङ्गृहीते पाठे तथैव उल्लेख दर्शनात्। तदुक्तं 'विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापनाचेति' इति। तस्मात् वार्ताया दण्नीतेश्चेति कल्पितः शुद्धः पाठः अनुमन्तव्यः।

१ तद्यथा 'विद्याभूमिहिरण्यपशुधान्यभाण्डोपस्करमित्रादीनामर्जनमर्जितस्य विवर्धनमर्थः तमध्यक्षप्रचाराद्वार्तासमयविद्भ्यो वणिग्भ्यश्चेति'॥ १०॥

जयमङ्गलाक्रोडपत्रम्

न च वात्स्यायननिर्दिष्टाध्यक्षप्रचारस्य स्वरूपं दुरधिगममस्तीति आशङ्क्यम्। 'अध्यक्षाः प्रचरन्ति अनेन' नेति (पृ० ४६) प्रदर्शितत्वात्। भिक्षुप्रभमतिनाऽपि स्वगतकार्यानुष्ठाने अध्यक्षाः प्रचरन्त्यनेन उपदेशेन इत्यध्यक्षप्रचारः, इति रीत्या उक्तत्वाच्च। (खण्ड २ पृ० ४)

तस्मात् अध्यक्षप्रचारत्वेन कौटिल्योक्तः द्वितीयाधिकरणात्मकः षट्त्रिंशदध्यायघटितः ग्रन्थः बोध्यः। स अर्थार्जनहेतुत्वात् वार्तोद्दिष्टं कार्यं सम्पादयितुमर्हति,। यद्यपि तदिदं प्रागुक्तजयमङ्गलायां 'अध्यक्षाः प्रचरन्तीति' व्याख्यायां कण्ठतः अध्यक्षप्रचारः वार्ताशास्त्रमिति नोक्तं तथापि वार्ताकार्यकरण सामर्थ्यात् अध्यक्षप्रचार एव सम्प्रति वार्ताशास्त्रमस्ति इत्येतस्मात् पृथग्वार्ताशास्त्रं विदेहप्रोक्तत्वेन अनुपलब्धमपि सङ्क्षेपतः कौटिल्येन सङ्गृहीतत्वात् उपलब्धमस्तीति मन्तव्यम्। तेन नैतत्प्रयोगनिर्णयविषये भारतीयराजनीतेः न्यूनत्वमस्तीति ध्येयम्।

अध्यक्षप्रचारादिति पञ्चम्यर्थे पदविधिसामर्थ्यम्

न च विदेह प्रोक्त वार्ताशास्त्रकार्यस्य अर्थार्जनस्य सम्पादकत्वं विदेहशास्त्रमनपेक्ष्य कौटिल्यनिर्दिष्टेन अध्यक्षप्रचारेण न ज्ञातुं शक्यते इति वाच्यम्। तमध्यक्षप्रचारादिति पञ्चमीं विभक्तिं निर्दिश्य अध्यक्षप्रचारे तत्कार्यकारणसामर्थ्यस्य संसूचितत्वात्। तथाहि 'समर्थः पदविधिः' इति पाणिन्युक्तनियमानुसारेण अध्यक्षप्रचारात् इति पञ्चमी विभक्तिः वार्तारहस्यवेदननिष्ठ कार्यता निरूपित कारणतामसाधारणीमितरनिरपेक्षां बोधयति, 'व्रीहिभिर्यजेत' इति वाक्ये निर्दिष्टतृतीया विभक्तिवत्। न च 'व्रीहिभिर्यजेत' इति वाक्ये समर्थः पदविधिरिति न्यायः मीमांसकैः कथं समन्वितः इति शङ्क्यम्। व्रीहिभिर्यजेत' यवैर्यजेत इति वचनाभ्यां व्रीहियवनिष्ठयागकारणतानिरूपकाभ्यां किं यवनिष्ठं यागकारणत्वं व्रीहिनिष्ठतत्कारणतानिरपेक्षमथवा न इति सन्देहावसरस्य प्रसङ्गात्।

यदि चात्र व्रीहियवनिष्ठं कारणत्वं परस्परमाकाङ्क्षितं भवेत्तर्हि व्रीहिपदोत्तरं व्रीहिभिरिति तृतीयानिर्देशः व्रीहिभिर्यजेत इति वाक्ये न स्यात्। समर्थः पदविधिरितिनियमोत्थस्य सामर्थ्यस्य निराकाङ्क्षत्वरूपस्य व्रीहिपदेऽभावात्। तथासति पदविधित्वमेव अनुपपन्नं भवेत्। ततः व्रीहिभिरिति प्रयोग एव असाधुः स्यात् तस्मातव्रीहिनिष्ठं कारणत्वं न यवनिष्ठकारणतासापेक्षं अतः "व्रीहिभिर्यजत" "यवैर्यजेत" इति वाक्याभ्यां

जयमङ्गला –'विद्या आन्वीक्षिक्यादयः भूमिः कृष्या, अकृष्या वा हिरण्यं सुवर्णादि। पशुर्हस्त्यश्वादिः। धान्यं पूर्वमध्यावरवापः भाण्डोपस्करं गृहोपकरणं लोहकाष्ठमृद्विदलचर्ममयम्। मित्रं सहपांशुक्रीडितादि। आदिशब्दाद् वस्त्राभरणादयः। अध्यक्षाः प्रचरन्त्यनेनेत्यध्यक्षप्रचारः वार्ता शास्त्रम्। तस्माच्छास्त्रेयोऽधिकृतः, इतरश्च वार्तासमयविद्भ्यः कृषिपाशुपाल्यवणिज्यादि तत्त्वविद्भ्यः इत्युपलक्षणार्थम्, कर्षकेभ्यो गवादिपोषकेभ्यश्च प्रतिपद्येतेत्येवम् ॥१०॥ इति

धान्यपशुहिरण्य[1]कुप्यविष्टिप्रदानादौपकारिकी । तया[2] स्वपक्षं[3] परपक्षं[4] च वशीकरोति[5] कोशदण्डाभ्याम् ॥

जयमङ्गलाक्रोडपत्रम्

व्रीहियवयोर्विकल्पेन ग्रहणं यागाङ्गमिति मीमांसकैः साधितमस्ति । स एव न्यायः "तमध्यक्षप्रचारात्" इति वात्स्यायनीयवाक्ये समन्वीयते । एतस्मादेव कारणात् अध्यक्षप्रचारे येषां तन्त्राणां अध्ययनस्य आवश्यकता विद्यते तानि तन्त्राणि अवश्यमध्येतव्यानि । तदुक्तं 'सोताध्यक्षः कृषितन्त्र शिल्पायुर्वेदज्ञः इति । (कौ० अ०) यत्र तु पण्यादिषु नाऽस्ति इतरेषां तन्त्राणां अभ्यर्हितता तत्प्रयोगः केवलं कौटिलीयपण्याध्यक्षप्रचारादिभिरेव अवगन्तव्यः । अतो विदेहराजप्रोक्तानां ग्रन्थानामनुपलब्धत्वेऽपि न क्षतिः । एवं पराशरप्रोक्तस्य कृषितन्त्रस्य विषयेऽपि अवगन्तव्यम् ।

न च कृष्यादिकर्मणि तत्तदायुर्वेदानामध्ययनमावश्यकत्वेन कौटिल्येनभिहितमस्ति । ते नोपलभ्यन्ते, तथासति पुनरपि भारतीयराजनोतेः अपरिपूर्णता स्यादिति वाच्यम् । शार्ङ्गधरविष्णुधर्मोत्तरपुराणाग्निपुराणगरुड़पुराणादिषु कृषिगवादोनां आयुर्वेदस्य विकोर्णस्य अध्ययनेन कृष्यादिकर्मणां परिचयस्य सम्यक्तया कर्तुं शक्यत्वात् । नैतद्विषयेऽपि भारतोयराजनीतेः अपरिपूर्णता मन्तव्या ।

'कृषिः पाशुपाल्यम्' इति उपलब्धमूलकृत्पाठापेक्षया पाठान्तरमाह (पृ० ३६७) केचिदिति ।

स्वमतमाह तस्मादिति । तथा च कृषिपाशुपाल्यवणिज्यादयः मिलित्वा विभज्य वा यथायोगं यथाविचारं सफला भवन्तीति भावः

ननु नीतिसारे पाशुपाल्यं आदौ निर्दिष्टम् अत्र कृषिः निर्दिश्यते । तथाचानयोः ग्रन्थयोः विरोधो भवतीति चेन्न । (पृ० ३६९-) अध्याये 'कृषिपाशुपाल्ये वणिज्या चेत्यत्र उत्तरितत्वात् ।

विद्यापोति । 'विद्लाभे' इति विद्यापदव्युत्पत्तेः पूर्वं (पृ० ११७) प्रदर्शितत्वात् कृषिपाशुपाल्यवणिज्याः विद्यापदेन व्यवह्रियन्ते ।

श्रीमूला

धान्येत्यादि । तत्र हिरण्यम् अकुप्यं सुवर्णादि ।
कुप्यं स्वर्णरजतातिरिक्तं ताम्रादि तैजसं । सारदारुवेणुवल्लीवल्कादिकमतैजसं च ।

नी० टि० १. कुप्येति । धान्यं कृषिः पशून् पाशुपाल्यं हिरण्यकुप्ये वणिजा विष्टिं त्रितयमपि ददाति ।

,, ,, २. तयेति । वार्तया ।

,, ,, ३. स्वपक्षमिति । तन्त्रम् ।

,, ,, ४. परपक्षमिति । आवापम् ।

,, ,, ५. बशीकरोतीति । उपप्रदाननिग्रहादिना ।

श्रीमूला

विष्टिः कर्मकरः। तया कोशदण्डाभ्यां वार्तया जनिताभ्यां कोशदण्डाभ्यां। कोशो धननिचयः, दण्डः सेना ताभ्यां। स्वपक्षं परपक्षं च वशीकरोति स्वायत्तीकरोति अर्थाद् राजा।

वैदिकसिद्धान्तसंरक्षिणी

तस्याः फलमाह धान्येति। धान्यं पूर्वमध्यापरवापादि। पशुः गोगजाश्वादि। हिरण्यं सुवर्णादि। कुप्यं सारदार्वादि। विष्टयः मार्जका रक्षकादयः। औपकारिकी हितसाधनत्वात्[1]। लोकस्येतिशेषः। तस्याः दण्डनीतिं प्रति उपकारकत्वमाह तयेति। वार्तयेत्यर्थः। स्वपक्षं स्वीयं तन्त्रम्। तथैव टिप्पण्यामभिधानात्। "तन्त्रं स्वकुटुम्ब-धारणं तदपि अध्यक्षप्रचारादारभ्यम योगवृत्तान्तमि"ति पूर्वं (पृ० ७०) जयमङ्गलायां व्याख्यातं प्रथमाध्याये। परपक्षं परावापं अत्रैव टिप्पण्यां उक्तेः मण्डलयोनिमारभ्य दुर्गलाभोपायान्तमिति उक्तत्वाच्च। तच्च जयमङ्गलायां तथैव व्याख्यातम्। वशीकरोति अनुरागमुत्पाद्य परेषां मनः आकर्षति। तद्द्वारमाह—कोशेति क्वचित् दानदण्डप्रयोगाभ्यां, क्वचित् दानेन क्वचित् दण्डेन वा इति भावः।

जयमङ्गला

फलभेदमाह—धान्येत्यादि। तत्र कृषिविद्या पूर्वमध्यावरधान्यप्रदानेन। पशुपालन-कर्मविद्या पशुपालनेन। वणिग्विद्या हिरण्यरूप्यप्रदानेन। बिष्टिप्रदानन्तु सर्वासां साधारणम्। यस्मात् कृष्यादिप्रतिबद्धकर्मकरमनुष्या विष्टिः। औपकारिकी उपकाराय प्रभवति वार्ता लोकस्येत्यर्थात्। राजा तु तत्फलद्वारेण तया बिशेषेण उप-करोतीत्याह—तयेत्यादि। वार्तया हेतुभूतया। यौ कोशदण्डौ ताभ्यां करणभूताभ्याम्। राजा स्वपक्षं परपक्षं च वशीकरोति तत्र स्वप्रकृतिमनुगुणां बिभर्ति कोशेन। विलोमां दमयति[2] दण्डेन बलेन। परपक्षमुपगृह्णात्यर्थेन जयति दण्डेनेति वशीकरोति, तस्मादसाधारणस्वरूपफलभेदाद् वार्ता तृतीया विद्या।[3]………

---

१. धान्य कृषिः पाशुपाल्यं हिरण्यकुप्ये वणिज्या विष्टि त्रितयमपि ददाति।

२. विलोमान् दमयतीति पाठः अशुद्धः प्रतिभाति, एतत्पूर्ववाक्ये निर्दिष्टस्य विशेष्यभूतस्य प्रकृतिपदस्य स्त्रीलिङ्गत्वेन निर्देशात् तद्विशेषणभूतत्वात् विलोमा-मित्येव साधुः। अतः विलोमामिति पदच्छेदः उक्तः। अत्राद्यं स्वप्रकृतिमित्याद्युभयो-र्वाक्ययोर्निष्कर्षः यत् स्वप्रकृतिमनुगुणां कोशेन बिभर्ति, विलोमां तु दण्डेन दमयति इति।

३. इतोऽग्रे पत्रार्धपरिमिताः पङ्क्तयो मातृकायां लुप्ताः।

जयमङ्गलाक्रोडपत्रम्

दण्डस्य प्रजानुरञ्जकत्वम्

(ज०पृ० ३७०) दमयतीति । ननु कस्यचित् दण्डयत्वप्रसङ्गे राज्ञा वधार्थहरणक्लेशेषु एकेन द्वाभ्यां त्रिभिर्वा अपराधी दण्डयो भवति । तदुक्तं "वधः परिक्लेशोऽर्थहरणं दण्डः" इति । (कौ० अ०) एतस्यामवस्थायां परकीयधनापहारे राजा प्रजां कथमनुरञ्जयेत् ? इति चेदुच्यते ।

नीत्यन्तरे अनुरञ्जनाभावः

यस्यां राजनीतौ नाऽस्ति परलोकविश्वासः न वा वेदस्य प्रामाण्यं, नाऽपि च निरतिशयं पारलौकिकं सुखं लौकिकसुखापेक्षया, तस्यां नीतौ कल्पितो दण्डः न प्रजानुरञ्जको भवितुमर्हति मात्स्यन्यायस्य अवश्यं सम्भावितत्वात् ।

नीत्यन्तरे प्रश्नाः

अपि च यथाऽयं मात्स्यन्यायदोषः इतरराजनीतौ असमाहित एव तिष्ठति तथैव भारतीयराजनीत्यननुसरणे दण्डमधिकृत्य अपरेऽपि दोषा असमाहिताः वर्तन्ते। तेऽपि अत्र अनेन सह निर्दिश्यन्ते । तथाहि—अन्यस्वामिकं धनं अपरेण यद्यपह्रियते तर्हि सः धनापहर्ता राज्ञा दण्डयो भवतीति निर्विवादम् । अर्थात् दडप्रणयने स्तेनस्य धनं राज्ञा अपहरणीयं भवति इत्ययं धनापहरणरूपः दण्डेषु अन्यतमः राजप्रणीतः दण्डः इत्युच्यते । अत्र सामान्यतया धनापहारदृष्ट्या विचार्यमाणे राजस्तेनौ उभावपि धनस्य अपहर्तारावेव। एवं सत्वेऽपि एकः न दण्डयः इत्यत्र विनिगमना कीदृशी आस्ते ? इति जिज्ञासायां सत्यां यथोचितमुत्तरं भारतीयेतरराजनीतौ नाऽस्ति । तत्र राजनीतिमतेन इदमेव सम्भाव्यते यत स्तेनस्य दण्ड्यत्वनिर्णयानन्तरं दण्डमिषेण तदीयधनापहरणे बहुमतमनुकूलं यावद्वर्तते तावदेव कथञ्चित् राजकृतं धनापहरणं दोषरूपेण न परिगणयितुं शक्यते । तथापि इदमअवधातव्यं यत् दण्डसमये कृत्यपक्षस्य, क्रुद्धलुब्धभीतापमानितादेः, समुत्थितत्वात् तद्द्वारा अनेकविधप्रचारैः बहुमतं राज्ञः विपरीततया परावर्तयितुं शक्यते । तदा तु राजाऽपि धनापहर्तृष्वेव परिगणितः स्यात् इत्ययं अपरः दोषोऽसमाहितो भवति । एवमेव शास्त्रमन्तरा स्वकल्पनयैव अपराधिषु दण्डरूपेण धनापहारादि यदि निर्णेतव्यं भवति तर्हि दण्ड्यत्वेन मर्यादितपूर्वधनापेक्षया अधिकमपि धनं राज्ञा कुतो नापहर्तव्यमित्ययं तृतीयः दोषः इतरराजनीतौ वर्तते, लोकबहुमतं सङ्गृह्य येन केनापि यथाकथञ्चित् प्रवर्तितुं प्रवर्तयितुं वा शक्यत्वात् । एवंरीत्या लोकमतं सङ्गृह्य यथाकथञ्चित् दण्डप्रणयनेऽपि तदानीं दण्डरूपेण धनापहारकः राजा अपहर्ता इति निर्णेतुं इतराराजनीतिः न समर्था । अत्राऽयं निष्कर्षः—सर्वेऽपि राजादयः स्वस्वसामर्थ्यानुसारेण धनापहारका एव यदि भवेयुः तर्हि कः एतस्मात् हीनकर्मणो निवारयितुं समर्थो भवेत् ? इति कोलाहलस्य निरासः इतरराजनीतौ नाऽस्ति समुचितसमाधानकः ।

किञ्च उपरिनिर्दिष्टदोषैः सह निरूपयिष्यमाणः अन्यः दोषोऽपि इतरराजनीतौ असमाहित एव तिष्ठति। तत्र हि इतरराजनीतौ तत्तदपराधानां कृते अपराधानुसारेण एभिः पणैः अयमपराधी दण्डयः अस्मिन्नपराधे, इतिरीत्या कल्पि-

जयमङ्गलाक्रोडपत्रम्

तायामपि व्यवस्थायां एवंविधा अपि ते मानवाः दृश्यन्ते ये अपराधदण्डत्वेन तावद्धनं प्रयच्छन्ति। पुनरपि अपराधं कृत्वा दण्डरूपेण तावद्धनं प्रदातुं समीहन्ते अपराधात्तु न निवर्तन्ते। अथवा यथा कृतस्यापराधस्य लोके प्रकाशनं न भवेत् तथा व्यवहरन्ति उत्कोचादिप्रदानेन वा अधिकारिणः वञ्चयन्ति। एतादृशाना-मपराधिनामपराधान्निवारणे इतरराजनीत्या कल्पितोऽपि दण्डः शान्तिविधायकोऽभूत्, इति कुत्राऽपि न दृश्यते प्रत्युत तत्स्थाने प्रजासु क्रोधादिभावस्यैव उद्दीपको भवति। तस्याऽयं परिणामः यत् सर्वत्र मात्स्यन्यायस्य निष्कण्टकं प्रचारः। अतः इतरराजनीतौ दण्डस्य प्रजानुरञ्जकत्वं न क्लृप्तम्।

भारतीयराजनीतौ तु परलौकास्तित्वविश्वासमूलायां वेदप्रामाण्योपबृंहितायां दण्डस्य प्रजानुरञ्जनक्षमत्वं कथं भवतीति अत्रैव स्फुटीकरिष्यते।

ननु भारतीयराजनीत्या कथं तत्साधयितुं शक्यते इति चेदुच्यते।

भारतीयनीतौ अनुरञ्जनम्

अनया राजनीत्या दण्डप्रणयनात्पूर्वं त्रयीं प्रमाणीकृत्य तत्प्रोक्ता वर्णाश्रम धर्ममर्यादा यदि सञ्चार्यते, तर्हि तथा नरकभीतिभावत्वं लोकस्य समुदितं भवति। तदा तन्माभवतु इत्येतदर्थं लोकः सावधानतया श्रुतिप्रोक्तं कर्तव्यकर्म कर्तुं प्रयतते। अधर्माच्च निवर्तते।

विदुषामधर्मनिवर्तकत्वम्

अथ धर्मबुद्ध्याऽप्रमादेन कृतेऽपि प्रयत्ने प्रमादस्य स्वाभाविकत्वात् अनुचितं नरका-पादकं कर्माऽपि उत्तमकर्मणा सह संभवति ? इति चेन्न। अकार्यकरणेन नरकभिया कश्चन ग्लानिमनुभूय नरकपातात् संरक्षणं कथं भवेत् इति चिन्तया कृतस्य दुष्टकर्मणः विनाशार्थं क्वचित् प्रायश्चित्तं लिखितमस्ति नवेति विज्ञानार्थं लोकः विद्वांसं परिपृच्छति तदुक्त्यनुसारेण प्रायश्चित्तं कृत्वा सञ्जातेन अपराधेन संभूता ग्लानिः निःसार्यते। पुनः तथाविधमेवापराधं कर्तुं न अग्रे सरति, नरकात् बिभेति च।

राज्ञोऽधर्मनिवर्तकत्वम्

विद्वत्सु प्रायश्चित्तोपदेशकेषु सत्स्वपि तथाविधाः अनेके प्रच्छन्नापराधिनः सन्ति ये विद्वद्भिः उपदेशद्वारा अपराधान्निवारयितुं नशक्यन्ते न वा सर्वविधोऽपि व्यवहारः स्वस्वकार्यदक्षैः विद्वद्भिः द्रष्टुं पार्यते। अतः तस्यापपराधस्य निवारणे क्षमतासिध्यर्थं भारतीयराजनीत्या मूर्धाभिषिक्तः राजा व्यवस्थापितः। अयं मृत्युपर्यन्तं दण्डप्रणयनं कुर्वन्नपि न पापभाग् भवति। सोऽयं राजा यावत्पर्यन्तं त्रयीप्रामाण्यं लोकेषु साधयति तावत्पर्यन्तमेव दण्डं प्रणेतुं शक्नोति, शास्त्रेणैव तथा व्यवस्थापित-त्वात्। अस्याऽयं निष्कर्षः प्रमादात् प्रेम्णा वा कृतस्यापराधस्य फलं अतिशयिततरं नारकीयं दुःखं भवति इति श्रुत्वा चित्तं यदा म्लायति तदा स्वल्पेनैव दुःखानुभवेन महतः दुःखस्य अनुभवात् आत्मानं गोपायितुं वयं किं समर्थाः भवेम ? इति चिन्तायां शास्त्रेणैवं निरूप्यते यत् मूर्धाभिषिक्तेन राज्ञा अपराधी दण्डप्रयुक्तं दुःखमनुभवितुं सुसज्जो भवेत् तर्हि दीर्घकालिकनरकलोकदुःखजनितां भीतिं व्यपोहितुमर्हति।

[दण्डनीतिस्वरूपप्रयोजने]

आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः[1], अलब्धलाभार्था[2] लब्धपरिरक्षणी, रक्षितविवर्धनी, वृद्धस्य तीर्थेषु प्रतिपादनी च। तस्यामायत्ता लोकयात्रा। तस्माल्लोकयात्रार्थी नित्यमुद्यतदण्डस्स्यात् ॥

जयमङ्गलाक्रोडपत्रम्

इत्येवं ज्ञात्वा स्वकीयस्य अपराधस्य शुद्ध्यर्थं ग्लानिमनुभवन् राजसकाशात् आत्मनः दण्ड्यत्वं स्वीकृत्य शुद्धिमभिलषति।

नापि च पुनः तमेवापराधं कर्तुं चेष्टते। किं बहुना अपराधस्य स्मृतिमात्रेणैव मनः कम्पते। विषीदति च। इति कृत्वा राज्ञा दण्डप्रणयनेन धर्मशास्त्रिभिः निर्दिष्ट प्रायश्चित्तमिव शास्त्रानुमतं दण्डं प्रणीय महानुपकारः कृतः इत्येवं प्रचारेण दण्डस्य प्रजानुरागजनकत्वं संभवितुं मर्हति।

अत एव गवादीनां वधे राजदण्डस्य स्वीकृत्यनन्तरं नरकलोकाधिकारितानिवर्तनेन हर्षस्यावसरः वर्णाश्रमधर्मिषु दृश्यते। स्फुटीकृतञ्चैतत् शङ्खलिखितयोरितिहासेन (टिप्पण्याम्)[3]। इदृशोऽनुरागो भारतीयराजनीतिं विहाय अन्यत्र राजनीतौ नाऽस्ति[4]—

श्रीमूला

दण्डनीतेः स्वरूपादिकमाह-आन्वीक्षिकीत्यादि। यौगक्षेमौ साधयतीति योगक्षेमसाधनः। दण्डो दमः सामादिषु प्रधानभूत उपायविशेषः। अथवा दण्डस्थत्वाद् राजा दण्डः। सति दण्डभये लोक आन्वीक्षिक्यादिषु सम्यक् प्रवर्तते, नत्वितरथेति दण्डस्याऽऽन्वीक्षिक्यादियोगक्षेमसाधनत्वं विज्ञेयम्। अत एवाहुः—

---

१. नी० टि० **दण्डनीतिरिति**। इदमेव शास्त्रम्।

२. नी० टि० **अलब्धेति**। अलब्धयोर्धर्मार्थयोर्लाभार्था।

३ शङ्खलिखितौ भ्रातरौ विभक्तावास्तां कदाचिल्लिखितः भ्रातुरुपवनं गत्वा तदीयं फलं अनापृच्छ्यैव बुभुजे। ततः शङ्खाज्ञया स चौर्यप्रयुक्तापराधादात्मानंशोधयितुं राजसाम्मुख्यं। प्राप राजापि तदीयौ हस्तौ चिच्छेद।

४ तदुक्तम्—

राजभिर्कृतदण्डास्तु कृत्वा पापानि मानवाः।
निर्मलाः स्वर्गमायान्ति सन्तःसुकृतिनो यथा ॥ (म० स्मृ० ८अ० श्लो०३१८

लोकशास्त्रानुगो नेयो दण्डोऽनुद्वेजनः श्रिये।
उद्वेजनादधर्मः स्यात् तस्माद् ध्वंसो महीपतेः ॥ का०नी० इति

यथाविधि दण्डप्रणयनञ्च लोकशास्त्रानुगमात्। तदाह लोकशास्त्रानुगो नेय इति। स च अनुद्वेजनीयत्वात् श्रिये भवति।

श्रीमूला

सर्वो दण्डजितो लोको दुर्लभो हि शुचिः क्वचित् ।
दण्डस्य हि भयात् कृत्स्नं जगद् भोगाय कल्पते । इति ।

तस्य नीतिः नयनमनुष्ठानम् अर्थात् तदुपदेशः शास्त्रम्। अलब्धलाभार्थेत्यादि दण्डनीतेः फलकथनम्। दण्डेन ह्यलब्धं लभ्यते, लब्धं परिरक्ष्यते, परिरक्षितं वर्ध्यते, वर्धितं च तीर्थेषु पुण्यक्षेत्राध्वरादिषु विनियुज्यते। तस्मादिति। तस्मात् लोकवृत्तेर्दण्डनीत्यधीनत्वात् नित्यम् उद्यतदण्डः सर्वदा दण्डप्रणयनोद्युक्तः स्याद्, अर्थात् राजा।

वैदिकसिद्धान्तसंरक्षिणी

नीतिविद्यायाः स्वरूपं फलं प्रधानभावं च दर्शयितुमाह—आन्वीक्षिकीति। योगः अलब्धलाभः। क्षेमः लब्धस्य परिरक्षणं तदुभयस्यापि साधनमित्यर्थः। आन्वीक्षिकीत्रयीवार्तानां दण्डनीतेश्च साधनसाध्यभावः सम्बन्धः योगक्षेमसाधारण्येन बोध्यः। तेन तिसृणामपि विद्यानामुत्पत्तये स्थितये च दण्डस्योपयोगित्वमस्ति इति सूचितम्। तदेतन् नीतिसारपद्यव्याख्यायां द्रष्टव्यम्।[1] आन्वीक्षिकीति। आन्वीक्षिक्यादितिसृणां पुनर्नामग्रहणं दण्डनीतेः प्राधान्यप्रदर्शनपुरसरं[2] तत्तद्विद्यानां स्वेन स्वेन रूपेण गुणभावप्रदर्शनार्थम्। तद्वक्ष्यति दण्डमूलास्तिस्रो विद्या[3] इति।

---

१ आन्वीक्षिकीत्रयीवार्ताः सतीर्विद्याः प्रचक्षते ।
सत्योपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे ॥
दण्डनीतिर्यदा सम्यङ्नेतारमधितिष्ठति ।
तदा विद्याविदः शेषा विद्याः सम्यगुपासते ॥—नीतिसार स० २ प्र० ३

सतीरिति विद्यमानाः साक्षाल्लोकोपकारित्वात्। सत्योपि हि न सत्यस्ता इति सदपि असदिवाविशेषादिति मन्यते। दण्डनीतेस्तु विप्लवे इति, दण्डनीतेरयथावत्प्रवृत्तौ अप्रवृत्तौ वेत्यर्थः। सम्यङ्नेतारं सम्यक्प्रयोक्तारं विद्याः सम्यग् उपासते इति तासु तद्विहितेष्वर्थेषु च सम्यगनुष्ठानात्।—जयमङ्गला सर्ग २ प्रक० ३

२—दमो दण्ड इति प्रोक्तः तात्स्थ्यात् दण्डो महीपतिः। इति नीतिसारपद्यव्याख्यायां—टीका—दमशब्दो दण्डप्रकृतौ उपायविशेषे च दण्डे वर्तते तत्र सर्वप्रकृतिविषयत्वान्नयस्येति दण्डप्रकृतिमपास्य निग्रहरूपमुपायमाश्रित्याह दमो दण्ड इति। सामदानभेदसंभवेपि प्रायशोऽनेनैव नीतेर्व्यपदेशः लोकस्य दोषबहुलत्वात्। यदाहुः

सर्वो दण्डजितो लोके दुर्लभो हि शुचिः क्वचित् ।
दण्डस्य हि भयात्कृत्स्नं जगद्भोगाय कल्पते ।

३—क्षात्रो धर्मोह्यादिदेवात् प्रवृत्तः पश्चादन्ये शेषभूताश्च धर्माः। इति (महाभा०) यद्यपि अत्र क्षात्रधर्मस्य प्राधान्यमुक्तं तथापि तत्प्राधान्यात् तन्निरूपिका राजविद्यापि प्रधानेति बोध्यम्।

[कीदृशो दण्डः प्रयोक्तव्यः ?]

न[1] ह्येवंविधं वशोपनयनमस्ति भूतानां यथा दण्ड इत्याचार्याः । नेति कौटल्यः—तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः मृदुदण्डः परिभूयते, यथार्हदण्डः पूज्यः । सुविज्ञातप्रणीतो हि दण्डः प्रजाः धर्मार्थकामैर्योजयति । दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद्वानप्रस्थपरिव्राजकानपि कोपयति, किमङ्ग ! पुनर्गृहस्थान् ? ॥

वैदिकसिद्धान्तसंरक्षिणी

दण्ड इति । दण्डः सामाद्यन्तर्गतः इत्यर्थः[2] सामादीनामप्युपग्राही । तस्येति । आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनस्य दण्डस्येत्यर्थः । नीतिः तत्प्रवर्तिका विद्या । इयमेव राजनीतिरित्युच्यते । तदुक्तम्, "तात्स्थ्यात् दण्डो महीपतिः तस्य नयनात् प्रवर्तनान् नीतिः राजविद्येत्यर्थः" । इति । तस्याः मुख्यं चतुर्विधं फलमाह—अलब्धेति । अलब्धयोर्धर्मार्थयोः लाभर्थेति टिपण्यां व्याख्यातम् । लब्धयोः धर्मार्थयोः राज्यकण्टकात् परिरक्षिणी, भयनिवर्तिका, भयात् सुरक्षितयोः धर्मार्थयोः दानक्रयविक्रयादिना च । विवर्धिनी वर्धयितुं उपकारिणी । वृद्धस्य आयादिना समर्जितस्य । तीर्थेषु अश्वमेधादौ गुणवति पुत्रे वा विनियोगः प्रतिपादनी निक्षेपनिरूपिका । उद्देशग्रन्थे पृथिव्या लाभे पालने चेति प्रतिज्ञातमस्ति तत्र सप्तम्या निर्दिष्टं पालनोपायं अनुसन्धाय व्याचष्टेतस्यामिति । दण्डनीत्यामित्यर्थः । दण्डस्य पालनोपायत्वं नीतिसारव्याख्यायां जयमङ्गलायां प्रथमपद्यव्याख्याने द्रष्टव्यम्[3] । इदमेव तत्वं द्वितीयसर्गे दण्डमाहात्म्यप्रकरणेऽपि उक्तम् बोध्यम् । (पृ० ८७४) । कीदृशो दण्डः लोकं पालयतीति प्रदर्शयिष्यमाणः आदौ दण्डमाहात्म्यं प्रदर्शयन् पूर्वपक्षमतेन दण्डविषये विधेयमाह तस्मादिति । सर्वविद्योत्कृष्टत्वात् । लोकयात्रेति । पारस्परिकविश्वासोत्पत्त्या लोकस्य निराबाधं जीवनं यात्रा तदर्थी । राजेति शेषः । उद्यतदण्डः । नित्यं स्यात् इत्यनेनान्वयो बोध्यः । तेन अत्र नित्यत्वं उद्यतदण्डे विधीयते ।

श्रीमूला

न हीत्यादि । एवंविधं । यथा दण्डस्तथाविधम् । वशोपनयनम् अनायत्तायत्तीकरणसाधनम् । न ह्यस्ति नास्त्येव ।

---

१. नी० टि० **न ह्येवं विधमिति** । तस्मात् कस्मादित्याह ।

२ अथवा दण्डशब्दो दमनमात्रवृत्तिः स्वपक्षपरपक्षदमनोपायाशेषसामाद्युपग्राही द्रष्टव्यः । इति—नीतिसार सर्ग २ प्रकरण-३

३ दण्डधार इति कर्मण्यण् अनेन पालनोपायं व्याचष्टे । डण्दो हि दमनं तं यथार्हं प्रयोक्तृतया बिभ्राणो लोकं स्वमार्गे व्यवस्थापयति । उक्तञ्च—

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु—नीतिसार सर्ग-१ श्लोक १

श्रीमूला

तमिमं दण्डसामान्यश्लाघावादमाचार्याणां प्रतिषेधति नेति। तत्र कारणवचनं तीक्ष्णेत्यादिना। तीक्ष्णदण्डः उग्रदण्डः, भूतानाम् उद्वेजनीयः उद्वेगजनकः उद्विजन्तेऽस्मादित्यपादानेऽनीयर्। यथार्हदण्डः युक्तदण्डः देशकालापराधानुगुण्यप्रयुज्यमानदण्डः, पूज्यः लोकबहुमान्यः। सा पूज्यता युक्तस्य दण्डस्य लोकाभ्युदयहेतुत्वादित्यभिप्रायवानाह–सुविज्ञातेत्यादि। सुविज्ञातप्रणीतः सुष्ठु शास्त्रतोऽवगत्य प्रयुक्तः। अयथावत् प्रणीतस्याऽप्रणीतस्य वा दण्डस्य सर्वानर्थहेतुत्वमाह–दुष्प्रणीत इत्यादिना। कामक्रोधाभ्यामज्ञानाद् दुष्प्रणीतः कामात् क्रोधादज्ञानाच्चाऽयमयथावत् प्रयुक्तः। किं पुनर्गृहस्थान्, संयतेन्द्रियानपि यः कोपयति सोऽसंयतेन्द्रियान् कोपयतीति किमु वक्तव्यम्। अङ्गेत्युपदेश्यसम्बोधनम्।

वैदिकसिद्धान्तसंरक्षिणी

तदेवाह–नहीति। वशेति[1]। यथाज्ञातकारित्वं वश्यत्त्वम्। भूतानां प्राणिनाम्। आचार्यमतेन राष्ट्रे सर्वत्र दण्ड एव भूतवशीकारार्थं प्रयोक्तव्य इति सामान्यतयोक्तं आचार्यमतं निरस्यति नेति। दण्डस्त्रेधा भवितुमर्हति तीक्ष्णः मृदुः युक्तदण्डः तत्र लोकस्य शास्त्रस्य वा अननुमतः तीक्ष्णः यत्र तत्र अतिमात्रं भयं भवति। मृदुः लोकशास्त्रानुमतोऽपि दुष्टकर्मणो निवृत्यजनकः—अकिञ्चत्करः। युक्तदण्डः—लोकशास्त्रानुमतः भयनिर्वर्तकश्च इति। तत्राद्ये दोषमाह—तीक्ष्ण इति। लोकस्य शास्त्रस्य वा अननुमतः। हिः हेत्वर्थे। तस्यदोषमाह भूतानामिति। उद्वेजनीयः अपरागजनकः। जनकत्वं च लोकशास्त्राननुमतत्वं तच्च अनौचित्यद्वारेण बोध्यम्। द्वितीये दोषमाह मृद्विति। मृदुदण्डः दुष्टकर्मणो निवृत्यजनकः भयानुत्पादक इति यावत्। तमेव दोषमाह परिभूयते इति। अवमन्यते इत्यर्थः। तृतीये गुणमाह—यथार्हेति। लोकशास्त्रोभयानुगः[2] भयोत्पादकः। नीतिसारीयोपायविकल्पप्रकरणोक्तदिशा अधिकारिभेदेन प्रयुज्यमानः सामादिः सर्वोपि दण्डः पूज्यलोकानुरागजनकः। पूज्यते इति पाठान्तरम्। यथार्हत्वे दण्डः परुषो न भवति इत्यपि अस्य प्रयोजनं बोध्यम्। इदं स्फुटीकर्तुमाह सुविज्ञात इति। लोकशास्त्रानुमत इत्यर्थः। अत्रेदमनुसन्धेयम्–भारतीयराजनीतिः यथा शास्त्राननुमत स्थले दण्डप्रणयनं नानुमोदते। तथा शास्त्रानुमतत्वेऽपि लोकानुमतत्वभावे वा इति। धर्मार्थेति। धर्मसमृद्ध्यर्थकामसमृद्ध्योरुक्तयुक्त्या प्रजा राजनि अनुरज्यति इति

---

१ अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषा दरः। इति

२ लोकशास्त्रानुगो नेयो दण्डोनुद्वेजनः श्रिये।

३—स हि सर्वस्य लोकस्य युक्तदण्डतया मतः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥—रघुवंश सर्ग ४

[सर्वथा दण्डाप्रणयने दोषः]

अप्रणीतो हि मात्स्यन्यायमुद्भावयति। बलीयानबलं हि ग्रसते दण्डधराभावे। (स च[1]) तेन गुप्तः [2]प्रभवतीति ॥

वैदिकसिद्धान्तसंरक्षिणी

प्रदर्शितम्। लोकशास्त्रयोरनुमतिमन्तरा स्वकल्पनया दण्डस्य प्रणयने उद्वेजनीयत्वं तस्य उक्तम्। तत् कथमित्याह दुष्प्रणीत इति। अन्यायेन प्रणीतः। कथमन्याय्यत्वं दण्डस्येत्याह कामेति। काम इच्छा राग इति यावत्। क्रोधः अक्षमा। अज्ञानं मोहः। एवं च रागः अज्ञानं क्रोधश्चेति त्रयं दण्डस्य अन्याय्यत्वे बीजं भवतीत्यर्थः। एभिः शिष्टस्य अपरिपालनात् दुष्टस्य चानिग्रहात् लोके अपरागो भवति। इदमेव राज्ञः पतनकारणम्। वानप्रस्थानपीति। अपिना गृहस्था भृत्याः मन्त्रिणश्च गृह्यन्ते। वक्ष्यति च "दण्डकरसाधनाधिकारेण जनपदविद्वेषं ग्राहयेत्" इति। नन्वेवं वानप्रस्थाः संसाराद्विरक्ताः किमिति कोपं कुर्युः? तन्न। अभिषेके राजा "प्रजां पालयिष्यामि" इति सर्वेभ्योऽभयप्रदानस्य प्रतिज्ञां कृत्वा विमुह्य न प्रतिपालयति शिष्टान्, अतः सत्यव्रतभङ्गात् राज्ञे ते कुप्यन्ति। यदि न कुप्येयुस्ते न वा नृपं शासेयुः, तर्हि एषामपि राज्याङ्गत्वं हन्येत। सत्यव्रतभङ्गेन रागद्वेषाभ्यां सत्वं नश्यति। तेन शौर्यमपि लुप्तं भवति। अतो गुणाभावात् प्रजापरागः ततो राजनाश इति हृदयम्।

श्रीमूला

मात्स्यन्यायमिति। महान् हि मत्स्यः क्षुद्रं मत्स्यं ग्रसत इति बलवता दुर्बलस्य यत् पीडनं स मात्स्यन्याय इत्युच्यते। बलियानित्यादि। दण्डधराभावे दण्डप्रणेतुरभावे। तेन गुप्तः प्रभवति सुप्रणीतेन दण्डेन रक्षितः अर्थाद् दुर्बलः प्रभवति बलयुक्तो भवति।

वैदिकसिद्धान्तसंरक्षिणी

एवं सति दण्डो न प्रणेयः। तत्राह अप्रणीतो हीति। सर्वथा दण्डप्रणयनाभावे मात्स्यन्यायः प्रवर्तेत तेन पुनरपि प्रजापालनं न सुशकम्। तदेव प्रदर्शयति— बलीयानिति। अनेन मात्स्यो न्यायो दर्शितः। दण्डमाहात्म्यमाह—तेनेति शास्त्र लोकोभयानुमतेन यथाधिकारं उपायविकल्पप्रकरणोक्तदिशा सुप्रणीतेन दण्डेन। गुप्तः लोक इति शेषः। स च तेन गुप्त[2] इति पाठान्तरम्। प्रभवति "वृद्धि याति" इति टिप्पणीव्याख्यानम्। दुष्टानां दुर्दैवानां वा विनशनात् इति शेषः।

नी० टि० १. स चेति। लोकः।
,, ,, २. प्रभवतीति। वृद्धि याति।

जयमङ्गला

…च्छामो यद्यत्र विसंवाद इति । यदि विवेकज्ञानसङ्कटावगाहनत्रासात् प्रणीयेत तदा दोषमाह-अप्रणीत इति । मात्स्यन्यायमुत्पादयति उत्थापयति । तमेव न्यायं दर्शयति-बलोयान् अबलं हि ग्रसते बलीयसा अबलो भक्ष्यते यथोक्तम्—

'अस्ति मत्स्यस्तिमिर्नाम तथा मत्स्यस्तिमिङ्गिलः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव ! ॥ इति ॥

दण्डधराभावे शासितुरभावे । तेनेति दण्डेन । गुप्तो रक्षितो राजा प्रभवति विनेतुम् । तेन वा व्यबस्थापितः प्रकर्षेण भवति ।

जयमङ्गलाक्रोडपत्रम्

(मूलपुस्तके अर्धपरिमितपङ्क्तीनामलाभात्)

जयमङ्गलायाः पूरणम्

आन्वीक्षिकीति । सत्योपि हि इतरा विद्याः दण्डाभावे न सत्यो भवितुमर्हन्ति सदपि असदिवाविशेषात् इति । तासां योगक्षेमसाधनत्वं दण्डे सर्वविद्यारम्भ प्रतिबद्धत्वात्[१] ।

'दमो दण्ड' इति । दण्डशब्दो दण्डप्रकृतावुपायविशेषे च दण्डे वर्तते, तत्र सर्वप्रकृति-विषयत्वं नयस्येति दण्डप्रकृतिमपास्य निग्रहस्वरूपमुपायमाश्रित्याह दमो दण्ड इति । सामदानभेदसम्भवेऽपि प्रायोऽनेनैव नीतेर्व्यपदेशः लोकस्य दोषबाहुल्यात्[२] ।

अथवा दण्डशब्दोऽत्र दमनमात्रवृत्तिः स्वपरपक्षदमनोपायाशेषसामग्र्युपग्राहो द्रष्टव्यः। तस्य दण्डस्य । नीतिः यथावत् लोकशास्त्रानुमतं प्रणयनं यत्र सा दण्डनीतिः। तस्याः फलमाह अलब्धेति । तेन वर्णाः आश्रमाश्च आन्वीक्षिक्यादिविद्यासु तिसृषु प्रतिष्ठिताः दण्डनीतिः रक्षति इति लोकयात्रायाः तत्त्वं क्लृप्तम् । उपायविकल्पे दण्डस्य प्राधान्यं जानन् पूर्वपक्षमाह तस्मादिति । उपसंहरति नहोति । प्रजा हि यमस्थाने दण्डधरं मन्यमाना नापराध्यन्ति, इति दण्ड एव प्रधानम् । यथाधिकारं प्रयुक्तो दण्डः यथापराग जनको न स्यात् तथा कल्पनीयः इति दर्शयितुमाह नेति । उद्वेजनीयः अधर्मजनक-त्वात् लोकस्यातिनिग्रहणात् । दमनमात्रवृत्तिना दण्डेन अतिसाम्ना अतिदानेन अतिभेदेन अतिनिग्रहेण लोकमुद्वेजयति ततः पुनरश्रिये इत्यर्थोक्तम् । मृदुदण्डः—

---

१ दण्नीतिर्यदा सम्यङ्नेतारमधितिष्ठति ।
तदा विद्याविदः शेषा विद्याः सम्यगुपासते ॥

२ सर्वो दण्डजितो लोको दुर्लभो हि शुचि क्वचित् ।
दण्डस्य हि भयात्कृत्स्नं जगत् भोगाय कल्प्यते ॥ इति ।

जयमङ्गलाक्रोडपत्रम्

किमयं सान्त्वयिष्यति, किं दास्यति, किं भेदयिष्यति, किं निग्रहीष्यतीति। तस्माल्लोको न बिभेति। यथार्हेति—आत्मपरयोस्त्रिवर्गसाधनात्। यथार्हत्वमाह सुविज्ञातेति। लोकशास्त्रानुमत इत्यर्थः। दुष्प्रणीतः—तीक्ष्णदण्ड इत्यर्थः। प्रजां परिपालयिष्यामीति प्रतिजनानोऽपि राजा दण्डेन लोकमुद्वेजयति चेत् अमुं देशं वस्तुं (३७८ ज० पृ०)··· · नेच्छामः यद्यत्र विसंवादः इत्यग्रे पठनीयम्।

विवेकेति। एतेन धर्मशास्त्रन्यायशास्त्रयोरध्ययनं राज्ञा बाल्यावस्थायां यत्कृतं तस्य साथंक्यं भवति अन्यथा विवेकाभावे धर्मशास्त्रज्ञानाभावे वा उद्वेगजनकस्य दण्डस्य प्रजासु प्रणयनप्रसङ्गात्, ततः प्रजाया आत्मनि अपरागप्रसङ्गाच्च। तदुक्तं अत्रैव स्वयं मूलकृता किमङ्गेत्यादिना[१]।

राजनीतिस्थापनायां लोकवशित्वम्

ननु भारतीयराजनीतेः देशे स्थापनायां सत्यां सर्वे वश्या भवन्ति इत्यत्र का उपपत्तिः इतिचेदभिधीयते।

राजनीतिर्हि प्रमाणत्रयनिर्णीतेष्टसाधनताककर्मानुष्ठानरूपा क्रियात्मिका तस्यां क्रियासामान्यविज्ञानस्वभावानुसारेण आकर्षकत्वं, क्षेपकत्वं विवेचकत्वं सर्वैः स्वीकर्तव्यम्। न च क्रिया एवं करोतीत्यत्र किं नियामकमिति शङ्क्यम्। विद्युच्छक्तौ आकर्षणादिधर्मस्य दृष्टत्वात्। न च तत्राकर्षणसत्वेऽपि क्रियायां कथमाकर्षकत्वमुपपद्येतेति उक्तदोषतादवस्थ्यमिति वाच्यम्। विद्युच्छाक्तेरपि क्रियाया-मेवान्तर्भावितत्वात्।

न च अस्तु कामं आधुनिकविज्ञानसिद्धम्। प्राचीनैः क्रियाया आकर्षकत्वादिकं नाङ्गीकृतमिति वाच्यम्। सृष्ट्यारंभे तथैव स्वीकृतत्वात्। तथाहि—पूर्वं सृष्ट्यारंभे विघटिताः परमाणवः इतस्ततः स्वमण्डलरेखामतिक्रम्य दूरमपसृता भवन्ति। पुनः वेगातिशयेन त एव परमाणवः परस्परसंयुक्ता भवन्ति। ततश्च जगदुत्पत्तिः इति सिद्धान्तितम्। अस्याऽयं भावः यत् प्रलयसमये परमाणौ वेगेन काचन क्रिया एवं समुत्पद्यते या इतरतरपरमाणून् क्षिपति। पुनः कालान्तरे जगदुत्पत्त्युन्मुखावस्थायां परमाणुषु तथाविधा क्रिया भवति यथा ते परस्परमाकृष्टा भवेयुः। मुक्तावल्यां गुणनिरूपणे स्फुटीकृतमेतत्[२]।

---

१ तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः,
मृदुदण्डः परिभूयते, यथार्हदण्डः पूज्यः सुविज्ञातप्रणीतो हि दण्डः प्रजाः धर्मार्थकामैर्योजयति दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद् वानप्रस्थपरिवाजकानपि कोपयति, किमङ्ग पुनर्गृहस्थान्।"

२ "कल्पान्ताग्न्यात्मक महत्तमतेजोवेगातिशयेनैव प्रलयानुगुणपरमाणुकर्म-

जयमङ्गलाक्रोडपत्रम्

किञ्च प्राचीनैः परमाणौ यः वेगः उपवर्णितः, स विद्युत्पदार्थे एव अन्तर्भावितः यतो विद्युतो धर्माः तत्राऽपि भवन्ति। तदेतत् "वेगः चुम्बकत्वं क्रिया गतिरित्यादि विद्युदेव" इति "आत्माराम एन्डसन्स" प्रकाशिते पुस्तके उपलब्ध्या अप्रामाणिकमिति नाशङ्क्यम्।

गुरुत्वाकर्षणादि यद्दृश्यते तदपि वेगेनेति गणनाथसेनः प्रत्यक्षशारीरके उक्तमेवार्थं द्रढयति। एवं वेदान्तसूत्रमुक्तावल्यामपि एतदंशस्य निरूपणात् क्रियायाः आकर्षकत्व सिद्धान्तः वेदान्तेपि[1] सिद्धो ज्ञायते।

एवमुपवर्णितां शक्तिसम्पन्नां क्रियां "फोर्स इनर्जीय" पदेन (Energy force) व्यवहरन्ति आधुनिकाः। प्राञ्चस्तु तामेव अदृष्टपदेन व्यवहरन्ति[2]।

अतएव क्रियायामदृष्टरूपायां फोर्सवाच्यायां एतावत् सामर्थ्यमस्ति यत् जन्मान्तरे प्रतिभाया उत्पादनम्।

एवंरीत्या अनेकेषु क्रियायाः आकर्षकत्व प्रतिपादकेषु प्रमाणेषु सत्सु राजनीतिरूपक्रियायां सफलायां लोकमनसः आकर्षकत्वं क्रियास्वाभाव्यात् स्वतः सिद्धमेव। यत्र

सम्भवात् तद्बलात्तदुत्तरमपि विलक्षणवेगं स्वीकृत्य तद्बलादागमप्रसिद्धप्रलयकालावधि क्रियासन्ततिमभ्युपगम्य पुनः सर्गादिसमये परमाण्वन्तरेण सह संयोगारब्धवतश्च तस्य वेगस्य तत एव विनाशाभ्यनुज्ञानात्, स्पर्शवत्संयोगस्य वेगनाशकतायाः सर्वसम्प्रतिपन्नत्वात्।" इति। (४११ पृष्ठे रामरुद्र्यां पाकजक्रियानिरूपणावसरे।)

१ तदुक्तम्—(अ० २ तृ० पाद वे० सू०मु०)
पृ० २२० 'रश्म्यनुसारी'—मूर्धन्यनाड्योत्क्रामन्रविरश्मिमालम्ब्य गच्छति 'अथ या एता हृदयस्य नाड्यः' (छा० ८।६।१) इत्युपक्रम्य नाडीरश्मिसम्बन्धमुक्त्वा 'यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते" (छा० ८।६।५) इत्युक्त्वा तयोर्ध्वमायन्नमृतत्वमेति इत्यस्योक्तत्वात्।

कामसूत्रेपि--

नक्षत्र चन्द्रसूर्यताराग्रहचक्रस्य लोकार्थं बुद्धिपूर्वकमिव
प्रवृत्तेर्दर्शनाद्वर्णाश्रमाचारस्थितिलक्षणत्वाच्च लोकयात्रायाः
नक्षत्र ग्रह पञ्जरमहर्निशं लोककर्मविक्षिप्तम्।
भ्रमति शुभाशुभमखिलं प्रकाशयत् पूर्वजन्मकृतमिति।

२ वे० सू० मुक्तावल्याम्— द्रष्टव्यं तृतीये पादे।

[दण्डस्य सन्मार्गहेतुता]

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।

जयमङ्गलाक्रोडपत्त्रम्

हि उक्तंवशीकरणं राजनीतौ बाधितं दृश्यते तत्र कारणं न राजनीतेः क्रियात्वमपितु अनुष्ठातुर्दोषवत्वं मन्तव्यम् ।

अतः भारतीय राजनीतौ शास्त्रसंमतायां वशीकरणसामर्थ्यमबाधितत्वात् उपपन्नं भवति । एतस्मादेव कारणात् एकाको असहायोपि यदि भारतीयराजनीतिशास्त्रसम्मतं मतमनुतिष्ठति तर्हि सः चक्रवर्तिपदभाग् भवितुमर्हतीति दशकुमारचरिते प्रतिज्ञातं तदुपपन्नम्[1] ।

किञ्च भारतीयराजनीतेः क्रियात्मिकायाः अपरोऽयं विशेषः यत् इयं जन्मान्तरार्जितकर्मभिः सह सामञ्जस्यं संपाद्य प्रजानुरागात्मकं फलं नैयत्येन स्वसेवकाय नृपतये प्रयच्छति । यथा धर्मशास्त्रम् तदनुबन्धो आचारो वा स्वनिर्दिष्टकर्तव्येषु वर्णाश्रमिणः प्रेरयन् पूर्वजन्मान्तरार्जितकर्मभिः सह न असामञ्जस्यमुत्पादयति । तथैवेयं नीतिरपि शास्त्रत्वादनुमन्तव्या । एतस्मादेव कारणात् अस्याः शाश्वतीत्वं जयमङ्गलोक्तं स्थिरीभवति। अतः अर्थार्जनादौ इदं नीतिशास्त्रम् धर्मशास्त्रवत् प्रमाणमनुमन्तव्यम् ।[2]

तस्मात् अचिन्त्यशक्तिप्रकाशिकायां राजनीतिक्रियायां विज्ञानसिद्धविद्युत्कार्यकरणसमर्थायां लोकवशित्वं सिद्धं भवति । इति ।

श्रीमूला

अध्यायान्ते श्लोकमाह—चतुर्वर्णेत्यादि । स्वधर्मकर्माभिरतः वर्णाश्रमधर्मकर्मानुष्ठानपरः । स्वेषु वेश्मसु वर्तते स्वास्थ्येन वसतीत्यर्थः । दण्डपालनाभावे हि

---

१ तदुक्तम् दशकुमारचरिते अष्टमोच्छवासे— 'एकामपि काकिणीं कार्षापणलक्षमापादयेम । शस्त्रादृते सर्वशत्रून्घातयेम । एकं शरीरिणमपि मर्त्यं चक्रवर्तिनं विदधीमहि यद्यस्मदुपदिष्टेन मार्गेणाचर्यते । स पुनरिमान्प्रत्याह--कोऽसौ मार्गः इति । पुनरिमे ब्रुवते 'ननु चतस्रो राजविद्यास्त्रयी वार्तान्वीक्षिकी दण्डनीति रिति । तासु तिस्रस्त्रयीवार्तान्वीक्षिक्यो महत्यो मन्दफलाश्च, तास्तावदासताम् । अधीष्व तावत् दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः सङ्क्षिप्ता । सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा ।'' इति ।

२ तदुक्तम्—

वेदाः प्रमाणं स्मृतयः प्रमाणं धमार्थयुक्तं वचनं प्रमाणम् ।।
यस्य प्रमाणं न भवेत्प्रमाणं कस्तस्य कुर्याद्वचनं प्रमाणम् ।

स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु ॥ ५ ॥

इति विनयाधिकारिके विद्यासमुद्देशे वार्तादण्डनीतिस्थापने
चतुर्थोऽध्यायः विद्यासमुद्देशस्समाप्तः ।

श्रीमूला

स्वगृहेऽपि स्वास्थ्यवृत्तिर्दुर्लभेति ।

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे चतुर्थोऽध्यायः, विद्यासमुद्देशे वार्त्तास्थापना दण्डनीतिस्थापना च ।

विद्यासमुद्देशः समाप्तः ।

वैदिकसिद्धान्तसंरक्षिणी

अध्यायान्ते प्रकरणार्थमुपसंहरन् दण्डमाहात्यमाह चतुरिति । चतुर्वर्णाश्रम इति विशेषणंभारतचक्रवर्तिक्षेत्राद्बहिःक्षेत्रव्यावृत्यर्थम् । स्वेति । स्वपदं धर्मेण कर्मणा च सम्बध्यते तथा च त्रयीविहिते क्षात्रे धर्मे, कर्मणि वृत्तिरूपे च चरन् तत्रैव बद्धप्रतिज्ञः सन् महता उत्साहेन रतः वर्तते इति । इदं वैशिष्ट्यं नीतिसारे द्रष्टव्यम्[२] । इत्येवमध्यायचतुष्टयं मिलित्वा विद्योद्देशाख्यं प्रकरणं संपूर्णम् ।

इति कौटिलीयार्थशास्त्राव्याख्यायां वैदिकसिद्धान्तसंरक्षिण्यां चतुर्थोऽध्यायः ।

जयमङ्गला

'चतुर्वर्णाश्रमो 'लोक' इत्युपसंहारः शिष्यावबोधनार्थः । राज्ञा दण्डेन पालित' इत्युपायप्रशंसा । 'स्वधर्मकर्माभिरत' इति विद्याफलम् । 'वर्तते स्वेषु कर्मस्वि'ति राजवृत्तफलम् ।

इति विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापना च
द्वितयं प्रकरणम् । चतुर्थश्चाध्यायः ।

जयमङ्गलाक्रोडपत्रम्

वर्णाश्रमबहिष्कारो जातिह्रासः

चतुर्वर्णाश्रम इति । ननु भारतीयराजनीतिः वर्णाश्रमधर्मं समामनुते । तत्र एकः महान् दोषः अपरिहार्यो ऽस्ति । यत् वर्णाश्रमधर्मिणः वर्णाश्रमविमुखं बहिष्कुर्वन्ति । जातावन्तर्भावार्थं कृतायामपि—

---

१. नी० टि० अमुं पन्थानं नातिक्रामतीत्यर्थः ।

२ पर्जन्य इव भूतानामाधारः पृथिवीपतिः ।
विकलेपि हि पर्जन्ये जीव्यते न तु भूपतौ ।
प्रजां संरक्षतिनृपः सा वर्धयति पार्थिवम् ।
वर्नंनाद्रक्षणं श्रेयः तन्नाशेन्यत् सदप्यसत् ।

जयमङ्गलाक्रोडपत्रम्

प्रार्थनायां अपराधिनं न स्वजातौ ते अन्तर्भावयितुं चेष्टन्ते। अपरधर्मानुयायिनः तथाविधं स्वधर्मानुयायित्वेन स्वीकुर्वन्ति। एवं स्थिते वर्णाश्रमधर्मिणः सङ्ख्याह्रासान् मुष्टिमेयाः भूत्वा दुर्बला भविष्यन्ति। अतः वर्णाश्रमधर्मे संभाव्यमानः बहिष्कारप्रयुक्तो भेदः राजनीत्या अनया कथं परिहार्येत इति चेदभिधीयते।

भेदकारणं तत्परिहारः पृथगवस्थापनञ्च

समानधर्मेषु वर्तमानस्य समाजस्य अन्तः भेदो मा भवतु इत्येतदर्थम् इतरा राजनीतिः स्वधर्महीनं नरं पुनरपि समाजे अन्तर्भावयितुं चेष्टते इति तु सत्यं। परन्तु तावन्मात्रेण अस्मात् समाजात् भेदः व्यपगतः इति न दृश्यते किं बहुना वेदप्रामाण्येन प्रवृत्तचतुर्वर्णसमाजापेक्षया उत्तरोत्तरं भेदः अभिवर्धनशीलो वर्तते। इति भेद-कारणमन्यदेव मन्तव्यम्। तच्च स्नेहविघातकं शङ्काजननं अभिभर्त्सनञ्चास्ते। ततः आत्मत्राणं इतरयाऽपि राजनीत्या अवश्यं कर्तव्यं भवति। भारतीयराजनीतिरपि वर्णाश्रमप्राधान्यं स्वीकृत्य प्रवृत्ता समाजस्य यथा अन्तः शङ्काजननमभिभर्त्सनञ्च न भवेत् तथा प्रयतितुं चेष्टते। तथाकरणे, प्राप्ते च साफल्ये वर्णाश्रमिष्वपि भेदो-त्पत्तिभीतिः न भवितुमर्हति। एवं विधा स्थितिः अनेन समाजेन न प्राप्ता इति न वक्तुंशक्यते यतः जातिबहिष्काररूपः आक्षेपः अभिभर्त्सनात्मकः पूर्वपक्षतया उत्था-पितः एतत्समाजे तावत्पर्यन्तं नासीत् यावत्पर्यन्तं भारतीयराजनीतिप्राधान्यमासीत्। अत्र हि बहिष्कारमवलम्ब्य कस्यचित् भर्त्सनमभीप्सितन्न अपितु यो यथा चेष्टते तदनुरूपं तस्य कार्यकलापकरणे समुचितायां जातौ सन्निवेशं कृत्वा यथोचित वृत्तिव्यवस्थादिविधानम्। यथा—देशे प्रव्रज्याप्रत्यवसितः भिक्षुकः चरदीत्य कर्मणि अपेक्ष्यते तथैव उच्चादर्शस्य प्रतिष्ठापनार्थं सात्विकस्थितिप्रकाश-नार्थञ्च अर्थशास्त्रीयादिमप्रकरणानुसारेण अतिपवित्रः परिव्राड़पि अपेक्षितः। यथा वा जनपदे दूष्यानां वल्लभादीनां दोषज्ञानाय गणिका अपेक्ष्यते। तथा शुचीनां सत्वबहुलानां आत्मगुणसंपत्शीलानां सन्तानानां लाभाय उत्तमा पति-व्रताऽपि अपेक्ष्यते। अनयोः परिव्राड्प्रवज्याप्रत्यवसितयोर्वेश्यापतिव्रतयोर्वा एकत्र अवस्थानादिकं भिन्नरुचित्वात् सामानधिकरण्येन न संभवितुमर्हति। अतः तेषां तेषामधिकारानुरूपं पृथक् संस्थापनं राजनीत्या समादृतम्।

जातिभेदेपि सौजन्यं नवा बहिष्कारनीतिः

न हि एतावन्मात्रेण तेषु कलहः समुत्पत्तुमर्हति न वा पृथग् अवस्थायामपि तयोरभिभर्त्सनञ्च। यदि स्वस्वजातौ सङ्घटने स्थितेषु कश्चिन्मर्यादामतिक्र-मितुमीहते वर्तते च, नवा पश्चात्तापाभावात् प्रायश्चित्तादिना शुद्धो भूत्वापि अकर्मणः निवृत्तौ योग्यां स्थितिमासीदति। पुनरेवं विधं दुष्टं कर्म न करिष्यतीति विश्वास्यत्वं वा। तथाविधः विकृतोजनः जात्याः पृथगवस्थाप्य राजनीतिः तं स्वयोग्ये कर्मणि

जयमङ्गलाक्रोडपत्रम्

निवेशयितुमपि अनुमोदते। पुनः शुद्धसन्तानानामभ्युदयार्थं अनया राजनीत्या जातिरपि शुद्धतया संरक्ष्यते। कुत्त इति चेत्, जन्मान्तरगतप्रतिभोद्बोधादि गुणजातस्य राज्ये अपेक्षितस्य (पृ० २०८ तः) पूर्वं निर्दिष्टस्य प्रजासु दौर्लभ्यं मा भवतु इत्येतदर्थम्। एवञ्च स्वजात्यनभिमतकार्यकर्ता प्रायश्चित्तेनाऽपि अनपनीद्यपापकर्मा यदि जात्तेः पृथक् अवस्थाप्यते तर्ह्यत्र कृतमिदं हीनकर्मणः पृथगवस्थापनं न बहिष्कारार्थमपि तु उभयोरपि एकराज्यसमष्टिकार्यसञ्चालने अनुगुणत्वात् कार्यकरमेव समभूत्। अतएव भारतदेशे भारतीयराजनीतिमधिकृत्य सम्भूय प्रवृत्तदशायां चातुर्वर्ण्येन सह वर्णसङ्करादिजातीनामपि सौजन्यपूर्वकं जीवनं समभूत् भेदभावस्य शङ्कापि नासीत्, अभिभर्त्सनाभावात्। दृश्यते चैतत् संघटन, सत्तारूढ़ कांग्रेस, स्वतन्त्रदल भाक्रान्देत्यादिभेदेन अवस्थानोपन्यासाय पृथक् प्रयतनम्। जातिभेद संस्थाभेदेन पृथगवस्थानयोर्मध्ये जातिप्राधान्येन पृथगवस्थापने वेदप्राधान्यात् भर्त्सनाभावः। सङ्घटनादिसंस्थायां तु पार्थक्येन संस्थापितायामपि दोषोद्भावनेन कलहप्रसक्तिः इति अन्तरमविस्मरणीयं वर्तते। अतः भारतीयराजनीतिप्राधान्ये बहिष्कारस्य प्राधान्यं नाऽस्ति। प्रत्युत यदा प्रभृति एतत्प्राधान्यं व्यपगतं तदाप्रभृत्येव तेषां तेषां यथोचितमवस्थापनं विस्मृत्य बहिष्कारात्मिका नीतिः जातिप्रधान्ये समुद्भूता तत्र कारणं इतरराजनीतिप्राधान्यम्। इत्यलम्।

जात्या सदस्यनिर्वाचनम्

न च भारतीय राजनीतौ तत्तज्जातेः संरक्षणं राज्यार्थमनुपयोगीति वाच्यम् निर्वाचनद्वारा लोकस्थितये अपेक्षितेषु मन्त्रिगुणेषु अन्यतमानां स्ववग्रहादिगुणानां परीक्षणस्य जात्यैव अभ्यर्हितत्वात्। तदिदं प्राक् प्रदर्शितम् (पृ० २५१) विस्तरतः 'शान्ती का अग्रदूत' ग्रन्थतश्च अवगन्तव्यम्।

जातेरस्तित्व स्मारणम्

न च जातेः अस्तित्वमेव नास्ति इति शङ्क्यम्, बालकानां रक्षणाय अपेक्षितस्य स्तन्यपानस्य कृते मातुरभावे अभ्यर्हिताया धात्र्याः स्वजातिमत्व एव तत्संभवः इति चरकवच नपुरःसरं प्राक् (पृ० २१६) प्रदर्शितत्वात्। न च जातिशुद्धौ सत्यामपि कामादि विकृतीनां सर्वतोमुखत्वात् जातिप्रधानसंस्थायाः अद्य यावत् यथावदवस्थितत्वं न भवितुमर्हतीति वाच्यम्। यवनबौद्धाङ्ग्लानां प्रचारसमयेऽपि कथञ्चित् शुद्धायाः असङ्कीर्ण वर्णाश्रमपरम्परायाः स्थितेः अद्यावधि दृष्टत्वात्। तदुक्तम्—

आहारेष्वथ योनौ च बीजे कर्मणि चापि यः।
शुचिः कृच्छ्रगतस्यापि न पापे रमतेऽस्य धीः ।। इति। ज०मं०अ०

जाताबुच्छृङ्खलता

ननु जातिशुद्धौ तत्सन्तानपरम्परायां उच्छृङ्खलता कथं दृश्यते इति चेन्न। उक्तपद्ये एव दत्तोत्तरत्वात्। आहारमातृपितृकर्मादिशुद्धिषु अन्यतम

जयमङ्गलाक्रोडपत्रम्

स्याभावे तत्र उच्छृङ्खलता भविष्यत्येव इत्यलं विचारस्य प्रसक्त्यानुप्रसक्त्या। प्रस्तुतमनुस्रियते ।

एतावता प्रबन्धेन भारतीयराजनीत्या जातिप्रधानसंस्थायाः शुद्धिमभिलषन्त्या तत्तज्जातिकर्मकरणे असमर्थानां विकृतचित्तानां पृथगवस्थापनं विधाय राज्यसञ्चालनमर्यादा सुचारुतया साधिता इति साधितं ।

जातितः पृथगस्तित्वे कारणं उपेक्षादण्डः

अथ तेषां तेषां स्वजातितः पृथगवस्थापने कारणान्तरमपि अस्ति इति प्रसङ्गात् निवेद्यते । तथाहि—

यः जात्युचितं कर्म न करोति । उच्छृङ्खलश्च वर्तते सः राजनीत्या अवश्यं दण्डयो भवत्येव । अन्यथा राजशासनं अकिञ्चित्करमभूदिति मत्वा सर्वोऽपि जनः यथेच्छं व्यवहरेत् । भारतीयराजनीतिः तथाविधेषु बहिष्काराख्यं उपेक्षात्मकं दण्डं विदधाति न तु अभिभर्त्सनम् अतस्तथाविधस्य पृथगवस्थापनं उपेक्षायै विहितम् । अत्राऽयं भाव - कश्चिद् अपराधी मनुष्यः सुसङ्घटिततया जात्या सर्वथा सर्वस्मादपि कार्यात् पृथगवस्थाप्य उपेक्ष्यते तर्हि सः तावन्मात्रेण दण्डभाग् भवितुमर्हति । ततो दुर्वलस्स पुनर्विनीतस्सन् जातिमर्यादया कृतमुपदेशं स्वीकृत्य यथायोग्यं कार्यं विधत्ते विनयञ्च अवलम्बते, इति पृथगवस्थापनफलम् नतु बहिष्कारप्रयुक्तं भेदोत्पादनम् । इत्येवं रीत्या पार्थक्येन अवस्थापनात्मकः उपेक्षारूपो दण्डः भारतीयराजनीत्या विधीयते । एवंविधं सूक्ष्मंतत्त्वमजानानाः इतरराजनीत्यवलम्बिनः बहिष्कारं तीक्ष्डदण्डमुदघोष्य अपराधिनं ग्लानिस्थाने कोपयन्ति भेदञ्चोत्पादयन्ति । इत्ययं महान् दोषः इतर राजनीत्या प्रचारितः नतु भारतीयराजनीत्या ।

न च भारतीयराजनीत्या उक्तदण्डस्य प्रणयनाय राजानमधिकृतमुपेक्ष्य जातिः क्रिमर्थमधिक्रियते । इति चेदेवं । समाजघटकानां नियन्त्रणं यथा सरलरीत्या जातिमर्यादायां स्थितैः उपेक्षादिदण्डः दड्येषु प्रणीयते न तथा राजा सौकर्येण अपराधिनं दण्डयितुं शक्नोति । दृश्यतैचैतत् । अद्य सत्स्वपि अनेकेषु अधिकारिषु तदधीनेषु न्यायालयेषु शासनं विधिबहिर्मुखान् यथावन् न दण्डयितुं शक्नोति न वाऽ मर्यादां पालयद् वर्तमानशासनं जातिद्वारा तं दण्डयितुमभिलषति, इति भ्रष्टाचारस्य नियन्त्रणं दुःशकमभूत् । न च तर्हि अपराध कृतवतां पश्चात्तापशीलानां वर्णाश्रमिभिः पृथग् अवस्थापनव्यवस्था भारतीयराजनीत्या नोक्ता इति वाच्यम् तेषांकृते यथासंभवं प्रायश्चित्तादिना जातौ कथमपि प्रवेशस्य असम्भवे भगवद्दीक्षायां अधिकारित्वस्य उक्तत्वात् । राज्ये च श्रमणादिकार्यादिद्वारा तेषां जीवनव्यवस्थायाश्च अभिहितत्वात् ।

नन्वेवमपि सङ्ख्याह्रासविषयकप्रश्नोऽसमाहितो वर्तते । इति चेन्न । जातौ अपराधिनः अप्रवेशेऽपि तस्य पृथगवस्थापनमात्रेण जातिशून्यत्वमभूत् इति केन उच्यते ? केवलं सः प्रायश्चित्तानपनोद्यापराधदशायां धर्मत्वेनाभिहितकर्माधिकाराद्

जयमङ्गलाक्रोडपत्रम्

धीन इत्येव उच्यते । यथा कश्चिद् असमाधेयकुष्ठादिदुष्टः स्वकुलस्य निर्दोषत्व-संरक्षणार्थं अभिभावकैः पृथग् अवस्थाप्यते तर्हि तस्मिन् स्वप्रजात्वं स्वजातिमत्वं वा व्यपगतमिति न वक्तुं शक्यते । तथैव प्रकृतेऽपि बोध्यम् । अतः मर्यादामधिकृत्य पृथगवस्थापिताः जनाः यावज् जीवन्ति तावन्मात्रेण जातेः सङ्ख्याह्रासोऽभूत् इति वक्तुं न शक्यते ।

अत्रेदमवधेयं यदि राज्याय अपेक्षितं उत्तमोत्तमसंस्काराधायकं प्रति-भोद्पादकं शुचित्वमुपेक्षामहे । तर्हि जोत्रिकायाः उपायेषु शास्त्रेषु उक्तेष्वपि केवलं दास्यकर्मैव जीविकोपाय इति मत्वा आत्मानं दास्यकर्मणः पृथगवस्थातुं कदापि न प्रभवेम इति जाडयात्मकं पारतन्त्र्यरूपं पशुत्वं विना, भारतीयराजनीत्यभावे किं हस्तगतं भवेत् ? तदिदं प्रत्यभिज्ञादर्शनतः अवगन्तव्यम् ।

न चेष्टापत्तिः वक्तुं शक्या । यथेच्छं व्यवहरणेन शुचितामपसार्य स्वातन्त्र्येण जीविकाप्राप्तिप्रकाशिकां प्रतिभामनुपलभ्य केवलं सेवैव जीविका अस्तीति यदा लोको मन्यते तदा सर्वस्यापि सा सुलभा भविष्यत्येवेति नाऽस्ति स्थितिः अतः महद्धानिप्रसङ्गः आपद्येत । सेवायाः अलाभे उन्मादापस्मारादिदोष चौर्यदाहमहालुण्ठनादि दोषाः विदुषां समाजेऽपि प्रसरिष्यन्ति । तस्येदं फलं संभवि-तुमर्हति यत् प्राप्तं स्वातन्त्र्यं परहस्तगतं भविता । तस्माच्चतुर्वर्णाश्रमिणां बहिष्कारनीतिः न अनर्थमावहति नवा सङ्ख्यानां ह्रासोऽपि इत्येतदवधार्य निरुक्तं उपस्थितशङ्कासमाधानं विद्वद्भिः भारतीयराजनीतिमधिकृत्य प्रचारणीयं, संवर्धनीयम् पालनीयम् इत्यलमधिकेन ।

इति चतुर्थाऽध्याये जयमङ्गलायाः क्रोड़पत्रं संपूर्णम्

द्वितीयं प्रकरणं

पञ्चमोऽध्यायः

वृद्धसंयोगः

[सुदण्डमूलविनयहेतुविद्याधिकारिवृत्तम्]

तस्मात् दण्डमूलास्तिस्रो विद्याः । विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः ।

श्रीमूला

वृद्धसंयोग इति सूत्रम् । वृद्धाः आन्वीक्षिक्यादिविद्याकोविदाः, तैः संयोगः शिष्याचार्यभावलक्षणः सम्बन्धोऽभिधीयत इति सूत्रार्थः ।

तस्मादित्यादि । तस्मात् चतुर्वर्णाश्रमस्य लोकस्य राज्ञा सुविज्ञातप्रयुक्तदण्डमुखेन पाल्यमानस्यैव स्वधर्मकर्मानुष्ठानप्रवणतोत्पादात्, तिस्रो विद्याः आन्वीक्षिकीत्रयीवार्त्तालक्षणाः, दण्डमूलाः दण्डाधीनस्थितिकाः । दण्डश्च विनयलक्षणेन शास्त्रविज्ञानेन दत्तहस्तः प्राणिनां योगक्षेमसम्पत्तिहेतुरित्याह–विनयेत्यादि ।

वैदिकसिद्धान्तसंरक्षिणी

अथ द्वितीयं प्रकरणमारब्धुं आदिमं सूत्रमाह वृद्धसंयोग इति । विद्यावृद्ध संयोग इति तदर्थः । धर्मेण सह इति शेषः । धर्माभावे केवलया विद्यया लोकस्थितेरसंभवः । अतएव "तङ्गुविति"[1] न्यायसूत्रे अनुसूयुभिरिति विशेषणं उपात्तम् इत्युक्तं प्राक् (पृ० १३) । विद्योद्देशवृद्धसंयोगप्रकरणयोरस्य हेतुहेतुमद्भावः सङ्गतिः । तामेव सूचयन्नाह तस्मादिति । राजविद्याया इतरविद्यां प्रति योगक्षेमसाधनत्वम् आह दण्डमूला इति । सुविज्ञातप्रणीतः लोकशास्त्रानुमतो दण्डो मूलं प्रवर्तको यासां ताः इति विग्रहः । विद्या आन्वीक्षिकीत्रयीवार्ताः । दण्डस्य यथार्हत्वं कथं अपेक्षितमिति चतुर्थध्याये (पृ० ३७४) उक्तम् । तदपि किं मूलमित्याह विनयेति । विनयोत्र सत्वसहचारी बोध्यः । रजस्तमस्सहचरितविनये दम्भस्य प्रसङ्गोऽन्यथा भवेत् । सत्वं च प्रागुक्तं । तस्य चिन्हं "आस्तिक्यादि कार्यं बोध्यम् ।[2] तेन दण्डः सुप्रयुक्तो भवति । विनयः श्रोत्रादीनां स्वेषु स्वेषु अविप्रतिपत्तिरित्युक्तं नीतिसारव्याख्यायां जयमङ्गलायाम् ।

१—तं गुरुशिष्यसब्रह्मचारिशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात् ।

२—आस्तिक्यं प्रविभज्यभोजनमनुत्तापश्च तथ्यं वचो ।
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानं च निर्दम्भता ॥
कर्मानिन्दितमस्पृहं च विनयो धर्मः सदैवादरात् ।
एते सत्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः ॥

वैदिकसिद्धान्तसंरक्षिणी

(नीतिसार सर्ग १ ।) तत्तात्पर्यं शास्त्रार्थानुष्ठाने बोध्यम् ।[1] ये किल पूर्णतया मिथ्याज्ञानरहिताः ते सर्वेष्वपि विषयेषु इन्द्रियार्थेषु न विप्रतिपत्तिमन्तो भवन्ति । ये च न तथाभूताः तैः अन्ततः शास्त्रार्थानुष्ठाने स्वीयार्यमर्यादा स्थापनीयेति भावः । अन्यथा मदमानाभ्यां विनाशः स्यात् । शेषं तु जयमङ्गलाक्रोडपत्रे द्रष्टव्यम् । अत्रेदमनुसन्धेयम् । विनये सति सेवितो गुरुः विद्याः प्रदाय शिष्येषु विनयमादधाति ।[2]

विद्याविनीतश्च नृपतिः आत्मनः प्रजायाश्च योगक्षेमौ निर्वोढुं समर्थो भवति । प्राणभृतामिति । जीवमात्राणामित्यर्थः । अनेन राजनीत्युक्तोपायेन अनुष्ठितेन दण्डनीतिः न विफला भवति न वा राज्ञः अभयदानवतः[3] विसंवादिनी भवितुमर्हति इति सूच्यते । योगेति । योगोऽलब्धलाभः क्षेमः लब्धपरिपालनम् । तदावहः तत्साधनमित्यर्थः ।

जयमङ्गला

वृद्धसंयोगं विना विद्या न भवतीति तदनन्तरं वृद्धसंयोग उच्यत इति प्रकरणक्रमः । तमेव दर्शयन्नाह तस्मादिति । तत्र प्रकरणापेक्षया विद्यावृद्धा इति गम्यते । तैः संयोगः शिष्याचार्यसम्बन्धः । तत्र सम्बन्धोऽपि वक्तव्य इति न वाच्यम् । पूर्वप्रकरणापेक्षं हि तदुत्तरसूत्रम् । उत्तरसूत्रप्रकरणानुरूपं च तदादिमसूत्रम् । तयोः स्वप्रकरणे गुणीभूतयोर्नापेक्षा तथा वाक्यार्थावयवानां पदानां वाक्यान्तरावयवैर्नापेक्षा, वाक्ययोरेवापेक्षा । कथम् अधिकरणावयवानां प्रकरणानां सम्बन्ध इति चेत्–प्रकरणान्येवैकार्थानि अधिकरणं, अधिकरणत्वमेवैषां न समुदायान्तरमित्यदोषः । आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः । तस्माद् दण्डमूलास्तिस्रो विद्या इति दण्डमाहात्म्यम् । दण्डोऽपि किं मूल इत्याह–विनयमूलः सुप्रयुक्त इत्यर्थोक्तम् । कामादिभिर्दुष्प्रयुक्तो भवति । एवंविधः प्राणभृतां मनुष्यादीनां योगक्षेमावहः ।

---

१ कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः ।—अर्थ० अधि १ प्रक० ३

२ शास्त्राय गुरुसंयोगः शास्त्रं विनयवृद्धये ।
विद्याविनीतो नृपतिर्न कृच्छ्रेष्ववसीदति ॥
सुनिपुणमुपसेव्य सद्गुरुं शुचिरनुवृत्तिपरो विभूतये ।
भवति हि विनयोपसंहितो नृपतिपदाय शमाय च क्षमः ॥ नीतिसार सर्ग १ प्र०२

३ सकृदेव प्रपन्नाय तवास्मीति च वादिने ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥

जयमङ्गलाक्रोडपत्रम्

विनयवृद्धसंयोगयोः पोर्वापर्यम्

ननु कामन्दकेन नीतिसारे जितेन्द्रियत्वलक्षणविनयसत्वे वृद्धसंयोगः ततः विद्या भवति इति क्रमः उक्तो विद्यते । तद्यथा —"विनयो ह्रीन्द्रियजयस्तद्युक्तः शास्त्र-मृच्छति । शास्त्राय गुरुसंयोगः" । इति च । एतदनुसारेणैव प्रकरणान्यपि तत्र सङ्ग्रथितानि उपलभ्यन्ते । कौटिल्येन तु विद्याप्राप्त्यनन्तरं विनयो भवतीत्यभिहित-मस्ति । तथैव तेन प्रकरणस्य सन्निवेशनात् । एवंरीत्या जितेन्द्रियत्वविद्यावृद्ध-संयोगयोः पारस्परिकपौर्वापर्यविषये आभ्यां ग्रन्थाभ्यां भासमानः विरोधः कथं परिहरणीयः ? इति चेदुच्यते ।

विनयो हि द्विविधः । कृतकः स्वाभाविकश्च । तद् वक्ष्यति अत्रैव, "स विनयो द्विविधः" इत्यादिग्रन्थेन । तत्र स्वाभाविकविनये सति वृद्धसंयोगः ततो विद्याप्राप्तिः ततः कृतको विनयः उत्पद्यते । इत्येवंरीत्या विनयस्य द्वैविध्यभेदेन विनयवृद्ध-संयोगयोः पौर्वापर्यविषये आशङ्कितो विरोधो परिहृतो भवतीत्यलम् ।

गुरुसेवाविद्ययोः सम्बन्धोपपत्तिः

ननु गुरुसेवाविद्ययोः यः पौर्वापर्यसम्बन्धः अर्थशास्त्रे उक्तः तस्य राज्येन सह कथमापेक्षिकत्वं भवतीतिचेदुच्यते । साहित्यशास्त्रे यावन्तः व्यभिचारिभावाः उक्ताः तेषु धृतिभावस्यैव अद्भुतरसनिर्माणद्वारा प्रजानुरागजनकत्वं संभवति इत्युक्तं (पृ० ७) प्राक् । अतएव राज्यस्य मूलभूततत्त्वेषु "सत्ववुद्धिव्यपाश्रय"मिति ग्रन्थेन नीतिसारकृता सत्वन्निर्दिष्टमस्ति । तस्य अत्यर्थलाभाय जितेन्द्रियत्वमपेक्ष्यते । तेन धृतेः उद्भवात् । अतः जितेन्द्रियत्वं धृतौ पर्यवस्यति । धृतिश्च—शौर्यादिजा वृत्तिः[1] ।

एवं सङ्गीतरत्नाकरेऽपि इदमेव धृतिस्वरूपं विषयकरणभेदेन लक्ष्यीकृत्य भङ्ग्यन्तरेण निर्दिष्टमस्ति ।[2]

अस्य अनुभावेषु सर्वस्य आह्लादकं रसस्य प्राणभूतमौचित्यं[3] सहजगत्या सम्भवतीति भाव प्रकाशनात् टिप्पणोनिर्दिष्टात् स्फुटी भवति[4] ।

राजमान्यता

एतदनुभाव प्रभावेणैव धृतिमान्पुरुषः यद् अभ्यूहति, यच्चेष्टते यद् वाञ्छति वदति वा तत्सर्वमपि सर्वस्य मनसः सुखाय भवति उचितत्वात् । धृतौ औचित्यस्य

---

१ शौर्यात् विज्ञानतः शौचाचाराच्च गुरुभक्तितः ।
श्रुतप्रभावतो व्रीडान्मनोरथाप्तेर्भवेद् धृतिः । इति भा० प्र०

२ तदुक्तम्—
विवेकः श्रुतिसम्वत्तिः गुरुभक्तिः तपस्विता ।
एते विषयभावेन करणत्वेन च स्थिताः ॥ सं० र०

३ औचित्यं हि रसस्य प्राणाः ।

४ प्रियाप्रियाविकारित्वं तदात्वोचितकारिता ।
अप्राप्तातीतनष्टनामलाभेऽनभिशोचनम् ॥ (भा० प्र०)

जयमङ्गलाक्रोडपत्रम्

स्वभावसिद्धत्वात् । राजापि तादृशमेव पुरुषं माननीयत्वेन मन्यते । एतत्सम्माननेन अपरेऽपि तं माननीयत्वेन पश्यन्ति ।

सर्वमान्यत्वलाभाय अपेक्षितस्य एवंभूतस्य धृतिभावस्य सहकारिषु प्रियाप्रियाविकारित्वं उक्तभावप्रकाशनपद्ये निर्दिष्टमौचित्यं च यस्य देवे शास्त्रशरीरे गुरौ च नाऽस्ति श्रद्धा तेन अनुष्ठातुमशक्यमित्यपि सत्यमस्ति ।

राजमात्रमान्यत्वे दोषः

केचित् केवलं गुरुभक्तिमनपेक्ष्य धृतिभावञ्चोपेक्ष्य राजमान्यत्वस्य लोकमान्यत्वस्य वा लाभाय प्रयतन्ते । तदर्थञ्च अद्य सर्वैः सेवावृत्तिरेव धनप्राप्तिप्रत्युपायत्वेन मन्यते किन्तु तावन्मात्रेणैव कृतकृत्यता न मन्तव्या । तेषु अर्थप्राधान्यप्रयुक्तस्य रौद्ररसस्य पर्यन्ते कलहप्रयोजकस्य समुदयसम्भवात् । अतः तन्मा भवतु इत्येतदर्थम् विद्यावृद्धसंयोगः धृतिभावस्य पूर्णतायै प्रातिभज्ञानलाभाय च अवश्यं समीहितव्यः । गुरुप्रसादस्यैव प्रातिभज्ञानोत्पत्ति प्रति कारणत्वात् ।

तदुक्तम्—यस्य देवे पराभक्तिः यथादेवे तथा गुरौ ।
तस्यैतेऽकथिता ह्यर्थाः प्रकाशन्ते महात्मनः इति ।

प्रकाशः

अत्रेदं प्रसङ्गादवधेयम्---यत् अत्र श्रुतौ 'अकथिताह्यर्था प्रकाशन्ते इति यदुक्तम् तत् प्रकाशात्मक विशेष-व्याप्यदर्शनपरतया योज्यम् । विशेषदर्शनमपि न प्रतिभातिरिक्तं वस्तु । अतएव जगदुत्पत्तिसमये मायावच्छिन्नस्य आत्मनः मोहः अभूत् अर्थात् विशेषदर्शनं नाभूत् इति तत्र तत्र प्रतिपादितं उपपद्यते ।

शास्त्राभ्यासः

गुरुभक्त्या देवभक्त्या च शास्त्रप्रकाशनद्वारा विशेषदर्शनान् मोहः अपसार्यते इति उक्तपद्यस्याऽर्थः बोध्यः । अत्राऽयं निष्कर्षः । विनयपूर्वकेण विद्यावृद्धसंयोगेन शिष्येण विद्याविषये कश्चन प्रकाशः उपलभ्यते, तेन च तर्कस्य सञ्चरणात् प्रियाप्रियाविकारित्वमूलभूतः धृतिभावः, ततः राज्याय अपेक्षिता उचितकार्यकारिणी प्रतिभा च तस्मिन् समुदेति । तया अद्भुतरसद्वारा स लोकानुरागं स्वात्मनि उत्पादयति । तत्मूलकञ्च स्थायि बृहदेकं आदर्शरूपं राज्यसङ्घटनं सुशकं भवति । एतत्सर्वमविदित्वा ज्ञानमदाक्षिप्तसन्मार्गः कश्चित्पुरुषः अन्धो भूत्वा उपवर्णितं अमुं विषयं उपेक्षते तदा तु तस्मिन् गुरुभक्त्यभावेन संप्रसृतः विशेषादर्शनरूपः अन्धकारः दुस्तरो भूत्वा "येषामक्लेशेन स्फुरणं राज्यस्य सुव्यवस्थायै अपेक्षितमासीत्" । तेभ्यः पदार्थेभ्यः दूरं प्रापयति, शक्तिहीनत्वञ्चापादयति । हीनशक्तिकत्वस्य जगति लोके कियन्मूल्यमिति सर्वैर्विदितत्वात् तन्न प्रपञ्च्यते । तद्विषये एतावदेव वक्तव्यम्—

शिवहीनं विष्णुहीनं न वदन्ति नराधमम् ।
शक्तिहीनस्तु यो मर्त्यः तं वदन्ति नराधमम् । इति ।

जयमङ्गलाक्रोडपत्रम्

अतः प्रतिभासमुत्पत्तये अक्लेशेन पदार्थानां प्रातिभसंस्कारोद्बोधाय गुरुसेवां कुर्वद्भिः विद्याभिरुचिभिः शास्त्रमभ्यस्य शक्तिमुपलभ्य लोकानां मनः अद्भुतरस-निर्माणेन वशीक्रियते ।[1]

विद्यावतामसुखम्

ये पुनरत्र गुरुभक्तिसहचरितं शास्त्राभ्यासं तद्वन्तं वा पुरुषं अलक्ष्मीः प्रायशः वृणोतीति मत्वा निष्फलं विजानन्ति । ते कामं विजानन्तु । किन्तु पूर्वनिर्दिष्टदिशा यैः धृतिभावस्य स्वरूपमनुभूयते ते तु गुरुसेवाविद्ययोः सुव्यवस्थायै जनानुरागसम्पाद-कत्वेन अपेक्षितस्य आचार्यसम्बन्धस्य आत्मनि लाभाय न कथमपि उपर्युक्तं विषय-मुपेक्षन्ते अलक्ष्मीवरणं च दृष्ट्वा नाऽपि ते विषीदन्ति प्रत्युत शास्त्रसुखनिभृतचेतसः इष्टापत्तिमेव संवदन्तः तिष्ठन्ति ।[2]

तस्माद् गुरुसेवाविद्ययोः यः पौर्वापर्यसम्बन्धः अर्थशास्त्रे उक्तः स राज्येन सहापि अपेक्षितो भवतीति हृदयम् ।

प्रतिभोत्पत्तिं प्रति वृद्धसंयोगस्यान्यथासिद्धत्वम्

ननु विद्यावृद्ध संयोगेन प्रतिभोत्पत्तिरिति सिद्धान्तितं । परं सा जन्मान्तरार्जित-कर्मवशात् केषुचित्कविषु दृश्यते[3] । किं बहुना जन्मान्धसदृशानामतिमूढानामपि क्रान्तदर्शित्वं वर्णितं वर्तते (पृ० ३९२)। इति प्रतिभोत्पत्तिं प्रति विद्यावृद्धसंयोगस्य अन्यथासिद्धत्वं कुतो नाशङ्कनीयम् इति चेन्न ।

वृद्धसंयोगस्यानन्यथासिद्धत्वम्

अत्र हि पूर्वपक्षे कवित्वं क्रान्तदर्शित्वमुक्तमस्ति तस्य मूलम् अग्निसूक्तस्य व्याख्यान इति कैश्चिन् मन्यते तद्यथा—

---

१ तदुक्तम्—आदौ शास्त्रान्धकारे पतित इव ततोऽभ्यासमार्गे चरिष्णुः ।
पश्चाद् व्युत्पत्तिदेहल्युपग इव ततः शक्तिवाटी प्रविष्टः ॥
नाना शब्दाख्य पुष्पावचयकरणतो वाग्वशीभूतविश्वः ।
यत्प्रेमापाङ्गदृष्ट्या भवति कविवरो भारती सा पुनातु ॥ इति ।
(वसिष्ठस्मृतौ)

२ तदुक्तम्—नास्माकं कटका न वाजिमुकुटाद्यालङ्क्रिया सत्क्रिया ।
नोत्तुङ्गस्तुरगो न कश्चिदनुगो नैवांबरं सुन्दरम् ।
किन्तु क्ष्मातलवर्त्यशेषविदुषां साहित्यविद्याजुषाम् ।
चेतस्तोषकरी शिरोनतिकरी विद्याऽनवद्यास्ति नः ।
न सा सभा यत्र न सन्ति वृद्धाः ।
वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मो न वै यत्र च नाऽस्ति सत्यं ।
सत्यं न तद् यच्छलेनानुविद्धम् । इति ।

३ तदुक्तं—रसगंगारे बालादेस्तौ विनापि केवलाज्महागुरुप्रसादादपि प्रतिभोत्पत्तेः ।

जयमङ्गलाक्रोडपत्त्रम्
शक्तिः

अग्निहोता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।
देवो देवेभिरागमत् १।१।१·५

(भा०) होता होमनिष्पादकः कविक्रतुः,कविशब्दोऽत्र क्रान्तवचनो न तु मेधाविनाम, क्रतुः प्रज्ञानस्य कर्मणो वा नाम । ततः क्रान्तप्रज्ञः क्रान्तकर्मा वा । इति

किं तु एतद्व्याख्यानदर्शनमात्रेण कवित्वं क्रान्तदर्शित्वाभिन्नमिति तु वचनं न समञ्जसं भाति । यतः नदीवृद्ध्या उपरितनदेशे सुवृष्टिर्जाता इति ज्ञात्वा सुभिक्षं भविष्यतीत्यनुमानवर्णनपरेषु मेघोन्नत्या भाविवृष्ट्यनुमानवत्सु वा क्रान्तदर्शित्वात् उक्तानुमाने हेत्वाभासाभावाच्च कवित्वं व्यापद्येत । अतः क्रान्तदर्शित्वमात्रेण कवित्वं संपद्यते इति तु न वक्तव्यम् अपितु क्रान्तदर्शित्वेन सह अन्यदपि किञ्चद् वस्तु अस्ति यद्बलात् कान्तदर्शी कविरिति व्यपदिश्यते । तच्च वस्तु "शक्ति"रितिनाम्ना साहित्यिकैः संबोध्यते । सा च यैः कारणकलापैः संभवति तत्र देवप्रसादः न गृहीतः अपि तु काव्यावेक्षणादि ।[1]

मम्मटभट्टेनापि शक्तिं प्रति लोकशास्त्रकाव्याद्यवेक्षणं काव्यज्ञशिक्षणमभ्यसनञ्चेति त्रितयं मिलित्वा एकं समुदितं कारणं भवतीति निर्णीतमस्ति । नह्यत्र मम्मटभट्टेन उक्तेषु कारणकलापेषु देवताप्रसादस्य जन्मान्तरार्जितकर्मणो वा सङ्ग्रहः कृतो वर्तते । नचैवमत्रानुक्तत्वेऽपि रसगङ्गाधरकृता तस्याः कारणत्पमुक्तमेवेति चेन । रसगंगाधरकृता कारणत्वेन देवताप्रसादस्य केषांचित् कवीनां प्रतिभां प्रति कारणत्वे उक्तेऽपि सर्वसाधारण्येन सर्वेषां प्रतिभां प्रति देवताप्रसादस्य जन्मान्यरार्जित कर्मणो वा अचिन्त्यस्यऽतथात्वादेव तमुपेक्ष्य काव्यप्रकाशकृता उक्तकारणकलापस्यैव सङ्ग्रहः कृतः । एवञ्च किरणारणिमणिन्यायेन तत्तद्वस्तुकलापानां प्रतिभां प्रति कारणत्वं कल्पयित्वा रसगङ्गाधर काव्यप्रकाशग्रन्थयोः समन्वये कृते न परस्परं विरोधो भाति । अतएव शक्तिर्निपुणतेति व्याख्याने गोकुलनाथोपाध्यायैः केचिदित्यनेन तथा अभिहितमस्ति[2] ।

---

१ तदुक्तम् काव्यप्रकाशे—

शक्तिर्निपुणता लोकशास्त्र काव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यासात् इति हेतुस्तदुद्भवे ॥ (का० प्र०)

२ गोकुल ना०)

'केचितु काव्यं कवेः प्रवक्तुरेव सहृदयस्यैव वा फलं कवयतीति । तत्र प्रवचने सहृदयत्वस्वरूपे विभावादि परामर्शे च यतनीयम् । तत्र यत्नः कारणमुखेनैव संभवतीत्याशयेन शक्तिरित्यादि कारिकायां कारणगणनमित्याह–अस्येति । स्वतो यत्नो योगस्य प्रवचनस्य परामर्शस्य च कारणकलापं गणयति । यत्र पुंसां प्रवृत्तिरर्थात् कार्यं निष्पादयतीत्यर्थ इत्याहुः । तच्चिन्त्यम्, अस्य कारणमुक्त्वा स्वरूपमाहेत्यग्रिमावतारणे काव्यस्यैवेदं कारणवचनमित्यवगमात् । कवित्वबीजभूतः कवित्वे सङ्ख्यावदर्थककविवदप्रवृत्तौ बीजभूतो निमित्तभूतः संस्कारविशेषो भावनाख्यः

जयमङ्गलाक्रोडपत्तम्

पौरुषकर्मापरित्यागः, अदृष्टलाभश्च

न च देवताप्रसाद एव लोकशास्त्रकाव्याद्यवेक्षणादिकारणकलापसङ्ग्रहापेक्षया प्रतिभोद्बोधं प्रति कारणतया सङ्ग्राह्यः इति वाच्यम्।

देवताप्रसादव्याजेन पौरुषकर्मणः परित्यागस्य शास्त्रेषु असम्मतत्वात्, दैवस्य अचिन्त्यत्वाल्लौकिकमेव कर्म कर्तव्यमिति शास्त्रोपदेशस्य उपलब्धत्वात्[1],

न च तर्हि तावन्मात्रेण अदृष्टस्य आनुकूल्यं कथं लभ्येत इति शङ्क्यम्, प्रतिबन्धकाभावे शास्त्रानुसरणे अदृष्टस्य सदानुकूल्यसम्भवात्। दैववादः केवलं कर्मविघ्नेषु अन्यतमः प्रतिबन्धकत्वेन यदा चकास्ते। तदा दैववादस्य सङ्ग्रहः।

वस्तुतस्तु यः कविः पूर्वजन्मान्तरार्जितकर्मवशात् एतज्जन्मनि प्रतिभां प्रदर्शयति। सोऽपि जन्मान्तरे विद्यावृद्धसंयोगेन शास्त्राभ्यासादि कृतवानेव। इत्येव मन्तव्यम्[2]।

अतः अदृष्टस्यौत्कट्येन एतज्जन्मनि कवितोत्पत्तावपि तां प्रति पूर्वमभिहितस्य शास्त्रादिकारणकलापस्य अन्यथासिद्धत्वं न मन्तव्यम्। तदिदं रसगङ्गाधरकृतैव स्फुटीकृतमस्ति। तस्मात् प्रतिभोत्पत्त्यर्थं विद्यावृद्धसंयोगोऽपेक्ष्यते[3]।

वृद्धसंयोगपदार्थमाह तत्रेति। (ज० पृ० ३८८) ननु तत्र तत्र मूलकृता प्रकरणयोः सङ्गतिः प्रादर्शि यथा तथा पूर्वप्रकरणस्थान्त्यवाक्येन सह उत्तरप्रकरणस्थस्याद्यवाक्यस्य सङ्गतिः कुतो नोक्ता इति शङ्कां समाधातुमाह तत्र सम्बन्धोपीति।

प्रतिभानामा प्रणिधानसहकृते चेतसि यो झटित्युद्बुध्यतेऽक्लिष्टपदपदार्थगोचरः संस्कारः सा प्रतिभा विद्वदादिपदप्रवृत्तिनिमित्तम्। तदुक्तम् —

"मनसि सुसमाधिनि विस्फुरणमनेकधाऽभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः।" इति।

१ तदुक्तम् — नी० सा० १ सर्गे ज० म० १२ श्लोक
'नय विक्रमसम्पन्नः सूत्थानश्चिन्त्ययेच्छ्रियम्।'

ज० 'एवं लाभपालनोपायं शास्त्रशरीरमुपक्षिप्य विनयमुपदिदिक्षुराह नयविक्रमसम्पन्न इत्यादि। दैवं मानुषं च कर्म लोकं पालयति। तत्र दैवस्य अचिन्त्यत्वान्मानुषमेव नयशौर्यादिकमास्थाय स्वमण्डले श्रियं चिन्तयेत्। तदप्यनुत्थानशीलस्य नोपपद्यत इति सूत्थानः। तत्र विक्रमान्नयः प्रधानं, तत्पूर्वकस्य विक्रमस्यैकान्तततया फलसाधनत्वात्"। इति।

२ जयमङ्गलायाम् —
उपदेशानदनायोगाद् वासनानुगमादपि।
परयत्नाद् अदृष्टाद्वा सर्वास्सर्वस्य वृत्तयः। इतिपद्यव्याख्याने उक्तमस्ति।

३ अतएवोक्तं —
"अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च[1]
यत्कृपालेशमात्रेण नमोऽस्तु गुरवे सदा।," इति

कृतकः [1]स्वाभाविकश्च विनयः[2] । क्रिया हि द्रव्यं[3] विनयति नाद्रव्यम्[4]। शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या[5] विनयति नेतरम् । विद्यानां तु यथास्वं[6] आचार्यप्रामाण्यात् विनयो[7] नियमश्च[8] ॥

जयमङ्गलाक्रोडपत्रम्

सङ्गत्यनपेक्षा तदपेक्षा च

गुणीभूतयोरिति । (ज० पृ० ३८८) गुणानाञ्च पदार्थत्वात् असम्बन्धः समत्वात्स्यात् इति न्यायात् प्रकरणे अङ्गभूतानां वाक्यानां पारस्परिकसङ्गतिप्रदर्शनस्य अनपेक्षितत्वं बोध्यम् । ननु तर्हि प्रकरणान्यपि अधिकरणस्य अङ्गभूतान्येव सन्ति । महावाक्यार्थे अवान्तरवाक्यार्थवत् । एवं सति प्रकरणयोः सङ्गतिप्रदर्शनमनुचितम् । इत्याह कथमिति । (पृ० ३८८) प्रकरणात् अतिरिक्तत्वस्याधिकरणे अभावात् । प्रकरणसमूहस्यैव अधिकरणरूपत्वात् पूर्वापरप्रकरणयोस्सङ्गतिप्रदर्शनमुचितमिति भावः ।

'सुप्रयुक्त इति' (ज० पृ० ३८८) इदं मनूवत्यभिप्रायेण (दण्ड प्रकरणे) बोध्यम् । सुप्रयुक्तत्वञ्च दण्डस्य लोकशास्त्रानुगत्वे सति बोध्यम् । तदुक्तम्–

'लोकशास्त्रानुगो ज्ञेयो दण्डोऽनुद्वेजनःश्रिये' । इति । (नी० सा० स० २)

श्रीमूला

कृतक इत्यादि । तत्र विनयः क्रियया अभियोगलक्षणया निर्वृत्तः कृतक इत्येकः । विनापि क्रियां वासनावशात् सिद्धः स्वाभाविक इत्यपरः । यथा हि संस्करणाभियोगः शाणघर्षणादिः द्रव्यं खन्यादिप्रभवं पाषाणादिविशेषं संस्करोति न पुनरद्रव्यं यङ्कमपि शिलादिखण्डम्, तथा विद्याभियोगः स्वतस्सिद्धशुश्रुषादिबुद्धिगुणसम्पन्नमेव जनं संस्करोति न तु तद्रहितम् । बुद्धिगुणाश्च तेऽष्टौ भवन्ति—शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशाख्याः तत्र शुश्रुषा श्रवणार्हेषु

---

१. **स्वाभाविकश्चेति** । पूर्वकृतशुभकर्मणा ।

२. **क्रियेति** । विद्यावृद्धसंयोगलक्षणा ।

३. **द्रव्यमिति** । द्रव्यं सहजविनयसंयुक्तम् ।

४. **अद्रव्यमिति** । द्रव्यं विनयतीत्यत्रैव नाद्रव्यं विनयतीति सिद्धे पुनर्वचनं द्रव्याद्रव्यपरिग्रहणार्थम् ।

५. **विद्येति** । विद्याचतुष्टयम् ।

६. **यथास्वमिति** । यो यस्या विद्याया उचितो '...... नियमश्च । यथास्वम् ।

७. **विनयइति** । प्रत्युत्थानविनयादिः ।

८. **नियमश्चेति** । ब्रह्मचर्यैकभुक्तादिः ।

श्रीमूला

श्रोतुमिच्छा, तस्यां सत्यां श्रवणम् आसेवा, ग्रहणं श्रुतार्थज्ञानम्, धारणं गृहीताविस्मरणम् विज्ञानं धारितेष्वर्थेषु साध्यसाधनादिस्वरूपविवेकज्ञानम्, ऊहः शब्दानुक्तस्यलिङ्गेनावगतिः, अपोहो युक्तापेतस्य हानं, तत्त्वाभिनिवेशो वस्तुयाथात्म्यज्ञानम्।

एवं विद्याधिकारिणं तदनधिकारिणं चोक्त्वा विद्याग्रहणकाले शिष्येणाचरणीयमाह– विद्यानां त्विति। विद्यानाम् आचार्यप्रामाण्याद् यस्या विद्याया यो य आचार्य उपदेष्टा तस्य प्रामाण्यात्। तदध्यायनकाले तं तं शिष्यं प्रति धर्मानुशासनप्रभविष्णुत्वात्, यथास्वं तत्तदाचार्यानुशासनानतिक्रमेण विनयः शिक्षणम्, 'आहूतश्चाप्यधीयीत' इत्युक्तप्रकारं, समुदाचारो वा गुर्वागमनोपवेशादौ प्रत्युत्थानानुपवेशादिः, नियमश्च गुरुपरिचरणादिव्रतं च, अर्थाच्छिष्यस्य भवति।

वैदिकसिद्धान्तसंरक्षिणी

ननु विनयेन विद्यावृद्धसंयोगः तेन च विनय इत्यन्योन्याश्रयः स्यात्। अतः आह कृतकः इति। कृतकः शास्त्रज्ञानात्प्रसूतः। स्वाभाविकः जन्मान्तरमूलकः[१]। अस्य शास्त्रनिश्चयं प्रति कारणत्वं बोध्यम्[२]। स्वाभाविकविनयेन कार्यसंभवे पुनर्विद्याग्रहणप्रयुक्तविनयोपयोगित्वं जयमङ्गलाव्याख्यायां स्फुटीकृतम्।

स्वाभाविकस्य विनयस्योपयोगं दर्शयति क्रियेति। क्रिया विद्योपदेशः।[३] द्रव्यम् सहजविनयसम्पन्नम्। तदुक्तं टिप्पण्यां "द्रव्यं सहजविनयसंयुक्तम्" इति। शुश्रूषाद्यष्टबुद्धिगुणसम्पन्नं वा। तदुक्तं जयमङ्गलायाम् "द्रव्यं वक्ष्यमाणगुणमित्यादि" इति। नाद्रव्यमिति। सर्वथा सहजविनयेन बुद्ध्याष्टगुणेन वा यो न सम्पन्नस्तमित्यर्थः। एतेन द्रव्याद्रव्यमपि[४] व्याख्यातं भवति। सहजगुणाभावसहजदोषवन्तमिति तदर्थः। तेन द्रव्याद्रव्यमपि क्रिया विनेतुं समर्थेति बोध्यम्। तदुक्तम् जयमङ्गलायाम्।[५] वक्ष्यति च चामुमेवार्थं चाणक्यः राजपुत्रप्रकरणे।[६] अनयोः सहजकृत्रिमविनययोर्विशदं विवेचनं टीकाक्रोडपत्रे द्रष्टव्यम्। निर्दिष्टाष्टगुणसम्पन्नबुद्धिमत्वरूपं द्रव्यत्वमभिदधाति शुश्रूषेत्यादि। शुश्रूषा श्रोतुमिच्छा श्रवणार्हेषु। तेन दशरूपकेष्वन्यतमस्य प्रहसनस्य

---

१ पूर्वकृतशुभकर्मणा इति - नीतिनिर्णीतिः

२ विनीतस्याध्ययनेन शास्त्रनिश्चयान् मतिसंयोग इति यावत् इति —नीतिसार सर्ग १ प्रक०१

३ विद्यावृद्धसंयोगलक्षणः इति

४ द्रव्यं विनयतीत्यत्रैव नाद्रव्यं विनयतीतिसिद्धेः पुनर्वचनं द्रव्याद्रव्यपरिग्रहार्थम्।

५ सहजविनयो द्रव्यं, सहजदोषमद्रव्यम्, सहजगुणदोषो द्रव्याद्रव्यम्। तत्र क्रिया द्रव्यं विनयत्येव सौकर्यात्। अद्रव्यं नैव। दुर्बुद्धेरकर्मण्यत्वात् सौकर्याभावात्। प्रत्याख्यानभावाच्च द्रव्याद्रव्यं यत्नेन विनयति तस्याहार्यबुद्धित्वात्।

६ बुद्धिमानाहार्यबुद्धिदुर्बुद्धिरित्यादिना। इति—अध्याय १, अधि० १

वैदिकसिद्धान्तसंरक्षिणी

व्यावृत्तिर्बोध्या। श्रवणं आसेवेति जयमङ्गलायां नीतिसार व्याख्यायाम् (सर्ग-४, प्रक० ७) विद्या इव भक्तिरपि तेनैवोपलभ्यते इत्यपि आसेवात्मकस्य श्रवणस्य फलं बोध्यम्[1]। गुरुप्रसादानुकूलो व्यापार इति तदर्थः। अत्रासेवात्मकं श्रवणं यदुक्तं तत् शुचित्वाद्यङ्गकलापविशिष्टं बोध्यम्। शुचित्वादिकं विना सेवया गुरुप्रसादस्य भक्तेर्वा असम्भवात्। किञ्च गुरुप्रसादानुकूलोव्यापारः न गुरुचरणसंवाहनादिमात्रमपेक्षितम् अपितु अर्थज्ञानमपि बोध्यं "सतोनूचानचेष्टितैः" इति नीतिसारे अभिधानात्। (सर्ग ३ प्रक० ६)

शुश्रूषा

ननु शब्दःश्रूयते अर्थस्तु न श्रूयते इत्यर्थस्य कथं श्रवणं स्यात्। तन्न। श्रवणंकीर्तनमित्यादौ श्रुशब्दार्थस्य अर्थज्ञानानुकूलव्यापारपरतया व्याख्यातत्वात्।[2] ग्रहणमवधारणम्[3]। इदमित्थमेवेति निश्चय इति यावत्। धारणमविस्मरणम्। विज्ञानं विवेकज्ञानम्। विवेकश्च शास्त्रेषु निर्दिष्टविधिस्वरूपादिविषये बोध्यः। ननु श्रवणविज्ञानयोः को भेदः ? उच्यते। श्रवणात्मकेन बुद्धिगुणेन उत्पत्तिविधिर्ज्ञायते। तत्परिकरेषु अपेक्षितो विनियोगविधिरधिकारविधिश्च विज्ञानेन। ऊहः विधिस्थले सञ्जायमानस्तर्कः। निषेधस्थले च जायमानः अपोहः।[4] अथवा प्रमाणविषयकः प्रमेयविषयकश्च तर्कः ऊहापोहः क्रमादुच्यते। तत्वज्ञानमिति। तत्वाभिनिविष्टा बुद्धिः कर्तव्यविषयिणी सोत्साहसत्वप्रचुरा बुद्धिः। विद्या[5] ज्ञानविद्या कर्मविद्या च वक्ष्यमाणाद्रव्यं विनयति, तया सम्यक् करणीयवर्जनीयविधानात्। तेन ज्ञानक्रियावैचक्षण्यं प्राप्नोति इत्यर्थः, विनयस्य टीकायां तथा अग्रे व्याख्यानात्। यद्यपि बुद्धेरष्टगुणक्रमविषये नीतिसारे धारणानन्तरमूहापोहौ पठितौ। अत्र विज्ञानं पठितं तथापि नीतिसारस्य एतदर्थशास्त्रमूलकत्वात् तदीयपद्ये मूलानुसारेण, बुद्धेरष्ट गुणानां यथाक्रममुत्पद्यमानत्वेन धारणानन्तरमेव विज्ञानं द्रष्टव्यम्। तत्र कुतो नैवं

१--तदुक्तं भक्तिव्याख्याने हरिभक्तिरसामृतसिन्धौ—
यः केनाप्यतिभाग्येन जातश्रद्धोस्य सेवते। इति।
टीका–अतिभाग्येन महत्सङ्गादिजातसंस्कारविशेषेण इति। (पूर्वविभागे ९, लहरी)

२—विष्णोः सगुणस्य वा निर्गुणस्य वा शब्देन ज्ञानं तादृशविष्णुप्रतिपादकशब्दस्य श्रोत्रेण सहर्षं च श्रवणम्।—सिद्धान्तविन्दौन्यायरत्नावली श्लोक ८
तथा तत्रैव नारायण्याम्—तत्र श्रवणं भगवद्विषयकशब्दस्य श्रोत्रेण ग्रहणम्, तदर्थबोधश्च
—सिद्धान्तविन्दु नारायणी श्लोक ८

३—श्रुतानामर्थतामव धारणं ग्रहणं।—जयमङ्गला अर्थ अध्याय ५

४—तर्काख्यौ प्रत्ययावूहापोहौ विधिनिषेधयोः—सङ्गीतरत्नाकरमतिभावनिरूपणे—

५—विद्याचतुष्टयं, इत्यर्थो व्याख्यातः।

वैदिकसिद्धान्तसंरक्षिणी

पठितमिति सु श्लोकानुरोधात्तत्रन पठितमिति ग्रन्थेन जयमङ्गलाकृतोत्तरं अभ्यधायि तत्तथैव मन्तव्यम्। अयमत्र निष्कर्षः—ग्रहणं अवधारणं तद्वति तत्प्रकारकं बोध्यम् जयमङ्गलावाक्यप्रामाण्यात्। तत्वाभिनिवेशश्च इदमिष्टसाधनमेव, इदमेव इष्टसाधनं इत्याकारकम्[1]। तदपि अप्रामाण्यज्ञानानास्कन्दितं बोध्यम्[2]। नेतरं। (पृ० ३६४) नाद्रव्यम् सहजदोषसम्पन्नं। दुर्बुद्धि इति यावत्। तथा च बुद्धिमान् साहजिकविनियसम्पन्नः अधीती पुरुषः विनीतो जितेन्द्रियः जनानुरागपात्रम् भूत्वा महता हर्षेण प्रियश्रुतिजावेगेन अद्भुतेन जनताद्वारा अपेक्षितवस्तु अनुभावमुखेन स्वयंप्रेरणया लभते।[3] इदं सर्वमभिप्रेत्य मनुनापि स्वाध्यायशीलस्य पयोदध्यादिकुल्यालाभः इत्युक्तम्[4] तत् उपपन्नं भवति। विद्यासु निर्दिष्टा विधयः अनेके सन्ति तेषु केषां परिग्रहः केषां वा नेति निर्णयमन्तरा यथावदनुष्ठानं दुष्करं स्यात् अतस्तद् व्यवस्थापयितुमाह विद्यानामिति। यथा स्वं यथाधिकारम्। विनयः इष्टसाधनताकमनुष्ठानम्। नियमश्च आचार्यप्रामाण्यान् निर्णीतो भवति। अर्थात् आचार्यः शिष्यहिताधानार्थं दृष्टं यद्वक्ति तदेव तेन राज्ञा अनुष्ठेयम्। आचार्यश्च मनुना व्याख्यातः सोऽत्रानुसन्धेयः।[5] अथवा आचार्यपदेन वंशवृत्तविद्याभिजनवृद्धो विवक्षणीयः[6]। (नीतिवाक्यामृतं)

जयमङ्गला

स विनयो द्विविधः—कृतकः स्वाभाविकश्च। तत्र पूर्वो वक्ष्यमाणः[7]विपाकजस्तु[8] बीजमात्रम् भवन्नपि न कार्यानुष्ठानयोग्यः। यथा जातिविशिष्टमपि सुवर्णं

१ यथा धर्मार्थहेतवो विद्या एव नाविद्याः विद्याश्च पृथक् पृथगसाधारणप्रयोजनत्वाच्चतस्रः एव। —अर्थशास्त्र जयमंगला अध्याय ५

२ तदेवोक्तं गङ्गेशोभाध्यायैः इदमित्थमेवेत्यवधारणस्य निष्कंपप्रवृत्त्यङ्गस्य-इति।
माथुरी टीका—इत्थमेवेष्टसाधनमेव। प्रामाण्यनिश्चयाधीनत्वादिति। प्रामण्यसंशय निवृत्तिद्वारा प्रामाण्यनिश्चयाधीनत्वादित्यर्थः। तथाचेष्टसाधनतार्थावधारणंप्रति पूर्वोत्पन्नेष्टसाधनतादिनिश्चये प्रामाण्याभावज्ञानस्य प्रतिवन्धकतया तद्व्यावृत्तये क्वचित् प्रामाण्य निश्चयोऽपेक्षित इति भावः। इति—माथुरी प्रामाण्यवादः।

३ विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥ इति

४ यः स्वाध्यायमधोतेऽब्दं विधिना नियतः शुचिः।
तस्य नित्यं क्षरत्येव पयो दधि घृतं मधु॥ मनुः अ० २।१०७

५ उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥ मनुः अध्याय १।१४०

६—वंशवृत्तविद्याभिजनस्य वृद्धाः राज्ञामुपाध्यायाः—विद्योद्देश

अशुद्धम्
(७) तत्र पूर्वोवक्ष्यमाण
(८) विवाकजः स तु

जयमङ्गला

संस्कृतमेव भूषणाय। संस्कारोऽपि सुवर्णस्यैव न लोहस्येति दर्शयन्नाह क्रिया हीत्यादि। क्रिया विद्योपदेशः। सा द्रव्यं वक्ष्यमाणगुणं विनयति नाद्रव्यमिति। अद्रव्यमपि विनयेद् यत्नेन, द्रव्यन्तु सौकर्येणेत्यस्य विनियोग इत्यर्थः। अथवा सहजविनयो द्रव्यं सहजदोषमद्रव्यम्। सहजगुणदोषो द्रव्याद्रव्यम् तत्र क्रिया द्रव्यं विनयत्येव सौकर्यात्। अद्रव्यं नैव दुर्बुद्धेरकमण्यत्वात् सौकर्याभावात् प्रत्याख्यानभावाच्च[1]। द्रव्याद्रव्यं यत्नेन विनयति तस्याहार्यबुद्धित्वात्। कः पुनर्द्रव्यमित्याह—शुश्रूषेत्यादि। शुश्रुषा श्रवणार्हेषु श्रोतुमिच्छा। तस्यां श्रवणम् आसेवा। तस्मिन् सति श्रुतानामर्थानामवधारणं ग्रहणम्। गृहीतानान्धारणम् अविस्मरणम्। धारितानां विविधसाध्यसाधनस्वरूपज्ञानादिभिविवेकज्ञानं विज्ञानम्। विज्ञातानामर्थप्राप्तस्योपादानम् ऊहः, यथा द्रव्याद्रव्यं यत्नसाध्यमिति। अनिष्टपरित्यागोऽपोहः, यथा अद्रव्यमिति। वस्तुस्वभावनिर्णयस्तत्वाभिनिवेशः, यथा धर्मार्थहेतवो विद्या एव नाविद्याः, विद्याश्च पृथक्पृथगसाधारण प्रयोजनत्वात् चतस्र एवेति। एतेषु सर्वेष्वभिनिविष्टबुद्धिं सततावस्थितबुद्धिं द्रव्यं विनयति। का सा क्रियेत्याह विद्येति। विद्या आन्वीक्षिकीत्याद्या, कर्मविद्या च वक्ष्यमाणोपदिश्यमाना। नेतरमद्रव्यं विनयति।

विद्याग्रहणार्थं वृद्धसम्प्रयोगः। तद्ग्रहणं च विनयनियमाभ्यां विना न भवतीत्याह –विद्यानान्त्विति। यथास्वमिति। यो यस्यां विद्यायां विनयः प्रत्युत्थानपरिचर्यादिः, नियमो व्रतं दण्डमेखलादिधारणादि, स आचार्यप्रामाण्यात् स्यात्। यमाचार्या विद्यावृद्धा आहुः सोऽनुष्ठेय इति। अतस्तयोरत्र अनभिधानं विद्यानामानन्त्यात्। पुर्वाचार्यैस्तु उभयमपि स्वशास्त्रे विहितम्।

जयमङ्गलाक्रोडपत्रम्
विनयद्वय य परिचयः

विनयो द्विविधः इति (ज० पृ० ३९७) ननु सहजकृतकौ विनयौ कुत्र कीदृशेन स्वरूपेण वर्तते इति कथमवगन्तव्यम्? इति चेदेवम्। ये किल स्वभावतः अनधीतावस्थायामपि असतः पारतन्त्र्यं स्वीकर्तुं ह्रियन्ते। तेषु स्वाभाविको विनयः अस्ति। ये च पुनः विद्यामधिगम्य स्थैर्यप्रतिपत्यसंमोहान् अनुभूय यस्यां कस्यामपि स्थितौ आत्मनः स्वातन्त्र्यं स्थैर्येण स्थिरीकुर्वन्तः सन्ति। तेषु कृतको विनयः इत्येव मन्तव्यम्। न च पारतन्त्र्ये को दोषः? इति शङ्क्यम्। परतन्त्रतया तन्मूलकस्य जाड्यस्य परिचयसम्भवात्। यः किल जड़ो भवति भवति कार्याकार्यकुशलश्च

---

१ अशुद्धम्
प्रत्याख्यानाभावाच्च

२ शुश्रूषा श्रोतुम्
इयं पाठशुद्धिः नीतिसारव्याख्यानमाधारीकृत्य कृता ज्ञेया।

जयमङ्गलाक्रोडपत्रम्

सः परतन्त्रो भवत्येत्र पशुवत्। किं वहुना स्वतन्त्रतया विचरन्तोऽपि पशवः यदा लोहपञ्जरे अवरुद्धा भवन्ति तदा तन्महिम्ना सहजगत्या उड्डीयनसंस्कारस्य उद्बुद्धस्यापि विलोपो भवति यतः ते उड्डयनमपि क्षणवर्यन्तं विस्मरन्ति इत्यनुभवसिद्धम्। एवमेव मनुष्येषु यदि जाड्यं प्रसृतं भवेत् तर्हि ते स्वातन्त्र्येण किमपि कार्यं कर्तुमशक्नुवानाः स्वामिना यावन्मात्रं दीयते तावन्मात्रम् गृहीत्वा तत्सुखनिभृतचेतसः भवन्ति। न किमपि स्वातन्त्र्येण स्थातुं गन्तुं वक्तुं वा अर्हन्ति सोयं पारतन्त्र्ये महान्दोषः[1]।

अतः कवयः स्वस्मिन् वर्तमानस्य जाड्यस्य हानाय स्वातन्त्र्यस्य संरक्षणाय सरस्वतीप्रसादं प्रार्थयन्ते या कुन्देन्द्वित्यादिना[2]।

एतल्लाभायैव च अन्तेवासिभिः यस्य प्रसादात् सरस्वती उपास्यते सः गुरुरपि संसेव्यत्वेन परिगृह्यते। संसेवितश्च गुरुः स्ववचनमहिम्ना शिष्यं श्रवणद्वारा बोधयति। तदिदं श्रवणं येन नोपलब्धं सः चिन्तनमननादिकं किमपि कर्तुं न शक्नुयादितिकृत्वा नवविधभक्तिषु आदिमं साधनं श्रवणभक्तिः अस्ति इति सिद्धान्तः भागवते निरूपितः। एवञ्च मननादिभक्तिं प्रति श्रवणभक्तिमतएव अधिकारित्वमस्तीत्यायातम्[3]।

न च सरस्वतिसेवामात्रेण स्वतन्त्रतया जीवनमाकाङ्क्षमाणः किं सर्वं लब्धुम् शक्नुयात्[4] ? इति शङ्क्यम्। ज्ञानरूपायाः तस्याः साक्षिरूपिण्याः परमेश्वरस्वरूपत्वात्, यस्य परमेश्वरः सखा वर्तते। तस्य किं दुर्लभं। अतस्तत्प्रसादः अस्माभिः आकाङ्क्षितव्यः। यस्य एवंविधः संस्कारः ईश्वरप्रसादप्राप्तिं प्रति स्वल्पमात्रयाऽपि जन्मतः उद्बुद्धो वर्तते। तस्यैव साहजिको विनयः। तदिदं प्राक् प्रपञ्चितमस्माभिः। तत एव द्रष्टव्यम्। (३ अध्याये वैं०सिं०सं० पृ० १६६) अत्र तु इदमेव वक्तव्यं। केवलं भगवान् स्वप्रसादसमर्पणाय भक्तस्य एकाग्रतां परीक्षितुं तथाविधां परिस्थितिं निर्माति

---

१ जाड्यं विप्रतिपत्तिः स्यात् सर्वकार्येषु सर्वदा।
प्रियाप्रियश्रुतेः तत्तद्दर्शनैर्व्याधिभिर्भवेत्।
तूष्णीमप्रतिभा चाक्ष्णोरनिमेषोऽनवेक्षणम्॥
अभाषण पारवश्यं एतैर्जाड्यं निरूप्यते॥

२ या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता।
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना॥
या ब्रह्माऽच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता।
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥' इति।

३ श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्। इति।

न्यायरत्नावल्याम्—"श्रवणदेरुक्तज्ञानजननद्वारा श्रवणाद्यनुष्ठानमधीतशास्त्रस्य फलम्, तत्प्राप्तौ सत्यामधीतमुत्तमं मन्ये, तदप्राप्तौ गुणमात्ररूपमपि तन्नोत्तमम् तादृशज्ञानरूपस्य श्रवणस्य कीर्तनहेतुत्वात्तदाह।

जयमङ्गलाक्रोडपत्रम्

यत्रोपासकः एकाग्रतां प्रकाशयेत्। नन्वेवमपि सर्वविधं स्वातन्त्र्यं मनुष्येषु वर्तते इति यदुच्यते तर्हि प्राणिमात्रस्यैव अनुकरणं कर्तुं मनुष्यः कुतो न पारयति इति-चेत्पारयत्येव। यस्य एकाग्रता वर्तते सः गुरुसेवया गुरुमीश्वरमभिमुखीकृत्य आत्मनि सुप्ततया स्थितान् सर्वविधानपि संस्कारानुद्बोध्य यस्य कस्यापि पशुवर्गस्य अनुकृतिं कर्तुं सर्वथा भवत्येव। पशुवर्गस्तु न तथा। इत्येवं शारीरविज्ञानवादिभिः सिद्धान्तितत्वात्। तदुक्तं प्रत्यक्ष शारीरके तत्रैव द्रष्टव्यम्।

साहजिकविनयदर्शनम्

ननु भारतीयराजनीत्या अपेक्षितः साहजिको विनयगुणः उपर्युक्तैकाग्रता-भूमिकासहचरितः ईश्वरप्रसादोपचितः कुत्र दृश्यते ? इति चेत् ये शुद्धसंस्कारसंस्कृत-शरीरपिण्डाः कुलीनाः भवन्ति। तेष्वेव दृश्यते इति प्रागुक्तमत्र। स्मर्तव्यम्(पृ०२०६ तः)

सहज विनयस्यापेक्षणीयता

यदि शुद्धकुलीनाः न स्युः तर्हि साहजिकविनयसिद्धमेकाग्रताभूमिकाविभूषितं जन्म दुर्लभमेव स्यात्। यच्चैत्रंविधं जन्म प्राप्तं तथाविधमेव वारं वारं पुनः प्राप्स्यते एव इत्यपि नावगन्तव्यम्। यत्प्राप्तं तस्य दुर्लभत्वात् अतस्तत् स्वातन्त्र्य-प्राप्तये विनियोजनीयमिति भावः। तदुक्तम्—

'एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्'। (भ० गीता) इति।

अतएवास्य उपर्युक्तगुणसम्पन्नस्य जन्मतः साहजिकी उत्पत्तिः कुलीनेषु शुचिषु भवति[1] तेनैव राज्यस्य दुर्घटकार्यकरणे जनानुरागसम्पादने च निर्वाहात् अतः भारतीयराजनीत्या साहजिकविनयलाभार्थं येषां कुलीनत्वं काम्यते ते महात्मानः किं स्वरूपाः इति टिप्पणी निर्दिष्टपद्येन स्फुटी भवति[2]।

सहजविनयोपेक्षायां दोषः

यदि कश्चित् साहजिकविनयमन्तरा स्वार्थसिद्धये विनयलाभाय परिश्राम्येत् भवतु तत्कामं। तथापि सः दृढस्य अप्रामाण्यज्ञानानास्कन्दितस्याभिनिवेशस्याभावात् सम्पत्तौ च विपत्तौ चोभयत्राऽपि एकरूपतया दार्ढ्येन स्वकर्तव्यांशे अवतिष्ठेत् इत्येवं-आश्वासः तं प्रति नास्ति इति प्रागभिहितमस्ति (पृ० २१०)। अतः साहजिकस्य विनयस्य अभिनिवेशगुणसहितस्य सत्वमावश्यकम्। तदिदमुक्तं श्रृङ्गारप्रकाशे भोजराजकृते[3] द्रष्टव्यम्।

---

१ 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।
योगिनां दरिद्राणामिति।

२ 'विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥' इति

३ सत्वात्मनाममलधर्मविशेषजन्मा
जन्मान्तरानुभववासनयावतीर्णः।—

जयमङ्गलाक्रोडपत्रम्

अद्रव्ये न कृतकविनयः

सूक्ष्मेक्षिकया विचार्यमाणे यस्य साहजिको विनयो नास्ति सः परिश्रम्य महता प्रयासेन कृतकं विनयं प्राप्तुं शक्नोति इति यदुच्यते तदपि चिन्त्यते। स्वभावतः यत्र विनयो नाऽस्ति सः किंस्वभावः इति चिन्तायां अकरुणः परधने परयोषिति वा स्पृहादिगुणसम्पन्न एव स्यात्[१]। इत्येव वक्तव्यम्। अन्यथा तु साहजिकविनय एव आपद्येत।

एवंभूतः अकरुणत्वादिगुणसम्पन्नः शुश्रूषादिबुद्धिगुणेषु अनधिकारी मूलस्थ द्रव्यनिर्देशानुसारेण द्रव्यपदवाच्यो न भवति अपितु अद्रव्यपदव्यपदेश्यः भवति। तस्य व्यावहारिकं स्वरूपं पुनः कया वाण्या प्रदर्शितं भवतीति काव्येन प्रबोधचन्द्रोदयेन वा गम्यते[२]।

अतः सत्वगुणस्य उदयः भारतीयराजनीत्या कुलीनेषु संस्थापितः। तस्यैव-प्रभावः यत् परराष्ट्रस्य आक्रमणसमये महद्भिर्विद्वद्भिः कुलीनैः तत्त्वे अभिनिवेशं रक्षितवद्भिः गीतगोविन्द, गीता, नीतिसारादीनि पुस्तकानि हृदये सङ्गोपनपुरसरं देशान्तरे नीत्वा स्थापितानीति श्रूयते। तथा ऐहिकप्रयोजनालाभेऽपि स्वस्व कर्तव्येषु सहजविनयप्रयुक्तेन कृतकविनयेनाभिमानः विकल्पप्रत्यय एव फलम्। तदाहुः—

'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति।

मूलकृतापि साहजिकं विनयस्य स्वरूपं यत्र दृश्यते तस्यैव पुनः स्थिरीकरणं विद्यया क्रियते इति हेतुना अत्र विनयद्वैविध्यं निर्दिष्टम्। इत्यलमतिविस्तरेण।

तत्र पूर्वः—(ज० पृ० ३९८) इति। कृतक इत्यर्थः। तस्य स्वरूपमाह वक्ष्यमाण इति। तत्त्वञ्च—शुश्रूषेत्यादिबुद्धिलक्षणोक्तं बोध्यम्।

सर्वात्मसम्पदुदयातिशयैकहेतुः।
जागर्ति कोऽपि हृदि मानमयो विकारः।
आत्मस्थितं गुणविशेषमलङ्कृतस्य।
शृङ्गारमाहुरिह जीवितमात्मयोनेः।
तस्यात्मशक्तिरसनीयतया रसत्वम्।
रत्यादिभूमनि पुनर्वितथा रसोक्तिः। इति।

१ तदुक्तम्—
अकरुणत्वमकारणविग्रहः, परधने परयोषिति स्पृहा।
सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम्॥ इति।

तद्यथा—
माता केऽयं पिशाची क इव हि जनको भ्रातरः केत्र कीटाः।
वध्योऽयं बन्धुवर्गो निखिलविटसुहृच्चेष्टिता ज्ञातयोऽमी॥
आगर्भं यावदेषां कुलमिदमखिलं नैव निःशेषयामि।
स्फूर्जन्तः क्रोधवन्हेर्न दधति विरतिं तावदङ्गे स्फुलिङ्गाः॥ इति।

जयमङ्गलाक्रोडपत्रम्

संस्कारोद्बोधनोपायः

ननु कुलीनानां साहजिकविनयस्य उपयोगित्वे स्थितेऽपि अद्य तथाविध संस्कारवन्तः जनाः न दृश्यन्ते। अतः ते पुनरपि कथं सुलभा भविष्यन्ति इति चेत्। इदमेव प्रकरणम् उत्तरत्वेन अनुसन्धेयम्। अत्र हि तथाविधापेक्षितसंस्कारवतां लाभाय अभ्यर्हिता योजना शिक्षाक्रमनिरूपणावसरे निर्दिष्टा मूलकृता। सा प्रचारणीया यथाक्रमं यथास्थानमस्मिन्नेव प्रकरणे अभिधास्यते। तामनुरुध्यैव प्राच्यैः संस्काररंजनकापेक्षात्मकं ज्ञानं यथा भवेत् तथा प्रचार्यते स्म। पुनः तत्साफल्याय अदृष्टमपि विद्याव्रतेन संपादनीयम्। तच्च चैत्रशुक्लप्रतिपदि आरम्भणीयत्वेनोक्तं धर्मशास्त्रे[1] तत्रैव द्रष्टव्यम्।

---

१ तथाहि—जयसिंहकल्पद्रुमे विद्याव्रतप्रकरणे—
"अथास्यामेवारभ्यं विष्णुधर्मोत्तरोक्तं विद्याव्रतम्।
मार्कण्डेय उवाच—

अष्टपत्रन्तु कमलं विन्यसेद्वर्णकैः शुभैः।
ब्रह्माणं कर्णिकायां तु तस्य संपूजयेद्विभुम्॥
ऋग्वेदं पूर्वपत्रे तु यजुर्वेदन्तु दक्षिणे।
पश्चिमे सामवेदन्तु उत्तरेऽथर्वणं तथा॥
आग्नेये च तथाङ्गानि धर्मशास्त्राणि नैर्ऋते।
पुराणञ्चैव वायव्ये ऐशान्ये न्यायविस्तरम्॥
एवं विन्यस्य धर्मज्ञः सोपवासस्तु पूजयेत्।
चैत्रशुक्लमथारभ्य सोपवासो जितेन्द्रियः॥
सदा प्रतिपदं प्राप्य शुक्लपक्षस्य यादव।
संवत्सरं महाभाग शुक्लगन्धानुलेपनैः॥
भूरिणा परमान्नेन धूपदीपैरतन्द्रितः।
संवत्सरान्ते मां दद्याद्व्रते चीर्णे नरोत्तम॥
इदं व्रतं यस्तु करोति राजन् स वेदवित्स्याद्भुवि धर्मनिष्ठः।
कृत्वा तदा द्वादशवत्सराणि विरिञ्चलोकं पुरुषः प्रयाति॥

इति विद्याप्रतिपद्व्रतम्। अस्यामेव गरुडपुराणोक्तं विद्याव्रतान्तरम्।
सनत्कुमार उवाच—

अथ त्वं प्रतिपत्कृत्यं शृणु संपत्करं व्रतम्।
यत्कुर्वाणः श्रियं विन्देद्दुर्लभां मानवैरिह॥
शालितण्डुलसंसिद्धे मण्डले चतुरस्रके।
श्रीशम् श्रियमथो ब्रह्म पूजयेत्सपुरःसरम्॥

जयमङ्गलाक्रोडपत्रम्

बिपाकजस्त्विति (ज० पृ० ३६७) जन्मान्तरीय सत्कर्मभव इत्यर्थः।

संस्कारोपीति (ज० पृ० ३९८) ननु तर्हि तंस्कार एव विद्याजनितः उपादीयताम् कि जात्या ? तत्र आह संस्कारोपीति।

शास्त्रस्योपादेयत

(**क्रियेति** ज० पृ० ३९८) ननु सहजविनीतः यद् अभ्यूहति तत् सत्यं स्यादेव एवञ्च किमिति विद्योपादानेनेति चेन्न। साधवो हि महत्मानः शास्त्राभ्यासम-

---

अप्रछन्नदलैः पद्मैरयुतैस्तं प्रपूजयेत्।
सहस्रैर्वा यथायोगं पयसा पायसेन च॥
ततश्च विधिनाऽभ्यर्च्य पार्श्वे देवीं सरस्वतीम्।
अग्रतः पूजयेदिन्दुं गुरुं पश्चादनन्यधीः॥
परिवार वियोगेन तांस्तु तत्कारयेदथ।
(प्रार्थनामन्त्रः)—'मम विद्यां प्रदिशतु देवो वागीश्वरो हरिः॥
विद्याधिदेवतं देवी विद्या दिशतु मे दश।
सरस्वती प्रदिशतु वागृद्धिमतिशायिनीम्॥
सितांशुरपि सपुष्टिं सर्वभोगप्रपूरणीम्।
पूजा तु प्रणवादिनमोन्तैर्नाममन्त्रैरेव कर्तव्या॥
इत्येवं कारयेत्साध्यं प्रसन्नः पूजितो गुरुः।
विधिना चोपवासं तु कारयेन्नियमान्वितम्॥
समभ्यर्च्य द्वितोयायां देवदेवं श्रियः पतिम्।
भुञ्जीत पायसान्नेन शुचिराचम्य सन्निधौ॥
आचार्याय वरं दत्वा कुर्यात् सुप्रोणनं पुनः।
अनधोतमनारब्धं तदानीमारभेत ह॥
विद्याव्रतपदं नित्यं गुरुं देवतमित्यपि।
तन्मुखाद्धि तदा तस्य निःश्रेयससमागमः॥
सदा तदुक्तकारी स्यान्नस्यात्तच्छासनातिगः।
तिष्ठेत्तिष्ठत्सु गुरुषु नचासीत तदग्रतः॥
न शयीत तदासने कुर्वीत वचनान्यपि।
न लङ्घयीत वचनं गुरोः कृत्ये यतेत च॥
निवेद्य गुरवे सर्वं कुर्यादादौ हिताहितम्।
यशश्च विपुलं लब्ध्वा सदाचारप्रवर्तनम्॥
पुत्रपौत्रश्रिया जुष्टः पुण्याङ्गतिमवाप्नुयात्।
एवं समापयेद्विद्वान् विद्याव्रतमुदारधोः॥

जयमङ्गलाक्रोडपत्त्रम्

न्तराऽपि अभ्यूहन्ति इत्यत्र न विवादः। परं ते तद् अभ्यूहितं तावत्पर्यन्तं साधुत्वेन न मन्यन्ते यावत्पर्यन्तं तद्विषयमधिकृत्य शास्त्रेषु वचनोपलब्धिः न स्यात्। तदुपलब्धि यावत् शास्त्रमदृष्ट्वैव विपाकवशात् अभ्यूहितेऽपि विषये अप्रामाण्यादिशङ्कायाः जागरूकत्वात्। तथा चोक्तम्।

'आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि हि शिक्षितानां आत्मन्यप्रत्ययं चेतः॥ इति। (शा कुन्तलं ना०)

'द्रव्यमिति'। (ज०पृ० ३१८) द्रव्यत्वञ्च शुश्रूषादिगुणवत्वम्। तदाह वक्ष्यमाणेत्यादि।

अत्र द्रव्याद्रव्यभेदः उक्तः तस्य स्वरूपं राजपुत्ररक्षणप्रकरणे कौटिल्येनोक्तमनुमन्तव्यम्। तदुक्तम्—"बुद्धिमान् आहार्यबुद्धिः दुर्बुद्धिश्चेति पुत्रविशेषाः। शिष्यमाणौ धर्मार्थावुपलभते चानुतिष्ठति च बुद्धिमान्। उपलभमानो नानुतिष्ठति आहार्यबुद्धिः। आपायनित्यो धर्मार्थद्वेषी चेति दुर्बुद्धिः" इति। अर्थात् बुद्धिमान् द्रव्यं, आहार्यबुद्धिः द्रव्याद्रव्यं, दुर्बुद्धिः अद्रव्यमिति विवेकः।

'विनयेति' (ज०पृ० ३९८) यस्य पुत्रः शुश्रूषाद्यष्टगुणसम्पन्नः शिष्यमाणः धर्मार्थौ उपलभते अनुतिष्ठति च। तस्य जीवनं सुखकरं सुखकरेषु तथाविधस्य पठितत्वात्। तदुक्तं—

आयुष्यमानृण्यमविप्रवासः पुत्रश्च वश्यः। इति

द्रव्याद्रव्यमिति (ज०पृ० ३९८) द्रव्यस्य स्वतः सिद्धशुश्रूषायाः विनयफलं वक्ष्यति। अद्रव्यं न तु विनयाधानयोग्यम्। द्रव्याद्रव्यं तु रामाद्यनुकार्याणामभिनयेन यथा सामाजिकेषु रसः सञ्चार्यते तथा मतिभावः अनुभावैः विदग्धव्यनहारादिभिः व्यञ्जनजनितबोधमहिम्ना साधारणीकरणव्यापारेण सङ्क्रामयितुं शक्यः। तद्द्वारा द्रव्याद्रव्येषु शुश्रूषादि प्रापयितुं शक्यते इति भावः। शुश्रूषादीनां स्वरूपमाह शुश्रूषेत्यादि।

स्वरूपज्ञानादिभिः (ज० पृ० ३९८) स्वरूपमखण्डोपाधिः। स च परिष्कृतेन साध्यसाधनभावेन यादृशं साध्यतायाः साधनतायावाऽच्छेदकं ज्ञातं भवति तद्बोध्यम्। तेन बुद्धेरष्टगुणेषु अन्तर्गतेन अर्थविज्ञानगुणेन सम्पन्नः लक्ष्यलक्षणगुणज्ञानसम्पन्नो भवतीति। एतदवस्थायां विज्ञानगुणवतःउत्तमत्वमनुमन्तव्यम् तदुद्धृतम्—उपाध्यायनिरपेक्षातः (१६४)

बुद्धेः अष्टसु गुणेषु पञ्च शुश्रूषाश्रवणग्रहणधारणविज्ञानगुणाः विजिगीषोः विशेषतो विजिगीषावस्थायां बोध्याः। यस्य विजिगीषा नाऽस्ति तथाविधेनापि राजपुत्रेण आत्मनि जनानुरागसम्पादनयोग्यत्वार्थं द्रव्यत्वस्य समन्वयार्थञ्च उक्तपञ्च गुणवत्वं साधनीयम्। अथ जनानुरागाय अपेक्षितान् बुद्धेरवशिष्टान् गुणानाह

जयमङ्गलाक्रोडपत्रम्

विज्ञातानामित्यादि। (ज० पृ० ३९८) यः किल ऊहापोहयोः समर्थो भवति स विजिगीषावस्थातः उपरितनीमवस्थामारोहति। अन्यथा तु विद्या उपलब्धाऽपि विवादाय पर्यवस्यति[1]। अतएव यः विवेककुशलः ज्ञानस्य पिपासुः स एव धर्मज्ञानाधिकारीत्युक्तम्[2]।

न च विवेकशक्तिमप्राप्तस्याऽपि अर्थकामासक्तिः दूरे संभवितुमर्हतीति वाच्यम्। अशक्तत्वात्[3]।

वस्तुस्वभाव इति (ज० पृ० ३९८) मिथ्याभिनिवेशस्य परित्यागपूर्वकम् कृतिसाध्यं बलवदनिष्ठाननुबन्धि हितसाधनं यत्कर्तव्यं तत्र सोत्साहा बुद्धिरित्यर्थः। एवंरीत्या यस्य विवेको जागर्ति विजिगीषा च व्यपैति स बुद्धिमानित्युच्यते। तदाहुः—

'एतद्बुद्ध्वा बुद्धिमान् स्यात्' इति। (गीता)[4]

अन्यत्र तु 'धार्तराष्ट्रस्य दुर्बुद्धेः' इति गीतायामुपवर्णितं दुर्बुद्धित्वमेव। एवञ्च बुद्धेः समस्तगुणैः सम्पन्नः यः भवति सः मतिभावेन परिपूर्णः सन् "विधिवशात् प्राप्तेन सन्तुष्यता"मित्यादिस्थितिमनुभवन् वर्तमानवस्तुविषयकस्पृहावान् भूत्वा औचित्यपूर्णव्यवहारेण आत्मनि जनानुरागपात्रतामुत्पादयतीतिभावः। एतत्सर्वममृतसदृशं वस्तु अद्रव्यस्य पुरतः उपदेशार्हं न भवति। तस्य विपरीतवस्तुनि अभिनिवेशात्[3]। अतएव—

---

१ तदुक्तम् हितोपदेशे—

विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतज् ज्ञानाय दानाय च रक्षणाय॥ इति।

२ तद्यथा।

'अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः॥ इति म० स्मृ०

३ तदुक्तं—मानुष्ये सति दुर्लभा पुरुषता पुंस्त्वे पुनर्विप्रता।
विप्रत्वे बहुविद्यताऽतिगुणता विद्यावतोऽर्थज्ञता।
अर्थज्ञस्य विचित्रवाक्यपटुता तत्रापि लोकज्ञता।
लोकज्ञस्य समस्तशास्त्रविदुषो धर्मे मतिर्दुर्लभा। सु० रत्नभण्डागार १०५० श्लोक

४ म० सू०—"धार्तराष्ट्रस्य दुर्योधनस्य दुर्बुद्धेः स्वरक्षणोपायमजानतः प्रियचिकीर्षवो युद्धे न तु दुर्बुद्ध्यपनयनादौ एतद्बुद्ध्वाऽन्योऽपि यः कश्चिद् बुद्धिमानात्मज्ञानवान् स्यात्कृतं सर्वं कृत्यं येन न पुनः कृत्यान्तरं यस्यास्ति स कृतकृत्यश्च स्यात्।" इति।

जयमङ्गलाक्रोडपत्रम्

'इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ।।

इत्युक्तं साधु सङ्गच्छते। अतपस्कादीनां असूयालुपर्यन्तानां अद्रव्यत्वेन अनधिकारित्वात् इति हृदयम् ।

शास्त्रज्ञाने विनयस्य उपयोगः

सततावस्थित बुद्धिम्' इति। (ज० पृ० ३९८) अथ सततावस्थितबुद्धेः द्रव्यस्य विनीतत्वात् क्रियारूपां विद्यां प्रति अधिकारित्वं सम्भवतीति अस्य ग्रन्थस्य तात्पर्यमस्ति । तत्र जिज्ञास्यते । शास्त्रप्रतिपादितवस्तुनः सम्यगवगमार्थं विनयः किमिति अपेक्ष्यते? इति चेत् उच्यते। विनयः नापेक्ष्यते शास्त्रज्ञानाय, इत्येव यदि मनीषा तर्हि विनयाभावे तत्स्थानापन्नः मदो भवतीत्येवायातम्। तत्सत्वे च रजस्तमसोः अन्यतरस्य स्थितिः तस्मिन् अविनीते नियता वर्तते। सत्वस्य विनयात्मककस्याभावात् इत्येव वक्तव्यं भवति। अतः मदस्यापसारणाय विनयः अपेक्ष्यते इत्युक्तं भवति। न च आस्तां मद एव का हानिः? इति वाच्यम् संस्कारनाशकत्वात्। तदुक्तं वैशेषिकभाष्ये द्रष्टव्यम्। (संस्कारप्रकरणे[1])।

मुक्तावलीभाष्यविरोधपरिहारः संस्कारश्च

नन्वत्र ज्ञानमदुःखानां संस्कारविरोधित्वमुच्यते, मुक्तावल्यां तु कालरोगयोः संस्कारनाशकत्वमुक्तम् तद्यथा-"यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट, सकलविषयकस्मरणं तु नाभूत्, तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य, रोगस्य, चरमफलस्य वा सर्वत्र संस्कारनाशकत्वं वाच्यम्"। इति। तदनयोः कथं समन्वयः? इति चेत् श्रुणु। संस्काराः कथमुद्बुद्धा भूत्वा स्मृतिं जनयन्ति इति विवेचनानन्तरं उक्तग्रन्थयोः (वैशेशिक भाष्यमुक्तावल्योः) समन्वयः वक्तुमुचितः स्यात्, अतः संस्काराणामुद्बोधनक्षमत्वं कथं भवतीत्युच्यते। यदा किल तापकानां विषयाणां योगो भवति प्रतियोगिविधया, तदा चित्तस्य द्रुतिर्भवति। ततश्च द्रुते चित्ते प्रविष्टं द्रव्यं लाक्षारससंस्पृष्टद्रव्यसदृशं भवति। एवं स्थिते द्रुतचित्तप्रविष्टं द्रव्यं संस्काररूपतां प्राप्तं चितस्य काठिन्यदशायामपि ततः नापसरति। अयमेव संस्काराणामुद्बोधः स्मृतिहेतुः परं चित्तस्य द्रवीभावः यदि अपेक्षितमात्रापेक्षया न्यूनः स्यात् तर्हि ईषद् द्रुतचित्ते प्रविष्टं वस्तु न संस्काररूपतां भजते

---

१ "संस्कारस्त्रिविधो वेगो भावना स्थितिस्थापकश्च । तत्र वेगो मूर्तत्व वस्तु पञ्चसु द्रव्येषु निमित्तविशेषापेक्षात् कर्मणो जायते नियतदिक् क्रियाप्रबन्धहेतुः स्पर्शवद्द्रव्यसंयोगविशेषविरोधी क्वचित्कारणगुणपूर्वक्रमेणोत्पद्यते । भावना संस्कारस्त्वात्मगुणो दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुर्भवति ज्ञानमदुःखादिविरोधी ।" इति ।

जयमङ्गलाक्रोडपत्रम्

नापि स्मृतौ हेतुत्वञ्च[1]।

एवं च द्रुतचित्तप्रविष्टस्य उद्बोधनक्षमस्य स्थायिसंस्कारस्य उद्बोधः स्थायी इति सिद्धम्। ईषद्द्रव्यभावापन्नायां चित्तस्यावस्थायां तु यः संस्कारः उत्पद्यते सः व्यभिचारो इत्येवंरीत्या संस्काराणां स्थायित्वं व्यभिचारित्वञ्च भवति। अथ उपर्युक्तभाष्यमुक्तावलीग्रन्थयोः समन्वयः उच्यते। तत्र वैशेषिके भाष्ये हि ज्ञान-मदःदुःखैः संस्कारो विनाश्यते इति यदुच्यते तत् स्थायिसंस्कारनाशकत्वेन-कल्प्यते। मुक्तावल्यां तु कालरोगयोः यत्संस्कारनाशकत्वमुक्तम् तत् व्यभिचारि-संस्कारनाशकत्वपरतया योज्यम्।

इत्येवंरीत्या स्फुटीकृते मुक्तावलीवैशेषिकभाष्ययोः समन्वये प्रस्तुतमधि-कृत्य उच्यते। शास्त्रज्ञानार्थं विनयः नापेक्ष्यते इतिचेत् तत्र मदः अस्तीति प्रागुक्तम्। तत्सत्वे च यथार्थविद्यार्थपरिचयहेतुसंस्काराणां विलोपात् कथं विनाशो

---

१ तदुक्तं मधुसूदन सरस्वतीभिः भक्तिरसायने—

चित्तद्रव्यं हि जतुवत् स्वभावात् कठिनात्मकम्।
तापकैर्विषयैर्योगे द्रवत्वम्प्रतिपद्यते ॥४॥
कामक्रोधभयस्नेह हर्षशोकदयादयः।
तापकाश्चित्तजतुनस्तच्छान्तौ कठिनन्तु तत् ॥
द्रुते चित्ते विनिक्षिप्तस्स्वाकारो यस्तु वस्तुना।
संस्कार-वासना-भाव भावना शब्दभागसौ ॥
शिथिलीभावमात्रन्तु मनो गच्छत्यतापकैः।
न तत्र वस्तु विशति वासनात्वेन किञ्चन ॥
द्रवतायाम्प्रविष्टं सद् यत् काठिन्यदशाङ्गतम्।
चेतः पुनर्द्रुतौ सत्यामपि तन्नैव मुञ्चति ॥८॥

नञीषदर्थे। अतापकैरीषत्तापकैः रसौरालोकादिस्थानीयैर्विषयैर्योगेसति मनः किञ्चिद् अवयवविशरणमात्रं प्राप्नोति। अतश्शिथिलीभूते जतुनीव तादृशे मनसि न किञ्चिद् वस्तु वासनात्वेन विशति। किन्तु वासनावैलक्षण्येन तदाभास-त्वेनैव विशतीत्यर्थः चित्तद्रुतौ भवति वासना, शिथिलीभावे तु वासनाभास इत्यत्र विनिगमकमाह—द्रवतायामिति। द्रवावस्थाप्रविष्टहिङ्गुलादिरङ्गस्य जतुनः पुनः काठिन्यापनयनेन काष्ठादिसंयोगे जायमाने यथा स एव रङ्गः प्रतिभासते, शैथिल्या-वस्थाप्रविष्टस्तु रङ्गो न तथा। एवं द्रवावस्थे चेतसि यद्वस्तु स्वरूपं प्रविष्टं सत् काठिन्यदशापर्यन्तं स्थितं तत् पुनर्द्रवीभावान्तरेण विषयान्तरे गृह्यमाणेऽपि प्रकाश-मानत्वाच्चेतसा न त्यज्यते। अतस्सा वासनेत्युच्यते इति।

जयमङ्गलाक्रोडपत्रम्

भवतीति भारविणा उक्तं टिप्पण्यां द्रष्टव्यम्[1]।

तस्मात् शास्त्रज्ञानाय सर्वथा मदः अपसारयितव्यः। विनयश्च अवलम्बनीयो भवति। यद्येवं नाऽस्ति तर्हि कियत्फलं जीवनस्य स्यात्। इति टिप्पणीलिखितपद्येन स्फुटीभवति[2]।

तस्मात् टिप्पण्युद्धृत भारविमधुसूदनसरस्वतिवचन (पृ० ४०७) प्रामाण्यात् शास्त्राध्ययनमात्रेण संस्काराणामुद्बोधा न भवतीति कृत्वा तेषां स्थाय्युद्बोधाय सत्वगुणाभिन्नस्य विनयस्य उपयोगित्वं महदस्ति इत्यवधेयम्।

बुद्धिगुणाभावे विद्यानुत्पत्तिः।

ननु "शुश्रूषाश्रावणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम्"। इत्युक्त्या विद्याप्राप्तिसाधनत्वं बुद्धिगुणेषु अस्तीति प्रतिपाद्यते। तदिदं न सम्यक्। विष्णुशर्मणा कुलीनत्वस्य हितोपदेशे साधनत्वेन निर्णीतत्वात्।

तथा च विद्यांप्रति बुद्धिगुणस्य साधनत्वं न संभवति व्यभिचारात्[3] इति चेन्न। क्रिया हि द्रव्यं विनयति नाद्रव्यं इत्युक्तिमनुरुद्ध्य तत्र विष्णुशर्मणा।

---

१ तदुक्तम्—

'मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः॥
अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः।
सुकरस्तरुवत् सहिष्णुना रिपुरुन्मूलयितुम्महानपि॥
कि० २ सर्ग ४९।५० इति।

२ 'षडङ्गादिवेदा मुखे शास्त्रविद्या कवित्वादि पद्यं सुपद्यं करोति।
गुरोरङ्घ्रिपद्मे मनश्चेन्नलग्नं ततः किम्, ततः किम्, ततः किम्। इति।

३ 'अत्रान्तरे विष्णुशर्मानाम महापण्डितः सकलनीतिशास्त्रतत्वज्ञो बृहस्पतिरिवाब्रवीत्। देव! महाकुलसम्भूता एते राजपुत्राः। तन्मया नीतिं ग्राहयितुं शक्यन्ते। यतः—

नाद्रव्ये निहिता काचित्क्रिया फलवती भवेत्।
न व्यापारशतेनापि शुकवत्पाठ्यते बकः। ४३।
अन्यच्च—अस्मिस्तु निर्गुणं गोत्रे नापत्यमुपजायते।
आकरे पद्मरागाणां जन्म काचमणेः कुतः।

अतोऽहं षण्मासाऽभ्यन्तरे तव पुत्रान्नीतिशास्त्राभिज्ञान् करिष्यामि इत्यादि। इति।

जयमङ्गलाक्रोडपत्रम्

प्रथमतः राजपुत्रेषु अपेक्षितं कुलीनत्वं निरणायि। ततः हितोपदेशः श्रावितः। तावन्मात्रेण ते राजपुत्राः विनयं प्रापिता इति न। अपितु नीतिविषये तेषु कथञ्चिज् जिज्ञासा समुद्भाविता। इत्येवं हितोपदेशश्रवणस्य बुद्ध्यष्टगुणान्तर्गतशुश्रूषा फलं बोध्यम्। विद्यावत्वं तु यथा यथा जिज्ञासा उदेति तथा तथा शास्त्रात् संभवति। इत्येवंरीत्या विद्यां प्रति बुद्धयष्टगुणेषु मूले निरूपितं साधनत्वं अन्वयव्यतिरेकव्यभिचाराभावात् अबाधितम।

विनयसाधनता दण्डविद्ययोः

'विनयनियमाभ्यामिति'। (पृ० ३९८)। ननु मूले विनयमूलो दण्डः इत्युक्त्वा दण्डस्य विनयसाधनत्वं साधितम्। अग्रे तु विद्यानां तु "यथास्वं आचार्यप्रामाण्यादि"-त्यत्र मूल एव विद्यायाः विनयस्य साधनत्वं प्रतिपाद्यते। तदनयोर्ग्रन्थयोः कथं समन्वयः? इतिचेन्न। निमित्तभेदेन अवस्थाभेदेन वा विनयसाधनत्वं क्वचिद् दण्डस्य क्वचिद्-विद्यायाश्च बोध्यम्। तद्यथा—बाल्यावस्थायां गुरुः शासनेन कुमारः विनीतः यथा भवेत् तथा प्रयतते। तदनन्तरं तु विद्याद्वारा प्रकाशदानेन गुरुः शिष्यं राजपुत्रं विनीतं करोति। इत्येवमवस्थाभेदेन प्रस्तुतमूलग्रन्थसमन्वयः बोध्यः। अथ निमित्त-भेदेनोच्यते। प्रजासु भयप्रदर्शनपुरःसरं दण्डः संपादनीयः तदुक्तं "प्रजाहि यमस्थाने दण्डधरं मन्यमानाः भयान्न अपराध्यन्तीति"[1]। युवराजस्तु विद्यया विनेय इति।

गुरुद्वेषेऽपर्यवसानम्

न च शासनद्वारा बालको विनेयः इति यद्युच्यते तर्हि सः तद्दुःखानुभवेन गुरुं द्विष्यन् स्वाधिकारलाभानन्तरं कदाचिद् गुरावेव दण्डं निपातयेत् इति शङ्क्यम्। वास्तविकप्रबोधानन्तरं गुरुं प्रति संभूतस्य द्वेषस्य विलयनप्रसंगात्। अथवा कदाचिद् गुरुं द्विष्यतु सः, परं तच्छिक्षया प्रजासु यथावत् विनयाधानपूर्वकं त्रिवर्गसमृद्धि-प्रचारस्य साधितत्वात् इष्टापतेः। इमामेवेष्टापत्तिमनुसृत्य काचित् किंवदन्ती टिप्पण्यां बोध्या[2]। पर्यन्ते तु स दोषोपि निरस्त एव भवति। इत्येवंरीत्या मूलग्रन्थयोः उक्तयोः समन्वये नकापि हानिरिति बोध्यम्।

---

१ इति यस्मादुभौ लोकौ धारयत्यात्मवान्नृपः।
प्रजानां च ततः सम्यग्दण्डं दण्डीव धारयेत्॥

२ कश्चित् जयपुरस्थराजकुमारः गुरुकुले वसन् महता प्रयासेन विनयं विद्याञ्चोपलब्धवान्। तथापि सः गुरुमद्विष्यत्। तद्द्वेषेण राज्यारोहणानन्तरं तेन राज्ञा गुरुरेव कारागारे निवेशितः। तथापि तं त्यक्त्वा समस्ताः प्रजाः स्वस्य विद्याविनय-महिम्ना प्रजाः सुखवतीः कारयामास। अथ कदाचित् राजनीतिशास्त्रानुसारेण कारां द्रष्टुमागतः सः राजा आदौ गुरुम् अपराधिस्थाने स्थितेषु ददर्श जहर्ष च। तथापि काराप्रविष्टः गुरुः तस्मै विद्याविनयबलात् समस्तप्रजासु विनयाधायकाय राज्ञे आशिष एव प्रायच्छत्। यदि त्वं विद्याविनयसमर्थो न भवेः तर्हि अहमिव—

[आविवाहात् विद्याग्रहणक्रमः]

वृत्तचौलकर्मा[1] लिपिं सङ्ख्यानं चोपयुञ्जीत; वृत्तोपनयन[2]स्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः; वार्तामध्यक्षेभ्यः[3] दण्डनीतिं वक्तृप्रयोक्तृभ्यः[4] ।

श्रीमूला

वृत्तेति । वृत्तचौलकर्मा कृतचौलः त्रिवर्षः पञ्चवर्षो वेत्यर्थः, लिपिम् अक्षरम्, सङ्ख्यानं गणितं च उपयुञ्जीत नियमपूर्वमधीयीत । त्रयीमित्यादिनाप्येतत् सम्बद्ध्यते । वृत्तोपनयनः लब्धगायत्र्युपदेशः, त्रयीम् आन्वीक्षिकीं च, शिष्टेभ्यः सम्यगधिगततद्विद्येभ्यः, उपयुञ्जीत । वार्त्ताम् अध्यक्षेभ्यः सीताध्यक्षादिभ्यः, उपयुञ्जीत । दण्डनीतिं वक्तृप्रयोक्तृभ्यः प्रवचनप्रयोगकुशलेभ्यः, उपयुञ्जीत ।

वैदिकसिद्धान्तसंरक्षिणी

मेधानुसारेण अध्ययनक्रममाह—वृत्तेति । वृत्तं संस्कृतं चौलकर्म वंशानुरूपं यस्य सः[5]। लिपिमक्षराभ्यासं विविधम् उपपुञ्जीतेत्यनेनान्वयः । सङ्ख्यानं गणितं चकारः साहित्यार्थः । उपपुञ्जीत वृत्तोपनयनः अधिकारिभेदेन षष्ठे अष्टमे वर्षे एकादशे द्वादशे वा इति शेषः[6] । वर्णभेदेन विभिन्नवर्षस्योपनयनाङ्गत्वप्रयोजनं क्रोडपत्रे स्फुटीकृतमस्ति तत एवानुसन्धेयम् । त्रयीम् इति । उपयुञ्जीतेत्यनुवर्त्तनीयम् । राजेति शेषः । उपनयनसंस्कृतत्वात् बाल्यकाले ऊहापोहकरणाक्षमत्वाच् च आदौ अध्ययने त्रयीग्रहणम् । तत्क्रमो ग्रहणान्तिकः क्रोडपत्रे द्रष्टव्यः । शिष्टेभ्य इति ।

शिष्टत्वं

शिष्टत्वं च नीतिवाक्यामृते व्याख्यातम् । मङ्गलवादे तस्य परिष्कृतं मथुरानाथैरेवं व्याख्यातम् "शिष्टत्वं च बालकपतितान्त्यजाद्यतिरिक्तत्वे सति वेदप्रामाण्याभ्युप-

---

समस्ता प्रजा तव प्रमादात् अतीवासध्यं दुःखमनुभवेत् । न सा अनुभवति केवलमहमेव इति चावदत् । ततः राजा क्षमां याचितवानिति ।

नी०टि० १. वृत्तचौलकर्मेति । गर्भपञ्चमवर्षे वृत्तं चौलकर्म यस्य ।

,, २. वत्तोपनयन इति । त्रय्युपयोगार्थं गुरोः समीपे नयनम् उपनयनम् तच्च ब्राह्मणस्य गर्भाष्टमवर्षे क्षत्रियस्यैकादशवर्षे ।

,, ३. अध्यक्षेभ्य इति । पण्याध्यक्षादिभ्यः ।

४ वक्तृवप्रयोक्तृभ्य इति । कर्मप्रधानत्पाद् वार्तायाः ।

५ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः ।
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ।। मनुः अध्याय २।३५

६ गर्भाष्टमे प्रकुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ।।
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।।—मनु० अध्याय २।३६-३७—

वैदिकसिद्धान्तसंरक्षिणी

गन्तृत्वम्" ।—माथुरीमङ्गलवादे यद्यप्यत्र शिष्टत्वं सामान्यतयोक्तम् तथापि ये धर्मनिर्णयेऽधिकृताः ते शिष्टा इत्यभिधीयते। तेन धर्माधिकृते भ्यः इत्यर्थो बोध्यः। शेषं शब्दकल्पद्रुमे द्रष्टव्यम्[1]। अर्थात् तत्वाविष्टत्वे शिष्टत्वं पर्यवस्यति। इति भावः। चतसृषु—

विद्यासु अन्तर्गता वार्ता कुत उपलब्धव्येत्याह वार्ता इति। उपयुञ्जीतेत्यनुवर्तनीयम्। राजेति शेषः। अध्यक्षेभ्य इति। अध्यक्षप्रचारे ये अध्यक्षाः प्रतिष्ठिता अनुभविनः मन्त्रिसम्पदुपेतास्तेभ्य इत्यर्थः[2]। एतेन पूर्वाचार्यप्रणोतस्य विस्तृतवार्ताशास्त्रस्य विलोपेपि न क्षतिः। अध्यक्षप्रचारस्य वार्ताशास्त्रस्य प्रयोक्तृभ्यः इति यावत्।[2] अथ कुतोध्येतेव्या दण्डनीति रित्याह (पृ० ४१०) दण्डनीतिमिति ।विवेचितव्युत्पत्ति-शक्तिमद्भ्यः इत्यर्थः। अत्रापि उपयुञ्जीत इत्यनुवर्तते इति शेषः। यद्यपि त्रय्यादी-नामध्यापका अपि वक्तारः प्रयोक्तारश्च सम्भवितुमर्हन्ति तथापि तत्तदध्यापकानां 'शिष्टः' "अध्यक्षः" च इति विशेषसंज्ञयानिरूपणं पृथक्संज्ञाप्रदर्शनार्थम्।

जयमङ्गला

यस्तु दण्डस्य मूलं विनयः स विद्याप्रभावतः। अत एवेदानीं बाल्यावस्थातः प्रभृति राज्ञो वृद्धसंयोगन्दर्शयति वृत्तचौलकर्मेति। चूडाया इदं कर्म चौलम् कर्म-तद् वृत्तमस्येति। स तृतीयाद्वर्षाद् यथाशक्ति प्राक्। लिपिमक्षरचिन्हानि सर्वो-पायहेतुत्वात्। ततः सङ्ख्यानं गणितं सर्वव्यवहाराङ्गम्। उपयुञ्जीत शिक्षेत। तस्मिन् काले अन्यशास्त्रस्य अनधिकारात्। वृत्तोपनयन इति। विद्याः स्वसमीपनयन-मुपनयनम् (?) तच्च क्षत्रियस्य राज्ञ एकादशे वर्षे, तद् वृत्तम् कृतमस्येति। स प्राक् त्रयोम्। अन्यथा व्रतकालातिपातः स्यात् ततो यथेष्टम्। आन्वोक्षिकीम् शिष्टेभ्य इति। विद्याभिजनदेशवृत्तशीलसम्पन्नेभ्य ईक्षणप्रयोगकुशलेभ्यश्च[3]। अन्यथा शास्त्राविददृष्टकर्मा कर्मोपदेशे व्यामुह्येत। उपयुञ्जीतेति सर्वत्र योज्यम्।

जयमङ्गलाक्रोडपत्रम्

'यथाशक्तीति' यथाशक्ति इति प्रथमे तृतीये चतुर्थे पञ्चमाब्दे वा शिशोः उच्चारणशक्ति सुस्पष्टां दृष्ट्वा चौलकर्म कारयेत् इति शक्तिपदग्रहणेन

१ मनुः सप्तर्षयश्चैव लोकसन्तानकारणात्।
तिष्ठन्तीह च धर्मार्थितान् शिष्टान् परिचक्षते॥
तैः शिष्टैः पालितो धर्मः स्थाप्यते वै युगे युगे। मात्स्ये, अध्याय १२०।

२ तम् अध्यक्षप्रचारात् वार्तासमयविद्भ्यो वणिग्भ्यश्च इति। कामसूत्र अ० १ अ० २—
अध्यक्षाः प्रचरन्त्यनेनेति अध्यक्षप्रचारः वार्ताशास्त्रम् इति —कामसूत्र अ०१ अ २
अशुद्धम्

३ विद्याभिजनदेशवृत्तशीलसंपन्ने (न्नेभ्यः शि) क्षणं।

इयं पाठशुद्धिः टिप्पण्याधारेण निर्धारिता। (पृ० ४१०) टिप्पण्यां वार्तायाः कर्म-प्राधान्यमिव आन्वीक्षिकीविद्यायामपि विद्याप्राधान्येन सह कर्मप्राधान्यं व्यक्तं भवति।

द्योतयति। ननु टीकायां तृतीयादेव वर्षात् चौलकर्मेत्युक्तम्। अत्र तु प्रथमे चतुर्थे तत्कर्म इत्युच्यते। इति चेद् धर्मशास्त्रप्रामाण्यात् तत्कथ्यते। तदुक्तं वीरमित्रोदय-संस्कारप्रकाशे[1] नीतिनिर्णीतौ[2] च। तत एवानुसन्धेयम्।

---

२ वीरमित्रोदये:—मनुः—
चूडाकर्म द्विजातानां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्। इति।
वाशब्दात् द्वितीयग्रहणम्। तथा च
यमः—ततः संवत्सरेऽपूर्णे चूडाकर्म विधीयते।
द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोदनात्। इति।
अत्र अपूर्णे इति पदच्छेदः। स च द्वितीयादिष्वप्यनुषज्यते।
ततश्च प्रथमादिवर्षाणामेवाधिकरणत्वं सिद्ध्यति। तदाह
षड्गुरुशिष्यः—आद्येऽब्दे कुर्वते केचित्पञ्चमेऽन्ये द्वितीयके।
जाताधिकाराज्जन्मादि तृतीयेऽब्दे तु चौलकम्॥
उपनीत्या सहैवेति विकल्पाः कुलधर्मतः॥ इति।
यत्तु कल्पतरुणा प्रथमेऽऽब्दे तृतीये वेति मनुवाक्ये प्रथमेऽब्दे वर्तमाने इति व्याख्याय ततः संवत्सरे पूर्णे चूडाकर्म विधीयते।

इति यमवाक्ये नञ्प्रश्लेषमकृत्वा संवत्सरे पूर्णे इति व्याख्यातं, तत्पूर्वापरविरोधाच्चिन्त्यम्। संभवत्यविरोधे विरुद्धव्याख्यानानौचित्यात्। यदपि द्वितीये सम्पूर्णे तृतीयेत्वसम्पूर्णे, तृतीये भूयिष्ठे गते इति लौगाक्षिस्मरणादिति व्याख्यातं, तदपि तथैव विलम्बोपस्थितिकवाक्यान्तरैकवाक्यतापेक्षया समानवाक्यस्थितपदानुषङ्गस्य शीघ्रोपस्थितिकत्वेनाभ्यर्हितत्वादित्यलं वृद्धविरोधेन। वाशब्दद्वयोपादानं पञ्चम-सप्तमवर्षयोरपि ग्रहणाय।

तथाचाश्वलायनः,
तृतीये पञ्चमे वाऽब्दे चौलकर्म प्रशस्यते।
प्राग्वाऽसमे सप्तमे वा सहोपनयनेन वा॥ इति॥
अत्रासमे इति पदच्छेदः। युग्मे वर्षे तु गर्हितमिति वक्ष्यमाणात्रिवचनात्।
वशिष्ठोऽपि,
तृतीयेऽब्दे पञ्चमेऽब्दे स्वकुलाचारतोऽपि वा।
चौलं शिशूनां यत्नेन स्वगृह्योक्तविधानतः॥
आधानतो जन्मतो वा सप्तमाब्देऽपि कारयेत्। इति।

तृतीयादिवर्षसङ्ख्या च गर्भतो जन्मतो वा द्रष्टव्या। तथा च
बृहस्पतिः—तृतीयेऽपि शिशोर्गर्भाज्जन्मतो वा विशेषतः।
पञ्चमे सप्तमे वाऽपि स्त्रियाः पुंसोऽथवा समम्॥ इति।—

जयमङ्गलाक्रोडपत्रम्

'सर्वोपायेति' (पृ० ४११) सर्वोपायः न्यायालयीयव्यवहारः तस्य लिपिमूलकत्वात्। तदुक्तं व्यवहारप्रकाशे प्रतिज्ञालेखे[1]—

लिप्यध्ययनम्

लिप्यध्ययनं यथाविधि कर्तव्यम्। कुत? इति चेत् सर्वविद्यालाभार्थम्। नद्यः समुद्रं प्रविशन्ति यथा, तथा यथाविधि लिप्यध्येतारं सर्वा अपि विद्याः प्रविशेयुरिति भावः[2]।

'संख्यानमिति' (ज०पृ० ४१७) लिपिगणितज्ञानानन्तरं काव्यं छन्दोभाषाज्ञानार्थं अध्यापयितव्यम्।

'छन्दोभाषाज्ञानस्योपयोगः'।

ननु छन्दोभाषाज्ञानस्य क उपयोगः? इति चेत् काव्ययव्यापारजनितरसास्वादलाभार्थम्। अर्थात् छन्दसां भावानाञ्च संस्कारः बालकस्य हृदये यदि आरंभत एव आहितो भवेत् तर्हि काव्यस्यास्वादः तस्य नासुलभो भविष्यति। कथं तदिति तु गोकुलनाथोपाध्यायैः प्रथमाध्याये रसप्रक्रियायां विचारितमस्ति[3] तत एव चिन्त्यम्।

एषां चाब्दानामुत्तमादिव्यवस्थामाह नारदः—

जन्मतस्तु तृतीये च श्रेष्ठमिच्छान्ति पण्डिताः।
पञ्चमे सप्तमे वर्षे जन्मतो मध्यमं भवेत्॥
अधमं गर्भतः स्यात्तु दशमैकादशेऽपिवा। इति।

नि० नि० 'गर्भतः पंचमवर्षे वृत्तं चौलकर्म' इति।

१ सङ्ग्रहकारः,
राजस्वहस्तचिह्नेन राजादेशेन संयुतम्।
युक्तं राजाभिधानेन मण्डितं राजमुद्रया॥
सुलिप्यनपशब्दोक्तिसम्पूर्णावयवाक्षरम्।
शासनं राजदत्तं स्यात् सन्धिविग्रहलेखकैः।

२ तदुक्तं कालिदासेन रघुवंशे—
सवृत्तचूलश्चलकाकपक्षकैः अमात्यपुत्रैः सवयोभिरन्वितः।
लिपेर्यथावद् ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत्॥ इति। (२ सर्ग)

३ तथाहि—
"शक्तिः कवित्वबीजरूपः संस्कारविशेषः। यां विना काव्यं न प्रसरेत्, प्रसृतं वोपहसनीयं न स्यात्, लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गादिग्रहणादितिहासादीनाञ्च विमर्शनात् व्युत्पत्तिः। 'शास्त्राणि गणयति-छन्द इत्यादि। छन्दः पिङ्गलाष्टाध्याय्यादि, व्याकरण-

जयमङ्गलाक्रोडपत्रम्

अध्ययनस्य वैधत्वम्

नन्वेवं ईदृशाध्ययनक्रमे यथाविधित्वं कथमवगन्तव्यमिति चेत् ? शिष्टादृतपद्धत्या तदवगन्तुं शक्यते[1] । तच्च व्यक्तं टिप्पण्याम् ।

'अनधिकारादिति' । (पृ० ४११) अन्यशास्त्रस्याध्ययने अनधिकारः लिपिसङ्ख्यानाध्ययनसमये उक्तः सः बालकस्य उच्चारणासामर्थ्याद्बोध्यः । सत्यधिकारसामर्थ्ये तु उपनयनात्प्रागपि पञ्चमाब्दादौ वेदं विहाय बालकस्य शास्त्रमात्राध्ययने न काऽपि हानिरिति बोध्यम् । वक्ष्यतेचैतत् विद्वद्परिषदः प्रस्तावे । (४१५)

'स्वसमीपेति' । (पृ० ४११) गुरोः इति शेषः । तदुक्तम् नीतिनिर्णीतौ—

"अय्युपयोगार्थं गुरोः समीपे नयनं उपनयनं तच्च ब्राह्मणस्य गर्भाष्टमवर्षे क्षवियस्यैकादशवर्षे" । इति ।

गुरुसमीपे नयनाभिप्रायः

ननु गुरोः समीपे नयनं केनाभिप्रायेणोक्तम् ? इति चेत् । गुरुद्वारा मन्त्रग्रहणे तत्सिद्धिर्भवति अन्यथा न इत्यभिप्रायेण । तदग्रे स्फुटीकरिष्यते (६ अध्याये) इदञ्चोपनयनं ब्राह्मणानामष्टमे वर्षे सामान्यतयाऽभिहितमस्ति । कामनासत्वे तु पञ्चमाब्दादावपि तस्योपनयनं भवितुमर्हति[2] ।

क्षत्रियस्य तु उपनयनं एकादशवर्षे टीकाकारेण वक्ष्यते । अत्र उपनयनकर्मणि वर्षभेदः वर्णभेदेनोक्तः । तस्य कारणमग्रे वक्ष्यते । प्रकृते तु उपनयनात् प्राग् अध्ययनस्य क्रमे मूललेखेन अवगतेऽपि षोडषे वयसि गार्हस्थ्यप्रवेशस्य विहितत्वात् तदधिकारात् प्राक् कुमारस्य अध्ययनक्रमः कथं भवितव्यः इति स्पष्टं नाऽस्ति

पाणिनीयादि, अभिधानं लिङ्गानुशासनम् वाररुचादि, कोषो विश्वादिः । कलादीनां लक्षणेऽन्वयः । लक्षणं स्वरूपेतरभेदादिबोधकं वाक्यम् । तच्चाभेदेन ग्रन्थेऽन्वेति । इत्यादि १३ पृ० ।

१ "जातमात्रस्य त्रैवर्णिकस्य क्रीडाधिकारे निवृत्ते अक्षराभ्यासः, ततश्छन्दोभाषाज्ञानार्थं काव्याध्ययने प्रवर्तकानि "अदोषं गुणवत्काव्यं" इत्यादीनि अग्निपुराणवचनानि ।" इत्यादिना ग्रन्थेन । तस्याऽयं सङ्क्षेपः । काव्याध्ययनार्थञ्च तदङ्गतया धातुरूपावली, शब्दरूपावली, समासचक्रं, शीलनिरूपणं, मूलरामायणमित्यादि अध्येतव्यं भवति । अष्टाध्यायी च अक्षरस्य स्पष्टमुच्चारणार्थं मूलमात्रं अध्येतव्या । ततः उपनयनमष्टमाब्दे भविष्यति । इति ।

२ तदुक्तं मनुस्मृतौ—

'ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।
गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । इति । मनु० ।

जयमङ्गलाक्रोडपत्रम्

अतस्सर्वेषां सुखावबोधाय शिक्षाक्रमः सर्वोऽपि अत्र विमृष्टो ज्ञेयः। टिप्पण्याम्[1]।

---

१ तद्यथा—

'विद्वत्परिषत्प्रस्तावः'

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं।
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्।
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।
विद्याविनीतो राजा हि प्रजानां विनये रतः।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः।

इति वचनमनुसृत्य विद्याध्ययनक्रमे व्यवस्थाप्यमाने तत्र कर्तव्यनिर्देशः फलपर्यवसायी अस्मिन् लेखे चिकीर्षितः—

मातेव रक्षति पितेव हिते नियुङ्क्ते।
कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं।
किं किं न साधयति कल्पलतेव विद्या।

इति सूक्तयः सर्वविद्यफलसाधनतां विद्यानां वदन्ति। अतः
पुराणन्यायमीमांसा धर्मशास्त्राङ्ग मिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥
आयुर्वेदो धनुर्वेदो गान्धर्वं चार्थशास्त्रकम्।

इति परिगणितेषु अष्टादशविद्यास्थानेषु प्रवेशः सर्वविधफलावाप्तये आवश्यक इति सिध्यति।

''एकदेशविद्यस्तु क्रीड़नको विश्वास्यश्च विदूषको वैहासिकोवा'' इति वात्स्यायनवचनेन एकदेशद्यानां उपहास्यत्वं यतो अवधार्यते अतोऽपि अष्टादशविद्यास्थानेषु सम्यक् परिचयः अनुपहास्यतायै अपेक्षित इत्येव सिद्धयति। न केवलमेतावदेव अपितु—

'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।

इति काव्यप्रकाशोक्तरीत्या लोकरञ्जनात्मकराजकार्याधिकृतानां पूर्वोक्तेषु शास्त्रेष्विव समस्तलोकवृत्तेषु वेदितृत्वं निखिलकाव्यपरिचयश्चापेक्षित इत्यप्यवसीयते। इदं अतिदुर्घटं कार्यं यया युक्त्या हस्तगतं भवति सा तु गुरुभक्तिरेव विद्यावृद्धसंयोगापरपर्याया अर्थशास्त्रेषूक्ता।

'अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च।
यत्कृपापालेशमात्रेण नमोस्तु गुरवे सदा॥—

इति वचनेन तथा अवगमात् ।

विवेकः श्रुतिसंपत्तिः गुरुभक्तिस्तपस्विता ।
एते विषयभावेन करणत्वेन च स्थिताः ।
इष्टाधिकानामिष्टानां लाभस्तु विषयत्वतः ।
व्रीड़ा करणभावेन, विभावा यत्र सम्मताः ।

इति सङ्गीतरत्नाकरोक्तवाक्यपर्यालोचने,

प्रियाप्रियाविकरित्वं तदात्वोचितकारिता ।
अप्राप्तातीतनष्टानामलाभेऽनभिशोचनम् ।

इत्युपवर्णितस्य फलत्रयस्य विवेकादिसहकृत गुरुभक्त्यधीनत्वावगमादपि पूर्वोक्त एवार्थ उपष्टभ्यते । एवं स्थिते गुरुभक्तिपूर्वकं सकलविद्याधिगमने अवश्यं कर्तव्ये सर्वविद्याध्ययनस्य युगपदनुष्ठातुं अशक्यत्वात्तदध्ययनक्रमो निर्णीतः सेतुबन्धे । तद्यथा—

'ततश्च जगदाप्तपरमशिवप्रणीतत्वाविशेषेण सर्वासां विद्यानामधिकारिभेदेन प्रामाण्यमेवेति स्पष्टं सूतसंहितादौ । अधिकारश्च यथा नास्तिकानामेवार्हतादिदर्शनेषु, त्रैवर्णिकादेरेव वैदिकमार्गेषु इति पुरुषभेदेनैव व्यस्थितस्तथैकस्यापि पुरुषस्य चित्तशुद्धितारतम्यादपि केश्चिद् व्यवस्थितः । वर्णभेदेनेव आश्रमभेदेनापि धर्मव्यवस्थादर्शनात् । एवञ्च यानि तत्तद्विद्याप्रशंसकानि वचनानि तानि तत्तदधिकारिणं प्रत्येव प्रवर्तकानि । यानि च तन्निन्दकानि तानि तत्तदनधिकारिणं प्रति निवर्तकानि । न पुनर्नहि निन्दान्यायेन विधेयस्तावकानि, अतिबाल्यदशायां, बालक्रीड़नके प्रवर्तयतामेव पित्रादीनां तस्यैवाध्ययनाधिकारे तादृशक्रीड़ायां ताड़नकर्तृत्वदर्शनात् ।

तदयं मथितोऽर्थः जातमात्रस्य त्रैवर्णिकस्य क्रीडाधिकारे निवृत्ते अक्षराभ्यासः, ततछन्दोभाषाज्ञानार्थं काव्याध्ययने प्रवर्तकान्य "दोषं गुणवत्काव्यं" इत्यादीन्यग्निपुराणवचनानि । व्युत्पन्नस्य 'काव्यालापांश्च वर्जयेदिति निषेधः । काव्याध्ययनजन्यप्रयोजनस्य जातत्वेनोत्तरभूमिकायामेवावतारात्तां विहाय पूर्वभूमिकायामेवायुःक्षपयतोऽनिष्टं भवतीति तदर्थः । ततो देहाद्यतिरिक्तत्वेनात्मनो ज्ञानार्थं न्यायशास्त्राध्ययने विधिः 'शुङ्गेनात्मानमन्विच्छे' दित्यादिः । शुङ्गं हेतुः अवयवसमुदायात्मकन्याय इति यावत् । देहादिभिन्नत्वेनामुष्मिकयातायातक्षमतया आत्मनि ज्ञाते तु तादृशफलककर्मस्वधिकारात् । "आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकामि"त्यादयो निषेधाः पूर्वभूमिकां निषेधन्ति । 'धर्ममेवाचरेत्प्राज्ञ' इत्यादि विधय उत्तरभूमिकायां प्रवर्तयन्ति । यदुपयोगित्वेन पूर्वमीमांसाया वेदे कर्मकाण्डस्य चाध्ययनं तेन धर्मार्थकामेषु साधितेषु चतुर्थपुरुषार्थलिप्सया पूर्वभूमिकात्यागाय 'नास्त्यकृतः कृतेनेति कर्मनिन्दा" । इति ।

देशकालपरिच्छिन्नञ्च क्रमविधानं कौटिलीये अर्थशास्त्रेऽपि द्रष्टव्यम् । तद्यथा "तस्माद्दण्डमूलास्तिस्रो विद्याः" । विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः ।—

कृतकः स्वाभाविकश्च विनयः। क्रिया हि द्रव्यं विनयति नाद्रव्यम्। शुश्रूषाश्रवण-ग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम्। विद्यानां तु यथास्वमाचार्य प्रामाण्याद्विनयो नियमश्च। वृत्तचौलकर्मा लिपिं सङ्ख्यानं चोपयुञ्जीत वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः, वार्तामध्यक्षेभ्यो, दण्डनीतिं वक्तृप्रयोक्तृभ्यः'' इति। (कौ. अ. अ. १) अत्र ''वृत्तचौलकर्मा लिपिं सङ्ख्यानं चोपयुञ्जीत, वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः'' इति वचनेन बालकानामवस्थाविशेषो विद्याविशेषाध्ययनार्थं निर्धार्यते।

तथा—'चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्। (मनु०)

इति मनूक्त्या तृतीयवर्षस्यावस्थाविशेषपरिच्छेदकत्वावगमात्,
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे।
गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्॥ (मनु०)

इत्यादि वचनेन पञ्चमाब्दादारभ्य एकादशद्वादशवर्षपर्यन्ताया अवस्थाया उपनयनोत्तरं विद्याधिकारितायाः प्रयोजकत्वावगमात्,
''त्रैविद्येभ्यस्त्रयीं विद्यां वार्तारम्भांश्च लोकतः। (मनुः)

इत्यादि मनुवचनैरर्थशास्त्रोक्तवचनैश्च तादृशविद्याध्ययनकालव्यवस्थापनात्, तदनुकूलबुद्धिशक्तेस्तादृश्यामेवावस्थायां लाभावगतेश्च ''ब्रह्मचर्यन्त्वाविद्याग्रहणात्'' ''ब्रह्मचर्यं चा षोडशाद्'' इति वचनाभ्यां तदुत्तरं षोडषवर्षपर्यन्तकालएव भारतीयराजनीतिदृष्ट्या आचार्यकुलवाससापेक्ष इति प्रतीयते। एवंस्थिते जन्मप्रभृति त्रिवर्षात्मिक्येका प्रथमावस्था, तदुत्तरं पञ्चमषष्ठान्ता द्वितीया, ततश्चैकादशद्वादशवर्षपर्यन्ता तृतीया, तदुतरं षोडषवर्षपर्यन्तकाला च चतुर्थी। एताः अवस्थाः अभिभावकाधीनाः शास्त्रेषु दृश्यन्ते। स्तनन्धयशिशुकुमारपौगण्डपदै' र्व्यवह्रियमाणास्वावस्थास्वधिकारभेदानुसारेण शैशवावस्थाप्रभृत्येव विद्यावृद्धसंयोगः कर्तव्यो दृश्यते। अतएव—

''शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥ (रघुवंश)

इति कालिदासो जगाद। षोडशवर्षस्थाने अष्टादशवर्षकाले व्यतीते प्राप्तव्यवहारयोग्यता भवतीत्याधुनिकसमयः। भारतीयाधुनिकपद्धत्योः तुलनायां क्रियमाणायां भारतीयपद्धतिः शुश्रूषाश्रवणग्रहणधारणाद्यष्टबुद्धिगुणेषु ग्रहणपर्यन्तामवस्थां षोडषवर्षाभ्यन्तर एव साधयति। इति स्पष्टो विशेषोऽत्रावधारणीयः। श्रुतानामर्थानामवधारणं ग्रहणन्तु जयमङ्गलायां उक्तम् तच्च इदमित्थमेवेत्यवधारणं निष्कंपप्रवृत्त्यङ्गमिति प्रामाण्यवादे निरूप्यते। (पृ० टि० ३९७) ईदृशं हि ग्रहणं अष्टादशवर्षपर्यन्तं

अपि आधुनिकपद्धत्या न सम्भववितुमर्हति । कारणं तत्र यूरोपदेशव्यापकः तर्कशास्त्राध्ययनाभाव एव ।

एवं--"प्रदीपः सर्वविद्यानां उपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकीमता ।

धर्माधर्मौ त्रय्याम्, अर्थानर्थौ वार्तायाम्, नयानयौ दण्डनीत्याम्, बलाबले चैतासां हेतुभिरन्वीक्षमाणाऽऽन्वीक्षिकी लोकस्योपकरोति । व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्यक्रियावैशारद्यञ्च करोति" (कौ० अ० ४) इति अर्थशास्त्रवचनानुसारेण आन्वीक्षिक्याः सर्वविद्याप्रकाशकत्वात् सर्वकर्मोपायत्वात् सर्वधर्माश्रयत्वाच्च व्यसनेऽभ्युदये च निर्विकारिताया प्रयोजकत्वमपि आन्वीक्षिक्यामेव वर्तते । तदुक्तम्—

आन्वीक्षिक्यात्मविद्यास्यादीक्षणात्सुखदुःखयोः ।
ईक्षमाणस्तया तत्त्वं हर्षशोकौ व्युदस्यति ॥

तथा—'व्यसने अभ्युदये च बुद्धिमवस्थापयति' । इति ।

अतस्तस्या अत्यन्तमभ्यर्हितत्वात् आन्वीक्षिकीव्यतिरेके उक्तत्रिविधफल व्यतिरेकस्यार्थतः सिद्धत्वात्,

"विनयोपग्रहान् भूत्यै कुर्वीत नृपतिः सुतान् ।
अविनीतकुमारं हि कुलमाशु विनश्यति ॥
दुष्टं गजमिवोद्वृत्तं कुर्वीत सुखबन्धनम् ।
विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेत् ॥
राजपुत्रः सुदुर्वृत्तः परित्यागं हि नार्हति ।
क्लिश्यमानः स पितरं परमाश्रित्य हन्ति हि ॥

इति वचनैः उक्तविधविनयस्य षोडशवर्षावधित्वे सिद्धे तदुत्तरशिक्षाया उक्तफलासमर्थत्वात् सविनयावज्ञाकारिणामेव शिक्षितानामुत्पत्तेः तत्र प्रकृतिसिद्धत्वात्,

'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।

इत्युक्तदिशा स्वभावगतं संस्कारोपयुक्तं मार्दवं षोडषवर्षपर्यन्तमेव तिष्ठतीति निकृष्टोऽर्थः । इति प्रथमः परिच्छेदः

२—एवं स्थिते बाल्यकौमार पौगण्डावस्था—भेदत्रये तत्र तत्रोत्पद्यमानानां स्वाभाविकीनां प्रवृत्तीनामनुरोधेन क्रियमाणा शिक्षणव्यवस्था चिन्त्यते ।

'बालस्तावत्क्रीड़ासक्तस्तरुणस्तावत् तरुणीरक्तः'' इत्युक्तदिशा षोडषवर्षात् प्रागेव जायमानानां प्रवृत्तीनां शिक्षणोपयुक्तत्वात्, "यन्नवे" इत्युक्त वचनानुसारेण षोडषवर्षात् प्राक्तनानां संस्काराणां योग्यताया बाल्यावस्थायां विद्यमानेन मार्दवत्वविशेषेण घटमानताया अवगमात् । "सहपांसुक्रीड़ितं, उपकारसंबद्धं, समानशीलव्यसनम्, सहाध्यायिनम्, यश्चास्य मर्माणि रहस्याणि विद्यात्, यस्य चायं विद्याद्वा, धात्र्यपत्यं

सहसमृद्धं मित्रम्" इति सूत्रव्याख्यायां जयमङ्गलायां "मिद्यति, स्निह्यतीति मित्र"मिति मित्रशब्दव्याख्यादर्शनाद् बालान्तरप्रेमसंसर्गिजनप्रेम्णोः चौलोत्तरभाव्यवस्थायामेव परिदृश्यमानत्वात्,

तथा—'उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥ (रघुवंश)

इति वदता कालिदासेन स्तनन्धयावस्थायां धात्र्यधीनत्वबोधनात्, धात्रीकृतशिक्षावस्थाया एव विशेषतः अवबोधनात्, स्तनन्धयविशेषस्य प्रकृते अविचार्यत्वात्,

अपि च—स वृत्तचौलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।
लिपेर्यथावद् ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥

इत्यादिना समानवयस्कबालान्तरप्रेमसमानाधिकरणस्य लिपेर्यथावद्ग्रहणस्य अवगमात्, बालावस्थायां सवयस्कधात्र्यादिसंसृष्टजनप्रेमावगतेः, "प्रियजनचेष्टानुकृतिर्लीला" इति परिभाषानुसारेण—

'यद्यदा चरति श्रेष्ठः तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

इत्युक्तन्यायेन तस्यामवस्थायां विद्याविशेषग्रहणे संसर्गो व्यवस्थाप्यते । अस्यामवस्थायां अधर्म्यानर्थ्यजनसंसर्गनिवारणं मातापित्रोरभिभावकानाञ्च प्रधानं कार्यम्, तत्र असावधानतायां महान् विनाशः ।

"अलौकिकत्वादप्रवृत्तानां यागादीनां प्रवर्तनं लौकिकेभ्यश्च मांसभक्षणादिभ्यः शास्त्रादेव निवर्तनं धर्मः । तं श्रुतेर्धर्मज्ञजनसमवायाच्च प्रतिपद्येत । विद्याभूमिहिरण्यपशुभाण्डोपस्करमित्रादीनामर्जनं अर्जितस्य विवर्धनमर्थः । तमध्यक्षप्रचाराद्वार्तासमयविद्भ्यो वणिग्भ्यश्च प्रतिपद्येत" इति सूत्रैरनुपनीततया विद्यानधिकृतानां बालकानां धर्मज्ञजनसमवायात् वार्तासमयविद्वणिग्जनसमवायाच्च धर्मार्थावगतेः विहितत्वाद् "बाल्ये विद्याग्रहणादीनर्थान्' इति सूत्रेण विद्याग्रहणस्यैव प्राधान्येन चिन्त्यमानत्वाच्, च अनुकरणाधीनतादृशविद्याग्रहणं अनुपनीतावस्थायाम् एव शास्त्रेण नियमितम् ।

अस्यामवस्थायां काव्याध्ययनस्य निर्दिष्टत्वात् लिपिसङ्ख्यानग्रहणे वृत्ते छन्दोभाषाज्ञानाय भाषाकाव्याध्ययनं, तदुत्तरं यथासंभवं संस्कृतभाषाकाव्याध्ययनमपि युक्तम् । सर्वमेतत् क्रीडनकालेख्यमृन्मयचित्राभिनयकथाद्वारा क्रियमाणं रुचिकरं भवेत्, "बालस्तावत् क्रीडासक्तः" इति वचनात् ।

उपनयनोत्तरावस्थायां "वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः" इत्यादि सूत्रानुसारेण चतसृणां विद्यानामध्ययनं यद्यपि विहितं, तथापि विद्याग्रहणस्य आन्वीक्षिक्यधीनत्वात् विद्याकण्ठस्थीकरणस्य बाल्य एव सुलभत्वाच्च जिज्ञासोत्थापनानुसारेण व्यवस्था पूर्वपरिचितैः कर्तव्या भवति । उपनीतावस्था हि सप्तमवर्षोत्तर-

भाविनी प्रकृते चिन्तनीया वर्तते, तस्यामवस्थायां सप्तमवर्षात्प्रभृति एकादशद्वादश-वर्षपर्यन्तं उत्सुकतानुकरणयोः स्वाभाविकत्वात्, औत्सुक्याभिवर्धनस्य पूर्वंसंसृष्टैराचार्यैः कर्तुं शक्यत्वात्।

एकादशवर्षोत्तरभाविन्यां पौगण्डावस्थायां "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प' इति लक्षणलक्षितायाः कल्पनायाः संस्कृतप्राकृतकाव्यजनितायाः सुखानुभवो हि तादृशीं जिज्ञासां नियमेनोत्थापयितुमर्हति। यया गुरुगृहं गत्वा विनयपूर्वकमध्ययनाय रुचिरुत्पद्यते। एतावद्दूरपर्यन्तं कार्यं पटुप्रत्ययजनितेन संस्कारेण पट्वभ्यासप्रत्ययजनितेन संस्कारेण वा करणीयम्। तदुत्तरन्तु कार्यं आदरप्रत्ययजनितेनादराभ्यासप्रत्ययजनितेन वा संस्कारेण स्वयमेव भवितुमर्हति, आश्रयगुणस्य तत्र प्रयोजकत्वात्। यथासंभवं क्रीड़नादिना तत्रापि न्यायशास्त्राध्ययनं प्राथमिकम्। तदुत्तरभाविन्यामवस्थायां शास्त्रान्तराध्ययनं युक्तम्, इति द्वितीयः परिच्छेदः

३—'मोहं रुणद्धि विमलीकुरुते च बुद्धिं सूते च संस्कृतपदव्यवहारशक्तिम्।
शास्त्रान्तराभ्यसनयोग्यतया युनक्ति तर्कश्रमो न कुरुते कमिहोपकारम्॥

इति वचनात्, मालतीमाधवे नाटके "माधवः आन्वीक्षिकीमधीते" इति माधवस्य तस्यामवस्थायां आन्वीक्षिक्यध्ययनस्योक्तत्वात्, "ब्रह्मचर्यन्त्वा विद्याग्रहणात्" इति सूत्रेण ब्रह्मचर्यस्य ग्रहणपर्यन्तताया व्यवस्थापितत्वाच्च

द्वितीयपरिच्छेदोक्तस्य तर्कग्रहणपर्यन्तस्य तर्कशास्त्राध्ययनस्य आवश्यकत्वं "मोहं रुणद्धि" इति वाक्यादिभिर्निर्णीतमेवं "धर्माधर्मौ त्रय्यां" इत्यादिना वाक्यसन्दर्भेण अर्थशास्त्रे व्यवस्थापितमेव। अतः राजनीत्यनुसारेण अस्याभ्यर्हितत्वे नास्त्येव सन्देहस्यावसरः। वर्तमान—राजनीत्यनुष्ठानामतानुसारेणापि अयमवश्यानुष्ठेयो भाग इति भाति। प्रो० हुंमायू कबीर महोदयेन कृते 'भारती-शिक्षा और विश्व की एकता' 'ज्ञान और राष्ट्र की एकता'—'नये युग की चुनौती' "भारतीयशिक्षादर्शन-परम्परा की निरन्तरता" शीर्षकेषु भाषणेषु कर्नाटक विश्वविद्यालय—अन्नामलैविश्वविद्यालय—उस्मानियाविश्वविद्यालय—ऑक्सफोर्ड विश्वविद्यालयकृतेषु, भारतीयदर्शनप्रणीततर्कशास्त्राश्रयणं सहिष्णुतासुहृद्भावाभ्यां सह कृतं शीर्षकोल्लिखितानां प्रयोजनानां सिद्धिकरम्। नेतोन्यत्सिद्धिकरमिति स्पष्टं साधितं वर्तते। अतः केन्द्रीयशासनस्य पाश्चात्यदेशीय विद्वत्समाजस्य चानुमतोऽयमर्थ इत्युक्तौ न कापि क्षतिर्दृश्यते।

'विभावितः प्रमाणेन कथाभिरनुभावितः।
तर्कस्सञ्चारितश्चायं रसो लोके न दुःखदः।

इति वदन् रसमहार्णवोऽमुमेवार्थं पुष्णाति। मनोविज्ञानवेदिभिः क्रियमाणं शुष्कतर्कनिन्दनं तु सहिष्णुतासुहृद्भावरूपसहकारिविकल—तर्कभावविषयकमिति न कस्याप्यत्र विरोधः, किन्तु सर्वसंप्रतिपन्नोऽयमर्थः इति स्पष्टं वक्तुं शक्यते। श्रीमन्तः

गोस्वामीतुलसीपादा अपि सूक्ष्मेक्षिकया पर्यालोच्यमाने अमुमेवार्थं व्यवस्थापयन्तीति ज्ञायते ।

बन्दौ गुरुपदकंज कृपासिन्धु नररूपहरि।
महामोहतमपुंज जासु वचन रविकर निकर॥

इति वाक्यैः तैः ग्रन्थारम्भ एव तर्कशास्त्रदेवता नमस्कृता, महामोहतमो निवारकत्वलिङ्गात्, परमगुरोरीश्वररस्य चरणरूपकत्वात्, 'ईशस्यैष निवेशितः पदयुगे' इति कुसुमाञ्जलिगतस्य पद्यस्य व्याख्याने तद् व्याख्यातृभिः पदयुगेन प्रमाण-तर्करूपतायाः प्रतिपादितत्वात्, न्यायशास्त्र-देवताया एव नरहरिरूपत्वाच्च । नरहरि-दासरूप-गुरुस्मरणन्त्वत्र लोकप्रसिद्धं व्यञ्जनावृत्त्यैव नतु वाच्यवृत्त्या, तदुत्तरपद्येष्वेव "सुकृतसंभुतन विमल विभूति' इत्यादिषु शंभुशिरोलङ्कारतायास्तदीयरजसः उक्तत्वात् । ''बन्दौ प्रथभ महीसुर चरना' इति पद्ये देवतारूपगुरुचरणनमस्कारात् तत्पूर्वपद्यताया व्यवस्थापनाच्च । तथाच राजनीतिशास्त्रसम्मतं तर्कशास्त्रस्य अभ्यर्हितत्वं सिद्धम् । इति तृतीयः परिच्छेदः

४--मातापितृगुरुणां एकवाक्यतायां एव शिक्षणं संभवति । प्रियहिताभ्यामनु-वर्तनीयो हि बालः । तात्कालिकसुखसाधनं प्रियं । भाविसुखसाधनञ्च हितम् । तत्र तात्कालिकसुखसाधने प्रवृत्तिर्यद्यपि क्रीड़ादिना भवति स्वरसतः, तथापि क्लेश-सहिष्णुतात्मकं वीररसे प्रवर्तनं रचनात्मकप्रवृत्तिपदवाच्यं न भवति । मूलप्रवृत्तिषु या मनोविज्ञानवादिभिः पठ्यन्ते ताः प्राणरक्षासम्बन्धिन्यो भोजनेच्छा, भयं, क्रोधः अद्भुतदर्शनप्रभवोत्सुकता, धृणा शरणागतिरूपा भक्तिः, अर्थसङ्ग्रहः लोकोत्तरनिर्मितिरूपा रचना चेत्येवं विधा अष्टौ मूलप्रवृत्तयः । आसां पृथक्तयाधुनिकैः पठ्यमानानामेवविधानां मूलप्रवृत्तीनां १९३० सन् पर्यंतं कृतायां परिगणनप्रक्रियायां चिन्तनं अपि कृतम् । किन्तु तासां साहित्यशास्त्रपरिपठितनेतृवर्गेषु हर्षविभावतया उपलक्षणत्वाङ्गीकारे· न कापि क्षतिः । यद्यपि च क्रीडनकर्मणापि हर्षमुत्पाद्य बालानामध्ययनप्रवृत्तिः कर्तुं शक्या तथापि श्रद्धाया उद्गमस्तत्र न कारयितुं शक्यते । श्रद्धायाः प्रेममयरूपत्वात् । यद्यपि देवताभक्तिनिर्माणद्वाराऽध्ययनस्य हर्षजनकत्वं संभवति तथापि गुरुभक्तेः तदङ्गत्वात् तच्छरणागतिभावरूपमूलप्रवृत्तिनिर्माणं माता-पित्रोः कार्यं भवत्येव । शरणागतिश्च तस्मिन्नात्मरक्षितृत्वनिश्चयो बालस्य, स माता-पितृभ्यामेव कार्यः न गुरुणा इति सर्वमवदातम् । विचारविकासे सति उत्सुकता यामुत्पन्नायां रचनात्मकप्रवृत्तिः उत्पादयितुं शक्यते न्यायाधीशस्य सैनिकस्य च खेलाप्रदर्शनेन पौगण्डावस्थायामेव । ततः पूर्वन्त्वेतन्न संभवति सामान्यबुद्धिषु बालकेषु । अतः अनुकरणप्रवृत्ति पुरातनीमाश्रित्यैव प्रयत्नः कर्तव्यो भवति । गुरूच्चारणा-नूच्चारणं हि अध्ययनं निर्णीतं मीमांसायाम् । तच्च गुरोः प्रथमतोऽपरिचितत्वात् भयलज्जादिप्रभवयाऽवहित्थया च प्रथमतः गुरुद्वारा न संभवितु मर्हति । अतः प्राणरक्षासंबधिमूलप्रवृत्तेः मातापित्रधीनत्वात्ताभ्यामेव शिशोः पूर्वोक्ताध्ययने प्राणरक्षासंबन्धिमूलप्रवृत्तिसाधने "यद्यदाचरति श्रेष्ठः तत्तदेवेत्तरोजनः इत्युक्त्यनु-

सारेण गुर्वनुसरणे प्रेरणं कर्तव्यं भवति। तत्रापि विशेषतो मात्रा। मातरि हि बालकस्य श्रद्धा प्रेमबहुला, पितरि भयबहुला। एवं सिद्धे प्रवर्तने किञ्चित् कालानन्तरं अभ्यासे रुचिः स्वयमेवोत्पद्यते।

अनया रीत्या— शुश्रूषा श्रवणंचैव ग्रहणं धारणं तथा।
ऊहोपोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥

इति परिगणितबुद्धिगुणेषु आद्यगुणस्य शुश्रूषायाः सिद्धिर्भवति। तस्यां सत्यां श्रवणमासेवा अभ्यासरूपा सिद्धयति। एकादशवर्षवयसः प्रागभ्यसनीयाः ग्रन्थाः सर्वे अस्मिन्नेवावसरे क्रमेण अभ्यसनीयाः। सेतुबन्धोक्तक्रमेणाभ्यासव्यवस्था कर्तव्या। इति शुश्रूषासिद्धिश्रवणसंपत्तिर्नाम चतुर्थपरिच्छेदः।

५—एकादशवर्षावस्थातः श्रुतानामर्थानामवधारणं ग्रहणं षोडशवर्षात् प्राक् कर्तव्यं भवति। अवधारणं च इदमित्थमेवेति निश्चयः तदर्थं प्रमाणशास्त्रस्य आन्वीक्षिक्याः अध्ययनं न्यायाधीश खेलनस्याभिनयेन निर्मातव्यम्।

'रागद्वेषवियुक्तास्तु सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राः स्युस्सा यज्ञसदृशी सभा।

इति वचनेन तस्य देवताराधनार्थत्वावबोधनात्। शेषं शास्त्रार्थविचारपद्धतौ द्रष्टव्यम्। प्रथमं गुरुणा सह संवादेनैतत् क्रीड़ासामर्थ्यं साधनीयम्। तदनन्तरं समर्थस्य जल्पकथायां स्पर्धाप्रवृत्तौ बोररसस्य सिद्धिः तत्कार्यभूतस्याद्भुतस्य च। एतावत्कालपर्यन्तं बालस्य दुष्टसङ्गतिः सर्वथा प्रतिरोद्धव्या। अन्यथा उद्देश्यहानिर्नियता। इति ग्रहणसिद्धिर्नाम पञ्चमः परिच्छेदः।

६—इत उत्तरं गृहीतानामर्थानाम् धारणोहापोहतत्वाभिनिवेशानां कृते अगृहीतानामर्थानामवधारणाय च शिक्षाव्यवस्था अर्थशास्त्रोक्तक्रमानुसारेण यावज्जीवमनुष्ठेया भवति। तथाहि—"ब्रह्मचर्यं चाषोड़शाद्वर्षात्। अतो गोदानं दारकर्म च। १—अस्य नित्यश्च विद्यावृद्धसंयोगो विनयवृद्ध्यर्थं तन्मूलत्वाद् विनयस्य। २—पूर्वमहर्भागं हस्त्यश्वप्रहरणविद्यासु विनयं गच्छेत्। पश्चिममितिहासश्रवणे। पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थशास्त्रं चेति इतिहासः। शेषमहोरात्रभागममपूर्वग्रहणं गृहीतपरिचयं च कुर्यात्। अगृहीतानामाभीक्ष्ण्यश्रवणञ्च। ३—श्रुताद्धि प्रज्ञोपजायते, प्रज्ञया योगो, योगादात्मवत्तेति विद्यासामर्थ्यम्"। इति। तत्रैव सप्तदशाऽष्टादशवर्षे आङ्ग्लादिभाषाऽध्ययनं कर्तुं युज्यते तस्य चतुःषष्टिकलान्तर्गतम्लेच्छितविकल्पकलारूपत्वात्। इति षष्ठः परिच्छेदः।

'बालकानां पाठ्यक्रमः'

'शैशवेभ्वस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्'।

इति महाकविः कालिदासः विद्याभ्यासं बाल्ये कर्तव्यं मन्यते।

'आषोड़षाद् भवेद्बालः तरुणस्तत उच्यते।
वृद्धस्स्यात् सप्ततेरूर्ध्वं वर्षीयान्नवतेः परम्।

इत्युक्तनयेन एकादशवर्षात् षोडशवर्षावधि ग्रहणपर्यन्तता पूर्वं व्यवस्थापिता। एकादशवर्षात् षोडशवर्षावधि पञ्चसु वर्षेषु आन्वीक्षिक्याः, तथोपनयनानन्तरं त्रय्या अध्ययनं च इत्येतत्—"वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः वार्तामध्यक्षेभ्यो दण्डनीतिं वक्तृप्रयोक्तृभ्यः। ब्रह्मचर्यं चाषोडशाद्वर्षात्" इत्यादि वचनैः विहितम्। तत्र त्रय्यध्ययनस्य कालः सप्तसु वर्षेषु प्रतिदिनं घण्टाद्वयं निश्चितम्। एकादशप्रभृतिपञ्चसु वर्षेषु त्रय्या अध्ययनं पूरणीयम्। अथाभ्यर्हितत्वात् आन्वीक्षिक्यध्ययनस्य कालव्यवस्था चिन्त्यते।

श्रीमद्भागवते—रामकृष्णयोः एकादशवर्षप्रभृति समस्तविद्याध्ययनं प्रायः षण्मासाभ्यन्तर एव संपन्नमिति सकारणमुक्तम्। यथा—

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः।
प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः॥
सरहस्यं धनुर्वेदं धर्मान् न्यायपथांस्तथा।
तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम्॥
सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ।
सकृन्निगदमात्रेण तौ सञ्जगृहतुर्नृप॥ इति।

व्याख्यातं च श्री श्रीधरस्वामिभिः श्रीजीवगोस्वामिभिः श्रीवल्लभाचार्यैश्च इदं पद्यम् तस्यायमाशयः—पर विद्याऽपरविद्याग्रहणयोः पौर्वापर्यं सम्यगवस्थापयति शुद्धभावानुवृत्तिभिरित्यनेन। तावत्कालस्य मध्यएव समस्तविद्या ग्रहणस्य कारणम्। असाधारणं गुरुप्रसादेतरानभिकाङ्क्षित्वमिति। तथाचोक्तं सुबोधिन्याम्—"अत्र भावशुद्धिः अलोलुपत्वादिः। गुरुप्रसादेतरकामनाभावश्चेति"॥ एवं स्थिते सकृच्छ्रवणमात्रेण धारणावतो बालस्य कालनिश्चये सन्थागुणनिकावृत्तिक्रमेण धारणा वेदाध्ययनसमये यावतो ग्रन्थस्य भवति तावद्बुद्धिशक्त्यनुसारेण पञ्चसु वर्षेषु पठनीयानां ग्रन्थानामभ्यसनकालो निश्चेतव्यो भवति। काव्याध्ययनेनार्थग्रहणकालो निश्चितो भवति। न्यायशास्त्राध्ययनं तु गुरुणाध्यापितस्य ग्रन्थस्य चिन्तनगुरुणा संवादेन मतिभावस्य संशयच्छेदनाद्यनुभावसहितस्योत्पत्तिः पञ्चलक्षण्यध्ययनकाले अपेक्षितेन कालेन निश्चिता भवेत्। अतः पञ्चलक्षण्यध्ययनसमये अन्यत्सर्वं कार्यं सङ्कोच्य क्रीडासमये स्थापनीयम्। वेदाध्ययनसमयश्च यथावत् पुरस्करणीयः। अवशिष्टः सर्वोप्यध्ययनकालः पञ्चलक्षणीपर्यन्ताध्ययन एव योजनीयः। अनेनैव क्रमेण इतरग्रन्थाध्ययनमपि व्यवस्थापितं भविष्यति इति विद्वद्परिषदो मतम्।

पाठ्यक्रमः—षड्वर्षात् आरभ्य षोडशवर्षपर्यन्तम्।

६ वर्षे—(अ) शब्दरूपावलिः, मासत्रयपर्यन्तम्—अस्यां बालकस्य कृते व्यवहारपुरःसरं विभक्त्यर्थस्य ज्ञानमवश्यमेव कारयितव्यम्।—

जयमङ्गलाक्रोडपत्रम्

'काव्यशास्त्रविधिनिषेधानां समन्वयः'

ननु काव्याध्ययनं शास्त्राध्ययनञ्च षोडशवर्षात्प्राक् कर्तव्यमितिप्रसङ्गान् निरूपितम्। परन्तु 'अदोषं गुणवत्काव्यम्' इत्याद्यग्निपुराणवचनानां 'काव्यालापांश्च वर्जयेत्' इत्यादि निषेधपराणाञ्च समन्वयः कथं भवतीति चेत् तत्तदधिकारावस्था-परत्वेन अध्येष्यमाणस्य तत्र तत्र शास्त्राध्ययने प्रवृत्यर्थं ततः ततः निवृत्यर्थञ्च

(ब) धातुरूपावलिः ६ मासपर्यन्तम्, दशलकाराणामर्थस्य भावना कारयितव्या।

(स) समासचक्रम्—मासत्रयपर्यन्तम् लघुवाक्यानां प्रयोगः कारयितव्यः।

(द) अष्टाऽध्यायी मूलमात्रं-कण्ठस्थीकरणमस्मिन्नेव समये वर्षपर्यन्तम्।

७ वर्षे—अमरकोषः अष्टमासपर्यन्तम्।

हितोपदेशः—षण्मासाभ्यन्तरे, अनुवादस्याभ्यासः समासस्य परिचयः श्लोकानामन्वयः कारयितव्यः। रघुवंशः २ सर्गः-षण्मासाभ्यन्तरे, अस्यानुवादस्य अभ्यासः कारयितव्यः।

८ वर्षे—रघुवंशः ३-४ सर्गौ, तर्कसङ्ग्रहस्य मूलमात्रं कण्ठस्थीकरणम्। मनुस्मृतिः (२ अ०)

९ वर्षे—तर्कसङ्ग्रहस्य अध्यापनम् एवं विभिन्नसन्धोनां पूर्णपरिचयः किराताजुंनीयस्य १–२–३ सर्गाः।

१० वर्षे—न्यायबोधिनी एवं तदर्थमपेक्षितन्यायमतसिद्धपदार्थानां परिचयः कामन्दकीयनीतिसारस्य १—७ अध्यायानां कण्ठस्थीकरणमध्ययनञ्च।

११ वर्षे—माथुरीपञ्चलक्षणी एवं शिशुपालवधस्य सर्गत्रयम्।

१२ वर्षे—कामन्दकीय नीतिसारस्य संपूर्णस्य कण्ठस्थीकरणं, मुक्तालली, साङ्ख्यतत्वकौमुदी, प्रबोधचन्द्रोदयनाटकम्, याज्ञवल्क्यस्मृतिसूत्राणि इत्यादि ग्रन्थानामध्ययनम्।

१३ वर्षे—सिद्धान्तलक्षणम, योगदर्शनम् एवं दिनकरीटीकायाः चिन्तनम्। कौटिलीयस्य अर्थशास्त्रस्य १ भागस्य कण्ठस्थीकरणम्।

१४ वर्षे—व्यधिकरणजागदीशी, वेदान्तपरिभाषा, कौटिलोयार्थशास्त्रस्य २ भागः।

१५ वर्षे—सामान्यनिरुक्तिगादाधरी कौटिलीयार्थशार्थशास्त्रस्य ३ भागः।

१६ वर्षे—व्युत्पत्तिवादस्य १ कारकम्।

तस्मात् उपर्युक्त लेखानुसारेण अध्ययनक्रमः राजनीतिविद्भिः यदि परिणम्येत तर्हि षोडशवर्षानन्तरं तारुण्यावस्थायामितरविद्यायां अभिरुचिशीलोऽपि आन्वीक्षिक्यादिविद्यायां कुशलत्वात् न विपथमारोक्ष्यति इति परैः अपरिशीलतः पन्थाः।

जयमङ्गलाक्रोडपत्रम्

परस्परविरोधितया भासमानानां उभयविधानमपि 'काव्यालापांश्च वर्जयेत्' अदोषं गुणवत्काव्यमि''त्यादीनां वचनानां समन्वयो बोध्यः। एवमेव न्यायशास्त्राध्ययन विषयेऽपि बोध्यम्। एतत्सर्वं श्रीमदाचार्यवर्यभास्कराचार्यकृत 'सेतुबन्धव्याख्यया स्पष्टं भवति। तद्व्याख्यानं विद्वत्प्रस्तावे (पृ० ४१५) पूर्वमुक्तमेव।

उपनयनाधिकारविचारः

एकादशे वर्षे इति। (पृ० ४११) नन्वेवं ब्राह्मणस्योपनयनमष्टमे वर्षे, क्षत्रियस्योपनयनमेकादशे वर्षे इत्येवं वर्षभेदेन स्मृतिकर्तृभिः तत्तत्कालस्य तत्तद्वर्णोपनयनाङ्गत्वमुक्तम्। तत्राऽयं प्रश्नः, उपनयनं प्रति अङ्गत्वेन विहिते वर्षभेदे किं प्रयोजनमिति चेन् निरूप्यते।

ब्राह्मणः विद्यया जीवति। क्षत्रियस्तु शस्त्रेण। इत्येवंरीत्या अनयोः वर्णयोः जीवनव्यवस्था विभिन्नरीतिकत्वेन तत्तत्संस्कारस्वाभाव्यानुसारेण च शास्त्रकर्तृभिः विहिता दृश्यते। तत्र विद्यया जीवने कर्तव्ये विशिष्टतया लोकानुरागसंपादनार्थमात्मनि विशेषतया विनयाधानार्थञ्च ब्राह्मणेन शान्तरसः सत्यतया अभिनेतव्यो भवति। क्षत्रियेण तु शस्त्रेणाजीवनात् सदा युद्धप्रसङ्गे दत्तचेतस्कत्वात् वीररसेनैव भाव्यम्। तत्सत्व एव क्षत्रियस्य जीवनोपपत्तेः। एवं स्थिते क्षत्रियः यदि अष्टमवर्षात् प्रभृत्येव उपनीय कामचारकामभक्षणादितः व्यावर्त्येत तर्हि युद्धार्थं अपेक्षितमात्रया क्षत्रिये बाल्यकाले बलाधानं न भवितुमर्हेत्। अतः क्षत्रिये बाल्यकाल एव शस्त्रेणाजीवनदृष्टया वीररसाधायकं बलमाधातव्यं भवति अतः सः कामाचारकामभक्षणादितः न प्रतिरुद्धः शास्त्रकर्तृभिः, तत्काल एव विद्याध्ययने यदि सः प्रेर्येत तर्हि शरीरमनसोः अपेक्षितं बलं न संभवितुमर्हतीति अनुभवसिद्धत्वात्। अतः बलानुकूलस्य कर्तव्यस्य अभ्यासदार्ढ्याय क्षत्रियस्य उपनयनं प्रति अष्टमाब्दस्य अङ्गत्वं नोक्तं शास्त्रकर्तृभिः, अपितु एकादशवर्षस्येति बोध्यम्। एवमेव वैश्यस्योपनयनं प्रति षोडशाब्दस्याङ्गत्वं शास्त्रकर्तृभिः यद्विहितं तदपि वैश्यस्य वणिज्या कर्मदृष्टया निरूपितं बोध्यम्, तस्य वार्ताद्वारैव जीवननिर्बन्धात्। वैश्येन वार्तया जीवने कर्तव्ये सर्वथा सत्यभाषणं कर्तुं नार्हम्। तथोचोक्तं 'सत्यानृतं तु वाणिज्यम्' इति। यदि बाल्यकाले एव वैश्यः उपनीयेत तर्हि बाल्यकाल एव सत्यभाषणस्य संस्काराधानात् षोडशवर्षानन्तरमपि वार्ताकर्मप्रसङ्गे 'यन्नवे भाजने लग्नः संस्कारो-नान्यथा भवेत्' इति न्यायेन अनृतं स न भाषेत। इष्टापत्तौ च वार्ताच्छेदः स्यात्। अतः वैश्यो बाल्यकाले उपनयनात् शास्त्रकर्तृभिः प्रतिरुद्धः। षोडशवर्षानन्तरं तु कृतेऽपि उपनयने बाल्यकाल एव सञ्जातस्य अनृतभाषणसंस्कारस्य दृढमूलत्वात् वार्ताकर्मणि अनृतभाषणे सः ग्लानिन्नानुभवेत्। न च तर्हि उपनयनानन्तरं तेन अनृतं कथं वक्तव्यमिति शङ्क्यम्। शास्त्रेण तस्याभ्यनुज्ञानात्। न च क्षत्रियस्य बलाधानं कर्तुं एकादशवत्सरः उपनयनाङ्गत्वेन शास्त्रकर्तृभिः अभिहितः तदपेक्षया षोडशवर्षस्यैव उपनयनाङ्गत्वं कुतो नोक्तमिति वाच्यम्, षोडशतमे वयसि गार्हस्थ्यप्रवेशाधिकारप्रदा-

ब्रह्मचर्यं[1] चाषोडशाद्वर्षात्। अतो गोदानं[2] दारकर्म च। अस्य नित्यश्च विद्यावृद्धसंयोगो विनयवृद्ध्यर्थन्तन्मूलत्वाद्विनयस्य।

जयमङ्गलाक्रोडपत्रम्

नात्। अतस्ततः पूर्वमेव विद्यालाभार्थं एकादशवयसः अङ्गत्वं विहितम्। तदनन्तरञ्च षोडशवर्षात्प्राक् विद्यायां तस्य यथा प्रवेशो भविष्यति तथा क्रमः प्राग् अस्माभिः निर्दिष्टः। (पृ० ४२३) तत एव बोध्यः। इति।

कालभेदेन उपनयनफलमभीप्सितम्

ननु क्षत्रियस्य बलं शास्त्रकर्तृणां प्राधान्येन अभीप्सितमस्तीति कथं ज्ञायतामितिचेदेवम्। ब्राह्मणादिवर्णानामुपनयनार्थं वर्णभेदेन अष्टमैकादशषोडशवर्षाणामङ्गत्वं शास्त्रकर्तृभिः यद्यपि विहितमस्ति तथापि कामनापरतया ब्राह्मणस्य पञ्चमं वर्षं तदुपनयनं प्रति ब्रह्मवर्चस्वित्वलाभार्थं अङ्गत्वेन मनुना यथा कीर्तितमस्ति तथा विशेषतया बलार्थित्वदशायां क्षत्रियस्य उपनयनं षष्ठे वर्षेऽपि विहितमस्ति। तदुक्तम् म० स्मृतौ—'राज्ञो बलार्थिनः षष्ठे'। इति। (मनु० २ अ०)।

बलार्थमुपनयने विरोधपरिहारः

नचैवं बललाभहेतुना क्षत्रियः कामाचारकामभक्षणान्न प्रतिरुद्धः इति पूर्वमुक्तम्। अधुना तु षष्ठे वर्षे क्षत्रियस्योपनयनं बलार्थित्वात् इत्युक्तम् तथासति अनयोः परस्परं विरोधो भवतीति वाच्यम्, बललाभार्थं उपनयनस्य कर्तव्यत्वेन शास्त्रेषु उक्तत्वात्, यत्र कर्मसु कृतेषु बललाभे न्यूनता अनुभूयते तावतां कर्मणां कृतेप्युपनयने अगतिकगतौ सत्यां लोप एव कर्तव्यो भवति, तावतापि षष्ठे वर्षे कृतस्योपनयनस्य न स्वरूपहानिः इत्येव निर्णीतत्वात्। अतो बलं अभीप्सित मिति दिक्।

शीलेति। (पृ० ४११) शीलस्य स्वरूपं स्मृतिमुक्ताफले वैद्यनाथमहोदयैः निरूपितं द्रष्टव्यम्[3] "सद्भिः संभावनीयताहेतुः आत्मगुणसंपत् शीलमि"ति। अस्योपपत्तिः अग्रे स्फुटीकरिष्यते।

प्रयोगेति। (पृ० ४११) प्रयोगकुशलाः कर्मशिक्षकाः, अध्यक्षा इति यावत्। तस्माद् ये आन्वीक्षिक्याम् अध्यक्षाः वार्ताया अध्यक्षा इव वर्तन्ते तैः कर्मण्यपि आन्वीक्षिकी परीक्षितव्या। अन्यथा "शास्त्रविद् अदृष्टकर्मा कर्मसु विषादं गच्छेत्" इति कौटिल्येन वक्ष्यमाणा आपत्तिः प्रसज्येत अतः आन्वीक्षिक्यध्यक्षैरपि कर्मकुशलैः भाव्यमिति भावः।

श्रीमूला

ब्रह्मचर्यमिति। आ षोड्शाद् वर्षात् षोडशं वयोऽभिव्याप्य, ब्रह्मचर्यं, रक्ष्यमित्यार्थम्। अतः पश्चात्। गोदानं केशान्तकर्म, दारकर्म च विवाहश्च। अस्य कृत-

---

नी० टि० १ **ब्रह्मचर्यमिति**। विद्याविघ्नप्रतिषेधार्थंम्।

नी० टि० २ **गोदानमिति**। मन्त्रपूर्वकं समावर्तनाख्यं कर्म। मुण्डनमित्यन्ये।

३ तद्यथा—:'तत्तत्कर्म तथा कुर्यात् येन श्लाघ्येत संसदि।
शीलमेतत् समासन कथितं कुरुनन्दन"॥ इति।

श्रीमूला

दारस्य, विद्यावृद्धयंयोगः विद्यावृद्धैः सह परिचयः, नित्यः दारकर्मोत्तरकालेऽप्यनुवर्त्यः। किमर्थं, विनयवृद्धर्थं विनयस्य शास्त्रसंस्कारस्य वृद्धये। कस्माद् विनयस्य तन्मूलत्वाद् विद्यावृद्धसंयोगप्रभवत्वात्।

वैदिकसिद्धान्तसंरक्षिणी

चतसृणां विद्यानां ग्रहणान्तिकाध्ययनकालावधिमाह ब्रह्मचर्यमिति। चकारःत्वर्थकः। ब्रह्मचर्यन्तु इति पाठान्तरम्। एतत्फलं टिप्पण्यां द्रष्टव्यम्।[1]

विघ्नप्रतिषेधमात्रेण समस्तविद्याग्रहणं रामकृष्णादीनामभूत्। अन्येषां तु कृते नित्यं विद्यावृद्धसंयोगं अग्रे वक्ष्यति। राजा बालावस्थायां कामिनीजिज्ञासाशून्यः यावद्वर्तते तावपर्यन्तं धर्माथौं यथा ज्ञातौ स्यातां तथा ज्ञापयितव्यः इति वक्ष्यते। (पृ० ४२८) षोडशवर्षानन्तरं तु कामस्य प्रादुर्भावात् सर्वविधसुखसामग्रीसौलभ्याच्च कामिनीजिज्ञासा विद्याध्ययनं प्रति प्रतिबन्धिका भवितुमर्हति इति ग्रहणान्तिक कालः षोडशववर्षावधिः ब्रह्मचर्ये उपयुक्तत्वात् कौटिल्येन निर्दिष्टः। नात्र धर्मशास्त्रस्यापि विरोधः।[2] अतः अनन्तरम्। संस्कारान्तरमाह गविति। मन्त्रपूर्वकं समावर्तनाख्यं कर्म। "मुण्डनमित्यन्ये" इति टिप्पण्यां व्याख्यातम्। अत्र अन्ये इत्यस्य सामवेदिनः इत्यर्थो वाच्यः। तेषां कृते मुण्डनसंस्कारस्यापि शास्त्रेषूक्तत्वात्। अथवा गोशब्दस्य केशवाचकत्वात् केशान्तसंस्कारपरत्वमस्य बोध्यम्[3]। "अस्य" इति पदं देहलीदोपन्यायेन उभयत्र अन्वितं बोध्यम्। विद्यावृद्धसंयोगेन जातेपि कृत्रिमे विनये गृहस्थेन राज्ञा सदा विद्यावृद्धसंयोगः कार्य इत्याह नित्य इति। तत्फलमाह विनयेति। तन्मूलत्वात् विद्यावृद्धसंयोगमूलत्वात्। अन्यथा नित्यं वृद्धसंयोगाभावे विनयो न समृद्धः स्यात्। इष्टापत्तौच अशुश्रूषुत्वादिप्रयुक्तदोषः राज्ञि प्रसज्येत तेन पुनरपि जाडयमापद्येत[4]। वस्तुतस्तु षोडशवर्षात्प्राक् ग्रहणान्तिकं अध्ययनं अभूत् अधुना तु अनुष्ठानपर्यवसाय्यपेक्ष्यते तच्च नित्येन विद्यावृद्धसंयोगेन संपादनीयं। तेनागृहीतग्रहणमपि भविष्यति। किञ्च संयोगोप्ययं लोकसङ्ग्रहान्तर्गतत्वान्नित्यमनुष्ठेयः।

जयमङ्गला

ब्रह्मचर्यं च आ षोडशाद् वर्षात्, विद्याग्रहणार्थं धर्मार्थं (च)। अत इति षोड़शाद् वर्षादूर्ध्वम्। गोदानं समावर्तनम्। दारकर्म च अस्य समावृत्तस्य परिणयनं

१—ब्रह्मचर्यं विद्याविघ्नप्रतिषेधार्थम्।

२—षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम्। तदर्धिकं पादिकं वा ग्रहणान्तिकमेव च॥ मनु ३।

३—तदुक्तं शब्दकल्पद्रुमे—गोः—त्वचि जातत्वादेवास्य तथात्वं। लोम इति।

४—अशुश्रूषा त्वरा श्लाघा विद्यायाः शत्रवः त्रयः। द्यूतं पुस्तकशुश्रूषा नाटकासक्तिरेव च।—

जयमङ्गला

धमार्थं सुखार्थं च। विद्यानिमित्ता येषां पूजा ते विद्यावृद्धाः। तैश्च नित्यं संयोगः स्यात्। कृतदारकर्मणोऽपि विद्या विनयार्था। विद्याविनीतस्यापि विनयो वर्धते। इदञ्च कर्त्तव्यप्रयोजनासु कर्मविद्यासु।

जयमङ्गलाक्रोडपत्रम्

'धमार्थम्' (पृ० ४२७) विद्याविघ्ननिवारणार्थं इति बोध्यम्। तदुक्तं नीतिनिर्णीतौ टिप्पण्याम्—"विद्याविघ्नप्रतिषेधार्थं" इति। तेन गुरुसविधे स्थित्वा यः यथावदधीते[1] तस्य शास्त्रार्थः स्वयं प्रसन्नो भवति। विघ्नाश्च दूरीभवन्ति। इति भावो बोध्यः। तदुक्तम्—

अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च।
यत्कृपालेशमात्रेण नमोऽस्तु गुरवे सदा॥ इति।

गोदानशब्दार्थः

समावर्तनम्- (पृ० ४२७) मुण्डनमिति यावत्। ननु गोदानमिति मूले संपतितस्य शब्दस्य मुण्डनमित्यर्थः कथमवगतः? इति चेत्, शिष्टैः तथा व्याख्यातत्वात् तदुक्तं टिप्पण्याम् "मन्त्रपूर्वकं समावर्तनाख्यं कर्म। मुण्डनमित्यन्ये" इति।

षोडशवर्षे विवाहविधिः'

दारकर्मेति। (पृ० ४२७) ननु मूलकृता षोडशे वर्षे "ब्रह्मचर्यं चा षोडशाद्वर्षादि"ति ग्रन्थेन गार्हस्थ्याङ्गभूतं विवाहकर्म विहितम्। तत्केन हेतुना? इतिचेत्। अध्ययने षोडशवर्षसमये समुद्भावितस्य प्रतिबन्धकस्यापसारणाय इति गृहाण। तथाहि—

जयमङ्गलाक्रोडपत्रम्

कामिनीजिज्ञासा प्रतिबन्धिका

कामिनीजिज्ञासायाः कामिनीज्ञानान्यज्ञानं प्रति प्रतिबन्धकत्वं भवतीति सर्वशास्त्रसम्मतं मतमस्ति। सेयं इतरज्ञानप्रतिबन्धकभूता कामिनीजिज्ञासा पुत्रस्य षोडशवर्षे समुदेतुमर्हति। अतएव तदुदयात्पूर्वं यथा राजपुत्रस्य धर्मार्थवेदनं विद्याचतुष्टयद्वारा संभावयितुं शक्यते तथा अध्यक्षैः शिष्टैश्च यतनीयमिति उक्तं (पृ० ४२७) प्राक्। षोडशवर्षप्राप्त्यनन्तरं राजपुत्रस्य समुदितायां कामिनीजिज्ञासायां सत्यां सा ज्ञानोत्पत्त्यर्थं प्रतिबन्धिका भवेत्। अतः विषयसिद्धिद्वारा तस्याः अपसारणं शास्त्रकृतां सम्मतं अस्ति इति मत्वा कौटिल्येन विषयसिद्धिरूपा कामिनीप्राप्तिः षोडशे वयसि राजपुत्राणां कृते अनुमोदिता द्रष्टव्या। अतएव भारतीयराजनीत्यनुसरणं

निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता। एतै वै सप्त दोषाः स्युः सदा विद्यार्थिनां मताः
जाड्यविक्षेपव्यासङ्गप्रमादैः कवली कृता। विद्या स्थास्यति नैकापि क्व पुनस्ताश्चतुर्दश।
(धर्मविजय)

यो हेरिव गणाद्भीतः मिष्टान्नात् गरलादिव। राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधि—गच्छति।

१—सतो नूचानचेष्टितैः इति—नीतिसार सर्ग-३

जयमङ्गलाक्रोडपत्रम्

कर्तुंकामेन दशरथादिना षोडशतमे वयसि रामस्य विवाहः संपादितः, इति इतिहासोऽपि शास्त्रप्रमाणमाधारीकृत्य सोपपत्तिकः इति बोध्यम्।

षोडशे वयसि विवाहविधिफलम्

किञ्च षोडशवर्षात् प्रागेव वेदाध्ययनस्य वृत्तत्वात् तस्मिन् वयसि तन्नियमाः यथाविधि परिहरणीया भवन्ति। तदानीं यदि विवाहो न विधीयते तर्हि अनाश्रमित्व-दोषस्य प्रसक्तिर्भवेत्। 'अनाश्रमी न तिष्ठेत्तु' इति निषेधसूचितदोषात् आत्मनः रक्षणं षोडशे वर्षे गृहस्थेन कर्तुं शक्यते। एतावता अपरोप्ययं लाभः अस्य, यद् युवावस्थायां प्राप्तः सः सुखेनैव अध्यापयितुं शक्येत इति। अत्रेदं तत्त्वं—यथा यथा पुत्रस्य अभीप्सितफलप्राप्तिः समये समये भवेत् तथा तथा तद्व्यवस्थापनपुरःसरं सः पित्रा मित्रभावं पुरस्कृत्य यदि अध्याप्यते तर्हि सुखेन पुत्रोऽध्येतुं शक्नोति। एवमेव युवावस्थायां स्त्रीशरीरमपि पुत्रस्य अभीप्सितं वस्तु अस्ति तदेव पित्रा संपादितम, 'प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेदि''ति वाक्यात्[1]। अतो युवावस्थामापन्नस्य बालकस्य सुखलभाय स्त्रीप्राप्तेः अत्र विधानं कृतम्। तदेवोक्तं जयमङ्गलाकृता ''सुखार्थं चेती''त्यादिना ग्रन्थेन इति।

'स्वल्पे वयसि विवाहेपि ब्रह्मचर्यस्य न हानिः'

नन्वेवं षोडशे वयसि विवाहः शास्त्रकर्तृभिः यदि अनुमन्येत तर्हि पूर्णतया युवावस्थामप्राप्तस्य राजपुत्रस्य ब्रह्मचर्यहानिरूपो महान् दोषः प्रयुक्तो भवेत्? इति चेन्न। विवाहमात्रमेव ब्रह्मचर्यहानिं प्रति प्रयोजकं इति नास्ति स्थितिः यया उक्तदोषः आपादयितुं शक्येत। यस्मिन् समये षोडशवर्षीयः कुमारः विवाह्यते तस्मिन् समये कन्या कियद्वयसी अपेक्ष्यते? इत्यादि शास्त्रकर्तृभिः चिन्तितमस्ति।

''त्रिंशद्वर्षो भवेत् कन्यां हृद्यां द्वादशवार्षिकीम्''। इति मनूक्त्यनुसारेण षोडश-वयस्को बोढा स्यात् तर्हि कन्या षट्सप्तान्यतरवयस्का भवितुमर्हति इति शास्त्रसम्मतमस्ति इति निर्णेतुं शक्यते। अतएव रामायणे सीतारामयोः विवाहप्रसङ्गे रामस्य षोडशवयस्कत्वं आसात् सीतायाश्च सप्तवयस्कत्वमिति।

अत्रेदं बोध्यं— कामसूत्रोक्त्यनुसारेण अधोनिर्दिष्टायुर्वेदावचनानुसारेण साङ्कर्य-दोषात् समाजस्यसंरक्षणोद्देश्येन च शास्त्रकर्तृभिः कन्यायाः विवाहसमयः ऋतुदर्शनात् प्राक् सप्तमवर्षादारभ्य दशमवर्षपर्यन्तं निश्चितः। एतत्समये कन्यायः ऋतुदर्शनस्य

---

१ तदुक्तं कामसूत्रे 'भिक्षुकी श्रमणाक्षपणाकुलटाकुहकातीक्षणिकामूलकारिकाभिः न संसृज्येत। शय्या च गुरुजनमूले तदभिमता कार्यनिष्पत्तिः नायकाभिमतानाञ्च अर्था-नामर्जने प्रतिसंस्कारे च यत्नः। ४३। ज्ञाति कुलस्याभिगमतम् अन्यत्र व्यसनोत्स-वाभ्याम् तत्रापि नायकपरिजनाधिष्ठिताया नातिकालमवस्थानमपरिवर्तित प्रवास वेशपात्र— गुरुजनानुज्ञातानां करणमुपवासानाम्। ४६''। इति।

जयमङ्गलाक्रोडपत्रम्

असंभवात् तत्संसर्गोऽपि शास्त्रकर्तृभिः निषिद्धः। स च अभिभावकैः श्वशुरादिभिराप्तै र्मात्रादिभिः पित्रादिभिश्च यथा परिपालितो भवेत् तथा यतनीयमेव।

बालाया अविवाहे दोषोऽपरिहार्यः

अन्यथा स्त्रीपुरुषयोः पूर्णयुवावस्थां अप्राप्तयोः विवाहेन संसर्गो दुर्निवारः इति मत्वा स एव मा भवतु इत्येतदर्थम् तयोः विवाह एव अवरोद्धव्यः इत्येवं कृतायां मनीषायामपि यथासमयमकृतेऽपि विवाहे प्रौढावस्थाप्राप्त्यनन्तरं संभावितानामपराधानां दुरपनेयत्वं संभविष्यति। अतः यथा अकृतविवाहानां संरक्षणमभिभावकैः कर्तव्यं तथैव कृतविवाहानां बालकानामपि संरक्षणं क्रियेत तर्हि को वा दोषः इति सुधिय एव विचारयन्तु। न च बाल्यकाले विवाहकरणे, प्रौढावस्थायां विवाहकरणे वा उभयत्र समानस्थितिकत्वात् बालाविवाहे किं वैशिष्ट्यमिति शङ्क्यम्। बालावस्थायां विवाहमकृत्वा प्रौढावस्थाप्राप्तायामपि सा अनूढा तिष्ठति तर्हि तस्यां वक्ष्यमाणप्रच्छन्नदोषस्य समाजे आपादनीयत्वात्। तथाहि--बाल्यावस्थायामकृते विवाहे गुल्मादयः दोषाः संभवितुं शक्यन्ते, इति आयुर्वेदशास्त्रेषु प्रतिपादितं वर्तते। तत् विस्तरेण लेखरूपेण साङ्गवेदविद्यालयीये सं० २०२२ वार्षिकविवरणे प्रकाशितमस्ति[1] तत्रैव द्रष्टव्यम्।

---

१ वयः स्थापनविषये—

१६ वयसि स्त्रीणां, २० पुंसां संयोगयोग्यः काल इति निगमनं सर्वसाधारण्येन कृतं न योग्यम्। तथाहि—स्त्रीणां त्रिधा प्रकृतिरुक्ता वातपित्तकफभेदात्। यथोक्तम्—

वातजा पित्तजा चेति दारुणा त्रिविधा स्मृता।
वातजा द्वादशे वर्षे पित्तजा च चतुर्दशे।
दारुणा षोडशे वर्षे शोणितं पततिं ध्रुवम्।
(इतिकालनिर्णयदीपिकायाम)

एवं प्रकृतिभेदेन ऋतुकालभेदात्, तथा दर्शनाच्च दारुणायाः षोडशे वर्षे संयोगयोग्यत्वेऽपि इतरयोः तथा निगमने वक्ष्यमाणाणदोषसम्भवः। तथाहि—

ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत्।
आर्तवं वायुरादाय कुक्षौ गर्भं करोति हि।
मासि मासि विवर्धेत गर्भिण्या गर्भलक्षणम्।
कललं जायते तस्या वर्जितं पैतृकैर्गुणैः। (चरके)

इत्याद्युक्तानां अनेकविधरोगाणामुत्पत्तिसम्भवः। ततस्तयो रक्षणं षोडशवयोमाननिगमने दुष्करं दृश्यते। प्रशस्तपादभाष्ये—

"कामी क्रुद्धो वा यदा यमर्थमादृतश्चिन्तयन् स्वपिति तदा सैव चिन्तासन्ततिः प्रत्यक्षाकारा सञ्जायते" इति स्वप्नदर्शनमुपपादितम्। एवमन्यविधाश्चाधयः सन्दृश्यन्ते। ततः कथं तासां रक्षणम्? अतएव—

जयमङ्गलाक्रोडपत्रम्

विशेषविवरणमधिकं (पृ० ३७९ तः ३९१ पृष्ठपर्यन्तं) प्राक् प्रपञ्चितम् ज्ञेयम् ।

तदिदं न अवास्तविकमिति प्रौढाविवाहे कृते प्रच्छन्नतया संभावितानां पापानां रोगाणाञ्च निवारणं कथमपि कर्तुं न पार्यते इति प्रतिदिनं पदे पदे गर्भपातादि श्रवणात् अनुमीयते । एवमेव यथा इयम् अवैधी प्रवृत्तिः दुर्निवारा तथा स्त्रीणां बाल्ये वार्धक्यमपरिहार्यं स्यात् इत्यपि अपरो दोषः अनुमन्तव्यः, 'स्त्रीणाममैथुनं जरा' इति नीतिवाक्यामृतादिवचनात् । अतः बाल्यावस्थायां बालिकायाः कृते विवाहे न गुल्मादिरोगाणां प्रसक्तिः इत्यस्मिन् महति गुणे संभाविते बालाविवाहे वृथा दोषोद्भावनेन किंप्राप्तमिति न विद्मः । तस्मात् अभिभावकानां प्रातिभाव्ये बालाविवाहे कृतेऽपि स्त्रीपुरुषसंसर्गस्य अप्रसक्त्या न कथमपि ब्रह्मचर्यस्य हानिः भवितुमर्हतीति बोध्यम् ।

विवाहकालबोधकवचनसमन्वयः ।

नन्वत्र षोडशेवर्षे विवाहः विधीयते धर्मशास्त्रे तु क्वचित् "त्रिशद्वर्षो वहेत्कन्या"मित्याद्यपि विहितमस्ति । तदनयोः कथं सामञ्जस्यं स्यात् ? इतिचेत् कामनापरतया तत्सङ्गमयितुं शक्यते । तथाहि—यदि स्वशाखामधीत्य अपरं वेदमध्येतुं वाञ्छति तर्हि अभिलाषानुसारेण अपरमधीत्य 'त्रिशद्वर्षानन्तरं स्नायात्' इत्याद्यभिप्रायेण 'त्रिशद्वर्षो वहेत्कन्यामि''त्यादिवचनानि सङ्गमनीयानि । एवमेव अन्यत्रापि बोध्यम् । एवं स्थिते कौटिल्येनाऽपि षोडवर्षे विवाहः उक्तः तस्यापि कारणं समस्तविलाससामग्रीसौलभ्येन राजपुत्रस्य कामिनीजिज्ञासाया उदयः । इत्येतत्सर्वं प्राङ्निरूपितमेव (पृ० ४२८) इति नात्र विवाहकालविधायकवचनानां विरोधो बोध्यः ।

'येषामिति' । (पृ० ४२८) विद्याभिजनदेशवृत्तशीलसंपन्नानामित्यर्थः ।

'तैरिति' । (पृ० ४२८) विद्याभिजनदेशवृत्तशीलसंपन्नैः सह संयोग इन्द्रियाणां

"ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम् ।
यद्याधत्ते पुमान् गर्भं गर्भस्थः स विपद्यते ॥
जातो वा न चिरं जीवेत् जीवेद्वा दुर्बलेन्द्रियः ।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत्" ॥

इति सुश्रुतवचनं दारुणप्रकृतिविषक भवति । तत्रैव प्राचीनलिखितपुस्तकेषु 'ऊनद्वादशवर्षायामिति पाठो दृश्यते । स पाठः वातज प्रकृतिविषये सङ्गच्छते । अतएव "पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता" इत्याद्यष्टाङ्गशारीरवचने 'प्रायिकं चैतत् अर्वागपि साधुगर्भदर्शनात्' इति व्याख्यातमरुणदत्तेन । तस्मात् सर्वसाधारण्येन ऋतुदर्शनमेव तत्र संयोगोपलक्षितःकालः संयोगयोग्य इति वक्तुं युक्तम् । एवं स्थिते उपरिप्रदर्शितं शास्त्रीयं सर्वं प्रकारं विहाय केवलं षोडशवयोमानमेव सर्वासां विवाहविषये निर्धारितं नानुमन्तुं योग्यमिति ।

जयमङ्गलाक्रोडपत्रम्

विरुद्धप्रतिपत्त्यभावाय[1] भवति इत्येतत् विद्यावृद्धसंयोगस्य फलं बोध्यम् ।

नित्यं संयोग इति । (पृ० ४२८) तदिदं "मधुमांसादि अवर्जयन् गुर्वधीनो भूत्वा स्नातकः वेदार्थं विचारयेत्" इति मीमांसकैरुक्तम् तदेवात्रापि बोध्यम् । तेन कृतेऽपि विवाहे देशस्य यथावत् स्थितिरक्षणात् राजा न कदापि स्वकर्मणः हीयेत इति तात्पर्यम् ।

दारकर्मानन्तरभाविफलम्

'कृतदारकर्मण' इति । (पृ० ४२८) दारकर्मणः पूर्वं न हि सर्वोऽपि कामसूत्रप्रभृत्यन्तर्गतव्यावहारिकविषयः वर्ज्यत्वावर्ज्यत्वज्ञापनदृष्ट्या ज्ञापनीयो भवति अतः दारकर्मानन्तरमेव विद्यावृद्धसंयोगस्य इन्द्रियाणां विप्रतिपत्त्यभावात्मकं फलं यथावद् राज्ञा ज्ञातुं शक्यते इति ध्वनितम् ।

कर्तव्यप्रयोजनासु इति । (पृ० ४२८) व्यापारव्यायामविद्यासु इति तदर्थः । तदुक्तम् जयमङ्गलायाम् "सत्योऽप्यन्याः कर्मविद्याः व्यापारव्यायामप्रयोजनाः नोक्ताः" इति (१ सर्ग प्र० ३) ।

कर्मविद्यानां वैशिष्ट्यम्

ननु कर्तव्यप्रयोजनासु इत्यनेन कर्मविद्यायाः ज्ञानविद्यापेक्षया वैशिष्ट्यं कीदृशमवगम्यते ? येन कर्तव्यप्रयोजनासु इति विशेषणं सार्थक्यं संभवेत् ? इतिचेन्निरूप्यते । विद्यायाः प्रयोजनं द्विविधमुपलभ्यते । एकं ज्ञानं, अपरञ्च तेन सह कर्माऽपि । तत्र उभयमपि उक्तं प्रयोजनं यत्र सा कर्मविद्या, तस्यां वार्ताराजनीतिश्च अन्तर्भवतः । अर्थात् सम्यग् अवगतापि वार्ता राजनीतिश्च विद्या तावत्पर्यन्तं पूर्णा न भवति यावत्पर्यन्तं तदुदितमनुष्ठाय नानुभूयते । अपरा तु विद्या ज्ञानमात्रेणापि साफल्यं भजते इति वार्ताशास्त्रं राजनीतिशास्त्रञ्च प्रयोगशास्त्रत्वेन व्यपदिश्यते शास्त्रेषु । आन्वीक्षिकी तु अनुमन्तव्यत्वात् विचारमात्रेणैव सफलाभवितुमर्हति । एवं त्रय्यपि धर्मं ज्ञापयन्ती न सर्वविधं स्वकीयं कर्म अनुष्ठातुं धार्मिकं प्रेरयति । यतः नित्यकर्मसु कानिचन तदङ्गानि यदि नानुष्ठीयन्ते तथापि नित्यकर्मानुष्ठितमितिकृत्वैव क्वचित् कदाचित् तदकरणप्रयुक्तप्रत्यवायपरिहाररूपं फलं संरक्षितुं शक्यते । एवमेव नित्यकर्मातिरिक्तविषयेऽपि यावान्विचारः अपेक्षितः स सर्वोऽपि त्रयीविद्यया कृतः । परं तत्काले तदनुबन्धी धर्मस्तु नानुष्ठितः । तावतापि न हानिः, कदाचिद् विलम्बेनापि सति संभवे नित्यकर्मातिरिक्तकर्मणामनुष्ठातुं शक्यत्वात्, असामर्थ्ये तदकरणे प्रत्यवायाभावाच्च । अतः त्रयीविद्यायाः नाऽयं आग्रहः यत् तदुदितः सर्वोऽपि धर्मः सर्वदा अनुष्ठेय एवेति । एवं स्थितिः वार्ताराजनीतिशास्त्रविषये नाऽस्ति । तदुदितं कर्म यत् यदा अपेक्षितं तदा अधिकारिणा नानुष्ठीयते तर्हि तत्कर्महान्या अर्थस्य जनानुरागस्य च दृष्टस्य हानिः प्रसज्येत ।

तदुक्तम्— १ शास्त्राय गुरुसंयोगः शास्त्रं विनयवृद्धये ।
विद्याविनीतो नृपतिः न कृच्छ्रेष्ववसीदति ।
ज० म० स्थैर्यं प्रतिपत्त्यसंमोहाद् इत्यादि ।

जयमङ्गलाक्रोडपत्रम्

वार्ताराजविद्ययोः कर्मविद्यात्वम्

किञ्च आन्वीक्षिकीं त्रयीं च विद्यां अधीत्य यदि तदुदितमध्येत्रा नानुष्ठीयते तर्हि तदपराधात् स्वस्य स्ववंशस्य वा हानिः संभवेत् । वार्ताराजनीतिशास्त्रयोः अननुष्ठाने तु न केवलं एकस्यैव हानिः अपितु समस्तस्य देशस्य हानिः प्रसज्येत इति कर्तव्यप्रयोजनासु इति विशेषणेन जयमङ्गलाकृता वार्ताराजनीतिशास्त्रयोः कर्मविद्यात्वं प्रतिपादितम् ।

ननु आन्वीक्षिक्यादिविद्याचतुष्टये ज्ञानविद्यात्वमस्तीति प्रतिपाद्यते तदुक्तं 'धर्मार्थौ यद्विद्यात् तद्विद्यानां विद्यात्वमिति' । कर्मविद्यात्वं तु आन्वीक्षिक्यादिचतुष्टयात् पृथक्भूतासु विद्यासु अस्ति इति प्रतिपादितम् । तदुक्तं नीतिसारे—

'विद्याभिराभिनिपुण चतुर्वर्गमुदारधीः' ।

विद्यात् तदासा विद्यात्वं विदज्ञाने निगद्यते ॥ इति ।

अत्र तु कर्तव्यप्रयोजनासु इति ग्रन्थेन वार्ताराजनीतिविद्ययोः कर्मविद्यात्वं कथं प्रतिपाद्यते ? इति चेन्न । 'चतस्र एव विद्याः' इति व्याख्याने दत्तोत्तरत्वात् । (पृ० ८६) अत्र कर्मविद्यात्वं न तदुक्तन्यायेन द्रष्टव्यमपि तु दृष्टफलानुसारेण वार्ताराजनीतिशास्त्रोदितं कर्तव्यमेव अन्यथा दृष्टस्य देशस्य च हानिः स्यात् । नेईदृशी महती हानिः आन्वीक्षिकीत्रय्युदितकर्माननुष्ठाने । इत्येवंरीत्या नात्र विरोधो मन्तव्यः ।

'वार्ताराजनीतिशास्त्रयोः प्रयोगविधानं सार्वदिकम्

ननु वार्ताराजनीतिशास्त्रोदितं कर्म प्रयोगात्मकमस्तीति कृत्वा अनयोः शास्त्रयोः प्रयोगशास्त्रत्वं भवतीति कथने सकृदनुष्ठानेनापि तयोः प्रयोगशास्त्रत्वं मन्तव्यमथवा सदा तदनुष्ठानेऽवधातव्यम् ? इति चेत् सदा अवधातव्यमित्युच्यते । यतः—वार्ता लाभार्था वर्तते । लाभश्च अर्थस्य अभिप्रेतः । यदा हि अर्थः सञ्चितो भवति सञ्चेतव्यो वा तदा तद्ग्रहणाय अन्येऽपि सर्वदा चेष्टन्ते प्रतिक्षणमर्थलुण्ठनाय मनोवृत्तीनां विभेददर्शनात् । किञ्च सदा अर्थलाभाय तत्कालं प्रयोगभेदः वार्ताध्यक्षेण पुनः पुनः कल्पनीयो भवति । यदि तत्र विलम्बो भवति तर्हि वार्ताया उच्छेदाल् लोकस्यापि उच्छेदः संभाव्यते[1] इति । एवमेव वार्तासदृशी स्थितिः राजनीतावपि वर्तते,

'स्वल्पेनाप्यपचारेण ब्राह्मण्यमिव दुष्यती'ति वचनात् ।

किञ्च राजनीतिविषये काकणिकामात्रमपि राजा भ्रान्तः सन् वर्तेत तर्हि सः स्वयं परिणामे असह्यदुःखभागित्येव न, अपि तु विद्यानां समस्तानां सतीत्वं,

---

१ तदुक्तम्—वार्ताच्छेदे हि लोकोऽयं श्वसन्नपि न जीवति ।
पाशुपाल्यं कृषिःपण्यं वार्ता वार्ता तु जीवनम् ।
संपन्नो वार्तया साधु नावृत्तेर्भयमृच्छति ।

जयमङ्गलाक्रोडपत्रम्

वर्णाश्रमानां प्रतिष्ठितत्वञ्च सत् अपि, असदिव भवत् देशे व्यामोहाय कलहाय मात्स्यन्यायप्रसरणाय च सहायकं भूत्वा देशपारतन्त्रस्य आपादकं स्यात्[1]।

अपि च भूतकालीनलोकमनोवृत्तिवैचित्र्यानुसारेण पूर्वं निर्णीतं नीतिप्रयोगं तदोयोत्तरमनोवृत्तिवैचित्र्यं प्रहापयति इति, चपलेयं राजनीतिः अतीव एकाग्रचित्तेन राज्ञा सदा प्रयोक्तव्या भवति, किं केन कदा कर्तव्यमिति निर्णेतुं अशक्यत्वात् स्वत एव अनूचानेन भूत्वा राजनीतिप्रयोगस्य निर्णेयत्वाच्च। अतो वार्ताराजनीतिशास्त्रयोः प्रयोगशास्त्रत्वं अनुमतमिति तयोः सर्वदा देशकालभेदेन पृथक् पृथक् प्रयोग भेदविषये अवधातव्यम् तदुक्तम् नीतिसारे—

प्रादुर्भवन्त्यर्थसमं यस्माच्चित्तान्यनुक्षणम्।
तस्माद् योगीव सततं भावयेत् सुसमाहितः॥ इति।

नीतिप्रयोगभेदोऽदृष्टोत्पादकः

न चैवंरीत्या राजनीतिप्रयोगस्य देशभेदेन कालभेदेन च पृथक् पृथक् कल्पने तस्य अदृष्टार्थत्वमास्तिकैः शब्दप्रमाणवादिभिर्वा नानुमन्येत इति वाच्यम्, पृथक् पृथक् प्रयोगभेदस्य अपच्छदन्यायेन अदृष्टोत्पादकत्वमस्तीति मीमांसकैः स्वीकृतत्वात्[2]।

---

१ तदुक्तम्—आन्वीक्षिको त्रयो वार्ताः सतीर्विद्याः प्रचक्षते।
सत्योपि हि न सत्यस्ता दण्डनोतेस्तु विभ्रमे॥
दण्डनीतिर्यदा सम्यङ्नेतारमधितिष्ठति।
तदा विद्याविदः शेषाः विद्याः सम्यगुपासते॥
वर्णाश्चैवाश्रमाश्चैव विद्यास्वासु प्रतिष्ठिताः।
रक्षेत्ता रक्षणात्तासां तद्धर्मस्यांशभाङ् नृपः॥ इति।

२ तदुक्तम्—अपच्छेदाधिकरणे शास्त्रदीपिकायां अ० ६ पा० ५ अ० १७, १८, १९
उद्गातुः प्रतिहर्तुश्च सहापच्छेदनेऽस्ति न।
प्रायश्चित्तमुतास्त्यत्र, न निमित्तविघाततः॥
एकैकस्यैव विच्छेदकर्तृत्वान्नु विहन्यते।
कालमात्रं तु तत्रैकं प्रायश्चित्तमतो भवेत्॥

'ज्योतिष्टोमे बहिष्पवमानं प्रसर्पतां यदि प्रस्तोतापच्छिन्द्याद्ब्रह्मणे वरं दद्यात् यदि प्रतिहर्ता, सर्ववेदसं दद्यात् यद्युद्गातापच्छिन्द्याददक्षिणं तं यज्ञमिष्टवा तेन पुनर्यजेत तत्र तद्दद्याद्यत्तस्मिन् दास्यन्स्यादिति तद्यदोद्गातृप्रतिहर्त्रोर्युगपदपच्छेदो भवति तदा किं प्रायश्चित्तं कर्तव्यं नवेति संशयः। तत्रोभाभ्यां क्रियमाणोऽपच्छेदो नैकेन व्यपदेष्टुं शक्यते। तस्माद्यौगपद्ये निमित्तविघातात् प्रायश्चित्तं न कर्तव्यम्।

'स्यादेवं यदि कर्तृत्वं सापेक्षमुभयोर्भवेत्।
एकैकस्य तु यत्नेन निरपेक्षेण जायते॥
विच्छेदस्तेन कर्तृत्वं द्वयोः प्रत्येकमस्ति नः।
कालमात्रं नु तत्रैकं प्रायश्चित्तमतो भवेत्॥

जयमङ्गलाक्रोडपत्रम्

अपच्छेदन्यायस्य लौकिकता

न च अपच्छेदन्याये अदृष्टार्थत्वस्य शोभनीयत्वेऽपि दृष्टव्यवहारे स न सुचिन्त्य-इति वाच्यम्, चिकित्साप्रसङ्गे अस्य न्यायस्य क्लृप्तत्वात्। तद्यथा—सन्निपातव्याधिः अतीव दुःश्चिकित्स्यो भवति प्रतिक्षणं विजातीयदोषाणामभिवृद्धिसंभवात्। यस्मिन् क्षणे वायुं प्रकुपितं दृष्टवा तत्प्रशमनाय वैद्येन चिकित्सार्थमौषधानि उपयोक्तुं प्रारभ्यन्ते। तस्मिन्नेव क्षणे पित्तस्य विकृतिः यदि उद्भूता भवति तर्हि पूर्वं कल्पितां चिकित्सापद्धतिं त्यक्त्वा अन्या पद्धतिः उपयोक्तव्या भवति वैद्येन, वायुं प्रशमय्यैव तदानां पित्तस्य समुद्भवात्। एवमेव कफादीनां विकृतावस्थायां बोध्यम्। सेयं चिकित्सापद्धतिः मीमांसकैः निर्दिष्टां अपच्छेदन्यायसरणिमनुमापयति। अर्थात् यथा सन्निपातदौ पूर्वं सञ्जातदोषं प्रशमय्य अनन्तरं दोषान्तरस्य यथा यथा प्रकोपो भवति तथा तथा तदनुसारेण चिकित्सापद्धतिरपि विभिद्यते। तथैव पूर्वस्य अपच्छेदे पूर्वं संजातमपच्छेदसूचितं दुरदृष्टं प्रशमय्यैव अपच्छेदान्तरस्य तत्सूचितस्य दुरदृष्टस्य संभवात् पूर्वजनितापच्छेदसूचितदुरदृष्टस्य विनाशार्थं यत्प्रायश्चित्तं कल्पितमासीत् तस्य द्वितीयापच्छेदादृष्टसूचितदुरदृष्टसमये-पूर्वसञ्जातापच्छेदसूचितादृष्टविलोपात् पूर्वं निर्णीतं कर्तव्यं प्रायश्चित्तात्मकं बाधितं भवति अतः प्रायश्चित्तान्तरं कल्प्यं इति अपच्छेदन्यायः न लौकिक कल्पनातीत इति भावः। एवञ्च प्रतिक्षणं विभिन्नापच्छेदप्रसङ्गे प्रयोगा अपि विभिन्ना विभिन्ना एव कल्पयितव्या भवन्ति। पुनः तेषां शास्त्रसम्मतत्व-ञ्चास्ते। एवं अपच्छेदन्यायेन कल्पिते निमित्तभेदानुसारिणि प्रायश्चित्तान्तरेपि च। तथा वार्तांराजनीतिशास्त्रप्रयोगस्य प्रतिक्षणं निमित्तभेदेन विभिन्नतया विभिन्न-तया कल्पनीयत्वेऽपि शास्त्रसम्मतत्वमस्त्येवेति ध्येयम्।

शास्त्रनिर्णस्य नापच्छेदन्यायेन बाधः

नचैवं उक्तापच्छेदन्यायेन इदमवगम्यते यत् उत्तरकाले सञ्जातनिमित्तेन पूर्वनिमित्तजनितं फलं बाध्यते तर्हि शास्त्रनिर्णयानन्तरभवेन लोकनिर्णयेन शास्त्रनिर्णयोपि बाध्यताम् इति वाच्यम्। शास्त्रनिर्णयबाधस्य लोकनिर्णयेन शास्त्रविपरीतेन असर्वज्ञप्रणीतेन भ्रमप्रमादादि दोषकवलितेन अननूचान कलृप्तेन बाधितुमशक्यत्वात्।

प्रयोगभेदे नियामकं

अत्रेदं तत्वं यद्यपि प्रतिक्षणं राजनीतिप्रयोगाः कल्पनीया भवन्तीति सिद्धम् तथापि ते शास्त्रं तन्निष्णात गुरुञ्च उपेक्ष्य न कल्पनीयाः अन्यथा तथाकरणे महत्या हानेः प्रसङ्गात्। तदुक्तं "दण्डनीतिं वक्तृ—प्रयोक्तृभ्यः" इति। हान्युदाहरणं टिप्पण्यां व्यक्तम्[1]।

---

१ अकृत्वा गुरुं यदि कश्चित् कञ्चन प्रयोगं पूर्णतया अवगन्तुं चेष्टते तर्हि सः तत्र सफलो भविष्यतीति न विश्वसितुं शक्यते। एतद्विषये काचन लौकिकी कथा श्रूयते।

गूजासञ्ज्ञकं पात्रं द्रविड़देशे प्रसिद्धमस्ति तस्य कांस्यमयस्य निर्मितिकलां जानानः द्रविड़देशे कदाचित् एक एव आसीत्। 'कश्चिदपरः गुरुम—

पूर्वमहर्भागं[1] हस्त्यश्वरथप्रहरणविद्यासु विनयं[2] गच्छेत्, पश्चिममितिहास-

जयमङ्गलाक्रोडपत्रम्

टिप्पण्युक्तेतिहासस्य एतत्फलमस्ति यत् यावत्पर्यन्तं गुरुद्वारा शिष्टाचारः सुदृढः शोभनीयो ज्ञातो न भवेत्। तावत्पर्यन्तं विद्यायाः परिपाकस्थानीयं प्रतिबोद्बोध-द्वारा प्राप्तव्यं यच्छ्रेयः तत् कदापि सुचारुतया न समुत्पत्स्यते। स्वकल्पिते विचारे अप्रमितत्वसंभावनासंभवात्। तत्र प्रमाणं अधोनिर्दिष्टं न्यायसूत्रं द्रष्टव्यम्।

"तं गुरुशिष्यसब्रह्मचारिशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेया"दिति। यद्यपि उपर्युक्तं फलमत्रः सूत्रे नोपवर्णितं तथापि उपर्युक्तं निःसन्दिग्धत्वं 'तं गुरुशिष्यादि-सूत्रविवरणदर्शनात् स्फुटं भवति।

नीतिसारस्य विद्यानिरूपणे न्यूनतापरिहारः

नन्वेवं कर्तव्यप्रयोजनासु इत्यादिना कर्मविद्याः उल्लिखिताः। नीतिसारकृता तु तासां उल्लेख एव न कृत इति तस्य न्यूनत्वं स्यादिति चेन्न। नीतिसारकारमतेन ज्ञानविद्यानां प्राधान्यमधिकृत्यैव विद्याविभागप्रकरणप्रणयनात्। तदुक्तं जयमङ्गलायां नीतिसारव्याख्यायां "आन्वीक्षिक्याद्या ज्ञानविद्या इति दर्शयती"ति।

श्रीमूला

भूयः कलाभ्यासं राज्ञ उपदेष्टुमाह—पूर्वमिति। पूर्वम् अहर्भागम् अत्यन्त-संयोगे द्वितीया। हस्त्यश्वरथप्रहरणविद्यासु हस्तिचर्यायामश्वचर्यायां रथचर्यायाम् आयुधविद्यायां च, विनयं शिक्षां, गच्छेत्। पश्चिमं तृतीयमहर्भागम्, इतिहासश्रवणे,

---

कृत्वैव उक्तपात्रनिर्माणकलामपहर्तुकामः तन्निर्मितिकलाशालायामुपस्थितोऽभूत्। दूरे स्थित्वा तेन गूजापात्र निर्माणपद्धतिं विलोक्य उक्तपात्रं निर्ममे। परन्तु इदं हि गुरुमपृष्ट्वा अपरेण निर्मितं पात्रं चालनीयवत् अनेकछिद्रसंपन्नमभूत्। तस्य निराकरणोपायं कृतेऽपि प्रयत्ने सः नाजानात्। पर्यन्ते दीनो भूत्वा उक्तपात्रनिर्मिति कलाविदं छिद्रकारणं पप्रच्छ। सोऽवोचत्। यस्मिन् समये कांस्यरसः उक्तपात्र-निर्माणाय मूषायां प्रक्षिप्यते। तस्मिन्नेव समये मूषयाः अन्तः संभूता बालुकाकणाः आध्मानेन आदौ अपसारयितव्याः ततः कांस्यरसः मूषायां निक्षेप्तव्यः इति। एवं रीत्या कर्मप्रधानानां, विद्यानामध्ययनं गुरुसेवाद्वारा यथावत् बोधपर्यन्तं आलाभं कर्तव्यं भवति। इति।

नी० टि० १ **पूर्वमिति**। भोजनकालात् प्राक्।

,, २ **विनयमिति**। तद्विद्यावृद्धसंयोगात्।

श्रवणे[१]। [२]पुराणमितिवृत्तमाख्यायिकोदाहरणं[३] धर्मशास्त्रं अर्थशास्त्रं चेतीतिहासः।

श्रीमूला

विनयं गच्छेत्। इतिहासपदार्थविवरणं पुराणमित्यादि। पुराणं ब्राह्मादि। इतिवृत्तं श्रीरामायणमहाभारतादि। आख्यायिका दिव्यमानुषादिचरित्रम्। उदाहरणं न्यायोपन्यासशास्त्रं मीमांसादि, धर्मशास्त्रं औशनसबार्हस्पत्यादि।

वैदिकसिद्धान्तसंरक्षिणी

उक्तं विद्यावृद्धानां नित्यसंयोगं समयं विभज्य प्रदर्शयति। पूर्वमिति। भोजनात्[४] पूर्वं इति मन्तव्यम् आयुर्वेदे भोजनोत्तरं व्यायामस्य निषेधात्।

विनयं ज्ञानक्रिययोर्वैचक्षण्यं तयोर्नैपुण्यमिति यावत्। गच्छेत् प्राप्नुयात्।[५] भोजनोत्तरं विनयग्रहणोपायमाह पश्चिममिति। भोजनोत्तरं सुखेन निवेशनपूर्वकं इतिहासादीन् श्रुणुयात्। तेन भुक्तमपि सम्यक् जीर्णं भवति[६]। तथा च पुराणश्रवणादिभिः राजानीतिं सुखेन यथावद्विजानीयादिति भावः। तदेवोक्तम् टीकायां सुखासीन इत्यादि। गणपतिशास्त्रिणस्तु पश्चिमं भागमित्यस्यार्थः "दिवसस्य तृतीयं भाग"मिति व्याख्यान्ति। इतिहासस्य पारिभाषिकीं व्याख्यामाह पुराणमित्यादि। भुवनकोशादी[७] इति टिप्पण्याम्। वस्तुतस्तु पुराणं सृष्ट्यादिज्ञानफलम् जयमङ्गलायां उक्तम्। (कामन्दक नीतिसार सर्ग-२) तत्र धर्मादीनां निरूपणं तु स्थित्यर्थमुक्तम् इति बोध्यम्। पुराणविषये हाजरामहोदयेन तथा बल्लासेनेन दानसागरग्रन्थ निर्मात्रा प्रक्षेपादिदोषा आशङ्किताः तेषां निरासः जयमङ्गलाक्रोडपत्रे टिप्पण्यां निरूपितः। इतिवृत्तं भूतपूर्वाणां चरित्रं नीतौ फलोपधायकत्वनिर्णायकम्। तत्रापि वर्तमानस्य राज्ञः पुरतः दृष्टान्तरूपेण रूपकादौ भूतपूर्वाणां राज्ञां वास्तविकं चरित्रमेव आदर्शरूपेण निर्णायकं[८]। इत्यसाधारणं प्रयोजनमस्य ज्ञेयम्। आख्यायिकोदाहरणं पञ्चतन्त्रादि[९]।

नो० टि० १ **इतिहासेति।** इति एवं ह स्फुटम् आस भूपभुवनकोशादिकम्।

,, २ **इतिवृत्तमिति।** इति राज्ञो वृत्तं नयानयाभ्यां सम्पत्तिविपत्तिप्रदर्शनार्थं भारतरामायणादि।

,, ३ **उदाहरणमिति।** असम्भूतकथावाक्यमुक्तप्रत्युत्तरान्वितम्। निदर्शनार्थमन्येषा--मुदाहरणमिष्यते।

४--भोजनकालात् प्राक् (नीतिनिर्णीतिः)-　　५ तद्विधावृद्धसंयोगात्—(नीतिनिर्णीतिः)-

६. शब्दान् रूपान् रसान् गन्धान् स्पर्शांश्च मनसः प्रियान्। युक्तवानुपसेवेत तेनान्नं साधु तिष्ठति॥ सुश्रुत सू० ३६-८८८

७. भुवनकोशादीति टिप्पण्याम्-।

८. तदेवोक्तं टिप्पण्यामपि-इति राज्ञो वृत्तं नयापनयाभ्यां सम्पत्तिविपत्तिप्रदर्शनार्थं भारत रामायणादि।

९. असंभूतकथावाक्यमुक्तप्रत्युत्तरान्वितम्। निदर्शनार्थमन्येषामुदाहरणमिष्यते॥ यथा तन्त्रपञ्चकादि। इति।

वैदिकसिद्धान्तसंरक्षिणी

पशूदाहरणोपयोगः

ननु तन्त्रादौ पशूनामितिहासो वर्ण्यंते तस्य क उपयोगः ? उच्यते । पशवो हि सृष्टिकालादारभ्याद्यावधि एकस्वभावा दृश्यन्ते मनुष्यास्तु न तथा भवन्ति एवं स्थिते नीत्यनुष्ठानार्थं राजा मन्त्रिणा कस्य स्वभावं प्रदर्श्य प्रेरणीयो बोधनीयो वा ? इति प्रश्ने पशूनां स्वभाव उदाहरणरूपेण प्रदर्शयितुं शक्यते । यथा निद्रा वर्तमान समये अमुकस्य मनुष्यस्य कीदृशी वर्तते इति वक्तुं न शक्यते तत्रोदाहरणं श्वनिद्रेव[1] भवति इत्यसाधारणं प्रयोजनं बोध्यम् । शेषं तु जयमङ्गलायां क्रोडपत्रे च व्यक्तमेव । धर्मशास्त्रं मानवादि । अर्थशास्त्रं कौटिल्यप्रणीतधातुवादादि । इतीति । "अयं इतिशब्दः क्वचिन्नास्ति क्वचिदस्ति[2] । प्रस्तुतपाठे इतिशब्दस्य सार्थक्यं एवं बोध्यम् । इतिहासत्वस्य पर्याप्तिः पुराणाद्यर्थशास्त्रान्तेषु वर्तते इतिशब्दस्य प्रथमोपस्थितानां वाचकत्वात् । तेन एतेष्वन्यतमस्याध्ययने इतिहासाध्ययनं सम्पन्नमिति न वेदितव्यम् ।

जयमङ्गला

विनयं ज्ञानक्रियावैचक्षण्यं गच्छेत् । पश्चिममहर्भागं सुखासीनो विनोदधर्मजिज्ञासार्थम्, इतिहासश्रवणे विनयं गच्छेत् । कः पुनरितिहास इत्याह—पुराणमिति सृष्ट्यादिज्ञानफलम् ।तथा चोक्तम् —

सृष्टिप्रवृत्तिसंहारधर्ममोक्षप्रयोजनम् ।
ब्रह्मभिर्विविधैः प्रोक्तं पुराणं पञ्चलक्षणम् ।।इति।

इतिवृत्तं नयापनयाभ्यां सम्पत्तिविपत्तिप्रदर्शनफलं रामायणभारतादि । आख्याकियोदाहरणं वर्जनसेवनफलं तन्त्राख्यायिकादि । तत्र वर्जनफलं लोभोऽन्त्यन्तं न कार्य इति लोभस्य दोषोदाहरणम् "जम्बुको धनुषा हतः" इत्यादि । सेवनफलमपि

"प्रत्युत्पन्नेषु कार्येषु यस्य बुद्धिर्न हीयते ।
स निस्तरति दुर्गाणि जलमध्ये कपिर्यथा" ।। इत्यादि ।

धर्मशास्त्रम् मानवादि । अर्थसम्बन्धि यत्किञ्चत् धातुवादादिकम् तदर्थ शास्त्रमिह गृह्यते ।

---

१. सन्नद्धपार्श्वस्थितवीरयोधः सेवेत साध्वीं निशि योगनिद्रम् । इत्युक्तम् । (नीतिसार सर्ग १६।२४) तट्टीका-योगनिद्रां सेवेत मायानिद्रया सुप्यात् यथातुरङ्गह्रेषादिस्वनमपि श्रुत्वाप्रतिबुध्येत । इति जयमङ्गलायाम् । योगनिद्रामिति । योगीव निद्रावसरेपि सचेतन एवेत्यर्थः । इतिउपाध्यायनिरपेक्षायाम् ।

२. टिप्पणी पाठे ।

जयमङ्गलाक्रोडपत्रम्

पुराणविरुद्धेतिहासानां प्रामाण्यखण्डनम्

(पृ० ४३८) **इतिहास इति।** ननु पश्चिममितिहासश्रवणे इत्युक्त्वा कौटिल्येन इतिहासश्रवणं विहितं पर श्रवणविषयीभूतस्येतिहासस्य अधुना विसंवादोपलब्ध्या कथं प्रामाण्यमवगन्तव्यम् ? इति चेन्न।

पुराणेषु उपवर्णितस्येतिहासस्य सर्वांशेन प्रामाण्यं बोध्यम् महर्षिणा व्यासेन लिखितत्वात्, तद्विरुद्धस्येतिहासस्य अननुमतत्वात्। यत्र च पुराणविरोधो नाऽस्ति न वा विसंवादाद्युपलब्धिः तथाविधस्य आधुनिकेतिहासस्य प्रामाण्यकल्पनेऽपि न हानिरिति अन्यदेतत्। कौटिल्येन तु पुराणवर्णितस्येतिहासस्य अप्रामाण्यकल्पनायाः कदापि असंभवात् इतिहासपदार्थस्य वक्ष्यमाणे निर्वचनावसरे पुराणस्य ग्रहणं कृतम्।

वृत्तसार्थक्यम्

पुराणेन उपवर्णितं यत्किमपि अत्यावश्यकं सदपि अस्माभिः नीतिरूपेण अनुष्ठेयं न वेति पुराणतात्पर्यस्य नीतौ अभावात् सन्देहो जागरूको भवतीति वृत्तग्रहणं बोध्यम्। तेन अर्थशास्त्रे यः कार्यकारणभावः राजवृत्तानुष्ठाने निरूपितः तस्य बोधाय अन्वयव्यतिरेकावपि परिज्ञातव्यौ भवतः। तत्र घटकीभूतायाः व्याप्तेनिर्णयार्थं दृष्टान्तरूपेण इतिहासस्य उपयोगित्वं बोध्यम्।

(पृ० ४३८) **प्रवृत्तीति।** स्थितिरित्यर्थः सृष्टिसंहारयोमध्ये प्रवृत्तिग्रहणात्।

'पुराणसम्बन्धि हाजरामतखण्डनम्'

(पृ० ४३८) **पञ्चलक्षणमिति।** ननु पुराणे वर्णितस्य "सर्गश्च प्रतिसर्गश्चेति" पुराणलक्षणस्य विष्णुधर्मोत्तरपुराणादिषु असंभवात् पुराणत्वं नास्तीति श्रीहाजरागणनाथसेन प्रभृतिभिः साधितमस्ति तत् एतदीयेन जयमङ्गलास्थे पद्ये वर्णितेन सृष्टिस्थितिसंहारधर्ममोक्षसमुदायात्मकेन पुराणलक्षणेन परास्तम्। तदिदं विवरणं (टिप्पण्यां) उद्ध्रियते।

हाजरामतखण्डनम्

"पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥" (या० स्मृ० आ०३)

इति याज्ञवल्क्यस्मृत्युक्त्यनुसारेण पुराणानां धर्मप्रतिपादकत्वं परंपरागतं सत्सम्प्रदायसिद्धमिति सर्वे जानन्ति। न केवलमस्मदीयसत्संप्रदायसिद्धमपि तु बौद्धजयमङ्गलादिकृद्विवेचनेनाऽप्ययमंशः प्रमाणितो भवति। तथाहि तत्रत्यो ग्रन्थः—

"कः पुनरितिहास इत्याह पुराणमिति सृष्ट्यादिज्ञानफलम्।
तथाचोक्तम्—'सृष्टिप्रवृत्तिसंहार धर्ममोक्षप्रयोजनम्।

ब्रह्मभिर्विविधैः प्रोक्तं पुराणं पञ्चलक्षणम्" । इति ।

(कौ० अ० १-५ व्याख्या जयम०)

अनेन हि ग्रन्थेन धर्मविज्ञानमपि पुराणपञ्चलक्षणान्तर्गतमेकं लक्षणमिति प्रतीयते । एतदविरोध्येव याज्ञवल्क्यवचनं पुराणानां धर्मस्थानत्वं प्रतिपादयति । किं बहुना । "सृष्टिप्रवृत्तिसंहारे" त्युक्ते वचने स्थितिपर्यायायाः प्रवृत्तेरुपादानाद् व्यावहारिकाणां विषयाणामपि प्रतिपादन युज्यते इति स्फुटम् ।

"भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ।
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ।" (भाग २, १-३)

इति श्रीमद्भागवतेऽपि पुराणस्य पञ्चलक्षणान्तर्गतो मन्वन्तरभागः सद्धर्मः इत्युक्त्या पुराणानां धर्मप्रतिपादकत्व व्यवस्थाप्यते । अतोऽस्त्येव पुराणेष्वपि धर्मशास्त्रस्यान्तर्भाव इति सिद्ध्यति ।

कथ तर्हि याज्ञवल्क्यवचने धर्मशास्त्राणां पुराणेभ्यः पृथग्गणनमिति प्रश्नस्त्वनुचितः, प्रसङ्गाद् धर्मप्रतिपादनस्यैव पुराणविषयत्वात् प्राधान्येन धर्मशास्त्रस्य धर्मप्रतिपादनविषयत्वेनाविरोधाच्च । 'तत्वमसी'ति वाक्यघटकत्वंपदार्थकर्मकर्तृजीव स्वरूपविशुद्ध्यर्थं धर्मशास्त्राणां, तत्पदार्थेशस्वरूपविशुद्ध्यर्थं पुराणानां प्राधान्येन प्रवृत्तिरिति सिद्धान्तो माधवाचार्यैः सूतसंहितान्तर्गतस्य—

"ब्रह्मा सर्वजगत्कर्ता शिवस्य परमात्मनः ।
प्रसादादेव रुद्रस्य स्मृतीः सस्मार सुव्रतः ।" (सूत सं० १,४१)

इति श्लोकस्य व्याख्यानावसरे निर्णीतः । तद्यथा —

"वेदे हि द्वौ भागौ कर्मभागो ज्ञानभागश्चेति । आद्यस्यार्थः स्मृतिमुखेन ब्रह्मणा शिवाज्ञयैव व्याख्यातः । द्वितीयस्य तु विष्णुना व्यासरूपेणावतीय पुराणमुखेनेति स्मृतिपुराणानां वेदमूलता न स्वातन्त्र्यमित्यर्थः ।

यद्यपि स्मृतिष्वपि विद्यानिरूपणमस्ति, तथापि तत् प्रासङ्गिकद्रव्यशुद्धिप्रसङ्गेन हि कथितम् "क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता" इति चतुर्थाश्रमधर्मप्रसङ्गेन चौपनिषदतत्वनिरूपणं कृतमिति । पुराणानां तु विद्याप्राधान्यम् , प्रासङ्गिकं कर्मनिरूपणम् । पुराणेषु हि जगदुत्पत्तिस्थितिलयकारणत्वं शिवस्याभिप्रेत्योत्पत्तिकारणत्वं सर्गेणोक्तम् । प्रलयकारणत्वञ्च, प्रतिसर्गेण, स्थितिकारणत्वञ्च वंश-मन्वन्तर- वंशानुचरितनिरूपणेन । तत्प्रसङ्गादाश्रमधर्मा आगता इति । अतएव धर्मविषये स्मृति-पुराणविप्रतिपत्तौ स्मृतीनां प्राबल्यं तत्र तासां तात्पर्यात् इति, तत्वज्ञानविषये पुराणप्राबल्यमितिविवेकः" इति ।

इह केचिदाधुनिका इतिहाससंशोधका आहुः ।

"पुराणानि स्वप्राचीनतमस्वरूपे केषां केषां विषयाणां प्रतिपादकान्यासन्निति न निश्चयेन वक्तुं शक्यते । अमरकोषस्य वर्तमानानामनेकेषां पुराणानां चानुसारेण

पुराणेषु सर्गः प्रतिसर्गः वंशो मन्वन्तराणि, वंशानुचरितं चेति पञ्चविषया आवश्यकाः एतेषां पञ्चानामपि लक्षणानां मूलमाख्यानम्, उपाख्यानम्, गाथा, कल्पोक्तिश्चेति चतुष्टयमेव। ब्रह्माण्ड, २-३४-२१, वायु ६०-२१, विष्णु ३-६-१६, एतेषां वचनानामनुसारेण महर्षिव्यासः उक्तचतुष्टयमवलम्ब्यैव पुराणसंहितां रचयामासेति सिद्ध्यति। अतः पुराणैः स्वप्राचीनस्वरूपे सर्गादिपञ्चविषयाणामेव प्राधान्येन वर्णनं क्रियते स्मेत्यत्र नास्ति सन्देहः। परन्तु वर्तमानेषु पुराणग्रन्थेष्वेतेषां विषयाणां क्वचित्पूर्णतया क्वचिदंशतयोपेक्षा कृता वर्तते। धार्मिकेभ्यः सामाजिकेभ्यश्च विषयेभ्योऽत्यन्तं महत्वं दत्तमित्युपलभ्यते। येषु पुराणेषूक्तलक्षणानां पूर्णतयांऽशतो वा वर्णनं दृश्यते, तेष्वपि धार्मिकाणां स्मार्तानां च विषयाणां बर्णनमस्तीति।

(हाजरा, पुराणिक रिकार्डस पृ० ४-५ -

"यदा धार्मिकेषु स्मार्तेषु च विषयेषु पुराणानां प्रामाण्यमङ्गीकृतम् तदा पुराणानां मुख्यविषयेषु पञ्चसु लक्षणेषु लोकानां धारणा एतादृशी संपन्ना यत्—एतानि पञ्चलक्षणानि केवलमुपपुराणानामेव, महापुराणानां तु दशलक्षणान्यावश्यकानि, येषु धार्मिकाणां स्मार्तानाञ्च विषयाणां प्राधान्यं स्यादिति। अतो राज्ञामृषीणां च वंशं वंशानुचरितं च शुद्धया ऐतिहासिकदृष्ट्या अलिखित्वा प्रायः कल्पनैवाश्रितेति"। (हाजरा, प्र० रि० पृ० ७)

"अमरकोषस्यानेकेषां पुराणानां चानुसारेण सर्गादयः पञ्चैव पुराणानां विषयाः। 'वंशानुचरित' मित्यत्र 'भूम्यादेः संस्थानम् इति पाठोऽप्युपलभ्यते, यस्यार्थः 'पौराणिको भुवनकोषः' इति। परन्तु वर्तमानेषु पुराणेषु यत्किमपि पुराणमेतस्याः पञ्चलक्षणरूपायाः परिभाषाया अनुसरणं पूर्णतया न करोति। केषुचित्पुराणेषु पञ्चलक्षणापेक्षयाऽधिका एव विषयाः उपलभ्यन्ते। केषुचिच्चैतेषां पञ्चविषयाणां किमपि वर्णनं नोपलभ्यते। प्रत्युत एतत्स्थानेऽन्येषामेव विषयाणां विस्तारो दृश्यते। किञ्च वर्तमानकाले उपलब्धेषु पुराणेषु चत्वारिंशत्तमोंऽश (१।४०) एवोक्तलक्षणप्रतिपादकः। एतेनेदं सिद्ध्यति, यत्—प्राचीनपुराणानां मुख्यः प्रतिपाद्यो विषयो धर्मोपदेशो नासीत्, तानि च मूलस्वरूपे सांप्रदायिकभावनया न रचितान्यासन्निति। वर्तमानपुराणेषु हि दानव्रत-तीर्थ—श्राद्धादिधार्मिकविषया एव मुख्यसामग्रीत्वेन वर्तन्ते। ये खलूक्तपञ्चलक्षणेष्वन्तर्गतन्न भावयन्ति तथा पुराणानां पञ्चलक्षणपरिभाषां चावास्तविकतया केवलं सैद्धान्तिकीं कुर्वन्ति। तैरिमां दुरवस्थामपनेतुं पुराणेष्वेवायं सिद्धान्तः स्थापितो यत् पञ्चलक्षणानि केवलमुपपुराणानां, परिभाषा तु दशलक्षणरूपा, यस्यां प्रवृत्तिः, रक्षा, मुक्तिः, हेतुः, अपाश्रयश्चेति धार्मिकविषया अपि अन्तर्भवन्ति। वर्तमानपुराणस्थाः केचन विषयाः पुनर्दशलक्षणेष्वपि नान्तर्भवन्ति। यथा—मत्स्यपुराणानुसारेण ब्रह्म-विष्णु-शिव-सूर्यादीनां माहात्म्यवर्णनं धर्मार्थकाममोक्षप्रतिपादनं चोक्तलक्षणातिरिक्तः पुराणानां विषयो वर्तते" इति।

'पुसालकर, स्टडीज् इन् एपिक्स एण्ड दी पुराण भूमिका पृ० ४५-४६

"प्रसिद्धसंस्कृतकोषभूते अमरकोषे अनेकेषु पुराणेषु च पुराणानां पञ्चलक्षणानि उक्तानि। परन्तु 'किरफिल' महोदयेनैतत्प्रदर्शितम् यत् पञ्चलक्षणानि तु पुराणानां चत्वारिंशत्तमांशरूपाण्येव भवन्ति। अतोऽवशिष्टानामेकोनचत्वारिंशदंशानाममरकोशानुसारेण पुराणत्वं न सिद्ध्यतीतीयं परिभाषा न युक्ता। पुराणानां मुख्यं लक्षणमिदमेव यत् पुरानत्वम्, अतो यः कोऽपि पुरातनो विषयः पुराणप्रतिपाद्यो भवितुमर्हति। एवञ्च जीवनविषयकः सर्वोऽपि पक्षः पुराणान्तर्गतो भवतीति।

श्रीमद्भागवते पुराणानां दशलक्षणान्युक्तानि, किन्तु इमान्यपि चतुर्लक्षश्लोकपरिमितेषु पुराणेषु सम्पूर्णतया व्याप्तानि न भवन्ति मत्स्यपुराणस्थिता पुराणपरिभाषा तु बुद्धिसङ्गता वर्तते। तदनुसारेण सर्वेषु पुराणेषु सर्गादिपञ्चविषयातिरिक्ततया ब्रह्मविष्णुशिवार्कादीनां माहात्म्यस्य, संस्सारस्थितिसंहारयोर्धर्मार्थकाममोक्षाणाञ्च वर्णनमावश्यकं तद्विरुद्धविषयाणां च। पुराणप्रतिपाद्यविषयविषयकं पुराणस्थमेवेदं वचनं यद्यप्यधिकतया व्यापकं भवति, तथापि पुराणस्थान् सर्वानपि विषयान् न व्याप्नोती"ति।

(Harprasad Shastri Asiatic Society Sanskrit Catalogue भाग ५ भूमिका)

"वर्तमानपुराणानीव, पुराणनामयोग्यानि प्राचीनपुराणानि न सन्तीदं तथ्यं। वर्तमानपुराणेषु यत्किमपि पुराणं पुराणोक्ताया एव पञ्चलक्षणपरिभाषाया अनुसरणं न करोतीत्यनेन प्रमाणितं भवति। प्राचीनपरिभाषामनुसृत्य प्रत्येकस्मिन् पुराणे सर्गः, प्रतिसर्गः, वंशः मन्वन्तराणि वंशानुचरितम् अर्थात्—सूर्यवंशीयानां वा रक्षां चरितंचेति पञ्चलक्षणान्यावश्यकानि। वर्तमानकाले यानि लक्षणान्युपलब्धानि तत्रोक्तपञ्चलक्षणात्मकस्त्वांशिक एव विषयो वर्तते। केषुचित्पुराणेषु एतदपेक्षया अधिका एव विषयाः सन्ति। कानिचन पुराणान्येतेषां स्पर्शमपि न कुर्वन्ति। सर्वथा भिन्ना एव विषयास्तत्र निरूप्यन्ते। प्रायः सर्वेषां वर्तमानपुराणानां विषये विशेषरूपेणोल्लेखनीयोऽयं विषयो यदेतेषां साम्प्रदायिकतास्वरूपम्, अर्थात् विष्णुशिवादिदेवेषु केनचित् सम्बद्धता यस्याः प्राचीनपञ्चलक्षणपरिभाषया पूर्णतयापेक्षा कृता वर्तते।

येषु पुराणेषु प्राचीनस्वरूपं केनचिदंशेन सुरक्षितमस्ति, तेषु सृष्टिरचनायाः, आद्यकालीनेतिहासस्य च प्रकरणान्युपलभ्यन्ते। एवं पञ्चलक्षणपरिभाषानुसारेण मूलभूतयोः सूर्यचन्द्रयोर्वंशीयानां महाभारतकालीनवीरपर्यन्तानां प्राचीनानां राज्ञां वंशावल्यपि तत्रोपलभ्यते" इति।

(विंटरनिटज, हिस्ट्री ऑफ इन्डियन लिटरेचर पृ० ५२२–३)

"अनेकेषु पुराणेषु प्रसिद्धेषु कोशेषु वोपलब्धायाः परिभाषाया अनुसारेण पुराणानां पञ्चलक्षणानि भवन्ति, सर्गः प्रतिसर्गः मन्वन्तराणि प्राचीनराजवंशावली तथा वंशावलीस्थव्यक्तीनां चरितं चेति। यद्यपि वर्तमानकाले उपलब्धेषु पुराणेषु यत्किमपि पुराणमेतस्याः परिभाषाया अक्षरशोऽनुसरणं न करोति, तथाप्यनेकेषु

पुराणेष्विमानि पञ्चलक्षणानि बीजरूपेण सुरक्षितानि सन्ती''ति (घोषाल ४ स्टडोज इन् इन्डियन हिस्ट्री एण्ड कल्चरी १–५१)

अत्र ब्रूमः।

सृष्टिप्रवृत्तिसंहारधर्ममोक्षप्रयोजनम् ।
वहुभिर्विविधैः प्रोक्तं पुराणं पञ्चलक्षणम् । (कौ० १–५ व्याख्या)

इत्यर्थशास्त्रजयमङ्गलोद्धृतस्य पूर्वोक्तवचनस्यामरकोषकर्तृसमकालिक कौटिल्यकृतार्थशास्त्रीयपुराणपदार्थप्रतिपादकस्य तत्पूर्वतनव्याख्यापरम्परागतस्योपलभ्यमानत्वेनामरकोशगतपञ्चलक्षणपदस्यापि तादृशार्थपरत्वे नास्त्येव शङ्कावकाशः।

''सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च ।

इति वाक्यस्यापि ''मन्वन्तराणि सद्धर्मः'' इति वचनप्रामाण्येन तादृशार्थप्रतिपादकत्वमिति स्फुटं प्रतीयते। स्पष्टीकृतोऽयमर्थ उपक्रमे एवास्माभिः।

एवं सति आधुनिकैरितिहाससंशोधकैः राजनीतिशास्त्रस्यापर्यालोचनेनासूययेव कृता एते सर्वेप्याक्षेपा अश्रद्धेया एव।

तथाहि –यदुच्यते-आख्यानम्, उपाख्यानम्, गाथा कल्पोक्तिश्चेति चतुष्टयमेवैतेषां पञ्चलक्षणानां मूलमिति, तत्र पुराणस्थानामाख्यादीनां मूलत्वमपेक्षितं ?' वा वेदादिस्थानामाख्यानानामिति प्रथममालोचनीयतामर्हति। आद्यपक्षे स्फुट एवात्माश्रयदोषः द्वितीयपक्षस्तु इष्यत एव।

किञ्च ''यद्ब्रह्मणानीतिहासान् पुराणानि कल्पा गाथा नाराशंसीरिति''
(नै० आ० २–३ अ०)

तदिदं वेदवाक्यं भाष्यकृता एवं व्याख्यातम्—

''इतिहासा महाभारतादयः, पुराणानि ब्रह्माण्डादीनि, यद्वा देवासुराः संयत्ता आसन्नित्यादय इतिहासाः''। आत्मा वा इदमेकं एवाग्र आसीन्नान्यत्किंचन भीषदि''ति सृष्ट्यादिप्रतिपादकानि पुराणानि। कल्पाः कल्पसूत्राणि प्रयोगप्रतिपादकानि। गाथाः गायति चोदिता ग्रन्थविशेषाः, ''योस्य कोष्ठेत्यादयः, यमगाथाभिः परिगायती''ति विधानात्। नराशंसशब्दोपेता नाराशंस्यद्होता यक्षन्नराशंस'' मित्याद्याः मन्त्रब्राह्मणान्तःपठितानामपि पुनरुक्तिः फलातिशयद्योतनार्थमि''ति।

अत्र हि पुराणशब्दस्य व्याख्यायां ''सृष्टयादिप्रतिपादकानी''ति वदता भाष्यकृता सृष्टिप्रवृत्तीति पूर्वोद्धृतजयमङ्गलवचनमेव स्मर्यते राजनीतिगतत्वात्। सर्गश्चे' त्यादि वचनस्य स्मरणे सति सर्गादिप्रतिपादनकारीत्येवोच्येतेति विशेषः स्फुटः।

कौटिलीयार्थशास्त्रेऽपि ''पश्चिममितिहासश्रवणे पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थशास्त्रं चेतीतिहासाः'' इति।

अत्र ''भारतीभवनप्रकाशितेऽर्थशास्त्रे कौटिलीये आखयायिकोदाहरणम्—

असम्भूतकथावाक्यमुक्तप्रत्युत्तरान्वितम् ।
निदर्शनार्थमन्येषामुदाहरणमिष्यते ।।

जयमङ्गलाक्रोडपत्रम्

एतेन पुराणे धर्मस्यापि यन्निरूपणं कृतं तल्लोकस्य स्थितिहेतुत्वप्रदर्शनार्थं बोध्यम्। लोकस्य स्थितिहेतुत्वञ्च "सृष्टिस्थितिसंहारे"ति वाक्येन अतिप्राचीनेन जयमङ्गलायामुद्धृतेन साधितम्। अतः पुराणे धर्मनिरूपणम् अर्वाक्कालिकमिति आधुनिकानां मतं परास्तम्।

शूद्राणां कृते धर्मनिरुपणम्

ननु आस्तां पूर्वत एव पुराणे धर्मनिरूपणम्। परन्तु लोकस्थितये तदुक्तं तत्कथमुपपद्यते ? इति चेन्न। शूद्रा हि वेदाध्ययने अनधिकारित्वात्

यथा तन्त्रपञ्चकादि"। इति प्राचीन टिप्पणमुद्धृतं दृश्यते। जयमङ्गलाकृताऽपि आख्यायिकोदाहरणं "वर्जनसेवनफलं तन्त्राख्यायिकादि" इत्यादि वदता उक्त-टिप्पणस्यैवार्थोऽनुमोदितः।

एवंविधानामाख्यायिकानां पुराणमूलत्वमितिहासमूलत्वं चोदाहरणरूपत्वेनैव भवतीति स्पष्टोऽर्थः। पूर्वोक्तपुराणलक्षणप्रतिपादके सृष्टिप्रवृत्तीत्यादिवचने स्थिति-पर्यायायाः प्रवृत्तेरपि प्रतिपाद्यत्वावगमात्। जगत्परिपालनविषया अन्ये सर्वेऽपि धातु-वादादयः पुराणेतिहासान्तर्गता भवन्ति। स्त्रीशूद्रादिसर्वसाधारणेषु श्राव्यत्वोप-युक्तया रचनया महदुपकृतं पुराणैर्लोकस्येति स्थितौ सत्यां तदुपरि संशय-गर्भिताया दृष्टेर्निक्षेपणं त्वसूयाकल्पितमिव भवति।

एतेन 'वंशानुचरितम्' इत्यत्र भूम्यादेः संस्थानम् इति पाठान्तरं वर्णयित्वा आक्षेपोद्भावनमप्ययुक्तमेव। लोकोपयुक्तस्य सर्वस्यैव ज्ञानस्य पूर्वोक्तरीत्या पुराणेन वर्णनीयत्वे सिद्धे ज्ञानकोषरूपेषु सर्वस्यैवांशस्यावकाशसत्वात् उभयोरेव पाठयोः प्रामाण्योपपत्तेः। भागवतोक्तदशलक्षणान्यपि पूर्वोक्तपञ्चलक्षणाविरोधीन्येव। न ह्येकस्मिन् लक्षणे स्थितेऽन्यानि लक्षणानि न सम्भवन्तीति कश्चन नियमः। यथा न्यायशास्त्रे—

"वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्॥ (भाषा ४·३९)

इत्यादीनां बहूनां जातिपरिचायकानां जात्यघटितानां लक्षणानां वर्ण्यमानत्वस्य दर्शनात्। प्रयोजनं हि तद्विधानां बहूनां लक्षणानां, सर्वत्र अप्राप्तावपि केनचिदेकेनापि लक्ष्यनिर्णयः। तथा पञ्चलक्षणैर्दशलक्षणैर्वा का नामानुपपत्तिः निष्प्रयोजनता वेति नैव वक्तुं शक्यम्, दशलक्षणवर्जितानामपि पुराणत्वख्यापनाय पञ्चलक्षणस्या-वश्यकत्वात्। अत्रेदमवधेयम्—

राजनीतिशास्त्रं प्रत्यक्षादिप्रमाणत्रयनिर्णीतार्थप्रतिपादकमिति पूर्वमेव प्रतिपा-दितम्। राजप्रकृतिसमवेततयैव कार्यकारित्वाद्राजनिर्णयरूपमेव तदिति दृढनिर्णयेन वक्तुं शक्यते। एवंसति न्यायालयनिर्णयतुल्ययोगक्षेमेषु राजनीतिसिद्धान्तेषु सर्वैः शिष्टैरेकवाक्यतया परिगृहीतेषु सत्सु तानदृष्ट्वा इतिहाससंशोधनं विशेषतः प्राचीन वाक्येषु पुराणादिषु शङ्काविष्करणं च खेदायैव सहृदयानां भवति इति।

जयमङ्गलाक्रोडपत्रम्

यदि धर्मतत्वज्ञानाद्वञ्चिताः भविष्यन्ति तर्हि ते यथावद् अपेक्षितं कर्तव्यं न जानीयुः, न वा स्वे कर्मणि दृढव्रता भवेयुः, नापि च विश्वास्यत्वमर्हेयुः इति शूद्रसाधारण्येन धर्मज्ञापनद्वारा लोकस्थितये पुराणे धर्मो निरुक्तः। न च शूद्राः धर्मशास्त्रं कुतो न पठेयुः इति शङ्क्यम्। धर्मशास्त्रे अस्य निषेधश्रवणात्[1]।

शूद्राणां धर्मशास्त्राध्ययने अनधिकारोपपत्तिः

ननु शूद्रा हि सर्वथा साक्षाद् धर्मशास्त्रश्रवणे अनधिकारिण इति टिप्पण्युक्तैर्वचनैरवधार्यते। सोऽयं निषेधः शूद्राणां कृते केनोद्देश्येन अभिहितः? इति चेदभिधीयते।

समाजे घटकाः अष्टविधाः वर्गाः संभवितुमर्हन्ति। तद्यथा कामुकाः, विदग्धाः, श्रेष्ठिनः, विरागिणः, शूराः, ज्ञानवयोवृद्धाः, रसभावविवेचकाः, बालमूर्खाबलाः इति। एतान् सर्वान् संहत्य यथा समाजस्य रञ्जनं भवेत्तथा नटैः नाट्यमभिनेतव्यं भवति। अतएव नाट्ये उपर्युक्तानां समाजघटकानां प्रत्येकजनानां कृते तत्तदधिकारानुसारेण मनोरञ्जनाय शृङ्गार, वैदग्ध्य, हास्य, शान्त, नेपथ्य, शौर्यादिसूचनं अभिनयद्वारा अभिनेतव्यं भवति[2]।

तन्न्यायेन ऋषिभिः समाजघटकानां तेषां तेषामधिकारस्थितिं दृष्ट्वा तत्तदधिकारानुसारेण नाट्यस्थानीयं वाङ्मयमाबद्धमस्ति। अतः तत्र तत्र वाङ्मये तथाविधा एव अधिकारित्वेन शास्त्रकर्तृभिः उच्यन्ते। एवं स्थिते धर्मशास्त्रस्य पुराणस्य च श्रवणस्य अधिकारित्वं कुत्रास्तीति विवेचनीयतामर्हति। ये हि मीमांसान्याये

---

१ तदुक्तम् बालंभट्ट्याम्—

यान्येतानि त्वयोक्तानि धर्मशास्त्राणि सुव्रत।
नेच्छामि श्रोतुं विप्रेन्द्र गुह्यान्येतानि हि द्विज॥
त्रयाणामेव वर्णानां प्रोक्तान्येतानि पण्डितैः।
श्रेयसे न तु शूद्राणामत्र मे वचनं शृणु॥
ब्राह्मणादिषु वर्णेषु त्रिषु चेन्द्राः प्रतिष्ठिताः।
मन्वादीनि च शास्त्राणि न योग्यानि समन्ततः। इति

पुराणाध्ययनमपि निषिद्धं कौर्मे—

अध्येतव्यमिदं नित्यं विप्रैः पर्वणि पर्वणि
नाध्येतव्यमिदं शास्त्रं वृषलस्य च सन्निधौ।
योऽधीते चैव मोहात्मा स याति नरकान्बहुन्। ३८० शूद्राचारप्रकरण इति

२ तदुक्तम् भा० प्र० ८ सर्गे—

तुष्यन्ति तरुणाः कामे विदग्धाः समयाश्रिते।
अर्थेष्वर्थपराश्चैव मोक्षेत्वथ विरागिणः॥
शूरा बीभत्सरौद्रेषु नियुद्धेष्वाहवेषु च।
धर्माख्यानपुराणेषु वृद्धास्तुष्यन्ति नित्यशः॥
सत्वभावेषु सर्वेषु बुधास्तुष्यन्ति सर्वदा।
बाला मूर्खास्स्त्रियश्चैव हास्यनेपथ्ययोः सदा॥ इति।

जयमङ्गलाक्रोडपत्रम्

न्यायशास्त्रे च सम्यङ् परिनिष्ठिताः व्याकरणे च कुशलमतयः वेदस्याध्येतारः अव्यसनिनः भवन्ति ते एव धर्मशास्त्रश्रवणे अधिकारिणो भवन्ति। विप्रकीर्णानां धर्मशास्त्रेनिर्दिष्टाना वचनानां विरुद्धत्वेन भासमानानां यथावत् युक्तीः विचार्य धर्मशास्त्रीयवचनतात्पर्यनिर्णायकत्वस्य उक्तविधेष्वेव अधिकारिषु सत्वात्। अतः अतीव एकाग्रमनस्काः ये विदग्धाः मीमांसकाः तेषां मनोरञ्जनं धर्मशास्त्रसमन्वये भवतीति कृत्वा एतच्छास्त्रश्रवणार्थं अधिकारित्वेन ते उक्ताः।

ये च किल उक्तविद्यासु परिश्रमं कर्तुमसमर्थाः द्विजशुश्रूषाकारुशिल्पाद्यनेककर्मसु जीविकोपायेषु सदा निरताः शूद्रप्रभृतयः ते हि धर्मशास्त्रश्रवणे एतच्छास्त्रीयवचनतात्पर्यस्य निर्णयं कर्तुमसमर्थत्वात् अनधिकारित्वेन उक्ताः।

किञ्च एतस्मादेव कारणात् एतेषां समाजघटकानां मनोविनोदोऽपि परिश्रमबाहुल्यात् धर्मशास्त्रश्रवणे न भवितुमर्हति। मास्तां सः। इतिचेन्न। समाजघटकोऽयं वर्गः न शास्त्रकर्तृभिः उपक्षितुं शक्यः अन्यथा अङ्गस्येव समाजघटकस्य शूद्रस्य महतः वर्गस्य उक्तरीत्या उच्छेदप्रसङ्गात्। इत्येतत् सञ्चिन्तयद्भिः शास्त्रकर्तृभिः विद्यानां तात्पर्यचिन्तने सर्वथा अशक्तानां शूद्रादीनां कृते मनोविनोदमालक्ष्य तदधिकारानुरूपं पुराणश्रवणं द्वारीकृत्य धर्मतत्वं ज्ञापितम्।

यथा किल राजनीत्या तत्र तत्र स्थितानां स्वीयां स्वीयां मर्यादां चिन्तयन्त्या तस्मिन् तस्मिन् कर्मणि ते ते नियोज्यन्ते परिपाल्यन्ते च। तथैव धर्मशास्त्रश्रवणे समयाश्रितानां विदुषां, पुराणश्रवणे च शूद्राणामुक्तविधानामधिकारित्वं निर्णीतम्। अथ यदि व्यासेन पुराणे धर्मः न निरूप्येत तर्हि शूद्रादयः कर्तव्याद् वञ्चिता अवश्यं भवेयुरिति शूद्राणां कृते धर्मशास्त्रात्पार्थक्येन पुराणश्रवणे अधिकारित्वं सन्धाय प्रतिपाद्य च सर्वं धर्मतत्वं धर्मशास्त्रश्रवणे अनधिकारित्वमुपपादितम्।

देशव्यापकानाचारान्निवर्तनम्

न च तत्तन्मनोवृत्तियर्यादानुसारेण अधिकारिभेदमालक्ष्य धर्मशास्त्रश्रवणं पुराणश्रवणञ्च विधीयते निबन्धशास्त्रकर्तृभिः यद्यपि, तथापि धर्मशास्त्रश्रवणे अधिकृताः ब्राह्मणाः धर्मशास्त्रादि श्रुत्वाऽपि अनाचारे रथ्यादौ ताम्बूलभक्षणादिकर्मणि प्रवृत्ताः दृश्यन्ते तन्निराकरणविषये शास्त्रेषु किं चिन्तितम् इति शङ्क्यम्। ये हि अनाचाराः सर्वसम्मत्या लोकेषु संप्रवृत्ताः तेषां लोकसम्मतत्वात् पालने कृतेऽपि न दृष्टहानिः, इति भारतीयराजनीत्या आदिष्टत्वात्। एवं सत्यपि यथासंभवं लोकमतमनुकूलं कृत्वा ब्राह्मणान् अनाचारात्निवर्त्य पुनः स्वधर्मे यथा ब्राह्मणाः अनुवर्तेरन् तथा भारतीयराजनीत्या प्रयतितव्यम्[1]।

---

१ तदुक्तम्--

धर्मश्च व्यवहारश्च चरित्रं राजशासनम्।
विवादार्थश्चतुष्पादः पीश्चमः पूर्वबाधकः॥ इति। (व्यवहारप्रकारे)

जयमङ्गलाक्रोडपत्रम्

अतः ऋषिभिः धर्मशास्त्रश्रवणस्य पुराणश्रवणस्य च या मर्यादा निरूपिता अस्ति तद्विषये नाक्षेपः न वा पक्षपातः इति हृदयम् ।

इतिवृत्तस्योपयोगित्वम् ।

इतिवृत्तमिति--(ज० मं० पृ० ४३८) नन्वेवं "पुराणमितिवृत्तमि"त्यादिना पुनः इतिवृत्तस्य ग्रहणमयुक्तम् । पुराणेन गतार्थत्वात् इति वाच्यम्, पुराणस्य ईशपदार्थ-निर्वचने तात्पर्यात् नीत्यनुष्ठाने तात्पर्यासंभवात् । यतः तत्त्वंपदार्थयोः विचारप्रसङ्गे तत्पदार्थः पुराणेन ज्ञातव्यः, त्वंपदार्थश्च धर्मशास्त्रेण इति सूतसंहितादौ उक्तमस्ति । तदिदं प्राक् प्रपञ्चितमस्ति (पृ० ४४०) । तथैव विशेषतया पार्थक्येन उक्तं (पृ० ४३९) इतिवृत्तस्य उपयोगित्वं प्रागुक्तं स्मर्तव्यम् । अन्यथा चक्रवर्तिपदे एकसमये एक एव राजा समास्ते इति नियमात् तत्पदे समासीनेन राज्ञा व्याप्ति-निर्णयार्थं इतिहासः दृष्टान्तरूपेण अवगन्तव्यश्चेत् तत्प्रागभाविनः चक्रवर्तिनः इतिहासः अवगन्तव्यो भवति । सः अनुपपन्नः स्यादिति ।

'आख्यायिकोपयोगः'

तन्त्राख्यायिकादीति । (पृ० ४३८) ननु आख्यायिकोदाहरणस्य क उपयोगः ? इति चेदुच्यते । नीतिः यावत् नानुष्ठीयेत तावद् अस्याः साफल्यमभूत् इति वक्तुं न युज्यते, 'जितेन्द्रियस्य नृपतेः नीतिमार्गानुसारिणः' इति वचनात् । अतः नीतौ इष्टसाधनत्वेन सह कृतिसाध्यत्वमपि ज्ञातव्यं भवति । तत्र प्रवृत्त्युपयोगिनः इष्टसाधनताज्ञानस्य विषयींभूतं मुक्तं नीतिनिष्ठसाधनत्वं शास्त्रेण अवगतमपि तस्य दार्ढ्यार्थं दृष्टान्तरूपेण इतिहासः युज्यते । परन्तु तावन्मात्रेण प्रवृत्ति-विधेयकर्मणि कृतिसाध्यत्वं अज्ञातमेव भवति । अतः तदवगमार्थं तन्त्राख्यायिका उदा-हरणरूपेण उपवर्ण्यन्ते । अत्र प्रायः पशूनां स्वभावनिरूपणं कृतमस्ति । तस्य इदं महत्फलं यत् तेषां स्वभावः अधुनाऽपि एक रूप एव वर्तते । अतस्तत्परिचयेन कृति-साध्यता नीतिकर्मणि असन्दिग्धा भवति । एतदभिप्रेत्यैव च रात्रौ राजा कथं शयीत इति बोधनावसरे सारमेयस्य निद्रायाः उदाहरणमुच्यते । स्वल्पेनापि शब्देन यथा सः जागर्ति तथा स्वल्पेनापि तुरङ्गस्वनेन राजा जागृयादिति । एवमेव अन्यान्यपि पञ्चतन्त्रादौ निर्दिष्टानि उदाहरणानि तत्तदर्थे प्रयोक्तव्यानि । किञ्चात्र एकमन्यत् इतिहासोदाहरणं टिप्पण्यां उद्धृतमस्ति[1] तदनुसारेण तन्त्रे निरूपिताः पशूनामपराअपि आख्यायिकाः नीतौ कृतिसाध्यत्वनिर्णये उपयुक्ताः भवन्ति इति ध्येयम् ।

---

१ तंजावरक्षेत्रे एकं बृहदीश्वरमन्दिरमस्ति । तच्छिखरे महती एका शिला वर्तते सा शिल्पिभिः तत्र कथमवस्थापिता स्यात् इत्येकः महान् सन्देहो भवति । अस्य निराकरणाभावे तत्रावस्थितानुतान्दृष्टवा अद्यत्वे ईदृशं उच्चतमशिखरे शिला-स्थापनं शिल्पिभिः अशक्यमेवेति मन्तुं शक्येत । परं तत्रैव शिलास्थापने अस्मत्कृति-साध्यत्वं कथं भवितुमर्हति इत्यवगन्तव्यं चेत् एवं निर्णीयते आख्यायिकया, यत् तस्य मन्दिरस्य पुरतः एकं कलशपुरं वर्तते । तत आरभ्य मन्दिरशिखरान्तं यावत्, मध्येमार्गं

जयमङ्गलाक्रोडपत्रम्

पशुकृतिसाध्यं मनुष्येणापि साध्यम्

ननु पशूनामुदाहरणप्रदर्शनेन पशुकृतिसाध्यं यत्कर्म ज्ञातं तत्सर्वमपि मनुष्यसाध्यमस्तीति कथमवगन्तव्यम् ? मनुष्याणां पशूनाञ्च विजातीयसन्निवेशविशेषात् । इति चेन्न । मनुष्यः यद्यत् करोति तत्सर्वं पशुः अनुष्ठातुं न शक्नोति मानवीय कर्मोचितमांसपेशीनां तेषु निसर्गतः अभावात् । मनुष्यस्तु पाशवं कर्म कर्तुं शक्नोति पशुषु स्थितानां तदीयकर्मोचितमांसपेशीनां मानवशरीरे सत्वात् । न च तर्हि मानवेन पशूनां कर्म कुतो न क्रियते इति वाच्यम्, मानवशरीरे पाशवशरीरस्थितानां मांसपेशीनां सत्वेऽपि शुष्कत्वात् अनभ्यासात् असत्प्रायत्वात् । यदि अभ्यासान् मनुष्यः आत्मनः शरीरे स्थिताः पशुमांसपेशीः कम्पयित्वा वशीकुर्यात् तर्हि अयं पशुचेष्टया तत्संभाषणेन पशुत्वमात्मनि यथावत् व्यञ्जयितुं शक्नोतीति मनुष्यकृतेन पशूनामुच्चारणेन ज्ञातुं शक्यते । तदिदं न अविज्ञानसिद्धं शारीरविज्ञानेनापि अनुभूतत्वात् । अतः नीतौ कृतिसाध्यत्वज्ञापनाय तन्त्राख्यायिका इतिहासे मूलकृता अन्तर्भाविता ।

धर्मशास्त्रस्य ग्रहणं सार्थकम्

धर्मशास्त्रं मानवादीति । (पृ० ४३८) ननु 'सृष्टिप्रवृत्तिसंहारधर्ममोक्षप्रयोजनमिति' प्राचीनपद्यं उद्धृत्य जयमङ्गलाकृता पुराणस्वरूपं प्रदर्शितम् । एतत्पद्यवर्णनेनैव पुराणे धर्मस्य निरूपणं कृतमस्ति इत्यवगम्यते तथासति एतेनैव चरितार्थत्वे कौटिल्येन धर्मशास्त्रं कुतः पृथक् सङ्गृहीतमिति चेन्न । पुराणस्य श्रवणे शूद्रस्य प्राधान्येन अधिकारः इति (पृष्ठे ४४६) प्राङ्निरूपितमस्ति । न हि तत्र केवलं धर्मं एव निरूपितः अपितु अनेकविधप्ररोचनादृष्टया मध्ये मध्ये इतिहासाः आख्यायिकाश्च उपन्यस्ताः दृश्यन्ते । अतः तच्छ्रवणे तर्ककर्कशविचारचातुरीधुरीणाः न विशेषतया स्वदन्ते । तद्दृष्टया अनेकविधाः विरोधाभासाः यथा उन्मीलिता भवन्ति तद्व्यावृत्तये, तथा विप्रकीर्णवचनसरसि निमज्जनरसिकानां विदग्धानां कृते च धर्मशास्त्रं पृथङ्निरूपिततस्ति । इति अधिकारिभेदेन धर्मशास्त्रस्य न पुराणेन चरितार्थत्वमनुमन्तव्यम् । शेषं पुराणनिर्वचनप्रसङ्गे (पृ० ४४६) द्रष्टव्यम् ।

धर्मे स्थितिसाधनत्वम्

ननु लोकस्य स्थितये पुराणे धर्मः निरूपितः इत्युक्तं प्राक् । तस्य उपपत्तिः कीदृशी ? इति चेदेवं । पुराणं हि ईश्वरं निरूपयतीति (पृ० ४४०) प्रागभिहितमस्ति तेन इदं लभ्यते यत् ईश्वरसमवेतज्ञानमेव धर्मशास्त्रादिना जीवस्य भाति, सा च जीवसमवेत ज्ञानप्रभा आनन्दप्रभया न मिश्रिता चेत् तज्ज्ञानं सत्वपदव्यपदेश्यन्न भवति इति प्राग्व्याख्यातम् (शेष पृ० ६ द्रष्टव्यम्) अतः पुराणेन आनन्दप्रभामिश्रणद्वारा जीवः

मृत्तिकाराशिः अवस्थापितः तदाधारेण कलशपुरात् सा शिला रज्वादिभिः आकृष्य शिखरे संयोजिता । ततःमध्यस्थितः मृत्तिकाराशिः विदारितः इत्येवंविधाख्या—यिकाश्रवणानन्तरं शिखरप्रान्ते महत्याः शिलायाः संयोजनं मानवस्य कृतिसाध्यम्—इत्येवं निर्णयो भवति । अतः आख्यायिकाः कृतिसाध्यत्वनिर्णयाय उपयुज्यन्ते ।

शेषमहोरात्रभागमपूर्वग्रहणं [1]गृहीतपरिचयं च कुर्यात्। अगृहीतानां[2] आभीक्ष्ण्यश्रवणं च ॥

जयमङ्गलाक्रोडपत्रम्

ज्ञानप्रभायुक्तः सत्वगुणसंपन्नो निर्माप्यते। तावन्मात्रेण सः शक्तिमान् न भविष्यति अतः शक्तेरुद्बोधनाय कृतिसाध्यतां निर्णाययित्वा अव्यभिचारिण्याः क्रियाप्रभायाः संमिश्रणमपि आख्यायिकेतिहासेतिवृत्तधर्मक्रियाज्ञापनेन पुराणेन संस्थाप्यते इत्येवंरीत्या धर्मस्य पुराणे निरूपितस्य लोकस्थितिहेतुत्वं सङ्क्षेपतः अवगतं भवति। विशेषतस्तु शक्तिनिरूपणावसरे प्राक् (पृ० ४०) प्रपञ्चितमस्ति। तत् ततएव द्रष्टव्यम्।

श्रीमूला

शेषं मध्यमम् अहर्भागम् अहोरात्रभागमिति मूलग्रन्थेषु पठ्यते। तदा शिष्टं मध्यममहर्भागं, रात्रौ कार्यान्तरनिद्रादिविनियुक्तावशिष्टतया लभ्यमानं रात्रिभागं चेति व्याख्येयम्। अपूर्वग्रहणं प्रतिनवप्रमेयश्रवणं, गृहीतपरिचयं गृहीतधारणार्थं चिन्तनं च कुर्यात्। अगृहीतानाम् आभीक्ष्ण्यश्रवणम् ईषद्गृहीतान सम्यङ्मनः प्रवेशार्थं पुनः पुनः श्रवणं च।

वैदिकसिद्धान्तसंरक्षिणी

शेषमिति। हस्त्यादिप्रहरणदिविद्यायां इतिहासश्रवणे चापेक्षिताद्दिवसभागादवशेषमित्यर्थः। अपूर्वेति। पूर्वं षोडशवर्षावधि यन्न गृहीतं तस्य ग्रहणमिति तदर्थः। गृहीतेति। संस्कारदार्ढ्यार्थमेतत्। तथा च "अनभ्यासेन वेदानां ? आचारस्य च वर्जनात् आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" इत्युक्तानर्थापत्तिनिराकरणमेतत्फलं बोध्यम्। अन्यथा गृहीतस्य पुनः परिचयालाभेनानर्थक्यं स्यात्। परिचयं अभ्यासम्। अगृहीतानाम्। अनवधा[3]रितानामिति टिप्पणीपाठे सङ्गृहीते एतदर्थः स्फुटो भवति।

जयमङ्गला

शेष (म) इत्युभयशेषम् अहर्भागम्। अपूर्वग्रहणं विद्याग्रहणकाले अपरिसमाप्तानां ग्रहणम्। अगृहीतानाम् अशक्यग्रहणानाम्। अभीक्ष्णं पुनः पुनः श्रवणं च कुर्यात्।

---

१ नी० टि० **गृहीतपरिचयमिति।** अभ्यासः

२ ,, ,, **अगृहीतानामिति।** मनोधारितानामर्थानाम्।

३ टिप्पण्यां मनोधारितानां अर्थानां इत्युपलभ्यते किन्तु अनवधारितानां इति पाठो युक्तो भाति।

[विद्याश्रवणफलानि]

श्रुताद्धि प्रज्ञोपजायते, प्रज्ञया [1]योगः, योगादात्मवत्ता—इति विद्यासामर्थ्यम् ॥

श्रीमूला

श्रुतादिति। श्रुतात् श्रवणात्, प्रज्ञा त्रैकालिकी बुद्धिः उपजायते। प्रज्ञया योगः शास्त्रोक्तानुष्ठानश्रद्धा, योगाद् आत्मवत्ता मनस्विता सत्त्ववत्ता उपजायते। इति विद्यासामर्थ्यम् इत्येतद् विद्याशक्तिजन्यं फलमित्यर्थः।

वैदिकसिद्धान्तसंरक्षिणी

श्रुतादिति। विद्यावृद्धसंयोगप्रयुक्तात् सर्वशास्त्राभिगमनात्। प्रज्ञेति। अष्टाङ्गा शुश्रूषादिलक्षणा। योगः उत्थानं प्रवृत्तिः प्रयोग इति यावत्[2]। अयं उक्तप्रवृत्या संपादितो योगः कृतके विनये पर्यवसन्नो भवति। तथा च विनयविषये अयं निष्कर्षः—षोडश वर्षावधिकराजपुत्रस्य सहजो विनयो भवति ततस्तु कृत्रिमो भवति इति। वस्तुतः योगोऽत्रद्वितीयाध्यायोक्तदिशा (पृ० १४६) तर्कोऽभिनिवेशपर्यवसायी बोध्यः। आत्मवत्ता आत्मगुणसंपत्। तया च परोपकर्तृत्वं हितकारित्वं चात्मनि उत्पद्यते। एतेषां गुणानां गणनं नीतिसारे ३ सर्गे द्रष्टव्यम्[3]।

यदि आत्मवत्ता राज्ञि न भवेत् तर्हि तस्य स्नेहेन कोपेन वा जानपदस्य को वा लाभः कस्य वा निग्रहो भवेत्? इति राज्ञः अस्तित्वं आत्मगुणाभावे असत्प्रायं भवति। शेषं क्रोडपत्रे व्यक्तम्। विद्यायां सामर्थ्यं कीदृशमस्तीति भक्तिरसायनेन स्फुटं ज्ञेयम्[3]। अग्रिमाध्याये वक्ष्यमाणरीत्या ध्यानबलाद् विद्यामहिम्ना सेवकस्य चित्ते निविष्टो भगवान् सर्वान् प्रत्यूहान् विनाशयति विनयं आधापयति सत्फलं च वितरति।

---

१ नी० टि० योगइति। आत्मसम्पद्गुणैरिति शेषः

२ "आत्मसंपतगुणैः इति शेषः" इति (नी० नी०)

३ वाग्मी प्रगल्भःस्मृतिमान् उदग्रो बलवान् वशी।
नेता दण्डस्य निपुणः कृतविद्यः स्ववग्रहः॥
पराभियोगप्रसहः सर्वदृष्टप्रतिक्रियः॥
परच्छिद्रान्ववेक्षी च सन्धिविग्रहतत्त्ववित्॥ इति।
आदाता सम्यगर्थानां विनियोक्ता च पात्रवित्।
क्रोधलोभभयद्रोहस्तंभचापलवर्जितः।
परोपतापपैशुन्य मात्सर्येर्ष्यानृतातिगः।
वृद्धोपदेशसंपन्नः श्लक्ष्णो मधुरदर्शनः।
गुणानुरागी मितवागात्मसंपत्प्रकीर्तिता।

४ पदनखनिविष्टमूर्तिभिरेकादशतामिवावहन्निष्ठां
यं समुपास्ते गिरिशस्तं वन्दे नन्दमन्दिरे कञ्चित्।

[विद्यायाः सौराज्यमूलता]

विद्याविनीतो राजा[1] हि प्रजानां विनये रतः ।
अनन्यां[2] पृथिवीं[3] भुङ्क्ते सर्वभूतहिते रतः ॥ ६ ॥

इति विनयाधिकारिके वृद्धसंयोगः पञ्चमोऽध्यायः

वैदिकसिद्धान्तसंरक्षिणो

इदं विद्यासामर्थ्यं बोध्यम् । किञ्च योगसहितविद्यासु चतसृषु नीत्यनुष्ठानपर्यवसायितया अधीयमानासु सत्सु सर्वविधाऽपि हर्षस्य सामग्री वर्तते । तद्यथा ईप्सितार्थोपसङ्गमरूपाणां प्रियमोदप्रमोदानाम् त्रयाणामपि अत्र अस्तित्वं, विनयपुरस्सरं सञ्जातेन अध्ययनेन गुरुभर्तृप्रसादः, विश्वास्यत्वात् अभिरूपोभोगः, फलावश्यंभावात् बन्धुतृप्तिः सुभोजनं च अस्ति इति नीतीतरविद्यापेक्षयाऽत्र हर्षः[4] मनःप्रसादरूपः आह्लादकरः नियमेन वर्तते इति चतुर्विधविद्यायां उक्ताह्लादजनकत्वरूपं विशिष्टं, सामर्थ्यं संस्मरणीयम् । कुसुमाञ्जलि[5] कृन्मतानुसारेणपि शास्त्रस्य ईशपदरूपत्वात् विद्याचिन्तनं ईशपदचिन्तनमेव बोध्यम् ।

जयमङ्गला

कस्मादित्याह—श्रुताद्धीति । हि यस्मात् श्रुतादुपायपूर्वं प्रज्ञोपजायते । प्रज्ञया योगः कर्मसूत्थानम्, उद्योग इत्यर्थः । योगादात्मसम्पत् । अन्यथा ह्यविद्यमानकल्प एवायं स्यात्, इत्येतद् विद्यासामर्थ्यं वृद्धसंयोगजमित्यर्थः ।

जयमङ्गलाक्रोडपत्रम्

(श्रुतात् (पृ० ४५१) अगृहीतानां श्रुतादितिशेषः । तदुक्तं टिप्पण्याम्—'मनोधारितानामर्थानाम्' इति ।

श्रीमूला

विद्याविनीत इत्यादि । विनये शिक्षणे अनन्यां नाथान्तरशून्याम् एकनाथां इत्यर्थः । शेषं स्फुटम् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे पञ्चमोऽध्यायः । वृद्धसंयोगः ॥

नी० टि० १ **राजेति** । कुमारस्य भविराजत्वं द्रष्टव्यम् ।
,, ,, २ **अनन्यामिति** । अन्यनृपतिरहिताम् ।
,, ,, ३ **पृथिवीमिति** । प्रमाणतः फलतश्च ।
४ हर्षो मनःप्रसादस्स्यात् ईप्सितार्थोपसङ्गमात् ।
इष्टसङ्गमनात् देवगुरुभर्तृप्रसादतः ।
अभिरूपोपभोगाच्च बन्धुतृप्तेः सुभोजनात् ।
अचिन्त्येष्टार्थं सपत्तेः जायते सर्वदा नृणाम् ॥
५ सत्पक्षप्रसरः सतां परिमलप्रोब्दोधबद्धोत्सवो ।
विम्लानो न विभेदनेऽमृतरसप्रस्यन्द माध्वीकभूः ।—

वैदिकसिद्धान्तसंरक्षिणी

अन्ते पर्यवसितार्थमाह श्लोकेन विद्येति । राजेति । नृपतिरितिपाठान्तरम् । यद्यपीदं प्रकरणं राजपुत्रार्थं निरूपितमस्ति तथापि तस्य राजत्व[1]मादाय ग्रहणमिति बोध्यम् । प्रजानां विनयेरतः इति ।

यद्यदाचरतिश्रेष्ठः तत्तदेवानुवर्तते ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते । (श्रीमद्भागवद्गीता)

इत्युक्त्यनुसारेण "स यच्छीलस्तच्छीलास्तस्य प्रकृतयो भवन्ति" इत्युक्त्यनुसारेण च राजा स्वयमनुष्ठायोपदिशति प्रजाः । तदैव प्रजा राज्ञ उपदेशं कार्यपर्यवसायितया स्वीकर्तुं अर्हति नान्यथा । किञ्च यथा यथा राजा पावित्र्येण विनयपूर्वकं प्रवर्तते तथा तथा तच्छीरं अग्नियमादिदेवताः प्रविश्य राज्ञः तेजो वर्धयन्ति[2] । तत्तेजसैव प्रजा राज्ञः पुरतः विनीताः सत्यः मालामिव तदाज्ञां स्वीकुर्वन्त्यः अनुतिष्ठन्ति । इदं च राज्ञो मुखे देदीप्यमानं तेजः प्रजासु विनयप्रापणे हेतु मन्तव्यम् । अतएव तथाविधस्य राज्ञः पुरतः दुष्टा दण्डेन आत्मनः शुद्धिर्जातेति मन्वाना नियम्यन्ते । पुनश्च अपराधान् कर्तुं न प्रवर्तन्ते । तथा च कोशदण्डजं वृत्ताध्ययनजं च तेजः यदा सर्वान् विनीतान् कारयति तदा तेजःसंपन्नः राजा पृथ्वीं भुङ्क्ते इतिभावः । इदं हि सामर्थ्यं चत्तसृपु विद्यासु विनीतस्य जितेन्द्रियस्य सात्विकस्य नान्यस्येति बोध्यम्[3] । तदेवाहानन्यामिति । अन्यनृपति रहिताम्[4] । भुङ्क्ते पालयतीति तदर्थः[5] । अनेन आत्मनेपदप्रयोग उपपद्यते[6] । कथमिति तु जममङ्गलायां द्रष्टव्यम् । (पृ० ४५३)

इति वैदिकसिद्धान्तसंरक्षिण्यां अर्थशास्त्र टीकायाँ पंचमोऽध्यायः ॥

ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रमत् ।
चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः ।

१ कुमारस्य भाविराजत्वं द्रष्टव्यम् ।—नीति निर्णीति ।

२ अग्निवायुमार्काणामिन्द्रस्य वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभिर्निमितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥

तदेवाह कालिदासोपि—

स न्यस्तचिन्हामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥

३ नरेश्वरा यच्चरितानुकारंवाच्छन्ति कर्तुं न च पारयन्ति ।

४ मनुप्रभृतिभिमान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद् वसुन्धरा ॥–रघुवंश, सर्ग ४।७

५ प्रमाणतः फलतश्च ।

६ भुङ्क्ते । पालयित्वा फलमासेवते इत्यनवने


सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय